कृतज्ञतास्वीकारः ।

धर्मपरायणो विद्योत्साही पिठापुराधिपो राजा श्रीमद्रावुवेङ्कट-महीपति-सूर्यरायो कृपया श्रीमद्भगवद्गीतायाः समन्वयभाष्या-न्विताया द्वितीयसंस्करणस्य समन्वयभाष्यपद्धतिनामकस्याः पुनः मुद्रणाय साहाय्यमदात् । एतदर्थमुपकृतोऽयमस्माकं चिरकृत-ज्ञैव: बद्धात: कृतज्ञतापाशेन चास्माननकरोत् । भवतु तस्याविति प्रार्थनम् ।

प्रकाशकानाम् ।

[illegible]

सर्वोपनिषदामिव' परमरहस्यं पुरुषार्थप्रदं [illegible]
निवृत्तं कृतार्थमिव' श्रीमद्भगवद्गीता-शास्त्रमनुभूतिकविविधविचारदर्शनशतं [illegible] प्रत्यक्ष-
विचार्य * विविधा गीताव्याख्या विरचिताः, तत्तत्सम्प्रदाय प्रतिपत्त्यर्थमास्तदनन्तरं गीतानां व्याख्या-
नानु गीताः ६ अनादरेण गीतानिबन्धाः समानि विस्तृतानि । निर्मितानि च सर्वेषामपि विद्वन्नीयानां
वर्त्मनां गीतानुवादैश्च समर्थितं सर्वत्र तत्र प्रसंग प्राप्तं भाष्यकाराणां व्याख्यातॄणां च प्रकाशितत्वा-
त्सर्वं तदपि पुनरवतारयितुं सम्भवति विशेषेण्या सम्प्रदायमनुसारेण विचार्य करणीयं । यानि
भाष्याणि तु श्रीमच्छङ्कर, श्रीमद्रामानुज श्रीमन्माध्व', श्रीमद्वल्लभ. ; व्याख्यातॄणां श्रीधरस्वामि:
श्रीमन्मधुसूदन', श्रीनीलकण्ठ, श्रीविश्वनाथ: सम्प्रदायप्रवर्तकाचार्याणाम् । अन्यं यान्यपि
व्याख्यातॄणां व्याख्यानेषु दृष्टिनिक्षेपात्सम्भावना न येषोऽनुपलब्ध [illegible]-
स्ते । तेषु च श्रीमच्छङ्करभाष्यव्याख्याता श्रीमदानन्दगिरि, गीतार्थसङ्ग्रहकार. श्रीमदभिनवगुप्त',
श्रीमद्वल्लभसम्प्रदायानुगामितत्त्वदीपिकोक्त, गीतातात्पर्यनिर्णयप्रणेता भाष्यकारश्रीमदानन्दतीर्थ',
तद्भाष्यव्याख्याता प्रमेयदीपिकाकार श्रीमज्जयतीर्थ, गीतातात्पर्यबोधिनीनिबन्धा श्रीमच्छङ्करा-
नन्द, गीताप्रदीपकार[illegible], श्रीमद्वल्लभसम्प्रदायभुक्तौ गीतार्थविवरणकार: श्रीमद्विट्ठल:,
गीतासारार्थसंग्रहाख्य-गीताविवरणकृत्, [illegible], [illegible] श्रीमत्-
कल्याणभट्ट । अष्टाध्यायभाष्यारम्भे अत्र [illegible], "यद्यपि मया श्रीमच्छङ्करतदनुयायिनौ
श्रीमन्मधुसूदननीलकण्ठौ च तत्सम्प्रदायस्य प्रतिनिधितया, श्रीमद्रामानुजमाध्वाचार्यौ- तदी-
भाष्यानुसारिणौ तत्सम्प्रदायौ प्रतिनिधितया श्रीमद्वल्लभविट्ठलनाथावेवावलम्बितवती गीतार्थ-
निर्णयाय, तथाप्यन्ये व्याख्यातॄणां तत्सम्प्रदायानुवर्तिनां तथापि व्याख्यानमहत्त्वमपि
माहात्म्यमनादरणीयमस्ति । अत श्रीमत्कल्याणभट्टविरचितायां रसिकरञ्जन्यां 'पदे पदे प्रकाशमान:
रसविशेषैव पदार्थविभजनेन च भक्तिपक्षसमर्थनाय अस्मान् प्रमाद." इत्यादि, न तदनुजि-
घृति प्रदर्शनाय रसिकरञ्जन्या व्याख्यानशैलीमनुदिश्याम । 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म
मृतस्य च' (२।२७) इत्यस्य व्याख्यायां "न मन्युरस्य शोऽस्ति. विश्वामरस्य यदि यावत् तादृश
स. शिवौ अस्मान् सोऽस्तु, शिवस्यापि इत्यादिवितौ [illegible] हि ध्रुव. सदा
विराजमान., अतएव सदा भजनीय ।" इति, तथा 'विद्याविनयसम्पन्ने' (५।१८)
इत्यस्य व्याख्यायां "जातिः सुखदौःखितोर्दीपीति', यदा तदा: कर्मत: वेदपा [illegible] गीतायां
तदा विराजत इति सन: सर्वं अनयोः कृष्ण:, तमेव प्राप्नोति वा, किञ्चित्किञ्चिद्वा, शनै:
वा, पुन: वा इत्यादिरीत्या इष्टं श्रीकृष्णमानलोकं समदर्शिनम [illegible]. ।"

---

* एकत्रीकृत्य पञ्चदशविनमाधनियचारितं तम् । विविधा विविधा [illegible] सनी-
दृष्टि सापतत्त्वमिव' स्यात् ।

[illegible]

१८८१ शाके ।

प्रकाशयितृः

[illegible]

[illegible]: [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible], [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible], [illegible]—[illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] च [illegible]
[illegible] ; [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible], [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] निरन्तर-विरोध-प्रहतान्, न [illegible] [illegible] [illegible] [illegible]
कोऽपि [illegible] [illegible], [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] तेन [illegible], तेन च [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ।”

[illegible] “[illegible] [illegible]: पुनः [illegible] [illegible] [illegible]
इति । [illegible] [illegible] [illegible]
[illegible], [illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible]
[illegible]

[illegible] परित्यक्तवान्
[illegible] इति । [illegible] कोऽभिप्रा[illegible]
[illegible] भावेन तदुपसंहरेत् पूर्वभावेनेति ।
कथं पूर्वभावेनोपसंहरेत्? [illegible] प्रतिष्ठापितं [illegible]
[illegible] परित्याजयन् [illegible] विभक्तय[illegible] पूर्वभाव[illegible]
[illegible] । निखिलानि [illegible] परित्याजयितुं वि[illegible]
[illegible] तदिह [illegible] सर्वाणि [illegible]
[illegible] तथापि तथा [illegible]
[illegible] खलु [illegible] येन [illegible] च [illegible]
[illegible] ।

[illegible] खलु येन च [illegible]
[illegible] ([illegible]) इति । [illegible] भागवतं [illegible]
[illegible] । [illegible]
[illegible] इति [illegible]
[illegible] । [illegible]
[illegible] । कोऽसौ [illegible] ; कोऽसौ [illegible]
कोऽसौ [illegible] ; कोऽसौ [illegible] स भगवान् । [illegible]
[illegible] परं [illegible] जयति जीवेषु च [illegible]
[illegible] जयति जीवेषु च तथा दर्शनं विना [illegible] न [illegible]
जीवेषु जयति च तस्मिन् दृष्टे तेषां [illegible]
वैदिककर्म [illegible] , न पुन[illegible]
[illegible] । वैदिकधर्मः [illegible] खलु [illegible]
[illegible] । न हि ते [illegible]
[illegible] । तथापि [illegible]
[illegible] परित्याजयतो[illegible]

[illegible]

यतो [illegible], यतो [illegible], यतो [illegible] [illegible]
[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]। योऽसौ [illegible] [illegible]
[illegible] [illegible] [illegible]। [illegible] [illegible]
[illegible] ; [illegible]। [illegible]
[illegible], न केवलं [illegible] [illegible]
[illegible] च [illegible] [illegible]। [illegible]।
[illegible] [illegible] [illegible] न [illegible] [illegible]।
[illegible] [illegible] [illegible] [illegible]
[illegible] '[illegible] भूतानि [illegible] [illegible]' [illegible]
इति। योऽसौ न केवलं [illegible] [illegible] [illegible]
[illegible] [illegible] योऽयं [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible]
[illegible]
सोऽयं भगवान् [illegible] [illegible]
स न कदापि [illegible] ; [illegible] [illegible] [illegible]
[illegible]।

यद्यपि परमपुरुषे जगति जीवे च [illegible] [illegible]-
भावः [illegible]। [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] परमपुरुष इति [illegible]। [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible], [illegible] [illegible]-
[illegible] [illegible]; [illegible] [illegible]; [illegible] च
च [illegible]; [illegible] [illegible] [illegible] [illegible]-
[illegible] [illegible] च [illegible] [illegible] [illegible]-
[illegible] [illegible] [illegible] [illegible]। [illegible]
[illegible], [illegible] [illegible] [illegible] [illegible] च [illegible] [illegible]

[illegible]

[illegible] ([illegible]) [illegible] स्तीयते । [illegible]
[illegible] सर्व पंचमयुखं [illegible] यदा [illegible]
निर्माणं परितद्ध समर्थयति [illegible] [illegible]
[illegible] यदा [illegible] परमपुरुषप[illegible]
[illegible] [illegible] यदा ज्ञाननिष्ठा ; [illegible]
[illegible] सर्वति परमपुरुष एव सर्वेषां तदा [illegible]
[illegible] यदा [illegible] । [illegible]
[illegible] यदा [illegible] [illegible]
[illegible] । [illegible] परमपुरुषोऽपि [illegible]
[illegible] [illegible] [illegible] [illegible], [illegible]
[illegible]

[illegible]

[illegible]

[illegible] निर्दिष्टः । [illegible]

[illegible] तदा [illegible]

[illegible]

[illegible] च [illegible] भवति । [illegible]

[illegible] किञ्चित् कुर्वन्तीति न वक्तुं शक्यते । [illegible]

[illegible]

[illegible]

[illegible] सर्वथा [illegible]

[illegible]

[illegible]

[illegible]

[illegible] ; [illegible] । [illegible]

[illegible] निरन्तर-विरोध-प्रहतान्, न [illegible]

[illegible] ।”

[illegible] इति । [illegible]

[illegible]

[illegible]

[illegible] प्रवृत्तोऽयं [illegible] परिसमाप्यत्
[illegible] [illegible] इति । [illegible] कोऽभिप्रा[illegible]
[illegible] [illegible]भावेन [illegible] पूर्णभावेनेति ।
[illegible] पूर्णभावेनाकरोत् ? नैवं प्रतिज्ञापितं [illegible] [illegible]
[illegible] परिपालयत् [illegible] विभक्त[illegible] पूर्णता[illegible]
[illegible] । [illegible] [illegible] परिणामयितुं वि[illegible]
[illegible] [illegible] [illegible] सर्वाणि [illegible]
[illegible] [illegible] अपेक्षते, यथापि तथा [illegible]
[illegible] वस्तु [illegible] येन [illegible] च [illegible]
[illegible] ।

[illegible] वस्तु येन च [illegible]
[illegible] (९।११।२४) इति । [illegible] भागवतं '[illegible]
[illegible] [illegible] । [illegible] अतो[illegible]
[illegible] ? इति येन [illegible] [illegible] [illegible] च
[illegible] [illegible] । [illegible] [illegible], [illegible] [illegible]
[illegible] । कोऽसौ [illegible] ; कोऽसौ [illegible]
कोऽ[illegible] [illegible] ; कोऽसौ सर्वान्तर्यामी: स भगवान् । [illegible]
[illegible]: परं [illegible] जगति जीवेषु च [illegible], [illegible]
[illegible] जगति जीवेषु च तस्य दर्शनं विना 'तत्त्वदर्शनं' न [illegible]
जीवेषु जगति च तस्मिन् दृष्टे तेषां [illegible] [illegible] तद्[illegible]
[illegible] [illegible] [illegible], न पुन[illegible]भावेन
[illegible] । [illegible]: [illegible] वस्तु [illegible]:
[illegible] [illegible] [illegible] । न हि ते कुत्रापि [illegible]
[illegible] [illegible] निवृत्तवन्तः । यथापि [illegible] प्रति[illegible]
[illegible] [illegible] परिपालयतो[illegible]

[illegible] [illegible] ११।२६ [illegible] [illegible]

यतो ब्रह्म, यतो प्रकृतिः, यतो देवतेति [illegible]
[illegible]
[illegible] । सोऽसौ [illegible]
[illegible] । [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति । सोऽसौ न केवलं [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
सोऽयं भगवान् [illegible]
स न कदापि [illegible]
[illegible] ।

यदपि परमपुरुषे जगति जीवे च [illegible]
[illegible]
[illegible] परमपुरुष इति [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible] ([illegible]) [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] तदा [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] तदा [illegible] परमपुरुष[illegible]
[illegible] [illegible] [illegible] तदा [illegible] ; [illegible]
[illegible] [illegible] भवति परमपुरुष एव [illegible] तदा ।
[illegible] यदा [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] यदा [illegible] विशेषः [illegible]
[illegible] [illegible] [illegible] । [illegible] परमपुरुषेण [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible], [illegible] [illegible]
[illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible] परमपुरुषेण [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible]

[illegible]

[illegible]

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible]: । [illegible], [illegible] [illegible] । [illegible]

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] च [illegible] [illegible] भवति । [illegible] यदा [illegible],

[illegible] [illegible] च किञ्चित् कुर्वन्तीति न वक्तुं शक्यते । यो

वा [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

[illegible] [illegible] [illegible] [illegible] [illegible] अपि

[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] [illegible] [illegible] [illegible] [illegible] । [illegible]

[illegible] [illegible] [illegible] [illegible] च [illegible] [illegible] (

१६) [illegible] [illegible] [illegible] [illegible]

[illegible]

काममुद्दीपयते (२।६२)। अथ चेत्रादित एवात्मनि कामस्तिष्ठेत् विषयानुध्यानान्नोत्पद्येत कामः। सुतरां प्रागेव तस्मिन् काम आसी-दित्यभ्युपगन्तव्यम्। विषयसंसर्गवादुद्दीप्तः स आत्ममाहार्षीत्। नासीत् स आत्मनि किन्त्विन्द्रियेषु मनसि बुद्धौ च (३।४०)। इन्द्रियेषु मनसि बुद्धौ च प्रवृत्तिप्रधानरजोगुणसंस्पर्शादुत्पद्यते कामः (३।३७); स एव विषयान् प्रत्यनुरागमुत्पादयते, जनेन वस्तुना वा प्रतिहतो विद्वे-षञ्च। इन्द्रियाधिष्ठितकामादुत्पन्नौ रागद्वेषौ विषयानुध्यानेन नित्य-मनुस्यूतौ तिष्ठतः (३।३४)। इन्द्रियाणि यदा भगवत्परायणस्य (२।६१) आत्मनो वशवर्त्तीनि, भवन्ति तदा तान्यनुरागद्वेषशून्यानि, मनश्चात्मवशे तिष्ठति। अस्यामवस्थायामिन्द्रियगोचरसंसर्गेऽपि तिष्ठत्यात्मा निर्व्विकारः।

यदुक्तमुपरि तेन च कथा साधनरीतिरस्य शास्त्रस्य, प्रतिभाति सा विनायासं किञ्चिच्चित्ताभिनिवेशेन। देहेन्द्रियप्राणानां क्रिया अवश्य-म्भाविन्यः। तासु यस्यां कस्यामप्यनुरागो द्वेषो वोपतिष्ठमानो जीवस्य बन्धनाय भवति। कथं वा तस्मादनुरागाद्द्वेषाद्वा विमुक्तिः स्यात् तदेव प्रथमं विवेचनीयम्। देहेन्द्रियप्राणेभ्य आत्मा स्वतन्त्रः, तेषां कर्त्ता नात्मन इति दृढ़प्रत्यये तेषां स्वभावसिद्धे कर्म्मण्यात्मा निर्व्विकार एव तिष्ठति (५।८।९)। तदेव तन्निर्व्विकारत्वं विघ्नोपद्रुतं भवति, यदा तेषु तेषु कर्म्मसु रागद्वेषौ युज्यते। तयोर्वश्यत्वमनापन्नो (३।३४) विषयेन्द्रियकर्म्मस्वात्मा न बध्यते। दृश्यते च, कामजनितरागद्वेषा-भ्यामात्मज्ञानं यदा प्रच्छन्नं भवति, तदा मनःसंयमे सत्यपि सुदृढ़प्रयत्ने न स्वतायते (२।६०)। किं कर्त्तव्यमस्यामवस्थायाम् ? विषयप्रति-ष्ठितमनुरागं विषयाद्विनिवर्त्त्य भगवति तं प्रतिष्ठातुं यतेत (२।६१)। प्रयत्नस्यास्य सिद्धिर्ब्रह्मपरिचयेन (६।३०) ब्रह्मसंस्पर्शसुखेन च (६।२८)। भगवत्यनुरागे प्रतिष्ठिते नावतिष्ठते सङ्गः कर्म्मस्विन्द्रियाणाम्, अतस्त-ज्जनितफलेष्वपि भवति मनः स्पृहाशून्यम्। अस्यामवस्थायामध्यात्म-दृष्ट्या भगवत्प्रेरणामनुभूय तस्मिन्निखिलं कर्म्म समर्प्य (३ । ३० ;

५।१०) क्रियमाणं कर्म्म कथञ्चिदपि साधके विकारं नोत्पादयते। तथापि कर्म्म समर्प्य कर्म्म करोतीत्यस्य कोऽर्थः? कर्म्माण्येतानीश्वरा-भिप्रेतानि, अतो नैषां कर्त्ताऽहमिन्द्रियाण्येवेत्यर्थः। एतानि कुर्व्वन्नस्तस्याभिप्रायानुसरणं स्मरति, न ममास्ति तदभिप्रायपालनं विना फलान्तराकाङ्क्षा। इदमेव वक्तुमुचितं यन्निजबलेनेन्द्रियाधि-ष्ठितरागद्वेषौ निर्जित्य मनः स्ववशे स्थापयन्नात्मा स्वस्वरूपेऽवतिष्ठत इतीमं पुरुषकारस्य पन्थानं न खलु गीता सर्व्वथापेक्षितवतीति लक्ष्यते। यतः स्थितप्रज्ञतावर्णने तस्यैव प्राधान्यं प्रतीयते। स्थितप्रज्ञतायामा-त्मनो यद्बलं प्राकट्यं भजते, तन्मूले भगवद्बलं प्रच्छन्नमवतिष्ठते, अतः स्थितप्रज्ञतावर्णनोपसंहारे प्रागिन्द्रियसंयमे विघ्नं प्रदर्शयन्ती सा तत् प्रच्छन्नबलं प्रकटीकर्त्तुं भगवत्परायणत्वे साधकं न्ययोजयत् (२।५८।६१)। इन्द्रियसंयमाय ये पुनः केवलं पुरुषकारमेवाश्रितवन्तस्तेषां भूयो भूयोऽकृतार्थता प्राप्नोति, तत्राश्रितं पुरुषकारेण भगवत्परायण-तायाः सम्मेलनं प्रकृष्टोपाय इति।

भगवत्सु प्रत्यनुरागस्तत्स्वरूपविभूत्यादीन्यविदित्वा जातु नोदेति। केवलं तज्ज्ञानेन नोदेति सः। पुनः पुनस्तस्मिंश्चित्तसमाधानेन भजन-वन्दनादिभिश्च तस्मिन्ननुरागः स्थिरतामुपैत्यतस्तेषां प्रयोजनम्। गीताया द्वितीयषट्कस्यात एवावतारणा। 'ज्ञानमिदमपरोक्षज्ञान-मूलकमिति विज्ञानप्रधानम्' इत्युक्तं प्राक्। सप्तमे नवमे 'सविज्ञानं ज्ञानं वक्ष्यामि' इत्युक्त्या तदेव ध्वनितम्। गीता—ब्रह्मविद्या ब्रह्म-विज्ञानम्। ब्रह्मणः स्वरूपं लक्षणञ्च, जीवेन जगता च ब्रह्मणः सम्बन्धः, जीवजगतोर्ब्रह्मशक्तित्वम्, जीवजगतोः स्वरूपम्, भवति यत एतेषां ज्ञानप्राप्तिस्तदेव ब्रह्मविज्ञानम्। ब्रह्म जीवो जगत्, एतेषां स्वरूपं प्रत्यक्षगोचरीकृत्य ज्ञानमुपदिष्टमत एषा ब्रह्मविज्ञानसंज्ञया संज्ञिता। स्वरूपप्रत्यक्षगोचरतयोपदेशदानस्येदं फलं यत् तेनोपदेश-मापरस्यापि स्वरूपप्रत्यक्षता सुलभा भवति। ब्रह्मतत्त्वं प्रवक्तुमाहा-चार्य्यः प्रथमतः—अहमेव निखिलजगदुत्पत्तिप्रलयस्थानम् (७।६);

जीवः प्रकृतिश्च तस्यैव शक्तिः (७।४।५); जीवो निखिलं जगच्चैत-च्छक्तिद्वयमूलको (७।६)। एतज्ज्ञानं सर्व्वेषां साधारणम्, अतो विशेषज्ञानोपदेशार्थमाह गीता—चक्षुराद्यविषयं ब्रह्म निखिलं जग-द्व्याप्य स्थितम्, अस्ति हि जगत्तदाश्रित्य, न तु तज्जगदाश्रित्य वर्त्तते, तत् स्वयं जगत्संस्पर्शवर्ज्जितं, तद्भावेनैव तत् जगत् पालयति धार-यति च (९।४।५)। शक्तिमात्रं चिन्मात्रं ब्रह्म जगदाश्रयो जगता-संस्पृष्टमिति कथञ्चिदुच्यते, किन्तु नैतत्तत्प्रत्यक्षज्ञानम्। तदैव तत् प्रत्यक्षज्ञानं भवति यदैव तत् दुर्बुद्धिनिर्बलस्य बलमित्यादिरूपेण (७।८ —११) दृग्गोचरीभवति। ब्रह्मणो जगदुत्पत्तिः, ब्रह्मणि तस्य स्थितिः, ब्रह्मणि तस्य प्रवेश इत्युक्ता तस्य कारणस्वरूपम्, तदस्माकं दुर्बुद्धि-बलस्य बलमित्युक्ता। तेनास्माकं साक्षात्सम्बन्धः, ज्ञानरूपेण शक्तिरूपेण च तेनास्माकं स्वरूपैक्यञ्चाभिहितम्; अधुना जीवास्माभिस्तस्य विशेष-सम्बन्धः स ज्ञातव्यः। तदस्माकं पिता माता धाता पितामहश्च (९। १७) भर्त्ता, प्रभुः, साक्षी, सुहृत्, आश्रयः, गतिः, निवासश्च (९।१८)। कथमस्माभिस्तदन्वेषणीयम्? अक्षरपरमपुरुषरूपेण। निखिलं जग-द्यदा नासीदासीदयमक्षरः, निखिलजगद्विलयेऽपि सोऽयमक्षरो न विलो-यते (८।२०)। अक्षरोऽपि चक्षुराद्यविषयं सत्तामात्रं (१२।३)। सत्तामात्रेण तं प्रथमतः साधकः सर्व्वातीतभावेन धारयेत्, ततोऽन-न्तरं तस्यां धारणायां दृढ़निष्ठस्तं सर्व्वगतसर्व्वान्तर्भावकपरमपुरुषरूपेण धारणाविषयं कुर्य्यात्। अयमक्षरः परमपुरुषो गीतोक्तोपास्यदेवता, आत्मात्मन इति चिन्तनीयः (१०।२०)। अनन्यचेतसास्मिन्ननुरागे समर्पितेऽयमन्तश्चक्षुर्गोचरो भवति (११।५४); तच्चित्ततद्गतप्राणतत्-कथानिरतभक्तहृदये ज्ञानालोकः सन् स प्रकटीभवति तदज्ञानान्ध-कारविनाशाय (१०।९—११)।

एतावन्मात्रेण ब्रह्मविज्ञानस्य पर्य्याप्तिरतो विशेषभावेन ब्रह्मविज्ञानं प्रवक्तुं गीताया अन्तिमषट्कस्यावतारणा। प्रथमतः प्रकृतिपुरुषयो-र्भोग्यभोक्तृविषयविषयिसम्बन्धरूपता (१३।२०), को वा तदुभयोः

सम्बन्धः स प्रदर्शितः। तदनन्तरं प्रतिहृदयं परं ब्रह्मात्मनः परमात्मा सन्निरन्तरं नियमति, स्वस्यानुमोदनमननुमोदनञ्च ज्ञापयतीत्युक्ता प्रतिजनवर्त्तिनं परमात्मनः साक्षात्सम्बन्धं पूर्व्वोदितादपि स्फुटतरमकरोत्। प्रकृत्या सम्बन्धो जीवस्य स्वयं परब्रह्मणा युज्यतेऽतः स पिता (१४।४) इत्युदित्वा पूर्व्वोदितपितृसम्बन्धो भृशं दृढ़ीकृतस्तेन। प्रकृत्या सम्बन्धवशात् सत्त्वं रजस्तम इति गुणत्रयेण भवति जीवस्य सम्बन्धः (१४।५), तेन च ज्ञानं कर्म्मोद्यमोऽज्ञानञ्च तस्मिन् प्राधान्यं लभते (१४।११—१३)। यस्मिन् जीवे यस्य गुणस्य प्राधान्यं तदनुगुणा एव तस्याचारव्यवहारादयो भवन्ति। सत्त्वरजस्तमोगुणतो यानि बन्धनकारणान्युपतिष्ठन्ते तान्यतिक्रान्तुमाहारव्यवहारादिपरिवर्त्तनेन बन्धकं गुणं निर्ज्जित्यानुकूलं ज्ञानं स वर्द्धयेत (१४।१०)। आत्मा गुणेभ्यः स्वतन्त्र इति ज्ञाने प्राज्ज्वले सति गुणानतिक्रम्य भगवद्भावप्राप्तिः सुलभा (१४।१८)। यदा भवति साधको गुणातीतस्तदा गुणस्वभावाद्यानि गुणकार्य्याण्युपतिष्ठन्ते न तानि स द्वेष्टि तेष्वनुरज्यते वा (१४।२२)। तानि स स्वात्मकल्याणोपायत्वेन परिणामयति। यथा, तमोगुणाद्यदज्ञानमुपतिष्ठते तदज्ञानं यान् यान् विषयानधिकृत्य कल्याणाय भवति तेषु तेषु नियुञ्जीत, एवं रजोगुणसम्भूतं कार्य्योद्यमं भगवदाराधनासेवादिषु च। येन स्वभावेन यो जातस्तं स्वभावमनादृत्य सहसा स सिद्धिं लभेतेत्यसम्भवम्। अतः स्वभावसिद्धकर्म्मणा भगवदाराधनं तस्य श्रेयःसाधकम् (१८।४६) यतः काले ततोऽप्युच्चोच्चतरभूमावारोहणं सम्भवति। 'सहजं कर्म्म कौन्तेय सदोषमपि न त्यजेत्। सर्व्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः।' (१८।४८) इत्युक्त्वाचार्य्यः प्रतिपादयति,—अग्निर्यथा प्रज्वलितावस्थायाः प्राक् धूमेनावृतस्तिष्ठति, प्रज्वलिते पुनः प्रबलवेगेन धूमो नावतिष्ठते, एवं प्रथमं प्रथमं स्वभावसिद्धकर्म्मानुष्ठाने दोषो विद्येत, किन्तु फलसङ्गपरित्यागेनेश्वरमुद्दिश्य कर्म्मानुष्ठानतो दोषोऽपसरति, तेन च साक्षादीश्वरदर्शनसिद्धौ सिद्ध्यति परमनैष्कर्म्यमिति। वस्तुतस्तु भगवदाराधनमेव स्वभावसिद्ध-

कर्म्मणामुद्देश्यं चेत्, तेनैं स्यादृचासनाकामनासंयोगः। एवमन्यवास-नाकामनाः परित्याय भगवदाराधनं कुर्व्वतो भगवता साक्षात्सम्बन्ध उपतिष्ठते। साक्षात्सम्बन्धप्राप्तिरोहितकर्म्मफलसङ्गो भगवदाज्ञा-पालनायैव कर्म्म करोति; एवं कर्म्मणि प्रवृत्तस्यापि कर्म्माकरणरूपं परमनैष्कर्म्म्यं सिद्ध्यति (१८।४९)। परमनैष्कर्म्म्यसिद्धौ भगवता योऽसौ साक्षात्सम्बन्धः समुपजायते तस्यैवाविच्छेदेन चिन्तायां विद्य-मानत्वे परा ज्ञाननिष्ठोपतिष्ठते (१८।५०—५५)। परायां ज्ञान-निष्ठायां ब्रह्मणि स्थितिस्तेन च स्वरूपैक्यं भवति, स्वरूपैक्येन चात्मनि परब्रह्मणि च सर्व्वभूतानि पश्यति अन्ते परा भक्तिरुदेति (१८।५४)। उदितायां तस्यां स्वस्येदमिति वक्तुं किञ्चिदपि जीवे नावतिष्ठते, भगवती-श्वर एव तस्य सर्व्वस्वम् (१८।६६); तद्दर्शनवन्दनादिकमेव जीवन-स्यैकमात्रकार्य्यम् (१८।६५)। ब्रह्मणि स्थितौ न पुनर्भवति लोकलो-कान्तरभ्रमणम्, तस्मिन्नेव नित्यस्थितिः सिद्ध्यति। यावन्न स्याद्ब्र-ह्मणि स्थितिः, तावच्चित्तस्य भावमनुसृत्य जीवस्य लोकलोकान्तरे भ्रमणम्।

समासत उक्ता गीतायाः प्रतिपाद्यविषयाः। सम्प्रत्यर्व्वाचीनपण्डि-तानां तद्घटितानि कतिपयानि मतानि समालोचयामः। पुराणशास्त्रं विरचितं बौद्धधर्म्मस्याभ्युत्थानानन्तरमिति केषाञ्चिन्मतम्; यतो दृश्यते पुराणेषु बौद्धधर्म्मोचितविषयाणामुपन्यासः। शाक्योऽपि चरमबुद्धः, तस्योदयात् प्राक् बहवो बुद्धा आसन्। इदमपि वक्तुं नायुक्तं यदौप-निषदधर्म्मपार्श्वेऽप्यासीद्बौद्धधर्म्मः। अन्यथा कथमुपनिषदाह 'तद्धैक आहुरसदेवेदमग्र आसीत्' 'कथमसतः सज्जायेत' 'सत्त्वेव सौम्येदमग्र आसीत्' इति। विश्वासपार्श्वे चेत् संशयो नावतिष्ठेत, नवीननवीन-चिन्ता नवीननवीनसत्यानि नाविर्भवेयुः। वेदाद्वेदान्तेष्ववतरणं न सम्भवेत्, यदि वेदस्यान्तिमभागे संशयो नोत्तिष्ठेत्।—'इयं विसृष्टिर्यदि वा दधे यदि वा न। योऽस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद। (ऋक् सं १०म, १२९सू, ७ ऋक्)।

संशयोऽपि नूतनचिन्ताया मूलम् । अतो ये पूर्व्वबुद्धसत्ताः केवल-कविकल्पनाप्रसूता इति मन्यन्ते तेषां मते नास्माकं सम्मतिरस्ति । यदि कविसमुचितातिशयोक्तिमिथ्यावर्णनदर्शनात् पूर्व्वबुद्धा न स्वीक्रियन्ते तदा शेषबुद्धशाक्यघटितायुक्तवर्णनाच्छाक्यश्च नासीत् स इति सिद्धान्तो युक्ततरः । इतःपूर्व्वं कृस्तप्रभृतयो जर्म्मणपण्डिता ईशा इति नाम्ना कोऽपि नासीदिति प्रमाणयितुमयतिषत, अद्यापि नैदृक्पण्डिता विद्यन्त इति न वक्तुं शक्यते । विज्ञानप्रधानवर्त्तमानशताब्दीसम्भूता वैज्ञानिकपण्डिताः—वेदोक्ता इन्द्रादयो देवा न ते प्राकृतिकशक्तयः किन्तर्हि जनसमाजनेतार इति—वक्तुमुद्यताः । एके पण्डिताः प्रकृतजनान् स्वीकुर्व्वन्ति, अन्ये पुनः—प्राचीनग्रन्थसमूहेषु न सत्यारोपणानि, प्राकृतिकशक्तिसमूहेषु न देवत्वं परिकल्पितम्, आसंस्ते प्रकटमानवा इति विघोषयन्ति । एतत्पक्षद्वयस्यान्यतरमनाश्रित्य माध्यमिकपथावलम्बने वयं कृतसङ्कल्पाः । मध्यपथावलम्बिनो वयमतएव वदामः,—शाक्यस्य पूर्व्ववर्त्तिनो बुद्धा अकल्पितजनाः, तैः प्रचारितं धर्म्ममुद्दिश्य रामायणादिषु बौद्धधर्म्मस्योल्लेखोऽस्तीति ।

शाक्यस्योदयात् प्राक् गीताया अभ्युदय इति निर्द्धारयितुं न वयमण्वपि कुण्ठितमनसः । यस्मिन् समये शाक्योऽजायत, तदा मथुरानगरे सूरकंसकुलसम्भूतः सुबाहुनामा, हस्तिनापुरे पाण्डवकुलप्रसूतः शूरनामा च नृपती राज्यमकुरुताम् । कंसो दस्युरासीत्, युधिष्ठिरादयः क्षेत्रजतनयाः, अतो दोषदुष्टत्वात् तयोः कुले शाक्यो न जायेतेति बौद्धानां प्रतिज्ञा प्रमीयते शाक्योत्पत्तेर्बहुकालात् प्राक् समग्रमहाभारतं निबद्धमिति * । अनुगीतायामुदाहृतान् विविधमतभेदानधीत्य जैन-

* "एवं वैश्रवणातिरेकसदृशं व्यक्तं कुवेरोऽप्ययम् आहो वज्रधरस्य वैष प्रतिमा चन्द्रोऽथ सूर्योऽप्ययम् । कामोऽङ्गाधिपतिश्च वा प्रतिकृती रुद्रस्य कृष्णस्य वा श्रीमान् लक्षणचित्रिताङ्ग अनघो बुद्धोऽथ वा स्यादयम् ॥" (ल. वि. ११अ. ३गा) इति महीयफ्कोबोधितेन श्रीमद्धर्म्मोच्चमूलरीयोद्दिष्टा ललितविस्तरोक्ता गाथेयं श्रीकृष्णस्य देवत्वेन पूज्यत्वेन च यशः प्राक् शाक्योदयान्निःसंशयं प्रमीयते । 'कृष्णो महोत्साहः' इति च तस्य वीरत्वं सुव्यक्तमुद्घोषयति सः ।

बौद्धादिमतानि तदानीमासन्निति विश्वसितुं विशिष्टकारणमनुभूयते। वेदान्तसूत्रादिषु भिन्नभिन्नमतनिरसनाय यानि सूत्राणि सन्ति, तानि च तत्कालप्रचलितमतभेदानुद्दिश्य निबद्धानीति नात्र सन्देहः। शाक्य-बुद्धादर्व्वाक् गीता निबद्धेत्यस्य प्रमाणायानेके निर्व्वाणशब्दमुदाहरन्ति। वेदोपनिषत्सु नास्ति निर्व्वाणशब्दः। कुतोऽस्य गीतायामवतरणम्। अवश्यमेतं बौद्धेभ्यो गीताकारोऽग्रहीत्। बौद्धशास्त्रान्निर्व्वाणशब्दो गृहीतइत्यभ्युपगमे शाक्यत एव गृहीत इति न प्रमीयते। न केनापि वक्तुं शक्यते यत् प्राक् तस्मात् नासीदस्य शब्दस्य प्रयोगः। मैत्री, मुदिता, करुणा, शीलं, समाधिः, ब्रह्मचर्य्यमित्यादयः शब्दा ब्राह्मण्य-धर्मतो बौद्धधर्म्मे गृहीता इति नास्वीकर्तुं शक्यम्। वेदे चोपनिषत्सु नास्ति निर्व्वाणशब्दः, अतः स बौद्धधर्म्माद्गृहीत इति न युक्तियुक्तम्। यतो ब्राह्मण्यधर्म्मे प्रयोजनमनुसृत्य वेदाच्चोपनिषद्भ्योऽर्व्वाक् नवनवशब्दा उद्भाविताः। प्रकृत्या सम्बन्धनिवृत्तौ भवत्यात्मनः स्वरूपेऽवस्थानमि-त्येतच्छब्दे नैकेनाद्योतयितुं यदा प्रयोजनमासीत् तदैव ब्राह्मण्यधर्म्मे निर्व्वाणशब्दस्य प्रयोगोऽभूत्। 'युञ्जन्नेवं सदात्मानं योगी नियत-मानसः। शान्तिं निर्व्वाणपरमां मत्संस्थामधिगच्छति।' (६।१५) इत्यत्र 'निर्व्वाणं' 'मत्संस्था' चेत्यनयोर्युगपदुक्तत्वान्नेदं बौद्धनिर्व्वाण-मिति विस्पष्टम्। द्वितीयस्य पञ्चमस्याध्यायस्य चान्ते निर्व्वाणशब्दो-ऽस्ति, तथापि 'ब्रह्मनिर्व्वाणम्' इति प्रयोगः बौद्धनिर्व्वाणादस्य भेदं दर्शयति। देहविरहितत्वं निर्व्वाणशब्दस्यार्थः श्रीमच्छाङ्करभाष्येन कृतः। निरुक्ते वाणशब्दो वाक्पर्य्यायेषु परिगृहीतः। निरुक्तोक्तार्थग्रहणे निर्व्वाणशब्देन शब्दस्याविषयत्वं प्रतीयते। नामरूपं परिहाय भव-त्यात्मनो ब्रह्मैकत्वमित्युपनिषदो भूयोभूयोऽवादिषुः। शब्दस्याविष-यत्वं नामरूपपरिहारश्चेत्युभयमेकमेव ; यतो नामरूपं शब्दमूलकम् ; सृष्टिश्च शब्दपूर्व्विका, रूपं शब्दस्य विषयः। शब्दस्य विषयो नास्ती-त्युक्ते रूपस्याभावोबुध्यते। यदा रूपं नास्ति तदा भिन्नभिन्नरूपस्य भिन्नभिन्ननाम्नो विलोपः। नामरूपं परिहायात्मा स्वे स्वरूपे तिष्ठति,

स्वरूपे स्थितिरेव निर्व्वाणशब्दस्यार्थः । स्वरूपे स्थितौ ब्रह्मणैक्य-मुपतिष्ठते, अतो गीतायां सर्व्वत्र ब्रह्मसाधर्म्म्यरवशाज्जीवस्य ब्रह्म-सम्पन्नता, ब्रह्मणि निवासः, ब्रह्मणि प्रवेशः, ब्रह्मणि स्थितिर्वर्ण्यते । ब्रह्मसाधर्म्म्यं ब्रह्मणा स्वरूपैक्यावाप्त्यन्तरम् । एवमात्मनो नित्य-स्थितिर्गीतया यदागादि, न तदा बौद्धनिर्व्वाणकथा तामधिकृत्योदी-रयितव्या ।

जन्ममृत्युजराव्याधिदुःखानां भूयोभूयो दोषानुदर्शनं (१२।८) जन्ममृत्युजरादुःखानामतिक्रमश्च (१४।२०) गीतया यदोपदिश्येते तदा बौद्धधर्म्मोचितसाधनमोक्षग्रहणात् सेयं बौद्धधर्म्मादर्व्वाक् निबद्धेति वचनमकिञ्चित्करम् । वैराग्योत्पादनाय कुत्र कदा वा कस्य जनस्य जन्ममृत्य्वाद्यालोचना ततो विमुक्तिस्पृहा च न नैसर्गिकी । गीतायां स्थितप्रज्ञतालक्षणानि यान्युक्तानि तानि च बौद्धसिद्धार्थानामिति बौद्ध-शास्त्रे दृश्यते । एवमपि तानि बौद्धशास्त्रात् संगृहीतानीति वक्तुं न शक्यते ; यतः संयतमनसो यस्मिन् कस्मिन्नपि धर्म्मे पुनरेतानि लक्षणा-न्याविर्भवन्ति । गीतायां स्थितप्रज्ञतापि नेश्वरसम्बन्धविरहिता, तत् कथं सिद्ध्येदस्या एकभावापन्नता बौद्धधर्म्मेण । वदसि चेत्, बौद्धधर्म्मं प्रच्छाद्य ब्राह्मण्यधर्म्मप्रदर्शनार्थमेवमकरोद्गीताकारः, हठवाग्मितैषा तव । प्रतिपन्नश्चेत् प्रतिवदेत्—बौद्धधर्म्म एवेश्वरमपसार्य्यैतानि गीतातः संगृहीतानि, किं वा समुत्तरमस्य तव ? ब्राह्मण्यधर्म्मादेव यदा बौद्धधर्म्मस्यो-त्पत्तिः, ब्राह्मण्यधर्म्मादेव च विविधानि मतानि शब्दाश्चागृह्यन्त तेन, तदा चेत् काले बौद्धधर्म्मादुपयोगितावशात् कोऽपि शब्दो ब्राह्मण्यधर्म्मे गृहीत आसीत्, किन्तेन ? शाक्यादर्व्वाक् एष शब्दो ब्राह्मणैरास्मसात् कृत इति वचनं न शोभते, यतोऽयमासीत् प्रयुक्तः शाक्यात् प्राक् बौद्ध-मण्डल्याम् । सांख्यं योगश्च बौद्धधर्म्मस्य प्राग्वर्त्ती । सांख्यं योगञ्चा-श्रित्य गीतायाः प्रथमषट्कम निबद्धम् । सांख्येन योगेन च बौद्धधर्म्मस्य यादृक् सादृश्यम्, तादृक् चेत् प्रथमषट्केनास्य स्यात्, का क्षतिः ? अपि तु सादृश्यमेतत् प्रतिहतं ब्रह्मयोगेनेति सर्व्वैरभ्युपगन्तव्यम् ।

शाक्यमुनेरुदये तेन यद्बौद्धधर्मस्य विशिष्टसंस्करणं साधितं, को वा वक्तुं क्षमो नास्ति तस्मिन् गीतायाः प्रभाव इति ।

केचित् पाश्चात्यपण्डिता यदा बौद्धधर्मप्रभावाद्गीताया उत्पत्तिमभाषन्त, ख्रीष्टधर्मप्रभावादस्याः सम्भवः कथं वा न तैरुच्येत ? बाइबेलग्रन्थे यत् संक्षिप्तख्रीष्टजीवनवृत्तमस्ति, तेन च सौसादृश्यं कृष्णजीवनस्य पश्यन्तः ख्रीष्ट एवास्मिन् देशे कृष्णत्वेन गृहीत इति वादादृते किमन्यद्वा ते वदिष्यन्ति ? सौसादृश्यमेतद्व्यक्तिद्वयस्यैकत्वमथवैकस्य वचनानि मतानि भावान् वापरो गृह्णन् तानि तस्येति लोकानज्ञापयत्, अथवा यस्य वचनादीनगृह्णात् स एवासीत्, तैर्वचनादिभिरस्य स्वातन्त्र्यमस्थाप्यत परमार्थतो न स आसीदिति निर्णेतुं प्रयुङ्क्ते । न्यायमिममनुसृत्य बुद्धस्य ख्रीष्टस्य चाध्यात्मिकजीवनारम्भेतिवृत्तस्यैकरूप्यम्, एकविधाभिराख्यायिकाभिरुभयोरुपदेशनम्, तयोरनेकेषां वचनानां साम्यञ्च बौद्धधर्मात् ख्रीष्टस्य शिक्षाग्रहणम्, अथवा बुद्ध एवासीत् ख्रीष्टः कल्पनाप्रसूत इति सिद्धान्तमुपपादयन्ति ; यतो बुद्धात् प्राक् ख्रीष्ट आसीदिति वक्तुं नास्त्युपायः । वस्तुतस्तु सौसादृश्यदर्शनेन भिन्नभिन्नदेशकालस्थितानां जनानामेकत्वनिर्द्धारणं न जातु युक्तियुक्तम् । ऋक्संहितायाः प्राचीनत्वं मानवकुलेषु न केनापि प्रत्याख्यातुं शक्यम् । कुत्र का वा जातिरस्ति यत्रत्यधर्मशास्त्रोक्तान्यनेकानि वचनान्यनेका रीतयश्च न दृश्यन्ते तस्यां संहितायाम् । एकभावमापन्नो मानवात्मा कालदेशाभ्यां व्यवहितोऽपि चिन्तायां तद्बाह्यपरिच्छदरूपे वाग्व्यवहारेऽप्येकत्वं व्यनक्ति । चिन्तायास्तत्परिच्छदस्य चैकत्वेऽपि विभिन्नप्रजातीयभावैर्ग्रथितत्वादेकत्वेऽपि तयोर्भिन्नत्वावधारणं न पुनर्जटिलतरम् ।

गीता भक्तिप्रधाना, नासीद्भक्तिर्वैदिककाले, अतएषा भक्तिः ख्रीष्टधर्माद् गृहीतेत्यनुमानं वेदसंहिताध्ययनात् पण्डितवर्गमनसो दूरादपसारितं भवितुमर्हति । एवमासीदस्माकं सिद्धान्तः श्वेताश्वतरोपनिषदन्तेऽन्यासु भक्तिशब्दप्रयोगमपश्यतां स्थूलत ऋक्संहितायाः कतिपयानंशानालोचयताम् । यदस्माकं पूर्वसिद्धान्तः परिवर्त्तितः,

कथं मन्यामहे न स्यात्तदपरेषाम्? नारदस्य श्वेतद्वीपगमनवृत्तान्ता-द्यदनुमीयते भक्तिः श्वेतद्वीपात् श्वेतकायखृष्टधर्मावलम्बिगणवसतिस्था-नाद्भारते समानीता, तदनुमानमतीव दुर्बलम् *। ब्रह्मलोकादिवच्छ्वे-

---

* "श्रीकृष्णस्य जीवनं धर्मश्च" इत्यस्य तृतीयसंस्करणं यन्त्रस्थयात् प्राक् प्रस्तुतमासीत्, किन्त्वनवकाशसुयोगाभावाभ्यां तदापि मुद्राङ्कितं न। यदस्मिन् विषये तत्र लिखनमुद्ध्रियते तदत्र; —"कृष्णोभक्तिमार्गस्याविष्कर्त्ता न वेत्यस्मिन् सम्प्रत्येको मनसि संशयो जातः। अस्य संशयस्य निरसनं समुचितम्। महाभारते शान्तिपर्व्वणि मोक्षधर्म्मे नारायणीयोपाख्याने नारदस्य श्वेतद्वीपगमनं वर्णितमस्ति। तस्मिन्नध्याये श्वेतद्वीपस्योल्लेखः, तत्रत्यजनानां वृत्तान्तः, उपासनारीति-रित्यादिकं यदभिहितम्, तेन पाश्चात्यपण्डिता अनुमीयन्ते हिब्रियान्नष्टिकखृष्टवादिभ्यः शिक्षां प्राप्य नारदोऽस्मिन् देशे भक्तितत्त्वं प्रवर्त्तितवान्। अतो गीतायां भक्तिवादस्यैव प्रतिष्ठाया। महाभारतस्यानर्वाचीनत्वेऽप्येते वादाः प्रचलिता इत्यत्र न कोऽपि सन्देहः। श्वेतद्वीपगमनस्याद्यन्त-विवरणसमालोचनया यत्नैः प्रतीतं तेन खृष्टजन्मतोऽर्व्वाक् वर्षाणां चतुःशतमध्ये पञ्चविंशत्यधिक-त्रिशतादर्व्वाग्वा घटनैषा संघटितेति सिद्ध्यति। विशेषपर्यालोचनानन्तरं कस्मिन् कृतान्ते वा वयमुपातितास्महि, वेदयितुं तं पाठकवर्गेभ्यः कर्त्तव्यम्। प्रथमन्तावदिदमाख्येयम्, साइवेरिया-स्थनष्टिकसम्प्रदायसमीपे भारतवर्षात् साधकवृन्दगमनञ्च वा? यद्यपि महाभारते नारदस्य श्वेत-द्वीपगमनवृत्तान्तोऽस्ति, तथापि श्वेतद्वीपस्य विविधवर्णनं दृष्ट्वा संशय उपतिष्ठते, श्वेतद्वीपः साइवे-रियाप्रभृतिदेशान् दर्शयतीत्यस्मिन्। मेरोरुपरिभागस्य विस्तारो योजनानां द्वात्रिंशत्सहस्रम्— 'द्वात्रिंशन्मूर्ध्नि विस्तृतः" (वि, पु,)। न खलु मन्तव्यं भूतलप्रविष्टं योजनानां षोडशसहस्र-मुद्दिश्य द्वात्रिंशत्सहस्रं वर्णितमस्ति, यतः भूमण्डलं पद्मं मेरुस्तस्य कर्णिकेति वर्णयित्वा तदुपरि-भागे योजनानां द्वात्रिंशत्सहस्रं, मूले षोडशसहस्रं, भूतले षोडशसहस्रमिति स्फुटमुक्तम्। क्षीरोदमेरुमध्ये मेरोरुपरि योजनानां द्वात्रिंशत्सहस्रं श्वेतद्वीपो योजनानां चतुर्दशसहस्रं ब्रह्मलोकमात्मन्यन्तर्भूय विद्यमानः। ब्रह्मा अनिरुद्धस्य विलासः, अतः सिद्ध्यति ब्रह्मलोकस्या-निरुद्धाधिष्ठितश्वेतद्वीपस्यान्तर्भूतत्वम्। कुत्रायं क्षीरोदधिः। ब्रह्मसंहितायां यत्र मध्यदेशस्य वर्णनास्ति तत्रोक्तम्— 'प्राग्ज्योतिषलौहित्यक्षीरोदसमुद्रपुरुषादाः' इति। प्राग्ज्योतिषो वर्त्तमान आसामप्रदेशः, लौहित्यो ब्रह्मपुत्रनदः (कालिका पु,) पुरुषादो देशविशेषः। प्राग्ज्योतिषपुरुषा-दयोरन्तरालवर्त्ती क्षीरोदसमुद्रः। पुरुषाद इति शब्देन तत्रत्यजना मनुष्यपिशिताशना आसन्निति लभ्यते। भारतेऽपि यदा पुरुषमेधो नरमेधो वासीत् तदा प्राचीनकाले प्राग्ज्योतिषातीतभूमौ तादृग्जनानां निवसतिरासीदिति नासम्भवम्। किमयं श्वेतद्वीपः पुरुषादप्रदेशः? नास्यत्र किञ्चित् प्रमाणम्; वरं मेरोरुपरिभागे श्वेतद्वीपस्य स्थितिकथनात् पुरुषादप्रदेशेनास्य सम्बन्धकल्प-नाया न विद्यतेऽल्पमपि कारणम्। प्रत्युत सूर्य्यस्योदयास्तप्रदर्शनार्थं मानससरोवरं मध्यादात्वेन गृहीत्वा ब्रह्मलोकस्य दशदिक्षु शक्रादिदशदिक्पालानां पुराणि यथा वर्णितानि सन्ति तथैव क्षीरोद-समुद्रं (हम्बल्डी बङ्गोपसागरम्) मध्यादात्वेन गृहीत्वा श्वेतद्वीपो वर्ण्यत इति नायुक्तकल्पना।

श्वेतद्वीपोऽप्युपासनार्थंपरिकल्पित इति शास्त्रालोचनात: प्रतीयते। सत्त्व-गुणस्य विष्णोरधिष्ठानभूमिश्वेतद्वीप: सत्त्वगुणस्य शुक्लत्वात् तादृशना-म्नाभिहित इति तत्त्वम्। गीताया: प्रतिपाद्यविषयान् समासतो यद्वयं पुरस्तादभ्यधिष्महि तेन सुखेन बुध्येत नैषा विदेशादागता किन्त्वस्मिन् देशेऽस्या: प्रभव इत्यतोऽधिकवाग्व्ययेनालम्। यथापि यस्मिन् यस्मिन् ख्रीष्टधर्मेणैक्यमस्ति, न तत् ख्रीष्टधर्मादागतं वैदिकधर्मादेवेति सुख-प्रतिपाद्यम्। भक्ति: श्रद्धा स्तुतिरुपासना प्रार्थना नास्त्यभाव एतेषा-मन्येष्वपि वैदिकग्रन्थेषु। एकान्तशरणापत्तिर्वैष्णवधर्मस्य प्रधानं लक्षण-मिति लक्ष्यते। वेदविभागेऽस्या विरलप्रचारं दृष्ट्वाऽसावैकान्तभाव: ख्रीष्टधर्मादागत इत्यनुमानं निरतिशयभ्रान्तिविजृम्भितम्। वेदसंहि-

---

श्वेतद्वीपाधिपतिदर्शनाय नारदस्य श्वेतद्वीपगमनं यद्यास्ति वर्णितं श्रीमद्भागवते, तत्र स्वामिना स्फुटमुक्तं 'तमीश्वरं सत्त्वस्य नाभिनाभिकद्धमूर्त्तिम्' इति। सुतरां तन्मतेऽनिरुद्ध: श्वेतद्वीपाधिपति:। महाभारते श्वेतद्वीपगमनाध्याये तदेव निर्णीतमस्ति, यत: 'प्रद्युम्नादनिरुद्धोऽहं सर्गो मम पुन: पुन:। अनिरुद्धात्तथा ब्रह्मा' इत्युक्त्वाऽनिरुद्धादेव निखिलसृष्टिव्यापारोत्पत्तिश्च वर्ण्यते। असौ सर्वत्र वर्णानुरञ्जितं विश्वम्—'सोयं जगौ स विश्वाय'। काश्चिन्निखिलं सृष्टिं, श्वेतद्वीप-वासिनस्तं कालं लिखन्ति—यथैतौ न तदधीना इति वर्णनायाम् 'इउकैराइष्ट'—('अन्नं ब्रह्म रसो विष्णु:' 'सुरा शक्ति: शिवो मांसम्' इत्यादिकरीत्याऽन्नपाने ख्रीष्टस्य रक्तपि[illegible] तत्पानभोज-नम्) परिकल्पनं न युज्यते। ये पुनरेवं कल्पयन्ते तेषां तत्परिकल्पनाया मूलम्—'नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज' इत्यत्र पूर्वजशब्दस्य प्रयोग:। वेदे लिङ्गे यावा[illegible]ऽपि हिरण्यगर्भ ब्रह्मा-दिषु पूर्वजशब्दस्य प्रयोगोऽस्ति, अतएवायं पूर्वजशब्दो न ख्रीष्टं प्रति प्र[illegible] प्रथमज (first-begotten) शब्दस्यानुवाद:। यद्यनिरुद्धं प्रति पूर्वजशब्दमत्यज्य वासुदेवं प्रति स व्यव-ह्रियेत, तदा शास्त्रे तं प्रति पूर्वजशब्दस्याव्यवहारात् तद्युक्त्या ख्रीष्टधर्मतोऽयं व्यवहार: परि-गृहीत इति कल्पना युक्ता स्यात्। यतस्तत्र सिद्ध्यति तत: कालनेहनं न कालनेहनं किन्तर्हि ख्रीष्टमुद्दिश्य 'इउकैराइष्ट' वर्णितमस्ति श्वेतद्वीपाध्याये इत्युक्तिरसमञ्जसा। अध्यायेऽस्मिन् सांख्य-विरोधिमतमस्ति, वेदान्तेनापि न तन्मतस्यैक्यं घटते, अतो विदेशादगृहीतं तन्मतमिति वचन-मसम्यक्। 'तस्मादव्यक्तमुत्पन्नं त्रिगुणम्' इत्यत्र 'सदपि कारणव्यापारादभिव्यज्यते' इति निय-मादभिव्यक्तिरेवात्रोत्पत्तिशब्देन गृह्यते। विज्ञानभिक्षु: पुरुषस्य परम्परात: कारणत्वमवधार्य विरोधमपाकरोत्। अत: श्वेतद्वीपगमनवर्णनेन नूतनमतसमागमकल्पनया वा नैतत् प्रमाणविषयं भवति यदयं भक्तिवादस्तत् तत्सहृदयसम्प्रदायविशेषात् भक्तितत्त्वमभिव्यक्तम्। अस्ति पुनर्ख्रीष्ट-प्रमाणं यदृच्छिकसम्प्रदायो भारतवर्षीयविविधमतान्तर्गतात्।

तासामपि तादृशी सा दृश्यते—'मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम्। अमन्तवो मां त उपक्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि। अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः। यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम।" (ऋक् सं १०म, १२५सू ४।५ ऋक्)। परितुलय वाङ्निचयमस्या गीतोक्तश्रीकृष्णवाङ्निचयेन—"मच्चित्तः सर्व्वदुर्गाणि मत्प्रसादात् तरिष्यसि। अथ चेत्त्वमहङ्काराम्न श्रोष्यसि विनङ्क्ष्यसि।" (१८।५८); "ईश्वरः सर्व्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति। भ्रामयन् सर्व्वभूतानि यन्त्रारूढ़ानि मायया॥ तमेव शरणं गच्छ सर्व्वभावेन भारत। तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥" (१८।६१।६२)। ऋक्संहितया गीतया अतो भावतः ऐक्यमस्ति, यत्किञ्च पार्थक्यं तद्देन वेदान्तस्य सङ्गमनात् संघटितम्। ये पुनराकाङ्क्षोशामोऽनुवर्त्तिनो भवितुम्, स तान् धनजनबन्धुस्वजनान् सुखस्वाच्छन्द्यञ्च परिहाय तमनुसर्त्तुमुपादिशत्। ये खलु तमेवानुवर्त्तिष्यन्ति अनन्तजीवनं ते लप्स्यन्तीति स भूयो भूयोऽवादीत्। श्रीकृष्णोऽपि सर्व्वविधफलाभिलाषं कर्त्तृत्वादिकञ्च परित्यज्यैकान्तभावेन तच्छरणमुपगन्तुमर्ज्जुनमुपदिष्टवान्। एवं शरणापत्तेः फलं सर्व्वपापेभ्यस्तस्य विमोचनम्। अत्रापि वाक्यतो भावतो विलक्षणमैक्यमस्ति। नास्त्यत्र ख्रीष्टेन श्रीकृष्णस्यैक्यं, यतो योगयुक्तेन तेन सर्व्वान्तर्यामिपरमात्मवाक्यात् तानि वचनान्यवादिषतेति चेत्, न, ख्रीष्टेनाप्यवादि,—न स स्वयं कथयति, यदेव हि स शृणोति पितृमुखात्तदेव जनान् ज्ञापयति, तदनुवर्त्तनं पित्रनुवर्त्तनञ्चैकमतस्तदनुवर्त्तनाय स तान् प्रचोदयतीति। इदं सम्प्रति विवेच्यम्—किमसौ श्रीकृष्णः ख्रीष्टवचनमथवा ख्रीष्टः श्रीकृष्णवचनं श्रुत्वा तादृगवादीत्। अत्यल्पविचारादेव प्रतिबुध्येत ख्रीष्टः स्वदेशीयानां भावान् तत्कालोचितावस्थाश्चानुसृत्य प्रागुक्तानि वचनानि, श्रीकृष्णश्च जातीयधर्म्मं कालोचितविशेषावस्थाश्चानुगच्छन्नेकान्तशरणापत्तिमघोषत्। यिहुदिगणः परप्रपीड़नेन नितान्तभयभाराक्रान्त आसीत्, समपि

तेषां नासीच्छान्तिर्न वापि जीवनस्य नित्यकालस्थायित्वे विश्वासः। अतो हि खीष्टो भाराक्रान्ताय शान्तिं नित्यजीवनाविश्वासिने नित्यजीवनं दास्यतीत्यघोषयत्। वर्णाश्रमाचारपरित्यागेन पापभाजनानि स्युरित्यासीद्भारतवासिनां विश्वासः। अतः श्रीकृष्णो वर्णाश्रमाचारं परित्यज्य तच्छरणापन्नेष्वभयमदात्, पापसम्भावनान्मोचनञ्च प्रत्यश्रासीत्। यतः कालदेशजात्यवस्थानां भिन्नत्वादुभयोर्भिन्नत्वं समुचितया भाषया शरणापत्तेर्भेदप्रदर्शनेन प्रोक्तं, ततोऽप्रतिपन्नं यदेकस्मात्कृत्वाऽपरस्तानि वचनान्यवोचत्।

खीष्टधर्म्मतो गीताया धर्म्मो गृहीत इति प्रतिपादनाय ये प्रायतन्त, तैः खीष्टधर्म्मादस्या धर्म्मस्य न्यूनत्वमेकस्मिन् विषये साधितम्। सोऽयं पापबोधः। सत्यमेतद्यत् खीष्टो यथा तस्मिन् विश्वासोऽनन्तजीवनस्याविश्वासो मृत्योश्च हेतुरिति श्रोतृवर्गस्य मनसि द्रढयितुं भूयोभूयोऽयतत न तथा श्रीकृष्णः। अथापि नासीत् सोऽस्मिन् सर्व्वथोदासीनः, यतः स स्पष्टमुक्तम् "ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्व्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः।" (३।३२) इति। न ह्येतेन—खीष्टो यथा तद्वचनस्यानादरे विनाशः स्यादिति साक्षाद्बलेनावादीत्—तथा श्रीकृष्णोऽवोचत्, यतः स यत् कर्त्तुमुपदिशति तस्याकरणेऽध्यात्ममृत्युरुपतिष्ठत इत्युक्त्वा तन्मतस्याननुष्ठायिनामात्मनो दुर[illegible]मेवाभाषीत्। न तथावादीत् स इत्यपि न, यतः सोऽर्ज्जुनं स्फुटमाह—'अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि।' अथापीदं स्वीकर्त्तव्यं यत् पापविषयको भावः खीष्टस्य कृष्णस्य च निरतिशयं भिन्न आसीत्। खीष्ट ईश्वरप्रेरितः, तस्मिन्नविश्वासो ह्यविश्वास ईश्वरे। सुतरामयमविश्वासः पापस्य मूलं खीष्टधर्म्मे। ये पुनः खीष्टं विश्वसन्ति तान् प्रत्यत्याचारस्तं प्रत्यत्याचारः, अस्यात्याचारस्य दण्डोऽतीवतीव्रः। श्रीकृष्णस्य मते यज्ञदानतपःकर्म्मेश्वरप्रतिष्ठितम्। ये पुनः श्रद्धाहीना एषामनुष्ठाने, ते पापाचारिणः। न तेषां कल्याणमिह परत्र वा। विषयाभिलाषो हि तेषां पापाचारस्य मूलम्। विषयाभिलाषेण रागो

वा द्वेष उद्रिच्यते, तस्माद्रागाद्द्वेषाच्च पापोत्पत्तिः। पापं हि ज्ञानं विज्ञानञ्चोभयं नाशयति, अतः स पापमूलं विषयाभिलाषं विनाशयितुं निरवक्षात्। ख्रीष्टो यथा पापस्य तीव्रदण्डमवर्णयत्, न तथा श्रीकृष्ण इति सत्यं, किन्तर्हि पापं ज्ञानविज्ञानविनाशकत्वात् परमशत्रुः, तदवश्यं विनाश्यमित्येषास्योक्तिः पापस्य भीषणत्वं विशेषेण दर्शयति। शास्त्राचार्य्योपदेशजनितं ज्ञानं, साक्षात्सम्बन्धेन स्वयमनुभूतञ्च ज्ञानं, यदुभयमेतत् पापेन विनष्टं भवति, को वा तदपेक्षया सर्व्वविनाशकव्यापारो भवितुं सम्भाव्यते? न पुनरधर्म्माचार्य्यासुरिकप्रकृतिजनगणाय विहितं दण्ड—(१६।१९।२०) समावल्पीयस्त्वेन न्यवक्षात्। तद्वचनादापाततः प्रतीयते न तेषां कदापि सद्गतिः स्यादिति। येषां पुनः सद्गतेरल्पा सम्भावना चेत्तु पापमूलं कामादिकं परित्यज्य सदाचारपरा भवन्ति, तेऽप्युत्तमां गतिं लभन्ते (१६।२१।२२) इति यदवोचत् तेनासुरभावापन्नानामपि चिरासद्गतिर्निवारिता।

गीतोक्तं भारार्पणं वाइबेलोक्तं भारार्पणञ्च, गीतोक्तं पापं वाइबेलोक्तं पापञ्च, एतदुभयोर्मध्ये किं वा पार्थक्यं तत् प्रदर्शितम्। एतत्-पार्थक्यनिबन्धनः ख्रीष्टधर्म्मगीताधर्म्मयोः प्रभेदो नासौ तुच्छः। गीतोक्तभारार्पणव्यापारे न विद्यते दुःखक्लेशादीनां भारार्पणव्यापारः। इष्टगन्तव्यानिष्टफलनाशः स्यादित्यादिचिन्तनं परिहाय केवलमात्मसमन्तर्य्यामिनः शरणानुसरणं भारार्पणस्यास्य मुख्यो भावः। विषयाभिलाषपरवशेन विधिकल्लङ्घनात् यत्पापं जायते, यच्चात्मनः परमहितकारिणं प्रति विरोधाचरणेन, एतदुभयोर्मूलन्तु एकविधत्वेऽपि, न तु तत्फले। विधिकल्लङ्घनेन चित्तं कलुषितं, योगः प्रतिहतः, ब्रह्मसंस्पर्शजनितानन्दानुभवः प्रतिरुद्धो भवति। मरणात्मिकायाः चेतरस्या वारणाय भगवान् कर्म्मसमर्पणमतीवप्रकृष्टसाधनमिति कुत्र सन्देहः; किन्तु ख्रीष्टात्मनो हितकारिणं प्रत्यहमसदाचरणमाविष्कृतवानिति बोधे हृदुद्बुद्धे यासौ तीव्रयातनानुभूयते, तयाधीरस्तस्या लघुभारत्वसाधनाय तस्मै परमाय मित्राय तद्भारसमर्पणं, तेन च तत् स्वीकृतमिति विश्वासात् यासौ

साधनरीतिरुपतिष्ठते, सा ततो विलक्षणा। ब्राह्मणख्रीष्टसमाजयोः साधनरीतौ यदतीव भिन्ने तत्कारणं भारतीयपाश्चात्त्यधर्मयोर्भावस्य पार्थक्यम्।

न खलु ख्रीष्ट आत्मानमीश्वरस्यावतारत्वेनोदघोषयत्। स त्वीश्वर-तनयः, तेनाभिन्नभावेन स्थितः, यत् किञ्चन तस्माच्छ्रुतं तदसौ जगति प्रथयति, ममेदमित्यभिमानाय तस्यात्मनो न किञ्चनास्ति, प्रेरितसम्माननया प्रेरयितुः सम्मानं भवति, प्रेरितदर्शने प्रेरयितुर्दर्शनञ्चेत्यादिकाः कथाः स्वमुखेन स उदैरयदितीशाः पुत्रावतारः। जगत्ययमवतारवादो नूतनः। 'जीवस्तनय ईश्वरः पितेति (१४।४) मतस्य बीजं गीतायां दृश्यते।' किन्तर्हि मतस्यैतस्य प्रभावो भारतसमाजेऽणवपि नासीदावि-ष्कृतः। यद्यपि श्रीकृष्णो योगयुक्तावस्थायां परमात्मनैकः सन् परमा-त्मस्वरूपविनिःसृतत्वेनाहं मम मामित्यादिपदैरुपादिशत्, तथाप्ययोगा-वस्थायां न जातु स स्वस्य मानवत्वमाच्छादयत्। आविर्भूतस्वरूपत्व-माचार्यौ पश्यन्तो भारतीयास्तमीश्वरत्वेनाग्रहीषन्, अतोऽस्मिन् देशेऽव-तार ईश्वरस्य न तु तनयस्येति महत् पार्थक्यम्। बौद्धधर्मात् ख्रीष्ट-धर्माद्वा ब्राह्मणधर्मेऽवतारवादस्य प्रवेशोऽभूदित्यनुमानं भ्रान्तिविजृ-म्भितम्। यतोऽस्य मूलं सन्निविष्टमस्त्यृक्संहितायाम्। इममवतार-वादमुद्दिश्य निरुक्तमुक्तवत्—"यद्यद्रूपं कामयन्ते तत्तद्देवता भवन्ति" (१०।१८) इति। आत्मपर्यालोचनया भगवत्स्वरूपाविर्भाव एवाव-तारवादस्य मूलमिति स्फुटं प्रतीयते। ईशा यदवादीत्—'यो माम-पश्यत् स पितरमपश्यत्' इति तन्मूलमेतस्य। स आत्मानमात्मन्याविष्टं पितरञ्चैकत्वेन पृथक्त्वेनाद्राक्षीत्, अतः स्वरूपैकोऽपि स्वस्य पुत्रत्वं न स व्यस्मरत्। अस्मिन् देशे पुनराचार्यास्तदनुवर्त्तिनश्च प्रभेदमिमं व्यलोपयन्। न खल्वयं भेदो ब्राह्मणख्रीष्टधर्मयोरवतारवादस्मान्यो-यान्।

ख्रीष्टः पुनरासीद्योगी। यद्यपि ख्रीष्टसमाजो नेमं योगमरक्षात्, तथापि योगित्वं तस्य कस्मिन्नपि कालेन भवेद्विलुप्तम्। ईश्वरेणानु-

वर्त्तिभिश्च येन योगेनासौ योगयुक्त आसीत् न स योगः सामान्यतरः। यतो महदाश्चर्यं यदेतद्योगयुक्तावस्थायां स जीवनं न्यवर्त्तयत्, नैतस्याः कदापि स वियुक्तोऽभूत्। बन्धुविच्छेदेन सोऽनुतप्त आसीत्, कपटाचारिणाऽवमत् मत, अथापि परैशप्यन्त ये पुनर्धार्मिकपथत्वेन पथिणामयंस्तान् प्राक्षार्षीत्। नैतैस्तस्य योगावस्था प्राभञ्जि। शोककारणं पापाचरणमीश्वरावमाननञ्च पश्यति साधौ यच्छोकरोषादिकदयो भवति, तेन बहिर्योगभङ्गे प्रतीतेऽप्यन्तर्गभीरतमदेशे प्रशान्तावस्थाया अक्षुण्णत्वान्नायं योगभङ्गः। इमं नैसर्गिकं शोकरोषादिकदयमुद्दिश्य गुणातीतलक्षणे श्रीकृष्ण आह—"प्रकाशञ्च प्रवृत्तिञ्च मोहमेव च पाण्डव। न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते। गुणा वर्त्तन्त इत्येवं योऽवतिष्ठति नेङ्गते।.........गुणातीतः स उच्यते" (१४।२२—२५)। येन योगेन ख्रीष्टो येन च श्रीकृष्णो योगयुक्त आसीत् अयं तयोर्भेदांशः:— ख्रीष्टोऽपश्यत् स्वात्मानमीश्वरे, ईश्वरञ्च स्वात्मनि, अनुवर्त्तिनः स्वात्मनि स्वात्मानमनुवर्त्तिषु; श्रीकृष्णः सर्व्वमात्मनि सर्व्वेष्वात्मानं, सर्व्वमीश्वरे सर्व्वेष्वीश्वरमिति। योगः ख्रीष्टस्य सविशेषः श्रीकृष्णस्य च निर्व्विशेष इति भेदो न लघीयान्। योगयोरनयोरैक्यीभावेन योगस्य पूर्णता। ये पुनरन्तरङ्गास्तैर्यदपि योगो घनिष्ठो भवति, तथापि बहिरङ्गान् योगभूमेर्बहिः संस्थाप्य न भवेत् पूर्णतास्य। अन्तरङ्गैर्घनिष्ठसम्बन्धतया सविशेषयोगेन, बहिरङ्ग आत्मत्वेन निर्व्विशेषयोगेनाबद्धत्वं प्रयोजनम्। स्वात्मनीश्वरदर्शनं सविशेषः, सर्व्वेष्वीश्वरदर्शनञ्च निर्व्विशेषो योगः, अनयोरेकत्र सन्निवेशेनास्य पूर्णता।

न केवलमनुवर्त्तिभिः किन्तर्हि स्वर्गस्थमहाजनैरपि योगयुक्तोऽभावासीदिति पर्व्वतोपरि शिष्यवर्गाणां सन्निधौ प्रकाशमानस्य रूपान्तरता प्रदर्शयति। अत्रापि ख्रीष्टो महाजनैः स्वहृदयानुरूपयोगयुक्तो रूपान्तरतामभजत्। सुतरामियं सविशेषयोगस्यैव समापत्तिः। अर्ज्जुनस्यान्यस्य वा सन्निधौ श्रीकृष्णस्य रूपान्तरतान्यविधा। तत्कालोचि-

तामृषि-महर्षि-सिद्धगन्धर्व्व-देवादिविषयां प्रतिपत्तिमाश्रित्य श्रीकृष्णो-ऽर्ज्जुनाय रूपान्तरतामदर्शयत्। यस्मिन् सा रूपान्तरतादर्शि, योऽसौ तां रूपान्तरतामपश्यत्, तयोस्तत्प्रतिपत्तौ प्रगाढ़भावोदयाभावात् न तामेकोऽन्यस्मिन् प्रतिफलयितुं क्षमः। अतः सेयं रूपान्तरता केवलं मानसव्यापारघटितेति चेत्, तथापि तादृक्शक्त्युत्पादने यत्नस्य दृढ़प्रत्य-यस्य च प्रयोजनमासीत्। किमियं रूपान्तरता पारमार्थिकीत्यवि-चार्य्य वाइवेलगीतोक्तिपर्य्यालोचनयात्रापि खीष्टस्य सविशेषः श्रीकृष्णस्य निर्व्विशेषयोग आसीदित्यवगम्यते। यद्येकस्य जीवनालेख्यादन्यस्य जीवनमालिखितं स्यान्न जातु सर्व्वत्रोभयोर्विशेषभावसमुचितक्रिया सम-भावेन दृश्येत।

ये पुनर्गीतायां बौद्धधर्म्मं खीष्टधर्म्मञ्च लक्षयन्ते, अवश्यमेव ते किमपि किमपि सौसादृश्यं समालोक्य तथा व्यरूपयन्। निपुणपर्य्या-लोचनया यदपि नेदं सौसादृश्यं गीताया बौद्धधर्म्मात् खीष्टधर्म्माच्चो-त्पत्तिं प्रतिपादयति, तथाप्यस्य सौसादृश्यस्यासम्भावना स्याच्चेन्न गीतायां बौद्धधर्म्मस्य खीष्टधर्म्मस्य च मूलं वर्त्तेत। बौद्धानां निवृत्तियोगस्य खीष्टस्य च प्रवृत्तियोगस्य मूलं गीतायामस्तीत्यनायासेन परिलक्ष्यते। प्रकृतेः सर्व्वाभ्यः क्रियाभ्यः स्वात्मानं पृथक्कृत्य साधनं निवृत्तियोगस्य मूलम्, स्फुटमेवेदमस्ति गीतायाम्। साधनमेतदस्तीति बौद्धधर्म्माद्-गृहीतमेतदिति न वक्तुं शक्यते। इन्द्रियसम्पृक्तविषयोपरि जयलाभाय स्वभावत एव तत्साधनं साधकैरवलम्ब्यते। यदा हि बौद्धधर्म्मो निवृ-त्तियोगमात्रेण पर्य्यवसन्नः तदेतत् साधनं तस्मिन् विपुलायमानं सुव्यक्तं दृश्येतेति नाश्चर्य्यम्। चेदिदं गीतायामबहुलायमानं निरतिशयसङ्क्षि-प्ताकारेण लक्ष्यते, अतो गीता पश्चाद्बौद्धधर्म्मोऽभ्युदेदित्यस्य तत् प्रमा-णम्। खीष्टधर्म्मस्य प्रवृत्तियोगमाश्रित्यैतदेव वक्तुं शक्यम्। सङ्गफल-त्यागेन परमात्मनि कर्म्मसमर्पणमर्थेनस्तत्प्रेरणाय। कर्म्मकरणं प्रवृत्ति-योगस्य मूलम्। खीष्टधर्म्मेऽस्य यथा परिस्फुटत्वं लक्ष्यते न तथा गीतायाम्। प्रमाणमेतद्यत् गीताप्रचारसमये नासीदुपयुक्तकालस्तस्य

परिस्फुटाकारधारणाय ; पश्चात् यथासमयं ख्रीष्टधर्म्मोऽयं स्फुटतर आसीत्। ख्रीष्टस्य पद्मस्तियोग इच्छायोग इति ख्यातिमगमत्।

बौद्धख्रीष्टधर्म्माभ्यां गीतायाः सम्बन्धः कथञ्चित् पर्य्यालोचितः। सम्प्रत्यस्या भिन्न-भिन्न-व्याख्यातॄणां विवरणमवश्यमुद्दिष्टव्यम्। बृह-दारण्यकमाह—"अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्व्वाणि निश्वसितानि। ४।४।१०।" उक्तयानया न केवलमृग्वेदादिकं देवनिश्वसितसम्भूतं किन्तर्हि व्याख्यानान्यनुव्याख्यानानि च तत्सम्भूतानि। व्याख्यानानि तद्व्याख्यानानि च चेदीश्वरनिश्वसितसम्भूतानि, न वयं तानि मनुष्यकृतानीति युक्त्याप्रमाणानि कर्त्तुं शक्नुमः। चेत्तत् कुर्म्मः, यान् पुनः संशयिन इत्युपहसामः, तेषां विश्वासेन वयं पराजिताः *। येन यन्मन्यतां तन्मन्यतां, वयन्तु वेदोपनिषदादिषु यादृशीं, व्याख्यानानुव्याख्यानेषु च तादृशीं देवनिश्वसितक्रियां पश्यामः। न केनाप्यस्वीकर्त्तुं शक्यं यद्व्या-ख्यातृणामेकैकः सत्यस्य दिशमेकां पश्यन् मन्त्रमुग्ध इव तस्या एवानु-

* The remaining cardinal fact is, that these various beliefs are parts of the constituted order of things, and not accidental, but necessary parts, seeing how one or other of them is everywhere present, is of perennial growth, and when cut down, redevelops in a form, but slightly modified, we cannot avoid the inference that they are needful accompaniments of human life, severally fitted to the societies in which they are indigenous. From the highest point of view we must recognise them as elements in that great evolution of which the beginning and end are beyond our knowledge or conception—as modes of manifestation of the Unknowable, and as having them for their warrant.—*Spencer's First Principle.*

"He like every other man, may properly consider himself as one of myriad agencies through whom works the Unknown Cause, and when the Unknown Cause produces in him a certain belief, he is thereby authorised to profess and act out that belief.—Ibid.

यीत्—"तस्य (आचार्य्यकेशवचन्द्रस्य) आसीदभिलाषो यदयं निबन्धा ब्रह्मशास्त्रतो नवविधानं प्रमाणोपस्थापयेत्, जगति तस्यायमभिलाषोऽस्य श्रीकृष्णजीवनेन पूर्णोऽभवत्। न केवलं वचनप्रमाणेन किन्तर्हि जीवनमेकं वर्षाणां चतुःसहस्रात् प्राक् समन्वयभावेनोद्दीपितं यदभाषयत्, तदस्य महासमन्वयनिष्पादकविधानमागत्य देशकालजातिघटितसमग्रव्यवधानमपाकृत्य समपादयदिति जगति 'श्रीकृष्णस्य जीवनं धर्म्मश्च' घोषयिष्यति।" श्रीकृष्णजीवनधर्म्मनिबन्धनादलौकिकादशावर्षव्यतीतेषु श्रीकृष्णस्य नवविधानस्य च समन्वयभूमिः (ईश्वरेण साक्षात्सम्बन्धः*) एकेति भवेत् प्रमाणितम्, नासीदविज्ञातमेतद्ब्रह्मर्षेः। गीतासमन्वयभाष्यनिबन्धनेन यदभवत् साविष्कृता, तेनायमाख्यानं कृतार्थं मन्यते।

'श्रीकृष्णस्य जीवनं धर्म्मश्च' यत् तेन व्यलेखि सम्यक् तत्। कथमसौ पुनर्गीतासमन्वयभाष्यनिबन्धनेन समयक्षेपमकरोत्? किन्तेन वासीत् प्रयोजनम्? एषु विषयेषु समयपरिश्रमव्ययेन किन्तु, स स्वजीवनाधिकृतकार्य्याद् दूरात् सुदूरमपसरति। ये पुनरेवं मन्यन्ते, किन्तस्य जीवनाधिकृतकार्य्यमवधारयन्तु तदाचार्य्यकेशवचन्द्रस्य मुखचर्चितवचनैरेतैः—"ज्ञानमार्जनेनाद्य नावके पुनरहङ्कारसागरे जीवनतरीं न्यमज्जयन्। त्वमनयोः (योगशिक्षार्थिभक्तिशिक्षार्थिनोः) ज्ञानमलभथाः। भक्तिभावो योगभावश्चत्युभयोर्ज्ञानं त्वं लप्स्यसे। विनयेन विनम्रभावेन च न दूषणभावेन निखिलविषयास्त्वया ज्ञातव्याः। भक्तिकाण्डं योगकाण्डं कर्म्मकाण्डं निखिलान्येतानि त्वयावगन्तव्यानि। धर्म्मजीवनघटितसमयानुष्ठानविहीनस्त्वं संसक्तोऽभवः। यावन्तो ज्ञातव्यविषयास्त्वया ज्ञातव्याः। पुरुषाणां नारीणां सभ्यानां संसारिणां बालानां रुग्णानां तस्करुणिता विधयस्त्वयाभ्यसवगन्तव्याः। ज्ञानानामेषां फलानि येन च स्वात्मजीवने भवन्ति प्रतिफलितानि तदर्थं विशेषेण यतेथाः। न पुनर्ज्ञानं हृदयं मरुभूमित्वेन परिणामयतीत्यस्य दृष्टान्तं दर्शयिष्यामि। किं वा प्रकृतं ब्रह्मज्ञानं किं वा प्रकृतं दर्शनशास्त्रं

दर्शय मत्। तद्दर्शनेनास्य सव चास्येवाच कल्याणं भविष्यति।"
व्रतान्ते यदवदद्दाचार्य्यकेशवचन्द्रस्तं प्रति तदेतत्—"शानपरायण, गभी-
रतमगाँरे प्रवेष्टव्यं त्वया। यत्र च चतुर्णां वेदानामैक्यमभवत्, तस्मिन्
मीमांसास्थले गन्तव्यं त्वया। येषु शास्त्रेषु नास्त्यैक्यं साऽपरा विद्या,
सेयं परा विद्या यत्र नास्त्यनैक्यम्।"

आचार्य्यकेशवचन्द्रो गभीराध्यात्मदृष्ट्या चतुर्णां वेदानामैक्यस्थानमप-
श्यत्। समग्रवेदवेदान्तपुराणादिपर्य्यालोचनया तत्तच्छास्त्राणामैक्यप्रद-
र्शनं न तस्यामीष्टजीवनाभिलषितं कार्य्यम्। तादृशा श्रमेण जीवनक्षयाय
नागमत् सः। अतो विशेषविशेषवस्तुभिस्तत्कार्य्यं साध्यं तेनाभीत् तद-
भिप्रायः। ब्रह्मण्यशास्त्रसमूहानामैक्यप्रदर्शनमुद्भावयितुर्विशेषभावः।
वेदादारभ्यापुराणमेका पारमेश्वरी चिच्छक्तिर्जीवस्य चरणमामर्थ्यं दिनं
दिनमनुसृत्य तत्तद्विधानानप्रकाशमकरोत्, अतोऽस्ति तस्मिन् पूर्व्वा-
परनामञ्जस्यम्। गीताभावामिदं तदेव व्यक्तीकरिष्यति। उद्भास-
यितावश्यमदीरयितव्यमेतदासीचेत् स नवविधानस्य नवीनभगवदालोकं
लब्ध्वा वेदवेदान्तादिभिर्गीताया निगूढमैक्यमालोक्य स सोऽस्मिन् सिद्धान्ते
समुपनिष्ठत यीऽसौ वेदान् वेदान्तानृषिहृदयेष्वाविरकरोत्, सोऽयं
योगाचार्य्यहृदये सर्व्वेषामसामञ्जस्यं निष्पादितवानिति। इदमपि विस्पष्ट-
तया वक्तव्यं यत् यदपि ब्रह्मण्यशास्त्रसमूहानामैक्यप्रदर्शनमनेनोद्भास-
यितुर्विशेषभावस्तथाप्यन्येषां धर्म्माणामिकतामैक्यस्थानस्याविष्करणं न स
आत्मदासीनो भवितुमर्हति, यतस्तद्वियोगलिपौ सर्व्वेषां शास्त्राणा-
मैक्यप्रदर्शनाय स आदिष्टः। एतत्कार्य्यसाधनाय परिश्रमं न स
परिश्रमं मन्यते, प्रत्युतास्मिन् श्रमासामर्थ्ये जीवनं विफलेन गत-
मिति स मन्यते। न जातु विधानस्थाः सर्व्वे सर्व्वविधानि
कार्य्याणि कुर्य्युरिति व्यवस्था। विधानस्य राज्यमतीव विस्तृतम्।
अस्मिन्नेकैकस्य कार्य्यं स्वयं भगवान् विभज्य दत्तवान्। एकस्य
कार्य्यमपरेण साध्येत, नास्त्यत्र तत्सम्भावना। योऽस्मावेवं यतेत
स खलु विफलमनोरथः स्यात्। स्वे स्वेऽधिकारे तिष्ठता कार्य्यं कर्त्त

सर्व्वेषां तत्तत्कार्य्यैक्यात् पूर्णभावेनाविर्भविष्यति विधानं जगत्सन्नि-धाविति विधातुर्व्यवस्था। शम्।

उद्भ्रामयिता।

श्रीमद्भगवद्गीता

समन्वयभाष्यान्विता।

प्रथमोऽध्यायः।

योगयुक्तो हि येनासौ प्रोक्तवान् योगमुत्तमम्।
सर्व्वसमन्वयकरं तं वन्दे ह्यृषिसत्तमम्॥

धृतराष्ट्र उवाच—

धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्व्वत सञ्जय॥ १॥

इह खलु—"पितामहनियोगाद्वै यो योगान्नामधारयत्। यः स नारायणो नाम देवदेवः सनातनः। तस्यांशो वासुदेवस्तु कर्म्मणोऽन्ते विवेश ह॥" (स्व, प, ५ अ, २२ श्लो) इति स्मरणात् योगधर्म्मप्रवर्त्तनाय ऋषिनारायणभावावतीर्णः वसुदेवतनयः, "योगाचार्य्यो रोदसी व्याप्य लक्ष्म्या स्थानं प्राप स्वम्" (मौ, प, ४ अ, २६ श्लो) इति स्मरणात् योगाचार्य्यः श्रीकृष्णो ब्रह्मणः पदवेदने सुपर्य्याप्तं धर्म्मं स्वयं योगयुक्तः प्रपन्नाय शिष्याय ऋषिनरस्थानीयायार्ज्जुनायोपदिदेश। स च पुनः संग्रामे निविष्टचेतास्तं विस्मृतवानिति तेन महताप्रियेण व्यथितहृदयस्तमेवमन्वगीतायां चोदाचार्य्यः (अ,गी, १६ अ, ८—१२ श्लो);—

"श्रावितस्त्वं मया गुह्यं ज्ञापितश्च सनातनम्
धर्म्मं स्वरूपिणं पार्थ सर्व्वलोकांश्च शाश्वतान्॥
अबुद्ध्या नाग्रहीर्यस्त्वं तन्मे सुमहदप्रियम्।
न च साद्य पुनर्भूयः स्मृतिर्मे संभविष्यति॥

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्व्वे युद्धविशारदाः ॥ ९ ॥

अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्य्याप्तन्त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥

अयनेषु च सर्व्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व्व एव हि ॥ ११ ॥

तस्य सञ्जनयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२ ॥

ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥ १५ ॥

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोष-मणिपुष्पकौ ॥ १६ ॥

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥

द्रुपदो द्रौपदेयाश्च सर्व्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक् ॥१८

स घोषो धार्त्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीञ्चैव तुमुलोऽभ्यनुनादयन् ॥ १९ ॥

अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥ २० ॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ।

अर्ज्जुन उवाच—

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥
यावदेतान् निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ २२ ॥
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्त्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

सञ्जय उवाच—

एवमुक्तो हृषीकेशो गुड़ाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥
भीष्मद्रोणप्रमुखतः सर्व्वेषाञ्च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥ २५ ॥
तत्रापश्यत् स्थितान् पार्थः पितॄनथ पितामहान् ।
आचार्य्यान्मातुलान् भ्रातॄन्पुत्रान्पौत्रान् सखींस्तथा ।
श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि ॥ २६ ॥
तान् समीक्ष्य स कौन्तेयः सर्व्वान् बन्धूनवस्थितान् ।
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ॥ २७ ॥

अर्ज्जुन उवाच—

दृष्ट्वेमान् स्वजनान् कृष्ण युयुत्सून् समवस्थितान् ।
सीदन्ति मम गात्राणि मुखञ्च परिशुष्यति ॥ २८ ॥
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।
गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते ॥२९॥

न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।
निमित्तानि च पश्यामि विपरीतानि केशव ॥३०॥
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ।
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥३१
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ।
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ॥३२
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ।
आचार्य्याः पितरः पुत्रास्तथैव च पितामहाः ॥ ३३ ।
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ।
एतान् न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥३४॥
अपि त्रैलोक्यराज्यस्य हेतोः किन्नु महीकृते ।
निहत्य धार्त्तराष्ट्रान् नः का प्रीतिः स्याज्जनार्द्दन ।।५३
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ।
तस्मान्नार्हा वयं हन्तुं धार्त्तराष्ट्रान् सबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥३६॥
यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३७ ॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्त्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्द्दन ॥ ३८ ।
कुलक्षये प्रणश्यन्ति कुलधर्म्माः सनातनाः ।
धर्म्मे नष्टे कुलं कृत्स्नमधर्म्मोऽभिभवत्युत ॥ ३९ ॥
अधर्म्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥ ४० ॥

सङ्करो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः॥ ४१॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः।
उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः॥४२॥
उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन।
नरके नियतं वासो भवतीत्यनुशुश्रुम॥ ४३॥
अहोबत महत्पापं कर्त्तुं व्यवसिता वयम्।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः॥ ४४॥
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्त्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥ ४५॥

सञ्जय उवाच—

एवमुक्त्वार्ज्जुनः संख्ये रथोपस्थ उपाविशत्।
विसृज्य सशरं चापं शोकसंविग्नमानसः॥ ४६॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्ज्जुनसंवादेऽर्ज्जुनविषादो नाम प्रथमोऽध्यायः।

द्वितीयोऽध्यायः ।

सञ्जय उवाच—

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

श्रीभगवानुवाच—

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्ज्जुन ॥ २ ॥
क्लैव्यं मास्म गमः पार्थ नैतत् त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥

अर्ज्जुन उवाच—

कथं भीष्ममहं संख्ये द्रोणञ्च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ ५ ॥
न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः ॥ ६ ॥
कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्म्मसंमूढचेताः ।

यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥

नहि प्रपश्यामि ममापनुद्याद्-
यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

सञ्जय उवाच—

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥
तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

श्रीभगवानुवाच—

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

"दृष्ट्वा तु पाण्डवानीकम्" (१।२) इत्यारभ्य "न योत्स्य इति गोविन्दमुक्त्वा तूष्णींबभूव ह" (२।९) इत्येतदन्तो ग्रन्थोऽर्ज्जुनस्य शोकमोहयोः कारणं दर्शयति, योगोपदेशाय च श्रीमन्तं योगाचार्य्यं प्रवर्त्तयति। तत्र "कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्म्मसंमूढचेताः। यच्छ्रेयः स्यात् निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥" (२।७) इत्यनेनायं योगोपदेशः "नाश्रद्दधानाय देयम्" इति निषेधकोटिं नाधिरोहति। "तत् किं कर्म्मणि घोरे मां नियोजयसि केशव" (३।१) इति यत् स पश्चाद्वक्ष्यति, न तेन तस्याल्पश्रद्धत्वमनुमेयम्, सन्दिग्धे वस्तुनि परिप्रश्नो न श्रद्धाल्पत्वं श्रद्धाहीनत्वं वा व्यनक्ति। "व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे"

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्व्वे वयमतःपरम् ॥ १२ ॥

(३।२) इति वचने सन्देहकारणं दृश्यते ; इवेन बुद्धिविमोहनञ्च मोहेयमिति विस्पष्टम् । कर्म्मणि प्रवर्त्तयितुमना अन्यद्योगद्वयमभ्यधात् केवलं प्रपञ्चस्यायोग्यत्वप्रदर्शनाय स्वमहिमख्यापनाय च न तु त्रयाणामन्वयनायेत्युक्तिरुपरिष्टात् विचारणीया ।

शोकमोहाभिभूतस्यार्ज्जुनस्योपस्थितकर्त्तव्येभ्युत्थवारणायोवाचाशार्थः, अशोच्यानिति । स्वधर्म्मनिरतत्वात् नित्यत्वाच्च शोचितुमयोग्यान् भीष्मादीन् अन्वशोचः अनुशोचितवानसि एवमतत्त्वविस्त्वं प्रकटयन्नपि "पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः" (१।४१) इत्यादिकान् प्रज्ञावतां वादान् वचनानि च भाषसे परं न तु बुध्यसे इति भावः । पण्डितास्तत्त्वविदो विवेकिनः गतासून् मृतान् अगतासून् जीवतश्च नानुशोचन्ति, स्वाभाविकत्वादपरिहार्य्यत्वादात्मनोऽमरणधर्म्मत्वाच्च ।

कुतस्तेऽशोच्या इत्यपेक्षयाह न त्वेवाहमिति । न त्वेव जातु कदाचिदहं नासम्, किन्त्वासमेव, न त्वं नासीः किन्त्वासीरेव, तथा नेमे जनाधिपाः नासन् किन्त्वासन्नेव अत्र जगज्जीवयोर्मिथ्यात्ववादस्य नावकाशः द्वैतवादिनो विशिष्टाद्वैतवादिनश्च जगज्जीवमिथ्यात्ववादिभिर्विप्रवदन्तः सद्युक्तिजालविस्तारे सुमहत्पाण्डित्यमाविष्कुर्व्वन्तु, वयन्तु यस्योक्तिरियं गीता प्रधानतस्तदुक्त्यनुसरणेन तस्या व्याख्याने कृतमनोरथाः । अतः "ब्रह्म सत्यं तपः सत्यं सत्यञ्चैव प्रजापतिः । सत्याद्भूतानि जातानि सत्यं भूतमयं जगत् ॥" (अ, शौ, ३५अ, ३४।३५श्लो) इति तस्य व्यक्ततरजगज्जीवसत्यत्वस्वीकारमनभिनन्द्य तदसद्वादस्थापने नास्माकं प्रवृत्तिरस्ति तन्त्रान्तरेषु महता प्रयत्नेनोद्घोषितस्यासत्कार्य्यवादस्य चिन्मात्रसत्यत्ववादस्य च तदा का गतिरिति चेत् योगभक्तिज्ञानवस्तुदर्शनरीत्या स समाधेयः । अत्र शास्त्रे सद्वादं स्वीकृत्यैव रीतित्रयमुक्तं समन्वितञ्च, तत्तु पश्चाद्दर्शयामहे । अधुना

प्रयत्नमनुसराम: । न हि निखिलवस्तुतिरोभानादृते ब्रह्मसत्तासाक्षात्कार: सम्भवतीति योगिनां प्रयत्नस्तत्तिरोभानाय । सत्याभे मिथ्याभे वा पर्य्यवसानं सर्व्वस्य युक्त्या शास्त्रबलेन च सुकरमिति दृष्ट्वा तदनुसरणं तेषां सर्व्वत्र । मन्युक्तानि प्रथमस्तावत् वाङ्निरोध:, वाङ्निरोधेऽपि मानसक्रियाया निदर्शनं न निरोधस्ते, तन्निदर्शननिरोधानेऽपि शरीरोत्थणा प्राणस्य स्थितिरनुभवगोचरीभवति, यदा स्तुषा नापलभ्यते तदायमात्मनि विलीन इति सत्याभत्वेनावधार्य्यते । "अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मन: प्राणे प्राणस्तेजसि तेज: परस्यां देवतायां, स य एषोऽणिमा, एतदात्म्यमिदं सर्व्वं, तत् सत्यं स आत्मा" (छा, उ, ६।८।७.८) इत्युपनिषदुक्तरीत्या योगिनामात्मव्यतिरिक्तपदार्थानां विलये प्रयत्न: । पराशरेणापि युक्त्यन्तरेणायमेव साधित:, तद्यथा (वि, पु, २ श, १२ अ, ४१—४४श्लो) ;—

"मही घटत्वं घटत: कपालिका कपालिकाचूर्णरजस्ततोऽणु: ।
जनै: स्वकर्म्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु ॥
तस्मान्न विज्ञानमृतेऽस्ति किञ्चित् क्वचित् कदाचित् द्विज वस्तुजातम्
विज्ञानमेकं निजकर्म्मभेदविभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥
ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् ।
एकं सदैकं परम: परेश: स वासुदेवो न यतोऽन्यदस्ति ॥
सद्भाव एषो भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु यत् संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते ॥" इति

"सन्मूला: सोम्येमा: सर्व्वा: प्रजा: सदायतना: सत्प्रतिष्ठा:" (छा, उ, ६।८।८) इति चिरन्तनश्रुतान्यानुयायी श्रीमतो योगाचार्य्यस्य "सत्यं भूतमयं जगत्" इति सिद्धान्त: सर्व्वथा पूर्व्वैरविरुद्ध: । भगवल्लीलादर्शनादृते न जातु भक्ति: पुष्णात्यतो भक्तिपथाश्रयिण: "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा, उ, ६।२।२) इत्यस्या: श्रुतेरिममर्थं प्रतिपादयन्ति—"'इदं' विभक्तनामरूपवत्तुत्वावस्थं जगत् 'अग्रे' सृष्टे: प्राक् 'एकमेव' अविभक्तनामरूपकतयैकत्वावस्थापन्नमेव

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३ ॥

'अद्वितीयम्' अधिष्ठानान्तरशून्यञ्च 'सदेव आसीत्' ।" (वे. त, भा,) इति "अव्यक्ताद्व्यक्तयः सर्व्वाः प्रभवन्त्यहरागमे" (८।१८) इत्युक्तदिशा सतोऽभिव्यक्तं जगत् जीवश्च तल्लीलाभूमिर्विभूतिर्वा ; योगप्रलये तु तयोः सद्भावतयावस्थानम् ; तत्तु "रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके" (८।१८) इत्युक्तदिशा । अतएव मूलेऽनाधारे सद्भावे दृष्टि- र्योगिनाम्, भक्तानान्तु भक्तभगवदवलम्बकानां सन्मूलासु सर्व्वासु प्रजासु तदन्तर्यामितया कल्याणगुणसम्पन्ने परमात्मनि चेत्यलमति विस्तरेण । १२ ।

आत्मतत्त्वविज्ञानाय प्रथमन्तावत् देहदेहिनोर्भेदं देहनाशेऽप्या- त्मनोऽविनाशश्च प्रत्यक्षदृष्टान्तेन दर्शयति देहिन इति । देहिनोऽस्मिन् देहे यथा कौमारं यौवनं जरेति तिस्रोऽवस्थाः, तथा देहान्तरप्राप्ति- र्मृत्योरनन्तरं देहाद्देहान्तराश्रयणमवस्थाविशेष एव । अतो धीरो बुद्धिमान् देहनाशात्मनाशयोर्न मुह्यति । कौमाराद्यवस्थान्तरतायां यथा स एवात्मेति प्रत्यभिज्ञानं देहाद्देहान्तरप्राप्तावपि तथैव, जातमात्रस्य पूर्व्वसंस्कारजनितप्रवृत्तिदर्शनादिति प्राचां सिद्धान्तः । सिद्धान्तश्चायं नैकान्तिकः काले कालेऽस्य रूपान्तरपरिग्रहात्, [illegible]नापि सुतरां तदधीनत्वानपनयात् । श्रीमतो योगाचार्य्यस्य तु पुनः सर्व्वसमन्वय- कारिणः सिद्धान्तं प्रदर्शयितुं [illegible] निवर्धोमः । तथाहि वैदिकसंहितासु परेतानां जीवानामिह लोके पुनर्जन्म नोप- लभ्यते, अथापि यज्ञीगाय देहग्रहणं वर्णितमस्ति तत् परत्रैव । तद्- यथा ;—

"सं गच्छस्व पितृभिः सं यमेनेष्टापूर्त्तेन परमे व्योमन् ।
हित्वावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः ॥
(१०म, १४सू, ८ऋक्) इति ।

"ये नः पितुः पितरो ये पितामहा य आविविशुरुर्व्वन्तरिक्षम् ।
तेभ्यः स्वराडसुनीतिर्नो अद्य यथावशं तन्वः कल्पयाति ॥"

(१८।३।५९) इति ।

एतत् कायग्रहणं पुनर्मर्त्येषु [illegible] तद्‌यथाथर्व्वणि ;—

"मा ते मनो मासोर्माङ्गानां मा रसस्य ते ।
मा ते हास्त तन्वः किञ्चनेह ।" (१८।२।२४) इति ।

न तु वक्तव्यमस्थूलोऽयमिति ; स्थूलत्वमेवास्य सर्व्वत्र वर्ण्यते ;—

"यद्वो अग्निरजहादेकमङ्गं पितृलोकं गमयन् जातवेदाः ।
तद्वः एतत् पुनरा प्याययामि साङ्गाः स्वर्गे पितरो मादयध्वम् ॥"

(१८।४।६४) इति ।

पुत्रकलत्रैश्च तत्र पुनर्मिलनमपि वर्ण्यते ;—

"स्वर्गं लोकमभि नो नयासि सं जायया सह पुत्रैः स्याम ।"

(१२।२६५। १७) इति ।

परेतानामयज्ञयाजिनां दस्यूनामपि पितृगणैः सह वसतिः ;—

"ये दस्यवः पितृषु प्रविष्टा ज्ञातिमुखा अहुतादश्चरन्ति ।
परापुरो निपुरो ये भरन्ति अग्निष्टानस्मात् प्रधमाति यज्ञात् ॥"

(१८।२।२८) इति ।

स्थितिः पितॄणामन्तरिक्षे दिवि पृथिव्यां वा ;—

"ये न पितुः पितरो ये पितामहा य आविविशुरुर्व्वन्तरिक्षम् ।
य आक्षियन्ति पृथिवीमुत द्यां तेभ्यः पितृभ्यो नमसा विधेम ॥"

(१८।२।४९) इति ।

पृथिव्यां स्थितिस्तु तत्र समाहितानामतएवाह्वानमन्त्रे ;—

"ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः ।
सर्व्वांस्तानग्न आ वह पितॄन् हविषे अत्तवे ॥"

(१८।२।३४) इति ।

ऋग्वेदसर्व्वेणि च विस्पष्टं भूसमाधानम् । तद्‌यथा ;—

"उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् ॥
उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना ।
माता पुत्रं यथा सिचाभ्येनं भू[illegible]हि ॥
उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सन्त्वत्र ॥"

(१०।१८।१०—१२ ऋक्) इति ।

युवतिरित्यत्र पृथिवी, निर्ऋतेरुपस्थादित्यत्र प्रपथे पुरस्तात्, उच्छ्वञ्चस्वेत्यत्र उच्छ्वश्व, सूपवञ्चनेत्यत्र सूपसर्पणाः, भवन्त्वित्यत्र स्योना इति पाठान्तरैरथर्व्वणि (१८।३।४९—५१) एताः ।

भूमेरव्यवहितोपरिस्थव्योम पृथिवीति केचित्, तथैवाथर्व्वणि "पृथिवीं त्वा पृथिव्याम्" (१८।४।४८) इत्यत्र दर्शनात् । "पार्थिवे रजसि आ निषत्ताः" (१०।१५।२) इत्यत्र रजःशब्देनान्तरिक्षावकाशेऽर्थे गृह्णाति तन्मतेनैक्यम् । न तु वक्तव्यं पृथिव्यव्यवहितान्तरिक्षे पितरो देवा वा न निवसन्तीति । यदि न स्युर्वैदिकर्षिभिः प्रथमामिष्टकामुपदधतः नाचिकेताग्निचितस्तैः सायुज्यं सलोकता न वर्ण्येत — 'अथो या अस्मिँल्लोके देवताः तासाꣳ सायुज्यꣳ सलोकतामाप्नोति' (तै, ब्रा, ३।११।१०) इति । "पुनरस्तमेहि" इति वचनेनेह लोक एव पुनरावृत्तिरर्चो वर्णयन्तीति मतमेताभिः पराकृतम् । यत्र च तादृशवर्णनमस्ति तत्तु स्वधाग्रहणाय । तद्यथा—"परा यात पितरः सोम्यासो गम्भीरैः पथिभिः पूर्य्याणैः । अधा मासि पुनरा यात नो गृहान् हविरत्तुं सुप्रजसः सुवीराः ॥ (१८।४।६३) इति । आहेऽष्टकाविषु निगूढाः पितरस्तिष्ठन्तीति शौनकः (आ, गृ, सू, ४।७।२६) ।

अथ पुनर्ब्राह्मणविभागे देहस्य क्षुत्तृष्णानिपीड़ितस्यानुष्ठानमाहात्म्यात् परत्र पानभोजनैस्तन्निवृत्तिः सायं प्रातर्वा, पक्षे पक्षे वा, मासि मासि वा, मासैस्त्रिभिश्चतुर्भिर्वा, षण्मासैः षण्मासैर्वा, प्रतिसंवत्सरं वा, शतवर्षैः शतवर्षैर्वा, यथेच्छं वा पानभोजनाभिनिवृत्तिः । तद्यथा ;—

"अथातो यज्ञवीर्य्याणामेव,—सायं प्रातर्ह वै अमुष्मिन् लोके अग्निहोत्रहुदश्नाति, तावतीह तस्मिन् यज्ञे कर्म्म। अर्द्धमासेऽर्द्धमासे दर्शपूर्णमासयाजी; चतुर्षु चतुर्षु मासेषु चतुर्मास्ययाजी; षट्सु षट्सु पशुबन्धयाजी; संवत्सरे संवत्सरे सोमयाजी; शते शते संवत्सरेषु अग्निचित् काममश्नाति कामं न तद् ह एतद्यावत् शतं संवत्सरास्तावदमृतमनन्तमपर्य्यन्तम्। स यो ह एतदेवं वेद एवं ह एवास्य एतदमृतमनन्तमपर्य्यन्तं भवति। तस्य यदपि हषीकयेवोपहन्यात्तदेवास्यानन्तमनन्तमपर्य्यन्तं भवति।" (श, प, ब्रा, १०।१।५।४) इति।

'न कामम्' इति वचनमनन्तापर्य्यन्तस्थितिमेवाच द्योतयति। द्विविधा हि स्वर्गलोका ब्राह्मणविभागे वर्ण्यन्ते, आदित्यलोकादर्व्वाञ्च उपरितनाश्च। ये हि अर्व्वाञ्चस्तेऽन्तवन्तः क्षय्याः, ये चोपरितनास्ते अनन्ता अपारा अक्षयाः। अभिजयति तान् नाचिकेताग्निचित् तदभिज्ञश्च तद्यथा—"अवरो ह वै नामैते लोका येऽवरेणादित्यम्। अथो हैते वरीयाᳫंसो लोका ये परेणादित्यम्। अन्तवन्तᳫं ह एष क्षय्यं लोकं जयति योऽवरेणादित्यम्। अथ हैवाऽनन्तमपारमक्षय्यं लोकं जयति यः परेणादित्यम्। अनन्तᳫं ह वा अपारमक्षय्यं लोकं जयति योऽग्निं नाचिकेतं चिनुते, य उतैनमेवं वेद।" (तै,ब्रा, ३।११।८) इति। अर्व्वाक्षु लोकेषु सूर्य्यालोकप्रचरणादहोरात्रे भवतोऽत आयुःक्षयस्तेषु; न तथा परासु लोकेषु—"नास्याहोरात्रे लोकमाप्नुतः, योऽग्निं नाचिकेतं चिनुते य उतैनमेवं वेद" (तै, ब्रा, ३।११।८) इति। स्वर्गलोके यज्ञयाजिनः प्रजया पशुभिर्ब्रह्मवर्च्चसेन युक्ता भवन्ति, यथा "प्रजया पशुभिर्ब्रह्मवर्च्चसेन सुवर्गे लोके" (तै, ब्रा, १।२।१) इति। द्यावापृथिव्योर्मध्ये पितृयाणेन देवयानेन च समग्रविश्वपरिभ्रमणञ्चानुमोदितमत्र, यथा "द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानाम्। ताभ्यामिदं विश्वं भुवनᳫं समेति। अन्तरा पूर्व्वमपरञ्च केतुम्।" (१।४।२) इति। नक्षत्राणि हि देवानां गृहाः—"देव-

द्रष्टा वै नक्षत्राणि" (१।५।२।६) इति। "अमुष्मिन् लोके सम्भवति" (श, प, ब्रा, ११।१।८।६) इति जन्म परत्रैव।

"विद्यया तदारोहन्ति यत्र कामाः परागताः" (श, ब्रा, १०।५।४) इत्युक्त्या ज्ञानभूमौ ब्राह्मणविभागस्य प्रवेशः। "अन्धतमः प्रविशन्ति ये अविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः॥" "अनन्दा नाम ते लोका अन्धेन तमसावृताः। तां ते प्रेत्याभिगच्छन्त्य-विद्वांसोऽबुधा जनाः॥" (बृ, आ, ४।४।१०।११) इत्यत्र संहिताक्रान्त-तमःप्रवेशस्य ज्ञानभूमौ नवीनविनियोगः। अथर्ववेदस्य "अधाद्-नारकं लोकम्" (१२।४।३६) इति नरकलोकस्य तु विस्तृतविवरणेन पौराणिकसमये ग्रहणम्

येन: साधितं स्वर्गलोके लोकान्तरे वा स्थितेः कालो न निर्णीतोऽस्ति संहितायां ब्राह्मणविभागे वा। अतस्तस्मिन्नपरितुष्यन् ब्राह्मणविभागेषु सुपरिचितो याज्ञवल्क्यो बृहदारण्यकोपनिषदि "यत् कर्म कुरुते तदभिसम्पद्यते" (बृ, आ ४।४।५) इति न्यायमनुसृत्य स्पष्टमेवाह "तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य। प्राप्यान्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययम्। तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मणे॥" (बृ, आ, ४।४।६) इति। देहाद्देहान्तर-प्राप्तिमेवं स दर्शयति, "तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्य-माक्रममाक्रम्यात्मानमुपसंहरति, एवमेवायमात्मा इदं शरीरं निहत्या-विद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरति।" "तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरं रूपं तनुते, एवमेवायमात्मा इदं शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां भूतानाम्" (बृ, आ, ४।४।४)। "य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम्।" (बृ, आ, ६।२।१६) इति इममेवार्थं छान्दोग्ये राजा जैवलिः प्रपञ्चयाह "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्

ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा। अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वा॥" (छा, उ, ५।७।१०) इति। "एतमन्नमयमात्मानमुपसंक्रम्य" इत्यारभ्य "एतमानन्दमयमात्मानमुपसंक्रम्य इमाँल्लोकान् कामान्नी कामरूप्यनुसञ्चरन् एतत् साम गायन्नास्ते" (तै, उ, ३।१०।५।६) इति तैत्तिरीयोपनिषदुक्तिः भक्तिप्रधानपौराणिककालमालिङ्गति। वैदिककर्म्मसु मन्त्रब्राह्मणवत् सर्व्वम्। तत्त्वनिर्णायकसूत्रप्रधानकाले तु गुणत्रयविभागतो लोकानामूर्द्ध्वमध्याधोविभागनिर्व्वचनं जरामरणादिजन्मदुःखभाक्त्वमाप्तिमत्त्वञ्च दृश्यते। मुक्तानां तत्र चिन्मात्रत्वेऽवस्थानं स्वेच्छया शरीरग्रहणं वा विवादास्पदमासीत्। "मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्ययः। नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम॥" (२अं, ६अ, ४२श्लो) इति विष्णुपुराणवचनं स्वर्गनरकयोस्तत्त्वमाविष्करोति। वसिष्ठपराशरादीनां शरणमनस्त्वाधुनिकप्रसिद्धव्याख्यातृभिः तनुरूपादिकं मनोभाव एव पर्य्यवसितम्। तद्यथा, "विसृष्टात्मतनुं घोरामित्युक्तो विमुमोच ह" (भाग, ३स्क २०अ, २८श्लो) इत्यस्य व्याख्यानावसरे श्रीमच्छ्रीधरस्वामिनोक्तं "सर्व्वत्र तनुत्यागो नाम तत्तद्भावपरित्यागो विवक्षितः, ग्रहणञ्च तत्तद्भावापत्तिरिति द्रष्टव्यम्।" इति। न्यायमिमं समाश्रित्य वैष्णवशास्त्रमीमांसाकृता श्रीमता जीवेनाप्युक्तं क्रमसन्दर्भे "तनुरूपकलेवरशब्देन च श्रीभगवतो भूभारजिहीर्षालक्षणो देवादिपिपालयिषालक्षणश्च भाव एवोच्यते।" इति। "सर्व्वेषां देहहीनानां महद्दुःखं भविष्यति। लुप्यन्ते सर्व्वकर्म्माणि हीनदेहस्य वै विभो॥" इत्यत्र देहं विना न कर्म्मसिद्धिरिति रामायणे विदेहस्य वसिष्ठस्योक्तौ यद्यपि दृश्यते तथापि विदेहस्य निमेस्तत्रैव चिद्रूपेण स्थितिप्रार्थनं सर्व्वभूतानां निमेषक्रियासिद्धौ तस्य क्रियाकारित्वञ्च, तद्यथा "सुप्रीताश्च सुराः सर्व्वे निमेश्चेतस्तदाऽब्रुवन्। वरं वरय राजर्षे क्व ते चेतो निरूप्यताम्॥ एवमुक्तः सुरैः सर्व्वैर्निमेश्चेतस्तदाऽब्रवीत्। नेत्रेषु

सर्व्वभूतानां वसेयं सुरसत्तमाः ॥ वाढ़मित्येव विबुधा निमिमेनस्तदा-ब्रुवन् । नेत्रेषु सर्व्वभूतानां वायुभूतश्चरिष्यसि ॥ त्वत्कृते निमिषिष्यन्ति चक्षूंषि पृथिवीपते । वायुभूतेन चरता विश्रामार्थं मुहुर्मुहुः ॥" (रा, उत्त, ५७स, १३—१६श्लो) इति । "अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवचक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके ।" (छा, उ, ८।५।६।१२) इति श्रुतिरपि तदेव व्यनक्ति ।

एवं विविधरूपान्तरैकस्मिन् मीमांस्ये विषये कथं वाविष्करो-त्यात्मानं श्रीमतो योगाचार्य्यस्योक्तिषु तदयमत्र पर्य्यालोचयामः । प्रथमन्तावत् स वैदिककालमुद्दिश्याह "काङ्क्षन्तः कर्म्मणां सिद्धिं यजन्त इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्म्मजा ॥"(४।१२) । "त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान् ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्त्यलोकं विशन्ति । एवं त्रयीधर्म्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥" (९।२०—२१) इत्यत्र यज्ञैरतया गतिरिति संहिताब्राह्मणयोः सिद्धान्तमनभिनन्द्य वेदान्तसिद्धान्तमेवाश्रयत्याचार्य्यः । "शरीरं यदवाप्नोति यच्चाप्युत्-क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ श्रोत्रं चक्षुः स्पर्शनञ्च रसनं घ्राणमेव च । अधिष्ठाय मनश्चायं विषयानुप-सेवते ॥" (१५।८।९) इति वैदिकसमयोचितोक्तिः । इयांस्तु विशेषो यद्देदेषु चक्षुरादीन् सूर्य्यादिषु प्रक्षिप्य प्रथमं केवलं जीवस्य लोकान्तर-गमनम्, तदनन्तरं तत्र भोगोपकार्य्यविकल्पदेहप्राप्तिः ।

वेदान्तसमुचितसिद्धान्तः पुनरेवोपलभ्यते । "विद्यामयोऽयं पुरुषो न तु कर्म्ममयः स्मृतः । य एतममृतं नित्यमग्राह्यं शश्वदक्षयम् । वश्यात्मानमसंश्लिष्टं यो वेद न मृतो भवेत् ॥" (म, मो, ५१म, ३३।३४श्लो) इत्यनुगीतोक्तिर्वेदान्तसिद्धं कर्म्ममयाद्विद्यामयस्य पुरुषस्य भेदं दर्शयति । "यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।

भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥" (९।२५) इति तत्तत्कामवशात् तत्तल्लोकप्राप्तिं वदद्भिर्वेदान्तैरैक्यम्, तत्र तु विशेषः सर्व्वलोकचारित्वं विदुषः। "लोकाल्लोकमयाम्यहम्" (१६अ, ४०श्लो) इत्यनुगीतोक्तिः पुनः सर्व्वलोकचारित्वमाम्नायशिरो व्यनक्ति। "अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम्। यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥ यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः॥" (८।५।६ श्लो) इत्यत्र तु वेदान्तादपि स्फुटतरा तत्तद्भावभावितत्व तत्तद्भावप्राप्तिः। "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः॥" (८।२४।२५।२६) इति वेदान्तसिद्धं प्रयाणमार्गद्वयमुक्त्वा "नैते सृती पार्थ जानन् योगी मुह्यति कश्चन। तस्मात् सर्व्वेषु कालेषु योगयुक्तो भवार्ज्जुन॥" (८।२७) इत्यत्र विदुषो योगयुक्तस्य मार्गद्वयनिरपेक्षत्वमुक्तम्, तत्त्वाचार्य्यस्य प्रतिभानमभ्रान्तम्। "मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्। नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥" (८।१५)। "अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम॥" (८।२१)। "न तद्भासयते सूर्य्यो न शशाङ्को न पावकः। यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम॥" (१५।६) इति आम्नायशिरसामपुनरावृत्तिरिह यद्वर्ण्यते तद्वेदान्तसम्मतम्। निराकाराश्रयफलमियमपुनरावृत्तिरिति विस्पष्टमनुगीतायाम्। तद्यथा;—

"सदा कदाचिन्निर्व्वेदान्निराकाराश्रितेन च।
लोकतन्त्रं परित्यक्तं दुःखार्त्तेन भृशं मया॥
लोकेऽस्मिन्ननुभूयाहमिमं मार्गमनुष्ठितः।
ततः सिद्धिरियं प्राप्ता प्रसादादात्मनो मया॥

नाहं पुनरिहागन्ता लोकानालोकयाम्यहम् ।
आसिद्धैर्वा प्रजासर्गादात्मनोऽपि गतिः शुभा ॥
उपलब्धा द्विजश्रेष्ठ तथेयं गतिरुत्तमा ।
इतः परं गमिष्यामि ततः परतरं पुनः ॥
ब्रह्मणः पदमव्यक्तं मा तेऽभूदत्र संशयः ।
नाहं पुनरिहागन्ता मर्त्यलोकं परन्तप ॥"

(अ, गी, १६अ, ३८—४२श्लो) इति

"आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्ज्जुन" (८।१६) इति सांख्य सिद्धान्तसम्मतानि सर्व्वाणि भुवनानि जरामरणादिजदुःखसामान्यात् मर्त्त्यलोकत्वे परिगणितानि । "एषाऽस्य परमा गतिरेषास्य परम सम्पदेषोऽस्य परमो लोक एषोऽस्य परम आनन्दः" (बृ, आ, ६।३।३२) इत्युक्तदिशा स्वरूपेऽवस्थानपूर्व्वकं परमात्मानमेव यदा न विषयीकरोति तदात्मा विषयाभिनिवेशवशादवस्थान्तरप्राप्तिरूपां पुनरावृत्तिं परिवर्त्तन शीलतां पुनः पुनः सर्व्वत्रानुभवति । निराकारपरब्रह्मण्याश्रिते सति तस्मिन्निवसतिर्नित्यैव ।

"वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥

(२।२२)

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥
अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥
तत्र तं बुद्धिसंयोगं लभते पौर्व्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥
पूर्व्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥ (६।४१—४५)
बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते॥" (७।१९)।

इत्यत्र "वासांसि जीर्णानी"ति वेदसम्मतम्। योगिनां भोगप्राप्तिः योगिकुले जन्म च यद्यपि न वेदान्तेषु विस्पष्टमुपलभ्यते, भावतस्तैरस्य साम्यमस्ति। किं च ते पुण्यलोका यत्र ते योगभ्रष्टा गच्छन्तीति जिज्ञासानिवृत्तये,नुगीतोक्तिरियमुद्धियते ;—

"अहन्तु जन्तवो गत्वा येषु स्थानेष्ववस्थिताः।
कीर्त्त्यमानानि तानीह तत्त्वतः सन्निबोध मे॥
तच्छ्रुत्वा नैष्ठिकीं बुद्धिं बुध्येथाः कर्म्मनिश्चयम्।
ताराकृपाणि सर्व्वाणि यत्रैतच्चन्द्रमण्डलम्॥
यत्र विभ्राजते लोके स्वभासा सूर्य्यमण्डलम्।
स्थानान्येतानि जानीहि जनानां पुण्यकर्म्मणाम्॥"

(अ, गी, १७अ, ३८—४०श्लो)।

उक्तिरियं ब्राह्मणविभागानुसारिणी। "दृष्ट्वा भगणम्" इत्यस्य व्याख्याने "भानि अश्विन्यादीनि अन्यानि विशिष्टानि ज्योतींषि तेषां समूहश्चक्र"मित्युक्तत्वात् असंख्येयानि तानि ताराकृपाणि स्थानानि।

"कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु। (१३।२१)
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते॥
रजसि प्रलयं गत्वा कर्म्मसङ्गिषु जायते।
तथा प्रलीनस्तमसि मूढ़योनिषु जायते॥ (१४।१४।१५श्लो)
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः॥" (१४।१८)।

इत्येतद्यदुक्तं न तद्वेदे न वेदान्ते वा दृश्यते, सांख्यसूत्रे यद्यपीदं गतिकारणं व्यक्ततरं न कुत्रापि निबद्धम्, तथापि तत्सम्मतनवीनोद्भाव-

नैयमाचार्य्यस्य । अतेदं विचार्य्यम्,—न कुत्रापि केवलं स्त
स्तमो वा सम्भवति, सर्व्वत्र तेषां सङ्कर एव । यदाहाचार्य्य:
रजस्तथा सत्त्वं गुणानेतान् प्रचक्षते । अन्योन्यमिथुनाः सर्व्वे
न्यानुजीविनः ॥ अन्योन्यापाश्रयाश्चापि तथान्योन्यानुवर्त्तिनः
न्यव्यतिषक्ताश्च त्रिगुणाः पञ्चधातवः ॥" (अ, गी, ३६अ,
इति । अतएवाह "यदा सत्त्वे प्रवृद्धे" इति । विशेषणञ्चेत
तमसि चानुषज्यते । गुणव्यतिकरस्यापरिहार्य्यत्वादूर्द्ध्वमध्या
स्थानप्रवृत्त्यज्ञानापेक्षया । एतदेवापेक्ष्याह्नानुगीतासु, "तत्रापि
षोऽस्ति दिवि नीचोच्चमध्यमाः" (अ, गी, १७अ, ४१श्लो) इति
चैवमेवास्ति । दिवीत्यत्र पृथिवीप्रतियोगी दिव्शब्दः, द्यावा
सर्व्वलोकान्तर्भावकत्वेन तयोः प्रयोगदर्शनात् । अतः पर
साधारणशब्दोऽयम् । न च वक्तव्यं दिवि न कर्म्मसङ्गिनाम
यतस्तत्रैवोक्तम् "क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः" (
१८अ, ५८श्लो) इति । भवतु तावत् राजसानां तत्रावकाशः
नान्तु न स कदापि सम्भवति । चेन्न सम्भवेत् "नीचोच्चमध्यमा
विशेषणस्य वैयर्थ्यं स्यात् । वस्तुतस्तु तत्र "न चैतदिष्टं देवानां
रूपनिवर्त्तनम्" (अ, गी, १८अ, ५८श्लो) इत्युक्तिर्हि विज्ञानाम
व्यनक्ति । तदेव च घनाभूतं दिवि नीचान् तामसानां प्र
टङ्काति ।

"तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥
दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥
दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ॥" (१६।३ -

इतीयमपुराक्तिराचार्य्यस्य प्रतिभानमुल्लासयति ।

"तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥

[illegible]सुरीं योनिमापन्ना मूढ़ा जन्मनि जन्मनि।
[illegible]प्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्" (१६।१९-२०)
[illegible]अभिहितं तद्यदपि वेदान्तेषु विस्पष्टं न दृश्यते, तथापि
[illegible]यामीयां योनिप्राप्तौ न कोऽप्यस्त्यभिहितो विमोक्षोपायः,
[illegible] इति भावन ऐक्यम्, उक्तिरेषा निरवधानतया ; संशोध्या
[illegible] 'एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः। आचरत्या-
[illegible] याति परां गतिम्॥' इत्यनन्तरोक्त्या आसुरान् धर्मान्
[illegible] अनुष्ठानाचरन् सद्गतिं प्राप्नोतीति सिद्ध्यति।" अभि-
[illegible] च पुनरनुगीतासु, तद्यथा ;—

"[illegible]कर्षमद्रेकं वक्ष्याम्यहमतःपरम्।
[illegible] ते मुकना [illegible] लोका [illegible] भवन्ते पुण्यकर्म्मिणः॥
[illegible]न्यथा प्रतिपन्नास्ते विरुद्धा ये च कर्म्मणः।
[illegible]कर्म्मनिरतानाञ्च ब्राह्मणानां शुभैषिणाम्॥
संस्कारेणोद्भिमाश्रान्ति यतमानाः सन्लोकताम्।
स्वर्गं गच्छन्ति देवानामित्यथा वैदिकी श्रुतिः॥" इत्यादि।
(अ, गी, ३६अ, २६—२८श्लो)।

[illegible] निष्कर्षः। परेतानां शरीरान्तरग्रहणं परत्रैवेति वैदिकाः।
[illegible]कात् पुनरेत्य अस्मै लोकाय कर्म्मणे" इति वेदान्तिनः। यदि
[illegible] वेदान्तिनाञ्चैकत्वसाधनेऽस्माकं कौतूहलं स्यात्, तदा वय-
[illegible]मः। तदिदमोः सम्बन्धोऽत्र एकस्मात्स्फलितस्यान्यत्र
[illegible]—"तद्यथा तृणजलायुके"त्याद्याभिः। यद्येवं कथं
[illegible]योनिप्रवेशः परत्र सिद्ध्यति? कथं वा "पृथिवीं
[illegible] (बृ, आ, उ, ८।२।१६) इति? सिद्ध्यत्येव, यतो
[illegible]नो भूतं द्विपदे शं चतुष्पदे (६।७४।१) इति ऋचो
[illegible] भुवनेषु द्विपदां चतुष्पदां निवास उक्तः ; अथर्व्वणि
[illegible] पशवः" (११।३।८) इत्युक्त्वा दिवि पशवः सन्तीति
[illegible] "[illegible] पशुभिर्ब्रह्मवर्च्चसेन सुवर्गं लोके" इति तत्र पशूनां

स्थिति: सुव्यक्ततरा। "लोकान् प्रत्युत्थायिनस्ते" (बृ, आ, उ, ८।२।१६) इति यदुक्तं तेनैवाभिव्यज्यते लोकानामसंख्येयत्वादावृत्तिमात्रप्रदर्शनपरमेतत्। लोका: सप्तसंख्याता नातिरिच्यन्त इत्युक्तिस्त्वनवधानात्, यतस्तेषां तथात्वमैतरेयब्राह्मणे (४।३।४) त्रिभिस्त्रिभि: स्तोमसहस्रैर्लोकेद्दृश्यस्यादित्यस्यावाङ्‌धः पतनवारणायैवाम्नातम्। अतएव तत ऊर्द्ध्वमधोऽस्मोमात्रकाशावगतेर्दृश्यादित्यस्य च भचक्रस्थानां मण्डलानामेकतमत्वात् लोकानामसंख्येयत्वमेव तत्त्वम्। वदति च "एवमेवानुपरिवर्त्तन्ते" (बृ, आ, उ, ८।२।१६) इति। न तु वक्तव्यं देवयानमार्गे सम्भवति समग्रविश्वभ्रमणं न तु पितृयाणमार्गे, "याभ्यामिदं विश्वमेजत् समेति" (तै, ब्रा, २।६।३) (बृ, आ, उ, ८।२।२) इत्युक्तत्वादुभयोस्तत् समानम्। आवृत्ति: पुनरावृत्तिरनुपरिवृत्ति: पुन: पुनरूर्द्ध्वमध्यमाधोगतिरेव; ज्योति:शब्दाभिधायिनां स्वयं ज्योतिष्मतां, चान्द्रमसज्योति:शब्दाभिधायिनाञ्च परज्योति:सापेक्षाणां लोकानामसंख्येयत्वात्। "पृथिवीं प्राप्य"त्यत्र परज्योति:सापेक्षकाणां पृथिवीतुल्यत्वात् पृथिवीशब्देन निर्देश:। अतएवाथर्व्वणि दिव्यपार्थिवभेदेन लोकानां विभागो दृश्यते यथा, "तथा लोकान् समाप्नोति ये दिव्या ये च पार्थिवा:" (८।२०प्र। १४) इति। तथाच छान्दोग्ये "स एष ये चामुष्मात् पराञ्चलोकास्तेषां चेष्टे देवकामानाम्।" "स एष ये चैतस्मादर्व्वाञ्चो लोकास्तेषां चेष्ट मनुष्यकामानाञ्च" इति। अतएव "अन्तरा पूर्व्वमप[illegible] केतुम्" इत्यत्र ज्योतिष्काज्योतिष्कलोकसूचनाय चिह्नवाचक: केतुशब्द:। अतएव च "अवरेणादित्यम्" "परेणादित्यम्" इति लोकानां भेद:। अतएव हि "अग्नो यथा रथे तिष्ठन् पक्षसी पर्य्यावर्त्तमाने प्रत्यपेक्षते, एवमहोरात्रे प्रत्यपेक्षते; नास्याहोरात्रे लोकमाप्नुत:" (तै, ब्रा, ३।११।८) इति अहोरात्रयुक्ता अहोरात्रविमुक्ता लोका: वर्ण्यन्ते। "य एते पन्थानौ न विदुस्ते कीटा: पतङ्गा:" इत्युक्तिस्तु मार्गज्ञानानुपयोगिनां कीटादीनामत्रैव पुन: पुनर्जन्म द्योतयति, अतएव "क्षुद्रकर्म्मणान्तु जन्तूनामत्रैव पुन: पुनर्जन्मे"ति स्वामिकृतसिद्धान्त: सिद्धति। "न क्वचित् सुख-

त्वन्तं न क्वचित् शाश्वती स्थितिः। स्थानाच्च महतो भ्रंशो दुःख-
श्चात् पुनः पुनः॥" (म, गी, १६म, ३०श्लो) इत्युक्तिमाचार्य्यस्या-
ाक्यं व्याख्यानस्य दार्ढ्यायोदाहरिष्यामः। न केवलमेतावानस्याक-
र्थः स्यात्, इयमपि युक्तिरस्माभिर्दर्शयिष्यते—यत्र स्वाचार्य्यैर्गीतशब्दः
युक्तस्तत्र मरणशीलानां मर्त्यानामाब्रह्मभुवनव्यापी लोक एव तेनाभि-
तः, तत एवोक्तं "नाहं पुनरिहागन्ता मर्त्यलोकं परन्तप" इति।
ते तु भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इत्यत्र
विशालमिति विशेषणं मर्त्यलोकविशेषणत्वेन तदेव व्यञ्जयति। अत-
व ब्राह्मणविभागे देवयानमार्गेण पितृयाणमार्गेण च मर्त्यरूपवतां
वानां मर्त्यानाञ्च निखिलजगद्भ्रमणमुदाहृतम्। "अशुभा गतयः"
त्यारभ्य "पतनं निरये चैव यातनाश्च यमक्षये" (म, गी, १६म,
१—२६श्लो) इत्यन्तग्रन्थस्य विरोधित्वञ्च, "लिङ्गं मनो यत्र निषक्तम्"
ति दृष्ट्या सत्यवत् प्रतीतत्वात् वस्तुमनोभावपरिवृत्तिविजृम्भितैर्योक्ति-
तिस्मृतेरेवञ्जातीयकत्वादिति हेतुना, परिहरिष्यामः। पूर्व्वतन-
ाख्यातृगणपश्चानुसरणेनावलम्बनमोहम्व्याख्यानकौशलस्य कालातीत-
यदृष्ट्या सम्यक्त्वेऽपि देशकालप्रभावचिन्तया सर्व्वथा नादुष्टमिति
दरा यद्यपि ततो विहस्ताः, तथापीदं स्वीकर्त्तव्यं यत्—प्राचीन-
शावलम्बनेन भपञ्जरप्रयाणवशात् चक्रभ्रमिवत् परिवृत्तिं स्वीक्-
ापि, गुणानुसारिणीं गतिं निर्णीय, सर्व्वत्र गुणव्यतिकरञ्च
दर्श्य, परत्र पुरुषाणां नीचोच्चमध्यमावस्थायां स्थितिञ्चाभिनन्द्य—
ेमद्योगाचार्य्यस्तां भूमिमारूढ़वान् यतो वेदवेदान्तयोरैक्यं पुनः
नः नीचोच्चमध्यावस्थाप्राप्तिरूपया परिवृत्तिधर्म्मवदसंख्येयलोकेष्वे-
वृत्त्या साधितं भवति। किं बहुना, "अन्ये त्वेवमजानन्तः
त्वान्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरा-
णाः॥" (१३।२५); "मां हि पार्थ व्यपाश्रित्य येऽपि स्युः
ापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥"
८।३२) इति नवीनमतावतारणेनावृत्तिं पराहत्य परत्र स्थितिः

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

विषयेन्द्रियसम्बन्धे सम्भवतीति दृष्ट्वा कर्त्तव्यानुरोधात्, हे भारत, तान् तितिक्षस्व सहस्व, न तु मृत्पाषाणादिवद्बोधशून्यो भव। निसर्गतो यदवश्यम्भावि तत: कर्त्तव्यविमुखो भवितुं नार्हसीति भाव:। "नाहं विना यदुभिर्यादवानां पुरीमिमामद्य दृष्टुमद्य" (मौ, प, ४अ, ८श्लो) इत्युक्तिराचार्यस्य यदुकुलध्वंसे मृत्पाषाणादिवद्बोधशून्यत्वाभावमात्मनो दर्शयति, "इहैव त्वं मां प्रतीक्षस्व राम यावत् स्त्रियो ज्ञातिवशा: करोमि" (मौ, प, ४अ, ६श्लो) इति तस्य बन्धुक्षयजन्यशोकापनोदनार्थं तपश्चिकीर्षतस्यापि कर्त्तव्यपरायणत्वं न तमजहादिति सूचयति। १४।

कर्त्तव्यानुरोधेन शीतोष्णादिसहनं न केवलं तत्कालोचितं श्रेय: साधयति, तेन च जीवस्य मोक्षोपयोगितोद्भवति इत्याह यमिति ;— 'समदुःखसुखं'—सुखदु:खप्राप्तौ हर्षविषादरहितम् इति श्रीमच्छङ्कर:, स्वजनीयदुःखं सुखञ्चमन्यमानमिति श्रीमद्रामानुज:, धर्म्मानुष्ठानस्य कष्टसाध्यत्वात् दु:खमनुषङ्गलब्धं सुखञ्च यस्य सममिति श्रीमद्बलदेव:, समाधिस्थत्वात् समदुःखसुखत्वमस्येति श्रीमन्नीलकण्ठ:। "यत: प्रवृत्तिर्भूतानाम्" (१८।४६) इत्याद्युक्तरीत्या भगवदिच्छा पालनं कर्त्तव्यपरायणत्वेन तस्मिन्निबद्धचित्तमस्य, ततोऽन्त:शीतलतायां सुखदु:खयोस्तत्त्वं हृदि स्फुरति, तेन च विकारराहित्यमस्य। किमिदं तत्त्वम्? दु:खच्छद्म सुखं, सुखच्छद्म दु:खमिति। दु:खं दैन्यं वर्द्धयति तेन च भगवत्प्रपन्नत्व मतएवार्त्तभक्तस्य सुकृतित्वमुक्तमाचार्य्येण, सुखञ्च प्रमादमालस्यं जनयति तेन च मार्गात् स्खलनम्। श्लोकस्यास्याधिकारविषयप्रथमषट्कान्तर्गतत्वात् तदनुसारिणाऽस्य व्याख्याने पुनरात्मबोधादेव सुखदु:खतत्त्वस्फूर्त्तिर्मन्तव्या। तत: "दु:खेष्वनुद्विग्नमना: सुखेषु विगतस्पृह:" (२।५६) इत्युक्तदिशा दु:खेऽनवसाद: सुखे चानभिभूतबुद्धित्वमस्येति तयो: समभाव:। समदु:खसुखं धीरं ध्यानशीलं धर्म्मनिष्ठं

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

धियमीरयति धर्म्मेष्विति व्युत्पत्त्या, विवेकादिसम्पन्नं यं पुरुषमेते मात्रास्पर्शा न व्यथयन्ति न चालयन्ति न सुखदुःखमूर्च्छितं कुर्व्वन्ति, सोऽमृतत्वाय मोक्षाय कल्पते योग्यो भवति । १५ ।

देहात्मनोर्विवेकं विना नित्यानित्यज्ञानं, तेन चानित्ये निष्ठां परित्याज्य नित्ये निष्ठा स्थितिर्न सम्भवतीति तमेव प्रस्तौत्याचार्य्यः नासत इति ;—असतः आगमापायिनः देहस्य तद्धर्म्मस्य शीतोष्णादेः भावो नित्यत्वमनाशित्वं रूपान्तरतानवाप्तिः न विद्यते, सतः आगमापायरहितस्य देहिनोऽभावो व्ययो नाशो रूपान्तरताप्राप्तिः न विद्यते । अनयोरुभयोः सदसतोरन्तो निर्णयो मर्य्यादा नियतरूपत्वं याथात्म्यं तत्त्वदर्शिभि स्तदुभयस्वभाववेदिभिर्दृष्टः । प्रथमं तावत् आत्मनः सत्त्वं, देहस्य चैकस्यापायेऽन्यदेहागमेनासत्त्वम्, तद्धर्म्मस्य च तद्धर्म्मवत्त्वमुक्तम्, अधुना तयोरेकवाक्येन संग्रहो देहात्मविवेकमारभमाणेनाचार्य्येण ; विवृतिश्च “अविनाशि तु तद्विद्धि” इति “अन्तवन्त इमे देहाः” इत्यनन्तरनिर्व्वचनेन । श्रीमच्छङ्करेण तदनुयायिव्याख्यातृभिश्च यदत्रासत्कार्य्यवादस्यावतारणा कृता सा पूर्व्वापराविचारेण ; “सत्यं भूतमयं जगत्” इत्याचार्य्यस्य सत्कार्य्यवादं प्रति नेत्रनिमीलनेन च । “परस्माद्धि ब्रह्मणो भूतानामुत्पत्तिरिति वेदान्तेषु मर्य्यादा” (वे, सू, १अ, १पा, २२सू, भा,) “प्रलीयमानमपि चेदं जगत् शक्त्यवशेषमेव प्रलीयते शक्तिमूलमेव च प्रभवति, इतरथाकस्मिकत्वप्रसङ्गात्” (वे, सू, १अ, ३पा, ३०सू, भा,) “यदि वयं स्वतन्त्रां काञ्चित् प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम प्रसञ्जयेम तदा प्रधानकारणवादम् । परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते न स्वतन्त्रा । सा चावश्यमभ्युपगन्तव्या, अर्थवती हि सा । न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति, शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः”

अविनाशि तु तद्विद्धि येन सर्व्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति ॥१७॥

(वे, सू, १अ, ४पा, ३सू, भा)" "कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्य्यम्" (वे, सू, २अ, १पा, १८सू, भा) "यथा चोच्छ्वासप्रश्वासादयोऽनभिसन्धाय बाह्यं किञ्चित् प्रयोजनान्तरं स्वभावादेव भवन्ति, एवमीश्वरस्याप्यनपेक्ष्य किञ्चित्प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति" (वे, सू, २अ, १पा, ३३सू, भा) इत्याद्यासु तदुक्तिषु असत्कार्य्यवादस्य तुच्छत्वं, योगानुकूल्याय तत्स्थापने तस्य प्रयत्न इति तत्त्वम्। अन्यथा कथं सैनेयं युक्तिराश्रीयते "यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, एवं कार्य्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति" (वे, सू, २अ, १पा, १६सू, भा), "न ह्ययमत्यन्तासत्त्वाभिप्रायेण प्रागुत्पत्तेः कार्य्यस्यासत्त्वव्यपदेशः, किन्तर्हि व्याकृतनामरूपत्वाद्धर्म्मादव्याकृतनामरूपत्वं धर्म्मान्तरम् ; तेन धर्म्मान्तरेणायमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्य्यस्य कारणरूपेणानन्यस्य," "नामरूपव्याकृतं हि वस्तु सच्छब्दार्हं लोके प्रसिद्धम्। अतः प्राक् नामरूपव्याकरणादसदिवासीत् इत्युपचर्य्यते" (वे, सू, २अ, १पा, १७सू, भा) इति। "अत्र तु असत्कार्य्यवादस्यासङ्गतत्वान्न तत्परोऽयं श्लोकः। देहात्मस्वभावज्ञानमोहितस्य तन्मोहशान्तये ह्युभयो[illegible]गित्वानाशित्वरूपस्वभावविवेक एव वक्तव्यः। स एव 'गतासूनगतासूंश्च नानुशोचन्ति' इति प्रस्तुतः। स एव 'अविनाशि तु तद्विद्धि', 'अन्तवन्त इमे देहाः' इत्यनन्तरमुपपादित इति। अतो यथोक्त एवार्थः" इति श्रीमद्रामानुजः। "यत्तु असत्कार्य्यवादस्थापनायैतत् पद्यमित्याहुस्तदपि चिरवधानम्। देहात्मस्वभावानभिज्ञानमोहितं प्रति तन्मोहनिवृत्तये तत्स्वभावज्ञापनस्य प्रकृतत्वात्" इति श्रीमद्बल देवः। १६।

प्रथमन्तावज्जीवात्मनः स्वभावं विशदयत्यविनाशीति ;—विनाशो-

ऽदर्शनमभाव इति श्रीमच्छङ्करः, विनाशो देशतः कालतो वस्तुतो वा परिच्छेद इति श्रीमन्मधुसूदनः, पूर्व्वावस्थापरित्यागो विनाश इति श्रीमन्नीलकण्ठः। सत् सद्वस्तु जीवतत्त्वन्तु अविनाशि नित्यविद्यमान-मपरिच्छिन्नं सदैकरूपं विद्धि जानीहि ; येन चेतनेन जीवतत्त्वेन सर्व्वमिदमचेतनतत्त्वं जगत् व्याप्तम्। सिद्धमिदं व्याख्यानं "ययेदं धार्य्यते जगत्" इत्युक्त्या। चेतनाचेतनतत्त्वद्वयमधिकृत्यैवेदमप्युक्तं यथान्यत्र, "यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥" (१३।३३) इति। न व्येति उप-चयापचयौ न याति नापक्षीयते इत्यव्ययम्। अस्य अव्ययस्य विना-शमदर्शनमवस्थान्तरप्राप्तिं न कश्चित् कर्त्तुमर्हति। येन च यद्व्याप्तं न तत्तद्विनाशशक्तमिति "विनाशं न कश्चित् कर्त्तुमर्हति" इत्युक्तम्। निरवयवस्य चेतनस्य जीवतत्त्वस्य व्यापकत्वादविश्लेष्यत्वाच्च व्याप्येन स्थूलेनाचिता न जातु विनाशो रूपान्तरता वा।

ब्रह्मव्यतिरिक्तं न किञ्चित् सद्भवितुमर्हतीति पूर्व्वश्लोके सद्ब्रह्मेति निर्णीय तच्छब्देन सद्ब्रह्मैव परामृशन्ति श्रीमच्छङ्करस्तदनुयायिनश्च। श्रीमद्विश्वनाथस्तु प्रथमं जीवतत्त्वमेवात्र गृहीत्वा श्रीमद्बलदेवेनैकतया "येन सर्व्वमिदं शरीरं ततं व्याप्तम्" इति व्याचष्टे। तदनन्तरं "देही जीवात्मा परमात्मा इत्येतद्द्वितयं मनुष्यतिर्य्यगादिषु सर्व्वत्र दृश्यते" इति हेतोः पक्षान्तरे तेनोक्तं "नासतो विद्यते भावः" इत्यत्र देहजीवयोरस्मिंस्तु परमात्मवस्तुनस्तत्त्वमिति। "येन सर्व्वमिदं ततम्" इत्यस्य "सर्व्वमिदं शरीरम्" इति व्याख्यानेऽपि कथन्तज्जीवतत्त्वस्य सर्व्वशरीरव्यापित्वं सम्भवति, "एषोऽणुरात्मा," (मु, उ, ३।१।९), "बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः" (श्वे, उ, ५।९), "आराग्रमात्रो ह्यवरोऽपि दृष्टः" (श्वे, उ, ५।८), इति तस्य परमाणुपरिमाणत्वश्रवणादिति चेत्, सिद्ध्यति तत् धर्म्मभूतज्ञानेन। अतएवाहाचार्य्यः "यथा प्रकाशयत्येकः" इत्यादि। चिद्वस्तुनो निरति-शयसूक्ष्मत्वात् तत्प्रदर्शनायाणुत्वादिविशेषणमिति तत्त्वम्, अन्यथा

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

विषयेन्द्रियसम्बन्धे सम्भवन्तीति दृष्ट्वा कर्त्तव्यानुरोधात्, हे भारत, तान् तितिक्षस्व सहस्व, न तु मृत्पाषाणादिवद्बोधशून्यो भव। निसर्गतो यदवस्थितं ततः कर्त्तव्यविमुखो भवितुं नार्हसीति भावः। "नाहं विना यदुभिर्यादवानां पुरीमिमामशक्नं द्रष्टुमद्य" (मौ, प, ४अ, ८श्लो) इत्युक्तिराचार्य्यस्य यदुकुलध्वंसे मृत्पाषाणादिवद्बोधशून्यत्वाभावमात्मनो दर्शयति, "इहैव त्वं मां प्रतीक्षस्व राम यावत् स्त्रियो ज्ञातिवशाः करोमि" (मौ, प, ४अ, ६श्लो) इति तस्य बन्धुक्षयजन्यशोकापनोदनार्थं तपश्चिकीर्षतस्यापि कर्त्तव्यपरायणत्वं न तमजहादिति सूचयति। १४।

कर्त्तव्यानुरोधेन शीतोष्णादिसहनं न केवलं तत्कालोचितं श्रेयः साधयति, तेन च जीवस्य मोक्षोपयोगितोद्गच्छतीत्याह यमिति;—'समदुःखसुखं'—सुखदुःखप्राप्तौ हर्षविषादरहितम् इति श्रीमच्छङ्करः, अवर्जनीयदुःखं सुखवन्मन्यमानमिति श्रीमद्रामानुजः, धर्म्मानुष्ठानस्य कष्टसाध्यत्वात् दुःखमनुषङ्गलब्धं सुखञ्च यस्य सममिति श्रीमद्बलदेवः, समाधिस्थत्वात् समदुःखसुखत्वमस्येति श्रीमन्नीलकण्ठः। "यतः प्रवृत्तिर्भूतानाम्" (१८।४६) इत्याद्युक्तरीत्या भगवदिच्छा पालनरूपकर्त्तव्यपरायणत्वेन तस्मिन्निबद्धचित्तमस्य, ततोऽन्तःशीतलतायां सुखदुःखयोस्तत्त्वं हृदि स्फुरति, तेन च विकारराहित्यमस्य। किमिदं तत्त्वम्? दुःखच्छद्म सुखं, सुखच्छद्म दुःखमिति। दुःखं दैन्यं वर्द्धयति तेन च भगवत्प्रपत्ति मतएवार्त्तभक्तस्य सुकृतित्वमुक्तमाचार्य्येण, सुखञ्च प्रमादमालस्यं जनयति तेन च मार्गात् स्खलनम्। श्लोकस्यास्यात्माधिकारविषयप्रथमषट्कान्तर्गतत्वात् तदनुसारेणास्य व्याख्याने पुनरात्मबोधादेव सुखदुःखतत्त्वस्फूर्त्तिर्मन्तव्या। ततः "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः" (२।५६) इत्युक्तदिशा दुःखेऽनवसादः सुखे चानभिभूतबुद्धित्वमस्येति तयोः समभावः। समदुःखसुखं धीरं ध्यानशीलं धर्म्मनि

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

स्थिरमीरयति धर्म्मस्थिति व्युत्पत्त्या, विवेकादिसम्पन्नं यं पुरुषमेते मात्रा-स्पर्शा न व्यथयन्ति न चालयन्ति न सुखदुःखमूर्च्छितं कुर्व्वन्ति, सोऽमृत-त्वाय मोक्षाय कल्पते योग्यो भवति। १५।

देहात्मनोर्विवेकं विना नित्यानित्यज्ञानं, तेन चानित्ये निष्ठां परिहाय नित्ये निश्चला स्थितिर्न सम्भवतीति तमेव प्रस्तौत्याचार्य्यः नासत इति ;—असतः आगमापायिनः देहस्य तद्धर्म्मस्य शीतोष्णादेः भावो नित्यत्वमनाशित्वं रूपान्तरतानवाप्तिः न विद्यते, सतः आगमा-पायरहितस्य देहिनोऽभावो व्ययो नाशो रूपान्तरताप्राप्तिः न विद्यते। अनयोरुभयोः सदसतोरन्तो निर्णयो मर्य्यादा नियतरूपत्वं याथार्थ्यं तत्त्वदर्शिभि स्तदुभयस्वभाववेदिभिर्दृष्टः। प्रथमं तावत् आत्मनः सत्त्वं, देहस्य चैकस्यापायेऽन्यदेहागमेनासत्त्वम्, तद्धर्म्मस्य च तद्धर्म्मवत्त्व-मुक्तम्, अधुना तयोरेकवाक्येन संग्रहो देहात्मविवेकमारभमाणेनाचा-र्य्येण ; विवृतिश्च "अविनाशि तु तद्विद्धि" इति "अन्तवन्त इमे देहाः" इत्यनन्तरनिर्व्वचनेन। श्रीमच्छङ्करेण तदनुयायिव्याख्यातृभिश्च यदसत्-सत्कार्य्यवादस्यावतारणा कृता सा पूर्व्वापराविचारेण ; "सत्यं भूतमयं जगत्" इत्याचार्य्यस्य सत्कार्य्यवादं प्रति नेत्रनिमीलनेन च। "पर-स्मादेव ब्रह्मणो भूतानामुत्पत्तिरिति वेदान्तेषु मर्य्यादा" (वे, सू, १अ, १पा, २२सू, भा,) "प्रलीयमानमपि चेदं जगत् शक्त्यवशेषमेव प्रलीयते शक्तिमूलमेव च प्रभवति, इतरथाकस्मिकत्वप्रसङ्गात्" (वे, सू, १अ, ३पा, ३०सू, भा,) "यदि वयं स्वतन्त्रां काञ्चित् प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम प्रसञ्जयेम तदा प्रधानकारणवादम्। परमे-श्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते न स्वतन्त्रा। सा चावश्यमभ्युपगन्तव्या, अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यति, शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः"

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥२२॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥२३॥

विनाशिनमिति । एनमात्मानमजमविनाशिनमव्ययं यो नित्यं वेद, स पुरुषः, हे पार्थ, कं कथं हन्ति, कं कथं घातयति । किमाक्षेपे, न कमपि कमपीत्यर्थः । अत्र श्रीमच्छङ्करस्तदनुयायिनश्च हन्तेस्त्वा-क्षेपमुदाहरणत्वेन गृहीत्वा विदुषः सर्व्वकर्म्मप्रतिषेध एव प्रकरणार्थ इति वर्णयन्ति । "हत्वापि स इमाँल्लोकान् न हन्ति न निबध्यते" (१८।१७) इत्यत्र हननक्रियामुदाहरणत्वेन गृहीत्वा कर्म्मानुष्ठायाप्यन-हङ्कृतत्वात् कर्म्माकरणं, न तेन बन्धनमित्याचार्य्यः स्वयं दर्शयति । तदेवाभ्यत्र च गीतासिद्धमित्यग्रे व्यक्तीभविष्यति । २१ ।

अवश्यत्याज्येन देहेन किमिव सम्बन्धो देहिन इत्यपेक्षयाह वासां-सीति । जीर्णानि वासांसि विहाय नरो यथा अपराणि नवानि वासांसि गृह्णाति, तथा जीर्णानि शरीराणि विहाय देही अन्यानि नवानि शरीराणि संयाति । किमत्र तत्त्वं तद्विचारितं त्रयोदशश्लोके । २२ ।

देहनाशे कथं नात्मनो विनाश इत्यपेक्षयाह नैनमिति । छेदन-दहनक्लेदनशोषणानि सावयवशरीरगतानि, न तु तानि निरवयव आत्मनि सम्भवन्तीति विवृणोति,—एनं देहिनं शस्त्राणि न छिन्दन्ति अवयवविभागेन द्विधा चतुर्धा सप्तधा शतधा वा कर्त्तुं न शक्नुवन्ति, नैनं पावकोऽग्निः दहति भस्मीकर्त्तुं न शक्नोति ; न चैनमापः क्लेद-यन्ति आर्द्रीभावकरणेन विश्लिष्टावयवं कर्त्तुं न शक्नुवन्ति ; मारुतो वायुः नैनं शोषयति नीरसं कर्त्तुं न शक्नोति । २३ ।

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्व्वगतः स्थाणुरचलोऽयं सनातनः ।
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते ॥२४॥

"नैनं शस्त्राणि छिन्दन्ती"त्याद्युक्त्वा तत्तद्योग्यतायैरेव प्रथमस्त्रमभिधाय विशेषलक्षणैर्लक्षयितुं 'नित्यः' 'सर्व्वगतः' इत्यादिभिः शब्दतोऽर्थतः पुनरुक्तान्यपि विशेषणान्येकत्र बोधसौकर्य्यार्थमुपन्यस्यति एवमग्रेऽपि अच्छेद्य इति । अयं देही अच्छेद्य एव, अदाह्य एव, अक्लेद्य एव, अशोष्य एव ; नित्यः अविनाशी, सर्व्वगतः "स्वकर्म्मवशात् देवमनुष्यतिर्य्यगादिदेहगतः" इति श्रीमद्विश्वनाथः, "स्वकर्म्महेतुकेषु देवमानवादिषु पशुपक्ष्यादिषु च सर्व्वेषु शरीरेषु पर्य्यायेण गतः" इति श्रीमद्बलदेवः, स्थाणुः स्थिरस्वभावः स्थिरस्वरूपः रूपान्तरापत्तिशून्यः, अचलः अप्रकम्प्यः स्थिरगुणकः पूर्व्वरूपापरित्यागी, सनातनः शाश्वतः चिरन्तनः पुरातनः सर्व्वदैकरूपः, अव्यक्तः चक्षुराद्यग्राह्यः, अचिन्त्यः चिन्ताया अविषयः तर्कागोचरः, अविकार्य्यः निरवयवत्वात् कर्म्मेन्द्रियाणामगोचरः क्षीरादिवद्विकारानर्हः, अयं देही तत्त्वविद्भिरुच्यते । अत्र नित्यत्वेन घटादिवदनुत्पाद्यः, सर्व्वगतत्वेन ग्रामादिवदप्राप्यः, स्थाणुत्वादविकार्य्यः, अचलत्वाद्दर्पणवत् असंस्कार्य्यः ; एवमुत्पत्त्याप्तिविकृतिसंस्कृतिरूपचतुर्विधक्रियायाः कर्म्मत्वं न भजतेऽयमित्यस्यैर्व्याख्यातम् । एतत्तु परमात्मपक्ष एव सर्व्वथा सम्भवतीत्येष पक्षो नास्माभिराश्रीयते । कथमेवमनुमीयते, यतोऽस्य नात्मन उत्पत्तिः स्वीक्रियते, निरतिशयसूक्ष्मत्वात् प्राप्तिरपि ; विकृतिरपि तस्मिन्न सम्भवति चिदेकरसत्वात् तथैवाचार्य्याणामेव ग्रहणात् ; सत्यम्, संस्कृतिस्तु तस्मिन् सम्भवत्येव, अन्यथा तमधिकृत्य शास्त्रोपदेशस्य वैयर्थ्यं स्यात् । दर्पणः स्वयं स्वच्छः, न कदापि स्वयं स्वस्य स्वच्छत्वं जहाति, अथापि बाष्पादिसंसर्गान्मालिन्यं भजते, अतः संस्कारमपेक्षते ; एवं जीवात्मापि गुणसम्बन्धात् । शास्त्रविभागे यज्ञ एव यजमानस्य आत्मा भवतीत्युच्यते, तद्यथा "एष ह वै यजमान-

तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२५॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥२६॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥२७॥

स्वामुष्मिँल्लोके आत्मा भवति यद्‌यज्ञः" (श, ब्रा, ११।१।८।६) इति । तेन च तस्य सर्व्वतनुत्वं परम जन्म च "सह सर्व्वतनुरेव यजमानोऽमुष्मिँल्लोके सम्भवति" इति । भगवदाराधनयैवात्मन आत्मत्वं, तया च तस्य कृतार्थतेति तत्त्वम् । २४ ।

अव्यक्तत्वाचिन्त्यत्वाविकार्य्यत्वनित्यत्वसर्व्वगतत्वादिरूपो यस्मादात्मा तस्मात् तमेवं विदित्वानुशोचितुमर्हसीत्युक्तोपसंहरति तस्मादेवमित्यादिना । २५ ।

हरिद्राचूर्णसंयोगाद्रक्तत्वमिव भूतचतुष्टयसंयोगाच्चैतन्यमिति प्रथमः पक्षः । देहाद्भिन्नोऽपि विज्ञानस्वरूप आत्मा प्रतिक्षणपरिणामादुत्पत्तिविनाशयोगीति द्वितीयपक्षः । नित्यश्चासावपूर्व्वेन्द्रियसम्बन्धाज्जातश्चेति तृतीयपक्षः । "अहं देहादन्यैके नैतदस्तीति चापरे । केचित्संशयितं सर्व्वं निःसंशयमथापरे" इत्यादिभिः (४८अ, २—१३श्लो) आचार्य्येण तात्कालिकमतविरोधोऽनुगीतासु प्रदर्शितः । अथ चेदात्मन विषये लौकिकानां मतद्वैधं दृष्ट्वा लौकिकदृष्ट्यैव तमन्यथा मन्यसे तथापि न शोककारणमस्तीत्युपपादयति अथेति । अथ चेतत्र्यभ्युपगमार्थः । पूर्व्वपूर्व्ववाक्यैर्नित्यत्वे सिद्धेऽप्यनित्यत्वपक्षमभ्युपगम्य यदि एनमात्मानं नित्यजातं नित्यं वा मृतं मन्यसे तथापि परिणामस्वभावस्य देहस्योत्पत्तिविनाशयोरपरिहार्य्यत्वादेनं, हे महाबाहो, त्वं शोचितुं नार्हसि योग्यो न भवसि । २६ ।

नित्यत्वानित्यत्वपक्षद्वयसाधारणशोकाकारणमाह जातस्येति । देहेन्द्रियसम्बन्धवशात् जातस्य नित्यस्यानित्यस्य वा मृत्युरवस्थान्तरप्राप्ति-

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥२८॥

आश्चर्य्यवत् पश्यति कश्चिदेन-
माश्चर्य्यवद्वदति तथैव चान्यः।
आश्चर्य्यवच्चैनमन्यः शृणोति।
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२९॥

ध्रुवो निश्चितः। मृतस्य च पूर्व्वशरीरेन्द्रियविगृहकर्म्मारब्धकर्म्मोपादान-परिणतस्य वा जन्म अपूर्व्वशरीरेन्द्रिययोगो ध्रुवं निश्चितम्। तस्मादपरिहार्य्ये परिहर्त्तुमशक्येऽपरिवर्ज्जनीयेऽर्थे विषये न त्वं शोचितु-मर्हसि। २७।

आत्मनोऽशोच्यत्वेऽपि इष्टजनदेहविनाशजनितशोकानुभवो विदुषोऽपि स्यादेवेति तन्निराकरोति अव्यक्तादीनीति। अव्यक्तादीनि अव्यक्त-मदर्शनमनुपलब्धिरादिर्येषाम्, अव्यक्तं प्रधानमिति पक्षे नामरूपपरिहारात् सूक्ष्मं प्रधानमादिर्येषां तानि अव्यक्तादीनि भूतानि पृथिव्यादिभूतमयानि शरीराणि व्यक्तमध्यानि जन्मानन्तरं मरणात्प्राक् नामरूपयोगात् व्यक्तान्युपलब्धानि सन्ति अव्यक्तनिधनानि पुनरव्यक्तमदर्शनं निधनं मरणं येषाम्, प्रधानमिति पक्षे अव्यक्ते प्रधाने निधनं नामरूपविमर्द्दनलक्षणो विनाशो येषां तानि अव्यक्तनिधनान्येव। तत्र, हे भारत, का परिदेवना शोकनिमित्तो विलापः। एवमेतेषां स्वभाव इति ज्ञात्वा न त्वं शोचितुमर्हसि। असत्कार्य्यवादिभिर्यदत्र पक्षान्तरे तत्पक्षाश्रयेण व्याख्यानं कृतं, न तदाचार्य्यस्याभिप्रेतमिति तदुपेक्षितम्। एवमन्यत्र। २८।

न शोचितुमर्हसीति न सोपालम्भवचनं विदुषोऽपि शोकदर्शनात् किन्तर्हि तत्त्वज्ञानोपदेशेन नित्यानित्यत्वस्फूर्त्तिदर्शनमाहात्म्यं भवति, शोककलुषितचित्ते तु तद्विफलमिति शोकापनयनाय यत्नः। न खलु

देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत ।
तस्मात्सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि ॥३०॥
स्वधर्म्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥३१॥

यस्मात्त्वं देहस्य प्रत्यक्षविनाशदर्शनादहमिति प्रत्ययस्य च स्वतःसिद्धत्वात् निरर्थकोऽयं यत्न इति, दुर्बोधोऽयं ह्यात्मा, दर्शयति च तदाश्चर्य्यवदिति। कश्चिदाश्चर्य्यवत् आश्चर्य्यमदृष्टपूर्व्वमद्भुतमकस्माद्दृश्यमानं तेन तुल्यमाश्चर्य्यवत् आश्चर्य्यमिव एनम् आत्मानं पश्यति। क्रियाविशेषणे —कश्चिदेनं यत्पश्यति तदाश्चर्य्यवत्, आत्मदर्शनमप्याश्चर्य्यवदेव। न हि कोऽपि स्वरूपत आत्मानं जानाति ; यदा तस्य स्वरूपबोध उपतिष्ठते, तदाऽदृष्टपूर्व्ववस्तुदर्शनजन्यविस्मयेनापूर्णः, कथमेनमपश्यमिति तद्दर्शनमप्याश्चर्य्यमनुभवति। कर्त्तृविशेषणे— अहो अयमात्मानमप्यपश्यदित्यन्येऽपि तमात्मदर्शनकर्त्तारमाश्चर्य्यवत् पश्यन्तीति। एवमन्यत्र ; यथा, तथैवान्य आश्चर्य्यवदेनं वदति, वदति यत् तदाश्चर्य्यवत्, आश्चर्य्यवदन्य एनं वदति ; अन्य आश्चर्य्यवदेनं शृणोति, शृणोति यत् तदाश्चर्य्यवत्, आश्चर्य्यवदन्य एनं शृणोति। श्रवणपरायणानामपि तज्ज्ञानं दुर्लभमित्याह—श्रुत्वापि कश्चिदेनं वेद, कश्चिन्न च। अतएव वक्ष्यत्याचार्य्यः—"यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।" (७।३) श्रुतावपि "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विदुः। आश्चर्य्योऽस्य वक्ता कुशलोऽस्य लब्धा आश्चर्य्यो ज्ञाता कुशलानुशिष्टः॥" (कठः २।७) इति। २९।

इदानीमुक्तार्थमुपसंहरति सर्व्वप्राणिसाधारणाशोच्यत्वं प्रदर्शयन् देहीति। सर्व्वस्य प्राणिजातस्य देहेऽयं देही नित्यमवध्यः। तस्मात् सर्व्वाणि भीष्मादिभावापन्नानि 'देवस्थावरान्तानि' इति श्रीमद्रामानुजः, भूतानि न त्वं शोचितुमर्हसि। ३०।

आत्मनोऽविनाशित्वमवेक्ष्य विचलितुं नार्हसीत्युक्तम्, अधुना स्वधर्म्म-

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥३२॥
अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्त्तिञ्च हित्वा पापमवाप्स्यसि ॥३३॥
अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते ॥३४॥
भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषाञ्च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥३५॥

अपि चावेक्ष्य न विचलितुमर्हसीति प्रतिपादयति धर्म्याद्धि युद्धात् क्षत्रियस्यान्यत् श्रेयो न विद्यते इति स्पष्टार्थः । ३१ ।

यदृच्छयेति । यदृच्छया विना यत्नमुपपन्नं प्राप्तमपावृतमुद्घाटितं स्वर्गद्वारम्, ईदृशं युद्धं, हे पार्थ, सुखिनः सुभाग्या सुकृतिनो लभन्ते । विनाप्रयत्नमुपस्थितस्य समरस्य स्वर्गकारणत्वं कथमुक्तम्? लोभेन बलादिसम्भूतगर्व्वेण च परोद्वेजनाय युद्धारम्भः प्रत्यवायायैव भवति नीच-वासनामूलकत्वात् । यत्र तु प्रबलान्यायाचरणं शान्त्या न शमता-मुपैति, प्रत्युत शस्त्रसहायेन तदन्यायाचरणं बद्धमूलं कर्त्तुं कृतोद्यमः प्रतिपक्षः, तत्र शमपक्षाश्रयिणां स्वप्रयत्नव्यतिरेकेण संग्राम उपस्थित इति धर्म्यं तद्युद्धं क्षत्रियस्य भवतीत्यभिप्रायः । एवं हि प्रतिपा-दितमुद्योगपर्व्वणि स्वयमाचार्येण । उक्तञ्च तत्र तेन, "यदा [illegible] [illegible]भूतो नृशंसो विधिप्रकोपात् बलमाददानः । ततो राज्ञां समभवद्-युद्धमेतत् तत्र जातं वर्म्म शस्त्रं धनुश्च ॥ इन्द्रेणैतद्दस्युवधाय कर्म्म उत्पा-दितं वर्म्म शस्त्रं धनुश्च । तत्र पुण्यं दस्युवधेन लभ्यते सोऽयं दोषः कुरुभिस्तीव्ररूपः ॥ अधर्म्मज्ञैर्धर्म्ममबुध्यमानैः प्रादुर्भूतः सञ्जय तत्र साधु ॥" (२९अ, २९—३१श्लो) इति । ३२ ।

एवमुपस्थितस्य युद्धस्य धर्म्यत्वे सिद्धे तदकरणमकीर्त्तये पापायेत्याह

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्॥३६॥
हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः॥३७॥
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥३८॥

अथ चेदिति। अकीर्त्तिञ्चापीति। भयादिति। अवाच्यवादांश्चेति। ३३—३६।

न हि निश्चयोऽस्ति युद्धे विजय एव स्यात्, अतः स्वयमाचार्येण एवं सञ्जयं प्रत्युवाच—"ते चेत् पितेव कर्म्मणि वर्त्तमाना आपद्येरन् दिष्टवशेन मृत्युम्। तथा शक्त्या पूरयन्तः स्वकर्म्म तदप्येषां निधनं स्यात् प्रशस्तम्॥" (उ, प, २८अ, २०श्लो) इति। अपि च भीमसेनञ्चापि स आह "कृतं मानुष्यकं कर्म्म दैवेनापि विरुध्यते" (उ, प, ७६अ, ८श्लो) इत्युपक्रम्य "लोकस्य नान्यतो वृत्तिः पाण्डवान्यत्र कर्म्मणः। एवं बुद्धिः प्रवर्त्तेत फलं स्यादुभयान्तरं॥ य एवं कृतबुद्धिः सन् कर्म्मस्वेव प्रवर्त्तते। नासिद्धौ व्यथते तस्य न सिद्धौ हर्षमश्नुते॥ तत्रेयमनुमात्रा मे भीमसेन विवक्षिता। नैकान्तसिद्धिर्वक्तव्या शत्रुभिः सह संयुगे॥" (११।१२।१३श्लो) इति। दैवप्रभावापनये त्वाचार्यस्य न सामर्थ्यमस्ति तत् स्वयमर्जुनेनोक्तम् "दैवे च मानुषे चैव संयुक्तं लोककारणम्। अहं हि तत् करिष्यामि परं पुरुषकारतः॥ दैवन्तु न मया शक्यं कर्म्म कर्त्तुं कथञ्चन॥" (उ, प, ७८अ, ५।६श्लो) इति। एवं स्थिते जयपराजययोरुभयत्रैव लाभ इत्याह हतो वेति। सुगमोऽर्थः। ३७।

"हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्" इत्युक्त्या क्षयिष्णु भोगसुखमनुसन्धाय युद्धाय प्ररोचनं न पुनर्वासनापरिहारं दर्शयति। यद्येवं न ततो बन्धुस्वजनवधजन्यपापनिष्कृतिरपि सम्भा-

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥३९॥

ष्यते इति पश्यन् कथं सा निष्पद्यते स्वधर्मरक्षणाच्च भवति तदाह सुख-दुःखे इति । सुखदुःखे समे तुल्ये लाभालाभौ जयाजयौ च समौ तुल्यौ कृत्वा केवलकर्त्तव्यबुद्ध्येति यावत् ततो युद्धाय युज्यस्व सन्नद्धो भव । एवं कर्त्तव्येऽनुष्ठिते पापं नावाप्स्यसि फलाभिसन्धिविरहितत्वात् । अत्र शास्त्रे फलाभिसन्धानत्याग एव नूतनं पन्थानमाविष्करोत्युपरिष्टात् स व्यक्तीभविष्यति । ३८ ।

एवमात्मज्ञानमुपदिश्य कर्मयोगं वक्तुमारभते एषेति । सांख्यः—'परमार्थवस्तुविवेकविषयः' इति श्रीमच्छङ्करः, 'संख्या बुद्धिः बुद्ध्यावधारणीयमात्मतत्त्वं सांख्यम्' इति श्रीमद्रामानुजः, 'सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति संख्या सम्यग्ज्ञानं तस्यां प्रकाशमानमात्मतत्त्वं सांख्यम्' इति श्रीमच्छ्रीधरः, 'सम्यक् ख्यायते सर्वोपाधिशून्यतया प्रतिपाद्यते परमात्मतत्त्वमनयेति संख्योपनिषत्, तयैव तात्पर्यपरिसमाप्त्या प्रतिपाद्यते यः स सांख्य औपनिषदः पुरुषः' इति श्रीमन्मधुसूदनः, 'औपनिषदं ब्रह्म' इति श्रीमन्नीलकण्ठः । 'न त्वेवाहम्' इत्यारभ्य 'तस्मात् सर्वाणि भूतानि' इत्यन्तेनात्मतत्त्वमेवाभिहितम् । अतएव सांख्ये आत्मतत्त्वे या बुद्धिः कर्त्तव्या सैषा तेऽभिहिता, योगे कर्मयोगे तु, 'भक्तियोगे' इति श्रीमद्विश्वनाथः, इमां बुद्धिं शृणु । यया बुद्ध्या युक्तः, हे पार्थ, कर्मबन्धं कर्मकृतं बन्धं—'कर्मैव धर्माधर्माख्यो बन्धः कर्मबन्धस्तम्' इति श्रीमच्छङ्करः, 'कर्मणा बन्धः संसारः' इति श्रीमद्रामानुजः, 'कर्मात्मकं बन्धम्' इति श्रीमच्छ्रीधरः—प्रहास्यसि प्रकर्षेण त्यक्ष्यसि । 'यया कर्मबन्धं प्रहास्यसि' इत्यत्र 'प्ररोचनार्थम्' इत्युक्त्वा 'तं प्रहास्यसीश्वरप्रसादनिमित्तज्ञानप्राप्तेः' इति श्रीमच्छङ्करः ; 'आत्मज्ञानपूर्व्वकमोक्षसाधनभूतकर्मानुष्ठाने यो बुद्धियोगो वक्तव्यः स इह योगशब्देनोच्यते……। तत्र

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥४०॥

योगे या बुद्धिर्व्याख्या तामिमामभिधीयमानां शृणु यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि' इति श्रीमद्रामानुजः ; 'परमेश्वरार्पितकर्मयोगेन शुद्धान्तःकरणः सन् तत्प्रसादलब्धापरोक्षज्ञानेन कर्मात्मकं बन्धं प्रकर्षेण हास्यसि' इति श्रीमच्छ्रीधरः ; 'आत्मानन्दलिप्सया भगवदाज्ञया महाप्रयासानि कर्माणि कुर्वंस्तत्तदुद्देशमहित्वा तदन्तरभ्युदितयात्मज्ञाननिष्ठया संसारं तरिष्यसि' इति श्रीमद्बलदेवः ; 'कर्मनिमित्तो ज्ञानप्रतिबन्धः कर्मणैव धर्माख्येनापनेतुं शक्यते' इति श्रीमन्मधुसूदनः ; 'भोक्तृत्वकर्तृत्वाभिमानत्यागेन……कर्मैव सजातीयोच्छेदनिमित्तं भविष्यति' इति श्रीमन्नीलकण्ठः ; 'भक्तिविषयिण्या बुद्ध्या संसारं प्रहास्यसि' इति श्रीमद्विश्वनाथः । "योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय । सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥" (२।४८) इत्युक्त्वा "दूरेण ह्यवरं कर्म बुद्धियोगात्" (२।४९) "योगः कर्मसु कौशलम्" (२।५०) इत्यनेन फलाभिसन्धियुक्तकर्मकृतबन्धनस्य फलाभिसन्धिवर्जितकर्मयोगेन प्रहाणमाचार्यस्याभिप्रेतमिति दृष्ट्वा तदेवात्र वयमनुमोदयामः । ३९ ।

कृष्यादिकर्मवत् कर्मणां विघ्नबाहुल्यादनर्थकत्वाच्च न योगेन कथं कर्मबन्धप्रहाणं सम्भवत्याशयमनुभूयाह नेहेति । इहाभिक्रमस्य प्रारब्धस्य नाशो निष्फलत्वं नास्ति, प्रत्यवायोऽङ्गवैकल्यनिबन्धनवैगुण्यं न विद्यते । अपि च अस्य धर्मस्य कर्मयोगाख्यस्य स्वल्पमपि महतो भयात् संसारात् त्रायते रक्षति । फलाभिसन्धानयुक्ते कर्मणि सर्वाङ्गोपसंहारं विना न फलोत्पत्तिः ; यथा कृषिकर्मणि हलसंयोगबीजवपनादिकं कृत्वापि जलसेचनं विना न शस्योत्पत्तिः । यत्र न फलाभिसन्धानं केवलं कर्त्तव्यबुद्ध्या कर्मकरणं तत्र प्रतिबन्धवशादसमाप्तिरपि न श्रेयः प्रतिबध्नाति, यतस्तदल्पानुष्ठानमपि हृदयदर्शिनेश्वरेण बहु

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

प्यते। 'पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते' (६।४०) इति व्याति स्वयमाचार्य्योऽतएव। श्रीमद्विश्वनाथमते नात्र भगवदर्पित-निष्कामकर्म्मरूपो योगो विहितः, किन्तु श्रवणकीर्त्तनादिभक्तिरूप एव, तस्यैव त्रिगुणातीतत्वात् त्रिगुणातीतत्वे ध्वंसाभावाच्च। 'नैष्कर्म्म्य-मप्यच्युतभाववर्ज्जितम्' (भा, १स्क, ५अ, १२श्लो) इति भागवतवाक्य-मनुसृत्य तथा तस्य निरूपणं न शोभते, यतोऽत्र कर्म्मयोगे "ब्रह्मार्पणं ब्रह्म हविः" (४।२४) इत्यादिभिर्भगवद्भावयुक्त एव कर्म्मयोगो विहितः। ४०।

सांख्ये या बुद्धिर्योगे च, ते सामान्यतोऽभिधाय ताभ्यामन्यासां भेद-माह व्यवसायात्मिकेति। इह ज्ञानयोगे कर्म्मयोगे च,—केवलं कर्म्म-योग इत्यनेके, श्रीमद्विश्वनाथमते भक्तियोगे—एका व्यवसायात्मिका निश्चयस्वभावा बुद्धिः, अव्यवसायिनां निश्चयभावविरहितानां बुद्धयो हि बहुशाखा अनन्ताश्च। ज्ञानयोगे कर्म्मयोगे भक्तियोगे च लक्ष्यमेकमत-एव बुद्धिरेका, स्वर्गपुत्रपश्वन्नादिकामानामव्यवसायिनां बुद्धयः फला-नन्त्यादनन्ताः। एकस्मै फलाय चोदिते कर्म्मणि तदङ्गतावान्तर-फलभेदेन तत्रापि बहुशाखाः। "नित्येषु नैमित्तिकेषु च कर्म्मसु प्रधान-फलान्यवान्तरफलानि च यानि श्रूयमाणानि तानि सर्व्वाणि परित्यज्य मोक्षैकफलतया सर्व्वाणि कर्म्माण्येकशास्त्रार्थतयाऽनुष्ठेयानि, काम्यानि च स्ववर्णाश्रमोचितानि तत्तत्फलानि परित्यज्य मोक्षफलसाधनतया नित्यनैमित्तिकैरेकीकृत्य यथाबलमनुष्ठेयानी"त्याह श्रीमद्रामानुजः कर्म्मयोगमुपलक्ष्य। भक्तियोगमात्रपक्षपातिना श्रीमता विश्वनाथेन ज्ञानयोगेऽपि बुद्धिभेद एवं वर्णितः—"प्रथममन्तःकरणशुद्ध्यर्थं निष्काम-कर्म्मणि बुद्धिः, ततस्तस्मिन् शुद्धे सति कर्म्मसन्न्यासे बुद्धिः, तदा ज्ञाने बुद्धिः, ज्ञानवैफल्याभावार्थं भक्तौ बुद्धिः। 'ज्ञानञ्च मयि सन्न्यसेत्' इति

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४२॥
कामात्मानः स्वर्गपरा जन्मकर्म्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्य्यगतिं प्रति ॥४३॥
भोगैश्वर्य्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४४॥
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्ज्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥४५॥

भगवदुक्तज्ञानसन्न्यासे च बुद्धिरिति बुद्धयोऽनन्ताः । कर्म्मज्ञानभक्तीनाम-वश्यानुष्ठेयत्वात् तत्तच्छाखा अप्यनन्ताः ।” इति । ४१ ।

येषां व्यवसायात्मिका बुद्धिर्नास्ति तेषां विमतिं वर्णयति त्रिभिः, यामिति, कामात्मान इति, भोगेति । अविपश्चितोऽविवेकिनो मूढ़ाः वेदवादरताः वेदेषु ये स्वर्गादिफलवादास्तेषु सक्ताः, नान्यदस्तीति वादिनः स्वर्गादिफलसाधनेभ्यो नान्यदस्तीति वदनशीलाः, कामात्मानः वैषयिकसुखवासनाग्रस्तचित्ताः, स्वर्गपराः स्वर्ग एव भोगोपक[illegible]पित-त्वेन परः श्रेष्ठो येषां ते स्वर्गपराः, जन्मकर्म्मफलप्रदां भो[illegible]श्वर्य्यगतिं भोगैश्वर्य्यप्राप्तिं प्रति क्रियाविशेषबहुलां ये क्रियाविशेषज्योतिष्टोमा-दयस्ते बहुला यस्यां क्रियाविशेषबहुलां यामिमां पुष्पितामापातरम-णीयां वाचं प्रवदन्ति । तया वाचा अपहृतचेतसां भोगैश्वर्य्यप्रसक्तानां समाधौ मनसि अन्तःकरणे चित्तैकाग्रे बुद्धिः व्यवसायात्मिका न विधी-यते नोत्पद्यते । ४२—४४ ।

कथं वा वेदवादिनां व्यवसायात्मिका बुद्धिर्न भवति, कथं कर्म्मणि प्रवृत्तस्यापि सोदेति तदाह त्रैगुण्येति । त्रैगुण्यविषयाः त्रयोगुणाः सत्त्वरजस्तमांसि तएव त्रैगुण्यं तदेव विषयो येषाम्, अथवा त्रिगुणानां कर्म्म त्रैगुण्यं संसारः स एव प्रकाश्यत्वेन विषयो येषां तादृशा वेदाः

अतेदमुक्तं भवति ;—सत्त्वरजस्तमःप्रचुराणां पुरुषाणां सांसारिकेषु विषयेष्वनुरागवशात् स्वभावतस्ते तत्प्रार्थनापरा एव भवन्ति। अतो वेदेषु धनजनपश्वादिकामनाविषयाणि स्तोत्राणि दृश्यन्ते, तत्प्रयोगेण च विविधं तत्फलञ्च यज्ञानुष्ठानञ्च। "काङ्क्षन्तः कर्म्मणां सिद्धिं यजन्त इह देवताः। क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्म्मजा॥" (४।१२) इत्यत्राचार्य्येण वेदविहितानां कर्म्मणामनुष्ठानमिहलोक एव धनपुत्रादि-लाभार्थमेवेति प्रदर्श्यते। "अग्निना रयिमश्नवत् पोषमेव दिवे दिवे। यशसं वीरवत्तमम्।" (ऋ, सं १म, १सू, ३ऋक्) इत्याद्यासु तदेवोप-लभ्यते। पितॄणां ऐहिकधनादिसाधनानां परलोकसाधनत्वञ्च यत् "अव-सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः" (ऋ, सं, १०म, १६सू, ५ऋक्) इत्याद्यासु लक्ष्यते, तत्तु यावज्जीवं यज्ञैर्देवानां सन्तोष-साधनादुपतिष्ठते। सांसारिकसुखानां परिणामविरसत्वमनुभूय यदा तत्त्यागेन नित्यसुखमन्विष्यति जीवः, तदा त्रिगुणातीतावस्थायां प्रवेशो भवति। वेदान्ततोऽन्य वेदान्तेषु सोपलभ्यते। न खलु वक्तव्यम्, वेदे-ष्वेव सर्व्वमस्ति किं वेदान्तपुराणादिभिरिति ; "यन्न दृष्टं हि वेदेषु तद्दृष्टं स्मृतिषु द्विजाः। उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रगीयते॥" इति वैष्णवाचार्य्यकृता स्कान्दप्रभासखण्डोक्तिस्तदा विफलैव स्यात् ; सत्येव दृश्यमानः क्रमाभिव्यक्तिनियमोऽपि भज्येत। वैदिकक्षणभङ्गुरफलेषु वीतराग आचार्य्यः प्रपन्नं स्वसुहृदमनुकम्पते—हे अर्ज्जुन, त्वं निस्त्रैगुण्यः त्रयाणां गुणानां भावः परस्परसंहननेन विकारित्वं त्रैगुण्यं तदतीतो निस्त्रैगुण्यः विकाररहितः धनादिनीचकामनाविरहितो निष्कामो भवेति। कस्य वा निष्कामत्वं सिद्ध्यति तत्प्रदर्शनाय तं विशिनष्टि ;—निर्द्वन्द्वः सुखदुःखादिभ्यो निर्गतो निर्द्वन्द्वः द्वन्द्वसहो भव। सांसारिक-सुखदुःखादिषु निबद्धचेतास्तत्सहनाक्षमो न जातु त्रिगुणातीतधर्म्ममधि-कर्त्तुं शक्नोति। द्वन्द्वसहिष्णुत्वेऽपि स्वभावविच्युतिराशङ्कनीयेति पुनरपि विशिनष्टि नित्यसत्त्वस्थः, 'सदा सत्त्वस्थः सत्त्वगुणाश्रितः' इति श्रीम-च्छङ्करः ; 'गुणद्वयविरहितनित्यप्रवृद्धसत्त्वस्थः' इति श्रीमद्रामानुजः ;

‘नित्यसत्त्वस्थः सन् धैर्य्यमवलम्ब्य’ इति श्रीमच्छ्रीधरः ; ‘नित्यं यत् सत्त्वमपरिणामित्वं जीवनिष्ठं तत्स्थः’ इति श्रीमद्बलदेवः ; ‘रजस्तमसी अभिभूय सत्त्वमात्रावलम्बने’ इति श्रीमन्मधुसूदनः ; ‘नित्यं सर्व्वदा सत्त्वं धैर्य्यं सत्त्वगुणो वा’ इति श्रीमन्नीलकण्ठः ; ‘नित्यैः सत्त्वैर्मद्भक्तैरेव सह तिष्ठतीति तथा सः’ इति श्रीमद्विश्वनाथः ; वस्तुतस्तु नित्यमविकारि सत्त्वस्य तद्भावापन्नत्वं सत्त्वं गुणविक्षोभजनितविकाररहितत्वं, तस्मिन्नात्मस्वभावे नित्यं तिष्ठतीति नित्यसत्त्वस्थः सदा स्वभावे विराजमानः । निर्द्वन्द्वोऽपि नित्यसत्त्वस्थोऽपि शरीरधारिणः क्षुत्पिपासादिवारणायाप्राप्तस्योपार्ज्जनं तद्रक्षणञ्चावश्यकमित्यपेक्षयाह निर्योगक्षेमः उपार्ज्जनात् तद्रक्षणान्निर्गतो भव । नन्विदं कथं वा भवेत्, यतः ‘शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः’ (३।८), ‘भिक्षाचर्य्यं चरन्ति’ (बृ, आ, ५।५।१) इत्यादिषु शरीररक्षणोपयोगिवस्तुसंग्रहस्तदर्थं श्रमश्चापरिहार्य्य इति शास्त्रेष्वपि लक्ष्यते ? तत्कथं निष्कामधर्म्माश्रयी योगक्षेमरहितो भवेदिति संशये “अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥” (९।२२) इत्याचार्य्यस्योक्तिर्दर्शयति—उपार्ज्जनरक्षणेषु चित्तमनभिनिविश्य भगवति चित्तनिवेशनं तदाज्ञापालनञ्च तस्य जीवातु, न तु संसारिणा[illegible] भरणपोषणभावनयोपार्ज्जनं रक्षणञ्च ; भिक्षाचर्य्यादिकमप्याज्ञाप[illegible]न एवान्तर्भवतीति । एवमपि कदाचिदनपेक्षितपरीक्षाबाहुल्यात् पतनं सम्भवतीति सम्भाव्य विशिनष्टि त्वमात्मवान् भवेति । आत्मवान् अप्रमत्त विषयपारवश्यशून्यः आत्मस्वरूपान्वेषणपरः जितचित्त इति सर्व्वेष्वपि व्याख्यानेषु अन्नपानादिभ्यः सर्व्वेभ्यः आत्मैव पर इति ज्ञानसम्पन्नः ततो विचलनं न सम्भवतीति प्रतिपाद्यते । “आत्मवान् सर्व्वकामनापरित्यागेन परमेश्वरमाराधयतो मम स एव देहयात्रामात्रमपेक्षितं सम्पादयिष्यतीति निश्चित्य निश्चिन्तो भव” इत्यर्थं आत्मशब्दस्य परमात्मपरत्वे सिध्यति । ईश्वरे कर्म्मार्पणं योगे यदा विहितं, तदा पक्षोऽ[illegible] न सर्व्वथाऽग्रहणीयोऽस्य प्रकरणस्यात्माधिकारप्रधानत्वेऽपि । श्रीमद्वि[illegible]

यावानर्थ उदपाने सर्व्वतः संप्लुतोदके।
तावान् सर्व्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥

कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्म्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि ॥४७॥

..येन निस्त्रैगुण्यविशेषणेन भक्तियोग एवात्र साधितः। अतस्तु तस्य सर्व्वमेवोक्तमित्यलमधिकवर्णनेनात्र। ४५।

सर्व्वाणि कर्म्मफलानि परित्यज्य निष्कामतया कर्म्मानुष्ठाने किमु न क्षतिस्तत्तत्सुखसाधकानां कर्म्मफलानामभावादित्यपेक्षयाह यावा-निति। उदपाने—जातावेकवचनम्—अनेकस्मिन् क्षुद्रजलाशये यावान् अर्थः स्नानपानादिप्रयोजनम्, सर्व्वतः संप्लुतोदके एकस्मिन् महति जलाशये तावान् अर्थः भवत्येव महति क्षुद्रस्यान्तर्भावात्। एवं सर्व्वेषु वेदेषु यावान् अर्थः, विजानतः तत्त्वज्ञस्य तावानेव, क्षुद्रसुखानामनन्त-सुखेऽन्तर्भावात्। श्रीमद्रामानुजेनाप्यार्थान्तरं साधितम्, तद्यथा, "सर्व्वतः संप्लुतोदके उदपाने पिपासोर्यावान् अर्थः यावदेव पानीय-प्रयोजनं तावदेव तेनोपादीयते न सर्व्वम्, एवं सर्व्वेषु वेदेषु ब्राह्मणस्य विजानतः...... यदेव मोक्षसाधनं तदेवोपादेयं नान्यत्"। इति श्रीमद्विश्वनाथेन सकामाकामभक्तियोगपक्षे श्लोकमिमं संयोज्य सकाम-भक्तियोगादकामभक्तियोगस्यैव श्रेष्ठत्वं साधितम्—"सैवाद्यमिश्रस्य सौरकिरणस्य तीव्रत्वमिव भक्तियोगस्य ज्ञानकर्म्माद्यमिश्रत्वं तीव्रत्वं ज्ञेयम्। अत्र बहुभ्यो देवेभ्यो बहुकामसिद्धिरिति बहुबुद्धित्वमेव। एक-स्माद्भगवत एव सर्व्वकामसिद्धिरित्यंशेनैकबुद्धित्वमेव विषयसादृश्याज्-ज्ञेयम्" इति। ४६।

कर्म्मणि किमुपादेयं किं वानुपादेयं तदेव स्फुटमाह कर्म्मण्येति। ते तव कर्म्मण्येवाधिकारः, मा कदाचन तदनुबन्धितया श्रूयमाणेषु फलेषु। अनेनाचार्य्यः स्वाभिमतं ज्ञापयति स्फुटमेतत् "द्वे मे मत-

योगस्थः कुरु कर्म्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥४८॥

मिदम्'' (३।२१) इत्यादिषु। फलाकाङ्क्षया कर्म्मफलानां हेतुरुत्पादको मा भूः। कर्म्मानुष्ठानेन कर्म्मफलमवश्यं भवेदित्याशङ्कया कर्म्माकरणं वारयति, अकर्म्मणि कर्म्माकरणे ते तव सङ्गोऽनुरागो मास्तु। यत्राशङ्का विद्यते तत्र तदकरणमेव श्रेय इति जानता कथमिदमाचार्य्येणोक्तं 'मा ते सङ्गोऽस्त्वकर्म्मणि' इति? कर्म्मणः सर्व्वथाऽपरिहार्य्यत्वात्। अतएवोक्तं तेन "शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः" (३।८) इति; "याह्यं हृस्यञ्च सत्यं वा यदिदं कर्म्म विद्यते। एतदेव व्यवस्यन्ति कर्म्म कर्म्मेति कर्म्मिणः॥ मोहमेव नियच्छन्ति कर्म्मणा ज्ञानवर्ज्जिताः। नैष्कर्म्यं न च लोकेऽस्मिन् मुहूर्त्तमपि लभ्यते॥'' (अ, गी, २०अ, ६।७श्लो) इति च। श्रीमद्रामानुजं विनान्यैर्व्याख्यातृभिरत्र एवशब्द-बलेन कर्म्मण्येव तवाधिकारो न तु ज्ञाने इति साधितम्। तत्तु न रुचिरम्—कर्म्मण्येव न तु फलेष्विति प्रस्तुतत्वात्। "कर्म्मणाहुः सिद्धि-रेके परत्र हित्वा कर्म्म विद्यया सिद्धिरेके। नाभुञ्जानो भक्ष्यभोज्यस्य तृप्येद्विद्वानपीह विदितं ब्राह्मणानाम्। या वै विद्याः साधयन्तीह कर्म्म तासां फलं विद्यते नेतरासाम्॥'' (उ, प, २८अ, ६।७श्लो) इत्यादिषु श्रीमदाचार्य्यवाक्येषु कर्म्म विना ज्ञानस्य वैफल्यं सुस्पष्टम्। ज्ञानं कर्म्मणि नियोजयति, यथा धर्म्मोपदेशादिषु; कर्म्मणा च ज्ञान-स्फूर्त्तिः, यथाऽध्यापनादिभिः। अतएव कर्म्मणि नियोग आचार्य्येण नार्ज्जुनस्य ज्ञानानधिकारित्वं सूचयति, तथा सति तस्मै ज्ञानोपदेशस्य वैफल्यमेव स्यात्। ४७।

तत् कथं कर्त्तव्यमिति जिज्ञासानिवृत्तये विवृणोति योगस्थ इति। हे धनञ्जय, सङ्गं फलाभिलाषं कर्त्तृत्वाभिनिवेशञ्च त्यक्त्वा सिद्ध्यसिद्ध्योः समो भूत्वा फलसिद्धौ फलासिद्धौ समो हर्षविषादरहितो भूत्वा योगस्थः सन् कर्म्माणि कुरु। कोऽयं योगो यस्मिंस्तिष्ठन् कर्म्माणि कर्त्तव्यानि?

दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्म्मसु कौशलम् ॥५०॥

समत्वं योगः, यदेतत् सिद्ध्यसिद्ध्योः समत्वं तदेव योगः, तेनाविक्षेपसिद्धत्वात् । ४८ ।

योगे या बुद्धिः सा व्यवसायात्मिकेत्यभिधाय समत्वमेव योग इति निर्णीय समत्वबुद्धियुक्तत्ववाचकेन बुद्धियोगशब्देन तदुभयोरेकत्वं सम्पाद्य तस्य श्रेष्ठत्वं वर्णयत्याचार्य्यो दूरेणेति । हे धनञ्जय, बुद्धियोगात् समत्वबुद्धियुक्तात् कर्म्मणः फलाभिसन्धानेन क्रियमाणं कर्म्म दूरेणातिविप्रकर्षेण अवरमधममपकृष्टम् । अतएव त्वं बुद्धौ समत्वविषयकबुद्धियोगे शरणमाश्रयमन्विच्छ, फलहेतवः फलतृष्णायुक्ताः फलसङ्गादिना कर्म्म कुर्व्वाणाः कृपणाः दीनाः । ४९ ।

किं स्याद्बुद्धियोगेन तदाह बुद्धियुक्त इति । इह कर्म्मसु बुद्धियुक्तः समत्वबुद्ध्या युक्तः उभे सुकृतदुष्कृते स्वर्गादिसाधकं सुकृतं निरयादिसाधकं दुष्कृतञ्च जहाति परित्यजति । "धर्म्मेण पापमपनुदति" इति बुद्धियुक्तस्य कर्म्मभिर्दुष्कृतत्यागो भविष्यति, कथं धर्म्मसजातीयस्य सुकृतस्य त्यागो भवेदिति संशयमुत्थाप्य सिद्धान्ते श्रीमन्नीलकण्ठेनोक्तम् "सत्त्वशुद्धिज्ञानोत्पत्तिद्वारेति प्राञ्चः, अर्व्वाञ्चस्तु दुष्कृतत्यागमुक्तरीत्याभ्युपेत्य फलत्यागात् सुकृतत्यागोऽपि कर्म्मयोगिनो भवति, दुष्कृतफलबन्धमोक्षप्रतिबन्धकतत्फलस्यानुत्पादात्" इति । वस्तुतस्तु फलाकाङ्क्षायामनिरुद्धचित्तत्वात् तज्जनितसुखदुःखाद्युद्वेगविरहितत्वात्, आत्मनि परात्मनि वा चित्ताभिनिवेशस्यापराहतिः, तथा च सुकृताभिमानस्यानवसरः, स्वस्वरूपत्वात्तस्य स्वाभाविकत्वात् । एतदेव हि प्रकारान्तरेणोच्यत आचार्य्येण—"तस्माद्योगाय युज्यस्व योगः कर्म्मसु कौशलम्"

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥५१॥
यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५

इति । यत एवं फलं बुद्धियोगस्य तस्माद्योगाय उद्युक्तो कर्मसु कौशलं योगः । किमिदं कौशलम् ? कर्म तदकरणं फलाभिसन्धिविरहितत्वात् । अतएव बन्धकस्याप्यस्य कत्वम् । ५० ।

तुच्छफलत्यागेन मोक्षप्राप्तिमाह कर्मजमिति । बुद्धियुक्ताः स बुद्धियुक्ताः मनीषिणः मननशीलाः आत्मयाथात्म्यज्ञानवन्तः कर्म अन्नवत् तुच्छं फलं त्यक्त्वा जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धः जन्मात बन्धः जन्मना बन्धः जन्मबन्धः तेन विनिर्मुक्ताः जीवन्मुक्ताः सन्तः अ मयं सर्वोपद्रवरहितं क्लेशशून्यं पदं मोक्षाख्यं विष्णोः परमं गच्छन्ति प्राप्नुवन्ति । ५१ ।

कदात्मविषयकमनीषाभ्युदयेन परमपदप्राप्तियोग्यो भवतीत यदेति । यदा ते बुद्धिः मोहकलिलं मोहः देहादिष्वात्मबु[illegible]रूपोऽ वेकस्तदेव कालुष्यं तुच्छफलाभिलाषहेतुकमज्ञानगहनं [illegible] व्यतित ष्यति विशेषेणातिक्रमिष्यति प्रसन्ना भविष्यति, तदा श्रोतव्यस्य शा भागस्य श्रुतस्य च निर्वेदं वैराग्यं गन्तासि । सकलशास्त्रार्थसारभू विवेकजतत्त्वप्रस्फुरणात् तयोर्वैयर्थ्यमिति तदालोचनेन न तव का क्षेपणं स्यात् । एवं हि "ऋचो अक्षरे परमे व्योमन्" (१म, १६४ ३९ऋक्) इति ऋचमाश्रित्य साविधाब्धिविद्याभिज्ञमुद्दिश्य ब्राह्मणम "न ह वा एतस्यर्चा न यजुषा न साम्नाऽर्थोऽस्ति यः सावित्रं वे (तै, ब्रा, ३।१०।९) इति । कथमिति जिज्ञासामपेक्ष्यात्र सायन अ "ऋगादीनां त्रयाणां वेदानामुक्तरीत्या परतत्त्ववेदनपर्यवसायित्व

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥

ते तस्मै तत्पाठेन तदर्थानुष्ठानेन वा न किञ्चित्प्रयोजनमस्ति, न
भ्यासुरसौर्व्यायां नावा प्रयोजनं पश्यामः" इति । ५२ ।

श्रोतव्यस्य श्रुतस्य च निर्वेदादनन्तरं कदा योगमवाप्स्यतीत्याह श्रुति-
तिपन्नेति । श्रुतिविप्रतिपन्ना श्रुतिभिर्विविधलौकिकवैदिकार्थ-
ः विप्रतिपन्ना विक्षिप्ता किंकर्त्तव्यविमूढ़ा ते बुद्धिः यदा निश्चला
कजतत्त्वस्फूर्त्तौ अचञ्चला संशयरहिता समाधौ समाधीयते चित्त-
न्निति समाधौ आत्मनि अचला निर्वातदीपवत् स्थिरा स्थास्यति,
योगम् आत्मतत्त्वसाक्षात्कारं विवेकप्रज्ञाम् आप्स्यसि । इममेवार्थं
न्तरेणाह श्रीमद्भागवतम्—"यदा यमनुगृह्णाति भगवानात्मभा-
ः । स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥" (भा ४स्क,
प, ४६श्लो) इति । अत्र श्रीमद्रामानुजेन तदनुसारिणा श्रीमद्बल-
। च विप्रतिपन्नेति विशेषणस्य विशेषेण प्रतिपन्नेत्यर्थो निष्पन्नः ;
रुचिरम्, श्रोतव्यस्य श्रुतस्य च वैराग्येण किं भवतीति प्रदर्शनाय
ोयश्लोकस्य प्रथमांशस्यावतारणात् । समाधौ परमेश्वर इति श्रीम-
धरः, परमात्मनीति श्रीमन्मधुसूदनः । षट्त्रिंकेऽस्मिन् शास्त्रे प्रथम-
स्यात्मैव प्रधानतोऽधिकृतविषय इति भाष्येऽस्मिन् तदनुसरणेनात्र
ख्यानम् । श्लोकेनानेन किमुक्तं भवति तदुक्तमेव श्रीमद्रामानुजेन
त्मज्ञानपूर्वककर्मयोगः स्थितप्रज्ञाख्यज्ञाननिष्ठामापादयति
निष्ठारूपस्थितप्रज्ञता योगाख्यमात्मावलोकनं साधयति ।" इति ।५३
विप्रतिपन्नाया बुद्धेः स्थिरतायामात्मनि तस्या अविचलितभावेन
ः ; तदनन्तरमात्मसाक्षात्काररूपयोगश्चाभिहितः । अधुना

श्रीभगवानुवाच—

प्रजहाति यदा कामान् सर्व्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥

तद्गतो लक्षणादिकं ज्ञातुं पृच्छत्यर्ज्जुनः, स्थितप्रज्ञस्येति। हे केशव, स्थितप्रज्ञस्य स्थिता निश्चला प्रज्ञा बुद्धिर्यस्य तस्य समाधिस्थस्य आत्मनि स्थितस्य का भाषा को वाचकः शब्दः, भाष्यतेऽनयेति भाषा लक्षणं, किं लक्षणम्? स्थितधीः स्थितप्रज्ञः व्यवहारिकावस्थायां किं प्रभाषेत स्तुतिनिन्दादिषु ब्रूयात्, किम् आसीत बहिरिन्द्रियनिग्रहेणावतिष्ठेत, किं व्रजेत विषयान् प्राप्नुयात्? ५४।

प्रथमतस्तावदाचार्य्यः स्थितप्रज्ञस्य लक्षणं वक्तुमाह [illegible]हातीति। हे पार्थ, यदा सर्व्वान् मनोगतान्—न त्वात्मगतास्ते [illegible] सति तेषां स्वाभाविकत्वादपरिहार्य्यत्वमेव स्यात्—कामान् भोगाभिलाषान्, न त्वात्मनिष्ठापरिहार्य्ययोगाभिलाषान्, प्रकर्षेण सर्व्वतोभावेन जहाति आत्मना स्वयम् आत्मन्येव, न त्वात्मविरोधितुच्छविषयेषु, तुष्टः परितृप्तः, तदा स स्थितप्रज्ञ उच्यते भाष्यते। इदमत्र यावदध्यायपरिसमाप्ति द्रष्टव्यम्—अत्र योगसिद्धस्य यानि लक्षणानि स्वरूपाभिव्यञ्जकवृत्ति विशेषकथनेनोक्तानि तान्येव तदसिद्धस्य साधनानीति। ५५।

किञ्च दुःखेष्विति। दुःखेषु क्षुत्पिपासाशोकमोहज्वरशिरोरोगादि ष्वाध्यात्मिकेषु सर्पव्याघ्रादिप्रयुक्तेष्वाधिभौतिकेषु, अतिवातवृष्ट्याद्युत्थि ष्वाधिदैविकेषु अनुद्विग्नमनाः अप्रक्षुभितमनाः, सुखेषु विगतस्पृहः तृष्णाशून्यः, वीतरागभयक्रोधः विगतरागभयक्रोधः, मुनिरात्ममननशीलः, स्थितधीः स्थितप्रज्ञः, उच्यते भाष्यते। अत्र 'किं प्रभाषेत' स्योत्तररूपेणायं श्लोकः श्रीमच्छङ्करदेवेन श्रीमन्मधुसूदनेन श्रीमच्छ्रीधरस्वामिना च महता प्रयत्नेन व्याख्यातः, तन्न रुचिरम्, 'उच्यते' इति।

यः सर्व्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥
यदा संहरते चायं कूर्म्मोऽङ्गानीव सर्व्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥

वैः किं भाषते इति सूचनात् । श्रीमद्रामानुजेन त्वेवमस्मिन् श्लोके
ानन्निष्ठस्यादूरविप्रकृष्टावस्था व्याख्यानेन प्रतिपाद्यते ;—"प्रियविश्ले-
ादिदुःखनिमित्तेषूपस्थितेषु अनुद्विग्नमनाः न दुःखी भवति, सुखेषु
गतस्पृहः प्रियेषु सन्निहितेष्वपि निस्पृहः, वीतरागभयक्रोधः, अनाग-
षु स्पृहा रागः तद्रहितः, प्रियविश्लेषाप्रियागमनहेतुदर्शननिमित्तं दुःखं
यं तद्रहितः, प्रियविश्लेषाप्रियागमनहेतुभूतचेतनान्तरगतदुःखहेतुः
मनोविकारः क्रोधः तद्रहितः……… ॥" इति । ५६ ।

किं प्रभाषेतेत्यस्योत्तरमाह य इति । यः सर्व्वत्र सर्व्वेषु देहादिषु
नभिस्नेहः स्नेहशून्यः । स्नेहोऽत्र औपाधिक इति श्रीमद्बलदेवः ;
"यस्मिन् सति अन्यदीये हानिवृद्धी स्वस्मिन्नारोप्येते स तादृशोऽन्यविषयः
मापरपर्य्यायस्तामसो वृत्तिविशेषः स्नेहः" इति श्रीमन्मधुसूदनः ;
'अनिस्नेहवान् हि धनदारादिषु विकलेषु सकलेषु वा अहमेव विकलः
कलोऽस्मीति दैन्यदर्पोपेतः" इति श्रीमन्नीलकण्ठः । अनात्मन्यनुरक्ति-
भिस्नेह इति सुगमोऽर्थः, तेन च अनात्मविषयकसुखदुःखादिकमात्म-
यारोप्यते, तच्छून्यः, अतएव तत्तत् शुभाशुभम् अनुकूलप्रतिकूलं सुख-
हेतुं दुःखहेतुं विषयं प्राप्य नाभिनन्दति न प्रशंसति, न द्वेष्टि असूया-
र्व्वकं न निन्दति अभिशपति वा । शुभं प्राप्य न तदर्पकं प्रति
र्म्मिष्ठस्त्वं चिरं जीवे'ति, न वदति, मुष्टिप्रहारादिकञ्च प्राप्य
पापात्मा त्वं नरके निपते'ति नाभिशपति । एवम्भूतस्य तस्य प्रज्ञा
तिष्ठिता । स्तुतिनिन्दारूपा वाचो न भाषते, अपिच शुभं प्राप्य न
ष्यति, अशुभं प्राप्य न द्वेष्टीति व्यतिरेकेण तल्लक्षणम् । ५७ ।

किमासीतेत्यस्योत्तरमाह यदेति । यदा च अयं योगी कूर्म्मो-

विषया विनिवर्त्तन्ते निराहारस्य देहिनः ।
रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते ॥५९॥
यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥६०॥

ऽङ्गानीव सर्व्वशः इन्द्रियार्थेभ्यः इन्द्रियाणि संहरते प्रत्याहरति प्रत्याहरन्नास्ते, तदा तस्य प्रज्ञा प्रतिष्ठिता। प्रजहातीत्यारभ्य चतुर्भ्यं चतुर्विधा ज्ञाननिष्ठा पूर्व्वपूर्व्वोत्तरोत्तरनिष्पादिकेति श्रीमद्रामानुजः। ५८।

विषयेभ्य इन्द्रियाणां निवृत्तिर्जडानामातुराणामुपवासपराणाञ्च सम्भवतीति दृष्ट्वा केवलमिन्द्रियनिवृत्त्या न कृतार्थतेत्याह विषया इति। आहरणं ग्रहणमाहारः। इन्द्रियैर्विषयाणामाहारं ग्रहणमकुर्व्वतः विषयेभ्यः प्रत्याहृतेन्द्रियस्य देहिनः जडस्यातुरस्योपवासपरस्य वा विषयाः शब्दादयः रसवर्ज्जं रसो रागस्तृष्णा तं वर्ज्जयित्वा विनिवर्त्तन्ते ; शब्दादयो निवर्त्तन्ते किन्तु तद्विषयकाभिलाषो न निवर्त्तते इत्यर्थः। स रसः परं विषयेभ्यः परम् आत्मानं दृष्ट्वा तत्स्वरूपमनुभूय निवर्त्तते। 'परं परमार्थतत्त्वं ब्रह्म' इति श्रीमच्छङ्करः, 'परं परमात्मानम्' इति श्रीमच्छ्रीधरः, 'परं पुरुषार्थम्' इति श्रीमन्मधुसूदनः। ५९।

इन्द्रियसंयमं विना स्थितप्रज्ञता न सिध्यति, स च पुनर्न सामान्ययत्नसाध्यः ; अतोऽत्र महान् यत्नः कर्त्तव्य इत्याह ;—हे कौन्तेय, यततोऽपि भूयो भूयो विषयदोषदर्शनात्मकं यत्नं कुर्व्वतोऽपि हि विपश्चितः मेधाविनः शास्त्राचार्य्योपदेशवतः विषयात्मस्वरूपविवेकज्ञस्य पुरुषस्य इन्द्रियाणि चक्षुःश्रोत्रादीनि प्रसभं बलादिव मनो हरन्ति विकारं प्रापयन्ति विषयप्रवणं कुर्व्वन्ति। कथं विवेकिनोऽपि एवं विकारप्राप्तिः ? इन्द्रियाणि प्रमाथीनि प्रमथनशीलानि क्षोभकाणि अतिबलीयस्त्वात् विवेकज्ञानोपमर्द्दसमाणि। यथा प्रमाथिनो दस्यवः प्रभुणा नियुक्तं तद्रक्षकं प्रमथ्य पश्यत एव तस्य धनं हरन्ति, एवं हि

तानि सर्व्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥

इन्द्रियाणि पुरुषनियुक्तं रक्षकभूतं मनः प्रमथ्य ज्ञाननिष्ठासम्पदो हरन्ति। ६०।

इन्द्रियाणि संयम्य किं कर्त्तव्यं किञ्च वा तत्फलं तदाह तानीति। तानि सर्व्वाणि इन्द्रियाणि संयम्य वशीकृत्य युक्तः समाहितः निगृहीत-मनाः सन् मत्परः आसीत। "अहं वासुदेवः सर्व्वप्रत्यगात्मा परो यस्य स मत्परः नान्योऽहं तस्मादिति आसीत" इति श्रीमच्छङ्करः; "चेतसः शुभाश्रयभूते मयि मनोऽवस्थाप्य समाहित आसीत" इति श्रीमद्रामा-नुजः; "अहं सर्व्वात्मा वासुदेव एव पर उत्कृष्ट उपादेयो यस्य स मत्परः एकान्तभक्तः" इति श्रीमन्मधुसूदनः। "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते। वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः॥" (७।१८) इत्यत्राचार्य्यस्योक्तौ स्वमात्मनो वोपास्यत्वेनोपस्थापनमात्मनो दृश्यते; अथवानुगीतायामात्मानं स जीवत्वेन प्रतिपादयति, "मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम्। क्षेत्रज्ञ इति यश्चोक्तः सोऽह-मेव धनञ्जय॥" (३४अ, १२श्लो) इति। न च वक्तव्यम् "क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारत।" (१३।२) इत्युक्तिक्रमेण "सर्व्वतः पाणि-पादन्तत् सर्व्वतोऽक्षिशिरोमुखम्। सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति॥" (१३।१३) इति जगज्जीवशरीरव्यक्तब्रह्ममहापुरुषोऽत्राभि-धेय इति; स हि योगावस्थायां व्यक्त उपदेष्टरि, नात्र योगावस्था, यतः "न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः। परं हि ब्रह्म कथितं योगयुक्तेन तन्मया। इतिहासन्तु वक्ष्यामि तस्मिन्नर्थे पुरातनम्॥" (१५,) इत्ययोगावस्थां स्वीकृत्य इतिहासत्वमुपेतस्य पूर्व्वानुभूततथ्य-स्यात्र कथनं गीतातोऽनुगीताया महान्तं भेदं दर्शयति। कैवल्यार्थ-मुपदेष्टरि ब्रह्मदर्शनमस्मिन् देशे महाभारतकालादपि प्राक् परम्परा-गतमासीदन्यथा भीष्मं भर्त्सयमानस्य शिशुपालस्येयमुक्तिरसमञ्जसा

स्यात्—"कथं भोजस्य पुरुषे वर्गपाले दुरात्मनि। समावेशयसे सर्व्वं जगत् केवलकाम्यया॥" (स, प, ४४अ, २६श्लो) इति। कथमन्ये आचार्य्याः स्वशिष्येभ्यः स्वान् ब्रह्मत्वेनोपस्थापयन्ति, यथा हि कपिलः स्वपितरं प्रति,—"गच्छ कामं मया पृष्टो मयि सन्न्यस्तकर्म्मणा। जित्वा सुदुर्ज्जयं मृत्युममृतत्वाय मां भज॥ मामात्मानं स्वयं ज्योतिः सर्व्वभूतगुहाशयम्। आत्मन्येवात्मना वीक्ष्य विशोकोऽभयमृच्छसि॥" (भा, ३स्क, २४अ, ३८।३९श्लो) इति। तथा च ऋषभः पुत्रान् प्रति —"ये वा मयीशे कृतसौहृदार्था जनेषु देहम्भरवार्त्तिकेषु। गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके॥" (भा, ५स्क, ५अ, ३श्लो) इति। स्वस्य आत्मनि [illegible]मपि स स्पष्टमुद्घोषयति,—"प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत्।" (भा, ५स्क, ५अ, ६श्लो) इति। कोऽयं वासुदेवः? "सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः। ततः स वासुदेवेति विद्वद्भिः परिपठ्यते॥" (वि, पु, १अं, २अ, १२श्लो) इति। तेषामेवमात्मनामुपास्यत्वेनोपस्थापनस्य च किमत्र तत्त्वम्? दृश्यतां तद्ब्रह्मसूत्रे तद्भाष्ये च, तद्यथा—"शास्त्रदृष्ट्या तूपदेशो वामदेववत्" (१।१।३०)। श्रीमच्छङ्करेणास्य सूत्रस्यैवं भाष्यं विरचितम्;—"स्वमात्मानं परमात्मत्वेनाहमेव परं ब्रह्मेत्यार्षेण दर्शनेन यथाशास्त्रं पश्यन्नुपदिशति स्म 'मामेव विजानीहि' इति। यथा 'तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्य्यश्चेति' इति तद्वत्। 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' इति श्रुतेः। यत् पुनरुक्तं 'मामेव विजानीहि' इत्युक्त्वा विग्रहधर्म्मैरिन्द्र आत्मानं तुष्टाव त्वाष्ट्रवधादिभिरिति तत् परिहर्त्तव्यम्। अत्रोच्यते। न त्वाष्ट्रवधादीनां विज्ञेयेन्द्रस्तुत्यर्थत्वेनोपन्यासो यस्मादेवंकर्म्माहं तस्मान्मां विजानीहीति। कथन्तर्हि? विज्ञानस्तुत्यर्थत्वेन। यत्कारणं त्वाष्ट्रवधादीनि साहसान्युपन्यस्य परेण विज्ञानस्तुतिमनुसन्दधाति, 'तस्य मे तत्र लोम च न मीयते, स यो मां वेद न ह वै तस्य केनचन कर्म्मणा लोको मीयते' इत्यादिना। एतदुक्तं भवति,—यस्मादीदृशान्यपि

क्रूराणि कर्म्माणि कुर्व्वतो मम ब्रह्मभूतस्य लोमापि न हिंस्यते स योऽन्योऽपि मां वेद न तस्य केनचिदपि कर्म्मणा लोको हिंस्यत इति। विशेयन्तु ब्रह्मैव 'प्राणोऽस्मि प्रज्ञात्मे'ति वक्ष्यमाणम्। तस्माद्ब्रह्मवाक्यमेतत्" इति। श्रीमद्रामानुजेनैवमिदं व्याख्यातम्;—"प्रज्ञातजीवभावेनेन्द्रेण 'मामेव जानीहि,' 'मामुपास्व' इति उपास्यस्य ब्रह्मणः स्वात्मत्वेनोपदेशोऽयं न प्रमाणान्तरप्राप्तः स्वात्मावलोकनकृतः अपि तु शास्त्रेण स्वात्मदृष्टिकृतः। एतदुक्तं भवति,—'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि', 'एतदात्म्यमिदं सर्व्वं', 'अन्तःप्रविष्टः शास्ता जनानां सर्व्वात्मा', 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं, य आत्मानमन्तरो यमयति एष सर्व्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' इत्येवमादिना शास्त्रेण जीवात्मशरीरकं परमात्मानमवगम्य जीवात्मवाचिनामहन्त्वमादिशब्दानां परमात्मन्येव पर्य्यवसानं ज्ञात्वा 'मामेव विजानीहि', 'मामुपास्व' इति स्वात्मशरीरं परमात्मानमेवोपास्यत्वेनोपदिदेशेति वामदेववत्, यथा वामदेवः परस्य ब्रह्मणः सर्व्वान्तरात्मत्वं सर्व्वस्य तच्छरीरत्वं शरीरवाचिनां शब्दानां शरीरिणि पर्य्यवसानं पश्यन्, अहमिति स्वात्मशरीरकं परं ब्रह्म निर्द्दिश्य तत्सामानाधिकरण्येन मनुसूर्य्यादीन् व्यपदेशति, 'तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्य्यश्च, अहं कक्षीवान् ऋषिर्विप्रः' इत्यादि। यथाच प्रह्लादः, 'सर्व्वगत्वादनन्तस्य स एवाहमवस्थितः। मत्तः सर्व्वमहं सर्व्वं मयि सर्व्वं सनातने' इत्यादि वदति" इति। द्वैतवादिना श्रीमन्माध्येनाप्यत्रोक्तं, "शास्त्रान्तर्यामी 'संविश्यशास्त्रं परं पदम्' इति हि भागवते। 'तत्त्वमात्मोच्यते विष्णुः सर्व्वशास्त्रस्य हेतुतः। न क्वापि किञ्चिन्नामास्ति तदृते पुरुषोत्तमम्॥' इति पाद्मे। 'अहं मनुरभवं सूर्य्यश्च' इत्यादिवत्" इति। श्रीमज्जीवेनापि सूत्रमिदमुपलक्ष्योक्तं "'प्राणो वा अहमस्मि पुरुषः' इत्यादिकं यत् स्वस्य परमेश्वरत्वमिवोपदिष्टमिन्द्रेण तत्तु 'तत्त्वमसि' इत्याद्यभेदप्रतिपादकशास्त्रदृष्ट्या सम्भवति, चिदाकारसाम्ये-

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥६२॥

नैक्यात्, क्वचिदधिष्ठानाधिष्ठात्रोरेकशब्दप्रत्ययाभ्यां वा शरीरशरीरिणोर्वा, यथैव वामदेव उवाच 'अहं मनुरभवं सूर्यश्च' इत्यादि" इति। तत्त्वमुक्तं वेदान्तस्यमन्तके गोविन्दकान्तेनापरनाम्ना श्रीमद्बलदेवेन, "स च परमात्मा हरिरस्मदर्थो बोध्यः, 'अहमात्मा गुडाकेश' इत्यादिव्याख्याहमर्थयोरभेदस्मरणात् ।" "ब्रह्माविर्भावेषु भेदयाही निन्द्यते" इति। ननु दृश्यते युधिष्ठिरोक्तौ "चतुर्थं ध्यानमार्गं त्वमालम्ब्य पुरुषर्षभ। अपक्रान्तो यतो देवस्तेन मे विस्मितं मनः ॥" (शा, प, ४६अ, २श्लो) इति तस्य परब्रह्मण्येव नियतस्थितिः ; तत् कथं कदापि योगयुक्तत्वस्य कदाप्ययोगयुक्तत्वस्य तस्मिन्नारोपः ? उच्यते, ध्यानकाले तुरीयब्रह्मणि स्थितिः, व्यवहारदशायान्तु स्थितप्रज्ञतया मनोबुद्धीन्द्रियगोचर इति ध्यानाध्यानावस्थयोर्महत्त्वार्थक्यं तस्मिन्नासीत्। व्यज्यते चैतत् तस्य युधिष्ठिरप्रश्नोत्तरदानकाले, तद्यथा "ततः स्वे गोचरे न्यस्य मनोबुद्धीन्द्रियाणि सः। स्मितपूर्व्वमुवाचेदं भगवान् वासवानुजः ॥" (शा, प, ४६अ, १०श्लो) इति। स्थितप्रज्ञतया स्थितौ परब्रह्मणा योगः स्वरूपैक्येऽप्यपरोक्षज्ञानाविषयत्वादपरिस्फुटः, तस्मिंश्चित्तसमाधाने स्फुटतर इति भेदोऽत्र बोध्यः। 'युक्त आसीत मत्परः' इति किमासीतेत्यथोत्तरमनेके वर्णयन्ति। यस्य वशे इन्द्रियाणि अभ्यासवशात् वर्त्तन्ते तस्य प्रज्ञा प्रतिष्ठिता। केवलेन योगाख्येनात्मावलोकनेन न कृतार्थतेति, अहं मम मयीत्यादिशब्दैर्ब्रह्मशब्देन वा षट्केऽस्मिन् क्वचित् क्वचिदन्तर्यामिनमुपस्थापयन्त्याचार्य्यः, न तेन वक्तव्यस्य योगस्य हानिः, यतोऽस्य सिद्धिरन्तर्यामिणाभिन्नभावेन स्थित्या, नान्यथा। अपिच समन्वयप्रधानशास्त्रस्य सर्व्वत्रैव योगत्रयाणां मिलनभूमिरवश्यद्रष्टव्या। ६१।

मनोऽनिरुद्ध्य बाह्येन्द्रियाणां संयमे न कृतार्थतेत्याह द्वाभ्यां ध्यायत इति, क्रोधादिति। विषयान् शब्दादीन् ध्यायतश्चिन्तयतः पुंसः पुरु-

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥६३॥

रागद्वेषविमुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥

यस्य तेषु विषयेषु सङ्गः आसक्तिः सुखबुद्ध्या प्रीतिः उपजायते उत्पद्यते ; सङ्गात् कामः तृष्णा अभिलाषः सञ्जायते समुत्पद्यते ; कामात् कुतश्चित् प्रतिहन्यमानात् क्रोधः अभिजायते उत्पद्यते ; क्रोधात् सम्मोहः कार्य्याकार्य्याविवेकः भवति ; सम्मोहात् स्मृतिविभ्रमः प्रारब्धे इन्द्रियजयादिके प्रयत्ने या स्मृतिः शास्त्राचार्य्योपदिष्टानुसन्धानरूपा तस्याः विभ्रमः भ्रंशः ; स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिः आत्मज्ञानेऽध्यवसायः तस्याः नाशः कार्य्याकार्य्यविषयविवेकायोग्यता भवति ; बुद्धिनाशात् प्रणश्यति पुरुषार्थायोग्यः पुनर्विषयभोगनिमग्नो भवति । पूर्व्वश्लोकात् मत्पर इति विशेषणमाकृष्य तत्स्वरसात् श्रीमद्रामानुजेनाप्युक्तम् "अनिरस्तविषयानुरागस्य हि मय्यनिवेशितमनस इन्द्रियाणि संयम्यावस्थितस्यापि अनादिपापवासनया विषयध्यानमवर्ज्जनीयं स्यात्" इति । ६२।६३ ।

विषयाभिध्यानादनर्थोत्पत्तिरिति ब्रुवन्नधुना मोक्षकारणमुच्यते रागेति । रागद्वेषविमुक्तैः रागश्च द्वेषश्च रागद्वेषौ स्वाभाविकेन्द्रियप्रवृत्तिहेतू ताभ्यां विमुक्तैः आत्मवश्यैः आत्मनो वश्यानि वशीभूतानि तैः इन्द्रियैः श्रोत्रादिभिः विषयान् अवर्ज्जनीयाननिषिद्धानशनपानादीन् चरन् उपलभमानो भुञ्जानोऽपि विधेयात्मा विधेयो वशवर्त्ती आत्मा अन्तःकरणं यस्य स प्रसादं प्रसन्नतां स्वास्थ्यं विमलतां शान्तिम् अधिगच्छति प्राप्नोति । मनसि स्ववशे न रागद्वेषौ प्रभवतः, तयोरभावे तदधीनेन्द्रियप्रवृत्तेर्दोषानवसरः ; सुतरां तादृशैरिन्द्रियैर्विषयान् भुञ्जानस्यापि न शुद्धेर्व्याघातः । आत्मवश्यैरिन्द्रियैर्विषयांश्चरन्नित्यनेन कथं व्रजेतेत्यस्योत्तरम् । ६४ ।

प्रसादे सर्व्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्य्यवतिष्ठते ॥६५॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥६६॥
इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥६७॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्व्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥६८॥

प्रसादे सति किं भवतीत्याह प्रसाद इति। प्रसादे सति प्रकृति-संसर्गप्रयुक्तानामाध्यात्मिकादीनां दुःखानां हानिर्नाश उपजायते प्रसन्न-चेतसः स्वच्छान्तःकरणस्य आत्मावलोकनविरोधिविविधदोषरहितचि-त्तस्य हि आशु बुद्धिः पर्य्यवतिष्ठते प्रतिष्ठिता स्थिरा आत्मस्वरूपेणैव निश्चला भवति। ६५।

व्यतिरेकमुखेनोक्तमर्थं दृढ़यति नास्तीति। अयुक्तस्य असमाहिता-न्तःकरणस्य न बुद्धिः आत्मस्वरूपविषया प्रज्ञा, न च अयुक्तस्य भावना ध्यानम् आत्मज्ञानाभिनिवेशः अस्ति। अभावयतः आत्मज्ञानाभिनि-वेशमकुर्व्वतः शान्तिः उपशमः विषयतृष्णानिवृत्तिर्नास्ति। अशान्तस्य अनिवृत्तविषयतृष्णस्य कुतः सुखम् आत्मानन्दः। ६६।

अयुक्तस्य कथं बुद्धिर्नास्तीत्याह इन्द्रियाणामिति। चरतां स्ववि-षयेषु प्रवर्त्तमानानाम् इन्द्रियाणां मध्ये यद् एकमिन्द्रियं श्रोत्रं वा चक्षुर्वा अनु लक्ष्यीकृत्य यदा मनो विधीयते प्रवर्त्तते तत् इन्द्रियम् एक-मपि, किमु वक्तव्यं सर्व्वाणीति, अस्य पुरुषस्य प्रज्ञाम् आत्मानात्मविवे-कजां वायुर्नावमम्भसीव हरति नाशयति विषयविक्षिप्तां करोति।६७।

'यततोऽपी'त्युपक्रान्तस्यार्थस्य बहुधोपपत्तिमुक्त्वोपसंहरति तस्मा-दिति। यस्मादसमाहितेन मनसेन्द्रियाणि प्रज्ञामपहरन्ति, तस्मात्

या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥६९॥

आपूर्य्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत् कामा यं प्रविशन्ति सर्व्वे
स शान्तिमाप्नोति न कामकामी ॥७०॥

हे महाबाहो वैरिनिग्रहसमर्थ, सर्व्वशः सर्व्वप्रकारैः यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः शब्दादिभ्यः निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता । ६८ ।

युक्तस्यायुक्तस्य च प्रभेदं दर्शयितुं सिद्धासिद्धावस्थामाह या निशेति । बुद्धिर्हि द्विविधा—आत्मनिष्ठा विषयनिष्ठा च । युक्तस्यात्मनिष्ठा या बुद्धिः सा सर्व्वभूतानां निशा निशेव निशा आत्मतत्त्वस्याप्रकाशिका तमोभूतैव सा । तस्यामात्मनिष्ठायां बुद्धौ संयमी जितेन्द्रियो योगी जागर्त्ति आत्मानमवलोकयन्नास्ते । यस्यामयुक्तस्य विषयनिष्ठायां बुद्धौ भूतानि जाग्रति विषयविभागव्यापृतानि तिष्ठन्ति, पश्यतः अपरोक्षानुभववतो मुनेः स्थितप्रज्ञस्य सा निशा निशेव निशा विषयभोगानामप्रकाशिका । ६९ ।

इन्द्रियाणि विषयेभ्यः संहृत्यात्मनि तिष्ठेदित्युक्तम् । किमिदं सर्व्वव्यवहारनिवृत्तये, अथवा तेन विषयासक्तिविरहितत्वादविकारित्वमेवाभिप्रेतमिति स्फुटयन्नाह आपूर्य्यमाणमिति । प्रविशन्तीभिर्नदीभिरापूर्य्यमाणम् अथच अचलप्रतिष्ठम् अनतिक्रान्तमर्य्यादं समुद्रं क्षय-वृद्धिहीनम् आपः नद्यादिप्रभवाः यद्वत् येन प्रकारेण प्रविशन्ति, न तु कञ्चिद्विशेषं कर्त्तुं शक्नुवन्ति, तद्वत् तेन प्रकारेण सर्व्वे कामाः यं प्रविशन्ति न तु विकर्त्तुं प्रभवन्ति, स शान्तिम् आप्नोति, न कामकामी, काम्यन्त इति कामाः विषयास्तान् कामयितुं शीलं यस्य स कामकामी शान्तिं नाप्नोति, तस्य विकाराधीनत्वात् । ७० ।

८

विहाय कामान् यः सर्व्वान् पुमांश्चरति निस्पृहः ।
निर्म्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥७१॥
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्व्वाणमृच्छति ॥७२॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्याय: ।

यस्मादेवं तस्माद्विहायेति । सर्व्वान् कामान् विषयान् विहाय तत्राभिनिवेशं परित्यज्य निस्पृहः स्पृहाशून्यः निर्म्ममः ममेदमित्यभिमानवर्ज्जितः, निरहङ्कारः विद्यावत्त्वादिनिमित्तात्मसम्भावनाविरहितः चरति संसारे तद्भावेन जीवनं निर्व्वहति, स शान्तिम् आप्नोति । व्रजेत किमित्यस्योत्तरम् । ७१ ।

स्थिरप्रज्ञतां स्तुवन्नुपसंहरति । ब्राह्मी—ब्रह्मणि भवेति श्रीमच्छङ्करः, ब्रह्मप्रापिकेति श्रीमद्रामानुजः, ब्रह्मविषयेति श्रीमन्मधुसूदनः, ब्रह्मशब्देनात्र ब्रह्मविदुच्यते तस्येयं ब्राह्मी स्थितिरिति श्रीमन्नीलकण्ठः । स्थितप्रज्ञतायामात्मनः स्वरूपेऽवस्थानं भवति तेन च ब्रह्मणा स्वरूपैक्यम्, न पुनस्तस्यामपरोक्षज्ञानतो ब्रह्मणि स्थितिरिति व्याख्यानान्येतानि दर्शयन्ति । अतएव एषा स्थितप्रज्ञता ब्राह्मी ब्रह्मस्वरूपैक्यात् ब्रह्मभावापन्ना ब्रह्मविषया ब्रह्मप्रापिका वा स्थितिः । "समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता" (५।११६) इति सांख्यसूत्रे इममेवार्थं दर्शयति । तथाच भाष्यम् 'ब्रह्मरूपता बुद्धिवृत्तिविलयतः तदौपाधिकपरिच्छेदविगमेन स्वस्वरूपपूर्णतावस्थानम् ।......अस्मिन् शास्त्रे च ब्रह्मशब्द औपाधिकपरिच्छेदसामान्याद्रहितपरिपूर्णचेतनमात्रवाची । न तु ब्रह्ममीमांसायामिव ऐश्वर्य्योपलक्षितपुरुषमात्रवाचीति विवेक्तव्यम् ।" इति । हे पार्थ, एनां प्राप्य न मुह्यति न संसारमोहं प्राप्नोति । अस्यां स्थितौ स्थित्वा अन्तकालेऽपि अन्तिमे वयसि मृत्युकालेऽपि ब्रह्मनिर्व्वाणं

ब्रह्मनिर्वाणं ब्रह्मसुखं ब्रह्मैक्यम् ऋच्छति प्राप्नोति। "निष्काम-कर्म्मभिर्ज्ञानी हरिमिव परम् चरेत्। अन्यथा विप्र एवेति द्वितीया-ध्यायनिर्णयः॥" इति श्रीमद्बलदेवकृतार्थसंग्रहः। श्रीमन्मधुसूदनस्य तु "ज्ञानं तत्साधनं कर्म्म चित्तशुद्धिश्च तत्फलम्। तत्फलं ज्ञाननि-ष्ठैवेत्यध्यायेऽस्मिन् प्रकीर्त्तितम्॥" इति। "नित्यात्मकर्म्मसङ्गेहागो-चरा सांख्ययोगधीः। द्वितीये स्थिरधीलक्षा प्रोक्ता तन्मोहशान्तये॥" इति श्रीयामुनमुनिकृतगीतार्थसंग्रहमनुसृत्य श्रीमद्रामानुज आह, "नित्यात्मविषया सांख्यबुद्धिः, तत्पूर्व्विका चासङ्गकर्म्मानुष्ठानरूपा कर्म्मयोगविषया बुद्धिः स्थितप्रज्ञता योगसाधनभूता द्वितीयेऽध्याये प्रोक्ता" इति। समग्राध्यायसमालोचनेनोक्तिरियं समीचीनेति सहज-बुद्धौ प्रतिभाति। ७२।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये द्वितीयोऽध्यायः।

तृतीयोऽध्यायः ।

अर्जुन उवाच—

> ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्द्दन ।
> तत् किं कर्म्मणि घोरे मां नियोजयसि केशव ॥१॥
> व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
> तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥२॥

द्वितीयाध्याये द्विविधा निष्ठा प्रोक्ता, ज्ञाननिष्ठा कर्म्मनिष्ठा च ; न तयोरैक्यं प्रदर्शितं श्रीमदाचार्य्येण ; अपि च "स्वल्पमप्यस्य धर्म्मस्य त्रायते महतो भयात्" (२।४०) इति कर्म्मनिष्ठां प्रशंस्य, वेदविहित-कर्म्मनिष्ठानामव्यवसायित्वमनन्तबुद्धिभेदश्चोद्दिश्य "व्राह्मणस्य विजानतः" (२।४३) इत्यनेन ज्ञानमेव प्रशंसितवान् । परन्तु "दूरेण ह्यवरं कर्म्म" (२।४९) इति कर्म्मनिन्दानन्तरं, "समाधावचला बुद्धिस्तदा योगमवाप्स्यसि" (२।५३) इति ज्ञाननिष्ठाया एव सर्व्वोत्तमत्वं संस्थाप्य आ अध्यायपरिसमाप्तेर्ज्ञाननिष्ठामेव स्तौति । सुतरां मध्ये यत् "समत्वं योग उच्यते," (२।४८) "योगः कर्म्मसु कौशलम्" (२।५०) इत्युक्तम्, तस्याप्रधानत्वेनैव ग्रहणमभिप्रेतमिति सम्भाव्य अर्ज्जुनः सख्यभावादुपालम्भवाक्येन किं श्रेय इति पृच्छति द्वाभ्यां ज्यायसीति, व्यामिश्रेणेति ; —कर्म्मणो निष्कामात् बुद्धिः आत्मतत्त्वविषया ज्यायसी प्रशस्ततरा चेत्, तत् तदा घोरे हिंसात्मके कर्म्मणि, हे केशव, किं मां नियोजयसि ? व्यामिश्रेण कर्म्मप्रशंसाज्ञानप्रशंसारूपेण सन्देहोत्पादकेनेव वाक्येन—इवशब्देन सन्देहोत्पादनं नाभिप्रेतं, मन्दबुद्धित्वात् तथानुभूतमिति द्योतयति—मम बुद्धिं मोहयसीव, इवेन न ते बुद्धिमोहनमभिमतं ममैव विवेकज्ञानाभावात् तथा प्रतिभातीति ज्ञापयति ।

अत्र समुच्चयवादिनोऽसमुच्चयवादिनो विप्रवदन्ति । यद्यपि तेषां

विवादविचारणे नास्माकं कौतूहलमस्ति, तथाप्याचार्य्यस्य मतमपि विवेक्तव्यमन्यथा तं प्रति स्वाभ्युपगमविचारः। विना तदाश्रयं न वयं नवनाभिव्यक्तिमनुमोदयामः। अतस्तद्वाक्येस्तदयं निर्णेतुं यतिष्यामहे। अर्ज्जुनप्रश्नोत्तरदाने यत्तेनोक्तं "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।" (३।३) इति, न तन्निष्ठाद्वयस्य पार्थक्यसाधकम्; किन्तर्हि लोकप्रसिद्धिप्रदर्शनपरम्, अन्यथा लोकप्रसिद्धेरयुक्तत्वं प्रदर्शयितुं न तेनोच्येत "न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते। न च सन्न्यसनादेव सिद्धिं समधिगच्छति॥" (३।४) इति। न च वक्तव्यं, कर्म्मारम्भस्य नैष्कर्म्योपायत्वादेवमुक्तमाचार्य्येणेति, यदि तथैव स्यात्, तर्हि पञ्चमाध्याये नैवमुच्येत तेन,"सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः। एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥ यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते। एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति॥" (५।४।५) इति। नात्र सांख्ययोगयोः किन्तु तयोः फले एवापृथक्त्वमेकत्वञ्चेत्युक्तिर्न समीचीना। तथा सति 'सांख्ययोगौ पृथक् न पण्डिता वदन्ति,' 'एकं सांख्यञ्च योगञ्च' इति वचनं निरर्थकं स्यात्; फले चैक्यं तेषामेकत्वादेव सिध्यति, पृथक्त्वे पृथक् फलमेव स्यात्। आरम्भात्तेषामैक्यं न प्रतिभाति किन्तु पार्थक्यमेव। यदा तु ज्ञाने कर्म्मणि वा सम्यगनुष्ठानात् सिद्धिः सञ्जायते, तदा तेषामपृथक्त्वमेकत्वञ्च प्रतिभाति। अतएवोक्तं "सम्यगास्थितः" इति। इदमयमर्थं षष्ठे, "यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव। न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन॥" (६।२) इत्यनेन। एकेनान्यस्य फललाभ एवं भवति;—यदा कश्चित् कर्म्मानुष्ठाने शिथिलयत्नः सन् ज्ञानाभ्यासनिरतो भवति, तदा तस्मिन्निवृत्तियोग उपतिष्ठते; तस्मिन् सिद्धे पुनर्भगवदाराधने जीवानां दुःखहरणे च प्रवृत्तिरुदेति यथा शुकादौ। अथ पुनः कर्म्मानुष्ठाने प्रवृत्तस्य यदा भगवति तदर्पणं सिध्यति, तदा "अभिजानाति यावान् यश्चास्मि तत्त्वतः" (१८।५५) इति न्यायेन भगवज्ज्ञानसम्पन्ने तस्मिन् निवृत्तिपूर्व्वकमेव भगवदारा-

धनजीवदु:खहरणप्रवृत्तिर्वर्त्तते । एवमापातविरुद्धवत्प्रतीयमानविषयद्वयं सम्यक्स्फूर्त्तौ विरोधं परिहाय तयोरन्तर्निहितमेकत्वं प्रकटीकरोतीति व्यापारोऽसम्यगनुष्ठातृभिर्नोपलभ्यते ; अत: पक्षद्वयमाश्रित्य ते [illegible] वदन्ति । यथाहि, वैराग्यपथाश्रयिणोऽनुरागपथाश्रयिणश्च । [illegible] हि आरम्भे वैराग्यानुरागयोरेकत्वं प्रतिभाति । यदा तु परवैराग्येण भगवत्यनुराग उदेति, तदा न केवलं भगवत्येव तेषां भिन्नपथाश्रयिणामेकता, किन्तर्हि जीवविषयेऽपि । "विषयेषु गरिष्ठोऽपि राग: प्रायो विलीयते ।" (ह, भ, र, सि,) इति न्यायेनानुरागपथावलम्बकानां परवैराग्योदय:, तेन च वैराग्यपथाश्रयिभिरुक्तभूमावेकता । "कर्मसन्न्यासात् कर्मयोगो विशिष्यते" (५।२) इत्याचार्य्यस्योक्ति: कर्मयोगपक्षपातविजृम्भितेति संशयोऽकिञ्चित्कर:, सर्व्वत्र कर्मज्ञानभक्तियोगानामैक्यं सम्पादयता तेन विना कर्मान्यद्योगद्वयं मुहूर्त्तमपि न तिष्ठत्युदेति वेति प्रदर्शनार्थमेवमुक्तमिति तत्त्वम् । ज्ञानपक्षपातिभिर्ज्ञानं, भक्तिपक्षपातिभिर्भक्ति:, कर्मपक्षपातिभि: कर्मैवास्य शास्त्रस्य मुख्यं प्रतिपाद्यमिति विप्रवाद: । संस्कारदोषं परिहायाचार्य्यवचनेषु पर्य्यालोचितेषु किरणमालिन्युदिते तिमिर इव तिरोधत्त इति प्रत्ययवशात् कानिचित्तान्यत्रोद्ध्रियन्ते ।

प्रथमन्तावदिदं विवेच्यम् ;—द्वितीयाध्यायादेव योगोपदेशारम्भ: । आरम्भे पुनर्ज्ञानयोग: कर्मयोग एवोपक्रान्त:, न तु भक्तियोग:, अतो योगत्रयस्यान्यय एवाभिप्रेतोऽस्मिन् शास्त्र इत्यप्रतिपन्नम् । उपक्रान्त एव भक्तियोग: "युक्त आसीत मत्पर:" (२।६१) इति वचनात् । केवलेनैकेन विशेषणेन भक्तियोग: प्रक्रान्त इति कथनं न साहसमिति तत्त्वपर्य्यालोचनात: प्रतिभास्यते । तच्छब्देन परोक्षम्, त्वमहंशब्देनापरोक्षं ब्रह्मोपदिश्यते । "ईश्वर: सर्व्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति । भ्रामयन् सर्व्वभूतानि यन्त्रारूढानि मायया ॥ तमेव शरणं गच्छ सर्व्वभावेन भारत । तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥" (१८।६१।६२) इत्यत्र तच्छब्देन परोक्षं ब्रह्म निर्द्दिष्टम् । "समावेश-

यमि सर्वं जगत्" (स, प, ४४अ, २६श्लो) इत्युक्तादिशोपदेष्टरि निखिलं जगत् तदन्तर्यामिनञ्च दृष्ट्वाऽपरोक्षब्रह्मवाचकेन त्वंशब्देनार्ज्जुनः स्तौति, "त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम्। वेत्तासि वेद्यञ्च परञ्च धाम त्वया ततं विश्वमनन्तरूप ॥" (११।३८) "पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्। न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥" (११।४३) इति। आत्मनि तमन्तर्यामिणं नार्ज्जुनोऽपश्यत् किन्तु स्वयमाचार्य्यः, योगेन तुरीयब्रह्मगोचरे तदा तस्य स्थितत्वात्। अहंशब्देनापरोक्षब्रह्मोपदेशो दृश्यते सकलभक्तिशास्त्रशिरोमणिश्रीमद्भागवतोपसंहारे,—"अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम्। एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले ॥ दंशन्तं तक्षकं पादे लेलिहानं विषाननैः। न द्रक्ष्यसि शरीरञ्च विश्वञ्च पृथगात्मनः ॥" (भा, १२स्क, ५अ, ११।१२श्लो) इति। अस्त्येवाथ्मपरोक्षज्ञानोपदेशोऽस्मिन् शास्त्रे, तद्यथा, "सर्व्वभूतस्थमात्मानं सर्व्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्व्वत्र समदर्शनः ॥ यो मां पश्यति सर्व्वत्र सर्व्वञ्च मयि पश्यति। तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥" (६।२९।३०) इति। अत्रेदं विचार्य्यम्—ज्ञानयोगाश्रयेण योगी प्रथमतः आत्मनि केवलं सर्व्वभूतानि सर्व्वभूतेषु चात्मानं केवलं पश्यति। एवमात्मैक्यं सर्व्वभूतैरनुभूय तुरीये ब्रह्मणि विश्वकर्त्तर्य्यहंशब्दवाच्ये सर्व्वं पश्यति सर्व्वत्र तदन्तर्यामिणञ्च पश्यति। "वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः" (७।१९) इत्युक्तिः पूर्व्वापरसम्बन्धं दर्शयति। कोऽयं पूर्व्वापरसम्बन्धः? प्रथमस्तावत् परोक्षशब्दवाचिना यत् निर्द्दिष्टम् "ईश्वरः सर्व्वभूतानां हृद्देशे तिष्ठती"ति तत् वासुदेवशब्देन परामृशति, यतः "सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः।" (भा, ४स्क, ३अ, २३श्लो) इति विशुद्धेऽन्तःकरणे प्रकाशमानः परमात्मैव वासुदेवशब्देनोच्यते। केवलं हृद्यधिष्ठितमीश्वरं नियन्तारं दृष्ट्वा न कृतार्थता, स सर्व्वं जगच्च जीवश्चात्मन्यन्तर्भूय वर्त्तमान इति प्रत्यक्षीकर्त्तव्यम्। अतः सर्व्वमिति पदेन "यो मां

पश्यति सर्व्वत्र सर्व्वञ्च मयि पश्यति" इति परामृष्टम्। न च वक्तव्य-मेतद्वचनेनाचार्य्य आत्मानमुपास्यत्वेनोपस्थापयति, तथा सति भागवते नैषोक्तिः स्यात्, "अहं यूयमसावार्य्य इमे च द्वारकौकसः। सर्व्वेऽप्येवं यदुश्रेष्ठ विमृग्याः सचराचरम्॥ आत्मा ह्येकः स्वयंज्योतिर्नित्योऽन्यो निर्गुणो गुणैः। आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते॥ खं वायुर्ज्योति-रापो भूस्तत्कृतेषु यथाशयम्। आविस्तिरोऽल्पभूर्य्येकः नानात्वं यात्य-सावपि॥" (भा, १०स्क, ८५अ, २३—२५श्लो) इति। किं बहुना, तुरीयब्रह्मगोचरे विद्यमानस्यैव भक्तिः सिध्यति। तच्चेश्वरं वहिर्दर्शने त्वंशब्देन, अन्तर्दर्शनेऽहंशब्देन भक्तो निर्द्दिशति। परोक्षदर्शने भक्ति-र्गौणी, अपरोक्षदर्शने मुख्येति ज्ञेयम्। अस्मिन् शास्त्रे मुख्यैव सा, अतएवापरोक्षब्रह्मवाचकेनाहंशब्देन भजनीयः सर्व्वत्र निर्द्दिष्टः। "स च परमात्मा हरिरस्मदर्थो बोध्यः" इति वैष्णवसिद्धान्तो नातो भिद्यते।

एवं सिद्धो द्वितीयाध्याये भक्तेरुपन्यासः, अधुनाध्यायान्तरेषु त्रिविध-योगस्यान्वयनमस्ति न वेति विचार्य्यम्। तृतीयाध्याये प्रोक्तमाचार्य्येण, "मयि सर्व्वाणि कर्म्माणि सन्न्यस्याध्यात्मचेतसा। निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः॥" (३।३०) इति। भाष्यकारेण श्रीमता शङ्करेणैवं व्याख्यातोऽयं श्लोकः,—"मयि वासुदेवे परमेश्वरे सर्व्वज्ञे सर्व्वाणि कर्म्माणि सन्न्यस्य अध्यात्मचेतसा विवेकबुद्ध्या अहं कर्त्ता ईश्वराय भृत्यवत् करोमीत्यनया बुद्ध्या, किञ्च निराशीः त्यक्ताशीः निर्म्ममो ममभावश्च निर्गतो यस्य तव स त्वं निर्म्ममो भूत्वा युध्यस्व, विगतज्वरः विगतसन्तापो विगतशोकः सन्" इति। अत्र भक्तिज्ञान-कर्म्मणां त्रयाणामेकत्र सम्मिलनमेव दृश्यते। न तु वक्तव्यं नात्राचार्य्यस्य निर्बन्ध आसीत्। चेन्न स्यात् नैवं स वोचत्—"ये मे मतमिदं नित्य-मनुतिष्ठन्ति मानवाः। श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभिः॥ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्व्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः॥" (३।३१।३२) इति। ननूक्तं तेन "यस्त्वात्मरति-

रेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न
विद्यते॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्व्व-
भूतेषु कश्चिदर्थव्यपाश्रयः॥" (३।१७।१८) इति। अतो "ये मे मतम्"
इत्युक्तिरविद्वद्विषयैव। यदि तथैव स्यात्, नोच्येताचार्य्येण हृद्यधि-
ष्ठितेश्वरनियमनानुसरणवशाद्योगिनः कर्म्मण्यकर्म्म (४।१८) पश्यतैवम्,
"तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर। असक्तो ह्याचरन् कर्म्म
परमाप्नोति पूरुषः॥" (३।१९) इति। न खलु वक्ताऽयमर्ज्जुनस्याविद्वत्त्वं
दृष्ट्वा "तस्मादसक्तः" इत्याचार्य्येणोक्तम, तथा सति जनकादीनां तत्त्व-
दर्शिनामात्मनश्च दृष्टान्तो न तेनोपन्यस्येत। लोकसंग्रहार्थमेवायमुप-
न्यासः, न स पुनरवश्यकर्त्तव्यत्वेन विदुषामनुसरणीयः, यथाह स्वयं
भगवान् श्रीमद्भागवते "स्वयं निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्म्म हि।
न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः॥" (भा, ६स्क, ९अ,
५०श्लो) इति। विप्रतिपत्तिरियं मूले दृष्टेरभावात्। 'कर्म्म न वक्ति'
इति किमिदं कर्म्म? "नैष्कर्म्यमप्यच्युतभाववर्ज्जितम्" (भा, १स्क,
५अ, १२श्लो) इति भगवत्यनर्पितमेव, अन्यथा तस्मिन् शास्त्रे कर्म्मार्प-
णस्य सर्व्वप्राधान्यं न स्यात्। कोऽयं लोकसंग्रहो यस्मिन् भवतां
विद्वदभिमानिनामीदृगनादरः? शृणु तावत् तं जनकवाक्येन, "अनन्त-
वन्त इहावस्थाः विदिताः सर्व्वकर्म्मसु। नाध्यगच्छमहं तस्मान्ममेद-
मिति यद्भवेत्॥ कस्येदमिति कस्य स्वमिति वेदवचस्तथा। नाध्य-
गच्छमहं बुद्ध्या ममेदमिति यद्भवेत्॥ एतां बुद्धिं समाश्रित्य ममत्वं
वर्ज्जितं मया। शृणु बुद्धिञ्च यां ज्ञात्वा सर्व्वत्र विषयो मम॥ नाह-
मात्मार्थमिच्छामि गन्धान् घ्राणगतानपि। तस्मान्मे निर्ज्जिता भूमि-
र्वशे तिष्ठति सर्व्वदा॥" इत्यारभ्य सर्व्वेषामिन्द्रियाणान्तद्विषयाणाञ्चा-
त्मवशे स्थितिमुक्त्वैवमुपसंहृतवान्, "देवेभ्यश्च पितृभ्यश्च भूतेभ्योऽति-
थिभिः सह। इत्यर्थं सर्व्व एवेति समारम्भा भवन्ति वै॥" (अ,
गी, ३२अ, १५—२४श्लो) इति लोकसंग्रहस्तस्य परात्मतैव। न
खलु परात्मता विदुषामनादरणीया, तथा सति तेषां विद्वत्त्वं हीयेत।

"शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ।
जीवन्ति नात्मार्थमसौ पराश्रयं मुमोच निर्व्विद्य कथं कलेवरम् ॥"
(भा, १स्क, ४अ, १२श्लो) इति भगवत्परायणानां परार्थजीवनधारण-वर्णनं प्रसभं कस्य न मनो हरति ?

चतुर्थाध्याये पुनः, "वीतरागभयक्रोधा मन्मया मामुपाश्रिताः । बहवो ज्ञानतपसा पूता मद्भावमागताः ॥" (४।१०) इत्यत्र भक्तिज्ञानं, तपःशब्देन वाङ्मनःकायशुद्धिकरं कर्म्म चैकत्र । ज्ञानमेव तप इति व्याख्यानं न रुचिरम् । "यज्ञदानतपःकर्म्म न त्याज्यं कार्य्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥" (१८।५) इत्यत्र स्वय-माचार्य्येण कर्म्मान्तःपातितया तपःशब्दग्रहणात् । तत्तु तथैव यथा सप्तदशे, "देवद्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम् । ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत् । स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते ॥ मनःप्रसादः सौम्यत्वं मौन-मात्मविनिग्रहः । भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥" (१७।१४—१६) इति । अतएव श्रीमत्स्वामिना इन्द्रेकवद्भावेन यद्व्याख्यानं कृतं तदेव वयमनुमोदयामः । नन्वस्मिन्नध्याये "ब्रह्मार्पणं ब्रह्म हविः" (४।२४) इत्यादिना द्रव्यमययज्ञस्य ब्रह्मप्रापकतां संसाध्य "श्रेयान् द्रव्य-मयाद्यज्ञात् ज्ञानयज्ञः परन्तप । सर्व्वं कर्म्माखिलं पार्थ ज्ञाने परि-समाप्यते ॥" (४।३३) इति यदुक्तं तेन द्रव्यमययज्ञस्य परिसमाप्तिः प्रदर्शिता, अतः निखिलकर्म्मत्याग एवाभिप्रेत आचार्य्येण । मैवम्, वैदिकयज्ञानुष्ठानस्य परिसमाप्तिरनेन साधिताचार्य्येण, अन्यथा अध्या-यान्ते न तेनोच्येत, "योगसन्न्यस्तकर्म्माणं ज्ञानसञ्छिन्नसंशयम् । आत्म-वन्तं न कर्म्माणि निबध्नन्ति धनञ्जय ॥ तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञाना-सिनात्मनः । छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥" (४।४१।४२) इति । अत्राचार्य्यस्य निर्ब्बन्ध एव दृश्यते, अन्यथार्ज्जुनपरिप्रश्नोत्तरदान-काले न स एवमुच्येत, "सन्न्यासः कर्म्मयोगश्च निःश्रेयसकरावुभौ । तयोस्तु कर्म्मसन्न्यासात् कर्म्मयोगो विशिष्यते ॥" (५।२) इति ।

पञ्चमाध्याये तावत्, "भोक्तारं यज्ञतपसां सर्व्वलोकमहेश्वरम्। सुहृदं सर्व्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥" (५।२९) इत्यन्तिमः श्लोकः कर्म्मज्ञानभक्तीनामेकत्वं सुव्यक्तं दर्शयति। 'भोक्तारं यज्ञतपसाम्' इत्यत्र कर्म्म, "यज्ञानां तपसाञ्चैव मम भक्तैः समर्पितानां यदृच्छया भोक्तारं पालकम्" इति श्रीमच्छ्रीधरः; "ज्ञात्वा" इति ज्ञानम्; "सर्व्वलोकमहेश्वरं सुहृदं सर्व्वभूतानां माम्" इति भजनीयोक्तेश्चेन भक्तिः। "कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि। योगिनः कर्म्म कुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥" (५।११) इत्यासक्तित्यागेन कर्म्मकरणं "सर्व्वकर्म्माणि मनसा सन्न्यस्यास्ते सुखं वशी" (५।१३) इत्यनेन न प्रतिषिध्यते, यदि तथैव स्यात् षष्ठाध्यायस्यारम्भे "अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः। स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः॥ यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव। न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन॥" (६।१।२) इति न तेन निर्व्वन्धेनोचेत। "नैव कुर्व्वन्न कारयन्" (५।१३) इति वचनन्तु "नैव किञ्चित्करोमीति" (५।८) इति "इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्ते" (५।९) इति युक्त्या युक्ततमम्। श्रीमच्छ्रीधरस्वामिनाध्यायार्थसंग्रह एवं कृतः—"विकल्पशङ्कापोहेन येनैवं योगसांख्ययोः। समुच्चयः क्रमेणोक्तः सर्व्वज्ञं नौमि तं गुरुम्॥" इति।

षष्ठाध्याये पुनरन्तिमश्लोकद्वये 'तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः। कर्म्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्ज्जुन॥ योगिनामपि सर्व्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥" (६।४६।४७) इत्यत्र योगं ब्रह्मसंस्पर्शसुखप्रदं सर्व्वत्र भगवद्दर्शनरूपं प्रशंस्य तद्गतचित्तेन तस्य भजनं संसेवनमुपासनं सर्व्वोत्तममिति प्रतिपादयति। अतः पूर्व्वसूत्रं योगत्रयमिलनं न छिद्यते। "प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥" (६।१४) इत्यत्र तत्तु सुव्यक्तम्।

सप्तमाध्याये तत्परिसमाप्तिः प्रागाह "जरामरणमोक्षाय मामाश्रित्य

यतन्ति ये। ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म्म चाखिलम्॥" (७।२८) इति। ह्रत्यधिष्ठितमीश्वरमन्तर्यामिणमाश्रित्य यतमानस्य परब्रह्मज्ञानमात्मविषयज्ञानं निखिलं करणीयं कर्म्म च जानातीति स्पष्टं योगत्रयान्वयोऽत्र। अस्मिन्नध्याये योगभक्त्योरनुसरणरीतिः स्फुटं स्वीकृत्यैवोक्ताचार्य्येण; तद्यथा—"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ अपरेयमित-स्त्वन्यां प्रकृतिं विद्धि मामिकाम्। जीवभूतां महाबाहो ययेदं धार्य्यते जगत्॥ एतद्योनीनि भूतानि सर्व्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥ मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय। मयि सर्व्वमिदं प्रोक्तं सूत्रे मणिगणा इव॥" (७।४—७) इति; "मया ततमिदं सर्व्वं जगदव्यक्तमूर्त्तिना। मत्स्थानि सर्व्व-भूतानि न चाहं तेष्ववस्थितः॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्। भूतभृन्न च भूतस्थः ममात्मा भूतभावनः॥" (८।४।५) इति च।

अष्टमाध्याये "तस्मात् सर्व्वेषु कालेषु मामनुस्मर युध्य च। मय्य-र्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम॥" (८।७) इत्यत्र भगवदनुस्मरणं, तस्मिन् मनोबुद्धिसमर्पणं, स्वधर्म्मानुसरणञ्च योगत्रयस्यैकत्र सन्निवेशः प्रदर्श्यते। मनोबुद्धिसमर्पणेनात्र कर्म्मसमर्पणवत् ज्ञानसमर्पणं बोध्यम्। तेन च ज्ञानाभिमाननिरसनादसंगयित्वम्।

नवमाध्यायेऽन्तिमे श्लोके "मन्मना भव मद्भक्तो मद्याजी मां नम-स्कुरु। मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥" (९।३४) इत्यत्र मन्मना इति विशेषणेन ज्ञानं, मद्भक्त इति विशेषणेन भक्तिः, मद्या-जीति विशेषणेन कर्म्म। श्लोकोऽयमष्टादशे पुनरुपसंहारभूतो वक्ष्यते।

दशमे पुनः "अहं सर्व्वस्य प्रभवो मत्तः सर्व्वं प्रवर्त्तते। इति मत्त्वा भजन्ते मां बुधा भावसमन्विताः॥ मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्व्वकम्। ददामि बुद्धियोगं तं येन मामु-

पयामि ते॥ तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्म-भावस्थो ज्ञानदीपेन भास्वता॥" (१०।८—११) इति ज्ञानकर्म्मभक्ति-भगवदनुकम्पादीनां यथाक्रममेकत्र सन्निवेशः।

एकादशे तावत् "मत्कर्म्मकृत् मत्परमो मद्भक्तः सङ्गवर्ज्जितः। निर्व्वैरः सर्व्वभूतेषु यः स मामेति पाण्डव॥" (११।५५) इति चरमे श्लोके यद्यपि ज्ञानं न विस्पष्टं विन्यस्तं तथापि पूर्व्ववर्त्तिश्लोके "ज्ञातुं द्रष्टुञ्च तत्त्वेन" (११।५४) इति ज्ञानस्य सन्निवेशात् तदत्रानुवर्त्तते।

द्वादशे "ये तु सर्व्वाणि कर्म्माणि मयि सन्न्यस्य मत्पराः। अनन्ये-नैव योगेन मां ध्यायन्त उपासते॥ तेषामहं समुद्धर्त्ता मृत्युसंसार-सागरात्। भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्॥ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्द्ध्वं न संशयः॥" (१२।६—८) इत्येतेषु कर्म्मज्ञानभक्तिसन्निवेशः सुस्पष्टतरः।

त्रयोदशे प्रकृतिपुरुषविवेकविषये "मयि चानन्ययोगेन भक्तिरव्य-भिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि। अध्यात्मज्ञाननि-त्यत्वं तत्त्वज्ञानार्थदर्शनम्॥" (१३।१०।११) इत्यादिभिस्त्रयाणामविसं-वादित्वेव प्रतिभाति। 'अरतिर्जनसंसदि' इत्यनेन नैष्कर्म्यमेव बुद्धौ भासते, किन्तु तत्त्वतः 'विविक्तदेशसेवित्वम्' इत्यनेन भगवद्भजनक्रियां स निर्व्विघ्नेन निर्व्वहेदित्यभिप्रायेण जनसङ्गवर्ज्जनं साधकस्य व्यज्यत इति न सर्व्वकर्म्मपरिहारः।

चतुर्द्दशे गुणत्रयविभागविषयेऽध्याये "माञ्च योऽव्यभिचारेण भक्ति-योगेन सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥" (१४।२६) इत्यत्र यद्यपि गुणातीतत्वसाधने भक्तेरेव माहात्म्यं कीर्त्तितं तस्यामप-रोक्षब्रह्मदर्शनप्राधान्यात्, तथापि तां भजनीयविषयकज्ञानं भजनरूपं कर्म्म नित्यमनुबध्नातीति तयोस्तया सम्बन्धोऽपरिहार्य्य एव।

पञ्चदशे "यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्। स सर्व्व-विद्भजति मां सर्व्वभावेन भारत॥" (१५।१९) इत्यत्र 'जानाति' 'सर्व्व-वित्' इत्यनेन ज्ञानं, सर्व्वभावेन' इत्यनेन भक्तिः, 'भजति' इत्यनेन

कर्म्म व्यज्यते । न केवलं श्रवणकीर्त्तनादिकं भजनाम्तःपाति, श्राज्ञा-पालनञ्च, तद्‌यथा हरिभक्तिविलासोद्धृतविष्णुधर्म्मोत्तरवचने, "यदुत्सवा-दिकं कर्म्म तत्त्वया प्रेरितो हरे । करिष्यामि त्वया ज्ञेयमिति विज्ञा-पनं मम ॥ प्रातः प्रबोधितो विष्णो हृषीकेशेन यत्त्वया । यद्यत् कारयसीशान तत्करोमि तवाज्ञया ॥ त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव । प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्त्त-यिष्ये ॥ संसारयात्रामनुवर्त्तमानं त्वदाज्ञया श्रीनृहरेऽन्तरात्मन् । स्पर्द्धा-तिरस्कारकलिप्रमादभयानि मा माभिभवन्तु भूमन् ॥ जानामि धर्म्मं न च मे प्रवृत्तिर्जानाम्यधर्म्मं न च मे निवृत्तिः । त्वया हृषीकेश हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥" इति । भविष्यत्सामीप्ये-ऽत्र वर्त्तमाना । "ईश्वरः सर्व्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति" (१८।६१), "तमेव शरणं गच्छ सर्व्वभावेन भारत:" (१८।६२) इत्युक्तदिशेयं विज्ञापना ।

षोड़शे देवासुरसम्पद्विभागविषये यद्यपि योगत्रयं नाधिकृतं, तथापि "अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः" (१६।१) इत्यादिषु तद्वाज्यते । एवं सप्तदशे श्रद्धाविभागविषये यदुक्तं तदालोचनात: योगत्रयानुकूलविषयाणामुक्तिरत्रेति सुधियो विभावयन्ति । श्रीमद्-यामुनमुन्यनुसारिणा श्रीमद्रामानुजेन कृतः षोड़शाध्यायार्थसंग्रहो यथा "देवासुरविभागोक्तिपूर्व्विका शास्त्रवश्यता । तत्त्वानुष्ठानविज्ञानस्थेम्ने षोड़श उच्यते ॥" इति । श्रीमता स्वामिना कृतोऽर्थसंग्रहः सप्तदशस्य यथा, "रजस्तमोमयीं त्यक्त्वा श्रद्धां सत्त्वमयीं श्रितः । तत्त्वज्ञानेऽधि-कारी स्यादिति सप्तदशे स्थितम् ॥" इति ।

अष्टादशे सर्व्वार्थोपसंहारे योगत्रयान्वयो व्यक्ततर एव । प्रथम-स्तावत् कर्म्मत्यागविषये परमतमुद्भाव्य स्वमतमेवमाहाचार्य्यः ;— "त्याज्यं दोषवदित्येके कर्म्म प्राहुर्मनीषिणः । यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे ॥ निश्चयं शृणु मे तत्र त्यागे भरतसत्तम । त्यागो हि पुरुषव्याघ्र त्रिविधः परिकीर्त्तितः ॥ यज्ञदानतपःकर्म्म न त्याज्यं

कार्य्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥ एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च। कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥" (१८।२—७) इति। कोऽयं त्यागोत्यपेक्षयाह "न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः। यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥" (१८।११) इति। यत्र च तेन नैष्कर्म्यसिद्धिरुच्यते तत्रापि त्रयाणां योगानामन्वय एवाभिहित इति श्लोकैरेतैर्व्यक्ततरं प्रतिभाति;—"असक्तबुद्धिः सर्व्वत्र जितात्मा विगतस्पृहः। नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे। समासेनैव कौन्तेय निष्ठा-ज्ञानस्य या परा॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च। शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः। ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥ अह-ङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्। विमुच्य निर्म्ममः शान्तो ब्रह्मभूयाय कल्पते॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम्॥ भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्त-रम्॥" (१८।४८—५५) इति। न पुनर्विप्रचेटितव्यम्— ज्ञानयोग-स्यैवात्र प्राधान्यं, कर्म्मयोगस्तु परित्यक्त एव, भक्तियोगेन पुनर्ज्ञानपरि-पुष्टिरेवेति। कोऽयं कर्म्मयोगः, ज्ञानयोगो, भक्तियोगो वा, यमधि-कृत्येदृग्विरोधः? न तेष्वेकोऽप्युपेय उपाय एव ते। तद्यथा भागवते उद्धवं प्रत्याहाचार्य्यः, "योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया। ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥" (११स्क, २०अ, ६श्लो) इति। उपेयमेकं परं ब्रह्मैव, यन्निर्द्दिष्टपथमतिक्रम्य न कोऽपि तत्प्राप्तुं शक्यते। कोऽयं निर्द्दिष्टः पन्थाः? तत्प्रदत्तस्वभावः। सुतरां तत्प्राप्त्युपायस्य चित्वं जीवस्वभावानुसार्य्येव। यथैवेश्वरे "स्वाभा-विकी ज्ञानबलक्रिया च" (श्वे, उ, ६।८) अस्ति, तथैव जीवेऽपि। तत-

स्तदुपयोगी ज्ञानयोगः कर्म्मयोगो नियतानुबन्धस्तस्मिन् स्यादेव। भक्तिरपि तस्मिन् परस्य रसत्वात्। तद्यथा भागवते, "देवानां गुण-कर्म्मणामानुश्रविककर्म्मणाम्। सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या। अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी॥" (३स्कं, २५अ, ३२श्लो) इति। "आर्त्तो जिज्ञासुः" (७।१६) इत्यत्र भगवन्तं ज्ञातु-मभिलाषोऽभिलाषमयं हृदयं भक्तिं च दर्शयति, अतएवोपसंहृतवाना-चार्य्यः "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" इति। योगत्रयैक्यरूपं स्वाभाविकं पन्थानमेवाचार्य्यो भूयो भूयोऽतः सर्व्वत्रो-पदिदेश, तद्विरोधेन व्याचक्षाणानां व्याख्यातृणां व्याख्यानानि न वयं बहु मन्यामहे। अत्र ज्ञानपथावलम्बिनो ज्ञानमेव प्राधान्येन वर्णयन्ति, तद्यथा श्रीमच्छङ्करः—"नैष्कर्म्यसिद्धिं निर्गतानि कर्म्माणि यस्मात् निष्क्रियात्मब्रह्मसम्बोधात् स निष्कर्म्मा तस्य भावो नैष्कर्म्यं नैष्कर्म्यञ्च तत् सिद्धिश्च सा नैष्कर्म्यसिद्धिः नैष्कर्म्यस्य वा सिद्धिः निष्क्रियात्मस्वरू-पावस्थानलक्षणस्य सिद्धिर्निष्पत्तिस्तां नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्म्मजसिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां सन्न्यासेन सम्यग्दर्शनेन तत्पूर्व्वकेन वा सर्व्वकर्म्मसन्न्यासेनाधिगच्छति प्राप्नोति" इति। "कर्म्म कुर्व्वन्नपि परमां नैष्कर्म्यसिद्धिम् अधिगच्छतीति परमां ध्याननिष्ठां ज्ञानयोगस्यापि फलभूतामधिगच्छति" इति श्रीमद्रामानुजः। "यद्यपि सङ्गफलयोस्त्यागेन कर्म्मानुष्ठानमपि नैष्कर्म्यमेव कर्त्तृत्वाभिनिवेशाभा-वात्......तथापि......सन्न्यासेन परमनैष्कर्म्यसिद्धिं 'सर्व्वकर्म्माणि मनसा सन्न्यस्यास्ते सुखं वशी' इत्येवंलक्षणां पारमहंस्यचर्य्यामाप्नोति" इति श्रीमच्छ्रीधरः। "स्वात्मानन्दास्वादविक्षेपकाणां कर्म्मणां सन्न्यासेन स्वरूपतस्त्यागेन परमां नैष्कर्म्यलक्षणां सिद्धिमधिगच्छति" इति श्रीम-द्बलदेवः। स तु व्याख्यानारम्भ आह, "ज्ञानगर्भया कर्म्मनिष्ठयानुभूत-स्वस्वरूपस्ततः कर्म्मनिष्ठां स्वरूपतस्त्यजेत्" इति। "नैष्कर्म्यसिद्धिं निष्कर्म्म ब्रह्म तद्विषयं विचारपरिनिष्पन्नं ज्ञानं नैष्कर्म्यं तद्रूपां सिद्धिं परमां *कर्म्मजाया अपरमसिद्धेः फलभूताम् अधिगच्छति* साधनपरिपा-

केन प्राप्नोति" इति श्रीमन्मधुसूदनः। 'भक्त्या मामभिजानाती'त्यत्र "भक्त्या जानातीति चेत् नाभिज्ञया साहाय्यात्। १५।" इति शाण्डिल्यः। "नात्र ज्ञानानन्तरप्रवेशक्रिये भिन्ने विवक्षिते ज्ञात्वा विशते तदनन्तरमिति, किन्तर्हि फलान्तराभावात् ज्ञानमात्रमेव" इति श्रीमच्छङ्करः। "मां तत्त्वतो ज्ञात्वा तदनन्तरं तत्त्वज्ञानानन्तरं ततो भक्तितो मां विशते प्रविशति तत्त्वतः स्वरूपस्वभावगुणविभूतिदर्शनोत्तरकालभाविन्यानवधिकातिशयभक्त्या मां प्राप्नोति" इति श्रीमद्रामानुजः। "तदनन्तरं तस्य ज्ञानस्योपरमे सति मां विशते परमात्मस्वरूपो भवति" इति श्रीमच्छ्रीधरः। "विशते अज्ञानतत्कार्य्यनिवृत्तौ सर्व्वोपाधिशून्यतया मद्रूप एव भवति तदनन्तरं लब्धप्रारब्धकर्म्मभोगेन देहपातानन्तरं, न तु ज्ञानानन्तरमेव" इति श्रीमन्मधुसूदनः। एवं श्रीमच्छङ्करस्तदनुयायिनश्च ज्ञानं, श्रीमद्रामानुजः ध्यानलक्षणां भक्तिम्, वाक्यान्तरेण तामेव श्रीमद्बलदेवः, श्रीमच्छाण्डिल्यश्च परानुरागलक्षणां भक्तिमुपायत्वेन गृह्णन्ति। कर्म्मात्र न केनाप्यनुमोदितम्, यद्यपि श्रीमद्रामानुजीये व्याख्याने ध्यानलक्षणं तद्विद्यत एव। ज्ञानञ्च भक्तिश्च चेत् ते ब्रह्मप्राप्तौ सर्व्वैश्चोपायत्वेनागृह्यन्, कथमन्यदुपायभूतं कर्म्मात्र तैरुपेक्षितमिति जिज्ञासायां संस्कारदोष एवात्र कारणमिति ब्रूमः, अन्यथा श्रीमदाचार्य्याभिप्रेतं सङ्गफलयोस्त्यागेन कर्म्मानुष्ठानं नैष्कर्म्यमिति पश्यन्तोऽपि "सर्व्वकर्म्माणि मनसा संन्यस्यास्ते सुखं वशी" (५।१३) इत्येकामुक्तिं पूर्व्वापरसङ्गतिरहितां स्वीकृत्य स्वरूपतः सर्व्वकर्म्मत्यागमेव नानुगृह्णीयुः। नैतदाचार्य्यस्याभिप्रायः, यदि स्यात्, "बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च। शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः। ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥" इत्येतैर्योगानुकूलैः सर्व्वैरनुष्ठानैः "एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे। कर्म्मजान् विद्धि तान् सर्व्वान्" (४।३२) इति न्यायात् न सोऽत्र कर्म्मानुमोदितं ; नापि नवमाध्यायोक्तं "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु" (८।३४) इति श्लोकार्द्ध-

श्रीभगवानुवाच—

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन सांख्यानां कर्म्मयोगेन योगिनाम् ॥३॥

अष्टादशे यथायथं गृह्णतोचेत "मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥" (१८।६५) इति । न स केवलं ज्ञानकर्म्मभक्त्यन्वयमवोचत्, दृश्यते च तस्य तदनुयायिनित्यानुष्ठानम्, सङ्क्षेपतो महाभारते (उ, प, ८८।८३प), विस्तरतस्तु श्रीमद्भागवते तद्यथा, "ब्राह्मे मुहूर्त्ते उत्थाय वार्य्युपस्पृश्य माधवः । दध्यौ प्रसन्नकरण आत्मानं तमसः परम् ॥ एकं स्वयं ज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषम् । ब्रह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृतिम् ॥ अथाप्लुतोऽम्भस्यमले यथाविधि क्रियाकलापं परिधाय वाससी । चकार सन्ध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः ॥ उपस्थायार्कमुद्यन्तं तर्पयित्वात्मनः कलाः । देवान् ऋषीन् पितॄन् वृद्धान् विप्रानभ्यर्च्य आत्मवान् ॥ धेनूनां रुक्मशृङ्गीणां साध्वीनां मौक्तिकस्रजाम् । पयस्विनीनां गृष्टीनां सवत्सानां सुवाससाम् ॥ ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह । अलङ्कृतेभ्यो विप्रेभ्यो बद्वं बद्वं दिने दिने ॥ गोविप्रदेवतावृद्धगुरून् भूतानि सर्व्वशः । नमस्कृत्यात्मसम्भूतीर्मङ्गलानि समस्पृशत् ॥" (१०स्क, ७०अ, ४—१०श्लो) इति । स्वानुष्ठिताचारेणात्मनो मतमन्यान् ग्राहयन् पूर्णतामापादयदसौ स्वस्याचार्य्यत्वम्, इत्यलमतिविस्तरेण । गीतार्थसंग्रहः श्रीमता श्रीधरेणैवं कृतः—"भगवद्भक्तियुक्तस्य तत्प्रसादात्मबोधतः । सुखं बन्धविमुक्तिः स्यादिति गीतार्थसंग्रहः ॥" इति । भक्तिपथपक्षपातिनापि श्रीमच्छ्रीधरेण पूर्व्वं योगसांख्ययोः समुच्चयमुक्तवताजानतैव योगत्रयसमन्वयः साधितो गीतार्थसंग्रहेणेति सत्यस्य महिमैतत् । अस्मिन् संग्रहश्लोके भगवद्भजनान्तर्भूततया कर्म्म वर्त्तते । १।२ ।

अर्ज्जुनपरिप्रश्नस्योत्तरमाहाचार्य्यो लोकेऽस्मिन्निति । पुरा पूर्व्वाध्याये

मया प्रोक्ता निष्ठा एकैव अस्मिन् लोके द्विविधा। कथमेकैव द्विविधा? सांख्यानाम् ज्ञाननिष्ठानां ज्ञानप्रधानवित्तवृत्तिकानां ज्ञानयोगेन, योगिनां "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" (२।१) इति क्रियायोगपराणां कर्म्मयोगेन एकैव द्विविधेति शेषः। 'भिन्नपुरुष-कर्त्तृकं निष्ठाद्वयं, तेन समुच्चयो भगवदभीष्टः शास्त्रार्थो न भवति' इति श्रीमच्छङ्कराभिप्रायः। निष्ठाद्वयमित्युक्तिर्न शोभते, एकस्या एव ग्राहकभेदेन भिन्नभावेन ग्रहणात्। कथमेका? निष्ठेत्येकवचनेन। "द्वाभ्यामेकैव ब्रह्मनिष्ठोक्ता गुणप्रधानभूतयोः स्वातन्त्र्यानुपपत्तेः" इति श्रीमच्छ्रीधरः। "एकैव निष्ठा साधनसाधनावस्थाभेदेन द्विप्रकारा न तु द्वे एव स्वतन्त्रे निष्ठे इति कथयितुं निष्ठेत्येकवचनम्। तथाच वक्ष्यति 'एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति'" (५।५) इति श्रीमन्मधुसूदनः। एवं श्रीमद्बलदेवः। "एकस्या एव निष्ठायाः प्रकारद्वयमुक्तमधिकारिभेदेन" इति श्रीमन्नीलकण्ठः। "ज्ञाननिष्ठा कर्म्मनिष्ठात्वेन यद्द्विधामुक्तं, तत् खलु पूर्व्वोत्तरदशाभेदादेव" इति श्रीमद्विश्वनाथः। "विषयव्याकुलचित्तानां कर्म्मयोगाधिकारः, अव्याकुलचित्तानान्तु ज्ञानयोगाधिकारः" इति श्रीमद्रामानुजः। "कर्म्म-ण्येवाधिकारस्ते" (२।४७) इत्यादिना कर्म्मयोगः, "प्रजहाति यदा कामान्" (२।५५) इत्यादिना ज्ञानयोगो विहितः। एवञ्च सहसा प्रतिभाति न कोऽपि व्याख्यातृषु कर्म्मयोगस्यापरिहार्य्यत्वं स्वीकरोति, यदप्याचार्य्यवाक्ये तदेव परिस्फुटं सर्व्वत्रेति। अत्रेदं विवेचनीयम्—संसारिणो नियतेन्द्रियव्यापारप्रवृत्ता न जातु चित्तस्य स्थैर्य्यं रक्षितुं समर्थाः, तान् प्रति ज्ञानयोगोपदेशो वृथैव। यद्यपि तेषु "यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम्। स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥" (१८।४६) इति न्यायमाश्रित्य कारणीयैः कर्म्मभि-र्भगवद्दर्शनं भवतीति बुद्धिरुपतिष्ठते, तदा तैः कर्म्मयोगोऽधिकृतः, तेन च कालेऽव्याकुलचित्तता सिध्यति, ज्ञानयोगे प्रवेशश्च। येषाञ्च प्रारम्भ एव शमप्रधानं चित्तं तेषां ज्ञानयोगाधिकारश्चित्तशुद्धर्थानुष्ठितकर्म्मा-

न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥४॥
न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत्।
कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ॥५॥

नपेक्ष्य एव। एवं स्थिते पूर्व्वतनव्याख्यातॄणां व्याख्यैव सम्... नेति प्रतिभाति। स्यादेवं यदि सम्यगनुष्ठानवशादेकस्यान्यस्मिन् प्रवेशो न स्यात्। कर्म्मयोगाज्ज्ञानयोगे प्रवेशः प्रारम्भे चेज्ज्ञानयोगिनः कर्म्म-वैमुख्यं जनयेत्, अचिरादेव स भगवत्प्रेरणया दुष्करकर्म्मसाधने तं प्रवर्त्तयेत्, अन्यथा अर्व्वाचामपि श्रीमच्छङ्करादीनां जीवहिताय महान् प्रयासो नोपतिष्ठेत, येन च तेषामकाले शरीरपातोऽभवत्। नापि कर्म्मयोगिनां ज्ञानवैमुख्यं सम्भवति, भगवदर्चनरतानां तेषामुत्तरोत्तर-भगवद्विषयकज्ञानस्फूर्त्तेरपरिहार्य्यत्वात्। "एकमप्यास्थितः सम्यगुभयो-र्विन्दते फलम्" (५।४) इत्याचार्य्यस्योक्तौ तत्त्वमिदं स्फुटं प्रतिभाति। निष्ठाया एकत्वान्नास्त्यत्र व्यामिश्रवाक्यस्यावकाश इत्याचार्य्यस्या-शयः। ३।

"ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिः" इति प्रश्नेन भासमानां ज्ञाननिष्ठैव श्रेष्ठेति विप्रतिपत्तिं निरसितुं, "तदेकं वद निश्चित्य" इत्यस्याश्चाकाङ्क्षाया निवृत्तिं साधयितुमाहाचार्य्यो न कर्म्मणामिति। पुरुषः कर्म्मणामनारम्भादननुष्ठानात् नैष्कर्म्यं कर्म्मशून्यतां सर्व्वकर्म्म-त्यागरूपां ज्ञाननिष्ठां निष्क्रियात्मस्वरूपेण स्थितिं नाश्नुते न प्राप्नोति। न च सन्न्यसनादेव निखिलकर्म्मपरित्यागादेव सिद्धिं नैष्कर्म्यलक्षणां ज्ञाननिष्ठां समधिगच्छति प्राप्नोति। विप्रतिपत्तिरियं न केवलमर्ज्जु-नस्य तात्कालिकानामपरेषामप्यासीदिति तन्निरसनायैवाचार्य्यस्येय-मुक्तिः। ४।

ज्ञाननिष्ठायाः श्रेष्ठत्वे सिद्धेऽपि कथमेवमाहाचार्य्य इति तत्कारणं दर्शयितुं कथयति न हीति। कश्चित् ज्ञानी अज्ञानी वा जातु कदा-

कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढ़ात्मा मिथ्याचारः स उच्यते ॥६॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्ज्जुन ।
कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥७॥

चित् क्षणमपि अकर्म्मकृत् कर्म्माकुर्व्वाणः न हि तिष्ठति । कथम् ? सर्व्वो जनः अवशः पराधीनः सन् प्रकृतिजैर्गुणैः सत्त्वरजस्तमोभिः कर्म्म कार्य्यते । ननु ज्ञानिनां गुणैरविचाल्यमानानां नैवमवशभावेन कर्म्मानुष्ठानं सम्भवति ; अतो ज्ञानिनामज्ञानिनां कुतः ममत्वमिति जिज्ञासानिवृत्तये स्वयमेवाचार्य्येणोपरिष्टात् कर्म्मणोऽपरिहार्य्यत्वादुभयोः अमत्वेऽपि किन्त्वयोः महत्पार्थक्यं दर्शयति "कर्म्मेन्द्रियाणि संयम्य" (३।६), "यस्त्विन्द्रियाणि मनसा" (३।७) इत्येताभ्याम् । ५ ।

कर्म्मेन्द्रियाणीति । कर्म्मेन्द्रियाणि संयम्य यः मनसा इन्द्रियार्थान् स्मरन् आस्ते विमूढ़ात्मा स मिथ्याचारः मृषाचारः कपटाचारः पापाचारः दम्भार्थमेवमनुष्ठानपरायणत्वात् दाम्भिक उच्यते । ६ ।

यस्त्विति । हे अर्ज्जुन, यस्तु मनसा इन्द्रियाणि नियम्य असक्तः सन् कर्म्मेन्द्रियैः कर्म्मयोगम् आरभते स विशिष्यते, "असम्भाव्यमानप्रमादत्वेन ज्ञाननिष्ठादपि पुरुषाद्विशिष्यते" इति श्रीमद्रामानुजः, "इतरस्मान्मिथ्याचारात्" इति श्रीमच्छङ्करस्तदनुयायिनश्च । "योगः कर्म्मसु कौशलम्" (२।५०) इत्यादिभिः सङ्गफलयोस्त्यागेन कर्म्मकरणस्यास्मिन् शास्त्रे सर्व्वत्र सर्व्वास्ववस्थासु विहितत्वात्, अपि च "नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते । मोहात् तस्य परित्यागस्तामसः परिकीर्त्तितः ॥" (१८।७) इत्याचार्य्यस्य स्वमुखे सर्व्वकर्म्मत्यागस्य निन्दाश्रवणात् श्रीमद्रामानुजकृतव्याख्यानमेव वयमनुमोदयामः । ७ ।

नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः ॥८॥

"कर्म्मणो बुद्धिर्ज्यायसी" इत्यर्ज्जुनस्य प्रतिपत्तिर्भ्रान्तिविजृम्भिता, तयोरेकत्वादिति प्रतिपाद्य सम्प्रति कर्म्माकरणात् कर्म्मकरणस्य ज्याय-स्त्वमाह्नाचार्य्यो नियतमिति। त्वं नियतं नित्यं विहितं कर्म्म कुरु। कथम्? अकर्म्मणः कर्म्माकरणात् कर्म्म ज्यायः प्रशस्ततरम्। कथं वा तस्य ज्यायस्त्वम? अकर्म्मणः कर्म्माकुर्व्वाणस्य ते शरीरयात्राऽपि च न प्रसिध्येत् न सिद्धा भवेत्। यद्यपिदं श्रीमद्रामानुज एवं व्याचष्टे "नियतं व्याप्तम्। प्रकृतिसंसृष्टेन हि व्याप्तं कर्म्म, प्रकृतिसंसृष्ट-मनादिवासनया नियतत्वेन। सशकत्वादसम्भावितप्रमादत्वाच्च कर्म्मणः, कर्म्मैव कुरु। अकर्म्मणो हि ज्ञाननिष्ठाया अपि कर्म्मैव ज्यायः। 'नैष्कर्म्यं पुरुषोऽश्नुते' इति प्रक्रमात्, अकर्म्मशब्देन ज्ञाननिष्ठाधिकारि-णोऽप्यनभ्यस्तपूर्व्वतया चानियतत्वेन दुःशकत्वात् सप्रमादत्वाच्च, ज्ञान-निष्ठायाः कर्म्मनिष्ठैव ज्यायसी। कर्म्मणि क्रियमाणे त्वात्मयाथात्म्य-ज्ञानेनात्मनोऽकर्त्तृत्वानुसन्धानमनन्तरमेव वक्ष्यते, अतः आत्मज्ञानस्यापि कर्म्मयोगान्तर्गतत्वात्, स एव ज्यायानित्यर्थः। कर्म्मणो ज्ञाननिष्ठाया ज्यायस्त्वमवगतं ज्ञाननिष्ठायामधिकारे सत्येवोपपद्यते। यदि सर्व्वं कर्म्म परित्यज्य केवलं ज्ञाननिष्ठायामधिकरोषि, तर्ह्यकर्म्मणस्ते ज्ञान-निष्ठस्य ज्ञाननिष्ठोपकारिणी शरीरयात्रापि न सेत्स्यति। यावत्साधन-समाप्ति शरीरधारणञ्चावश्यं कार्य्यं, न्यायार्ज्जितधनेन महायज्ञादिकं कृत्वा तच्छिष्टाशनेनैव शरीरधारणं कार्य्यम्। 'आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः' इति श्रुतेः, 'ते त्वघं भुञ्जते पापाः' इति च वक्ष्यते। अतो ज्ञाननिष्ठस्यापि कर्म्माकुर्व्वतो देहयात्रा न सेत्स्यति। यतो ज्ञाननिष्ठस्यापि ध्रियमाणशरीरस्य यावत्साधनसमाप्ति महाय-ज्ञादिनित्यनैमित्तिककर्म्मावश्यं कार्य्यम्; यतश्च कर्म्मयोगेऽप्यात्मनो-ऽकर्त्तृत्वभावनयात्मयाथात्म्यानुसन्धानमन्तर्भूतम्; प्रकृतिसंसृष्टस्य कर्म्म-

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥९॥
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥१०॥
देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥११॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्ता न प्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥१२॥

योगः सुशकोऽप्रमादश्च ; अतो ज्ञाननिष्ठयोगस्यापि ज्ञानयोगात् कर्मयोगो ज्यायान्, तस्मात् कर्मयोगमेव कुर्व्वित्यभिप्रायः" इति। कथमयं पक्षोऽनुमोदितश्चास्माभिरुक्तं तत् प्रागेव। ८।

कर्मणा बन्धनं भवत्यतो न कर्म कर्त्तव्यमिति मतं निराकुर्व्वन्नाह यज्ञार्थादिति। यज्ञः परमेश्वराराधनं तदर्थं "यज्ञो वै विष्णुः" इति ब्राह्मणविभागोद्धृतश्रुतिः विष्णोराराधनार्थं यत्कर्म तदन्यत्र कर्मणि प्रवृत्तोऽयं लोकः कर्मबन्धनः कर्मणा बध्यते। ततः तदर्थं परमेश्वराराधनार्थं, हे कौन्तेय, मुक्तसङ्गः फलाभिलाषशून्यः कर्म समाचर सम्यगनुतिष्ठ। ९।

परमेश्वराराधनरूपं कर्मोक्त्वा, इदानीं वैदिकयज्ञानुष्ठानविषयकं कर्त्तव्यमाह प्रजापतिवाक्येन सहयज्ञा इति। पुरा सृष्टिकाले सहयज्ञाः यज्ञसहिताः प्रजाः सृष्ट्वा प्रजापतिरुवाच—अनेन यज्ञेन प्रसविष्यध्वम् उत्तरोत्तरां वृद्धिं भजध्वम्। एष यज्ञः युष्माकम् इष्टकामधुक् अभीष्टभोगप्रदः अस्तु। १०।

कथं यज्ञ इष्टकामधुक् स्यात् तत्राह देवानिति। अनेन यज्ञेन देवान् भावयत संवर्द्धयत, ते च देवा वो युष्मान् भावयन्तु संवर्द्धयन्तु। एवं परस्परं भावयन्तः परं श्रेयः प्राप्स्यथ। ११।

संवर्द्धनोदास्ये दोषमाह इष्टानिति। यज्ञभाविताः यज्ञैः संवर्द्धिताः

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्विषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥१३॥
अन्नाद्भवन्ति भूतानि पर्ज्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्ज्जन्यो यज्ञः कर्म्मसमुद्भवः ॥१४॥
कर्म्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात् सर्व्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥१५॥
एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥१६॥

देवा वो युष्मभ्यम् इष्टानभिलषितान् भोगान् दास्यन्ते । एवं तैर्दत्तान् भोगान् एभ्यो देवेभ्यो अप्रदाय यो जनः भुङ्क्ते स्वदेहेन्द्रियाणि तर्पयति स स्तेनः तस्कर एव । एतदुपलक्षणम् । मानवादिभिरप्युपकृतत्वात् देहभरणमात्रप्रयोजनं संरक्षा शिष्टैस्तेषां सेवा विहिता, यदि तानुपेक्ष्य स्वस्य भोगाय तन्नियोजयति, स चौरः शासनार्हः । तथाहि श्रीमद्भागवते, "यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम् । अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥" (स्क, १४अ, ८श्लो) इति । १२ ।

यज्ञशिष्टाशिन इति । यज्ञस्य शिष्टमशनमशितुं शीलं येषां ते सन्तः शिष्टाः सर्व्वकिल्विषैः मुच्यन्ते, ये पापाः पापचारिणः आत्मकारणात् आत्महेतोः पचन्ति ते आत्मम्भरयस्तु अघं पापं भुञ्जते । १३ ।

जगच्चक्रप्रवृत्तिहेतुर्हि कर्म्म, अतस्तत्कर्त्तव्यमित्याह त्रिभिः, अन्नादिति, कर्म्मेति, एवमिति । भूतानि अन्नाद्भवन्ति, पर्ज्जन्यात् वृष्टेः अन्नसम्भवः अन्नोत्पत्तिः, यज्ञात्पर्ज्जन्यो वृष्टिर्भवति, यज्ञः कर्म्मसमुद्भवः ऋत्विग्यजमानव्यापारसाध्यः, कर्म्म ब्रह्मोद्भवं वेदोद्भवं विद्धि जानीहि, ब्रह्म वेदः अक्षरसमुद्भवम् अक्षरः परमात्मा समुद्भवो यस्य तत, तस्मात् ब्रह्म वेदः सर्व्वगतं नित्यं यज्ञे प्रतिष्ठितम् । श्रीमद्रामानुजः श्लोकमिममेवं व्याचष्टे ;—"कर्म्म ब्रह्मोद्भवमित्यत्र ब्रह्मशब्दनिर्द्दिष्टं प्रकृति-

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते ॥१७॥

परिणामरूपं शरीरं 'तदेतद्ब्रह्म नामरूपमन्नञ्च जायते' इति ब्रह्मशब्देन प्रकृतिर्निर्दिष्टा। इहापि 'मम योनिर्महद्ब्रह्म' इत्युच्यते। अतः कर्म्म ब्रह्मोद्भवमिति प्रकृतिपरिणामरूपशरीरोद्भवं कर्म्मेत्युक्तं भवति। ब्रह्माक्षरसमुद्भवमित्यत्राक्षरशब्दनिर्दिष्टो जीवात्मा; अन्नपानादिना तृप्ताक्षराधिष्ठितं शरीरं कर्म्मणि प्रभवति। कर्म्मसाधनभूतं शरीरमक्षरसमुद्भवम्। तस्मात् सर्व्वगतं ब्रह्म सर्व्वाधिकारिगतं शरीरं नित्यं यज्ञे प्रतिष्ठितं यज्ञमूलमित्यर्थः'' इति। एवं प्रवर्त्तितं चक्रं जगच्चक्रं य इह नानुवर्त्तयति, स अघायुः पापजीवनः इन्द्रियारामः इन्द्रियक्रीड़ास्थानं, हे पार्थ, मोघं व्यर्थं स जीवति। १४।१५।१६।

एवं यावज्जीवं कर्म्म कर्त्तव्यमिति सिद्धम्। तच्च कर्म्म प्रजापतिवाक्येन वैदिकानामिन्द्रादिदेवानामेव यजनमिति स्थितम्। एवं सत्यात्माश्रयित्वाभावात् पुनः पुनस्तमुपगमनं नात्यन्तिकबन्धनाशश्चेति महदनिष्टमायातम्। एतदनिष्टं दृष्ट्वैवानुगीतायामाहाचार्य्यः—''कर्म्म केचित्प्रशंसन्ति मन्दबुद्धिरता नराः। ये तु वृद्धा महात्मानो न प्रशंसन्ति कर्म्म ते॥ कर्म्मणा जायते जन्तुः मूर्त्तिमान् षोड़शात्मकः। पुरुषं ग्रसते विद्या तद्ग्राह्यममृताशिनाम्॥'' (५१अ, ३१।३२श्लो) इति। आत्माश्रयिणां यज्ञेनानृण्यमपेक्षरम्, तेषामस्मिन् स्वातन्त्र्यं तथा हि श्रीमद्भागवते ''देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राजन्। सर्व्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कृत्यम्॥'' (११स्क, ५अ, ५१श्लो) इति। तदर्थमाह यस्त्वात्मरतिरिति। यस्तु मानव आत्मरतिः, आत्मनि एव रतिर्न विषयेषु, आत्मतृप्तः आत्मनैव तृप्तः नान्नपानादिना, आत्मनि एव च सन्तुष्टः बाह्यसर्व्वविषयभोगानपेक्षः आत्मनि एव च सन्तोषपरः, तस्य कार्य्यं करणीयं वैदिकानुष्ठानं न

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥

विद्यते। वदति ह्येवमाचार्य्यश्चतुर्थे,—"श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप। सर्व्वं कर्म्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥" (४।३३) इति। न च वक्तव्यमनेन निखिलकर्म्मत्यागोऽभिप्रेत इति; "योगसन्न्यस्तकर्म्माणं," (४।४१) "तस्मादज्ञानसम्भूतम्" (४।४२) इत्यादिभिः स्फुटतरम्। अत्रापि च "तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर" (३।१८) इति। १७।

धनजनाद्यनपेक्षकस्य तस्य तत्साधनैर्वैदिकानुष्ठानैर्न किञ्चित्प्रयोजनमस्तीत्याह, नैव तस्येति। नैव तस्य कृतेन प्रागुक्तेन वैदिकानुष्ठानेन अर्थः प्रयोजनम्; अकृतेन वैदिकानुष्ठानाकरणेन न कश्चन अर्थः प्रयोजनमस्ति। अनुपात्तानर्थशब्दोद्भावनेन व्याख्यानात्, अन्वयमुखेन व्याख्यानमेव रुचिरम्, यतस्तत् "मा कर्म्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि" (२।४७) इत्याचार्य्योक्तेरनुसारि। तेन चानुपदमेव कर्म्माचरणप्रयोजनमर्थवद्भवति। नन्वयमेवाचार्य्यस्याभिप्राय इति स्थिते, आत्माश्रयित्वं पुनर्व्याहन्येत ? न व्याहन्यते, "ब्रह्मार्पणं ब्रह्म हविः" (४।२४) इत्युक्तदिशा यज्ञोपादानेषु ब्रह्मदर्शनस्य सिद्धत्वात्। ज्ञानयज्ञपरायणास्तु नित्यानुष्ठेयोपासनादिषु देहेन्द्रियव्यापारेषु च यज्ञव्यापारं दृष्ट्वा नित्य क्रियावन्त एव। तद्यथानुगीतासु—"अग्निर्वैश्वानरो मध्ये सप्तधा दीप्यतेऽन्तरा। घ्राणं जिह्वा च चक्षुश्च त्वक् च श्रोत्रञ्च पञ्चमम्। मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्च्चिषः। घ्रेयं दृश्यञ्च पेयञ्च स्पृश्यं श्राव्यं तथैव च। मन्तव्यमथ बोद्धव्यं ताः सप्त समिधो मम॥ घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः। मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विजः॥ घ्रेये पेये च दृश्ये च स्पृश्ये श्रव्ये तथैव च। मन्तव्ये त्वथ बोद्धव्ये सुभगे पश्य सर्व्वदा। हवींष्यग्निषु होतारः सप्तधा सप्त सप्तसु॥" (२०अ, १८—२३श्लो) इति। अस्य आत्माश्रयिणः सर्व्व-

तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर ।
असक्तो ह्याचरन् कर्म्म परमाप्नोति पूरुषः ॥१९॥
कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि सम्पश्यन् कर्त्तुमर्हसि ॥२०॥

भूतेषु देवमानवादिषु कश्चिदर्थव्यपाश्रयः प्रयोजनसम्बन्धो न चास्ति । आत्मपरायणत्वादन्यनिरपेक्ष एव सः । १८ ।

ऐहिकानुष्ठानाकरणेन यतो न किञ्चन प्रयोजनं, ततोऽनासक्तया कर्म्मकरणमेव तव कर्त्तव्यमित्याह तस्मादिति । तस्मादसक्तः सङ्ग-रहितः सन् कार्य्यमवश्यकर्त्तव्यतया विहितं कर्म्म समाचर सम्यगनु-तिष्ठ । असक्तः कर्म्माचरन् पूरुषः परम् आत्मानं मोक्षम् आप्नोति । अत्र श्रीमच्छ्रीधरादिभिरर्ज्जुनस्य ज्ञानानधिकारित्वं दर्शयद्भिराचार्य्यै-रेवानादृतः, यतः सोऽर्ज्जुनं पूर्व्वस्मृतिविस्मापितोऽप्युत्तमज्ञानाधिकारिण-मेवाज्ञासीत्, तद्यथानुगीतासु, "नैतत् पार्थ सुविज्ञेयं व्यामिश्रेणेव मे मतिः । नरेणाकृतसंज्ञेन विदग्धेनाकृतात्मना ॥ सुरहस्यमिदं प्रोक्तं देवानां भरतर्षभ । कच्चिन्नेदं श्रुतं पार्थ मनुष्येणेह कर्हिचित् ॥ न ह्येतच्छ्रोतुमर्होऽन्यो मनुष्यस्त्वामृतेऽनघ । नैतदद्य सुविज्ञेयं व्यामि-श्रेणान्तरात्मना ॥" (१९अ, ५६—५८श्लो) इति । १९ ।

कर्म्मानुष्ठाने कारणान्तरमपि दर्शयति कर्म्मणैवेति । कर्म्मणैव जनकादयः संसिद्धिं सम्यग्ज्ञानम् आस्थिताः प्राप्ताः । अतः कर्म्म समाचर । "यतो ज्ञानयोगाधिकारिणोऽपि कर्म्मयोग एवात्मदर्शने श्रेयान्, अतश्च जनकादयो राजर्षयो ज्ञानिनामग्रेसराः कर्म्मयोगेनैव संसिद्धिमास्थिताः, आत्मानं प्राप्तवन्तः" इति श्रीमद्रामानुजः । जन-कादयो ह्यात्मसाक्षात्कारानन्तरं राज्यपालनादिषु प्रथमं विमुखा अभू-वन्, ततो भगवदाज्ञया तत्कार्य्येषु नियुक्ता इति योगवाशिष्ठादिभ्यो-ऽवगन्तव्यम् । जनकादिभिः क्षत्रियत्वहेतोर्न सन्न्यास आश्रित इति

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥२१॥
न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि ॥२२॥

सिद्धान्तोऽस्त्येव भरतऋषभादीनां कर्म्मत्यागदर्शनात्। नाहं देवानां पितृणां भूतानामृणी किङ्करो वात्माश्रयित्वादिति चेन्मन्यसे, तथापि लोकसंग्रहमेव लोकानां कल्याणसाधनं स्वदृष्टान्तेन स्वधर्म्मे स्थापनं पश्यन् कर्म्म कर्त्तुमर्हसि। परात्मताप्रयोजितेयं लोकसंग्रहस्पृहेति जनकदृष्टान्तेन प्रतिपन्नमध्यायप्रारम्भे। केयं परात्मता? "शश्वत्परार्थसर्व्वेहः परार्थैकान्तसम्भवः। साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मताम्॥" (भा, ११स्क, ७अ, ३८श्लो) इति। २०।

अकिङ्करस्यानृणस्य लोकसंग्रहापेक्षा किं न तमुच्चतमधर्म्मात् प्रच्यावयतीति विप्रतिपत्तिमुच्चधर्म्माश्रयिण आचरणेनापरेषां कल्याणमकल्याणञ्च चिरसंयुक्तम्, अतस्तदुपेक्षयाऽपराधभाक्त्वमवश्यम्भावीति प्रदर्श्य निराकरोति यद्यदिति। श्रेष्ठः कृत्स्नशास्त्रज्ञतया तदनुष्ठानतया च प्रसिद्धो जनः यत् यत् आचरति तत् तदेव इतरोऽकृत्स्नविज्जन आचरति। स यत् लौकिकं वैदिकं वा प्रमाणं कुरुते प्रमाणत्वे मन्यते, लोकः तत् अनुवर्त्ततेऽनुसरति। २१।

सर्व्वसंशयं निराकर्त्तुमात्मदृष्टान्तमाचार्य्य उपस्थापयति न मे इति हे पार्थ, किञ्चन मम कर्त्तव्यं नास्ति। यतः त्रिषु लोकेषु अनवाप्तम् अप्राप्तम् अवाप्तव्यं प्रापणीयं न मम अस्ति, अनन्तब्रह्माधिकृतत्वात् तथापि वर्त्ते एव चाहं कर्म्मणि। कथमाचार्य्यस्य कर्म्मणीदृगादरः प्रकटितस्तत् स्वयमेवमुद्योगपर्व्वणि;—"या वै विद्याः साधयन्तीह कर्म्म तासां फलं विद्यते नेतरेषाम्। तत्रेह वै दृष्टफलन्तु कर्म्म पीत्वोदकं शाम्यति तृष्णयार्त्तः॥ सोऽयं विधिर्विहितः कर्म्मणैव संवर्त्ते

यदि ह्यहं न वर्त्तेयं जातु कर्म्मण्यतन्द्रितः ।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्व्वशः ॥२३॥

उत्सीदेयुरिमे लोका न कुर्य्यां कर्म्म चेदहम् ।
सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः ॥२४॥

प्रज्ञाय तव कर्म्म । यत्र योऽस्मिन् कर्म्मणः साधु मन्ये मोघं तस्याल्पितं दुर्बलस्य ॥ कर्म्मणामी भान्ति देवाः परत्र कर्म्मणैवेह प्लवते मातरिश्वा । अहोरात्रे विदधत् कर्म्मणैव अतन्द्रितः सततमुदेति सूर्य्यः ॥ मासार्द्ध-मासानथ नक्षत्रयोगानतन्द्रितश्चन्द्रमाश्चाभ्युपैति । अतन्द्रितो दहते जातवेदाः समिध्यमानः कर्म्म कुर्व्वन् प्रजाभ्यः । अतन्द्रिता भारमिमं महान्तं बिभर्त्ति देवी पृथिवी बलेन । अतन्द्रिताः शीघ्रमपो वहन्ति सन्तर्पयन्त्यः सर्व्वभूतानि नद्यः ॥ अतन्द्रितो वर्षति भूरितेजाः सन्नादयन्नन्तरिक्षं दिशश्च । अतन्द्रितो ब्रह्मचर्य्यं चचार श्रेष्ठत्वमिच्छन् बलभिद्देवतानाम् ॥ हित्वा सुखं मनसश्च प्रियाणि देवः शक्रः कर्म्मणा श्रैष्ठ्यमाप । सत्यधर्म्मौ पालयन्नप्रमत्तो दमं तितिक्षां समतां प्रियञ्च ॥ एतानि सर्व्वाण्युपसेवमानः स देवराज्यं मघवान् प्राप मुख्यम् । बृहस्पतिर्ब्रह्मचर्य्यं चचार समाहितः संशितात्मा यथावत् ॥ हित्वा सुखं प्रतिरुध्येन्द्रियाणि तेन देवानामगमद्गौरवं सः । तथा नक्षत्राणि कर्म्मणामुत्र भान्ति रुद्रादित्या वसवोऽथापि विश्वे ॥ यमो राजा वैश्रवणः कुबेरो गन्धर्व्वयक्षाप्सरश्च सूत । ब्रह्मविद्यां ब्रह्मचर्य्यं क्रियाञ्च निषेवमाणा ऋषयोऽमुत्र भान्ति ॥" (२८अ, ७—१६श्लो) इति । २२ ।

ब्रह्मभूतोऽपि कथन्त्वमसम्यक इव कर्म्मणि वर्त्तसे इति प्रश्नमुत्थाप्य तदुत्तरमाह द्वाभ्यां यदीति, उत्सीदेयुरिति । हे पार्थ, यदि ह्यहम् अतन्द्रितः निरलसः सन् जातु कदाचित्कर्म्मणि न वर्त्तेयं कर्म्म नानुतिष्ठेयं, मनुष्याः सर्व्वशः सर्व्वप्रकारेण मम वर्त्म अनुवर्त्तन्ते अनुवर्त्तेरन् । चेदहं कर्म्म न कुर्य्याम्, इमे लोका उत्सीदेयुः विनश्येयुः, धर्म्मलोपात्

सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत ।
कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥२५॥

न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम् ।
योजयेत्सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन् ॥२६॥

सङ्करस्य च कर्त्ता स्याम्, इमाः प्रजाः उपहन्याम् मलिनीकृत्य विनाशयेयम् । कर्म्मणैव सर्व्वं जगत् यथावत् स्थितम्, एवं मानवसमाजोऽपि । आलस्ये पुनः स्वभावविकारः, स्वभावविकारे धर्म्मलोपः, धर्म्मलोपे मर्य्यादालङ्घनम्, मर्य्यादालङ्घने जनक्षय इति पश्यतो ज्ञानिनः कर्म्मणि प्रवृत्तिः । अतएव हि ध्यानयोगिनमप्युपलक्ष्याचार्य्य आह—"युक्तचेष्टस्य कर्म्मसु" (६।१७) इति । २३।२४ ।

प्राप्तव्याभावेऽपि परेषां कल्याणार्थं कर्म्मानुष्ठानं माऽस्त्वे वम्भनाय भूदिति फलाभिसन्धित्यागेनैव कर्त्तव्यमित्याह सक्ता इति । अविद्वांसोऽज्ञानिनः कर्म्मणि सक्ताः फलाभिलाषादभिनिविष्टाः यथा कुर्व्वन्ति कर्म्मानुतिष्ठन्ति, लोकसंग्रहं लोककल्याणं चिकीर्षुः विद्वान् असक्तः फलाभिसन्धिरहितः सन् तथा कुर्य्यात् कर्म्मानुतिष्ठेत् । २५ ।

कथमवायद्वः ? श्रेष्ठस्याचारप्रवर्त्तयितृत्वात् । तदेवाह न बुद्धिभेदमिति । अज्ञानां कर्म्मसङ्गिनां कर्म्मासक्तानां बुद्धिभेदं बुद्धिविचालनं कर्म्मफलेषु संशयापन्नत्वं न जनयेत् । युक्तः योगयुक्तः कर्त्तृत्वाभिमानत्यागेन हृद्यधिष्ठितेश्वरप्रेरणानुसारी सन् विद्वान् समाचरन् स्वयं सम्यगाचरन् सर्व्वकर्म्माणि योजयेत् कारयेत् । श्रीमता जीवेन क्रमसन्दर्भे "स्वयं निःश्रेयसं विद्वान्" इति भागवतपद्यमाश्रित्य या विप्रतिपत्तिरुत्थापिता विचारिता साध्यायारम्भे । श्रीमद्बलदेवः श्रीमद्विश्वनाथश्च तमेवानुसरतोऽत्र । श्रीमन्मधुसूदन आह,—"अनधिकारिणामुपदेशेन बुद्धिविचालने कृते कर्म्मसु श्रद्धानिवृत्तेर्ज्ञानस्य चानुत्पत्तेरुभयभ्रष्टत्वं स्यात् । तथाचोक्तम्, 'अज्ञस्यार्द्धप्रबुद्धस्य सर्व्वं ब्रह्मेति यो वदेत् ।

प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः ।
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ॥२७॥

महानिरयजालेषु स तेन विनियोजितः ॥" इति । विषमयफलमस्य सर्व्वं ब्रह्मेति भाषणस्य प्रत्यक्षीभवति भारते विविधेषु स्थानेषु । ये पुनर्वदन्ति, राजधर्म्मानुसारिण आचार्य्यस्याऽयं पन्था नोत्तमधर्म्मानुमोदित इति तेषां तद्वादमनुसन्धायैव तेनोक्तं—"ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्व्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥" (३।३२) इति । कथं सर्व्वज्ञानविमूढास्ते ? "सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि" (३।३३) इति कारणात् । न कोऽपि सर्व्वथा क्रियाहीनो भवितुं शक्तो ज्ञानवान् अज्ञानवान् वा । यद्येवं तदा स एव पन्था अवलम्बनीयो येन कर्म्म कृत्वापि तज्जनितबन्धनं न स्यात् । अर्द्धप्रबुद्धा ज्ञानाभिमानिनः पुनः कर्म्मणोऽपरिहार्य्यत्वमनभिसन्धाय, तस्य चावश्यम्भावि सदसत् फलमुपेक्ष्य सत्कर्म्म नानुतिष्ठन्ति, सर्व्वं ब्रह्मेति वादमाश्रित्य धर्म्माधर्म्मभेदं विलोप्य प्रवृत्तिपरायणतयाऽसत्कर्म्मण्येव प्रवर्त्तन्ते । एवं ते खल्वात्मविनाशं साधयन्ति । ज्ञानिनस्तु कर्म्मणोऽपरिहार्य्यत्वं जानन्तः कर्त्तृत्वाभिमानत्यागेन तान्यनुतिष्ठन्ति यैर्जनानां कल्याणं भवति, तदनुसरणेन प्रवृत्तिवासनाविमोक्षश्च । अतएव परात्मत्ववतां लोकसंग्रहाभिलाषो नोत्तमधर्म्मविरोधी, प्रत्युत तदनुगत एवेति तत्त्वम् । विविधेषु कर्म्मसु जनकल्याणार्थं कानि वानुष्ठेयानीति जिज्ञासायां तत्र हृद्यधिष्ठितेश्वरप्रेरणानुसरणमेव श्रेय इति युक्ता मीमांसा । अतएव 'युक्तः' इति विशेषणमत्रोपात्तम् । २६ ।

कर्त्तृत्वाभिमान एव बन्धकारणं, स एवाज्ञानिषु नियतानुबन्धीति ज्ञानिनो तेषां भेदप्रदर्शनायाह प्रकृतेरिति । प्रकृतेर्गुणैर्विकारैः कार्य्यकारणरूपैः शरीरेन्द्रियप्राणैः सत्त्वरजस्तमःप्रधानैः सर्व्वशः सर्व्वप्रकारेण कर्म्माणि क्रियमाणानि । अहङ्कारविमूढात्मा विवेकज्ञानशून्यतया

तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयोः ।
गुणागुणेषु वर्त्तन्त इति मत्वा न सज्जते ॥२८॥

शरीरादिष्वहंबुद्धिः, अहं कर्त्ता एकोऽहमेव शरीरादिनियामकत्वेन कर्म्मनिष्पादक इति मन्यते। एवं सिध्यति मिथ्यादृष्टिनिबन्धन एव कर्म्मणा बन्धः । २७ ।

किं पुनर्मन्यते विद्वान् तदाह तत्त्ववित्त्विति। गुणाः शरीरेन्द्रियप्राणाः सत्त्वरजस्तमःप्रधानाः ; तेषां कर्म्माणि दर्शनस्पर्शनश्वयवृद्ध्यादीनि। गुणविभागश्च कर्म्मविभागश्च गुणकर्म्मविभागौ तयोर्गुणकर्म्मविभागयोः। कोऽयं गुणविभागः कर्म्मविभागो वा ? विभागोऽधिकृतांशः ; गुणैरधिकृतांशः कर्म्मभिरधिकृतांशश्च। यद्यपि गुणेभ्य एव कर्म्माण्युत्पद्यन्ते, तथाप्युत्पत्त्यनन्तरं तानि शरीरादिषु विकारानुत्पादयन्ति, विकारजनितदीर्घकालस्थायिफलानि च। तैर्विकारैः फलैश्च पुनः शरीरादिषु गुणा उद्रिच्यन्ते, संस्काराकारेण गुणोद्रेकविधायकेन च पुनस्तेषु तानि तिष्ठन्ति। एवं पुनः पुनः कर्म्मयोगात् जीवनप्रवाहाविच्छेदः। गुणकर्म्मविभागयोस्तत्त्ववित्, हे महाबाहो, गुणाश्चक्षुरादयः गुणेषु तद्विषयेषु वर्त्तन्ते, न तु आत्मा, इति मत्वा न सज्जते सक्तिं कर्त्तृत्वाभिनिवेशं न करोति। 'गुणकर्म्मविभागयोः गुणविभागस्य कर्म्मविभागस्य च तत्त्ववित्' इति श्रीमच्छङ्करः। 'गुणकर्म्मविभागयोः सत्त्वादिगुणविभागे तत्तत्कर्म्मविभागे च तत्त्ववित्' इति श्रीमद्रामानुजः। 'नाहं गुणात्मक इति गुणेभ्य आत्मनो विभागः, नाहं कर्म्मात्मक इति कर्म्मभ्यश्चात्मनो विभागः, तयोर्गुणकर्म्मविभागयोस्तत्त्वं वेत्ति' इति श्रीमच्छ्रीधरः। 'गुणा देहेन्द्रियान्तःकरणानि अहङ्कारास्पदानि, कर्म्माणि तु तेषां व्यापारभूतानि ममाकारास्पदानि—गुणकर्म्मेति द्वन्द्वैकवद्भावः। विभज्यते—सर्व्वेषां जड़ानां विकारिणां भासकत्वेन पृथग्भवतीति—स्वप्रकाशज्ञानरूपोऽसङ्ग आत्मा—गुणकर्म्म च विभागश्चेति द्वन्द्वः—तयोर्गुणकर्म्मविभागयोर्भास्यभासकयोर्जड़चैतन्ययोर्वि-

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्म्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥२९॥
मयि सर्व्वाणि कर्म्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः ॥३०॥

कारिनिर्व्विकारयोस्तत्त्वं सात्वार्थ्यं याथात्म्यं यो वेत्ति' इति श्रीमन्मधुसूदनः । 'गुणविभागस्य कर्म्मविभागस्य च तत्त्ववित्, गुणेभ्य इन्द्रियेभ्यः कर्म्म-भ्यश्च यः स्वस्य विभागो भेदस्तस्य तत्त्वं स्वरूपं तत्तद्धर्म्मपर्य्यालोचनया यो नाहं गुणकर्म्मस्वरूप इति वेत्ति' इति श्रीमद्बलदेवः । 'यस्तत्त्ववित् स "गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते" गुणविभागे कर्म्मविभागे च न सज्जते……। गुणानां सत्त्वरजस्तमसां विभागः बुद्ध्यहङ्कार-ज्ञानेन्द्रियकर्म्मेन्द्रियविषयरूपो विभज्यात्मस्थानं तस्मिन् सज्जते इदमह-मिति न मन्यते' इति श्रीमन्नीलकण्ठः । 'गुणविभागः सत्त्वरजस्तमांसि कर्म्मविभागः सत्त्वादिकार्य्यभेदा देवतेन्द्रियविषयाः, तयोस्तत्त्वं स्वरूपं तज्ज्ञः' इति श्रीमद्विश्वनाथः । सर्व्वैरेतैर्व्याख्यानैः शरीरेन्द्रियादिव्यापा-राद्दात्मनो भेदः पृथक्त्वमेव प्रतिपाद्यते । २८ ।

ये तु न गुणकर्म्मविभागज्ञास्तान् प्रति कर्त्तव्यमाह प्रकृतेरिति । प्रकृतेर्गुणसम्मूढाः, गुणैर्देहादिभिर्विकारैः सम्यक् मोहिताः सन्तः गुण-कर्म्मसु गुणानां कर्म्मसु देहादीनां व्यापारेषु सज्जन्ते फलाय कर्म्म कुर्व्वन्ति । तान् अकृत्स्नविदः असम्यग्दर्शिनः मन्दानल्पप्रज्ञान् कृत्स्न-वित् सम्यग्दर्शी आत्मवित् न विचालयेत् तेषां बुद्धिभेदं नापादयेत् । स्वयं कर्म्माचरन् कर्म्मोपदिशन् कर्म्मणा भगवद्दर्शनं भवतीति बोधयन् कर्म्मजनितसिद्धिभाजस्तान् कुर्व्वीतेत्याशयः । २९ ।

एवमात्मनः प्रकृतिव्यापारेभ्यः पृथक्त्वं संसाध्यात्मनि स्थितिपूर्व्वक-मकृतभाववर्ज्जितं नैष्कर्म्म्यमनभिमन्य, सर्व्वान्तर्यामिणमपरोक्षभावेना-त्मगोचरे संस्थाप्य, तस्मिन् सर्व्वाणि स्वभावनियतानि कर्म्माणि निक्षिप्य, तेन प्रयोजिताश्चेतामीति विज्ञाय, तत्साधनं तदाज्ञापालनमिति

विन्यस्य, ज्ञानभक्तिकर्म्मसमन्वितो योगी कृतकृत्यो भवतीत्यात्मनो नवीनं मतं विवृणोत्याचार्य्यो मयि सर्व्वाणीति। मयि अन्तर्यामिण्यपरोक्षे परमात्मनि सर्व्वाणि कर्म्माणि सन्न्यस्य निक्षिप्य समर्प्य अध्यात्मचेतसा विवेकबुद्ध्या—'आत्मनि यच्चेतस्तदध्यात्मचेतः' देहेन्द्रियादिभ्यश्चेतो विभज्य नियतात्मनि संस्थाप्य विवेकबुद्धियुक्तस्तद्भावेन—निराशीः आज्ञापालनमात्रप्रयोजनत्वात् फलेच्छाशून्यः, निर्म्मम: ममत्ववर्ज्जितः ममानुष्ठितं कर्म्म मां फलेन योजयेदिति ममतावर्ज्जितः, विगतज्वरः सन्तापरहितः युध्यस्व स्वभावविहितं क्षत्रियोचितं कर्म्मानुतिष्ठ; स्वयमाचरन्नात्मदृष्टान्तेन जनान् ज्ञानकर्म्मभक्तिरतान् कुरु। श्रीमच्छङ्करकृतव्याख्याऽध्यायारम्भे उद्धृता। श्लोकोऽयं श्रीमद्रामानुजेनैवं व्याख्यातः;—"ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगादस्यैव कर्म्मयोगस्य ज्यायस्त्वं पूर्व्वमेवोक्तम्। अतो व्यपदेश्यः लोकसंग्रहाय त्वमेवं कुर्य्याः। प्रकृतिविविक्तात्मस्वभावनिरूपणेन गुणेषु कर्त्तृत्वमारोप्य कर्म्मानुष्ठानप्रकार उक्तः। गुणेषु कर्त्तृत्वानुसन्धानञ्चेदमेव;—आत्मनो न स्वरूपप्रयुक्तमिदं कर्त्तृत्वम्, अपि तु गुणसम्बन्धकृतमिति। प्राप्ताप्राप्तविवेकेन गुणकृतमित्यनुसन्धानम्। इदानीमात्मनां परमपुरुषशरीरतया तन्नियम्यत्वस्वरूपनिरूपणेन भगवति पुरुषोत्तमे सर्व्वात्मभूते गुणकृतञ्च कर्त्तृत्वमारोप्य कर्म्मकर्त्तव्यतोच्यते मयीति। मयि सर्व्वेश्वरे सर्व्वभूतान्तरात्मभूते सर्व्वाणि कर्म्माणि अध्यात्मचेतसा सन्न्यस्य निराशीर्निर्म्ममो विगतज्वरो युद्धादिकं सर्व्वमेवेदानीं कर्म्म कुरुष्व। आत्मनि यच्चेतस्तदध्यात्मचेतः; तेन आत्मस्वरूपविषयेण श्रुतिशतसिद्धेन ज्ञानेनेत्यर्थः। 'अन्तःप्रविष्टः शास्ता जनानां सर्व्वात्मा,' 'अन्तःप्रविष्टं कर्त्तारमेतम्,' 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो, यमात्मा न वेद, यस्यात्मा शरीरं, य आत्मानमन्तरो यमयति, स त आत्मान्तर्याम्यमृतः' इत्येवमाद्याः श्रुतयः, परमपुरुषप्रवर्त्त्यैतच्छरीरभूतमेनमात्मानं परमपुरुषञ्च प्रवर्त्तयितारमाचक्षते। स्मृतयश्च 'प्रशासितारं सर्व्वेषाम्' इत्याद्याः। 'सर्व्वस्य चाहं हृदि सन्निविष्टः', 'ईश्वरः सर्व्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति।

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥३१॥

भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥' इति च वक्ष्यति । अतो मच्छरीरतया मदात्मकस्त्वं स्वरूपानुसन्धानेन सर्वाणि कर्माणि मय्येव क्रियमाणानीति मयि परमपुरुषे संन्यस्य, तानि च केवलं मदाराधनानीति कृत्वा तत्फले निराशीः, तत एव कर्मणि ममतारहितो भूत्वा विगतज्वरो युद्धादिकं कुरुष्व । स्वकीयेनात्मना कर्त्रा स्वकीयैरेव करणैः स्वाराधनैकप्रयोजनाय परमपुरुषः सर्वेश्वरः सर्वशेषी स्वयमेव स्वकर्माणि कारयतीत्यनुसन्धाय कर्मसु ममतारहितः, प्राचीनेनानादिकालप्रवृत्तानन्तपापसञ्चयेन कथमहं भविष्यामीत्येवंभूतात्सर्वज्वरविनिर्मुक्तः परमपुरुष एव कर्मभिराराधितो बन्धान्मोचयतीति सुख-सुखो कर्मयोगमेव कुरुष्वेत्यर्थः ।" इति । एवमवस्थामनुख्यं भगवदनुभवश्च मतो नित्यमिति वैष्णवशास्त्रमीमांसात्मना श्रीमता जीवेनैवमुक्तं भक्तिसन्दर्भे,—"तत्र च ते जीवा ये केचिच्छ्रीमत्तदर्थानुभवसंसारम्भा, ये च तदैव वा लब्धमहत्कृपातिशयदृष्टिप्रभृतयस्तेषां तादृशानन्तत्वलक्षणमिहवस्तुपदेशश्रवणारम्भमात्रेणैव तत्कालमेव युगपदेव तत्सामर्थ्यं तदनुभवोऽपि जायते । यथोक्तम्, 'किं वा परैरीश्वरः, सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्' इति । ततस्तेषां नोपदेशान्तरापेक्षा । यादृच्छिकमुपदेशान्तरश्रवणन्तु तल्लीलादृश्रवणवत् तदीयरसस्यैवोद्दीपकम् । यथा श्रीप्रह्लादादीनाम् ।" इति । ३० ।

एवं ज्ञानकर्मभक्तिसमन्वायकं मतं मोक्षसाधकं ज्ञानभक्तियुक्ततया मैवमनुष्ठानमित्युपदिशति ये मे इति । श्रद्धावन्तः श्रद्दधानाः दृढविश्वासाः, अनसूयन्तः—गुणेषु दोषाविष्करणमसूया तच्छून्याः,—दुःखात्मके कर्मणि मां नियोजयसीति परमकारुणिके दोषारोपणं तद्विरहिताः, मानवाः, इदं मम मतं, नित्यमनुतिष्ठन्ति अनुवर्त्तन्ते, तेऽपि,—

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्व्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥३२॥
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३३॥

किमु वक्तव्यं यथमोपदिष्टस्त्वं मोक्ष्यस इति,—कर्म्मभिर्मुच्यन्ते कर्म्मबन्ध-नान्मुक्ता भवन्ति । ३१ ।

विपक्षे दोषमाह ये त्विति । ये तु अभ्यसूयन्तः निन्दन्तः दोष-माविष्कुर्वन्तः एतत् मे मतं नानुतिष्ठन्ति नाचरन्ति, तान् सर्व्वेषु ज्ञानेषु विमूढान् अचेतसोऽविवेकिनो दुष्टचित्तान् नष्टान् पुरुषार्थभ्रष्टान् विद्धि जानीहि । ३२ ।

कथं न ते मतमिदमनुतिष्ठन्ति तत्कारणमाह सदृशमिति । ज्ञान-वानपि स्वस्याः प्रकृतेः स्वभावस्य सदृशं चेष्टते । भूतानि स्वां स्वां प्रकृतिं यान्ति अनुवर्त्तन्ते । निग्रहः एवं मा कार्षीरिति शासनं किं करिष्यति । न कोऽपि शासनं स्वीकरिष्यति वा फलोदयः, यतोऽर्जुनं संग्रामविमुखं स्वयमाचार्य्योऽवोचत्, “यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे । मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ स्वभावजेन कौन्तेय निबद्धः स्वेन कर्म्मणा । कर्त्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥” (१८।५९।६०) इति । अतएवानन्तरमेव वक्ष्यति “श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् । स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ॥” (३।३५) इति । कथमाचार्य्योक्तं 'न बुद्धि-भेदं जनयेत्' (३।२६), 'सक्तान् कृत्स्नविन्न विचालयेत्' (३।२९) इति, तत्कारणमत्र द्रष्टव्यम् । सर्व्वे जनाः स्वस्वप्रकृतिमेवानुवर्त्तन्ते, सहसा प्रकृतिजकर्म्मतो विचालनं तेषां विभ्रंशाय भवति, नोत्कर्षाय । अतो ज्ञानवान् तेषां स्वभावजानि कर्म्माणि “यतः प्रवृत्तिर्भूतानां येन सर्व्व-मिदं ततम् । स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥” (१८। ४६) इत्युक्तया दिशा भगवदर्च्चनारूपेण योजयन् तान् स्वकर्म्मणा

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥३४॥

सिद्धिं प्रापयति । ये जन्मत एव निस्पृहाः, किन्ते न प्रारब्धतो नैष्कर्म्यविषये शक्ताः ? तेषामपि तत्स्वभावजानि ध्यानशीलतादीनि सन्ति । तैर्ध्यानादिकर्मभिस्तेषामाचार्य्यमतानुसरणं श्रेयः, अन्यथानिष्टापातोऽनिवार्य्य एव । ३३ ।

यदि ज्ञानिनोऽज्ञानिनो वा सर्व्वे जनाः प्रकृतेरधीना विधिनिषेधानुसरणाशक्ताः किं फलं तदा शास्त्रोपदेशेनेति संशयं समुत्थाप्य तदुत्तरमाह इन्द्रियस्येति । इन्द्रियस्येन्द्रियस्येति वीप्सया सर्व्वेषामिन्द्रियाणामित्युक्तम् । सर्व्वेषामिन्द्रियाणां विषये, ज्ञानेन्द्रियाणां श्रोत्रादीनां शब्दे स्पर्शे रूपे रसे गन्धे च, कर्म्मेन्द्रियाणां वागादीनां वचनादौ, रागद्वेषौ आनुकूल्यप्रातिकूल्ये व्यवस्थितौ व्यवस्थया स्वस्वस्वभावविहित-नियमेन स्थितौ । यस्य जनस्य यादृशी प्रकृतिः, तत्प्रकृतिगतनियमेन विषयेषु रागो द्वेषो वा प्रतिनियतं परिलक्ष्यते । तयोः रागद्वेषयोः वशं न आगच्छेत्, ताभ्यामन्धभावेन परिचालितो न भवेत्, किन्तु विवेकानुगतावेव तौ कुर्व्वीत । कथमेवं कुर्य्यात् ? तौ रागद्वेषौ हि अस्य मुमुक्षोः परिपन्थिनौ श्रेयोमार्गस्य विघ्नकर्त्तारौ । यद्येवं कथं सिध्यति वक्ष्यमाणं "स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः" इति । कोऽयं स्वधर्म्मः ? स्वभावनियतो धर्म्मः । "स्वभावनियतं कर्म्म" (१८।४७), "सहजं कर्म्म कौन्तेय" (१८।४८), "स्वभावजेन कौन्तेय" (१८।६०) इत्यादिभिः सुव्यक्ततरोऽयम् । यदि स्वभावविहितधर्म्मानुसरणमेवाचार्य्यस्याभिप्रेतं, तत्कथं तदनुगतरागद्वेषनियमने पुनर्निर्बन्धः ? शृणु तावत् तत्त्वमस्य । सत्त्वरजस्तमोविमिश्र एव स्वभावः ; अतस्तस्मिन् तमोगुणसम्भूतः जड़स्वभावः, रजस्तमोविमिश्रः पशुस्वभावः, रजोगुणोद्भूतो मानवस्वभावः, सत्त्वगुणसम्भूतो दैवस्वभावो विद्यत एव । एवं स्वभावसाहचर्य्यस्यावश्यम्भावित्वादन्तर्निहितनिगूढ़दैवस्वभावेन विवे-

किन्तु जड़स्वभावस्य पशुस्वभावस्य मानवस्वभावस्य च नियमनं मोक्षाय इति पश्यन् तत्तत्स्वभावविहितकर्मद्वारा स्वयं परिचालितानीन्द्रियाणि यथा न तदधीनतां गच्छन्ति तदर्थं यज्ञनियोगायाचार्य्य उपदिशति— "तयोर्न वशमागच्छेत्" इति। "अन्यथा प्रतिपन्नास्ते विरुद्धा ये च कर्म्मणः" (२३पृष्ठे) इत्यादिभिः मद्भिरवचनमिदं स्फुटीकृतं तेन। एवं विशोधिते स्वभावे सत्त्वगुणोद्रेकः, तेन च स्वकर्म्मणा भगवदाराधनं सिध्यति। "सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्। सर्व्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥" (१८।४८) इत्यत्रेन्धनस्थानीयः जड़स्वभावः, धूमस्थानीयः पशुमानवस्वभावः, अग्निस्थानीयः देवस्वभावः। देवस्वभावेन रजस्तमोऽनभिभूतेन सत्त्वेन विशुद्धसत्त्वत्वमुपनिहतं; तस्मिन् पुनः परमपुरुषोऽपरोक्षज्ञानविषयो भवति। तद्यथा भागवते "पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः। तमसस्तु रजस्तस्मात् सत्त्वं यद्ब्रह्मदर्शनम्॥" (१स्क, २अ, २४श्लो), "सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः" (४स्क, ३अ, २३श्लो) इति। सत् ब्रह्म तद्भावः सत्त्वम्, ततस्तस्मिन् ब्रह्मप्रकाशः। अतएव हि पूर्व्वमुक्तम्, "नित्यसत्त्वस्थः" (२।४५) इति। विना भजनक्रियां रजस्तमोऽभिभवो न सम्भवति, अतः "यतः प्रवृत्तिर्भूतानाम्" (१८।४६) इत्युक्तरीत्या अध्यात्मचेतसा भगवदर्च्चनमत्र शास्त्रे विहितम्। भागवते तु श्रवणम्, तेन च रजसा तमसाऽनाविद्धत्वं चेतसः। तद्यथा "शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्त्तनः। हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत् सताम्॥ नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया। भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी॥ तदा रजस्तमोभावाः कामलोभादयश्च ये। चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति॥" (१स्क, २अ, १७—१९श्लो) इति। सर्व्वथाचार्य्यसम्मतपथमाश्रित्य ज्ञानवतः साधनमेवं भवति;—सदोषमपि स्वभावं न त्यजेदिति शासनमनुसृत्य प्रथमस्तावत् तमःस्वभावं जड़त्वं जड़भरतदृष्टान्तेन भोग्यविषये नियोजयन् तस्मिन्नुदासीनः सोऽवतिष्ठेत, ततो रजःस्वभावं महोत्साहं विश्वामित्रदृष्टा-

श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ॥३५॥

अर्ज्जुन उवाच—

अथ केन प्रयुक्तोऽयं पापश्चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३६॥

तेनात्मतत्त्वलाभविषये नियोजयन् ...प्रसत्वं लभेत, ततः स्थित-प्रज्ञया सिद्धासिद्धोः समत्वमाश्रित्य सत्त्वस्वभावं विवेकज्ञानं वशिष्ठ-दृष्टान्तेनापरोक्षब्रह्मदर्शनविषये नियोजयन् तस्मिन् कृतकृत्यो भगवत्-प्रेरणोपजीव्यो नैष्कर्म्यसिद्धिं भगवत्सर्व्वस्वां विन्देत । ज्ञानवन्तः स्वयमेवं साधनमवलम्ब्य स्वदृष्टान्तेनेतरजनान् सुकर्म्मणि तथा नियोजयेयुः, यथा ते तेषां प्रकृत्यनुसारतः तमोरजोऽभिभूय सत्त्वे स्थितिं लभेरन् । अस्या-मवस्थायां "सर्व्वं जिह्मं मृत्युपदमार्ज्जवं ब्रह्मणः पदम् । एतावान् ज्ञानविषयः प्रलापः किं करिष्यति ॥" (अ, प, ११अ, ४श्लो) इत्याचा-र्य्योक्तिः साधकस्य जीवने प्रस्फुरति । ३४ ।

एवं रागद्वेषौ स्ववशे समानीय किं कर्त्तव्यं तदाह श्रेयानिति । स्वधर्म्मः स्वभावविहितधर्म्मः विगुणः सदोषो रजस्तमोऽनुविद्धः स्वनुष्ठि-तात् प्रकृष्टभावेनानुष्ठितात् परधर्म्मात् परस्वभावनियतधर्म्मात् श्रेयान् ; परधर्म्माचरणे "प्रकृतिस्त्वां नियोक्ष्यति" (१८।५९) इति न्यायाद्भ्रंश-स्यावश्यम्भावित्वात् । स्वधर्म्मे निधनं प्राणात्ययोऽपि श्रेयः धर्म्मार्थं प्राणात्ययस्य निःश्रेयससाधकत्वात् । परधर्म्मोऽन्ते विभ्रंशकत्वात् भया-वहः भयहेतुः, स्वभावानुगतबुद्ध्यधिष्ठितेश्वरेऽनभिनिवेशवशात् । कथम् ? "भयं द्वितीयाभिनिवेशतः स्यात्" (भा, ११स्क, २अ, ३७श्लो) इति हेतोः । तत्त्वमुक्तमग्रे । ३५ ।

यद्यपि "ध्यायतो विषयान् पुंसः" (२।६२) इत्यत्र भावतः पापा-चरणस्य हेतुरुक्तः, तदतिक्रमणाय च "रागद्वेषविमुक्तैः" (२।६४) इत्या-दिभिः "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" इत्यस्य मूलं तत्रैव

श्रीभगवानुवाच—

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥३७॥

विन्यस्तम्, तथाप्येतदध्यायोचितविषये तस्योपयोगितावशात् पुनरुक्तः स एवार्थ आचार्य्येण ; सुतरामर्ज्जुनोऽपि पूर्व्वप्रश्नस्य स्फुटतरभाषया नूतनविनियोगं बुभुत्सुः पृच्छति अथ केनेति । अथ, हे वार्ष्णेय, अनिच्छन्नपि बलान्नियोजित इव केन प्रयुक्तः अयं पुरुषः पापं चरति ? ३६ ।

प्रश्नोत्तरमाहाचार्य्यः काम इति । रजोगुणसमुद्भवः दुःखप्रवृत्ति-बलात्मको रजोगुण एव समुद्भवः प्रभवः कारणं यस्य स रजोगुणसमुद्भवः एष कामः विषयेष्वभिलाषः, एषः क्रोधः परप्रतिहतकामजनितहृदय-ज्वालः महाशनः महदशनमस्येति विषयसेवानुपरतः दुष्पूरः महापाप्मा महान् पाप्मा पापं यस्माद्भवति स महापाप्मा । क्रोधस्य प्रतिहतकामो-त्पन्नत्वात् कामादभिन्नः, अत उभयोरेकत्वमाश्रित्याह, एनं कामं वैरिणं शत्रुं विद्धि जानीहि । कामोऽयमात्मनोऽभिव्यक्तेरभिव्यक्तः, तद्यथा "आत्मैवेदमग्र आसीदेक एव, सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म्म कुर्व्वीयेत्येतावान् वै कामः नेच्छंश्च नातो भूयो विन्देत् ।" (बृ, आ, उ, १।४।१७) इति । गुणसङ्गादेते यदा नात्मनोऽभिव्यक्तिस्तदा क्रियात्मकरजोगुणोद्भवोऽयं काम इति न काचित् क्षतिर्यदि नात्मा प्रयोजनमतिक्रम्येच्छेत् । अत आह श्रुतिरात्मनः मुख्यावस्थायाम् "एतावान् वै कामः नेच्छंश्चे"ति । "नातो भूयो विन्देत्" इति वचनन्तु जायापुत्रवित्तकर्म्मातिरिक्तं न किञ्चन कामस्य विषय इति सूचनाय, दुष्पूरत्वमस्यैतान्यधिकृत्यैव । "न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभि-वर्द्धते ॥" (मनु, २अ, ८४श्लो) इति न्यायात् भोगेनास्य वृद्धिः । वृद्धि-रियं पुनरसुखावस्थेत्याह सुश्रुतमाचार्य्यः—"शरीरे जायते व्याधिः शरीरः

स विपद्यते। मानसो जायते व्याधिर्मानसन्तु विपद्यते॥ शीतोष्णे चैव वायुश्च गुणा राजन् शरीरजाः। तेषां गुणानां साम्यञ्च तदाहुः स्वस्थलक्षणम्॥ उष्णेन बाध्यते शीतं शीतेनोष्णञ्च बाध्यते। सत्त्वं रजस्तमश्चेति त्रय आत्मगुणाः स्मृताः॥ तेषां गुणानां साम्यञ्चेत्तदाहुः स्वस्थलक्षणम्। तेषामन्यतमोत्सेके विधानमुपादिश्यते॥ हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते। कश्चिद्दुःखे वर्त्तमानः सुखस्य स्मर्त्तुमिच्छति। कश्चित्सुखे वर्त्तमानो दुःखस्य स्मर्त्तुमिच्छति॥ स त्वं न दुःखी दुःखस्य न सुखी सुखस्य च। स्मर्त्तुमिच्छसि कौन्तेय किमन्यद्दुःखविभ्रमात्॥" (अ, प, १२अ, २—७श्लो) इति। अतः स्मरणमेव काममूलमिति तत्त्वम्; तेन च तस्य वृद्धिः। कामस्य स्वाभाविकत्वाद्दुष्परिहार्य्यत्वादिन्द्रियसंयमेन तं वशीकृत्य स्वविषये तस्य नियोग एव श्रेयानित्याह स स्वयं युधिष्ठिरम्—"तस्मात् त्वमपि तं कामं यज्ञैर्विविधदक्षिणैः। धर्म्मं कुरु महाराज तत्र ते स भविष्यति॥" (अ, प, १३अ, २०श्लो) इति। दुष्परिहरत्वमस्य प्रदर्शनाय स कामगीताख्यगाथामभाषत। तद्यथा—"नाहं शक्योऽनुपायेन हन्तुं भूतेन केनचित्॥ यो मां प्रयतते हन्तुं ज्ञात्वा प्रहरणे बलम्। तस्य तस्मिन् प्रहरणे पुनः प्रादुर्भवाम्यहम्॥ यो मां प्रयतते हन्तुं यज्ञैर्विविधदक्षिणैः। जङ्गमेष्विव धर्म्मात्मा पुनः प्रादुर्भवाम्यहम्॥ यो मां प्रयतते हन्तुं वेदवेदाङ्गसाधनैः। स्थावरेष्विव धर्म्मात्मा तस्य प्रादुर्भवाम्यहम्॥ यो मां प्रयतते हन्तुं धृत्या सत्यपराक्रमः। भावो भवामि तस्याहं स च मां नावबुध्यते॥ यो मां प्रयतते हन्तुं तपसा शंसितव्रतः। ततस्तपसि तस्याथ पुनः प्रादुर्भवाम्यहम्॥ यो मां प्रयतते हन्तुं मोक्षमास्थाय पण्डितः। तस्य मोक्षरतिस्थस्य नृत्यामि च हसामि च। अवध्यः सर्व्वभूतानामहमेकः सनातनः॥" (अ, प, १३अ, १३—१८श्लो) इति। तत्कथं वध्यत आचार्य्येण "प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्" (३।४१) इति। कामत्याग एव तस्य हननं, यथा तत्रैव,—"कामात्मानं न प्रशंसन्ति लोके नेहाकामा काचिदस्ति

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥३८॥

प्रवृत्तिः। सर्व्वे कामा मनसोऽप्यङ्गभूता यान् पण्डितः संहरते विचिन्त्य॥ भूयो भूयो जन्मनोऽभ्यासयोगात् योगी योगं सारमार्गं विचिन्त्य। दानञ्च वेदाध्ययनं तपश्च काम्यानि कर्म्माणि च वैदिकानि॥ व्रतान् यज्ञान् नियमान् ध्यानयोगान् कामेन यो नारभते विदित्वा। यद्यच्चायं कामयते स धर्म्मो न यो धर्म्मो नियमस्तस्य मूलम्।" (भ, प, १३भ, ८—११श्लो) इति। कोऽयं नियमः? अहङ्कृतिं परित्यज्य भगवति सर्व्वेषां कामविषयाणां समर्पणं, येन च तस्माद्विमुक्तिः। अतएवाहाचार्य्यः, "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥" (९।२७) इति। तथाच भागवते "कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्। करोति यद्यत् सकलं परस्मै नारायणायेति समर्पयेत् तत्॥" (११स्क, २अ, ३६श्लो) इति। "द्व्यक्षरस्तु भवेत् मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम्। ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम्॥" (अ, प, १३अ, ३श्लो) इत्युक्तिराचार्य्यस्य सिद्धा भवत्यहङ्कृतिपरित्यागात्। ३७।

कथं स कामो वैरीति दृष्टान्तैः प्रत्याययति धूमेनेति। यथा वह्निः धूमेन, यथा आदर्शः दर्पणः मलेन च, यथा उल्वेन गर्भः आवृतः, तथा तेन कामेन इदम्—अनन्तरश्लोकादनुकर्षणात्—ज्ञानम् आवृतम्। श्रीमन्मधुसूदनः श्लोकमिमं निपुणतयैव व्याचष्टे ;—"तस्य महापापत्वेन वैरित्वमेव दृष्टान्तैः स्पष्टयति धूमेनेति। तत्र शरीरारम्भात् प्राक् अन्तःकरणस्यालब्धवृत्तिकत्वात् सूक्ष्मः कामः शरीरारम्भकेण कर्म्मणा स्थूलशरीरावच्छिन्ने लब्धवृत्तिकेऽन्तःकरणे कृताभिव्यक्तिः सन् स्थूलो भवति। स एव विषयस्य चिन्त्यमानावस्थायां पुनरुद्रिच्यमानः स्थूलतरो भवति। स एव पुनर्विषयस्य भुज्यमानतावस्थायामत्यन्तोद्रेकं

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३९॥

प्राप्तः स्थूलतमो भवति। तत्र प्रथमावस्थायां दृष्टान्तः, यथा धूमेन सहजेनाप्रकाशकात्मकेन प्रकाशात्मको वह्निराव्रियते। द्वितीयावस्थायां दृष्टान्तः, यथादर्शो मलेनासहजेन आदर्शोत्पत्त्यनन्तरमुद्भूतेन—चकारोऽवान्तरवैधर्म्यसूचनार्थः, आव्रियते इति क्रियानुकर्षणार्थश्च। तृतीयावस्थायां दृष्टान्तः, यथा उल्बेन जरायुणा गर्भवेष्टनचर्म्मणा अतिस्थूलेन सर्व्वतो निरुध्यावृतो गर्भः, तथा प्रकारत्रयेणापि तेन कामेनेदमावृतम्। अत्र धूमेनावृतोऽपि वह्निर्दाहादिलक्षणः स्वकार्य्यं करोति, मलेनावृतस्त्वादर्शः प्रतिबिम्बग्रहणलक्षणं स्वकार्य्यं न करोति, स्वच्छताधर्म्ममात्रतिरोधानात् स्वरूपतस्तूपलभ्यत एव; उल्बेनावृतस्तु गर्भो न हस्तपदादिप्रसारणरूपं स्वकार्य्यं करोति, न वा स्वरूपत उपलभ्यत इति विशेषः।" इति। ३८।

उक्तमर्थं स्फुटयति आवृतमिति। एतेन कामरूपेण कामोऽभिलाष एव रूपमभिव्यक्तिरस्येति कामरूपस्तेन दुष्पूरेण दुःखेन पूरणमस्येति दुष्पूरस्तेन ज्ञानिनो नित्यवैरिणा—भोगकाले सुखकरत्वेऽपि मदात्ययाद्यप्रतिविधेयरोगोत्पादक आपाताह्लादजनकत्वेन प्रच्छन्नात्मस्वरूपः "ये गुणास्तु विषे प्रोक्तास्तेऽपि मद्ये व्यवस्थिताः" इति गरस्वभावो मद इवान्ते दुःखहेतुत्वात् ज्ञानी तं नित्यमेव वैरितया जानाति न त्वज्ञानी तस्योपस्थितसुखापहृतचित्तत्वात्—चिरशत्रुणा अनलेन नास्यालं पर्य्याप्तिर्द्दियत इत्यनलस्तेन शोकसन्तापहेतुत्वादग्नितुल्येन भूयो भूयो विषयसेवया वर्द्धमानेन ज्ञानम्—ज्ञानमात्मविषयमिति श्रीमद्रामानुजः, ज्ञानमन्तःकरणं विवेकविज्ञानं वेति श्रीमन्मधुसूदनः, ज्ञानमन्तःकरणसत्त्वमिति श्रीमन्नीलकण्ठः—आवृतम् सम्यक् छादितम्। ३९।

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥४०॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥४१॥

न हि कामं आश्रयं विना [illegible] समर्थः, आश्रयञ्च ज्ञात्वा तमात्मवशं कुर्व्वता स सहजेनैव जेतुं शक्य इति तस्याधिष्ठानं कथयत्याचार्य्य इन्द्रियाणीति। इन्द्रियादीनि चक्षुरादीनि, मनः सङ्कल्पात्मकम्, बुद्धिरध्यवसायात्मिका, अस्य कामस्य अधिष्ठानम् आश्रयः—विषयदर्शनश्रवणादिभिः सङ्कल्पेनाध्यवसायेन च कामस्याविर्भावात् तान्यस्यावस्थानम्। एतैरिन्द्रियादिभिर्ज्ञानमावृत्याच्छाद्य देहिनं शरीरिणम् एष कामः विमोहयति आत्मज्ञानविमुखं विषयप्रवणं करोति। ४०।

यत एवं तस्मादिति। हे भरतर्षभ, तस्मात्त्वमादौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनं ज्ञानं शास्त्राचार्य्योपदेशजनितं विज्ञानमपरोक्षं तयोः साक्षादनुभवश्च तयोर्ज्ञानविज्ञानयोर्नाशनं नाशकम् एनं पाप्मानं प्रजहि संहर परित्यजेति श्रीमच्छङ्करः, नाशयेति श्रीमद्रामानुजः, घातयेति श्रीमच्छ्रीधरः, परित्यज प्रकर्षेण मारयेति वा श्रीमन्मधुसूदनः। "सर्व्वे कामा मनसोऽप्यङ्गभूता यान् पण्डितः संहरते विचिन्त्य।" (अ, प, १२अ, ११श्लो) इत्याचार्य्योक्त्या संहरणमन्तर्द्धानसाधनमेव प्रजहीत्यस्यार्थः "यदा संहरते चायं कूर्म्मोऽङ्गानीव" (२।५८) इति श्रवणात्। नाशोऽप्यदर्शनमेव। कथं स्वाभाविकस्य कामस्यादर्शनं सम्भवति ? साधकस्याभिलापस्य तिरोधानात्, भगवदिच्छाया नियामकत्वात्। किमिन्द्रियसंयमेन तत्सिध्यति ? सिध्यति तत् नियम्यस्यात्मन इन्द्रियाधिष्ठितकामपरिहारेण स्वस्वरूपेऽवस्थानात्, स्वस्वरूपेऽवस्थानेन च नियन्तैक्यवशात् गूढभावेन तस्य तत्प्रेरणाधीनत्वात्। "इन्द्रियाणि मनो बुद्धिः" इत्युक्त्वा केवलमिन्द्रियाणि कथं वाल

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेर्यः परतस्तु सः ॥४२॥

विन्यस्तमाचार्य्येणेत्युपलक्ष्य श्रीमन्मधुसूदनेनोच्यते, "तेषु हि वशीकृतेषु मनोबुद्ध्योरपि वशीकरणं सिध्यति सङ्कल्पाध्यवसाययोर्बाह्येन्द्रियप्रवृत्तिद्वारैवानर्थहेतुत्वात्...... इन्द्रियत्वेन तयोरपि संग्रहो वा" इति। "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ। तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥" (३।३४) इत्यत्र कामक्रोधानुरूपौ रागद्वेषावन्तर्भावितमनोबुद्धिकाविन्द्रियनिष्ठाविव वर्णितौ, अत्रापि तद्वदिति तत्त्वम्। ४१।

यं ज्ञानस्वरूपमात्मानं काम आवृणोति तस्य सर्व्वेभ्यः परत्वं प्रदर्श्य तेन पुनः कामसंहरणं कर्त्तव्यमित्याह इन्द्रियाणीति। सूक्ष्मत्वादिन्द्रियाणि स्थूलदेहादिभ्यः पराणि प्रकृष्टानि श्रेष्ठानि, इन्द्रियेभ्यः मनस्तत्पूर्व्वमिन्द्रियाणां प्रवृत्तत्वात् परं प्रकृष्टं श्रेष्ठम्। मनसः सङ्कल्पात्मकात् अध्यवसायात्मिका बुद्धिः परा प्रकृष्टा श्रेष्ठा, सङ्कल्पात्मकमानसवृत्तेर्निश्चयात्मिकबुद्धिवृत्त्यैव प्रसरणात्; बुद्धेर्यस्तु परतः काम इति श्रीमद्रामानुजः, अन्ये आत्मा—'देहिनं विमोहयती'त्यतो देहिनमाकृष्य। अयमर्थः कठश्रुत्यनुगृहीतः, तद्यथा—"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः॥" (कठ, १।३।१०) इति। विवृणोतीमां श्रुतिमेवं श्रीमद्बलदेवः—"इन्द्रियेभ्योऽर्था विषयास्तदाकर्षित्वात् पराः प्रधानभूताः, विषयेन्द्रियव्यवहारस्य मनोमूलत्वादर्थेभ्यो मनः परम्; विषयभोगस्य निश्चयपूर्व्वकत्वात् संशयात्मकान्मनसो निश्चयात्मिका बुद्धिः परा; बुद्धेर्भोगोपकरणत्वात् तस्याः सकाशात् भोक्ता जीवः परः; स चात्मा महान् देहेन्द्रियान्तःकरणस्वामी" इति। महानत्र गुणसंसर्गी जीव एव, तस्य च प्रकृत्यधीनत्वात्, अतः कठश्रुतिराह "महतः परमव्यक्तमव्यक्तात् पुरुषः परः।" (१।३।११) इति। ४२।

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥४३॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा-
र्ज्जुनसंवादे कर्म्मयोगो नाम तृतीयोऽध्यायः ।

ततः किम्, एवमिति । एवं बु[illegible] परम् आ[illegible] [illegible]मिति
श्रीमद्रामानुजः बुद्ध्वा ज्ञात्वा आत्मना निश्चयात्मिकया बुद्ध्या [illegible]त्मानं
मनः संस्तभ्य स्थिरीकृत्य, हे महाबाहो, कामरूपं दुरासदं [illegible] शत्रुं
जहि संहर । ४३ ।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

श्रीभगवानुवाच—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥

द्वितीयेऽध्याये प्रक्रान्तस्य योगद्वयस्य "मयि सर्व्वाणि कर्म्माणि सन्न्यस्याध्यात्मचेतसा । निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः ॥" (३।३०) इत्यनेन तृतीये तस्यैकत्वं सम्पादितवान् । सम्प्रति किमयं ज्ञानकर्म्मभक्तिसमन्वितो योगो नित्यसिद्धः, अथवा स्वप्रतिभानकल्पितो मूलशून्य इति संशयं निरसितुमाहाचार्य्यः, इममिति । इमं पृथग्दृशां पृथक्त्वेन प्रतिभातम् अव्ययमविनाशिनं नित्यकालस्थायिनं योगत्रयैक्यं योगं पूर्व्वेषामप्यनादिकालसिद्धगुरुरहमन्तर्यामी विवस्वते सूर्य्याय सूर्य्यवंशप्रवर्त्तकाय, तद्यथा—"ब्रह्मणश्च दक्षिणाङ्गुष्ठजन्मा दक्षः प्रजापतिः दक्षस्याप्यदितिरदितेर्विवस्वान् विवस्वतो मनुर्मनोरिक्ष्वाकुनृगधृष्टशर्य्यातिनरिष्यन्तप्रांशुनाभागनेदिष्टकरूषपृषध्राख्याः पुत्रा बभूवुः ।" (वि, पु, ४अं, १अ, ५श्लो) इति—प्रोक्तवान् । स च तत्पुत्राय मनवे प्राह, मनुरिक्ष्वाकवेऽब्रवीत् । सर्व्वान्तर्यामी परमपुरुषः प्रथमं विवस्वते योगं प्रोक्तवानित्युक्तिः सवितुरन्तर्यामित्वेन तेन बुद्धिवृत्तेः प्रेरणं समीक्ष्य—"तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥" (ऋ, सं, ३म, ६२सू, १०ऋक्), तथाच स्मार्त्तधृतं योगियाज्ञवल्क्यवचनम्—"देवस्य सवितुर्वर्च्चो भर्गमन्तर्गतं विभुम् । ब्रह्मवादिन एवाहुर्वरेण्यं चास्य धीमहि ॥" अन्यच्च—"चिन्तयामो वयं भर्गं धियो यो नः प्रचोदयात् । धर्म्मार्थकाममोक्षेषु बुद्धिवृत्तीः पुनः पुनः ॥" इति । स एव योगो विवस्वत्पुत्रेण मनुना लब्धः, अयं सप्तमो मनुः । आदिमनुः स्वपितुः स्वयम्भोः यच्छास्त्रं लब्धवान्, तदेव परम्परया स्फीतं

कुर्व्वन्तोऽपरे मनवः प्रजाश्चासनायाश्चिसवन्तः । अतो वैवस्वतमनुप्रोक्त-शास्त्रस्य स्वातन्त्र्याभावात् ऋषिसम्प्रदायप्राप्तवर्त्तमानमनुसंहितायां किमस्ति निदर्शनमस्य योगस्येति जिज्ञासा ? अस्त्येव, तद्यथा—"प्रशासितारं सर्व्वेषामणीयांसमणोरपि । रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥" (मनु १२अ, १२२श्लो), "एवं यः सर्व्वभूतेषु पश्य-त्यात्मानमात्मना । स सर्व्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥" (मनु १२अ, १२५श्लो) । ननु मनुना सर्व्वकर्म्मत्यागः नोक्तः, न तु क्वापि शास्त्रे दृश्यते, यथाहि, "यथोक्तान्यपि कर्म्माणि परिहाय द्विजोत्तमः । आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥" (मनु १२अ, ९२श्लो) इति । कुतोऽत्र सर्व्वथा कर्म्मत्यागः ? तथा सति वेदाभ्यासो न स्यात् । पातञ्जलभाष्ये योगसिद्धः—"स्वाध्यायाद्योगमासीत योगात् स्वाध्याय-मामनेत् । स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥" इति । स्वाध्यायस्यावश्यकर्त्तव्यत्वेन निर्दिष्टत्वात्, तत्त्यागो न कुत्रापि विहितः । वेदविहितद्रव्यमययज्ञान् परित्यज्य चरमे वयसि ज्ञान-यज्ञपरो भवेदिति सन्न्यासधर्म्मेऽपि दृश्यते, तद्यथा "सन्न्यस्य सर्व्व-कर्म्माणि कर्म्मदोषानपानुदन् । नियतो वेदमभ्यस्य पुत्त्रैश्वर्य्ये सुखं वसेत् ॥" (मनु ६अ, ९५श्लो) इति । अस्ति नास्ति वा भक्ति-योगमूलं मनूक्तिषु ? अस्त्येव, यथा, "सर्व्वभूतेषु चात्मानं सर्व्व-भूतानि चात्मनि । समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥" (मनु १२अ, ९१श्लो) इत्येवमादासु । सत्त्वरजस्तमोगुणसंसर्गी जीवः, तैरेवोत्तममध्यमाधमगतिमत्त्वं तस्य, जगज्जीवयोः सत्यत्व-मिति च मनुनानुमोदितमेव । तृतीयाध्यायारम्भे प्रदर्शितोऽस्माभिः त्रयाणां योगानां समन्वयोऽस्मिन् शास्त्रे सर्व्वत्र । तमनादृत्यास्मिन् श्लोके श्रीमच्छङ्कर आह "योऽयं योगो भगवता दर्शितो ज्ञाननिष्ठालक्षणः स सन्न्यासः स कर्म्मयोगोपायः, यस्मिन् वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च, गीतासु च सर्व्वासु अयमेव योगो विवक्षितो भगवता" इति । श्रीमद्रामानुज आह, "ज्ञानयोगाधिकारिणोऽप्यकर्त्तृत्वानुस-

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥२॥
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥३॥

ज्ञानपूर्वकस्य [illegible] एवं [illegible]निति सहेतुकमुक्तं, विशिष्टतया व्यपदेश्यस्य तु विशेषतः कर्म्मयोग एव कार्य्य इति चोक्तम् । चतुर्थे त्विदानोमस्यैव कर्म्मयोगस्य निखिलजगदुद्धरणाय मन्वन्तरादावेवोपदिष्टतया कर्त्तव्यतां द्रढ़यित्वाऽन्तर्गतज्ञानतयास्यैव ज्ञानयोगाकारतां कर्म्मयोगस्य प्रदर्श्य कर्म्मयोगस्वरूपः, तद्भेदाः, कर्म्मयोगे ज्ञानांशस्यैव प्राधान्यं प्रोच्यते" इति । "पूर्व्वाध्यायाभ्यामुक्तं ज्ञानयोगं कर्म्मयोगञ्चैकफलत्वादेकीकृत्य तद्वंशं कीर्त्तयन् स्तौति" इति श्रीमद्बलदेवः । "अध्यायद्वयेनोक्तं निष्कामकर्म्मसाध्यं ज्ञानयोगं स्तौति" इति श्रीमद्विश्वनाथः । १ ।

"कर्म्मणाहुः सिद्धिमेके परत्र हित्वा कर्म्म विद्यया सिद्धिमेके" (उ, प, २८अ, १६श्लो), "आहारं केचिदिच्छन्ति केचिज्ज्ञानशने रताः । कर्म्म केचित्प्रशंसन्ति प्रशान्तिञ्चापरे जनाः ॥" (अ, गो, ४८अ, ७श्लो) इत्यादिभिर्ज्ञायते बहुविधबुद्धिभेदोऽजायताचार्य्यस्याभ्युदयकाल इति । अतः परम्परागतो योगोऽयं विलुप्तः । तस्य लुप्तयोगस्य पुनरुद्धरणाय तस्यावतरणम्, तदेवाह एवमिति । एवं परम्पराप्राप्तमिमं योगं राजर्षयः इक्ष्वाकोनिमिनाभागादिक्रमेण राजर्षयः ; राजानश्च ऋषयश्च इति द्वन्द्वे सनकवशिष्ठाद्या ऋषयश्च विदुः जानन्ति स्म, अविदुः ज्ञातवन्तो वा । हे परन्तप, कालेन महता दीर्घेण इह स योगः नष्टः विलुप्तः । २ ।

तमेव विलुप्तं योगं कथं मामद्य कथयसि नान्यं पुनर्मत्पूर्व्वमित्यर्ज्जुनस्याशयमधिगम्याह स एवेति । स एव पुरातनोऽयं योगः अद्य मया ते तुभ्यं प्रोक्तः । कथम् ? त्वं मम भक्तोऽसि सखा चेति हेतोः ।

अर्जुन उवाच—

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥

कथं त्वं नान्यं पूर्वमुक्तवानिदमुत्तमं रहस्यम्? असमन्वितैर्विविधैर्मतैः पूर्वसंस्कारैश्च तेषां बुद्धिभेद उपस्थितः; [illegible] योगं नैनं ते गृह्णीयुः, प्रत्युतोपहसेयुः, असम्भवोऽयमेकस्मिन् पुरुषे युगपत् ज्ञानकर्मभक्त्यनुष्ठानमिति विप्रवदन्तः। किमहं न बुद्धिभेदवान्? अन्यथा कथमुक्तं मया "व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे" (३।२) इति। त्वं सखा भक्तश्च—"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥" (श्वे, उ, ६।२३) इति न्यायात् सख्येन भक्त्या च श्रद्धानुरागविशोधितहृदये मम वाक्यानि स्थानं लप्स्यन्तेति त्वां कथयामि। ३।

"इमं विवस्वते योगं प्रोक्तवान्" इति श्रुत्वा पराचीनाय विवस्वतेऽर्वाचीनस्त्वं कथमिममुपदिदेशिथेति संशयमाश्रित्य अर्जुन आह अपरमिति। भवतो जन्म अपरमर्वाचीनं, विवस्वतो जन्म पराचीनम्; त्वमादौ प्रोक्तवानित्येतत् कथं विजानीयाम्? कथमर्ज्जुनः समशयिष्ट, यतः स पार्थवसमाचार्य्यमवोचत्,—"दशवर्षसहस्राणि यत्र सायंगृहो मुनिः। व्यचरस्त्वं पुरा कृष्ण पर्वते गन्धमादने॥ दशवर्षसहस्राणि दशवर्षशतानि च। पुष्करेष्ववसः कृष्ण त्वमपो भक्षयन् पुरा॥ ऊर्द्ध्वबाहुर्विशालायां बदर्यां मधुसूदन। अतिष्ठ एकपादेन वायुभक्षः शतं समाः॥ अवकृष्टोत्तरासङ्गः कृशो धमनिसन्ततः। आसीः कृष्ण सरस्वत्यां सत्रे द्वादशवार्षिके॥ प्रभासमप्यथासाद्य तीर्थं पुण्यजनोचितम्। तथा कृष्ण महातेजा दिव्यं वर्षसहस्रकम्॥ अतिष्ठस्त्वं यथैकेन पादेन नियमस्थितः। लोकप्रवृत्तिहेतुस्त्वमिति व्यासो ममाब्रवीत्॥ क्षेत्रज्ञः सर्व्वभूतानामादिरन्तश्च केशव। निधानं तपसां कृष्ण यज्ञस्त्वञ्च सनातनः॥" (व, प, १२अ, ११—१७श्लो) "स त्वं नारायणो भूत्वा हरि-

रामौ: परन्तप। ब्रह्मा सोमश्च सूर्य्यश्च धर्म्मो धाता यमोऽनलः॥ वायुर्वैश्रवणो रुद्रः कालः खं पृथिवी दिशः। अजश्चराचरगुरुः स्रष्टा त्वं पुरुषोत्तमः॥" (२०।२१श्लो) "युगादौ तव वार्ष्णेय नाभिपद्मादजायत। ब्रह्मा चराचरगुरुर्यस्येदं सकलं जगत्॥ तं हन्तुमुद्यतौ घोरौ दानवौ मधुकैटभौ। तयोर्व्यतिक्रमं दृष्ट्वा क्रुद्धस्य भवतो हरेः॥ ललाटाज्जातवान् शम्भुः शूलपाणिस्त्रिलोचनः। इत्थं तावपि देवेशौ त्वच्छरीरसमुद्भवौ॥" (३७—३९श्लो) इति। आचार्य्यश्च तदा तद्वाक्यानि श्रुत्वा एवं तमभ्यनन्दीत्;—"ममैव त्वं तवैवाहं ये मदीयास्तवैव ते। यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु॥ नरस्त्वमसि दुर्द्धर्ष हरिर्नारायणो ह्यहम्। काले लोकमिमं प्राप्तौ नरनारायणावृषी॥ अनन्यः पार्थ मत्तस्त्वं त्वत्तश्चाहं तथैव च। नावयोरन्तरं शक्यं वेदितुं भरतर्षभ॥" (व, प, १२अ, ४४—४६श्लो) इति। किमिदं न चित्रं यदीदृगलौकिकविश्वासः स्थिरसौहृद्यत्वेऽपि त्रयोदशवर्षान्ते सर्व्वथा विस्मृतिसागरे विलुप्तः। किमयमर्ज्जुनो निरतिशयविमूढ़चित्त आसीत्, तथा सत्यस्थाने स्थापितहृदय आचार्य्योऽपि मूढ़तां व्यनक्तीति सिद्धान्त आयाति। किमत्र तत्त्वम्? यदाचार्य्यमेवमर्ज्जुनः स्तुतवान् तदा तत्क्रोधप्रशान्त्यै तस्य जीवत्वं दृष्टेर्बहिर्विनिक्षिप्य तुरीये ब्रह्मणि तस्य यदैक्यमासीत् तदेव सन्निरूप्य तं तदेकत्वनिबन्धनमात्मस्वरूपं स्मारितवान्, तद्यथा—"संक्रुद्धं केशवं दृष्ट्वा पूर्व्वदेहेषु फाल्गुनः। कीर्त्तयामास कर्म्माणि सत्यकीर्त्तेर्महात्मनः॥ पुरुषस्याप्रमेयस्य सत्यस्यामिततेजसः। प्रजापतिपतेर्विष्णोर्लोकनाथस्य धीमतः॥" (व, प, १२अ, ८।१०श्लो) इति। यत्तु श्रीमद्रामानुजेनोक्तं, "जानात्येवायं भगवन्तं वसुदेवतनयं पार्थः; जानतोऽप्यजानत इव पृच्छतोऽयमाशयः। निखिलहेयप्रत्यनीककल्याणैकतानस्य सर्व्वेश्वरस्य सर्व्वज्ञस्य सत्यसङ्कल्पस्य चावाप्तसमस्तकामस्य कामकर्म्मपारवश्यादेव मनुष्यादिसजातीयं जन्म, किमिन्द्रजालमिव मिथ्या किं वा सत्यम्? सत्यत्वे च कथं जन्मप्रकारः? किमात्मकोऽयं देहः? कथ

श्रीभगवानुवाच—

बहूनि मे व्यतीतानि जन्मानि तव चार्ज्जुन ।
तान्यहं वेद सर्व्वाणि न त्वं वेत्थ परन्तप ॥५॥

जन्महेतुः ? कदा च जन्म ? किमर्थं वा जन्म इति परिहारप्रकारेण प्रकाशार्थो ज्ञायते ।" इति ; न तद्भवति । "अपरं भवतो जन्म परं जन्म विवस्वतः" इति संशयस्य मामांसायै कथमेतद्विजानीयां त्वमादौ प्रोक्तवान्" इति वचनन्तु "चतुर्थं ध्यानमार्गं त्वमालम्ब्य पुरुषर्षभ । अप्रक्रान्तः" (शा, प, ४६अ, २श्लो) इति विश्वासस्तदानीन्तस्मिन्नासीदिति दर्शयति । यत्तनोक्तं दशमे "परं ब्रह्म परं धाम पवित्रं परमं भवान्। पुरुषं शाश्वतं देवमादिदेवमजं विभुम् ॥ आहुस्त्वामृषयः सर्व्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयञ्चैव ब्रवीषि मे ॥" (१०।१३), तत्तु तस्याविर्भावस्वरूपत्वमनुभूयैव । यदि न तथा स्यादनन्तरमेव विश्वरूपदर्शनमर्ज्जुने न सम्भवेत् । श्रीमद्रामानुजेन यत् "कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः । कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् ॥" (स, प, ३८अ, २३श्लो) इति भीष्मवचनमुद्धृत्य "कृष्णस्य शेषभूतं कृत्स्नं जगत्" इत्युक्तं, तत्तु केवल्यार्थमाचार्य्ये कृत्स्नजगत्समावेश इति कारणस्यापर्य्यालोचनात एव । प्रतिभाति तत् शिशुपालवचने (६०पृ) । आचार्य्येऽर्ज्जुनस्य नियतं जीवबुद्धिरेवासीदाविर्भूतस्वरूपत्वज्ञानन्तु क्वचित् कदाचिदिति विश्वरूपदर्शनानन्तरं तस्येयं कातरोक्तिः स्फुटं प्रकटयति—"सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति । अजानता महिमानं तवेमं मया प्रमादात् प्रणयेन वापि ॥ यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु । एकोऽथवाप्यच्युत तत्समक्षम् तत् क्षामये त्वामहमप्रमेयम् ॥" (११।४१।४२) इति । ४ ।

तुरीयब्रह्मगोचरे स्थित आचार्य्यस्तेनाभेदमुपलभमान उवाच बहूनीति । हे परन्तप, अर्ज्जुन, मे मम तव च बहूनि जन्मानि व्यतीतानि

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥६॥

अतिक्रान्तानि, तानि सर्व्वाणि अहं वेद, त्वं न वेत्थ। आत्मनोऽन्तर्यामिणा परमगुरुणा त्वभेदं पश्यन्नधर्मनाशाय धर्मसंस्थापनाय यदा यदैव लोकातीतपुरुषे तस्याविर्भाव आसीत् स एकस्य तस्यैवेत्याह, "बहूनि मे व्यतीतानि जन्मानि" इति। यदैव परमगुरोराविर्भावस्तदैव तदुपदेशग्रहणोपयोगिनामपि। यदखण्डजीवस्वरूपं गुणकृतमालिन्यमपनुदति, भगवद्दाक्षोपजीव्यतामाविष्करोति, तत्तु तेषु यावल्लोकातीतपुरुषसंसर्गात् स्वरूपज्ञानं नोदेति तावत्प्रच्छन्नं तिष्ठति, तेन नित्ययोगश्च तैर्नानुभूयते, अर्ज्जुनेऽपि तत्तथैवासीत्; अत आह आचार्य्यः, "न त्वं वेत्थ" इति। ५।

न हि पुनः सर्व्वान्तर्यामिपरमपुरुषस्य जन्म सम्भवति; स हि सर्व्वान्तर्यामी सर्व्वातीतः; यस्मान्तः स यमर्यति सोऽपि तं न जानातीति तेन च तस्य भिदा न बुद्धिविषयतामेति। एवं सति बहूनि मेऽन्यैरुपलभ्यमानानि जन्मानि व्यतीतानीति कथं सिध्यति? तदेवाह, अजोऽपीति। अजोऽपि जन्मरहितोऽपि, अव्ययोऽपि अक्षीणज्ञानशक्तिस्वभावोऽपि,—जीवस्य ज्ञानशक्तिसम्पन्नस्य देहानुपवेशे तत्तद्देहगतक्षीणशक्तिक्षीणज्ञानानुसरणेन क्षीणज्ञानत्वं क्षीणशक्तित्वं भवति न तथा ममेति भावः,—भूतानां ब्रह्मादिस्तम्बपर्य्यन्तानाम् ईश्वरः ईशनशीलः नियन्तापि स्वां प्रकृतिं स्वं स्वभावं स्वं स्वरूपम् अधिष्ठाय तस्यां स्थित्वा न ततः प्रच्युत्य आत्ममायया अघटनघटनपटीयस्या आत्मज्ञानशक्त्या कस्मिंश्चित् लोकातीतपुरुषे आत्मज्ञानाविष्करणेन सम्भवामि प्रकटी भवामि। किमियं व्याख्या पूर्व्वव्याख्यातृभिरनुगृहीता, अथवा स्वकपोलकल्पितेति प्रदर्शनाय तेषां व्याख्यांशा अत्रोद्ध्रियन्ते। "भूतानां ब्रह्मादिस्तम्बपर्य्यन्तानाम् ईश्वर ईशनशीलोऽपि सन् प्रकृतिं मायां मम वैष्णवीं त्रिगुणात्मिकां यस्या वशे सर्व्वं जगत् वर्त्तते, यया मोहितः

सन् स्वमात्मानं वासुदेवं न जानाति, तां प्रकृतिं स्वामधिष्ठाय वशीकृत्य सम्भवामि देहवानिव भवामि" इति श्रीमच्छङ्करः। "स्वां प्रकृतिमधिष्ठायात्ममायया सम्भवामि, प्रकृतिः स्वभावः स्वमेव स्वभावमधिष्ठाय स्वेनैव रूपेण स्वेच्छया सम्भवामीत्यर्थः।.........आत्ममायया आत्मीयया मायया 'माया वयुनं ज्ञानम्' इति ज्ञानपर्य्यायोऽत्र मायाशब्दः। तथा चाभियुक्तप्रयोगः 'मायया सततं वेत्ति प्राचीनञ्च शुभाशुभम्' इति मायया आत्मीयेन ज्ञानेनात्मसङ्कल्पेनेत्यर्थः" इति श्रीमद्रामानुजः। "स्वमायया सम्भवामि सम्यगप्रच्युतज्ञानबलवीर्य्यादिशक्त्यैव भवामि, स्वां शुद्धसत्त्वात्मिकां प्रकृतिमधिष्ठाय स्वीकृत्य विशुद्धोर्ज्जितसत्त्वमूर्त्त्या स्वेच्छयावतरामीत्यर्थः" इति श्रीमच्छ्रीधरः। "अत्र स्वरूपस्वभावपर्य्यायः प्रकृतिशब्दः, स्वां प्रकृतिं स्वं स्वरूपमधिष्ठायावलम्ब्य सम्भवामि आविर्भवामि।.........अजत्वादिगुणकं यद्विभु ज्ञानसुखघनं रूपं तेनैवावतरामीति स्वरूपेणैव सम्भवामीत्यस्य विवरणम्, तादृशस्य सर्व्वरूपस्य रवेरिवाभिव्यक्तिमात्रमेव जन्मेति तत्स्वरूपस्य तज्जन्मनश्च लोकविलक्षणत्वम्" इति श्रीमद्बलदेवः। "जन्मविनाशरहितः सर्व्वभासकः सर्व्वकारणमायाधिष्ठानत्वेन सर्व्वभूतेश्वरोऽपि सन् अहं प्रकृतिं स्वभावं सच्चिदानन्दघनैकरसं—मायां व्यावर्त्तयति स्वामिति निजस्वरूपमित्यर्थः 'स भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नि' इति श्रुतेः, स्वस्वरूपमधिष्ठाय स्वरूपावस्थित एव सन् देहदेहिभावमन्तरेणैव देहिवद्व्यवहरामि। कथं तर्हि अदेहे सच्चिदानन्दघने देहत्वप्रतीतिः, अत आह आत्ममाययेति, निर्गुणे शुद्धे सच्चिदानन्दरसघने मयि भगवति वासुदेवे देहदेहिभावशून्ये तद्रूपेण प्रतीतिर्मायामात्रमित्यर्थः" इति श्रीमन्मधुसूदनः। "जीवात्मानो हि अनात्मभूतां प्रकृतिं तेजोऽवन्नात्मिकां पञ्चभूतात्मिकां वा अधिष्ठाय सम्भवन्ति जन्मादीन् लभन्ते, अहन्तु स्वां प्रत्यगनन्यां प्रकृतिं प्रत्यक्चैतन्यमेवेत्यर्थः तदेवाधिष्ठाय न तूपादानान्तरम्, आत्ममायया मायया भवामि, ...अहं कूटस्थश्चिन्मात्रोऽपाङ्गः स्वमायया चिन्मयमात्मनः शरीरं

यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहम् ॥७॥

सृजामि' इति श्रीमन्नीलकण्ठः। एतानि व्याख्यानानि पर्य्यालोच्यो-परिष्टाद्यद्व्याख्यातं तदविरुद्धं स्फुटं प्रतिभाति, 'लोकातीतपुरुषे आत्मज्ञानाविष्करणे...वर्ज्जं, तत्त्वन्यतः सिध्यति, तद्यथा रामायणे-ऽरण्यकाण्डे सप्तचत्वारिंशे सर्गे एकत्रिंशश्लोकव्याख्यायां श्रीमद्रामानुज-विरचितायाम्, "अवताराश्चेमे विराज एवांशाः, भागवते प्रथमे तृतीये-ऽध्याये—'जगृहे पौरुषं रूपं भगवान् महदादिभिः। सम्भूतं षोड़श-कलमादौ लोकसिसृक्षया ॥' इत्यादिना वैराजं रूपमुक्त्वा, 'एतन्नाना-वताराणां निधानं बीजमव्ययम्। यस्यांशांशेन सृज्यन्ते देवतिर्य्यङ्नरा-दयः ॥" इत्युक्तेः। एतदुक्तं वैराजं निधानं कार्य्यावसाने प्रवेशस्थानं बीजमुद्गमस्थानम्, अव्ययं स्वयं चिरस्थायि। न केवलमवताराणामेव बीजम्, किन्तु सर्व्वेषामित्याह, यस्येति। यद्यपि विराट् जीव एव, तथापि तदन्तर्य्यामिणस्तथैवोपासनयैवमुक्तम्।" इति। स्पष्टतरमुक्तं श्रीभागवते—"यथा ह्यवहितो वह्निर्दारुष्वेव स्वयोनिषु। नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रिया-त्मभिः। स्वनिर्म्मितेषु निर्व्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ॥ भावयत्येष सत्त्वेन लोकान् वै लोकभावनः। लीलावतारानुरतो देवतिर्य्यङ्नरा-दिषु ॥" (१स्क, २अ, ३२—३४श्लो) इति। ६।

न हि नित्यलीलावतोऽपि भगवतो निरूपितप्रकटकालो दृश्यते, कदा पुनस्तस्याविर्भावः प्रत्यक्षविषयोभवति, तदेवाह यदेति। हे भारत, यदा यदा हि धर्म्मस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य ग्लानिः हानिः, अधर्म्मस्य अभ्युत्थानमाधिक्यं भवति, तदात्मानमहं सृजामि प्रकटयामि। किमिदं जन्म सर्ज्जनादिकं वा? आह तत् श्रीमत्सनातनः—"जीववज्जन्माभावात् व्यक्तिरेव श्रीभगवतो जन्म उच्यते। तथाच श्रीमाध्वाचार्य्यधृततन्त्रभागवतवचनम्, 'अहेयमनुपादेयं यद्रूपं

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ८ ॥

नित्यमव्ययम् । स एवापित्स्वरूपस्य व्यक्तिमेव जनार्दनः ॥ स्वेच्छयात्
व्यक्तजन्मेति कृष्णरामादिकं तनुम् । पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया ॥'" इति । ७ ।

धर्मस्य ग्लानावधर्मस्याभ्युत्थाने किं वात्मनः प्रकटकारणं तदेवाह परित्राणायेति । साधूनां धर्मनिरतानां परित्राणाय साक्षात्सम्बन्धेन कृतार्थीकरणाय "मत्स्वरूपचेष्टितावलोकमालापादिदानेन तेषां परित्राणाये"ति श्रीमद्रामानुजः, दुष्कृतां धर्मविप्लवकारिणां विनाशाय "लालने ताडने मातुर्नाकारुण्यम्" इति न्यायात् दुष्कृतिच्छेदाय, धर्मसंस्थापनार्थाय मार्गोपदेशेन शिथिलमूलस्य धर्मस्य दृढीकरणाय युगे युगे प्रतियुगम् आविर्भाव-तिरोभाव-तिरोभावानन्तरपुनराविर्भावलक्षणोपलक्षितं सम्भवामि प्रकटो भवामि ।

भगवदवतरणस्य किं वा तत्त्वं तत्स्फुटीकरणमत्र प्रयोजनम् । प्रथमन्तावत् ऋक्संहितायां दृश्यते—"अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः ॥" (७म, ५५सू, १ऋक्) इति । व्याख्यास्याः सायनकृता यथा—"हे वास्तोष्पते गृहस्य पालक एतत्संज्ञक देव, अमीवहा अमीवानां रोगाणां नाशकः त्वं विश्वा विश्वानि बहूनि रूपाणि आविशन् प्रविशन्—'यद्यद्रूपं कामयन्ते तत्तद्देवा विशन्ति' (नि. १०।१८) इति यास्कः—नोऽस्माकं सखा मित्रभूतः सुशेवः सुष्ठु सुखकरः एधि भव" इति । "यद्यद्रूपं कामयन्ते तत्तद्देवा विशन्ति" इति वैदिकावतारवादः । अयं ह्यावेशावतारवाद इत्यर्थाज्ञः । अनवधानवशादेवमुक्तं तैः । दृश्यते हि विष्णुपुराणे—"पुरा हि त्रेतायां देवासुरमतीवभीषणं युद्धमासीत् । तत्र चातिबलिभिरसुरैरमराः पराजिता भगवन्तं विष्णुमाराधयाञ्चक्रुः । प्रसन्नश्च देवानामनादिनिधनः सकलजगत्परायणो नारायणः प्राह, ज्ञातमेव

यथा युष्माभिर्यदभिलषितम्, तदर्थमिमं श्रूयताम्। ८। परञ्जयो हि नाम शशादस्य च राजर्षेस्तनयः क्षत्रियवर्य्यः। तच्छरीरेऽहमंशेन स्वयमेवावतीर्य्य तानशेषानसुरान् निहनिष्यामि।………।९।" देवैरभ्यर्थितः, परञ्जयः प्राह, "सकलत्रैलोक्यनाथो योऽयं युष्माकमिन्द्रः शतक्रतुः अस्य यद्यहं स्कन्धमारूढो युष्मदरातिभिः सह योत्स्ये, तदाहं भवतां सहायः………।११। ततश्च शतक्रतोर्वृषभरूपधारिणः ककुत्स्थो हर्षसमन्वितः भगवतश्चराचरगुरोरच्युतस्य तेजसाप्यायितो देवासुरसंग्रामे समस्तानेवासुरान् निजघान।………।१२।" (४अं, २अ) इति। अत्र 'तच्छरीरेऽहमंशेन स्वयमवतीर्य्य' इत्युक्त्वा समरकाले स्वतेजसा परञ्जयस्याप्यायनं किं न वैदिकावतारवादमनुसरति? अन्यत्रापि तथैव, यथा "एवं संस्तूयमानस्तु भगवान् परमेश्वरः। उज्जहारात्मनः केशौ सितकृष्णौ महामुने॥ उवाच च सुरानेतौ मत्केशौ वसुधातले। अवतीर्य्य भुवो भारक्लेशहानिं करिष्यति॥" (वि, पु, ५अं, १अ, ५९।६०श्लो,) "वसुदेवस्य या पत्नी देवकी देवतोपमा। तस्यायमष्टमो गर्भो मत्केशो भविता सुराः॥" (६२श्लो) इति। श्रीकृष्णसन्दर्भोद्धृतनृसिंहपुराणवचने केशशब्दमपहाय यत् शक्तिशब्दः प्रयुक्तः, तद्यथा "वसुदेवाच्च देवक्यामवतीर्य्य यदोः कुले। सितकृष्णे च मच्छक्ती कंसादीन् घातयिष्यतः॥" इति। यच्च "अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्व्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तम॥" इति सहस्रनामोत्थापितभारतवचनं श्रीकृष्णसन्दर्भे धृतं, तत्तु केशवशब्दस्य रूपकत्वमेवांशतोऽपहरति; तत्तु वस्तुतोऽनन्तस्य ब्रह्मणो वेदस्य च समग्रप्रकाशस्यासम्भवादंशांशांशकलाकेशादिशब्दैराविर्भूतस्वरूपाणां तदुक्तानां वाक्यानाञ्चासमग्रत्वं व्यनक्ति सर्व्वत्र। वेदस्य चानन्त्यं यथा विष्णुपुराणे—"स भिद्यते वेदमयः स वेदं करोति भेदैर्बहुभिः सशाखम्। शाखाप्रणेता स समस्तशाखा ज्ञानस्वरूपो भगवाननन्तः॥" (३अं, ३अ, २०श्लो) इति। न तु वक्तव्यं मैतत् भागवतानुमोदितमिति। तत्र च, "भूमिः सुरेतरवरूथविमर्द्दितायाः क्लेशव्ययाय कलया

सितकृष्णकेशः । जातः करिष्यति जनानुपलक्ष्यमार्गः कर्म्माणि चात्म-महिमोपनिबन्धनानि ॥" (२स्क, ७अ, २६श्लो) इति । "भगवानपि विश्वात्मा भक्तानामभयङ्करः । आविवेशांशभागेन मन आनकदुन्दुभेः ॥ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः । दुरासदोऽतिदुर्द्धर्षो भूतानां सम्बभूव ह ॥ ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी । दधार सर्व्वात्मकमात्मभूतम् काष्ठा यथानन्दकरं मनस्तः ॥" (१०स्क, २अ, १६—१८श्लो) इति । परञ्चयशरीरे भगवच्छक्त्याविर्भावोऽत्र मनसेति विशेषः । 'अंशभागेन' इत्यत्र अंशभागेन सह, 'अच्युतांशम्' इत्यत्र अंश इव अंश इति व्याख्या न रुचिरा, "तस्यांशो वासुदेवेन कर्म्मणोऽन्ते विवेश ह" (स्व, प, ५अ, २३श्लो) इत्यत्र नारायणस्यांशोऽयं तस्मिन् विवेश इति स्फुटमुक्तत्वात् । भागवतेऽष्टमे स्कन्धे सप्तदशाध्याये वामनावतारकथायां तत्त्वमुक्तमसन्दिग्धवाक्येन, तद्यथा "त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः । स्वांशेन पुत्रत्वमुपेत्य ते सुतम् गोप्तास्मि मारीचतपस्यधिष्ठितः ॥ उपधाव पतिं भद्रे प्रजापतिमकल्मषम् । मां च भावयती पत्यावेवं रूपमवस्थितम् ॥" (१८।१९श्लो), "उपधावत्पतिं भक्त्या परया कृतकृत्यवत् । स वै समाधियोगेन कश्यपस्तदबुध्यत । प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः ॥ सोऽदित्यां वीर्य्यमाधत्त तपसा चिरसम्भृतम् । समाहितमना राजन् दारुण्यग्निं यथानिलः ॥" (२२।२३श्लो,) इत्यत्र भगवदाविर्भावोपयोगि शरीरं पितृतो मातृतस्तयोर्भगवत्परायणत्वेनोद्भूयत इति तत्त्वं स्पष्टतरमेव । "तदाविर्भावेषु भेदग्राही निन्द्यते," "देहदेहिभिदा नास्ति कदाचित्परमेश्वरे" इति वैष्णवमीमांसानुसरणेन तच्छरीरस्यापि भगवत्त्वनिर्द्देशो लोकातीतोपयोगितावशात् । "कृष्णस्तु भगवान् स्वयम्" (भा, १स्क, ३अ, २८श्लो) इति स्वयंशब्देनांशत्वमस्य न बाध्यते, तथैव सर्व्वत्र स्वयंशब्दस्य प्रयोगात् । श्रीमद्रामानुजस्त्वाह (रा, अ, का, ४७स, ३१श्लो, व्या), "विष्णुपुराणेऽप्येवं भागवते उक्तम् —'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इति । एते इत्यनेन

पूर्व्वोक्ता अवतारा ऋष्यादयश्च परामृश्यन्ते। पुंसः परमेश्वरस्य तत्रावतारा अंशा ऋष्यादयः कलाः। यद्यपि कृष्णोऽप्यंश एव। तत्रैव दशमे—'तत्रांशेनावतीर्णस्य विष्णोर्वीर्य्याणि शंस नः' इत्याद्युक्तेः। 'उज्जहारात्मनः केशौ सितकृष्णौ महामुने' इति विष्णुपुराणाद्युक्तेः। द्वितीये भागवतेऽप्येवमेव, भारतेऽप्येवमेव। एतेन 'तत्रांशेनावतीर्णस्य' इत्यादि दशमस्थश्लोकव्याख्यानमपास्तम्। तथापि तत्तत्कारणकृतनाम्नां तत्र लाभात् बहुशोऽमानकर्म्मनाटनाच्च शङ्खचक्रादीनां प्रत्यक्षतो दर्शनाच्च स्वयं भगवानित्युक्तिः।" इति। "अल्पशक्तेः प्रकाशादिभूतित्वम्, महाशक्तेस्त्वावेशत्वमिति भेदः। अवतारश्च प्राकृतवैभवेऽवतरणमिति ज्ञेयम्" इति श्रीकृष्णसन्दर्भः।

वामदेव्यसामोपासनोचितब्रह्मचर्य्यविरोधिकुत्सितव्रतप्रख्यापकानां पुराणानां कुत्सनादाचार्य्यस्य चरित्ररक्षणं श्रेयः, अन्यथा तस्याचार्य्यत्वं न सिध्यति। न भारते हरिवंशे विष्णुपुराणे भागवते वा तस्य चरित्रतः स्खलनं दृश्यते। भारते शिशुपालमुखे "गोघ्नः स्त्रीघ्नश्च सन् भीष्म कथं स स्तवमर्हति (स, प, ४१अ, १६श्लो) इत्यादि निन्दावचनं श्रूयते, न जातु चास्य व्यभिचरणमित्याश्चर्य्यम्। नैतदाश्चर्य्यम्, बाल्ये तस्मिंस्तादृशस्य पातकस्यासम्भवात्। रासमाश्रित्यैव तस्य चरित्रे दोषारोपः। "एकादश समास्तत्र गूढ़ार्च्चिः सबलोऽवसत्" (भा, ३स्क, २अ, २६श्लो) इति क्षत्रियाणामुपनयनकालात् प्रागेवास्य व्रजे वसतिर्न ततोऽर्व्वाक्। रासस्त्वासीदस्य वर्षे नवमे। किमयं नवमवर्षीयः शिशुस्तादृगनुचितव्यवहारमकार्षीत्? तथा सति "कैशोरकं मानयन् वै सह ताभिर्मुमोद ह" (ह, वं, ७६अ, १७श्लो) इत्युक्तिरसङ्गता स्यात्। किमयमेकाकी गोपकन्याभिः क्रीड़ति स्म, अथवा गोपबालकैः समवेतः? "कृष्णस्तु यौवनं दृष्ट्वा निशि चान्द्रमसो नवम्। शारदीश्च निशां रम्यां मनश्चक्रे रतिं प्रति॥ स करीषाङ्गरागासु व्रजरथ्यासु वीर्य्यवान्। वृषाणां जातदर्पाणां युद्धानि समयोजयत्॥ गोपालांश्च बलोदग्रान् योजयामास वीर्य्यवान्। वने स वीरो गाश्चैव जग्राह ग्राहवद्विभुः॥

युवतीर्गोपकन्याश्च रात्रौ सङ्काल्य कालवित्। कैशोरकं मानयन् वै सह ताभिर्मुमोद ह॥" (ह, वं, ७६अ, १५—१७श्लो) इति। यदा स कलपदेन गोपीरक्रासीत्, तदा रामस्तेनासीत् - "सह रामेण मधुरमतीव वनिताप्रियम्। जगौ कलपदं शौरिर्नानातन्त्रीकृतव्रतम्॥" (वि, पु, ५अं, १३अ, १६श्लो) इति। एकया गोप्या विजनभूमौ भ्रमणं तस्य न दृश्यते हरिवंशे। विष्णुपुराणे भागवते तदस्ति। तदपि प्रयाणकाले पथि तस्याः अन्दर्शनघटनादिति सम्भाव्यते। न विजनभूमौ पुष्पचयनादिव्यतिरिक्तोऽनुचितव्यवहारगन्धलेशोऽप्यासीत्। "क्रीडं बालकशून्यञ्च (ब्र, वै, पु, १५अ, १७१श्लो) इत्यादि हिहायने बाले कदर्य्यचर्य्यावर्णनं यद्वाजाड्यं विना न कोऽपि सत्यं मन्येत। "एवं शशाङ्कांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः। सिषेव आत्मन्यवरुद्धसौरतः सर्व्वाः शरत्काव्यकथारसाश्रयाः॥" (१०स्क, ३३अ, २६श्लो) इत्यनेन भगवतो निर्विकारत्वमेव निरुक्तः। स्वामिकृतव्याख्यानेऽपरितुष्यन् गोस्वामिपादः इममंशमेवं व्याचष्टे,—"आत्मन्यन्तर्मनसि अवरुद्धाः समन्ततः स्थापिताः सौरताः तासां सुरतसम्बन्धिनो हावभावादयो येन तादृशः" इति। प्रीतिसन्दर्भे—"आत्मनि चित्तेऽवरुद्धं समन्तात्स्थिरतया स्थापितं सौरतं सुरतसम्बन्धिहावभावादिकं येन तथाभूतः सन् शरत्सम्बन्धिन्यो यावत्यः काव्यकथाः सम्भवन्ति ताः सर्व्वा एव सिषेवे" इति। यद्येवम् "उत्तम्भयन् रतिपतिं रमयाञ्चकार" (भा, १०स्क, २९अ, ४१श्लो) इत्यस्य का गतिः स्यात्? व्याख्यातृविशेषमगतिः, सद्व्याख्ययापहर्त्तव्या। न ह्युत्पूर्वकस्तम्भातोरर्थः उद्दीपनमिति कुत्रापि दृश्यते, तथा सति "उद्दीपयन् रतिपतिं रमयाञ्चकार" इति प्रसिद्धार्थकशब्देनैव श्लोकरचनं स्यात्। अवरोध एवात्राभिहितः। अतस्तद्वाचकेनोत्तम्भनशब्देनायं ग्रथितः। अतएव प्रीतिसन्दर्भे "बाहुप्रसारेत्यादिकाभिव्यक्तभावत्वोदाहरणम्" इति। अत्र सहार्थतृतीयाग्रहणे हावभावाद्यवरोधोऽपि गम्यते। भवतु तत्तथैव, कथं स्वयं शुकेन परदाराभिमर्षणं रासे निर्द्दिश्यते? अस्त्येव तत्र

विशिष्टं कारणम्। न तस्मिन् समये परदारान् संस्पृश्य नृत्यं विहितमासीत्, तथा सति परदाराभिमर्षणं सङ्घटेत। दृश्यते नृत्यं स्वदारैर्यथा हरिवंशे,—"कादम्बरीपानमदोत्कटस्तु बलः पृथुश्रीः स चुकूर्द रामः। सहस्ततालं मधुरं समञ्च स भार्य्यया रेवतराजपुत्र्या॥ तं कूर्दमानं मधुसूदनश्च दृष्ट्वा महात्मा च मुदान्वितात्मा। चुकूर्द सत्यासहितो महात्मा बलस्य धीमान् हरिषागमार्थम्॥ समुद्रयात्रार्थमथागतश्च चुकूर्द पार्थो नरलोकवीरः। कृष्णेन सार्द्धं मुदितश्चुकूर्द सुभद्रया चैव वराङ्गयष्ट्या॥" (१४६अ, १६—१८श्लो) इति। कथं पुनः सा मर्य्यादोल्लङ्घिताचार्य्येण? गोपव्यवहारानुसरणादिति तत्खल्लव्यम्। गोपजातिमध्ये निवासकाले तेषामाचरणं सोऽस्खलितब्रह्मचर्य्येण स्वीकृतवानिति "वयं वनचरा गोपाः सदा गोधनजीविनः। गावोऽस्मद्दैवतं विद्धि गिरयश्च वनानि च॥" (ह, वं, ७२अ, २श्लो) इत्यादिषु ज्ञायते। तेषां यत्स्वाभाविकं कर्म्म दैवतत्वेन तदनुसरणं स तान् बालोऽप्युपदिदेश, स्वयञ्च तदनुचकार। ब्रह्मचर्य्यरक्षणोचितकाले स्वप्नेऽपि चित्तविकारो दोषाय तदानीं परिगणित आसीत्। दृश्यते चैवमुषावाक्ये, तद्यथा—"निशायां जाग्रतीवाहं नीता केन दशामिमाम्। कथमेवंकृता नाम कन्या जीवितुमुत्सहे॥ कुलोपक्रोशनकरी कुलाङ्गारी निराश्रया। जीवितं स्पृहयेन्नारी साध्वीनामग्रतः स्थिता॥" (ह, वं, १७४अ, ४१।४२श्लो) इति। दृश्यते च तत् कचदेवयानीसंवादे। ईदृशि ब्रह्मचर्य्यपक्षपातकाले यदि शुकेन परीक्षितेन च परस्त्रीभिर्नृत्यादिकं परदाराभिमर्षणत्वेन गृहीतं, न तत् महदाश्चर्य्यम्। आचार्य्यस्य सत्यनिष्ठत्वाद्यप्यसन्दिग्धम्। दौत्यकार्य्ये नियुक्तः स यदा दुर्य्योधनेनातिथ्यग्रहणायाभ्यर्थितः, स तमाह "कृतार्था भुञ्जते दूताः पूजां गृह्णन्ति चैव ह। कृतार्थं मां सहामात्यं समर्च्चिष्यसि भारत॥" (उ, प, ९०अ, १८श्लो) इति। एतां नीतिमनभिनन्द्य दुर्य्योधनो यदा तमातिथ्यग्रहणायानुरुद्धवान्, स तदा तमाह—"नाहं कामान्न संरम्भात् न द्वेषान्नार्थकारणात्। न हेतुवादाल्लोभाद्वा धर्म्मं जह्यां कथ-

ष्टन ॥ सर्व्वाणि भोज्यान्यन्नानि आपद्भोज्यानि वा पुनः। न च सम्प्रियसे राजन् न चैवापद्गता वयम् ॥ अकस्माद्द्वेक्षि वै राजन् जन्मप्रभृति पाण्डवान्। प्रियानुवर्त्तिनो भ्रातॄन् सर्व्वैः समुदितान् गुणैः ॥ अकस्माच्चैव पार्थानां द्वेषणं नोपपद्यते। धर्म्मे स्थिताः पाण्डवेयाः कस्तान् किं वक्तुमर्हति ॥ यस्तान् द्वेष्टि स मां द्वेष्टि यस्ताननु स मामनु। ऐकात्म्यं मां गतं विद्धि पाण्डवैर्धर्म्मचारिभिः ॥ कामक्रोधानुवर्त्ती हि यो मोहाद्विरुरुत्सति। गुणवन्तञ्च यो द्वेष्टि तमाहुः पुरुषाधमम् ॥ यः कल्याणगुणान् ज्ञातीन् मोहाल्लोभाद्दिदृक्षते। सोऽजितात्माजितक्रोधो न चिरं तिष्ठति श्रियम् ॥ अथ यो गुणसम्पन्नान् हृदयस्याप्रियानपि। प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति ॥ सर्व्वमेतन्न भोक्तव्यमन्नं दुष्टाभिसंहितम्। क्षत्तुरेकस्य भोक्तव्यमिति मे धीयते मतिः ॥" (उ, प, ९०अ, २४—३२श्लो) इति। सद्यःप्रसूतमचेतनं परीक्षितं चेतयता तेनोक्तं विलपन्तीमुत्तरां प्रति, "न ब्रवीम्युत्तरे मिथ्या सत्यमेतद्भविष्यति। एष सञ्जीवयाम्येनं पश्यतां सर्व्वदेहिनाम् ॥ नोक्तं पूर्व्वं मया मिथ्या स्वैरेष्वपि कदाचन। न च युद्धात्परावृत्तस्तथा सञ्जीवतामयम् ॥ यथा मे दयितो धर्म्मो ब्राह्मणश्च विशेषतः। अभिमन्योः सुतो जातो मृतो जीवत्वयं तथा ॥ यथाहं नाभिजानामि विजयेन कदाचन। विरोधं तेन सत्येन मृतो जीवत्वयं शिशुः ॥ यथा सत्यञ्च धर्म्मश्च मयि नित्यं प्रतिष्ठितौ। तथा मृतः शिशुरयं जीवतामभिमन्युजः ॥ यथा कंसश्च केशी च धर्म्मेण निहतौ मया। तेन सत्येन बालोऽद्य पुनः सञ्जीवतामयम् ॥" (अ, प, ६९अ, १८—२३श्लो) इत्यतः सत्यं धर्म्मस्तद्धिरैकात्म्यं तस्य बलमिति लक्ष्यते। 'स्वैरेषु मया मिथ्या नोक्तम्' इत्युक्तिर्दर्शयति मनुनाऽसत्यभाषणे यत्र स्वातन्त्र्यं विहितं तत्रापि तेन कदाप्यसत्यं नोक्तम्। युद्धकालेऽसत्यभाषणे तं प्ररोचयद्यो न तद्दूभूमावतिष्ठत्, अतएवाह स युधिष्ठिरं ज्ञातिवधशोकाकुलं परसमक्षे—"नैव ते निष्ठितं कर्म्म नैव ते शत्रवो जिताः। कथं शत्रुं शरीरस्थमात्मनो नावबुध्यसे ॥" (अ, प, ११अ,

५श्लो) इति। क्षात्रधर्म्मपक्षपातिन आचार्य्यस्य संग्रामे कौशलावलम्बनं यद्यप्यनेकेऽर्व्वाञ्चः नानुमोदयन्ति, तथापि तत्र तस्य क्षत्त्रत्वबुद्ध्याऽस्माभिः भ्रान्तिराश्रिता। किं कथयामो वयं तस्यानुकूल्ये यदा स स्नातकवेशेन जरासन्धदुर्गं प्राविशत्। अस्ति च तत्रानुकूल्योपायः। यदपि च स क्षात्राचितकौशलमाश्रितवान्, तथापीदृग्वेशेनात्मानं भीमार्ज्जुनौ च स प्रच्छादितवान् येन च क्षात्त्रत्वं सूच्यते न तु ब्राह्मणत्वम्। तेन च कारणेन जरासन्धस्तान् क्षत्रियानवधार्य्य यदा तमनेकानुचिताचरण-कारणमपृच्छत, तदाचार्य्योऽवोचत्—"स्नातकान् ब्राह्मणान् राजन् विद्ध्यस्मांस्त्वं नराधिप। स्नातकव्रतिनो राजन् ब्राह्मणाः क्षत्त्रिया विशः॥ विशेषा नियमाश्चैषामविशेषाश्च सन्त्युत। विशेषवांश्च सततं क्षत्त्रियः श्रियमृच्छति॥ पुष्पवत्सु ध्रुवा श्रीश्च पुष्पवन्तस्ततो वयम्। क्षत्त्रियो बाहुवीर्य्यस्तु न तथा वाक्यवीर्य्यवान्॥" (स, प, २१अ, ५०—५२श्लो)। "अद्वारेण रिपोर्गेहं द्वारेण सुहृदो गृहान्। प्रविशन्ति नरा धीरा द्वाराण्येतानि धर्म्मतः॥ कार्य्यवन्तो गृहानेत्य शत्रुतो नार्हणां वयम्। प्रतिगृह्णीम तद्विद्धि एतन्नः शाश्वतं व्रतम्॥" (५४।५५श्लो)। कथमनागसि तस्मिंस्तेषां शत्रुतेत्यस्योत्तरमाह "त्वया चोपहृता राजन् क्षत्त्रिया लोकवासिनः। तदागः क्रूरमुत्पाद्य मन्यसे किमनागसम्॥" (स, प, २२अ, ८श्लो) इति। "मनुष्याणां समालम्भो न च दृष्टः कदाचन। स कथं मानुषैर्द्देवं यष्टुमिच्छसि शङ्करम्॥ सवर्णो हि सवर्णानां पशुसंज्ञां करिष्यसि। कोऽन्य एवं यथा हि त्वं जरासन्ध वृथामतिः॥" (११।१२श्लो), इत्यनेन तत्समये नरमेधस्य सर्व्वथान्तर्द्धानं नासीदित्यनुमीयते। नरमेधे ब्राह्मणक्षत्त्रियवैश्य-शूद्रादिसर्व्वविधमानवमानवीनामशीत्यधिकशतसंख्यकानामालम्भाय ग्रहणं दृश्यते, किन्तु ब्रह्माण आरभ्य आ प्रतीक्षाया यं यं देवमुद्दिश्य तानालभेत, तेषु न रुद्रो वा शङ्करो वोपलभ्यतेऽत आहाचार्य्यः "यष्टुमिच्छसि शङ्कर"मिति। सत्यकथनेन कौशिकस्य नरकगमनं दृष्टान्तत्वेनोपस्थाप्य (क, प, ६९अ,) युधिष्ठिरवधोद्यतमर्ज्जुनमाचार्य्यः सत्या-

जन्म कर्म्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

दपि प्राणिप्राणात्ययवारणं धर्म्म इति यदबोधयत् तदर्व्वाग्भिरपि नीतिविद्भिरमीमांस्यधर्म्मविषयत्वेनोपस्थाप्यते, यद्यपि मौनावलम्बनेन स्वप्राणात्ययसम्भावनायां तेनापि सत्यरक्षणं वयमनुमोदयामः । आचार्य्यस्तु सर्व्वेषात्मजीवने सत्यमेवाश्रितवानिति कालप्रभावातिक्रम एव तस्मिन्नत्र । धर्म्मातिक्रमे यदाचार्य्यस्य क्रोधो दृश्यते तत्र निन्दनीयम्, सात्वतस्य क्रोधस्य नैव नियोगभूमिः स्वभावतः स जितक्रोध एवासीत्, अन्यथा दुर्व्वाससा सर्व्वेथा विविधानिचरणेन तस्य क्रोधोत्पादनेऽसमर्थेन नोच्येत "जितः क्रोधस्त्वया कृष्ण प्रकृत्यैव महाभुज ।" (अनु, प, १५९अ, ३१श्लो) इति । समरप्रधानसमयानुबन्धिमहदुदारपरत्वं यदपि न सोऽत्यजामत्, तथापि "आपूर्य्यमाणमचलप्रतिष्ठम्" (२।७०) इति स्थितप्रज्ञत्वं नित्यं तस्मिन् सन्निहितमेवासीत्, सुव्यक्तं प्रतिभाति तत् तस्य रुक्मिणीं प्रति वाक्येन । तद्यथा—"अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषाम् । आस्थिताः पदवीं सुभ्रूः प्रायः सीदन्ति योषितः ॥ निष्किञ्चना वयं शश्वन्निष्किञ्चनजनप्रियाः । तस्मात्प्रायेण न ह्याढ्या मां भजन्ति सुमध्यमे ॥" (भा, १०स्क, ६०अ, १३।१४श्लो) इति । साधूक्तं सूतेनाचार्य्यमुद्दिश्य "तमयं मन्यते लोको ह्यसङ्गमपि सङ्गिनम् । आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ॥ एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः । न युज्यते सदात्मस्थैर्य्यथा बुद्धिस्तदाश्रया ॥ तं मेनिरेऽबला मूढ़ाः स्त्रैणं चानुव्रतं रहः । अप्रमाणविदो भर्त्तुरीश्वरं मतयो यथा ॥" (भा, १स्क, ११अ, ३७—३९श्लो) इति । "वसन् विषयमध्येऽपि न वसत्येव बुद्धिमान्" इति (शा, प, २८८अ, ६श्लो) इत्युक्तः सत्यत्वं बुद्धियोगसम्पन्ने नित्यं व्यक्ततरम् । ८ ।

जन्मेति । एवं यो दिव्यम् अप्राकृतमैश्वरमलौकिकं जन्म कर्म्म च साधूनां परित्राणादि तत्त्वतः तत्त्वेन भ्रमनिवर्त्तनेन यथावत् वेत्ति,

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥

हे अर्ज्जुन, स देहं त्यक्त्वा पुनर्जन्म न एति न प्राप्नोति, माम् एति आगच्छति । "मूढैर्हि मनुषात्वभ्रान्त्या भगवतोऽपि गर्भवासादिरूपमिव जन्म स्वभोगार्थमेव कर्म्मारोपितम्, परमार्थतः शुद्धसच्चिदानन्दघनरूपत्वज्ञानेन तदपनुद अजस्यापि मायया जन्मानुकरणम् अकर्त्तुरपि परानुग्रहाय कर्म्मानुकरणमित्येवं यो वेत्ति" इति श्रीमन्मधुसूदनः । तत्त्वतो यो वेत्तीति कथनस्य को वाभिप्राय आचार्य्यवाक्येन स निरूपणीयः । "अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः । परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥" (७।२४) इत्यत्र अबुद्धयोऽतत्त्वज्ञाः सर्व्वदा सर्व्वत्रैव नित्यविद्यमानमिति मम अव्ययं सदैकरूपमनुत्तमं न विद्यते उत्तमो भावो यस्मात् नित्यपूर्णं परं भावं स्वरूपमजानन्तः मां सर्व्वान्तर्यामिणं पूर्णमव्यक्तमधुना लोकातीतपुरुषे व्यक्तिमापन्नं प्रकाशं गतं मन्यन्ते । यद्येवं, कथं "जन्म कर्म्म चे"त्युक्तिः ? नित्यसन्निहितस्य तस्य स्वकृतप्रकाशानुकूलायां तनावाविष्कृतस्वरूपस्य साधुजनचक्षुर्गोचरत्वं जन्म, कर्म्म च तेषां मार्गोपदेशनादि । एवं हि सिद्धान्तितं वैष्णवाचार्य्यैः, तद्यथा "मथुरा भगवान् यत्र नित्यसन्निहितो हरिः" (भा, १०स्क, १अ, २८श्लो) इत्यत्र श्रीमद्विश्वनाथचक्रवर्त्ती "नितरांसन्निहित इत्यनेन स्वयं भगवान् परिपूर्णस्तत्र स्वधामनि सदा वर्त्तमान एवाविर्भूय प्रपञ्चगोचरोभवति, न तु कुतश्चित् वैकुण्ठादिभ्य आगत्यावतरतीति व्यञ्जितम्" इति । ९ ।

"मयि सर्व्वाणि कर्म्माणि सन्न्यस्याध्यात्मचेतसा । निराशीर्निर्म्ममो भूत्वा युद्धस्व विगतज्वरः ॥" (३।३०) इत्यत्र योऽयं योग उक्तः, स एवाध्यायारम्भे "इमं विवस्वते योगं प्रोक्तवान्" (४।१) इति परामृष्टः । "जन्म कर्म्म च मे दिव्यम्" इत्यत्र तस्यैव योगस्योपेयं सर्व्वान्तर्यामिणमपरोक्षभावेन ज्ञात्वा कृतार्थता तस्मिन् कर्मसमर्पणेनेत्यभिप्रेतमाचा-

र्थं च, अन्यथा पूर्व्वापरसङ्गतिर्भज्यते । "जन्म कर्म्म" तत्र यत् स्फुटमासीत्तदेव प्राचीनदृष्टान्तेन विषदीकर्त्तुमाह वीतेति । वीतरागभयक्रोधाः रागभयक्रोधशून्याः मन्मयाः मच्चित्ता मदेकनिष्ठाः मया सर्व्वतोभावेनाधिकृताः मामुपाश्रिताः मामनन्यभावेन संसेवमानाः बहवोऽनेके ज्ञानतपसा ज्ञानञ्च तपश्च इत्येकवद्भावेन ज्ञानतपसा "यज्ञो दानं तपः कर्म्म" (१८।५) "देवद्विजगुरुप्राज्ञपूजनम्" (१७।१४—१६) इत्येवमादिना तपसः कर्म्मत्वात् ज्ञानेन कर्म्मणा च पूता विगतमलाः मद्भक्तिमन्तः मद्भावं मत्प्रेमाणं, मत्साक्षात्कृतिं मयि स्थितिं वा आगताः प्राप्ताः । वीतरागभयक्रोधाः—"रागस्तत्तत्फलं तृष्णा, सर्व्वान् विषयान् परित्यज्य ज्ञानमार्गे कथं जीवितव्यमिति त्रासो भयम्, सर्व्वविषयोच्छेदकोऽयं ज्ञानमार्गः कथं हितः स्यादिति द्वेषः क्रोधः, त एते रागभयक्रोधा वीता विवेकेन गता येभ्यस्ते वीतरागभयक्रोधाः शुद्धसत्त्वाः" इति श्रीमन्मधुसूदनः ; "रागो विषयेषु प्रीतिः, भयं स्वोच्छेदशङ्का, क्रोधः स्वपरपीड़ाहेतुरभिज्वलनः, ते त्रयो वीता येभ्यस्ते वीतरागभयक्रोधाः" इति श्रीमन्नीलकण्ठः ; "वीताः परित्यक्तास्तत्तिसत्त्वविरोधिषु रागादयो यैस्ते" इति श्रीमद्बलदेवः ; "वीतास्त्यक्ताः कुमतप्रजल्पितेषु जनेषु रागाद्या यैस्ते न तेषु रागः प्रीतिः नापि तेभ्यो भयं, नापि तेषु क्रोधो मद्भक्तानाम्" इति श्रीमद्विश्वनाथः । मन्मयाः —"ब्रह्मविदः ईश्वराभेददर्शिनः" इति श्रीमच्छङ्करः, "मदेकचित्ताः" इति श्रीमच्छ्रीधरः, "मदेकनिष्ठाः" इति श्रीमद्बलदेवः, "मां परमात्मानं तत्पदार्थत्वं पदार्थाभेदेन साक्षात्कृतवन्तः, मदेकचित्ता वा" इति श्रीमन्मधुसूदनः ; "मदेकप्रधानाः" इति श्रीमन्नीलकण्ठः ; "मज्जन्मकर्म्मानुध्यानमननश्रवणकीर्त्तनादिप्रचुराः" इति श्रीमद्विश्वनाथः । मामुपाश्रिताः—"मामेव परमेश्वरमुपाश्रिताः केवलज्ञाननिष्ठाः" इति श्रीमच्छङ्करः, "मां सेवमानाः" इति श्रीमद्बलदेवः, "एकान्तप्रेमभक्त्या मामीश्वरं शरणं गताः" इति श्रीमन्मधुसूदनः । ज्ञानतपसा पूताः— "ज्ञानमेव परमात्मविषयं तपः तेन ज्ञानतपसा पूताः शुद्धिं गताः"

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्व्वशः ॥११॥

इति श्रीमच्छङ्करः; "मदीयजन्मकर्म्मतत्त्वज्ञानाख्येन तपसा पूताः बहव एवं मद्भक्ताः" इति श्रीमद्रामानुजः; "आत्मज्ञानञ्च तपश्च तत्परिपाक-हेतुः स्वधर्म्मः—इत्येकवद्भावः—तेन ज्ञानतपसा पूताः शुद्धाः निरस्ता-ज्ञानतत्कार्य्यमलाः" इति श्रीमच्छ्रीधरः; "मज्जन्मादिनित्यत्वविषयकं यज्ज्ञानं तदेव दुरधिगमश्रुतियुक्तिसम्पाद्यत्वात् तपः, तस्मिन् ज्ञाने वा यद्विविधकुमतकुतर्कादिनिवारणरूपं तपस्तेन पूता निर्द्धूताविद्याः" इति श्रीमद्बलदेवः। मद्भावमागताः—"ईश्वरभावं मोक्षमागताः सम-नुप्राप्ताः" इति श्रीमच्छङ्करः, "मत्सायुज्यं प्राप्ताः" इति श्रीमच्छ्रीधरः, "मयि भावं प्रेमाणं विद्यमानतां वा मत्साक्षात्कृतिम्" इति श्रीमद्बल-देवः, "मद्रूपत्वं विशुद्धसच्चिदानन्दघनं मोक्षमागताः" इति श्रीमन्मधु-सूदनः, "मत्तादात्म्यं प्राप्ताः" इति श्रीमन्नीलकण्ठः, एवं विविध-व्याख्यातृगणव्याख्यानेषु नास्मिन् श्लोके योगत्रयसमन्वयो दृश्यते। यद्यपि श्रीमच्छ्रीधरव्याख्याने ज्ञानभक्तिकर्म्मेश्वरप्रसादाः विस्पष्टा भासन्ते, तथापि भक्तिमार्ग एवात्र तेनानुमोदितः। तत्कृतगीतार्थसंग्रहेऽप्येव-मेवेति तृतीयाध्यायप्रारम्भे प्रदर्शितम्। योगत्रयसमन्वयोऽत्रेति पूर्व्व-सूत्रम्। १०।

न हि सर्व्वेषां परमेऽस्मिन् योगे मतिर्भवति। भवन्ति ते बुद्धे-र्विचित्रत्वात् भिन्नपथगामिनः। केचित् ज्ञाने रताः, केचित्कर्म्मणि, केचित् भक्तौ, केचित् कामवशादन्यदेवतायाजिनः। यदीश्वरोऽनन्य-योगेन ये तमाराधयन्ति तानेवानुगृह्णाति, तदा स्यात्तस्मिन् वैषम्यम्। यदि वैषम्यं मा भूदिति ये तं यद्भावेनैवाराधयन्तु सर्व्वेभ्यस्तेभ्य एका-मेव सिद्धिं प्रयच्छेत्, तदा वैषम्यमेवापतेत्। ये यथानुतिष्ठन्ति, तेभ्य-स्तथैव फलं ददातीश्वर इति नात्र वैषम्यावकाश इत्याह ये यथेति। मां सर्व्वान्तर्यामिणं ये यथा येन भावेन प्रपद्यन्ते भजन्ति, तान् तथैव

तेन भावेन अहमीश्वरः भजामि अनुगृह्णामि। हे पार्थ, मनुष्याः सर्वशः सर्वप्रकारैः मम वर्त्म मार्गम् अनुवर्त्तन्ते अनुसरन्ति। "ममेश्वरस्य वर्त्म मार्गम्" इति श्रीमच्छङ्करः, "मम वर्त्म मत्स्वभावम्" इति श्रीमद्रामानुजः, "ममैव वर्त्म भजनमार्गम्" इति श्रीमच्छ्रीधरः; "वर्त्म बहुविधमुपासनमार्गम्" इति श्रीमद्बलदेवः, "वर्त्म भक्तिध्यानप्रणिधानात्मकम्" इति श्रीमन्नीलकण्ठः, "मम स्वरूपत्वात् ज्ञानकर्मादिकं सर्वं मामकमेव वर्त्म" इति श्रीमद्विश्वनाथः। वर्त्मेत्येकवचनं दर्शयति एक एव पन्थाः प्रतिपत्तृभेदतो भिन्नः प्रतिभाति, अपि च ज्ञानप्रधाना ज्ञानेन, प्रवृत्तिप्रधानाः कर्मणा, भावप्रधाना भक्त्या, कामपराः फलाभिकाङ्क्षया, एकमेव सर्वेश्वरं विश्वात्मानं शक्तिमन्तं प्रियमभीष्टफलदातारं वेति ज्ञात्वा आराधयन्ति। ननु वैदिका इन्द्रादयो देवाः किं वैदिकैर्ऋषिभिरद्वितीयौपनिषदपुरुषत्वेनाहूयन्त इति विप्रतिपत्तिनिरसनाय तेषां स्वरूपलक्षणादयोऽत्र संक्षेपतः प्रदर्श्यन्ते :—

(१) ज्ञानवान्—"वेद यो वीनां पदमन्तरिक्षेण पतताम्। वेद नावः समुद्रियः" (ऋक् १।२५।७); "वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः" (१।२५।८); "अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति। कृतानि या च कर्त्वा।" (ऋक् १।२५।११); "यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्" (७।४९।३); "अग्निष्टा विश्वा भुवनानि वेद" (३।५५।१०) इति। (२) परमशक्तिः—"महो दिवः पृथिव्याश्च सम्राट्" (१।१००।१); "न यस्य देवा देवता न मर्त्ता आपश्च न शवसो अन्तमापुः" (१।१००।१५); "स प्राचीनान् पर्वतान् दृंहदोजसा अधराचीनमकृणोदपामपः। अधारयत् पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः॥" (२।१७।५) इति। (३) मङ्गलमयः—"शतं ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु। बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत्॥" (१।२४।९); "वृक्षस्य नु ते पुरुहूत वया व्यूतयो रुरुहुरिन्द्र पूर्वीः" (६।२४।३) इति। (४) स्रष्टा, पाता, नियन्ता, नेता—"अस्तभ्नाद्द्यामसुरो विश्ववेदा अमि-

मीत वरिमाणं पृथिव्याः। आसीदद्विश्वा भुवनानि सम्राड्-विश्वेत्तानि वरुणस्य व्रतानि ॥" (८।४२।१); "रुक्मो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम्" (७।८७।५); "उरुं हि राजा वरुणश्चकार सूर्य्याय पन्थामन्वेतवा उ" (१।२४।८); "प्र सीमादित्यो अस्रजद्वि-धर्त्ताँ ऋतं सिन्धवो वरुणस्य यन्ति।" (२।२८।४); "रदत्पथो वरुणः सूर्य्याय प्रार्णांसि समुद्रिया नदीनाम्।" (७।८७।१); "इमामू नु कवितमस्य मायां मह्रीं देवस्य नकिरा दधर्ष। एकं यदुद्ना न पृणन्त्येनीरासिञ्चन्तीरवनयः समुद्रम्॥" (५।८५।६); "अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुहचिद्दिवेयुः। अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति॥" (१।२४।१०); "सेतृभिरज्जुभिः सिनीथः" (७।८४।२); "विश्वस्य भुवनस्य गोपाः" (२।२७।४); "यूयं विश्वं परिपाथ वरुणो मित्रो अर्य्यमा।" (१०।१२६।४); "ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः।" (७।६६।१३); "न वां देवा अमृता आमिनन्ति व्रतानि मित्रा वरुणा ध्रुवाणि।" (५।६९।४); "इन्द्रश्चितीनामसिमानुषीणां विशां दैवीनामुत पूर्व्वयावा।" (३।३४।२) इति। (५) सर्व्वपरिवर्त्तनमूलम्—"अचेतसं चित् चेतयन्ति दक्षैः" (७।६०।६); "पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्व्वमपरं शचीभिः।" (६।४७।१५); "शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः। एधमानद्विलुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्॥" (६।४७।१६) इति। (६) तेन सम्बन्धाः—[क] राजा—"त्वं विश्वेषां वरुणासि राजा ये च देवा असुरा ये च मर्त्ताः।" (२।२७।१०); [ख] परित्राता—"वि मच्छ्रथाय रशनामिवागः" (२।२८।५); [ग] अमृतत्व-दाता—"त्वं तमग्ने अमृतत्व उत्तमे मर्त्तं दधासि" (१।३१।७); [घ] रक्षकः—"न हन्यते न जीयते त्वोतो नैनमंहो आश्नोत्यन्तितो न दूरात्।" (३।५९।२); [ङ] सखा (नेता)—यस्य ते स्वादुसख्यं स्वाद्वी प्रणीतिः (८।६८।११); [च] पिता पितृतमः—"सखा पिता पितृतमः पितृणाम्" (४।१७।१७); [छ] माता—"त्वं हि नः पिता वसो त्वं

माता शतक्रतो बभूविथ ।" (८।९८।११) ; [ज] सर्व्वेश्वः—"त्वमस्य तव यसि" (८।९२।३२) ; [झ] उपायः—"रध्रचोदनः" (८।८०। [ञ] सहायः—न ह्यन्य' बलाकरं मर्डितारम् (८।८०।१) ; [ट] वक्ता—"स प्राविता मघवा नोऽधिवक्ता" (८।९६।२०) ; [ठ] बलः "त्वे अपि क्रतुर्मम" (७।३१।५) ; [ड] दुर्गः—"इन्द्र इह्यस्व पूः अ (८।८०।७) ; [ढ] आशुतोषः— 'त्रातारमिन्द्रमवितारमिन्द्रं हवे सुहवं शूरमिन्द्रम्" (६।४७।११) ; [ण] प्रार्थनाश्रोता—"वनीव मम दूतास इन्द्रं स्तोमाश्चरन्ति सुमतीरियानाः । हृदिस्पृशो मन वच्यमाना" (१०।४७।७) ; "उत त्वा बधिरं वयं श्रुत्कर्णं सन्तमूत दूरादिह हवामहे" (८।४५।१७) ; [त] भावग्राही—"अविप्रो वा य विधद्विप्रो वा इन्द्र ते वचः । स प्र ममंद त्वाया" (८।६१।९) ; [विविधभावेन प्रकाशवान्—"रूपं रूपं प्रतिरूपो बभूव तदस्य रू प्रतिचक्षणाय । इन्द्रो मायाभिः पुरुरूप ईयते" (६।४७।१८) इति (७) एकत्वम्—"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुप गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥ (१।१६४।४६) ; "सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्प यन्ति" (१०।११४।५) इति । (८) विश्वकर्म्मा, पुरुषः, विराट्, हिरण्य गर्भः ऋक्संहितायां दशममण्डले, अथर्व्वणि तु काण्डे दशमे स्तम्भः ब्रह्मा, अनन्तः, सूत्रात्मा । (९) सदसत्तत्त्वञ्च—"नासदासीन्‍ सदासी त्तदानीं नासीद्रजो नो व्योमा परो यत्" (१०।१२९।१) इति । (१० अपरोक्षभावेनाहन्त्वेन ग्रहणमपि विविधासु दृश्यते तद्यथा—"अहम मनुरभवं सूर्य्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः । अहं कुत्समार्जु नेयं न्यृञ्जेऽहं कविरुशना पश्यता मा ॥" (४।२६।१) ; "अहं रुद्रेभि- र्वसुभिश्चरामि" इत्यारभ्य "अहमेव वात इव प्र वाम्यारभमाणा भुव- नानि विश्वा । परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ॥" (१०म, १२५सू, १—८ऋक्) इत्येवमाद्याः । 'मम वर्त्म मत्स्वभावम्' इति, 'मम स्वरूपत्वात् ज्ञानकर्म्मादिकं सर्व्वं मामकमेव वर्त्म' इति

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२॥

यदुक्तं, तत्तु 'कोऽयं' निर्दिष्टः पन्थाः ? तत्प्रदत्तस्वभावः' इत्यत्र (७८पृ) सम्प्रतिपत्ति प्रदर्शितम् । ११ ।

बुद्धेर्वैचित्र्यप्रदर्शनाय सकामवैदिककर्म्मानुष्ठानरतानां सिद्धिमुदाहरणत्वेन स्पष्टयत्याचार्य्यः काङ्क्षन्त इति । कर्म्मणां वैदिकानां सिद्धिं पशुपुत्रादिफलनिष्पत्तिं काङ्क्षन्तः प्रार्थयन्तः इह अस्मिन् लोके देवता इन्द्राग्न्याद्याः यजन्ते यज्ञेनाराधयन्ति पूजयन्ति । क्षिप्रं सत्वरं परलोकगमनकालमनपेक्ष्यैव मानुषे लोके मनुष्यलोके—यद्यपि मरणधर्म्माणः सर्व्व एव लोका मनुष्यलोकत्वेन ग्रहणीयाः, तद्यथा श्रीमद्रामानुजोऽत्र "मानुषलोकशब्दः स्वर्गादिलोकप्रदर्शनार्थः सर्व्व एव हि लौकिकाः" इति, तथापि क्षिप्रशब्दप्रयोगबलात् पश्वादिकामस्य वैदिककर्म्मानुष्ठानैरिहलोक एव तल्लाभः ; अन्यथा वेदशब्दानामैहलौकिकप्रजापश्वादिनिमित्तप्रयुक्तानां वैयर्थ्यमेव स्यात् ; अतएव तद्वेवाहाचार्य्यः ;—कर्म्मजा कर्म्मणो जाता पशुपुत्राद्या सिद्धिर्भवति । अत्र श्रीमच्छङ्करो वृहदारण्यकश्रुतिमिमामुदाहरति, "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेव च स देवानाम् ।" (वृ, आ, उ, ३।४।१०) । अथास्या भाष्यम—"अथ यः कश्चिद्ब्रह्मविदन्यामात्मनो व्यतिरिक्तां यां काञ्चिद्देवतामुपास्ते स्तुतिनमस्कारयागबल्युपहारप्रणिधानध्यानादिनोपास्ते तस्या गुणभावमुपगम्यात्ते अन्योऽसावनात्मा मत्तः पृथगन्योऽहमस्म्यधिकृतो मयास्मा ऋणिवत् प्रतिकर्त्तव्यमित्येवं प्रत्ययः सन्नुपास्ते न स इत्थं प्रत्ययो वेद विजानाति तत्त्वम्, न स केवलमेवम्भूतो विद्वानविद्यादिदोषवानेव, किन्तर्हि यथा पशुर्गवादिर्वाहनदोहनाद्युपकारैरुपभुज्यते एवं स इज्याद्यनेकोपकारैरुपभोक्तव्यत्वादेकैकेन देवादीनाम् । अतः पशुरेव सर्व्वार्थेषु कर्म्मस्वधिकृत इत्यर्थः ।" इति । भगवदप्रपन्नानामात्मज्ञानविमूढानां भगव-

चातुर्व्वर्ण्यं मया सृष्टं गुणकर्म्मविभागशः ।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम् ॥१

दतिरिक्तदेवतान्तरभजनशीलानां द्वितीयाभिनिवेशजनितभयव्य
पशुवदन्धत्वज्ञावश्यम्भावीति दृष्ट्वा श्रीमच्छङ्करस्यैव वचनं साध्वेव
एवं बुद्धिभेदेऽपि कथं "मम वर्त्मानुवर्त्तन्ते" इति वचनं ;
चातुर्व्वर्ण्यमिति । गुणाः सत्त्वरजस्तमांसि, कर्म्माणि तत्तद्गुणप्र
शमदमतपःशौर्य्यतेजोधर्मोपार्ज्जनशुश्रूषादीनि गुणकर्म्मविभागशः
विभागशः कर्म्मविभागशः चातुर्व्वर्ण्यं चत्वारो वर्णा एव चातुर्व्वर्ण्य
सर्व्वान्तर्यामिणा सृष्टं प्रवर्त्तितम् । ननु कथमिदमुच्यते ? दृश्य
महाभारतहरिवंशविष्णुपुराणादिषु वर्णानामविशेषः, तद्यथा,
विशेषोऽस्ति वर्णानां सर्व्वं ब्राह्ममिदं जगत् । ब्रह्मणा पूर्व्वसृष्ट
कर्म्मभिर्वर्णतां गतम् ॥" (शा, प, १८८अ, १०श्लो) इति । व
र्त्तनन्तु मानवकृतं, तद्यथा, "गृत्समदस्य शौनकश्चातुर्व्वर्ण्यप्रवर्त्त
ताऽभूत" (वि, प, ४अं, ८अ, १०श्लो) ; पापाचाराद्वा, तद्यथा "
पृषध्रस्तु गुरुगोवधात् शूद्रत्वमगमत्" (वि, पु, ४अं, १अ, १२श्लो) ; कर्म
णा तद्यथा "करूषात् कारूषा महाबलाः क्षत्रिया बभूवुः" (वि,
४अं, १अ, १४श्लो) ; "नाभागो नेदिष्टपुत्रस्तु वैश्यतामगमत" (वि,
४अं, १अ, १५श्लो) इति । अपि च एकोऽपि सन् स्वधर्म्म ...न भि
तामगच्छदिति शा... निर्दिष्टम्, तद्यथा "कामभोगप्रियास्तीक्ष्णाः
क्रोधनाः प्रियसाहसाः । त्यक्तस्वधर्म्मा रक्ताङ्गास्ते द्विजाः क्षत्र
गताः ॥ गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः । स्वधर्म्मा
नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥ हिंसानृतप्रिया लुब्धाः सर्व्व
कर्म्मोपजीविनः । कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥"
(शा, प, १८८अ, ११—१३श्लो) इति । शौनकस्य चातुर्व्वर्ण्यप्रवर्त्तना
नन्तरं वृत्तमूलकमेव तदासीत् यथा, "शृणु यक्षकुलं तात न स्वाध्यायो
न च श्रुतम् । कारणं हि द्विजत्वे च वृत्तमेव न संशयः ॥ वृत्तं

यत्नेन संरक्ष्यं ब्राह्मणेन विशेषतः। अक्षीणवृत्तो न क्षीणो वृत्ततस्तु हतो हतः॥ पाठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः। सर्व्वे व्यसनिनो मूर्खाः यः क्रियावान् स पण्डितः॥ चतुर्व्वेदोऽपि दुर्वृत्तो स शूद्रादतिरिच्यते। योऽग्निहोत्रपरो दान्तः स ब्राह्मण इति स्मृतः॥" (व, प, २१२अ, १०६—१०८श्लो) इति। न पुनर्व्वक्तव्यं शूद्रस्य न जातु ब्राह्मणत्वलाभ इति। "शूद्रो ब्राह्मणतामेति ब्राह्मणश्चेति शूद्र-ताम्" (मनु १०अ, ६५श्लो) इत्यस्य टीकाकृद्भिर्यदप्यर्थान्तरं साधितं, का गतिरत्र "शूद्रयोनौ हि जातस्य सद्गुणानुपतिष्ठतः। वैश्यत्वं लभते ब्रह्मन् क्षत्रियत्वं तथैव च॥ आर्ज्जवे वर्त्तमानस्य ब्राह्मण्यमभिजायते। गुणास्ते कथिताः सर्व्वे किम्भूयः श्रोतुमिच्छसि॥" (व, प, २११अ, ११। १२श्लो) इति। तथाच भागवते "यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभि-व्यञ्जकम्। यदन्यत्रापि दृश्येत तत्तेनैव विनिर्द्दिशेत्॥" (७स्क, ११अ, ३५श्लो) इति।

उच्यते;—सत्त्वरजस्तमोगुणानुयायी स्वाभाविको भेदोऽपरिहार्य्यः। "ये चैव सात्त्विका भावा राजसास्तामसाश्च ये। मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि॥" (७।१२) इत्युक्तः स्वयं सर्व्वान्तर्यामी गुणानां प्रभवो नियन्ता च। शौनकस्य चातुर्व्वर्ण्यप्रवर्त्तनं तमन्त-र्य्यामिणमतिक्रम्य नाभवत्, तत्प्रेरणैव तन्मूलम्। अत आह मया सृष्ट-मिति। भेदोऽयं स्वाभाविक इति स्पष्टमुक्तमनुशासनपर्व्वे "ब्राह्मण्यं देवि दुष्प्राप्यं निसर्गाद्ब्राह्मणः शुभे। क्षत्रियो वैश्यशूद्रौ वा निसर्गा-दिति मे मतिः॥" (१४३अ, ६श्लो) इति। "यस्य यल्लक्षणम्" इति भागवतपद्यं श्रीमच्छ्रीधरेणैवं व्याख्यातम्, "शमादिभिरेव ब्राह्मणादि-व्यवहारो मुख्यो न जातिमात्रादित्याह यस्येति। यत् यदि अन्यत्र वर्णान्तरेऽपि दृश्येत, तद्वर्णान्तरं तेनैव लक्षणनिमित्तेनैव निर्द्दिशेत्, न तज्जातिनिमित्तेनेत्यर्थः" इति। साधु व्याख्यातं तेन यतोऽनुशासन-पर्व्वे दृश्यते "न योनिर्नापि संस्कारो न श्रुतं न च सन्ततिः। कार-णानि द्विजत्वस्य वृत्तमेव तु कारणम्॥ सर्व्वोऽयं ब्राह्मणो लोके वृत्तेन

न मां कर्म्माणि लिम्पन्ति न मे कर्म्मफले स्पृहा।
इति मां योऽभिजानाति कर्म्मभिर्न स बध्यते ॥

च विधीयते । वृत्ते स्थितस्तु शूद्रोऽपि ब्राह्मणत्वं नियच्छति ॥
स्वभाव: कल्याणि समः सर्व्वत्र मे मतिः । निर्गुणं निर्म्मलं ब्रह्म
तिष्ठति स द्विजः ॥" (१४३अ, ५०—५२श्लो) इति । अतएव ि
श्रीमच्छङ्करकृतव्याख्यानम्—"गुणकर्म्मविभागशः गुणविभागशः
विभागशश्च । गुणाः सत्त्वरजस्तमांसि । तत्र सात्त्विकस्य सत्त्व
नस्य ब्राह्मणस्य शमोदमस्तपइत्यादीनि कर्म्माणि ; सत्त्वोपसर्ज्ज
प्रधानस्य क्षत्त्रियस्य शौर्य्यतेजःप्रभृतीनि कर्म्माणि ; तमउपसर्ज्ज
प्रधानस्य वैश्यस्य कृष्यादीनि कर्म्माणि ; रजउपसर्ज्जनतमःप्रध
शूद्रस्य शुश्रूषैव कर्म्म" इति ।

तस्य सृष्टिव्यापारस्य कर्त्तारं प्रवर्त्तकमपि माम् अव्ययं मा
स्वरूपविचुरतिमभजन्तं—"असंसारिणम्" इति श्रीमच्छङ्करः,"अ
रहितेन अमरहितम्" इति श्रीमच्छ्रीधरः, "साम्यान्न व्यमि" इति
बलदेवः, "निरहङ्कारत्वनाक्षीणमहिमानम्" इति श्रीमन्मधुसू
"अविकारिणम्" इति श्रीमन्नीलकण्ठः अकर्त्तारं गुणानुसारतः
द्विधानात् कर्त्तृत्वाभिमानशून्यं विद्धि जानीहि । चतुर्णां वर्णानां
चातुर्व्वर्ण्यमिति हिताथकप्रत्ययविधानेन श्रीमन्नीलकण्ठः आन्तरे
चष्ट, "कर्माणि अग्निहोत्रादीनि, गुणाश्च द्रव्यदेवतादिरूपाः, विभा
साधारणासाधारणविभागेन, तथाहि दानदयादिकं सर्व्वसाधार
अग्निहोत्रं त्रैवर्णिकस्यैव न शूद्रस्य, राजसूयादिकं राज्ञ एव नेतर
मिति विभागो दृश्यते" इति । "चातुर्व्वर्ण्यं मया सृष्ट"मित्युपल
क्षीकृत्य श्रीमद्रामानुजो व्याचष्टे "चातुर्व्वर्ण्यप्रमुखं ब्रह्मादिस्तम्बपर्य
कृत्स्नं जगत् सत्त्वादिगुणविभागेन तदनुगुणशमादिकर्म्मविभागेन
प्रविभक्तं मया सृष्टम्" इति । १३ ।

कर्त्ताप्यकर्त्तेति विरोधं व्याख्यानेन परिहरति न मामिति ।

मां कर्म्माणि लिम्पन्ति उपश्लिषन्ति लिप्तं कुर्व्वन्ति, यथा न पुष्कर-पलाशमापः, तथैव न मां कर्म्माणि श्लिषन्तीत्यर्थः। कथं न तानि लिम्पन्ति? तत्कारणमाह, फले कर्म्मफले न मे स्पृहा आकाङ्क्षा परिपूर्णकामत्वादित्यर्थः। यत्राभावस्तत्रैवाभिलाषः। न ह्यन्तर्यामिणः परमपुरुषस्य कश्चिदभावो विद्यते येन च ताड्यमानः स जड़जीवकल्याणहेतुकान्तर्यमनव्यापारेषु प्रवर्त्तेत। अतः परार्थं क्रियां कुर्व्वन्नपि न सोऽभिमानशून्यत्वात् कर्त्तृत्वाख्यामाप्नोति। मामन्तर्यामिणं य इति एवं जानाति स मम वर्त्मानुसरणवशात् कामविरहितः न कर्म्मभिः बध्यते। श्रीमद्रामानुजः श्लोकमिममेवं व्याचष्टे;—"यत इमानि विचित्रसृष्ट्यादीनि कर्म्माणि मां न लिम्पन्ति न बध्नन्ति मत्प्रयुक्तनामानि देवमनुष्यादिवैचित्र्याणि सृज्यानां पुण्यपापप्रयुक्तानीत्यर्थः। अत्र प्राप्ताप्राप्तविवेकेन विचित्रसृष्ट्यादेर्नाहं कर्त्ता, यतः क्षेत्रज्ञाः सृष्टिलब्ध-करणकलेवराः, सृष्टिलब्धं भोग्यजातं फलसङ्गादिहेतुभिः स्वकर्म्मानुगुणं भुञ्जते, सृष्ट्यादिकर्म्मफलेन च तेषामेवं स्यादिति न मे स्पृहा। तथाहि सूत्रकारः 'वैषम्यनैर्घृण्येन सापेक्षत्वात्' इति। तथाह भगवान् पराशरः—'निमित्तमात्रमेवायं सृज्यानां सर्गकर्म्मणि। प्रधानकारणीभूता यतो वै सृज्यशक्तयः॥ निमित्तमात्रमुक्त्वैव नान्यत् किञ्चिदपेक्षते। नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तुवस्तुताम्॥' इति। सृज्यानां क्षेत्रज्ञानां सृष्टेः कारणमात्रमेवायं परमपुरुषः; देवादिवैचित्र्ये तु प्रधानं कारणं, सृज्यभूतक्षेत्रज्ञानां प्राचीनकर्म्मशक्तय एव। अतो निमित्तमात्रमुक्त्वा सृष्टेः कर्त्तारं परमपुरुषमुक्त्वा इदं क्षेत्रज्ञवस्तु देवादिविचित्रभावे नान्यदपेक्षते, स्वगतप्राचीनकर्म्मशक्त्यैव देवादिवस्तुभावमुपनीयत इत्यर्थः। एवमुक्तेन प्रकारेण सृष्ट्यादेः कर्त्तारमप्यकर्त्तारं सृष्ट्यादिकर्म्मफलसङ्गरहितञ्च यो मामभिजानाति, स कर्म्मयोगारम्भविरोधिभिः फलसङ्गादिहेतुभिः प्राचीनकर्म्मभिर्न बध्यते मुच्यत इत्यर्थः" इति। १४।

एवं ज्ञात्वा कृतं कर्म्म पूर्व्वैरपि मुमुक्षुभिः ।
कुरु कर्म्मैव तस्मात्त्वं पूर्व्वैः पूर्व्वतरं कृतम् ॥१

किं कर्म्म किमकर्म्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्

कर्म्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मणः ।
अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणो गतिः ॥१७॥

सर्व्वान्तर्यामिणः परमपुरुषस्य वर्त्मानुवर्त्तनमर्व्वाचीनैपूर्वा
सम्भवं सम्भवयितुं प्रवृत्त इति वादनिरसनायाह एवमिति । "
कर्म्माणि लिम्पन्ति न मे कर्म्मफले स्पृहा" इत्येवं ज्ञात्वा पूर्व्वैः
नैरपि मुमुक्षुभिर्जनकादिभिः कर्म्म कृतमनुष्ठितम् । तस्मात् त्वं
विवस्वन्मन्वादिभिः पूर्व्वतरं कृतं नाधुनातनं कृतं निर्व्वर्त्तितं
एव कुरु । १५ ।

लोके सर्व्व एव कर्म्म नानुष्ठाय जीवन्ति, अतः कुतोऽयं का
देशः लौकिकमार्गादतिरिच्यते, एवं विप्रतिपत्तिं निरसितुमाह
कर्म्मेति । किं कर्म्म किमकर्म्म — कर्त्तुरात्मनो याथात्म्यज्ञानम्'
श्रीमद्रामानुजः, 'कर्म्माकरणम्' इति श्रीमच्छ्रीधरः, 'कर्म्मण्यतत् त
गतं ज्ञानम्' इति श्रीमद्बलदेवः, — कवयः पण्डिताः । अपि
मोहिताः । 'एवं ज्ञात्वा' इत्यत्र कर्म्मविषयकं विशेषज्ञानमुपदि
न तत् पुनः पण्डिता अपि जानन्ति । अतएव सर्व्वान्तर्यामिणं प
पुरुषमननुसृत्य गतानुगतिकभावेनान्धवत् कर्म्माण्यनुतिष्ठन्ति, सु
कर्म्मणां बन्धकत्वमपरिहार्य्यमिति वादोऽविरलप्रचारः सर्व्वत्र ।
अन्तर्गतज्ञानं कर्म्म ते वक्ष्यामि, यत् कर्म्म ज्ञात्वा अशुभात् संसा
मोक्ष्यसे मुक्तो भविष्यसि । 'ते कर्म्म' इत्यत्राकारप्रश्लेषेण कर्म्माकर्म्म
लभ्यते, तेन च कर्म्माकर्म्म वक्ष्यामीति व्याख्या भवति । १६ ।

लोकप्रसिद्धमेव कर्म्माकर्म्म च, तत्कथं तद्बोधने तवैयान् प्र

कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्म्मकृत् ॥१८॥

तत्त्वर्ज्जुनस्य क्वहतभावमुद्राव्याह कर्म्मण इति। कर्म्मणः शास्त्रविहितस्यापि बोद्धव्यं ज्ञातव्यं तत्त्वमस्ति, विकर्म्मणः शास्त्रनिषिद्धस्यापि बोद्धव्यं ज्ञातव्यं तत्त्वमस्ति, अकर्म्मणोऽनन्तरोक्तलक्षणाक्रान्तस्यापि बोद्धव्यं ज्ञातव्यं तत्त्वमस्ति। कथम्? कर्म्मणो गतिर्गहना दुर्ब्बोधा। १७।

किं पुनस्तत्तत्त्वं तदाह कर्म्मणीति। कर्म्मणि यः अकर्म्म कर्म्माकरणम्, अकर्म्मणि कर्म्म कर्म्मकरणं यः पश्येत्, स मनुष्येषु बुद्धिमान्, स युक्तः बुद्धियुक्तः योगयुक्तः, कृत्स्नकर्म्मकृत् निखिलकर्म्मानुष्ठाता। अत्र श्रीमच्छङ्करः—"आत्मनि कर्म्माभावे अकर्म्मणि कर्म्मविपरीतदर्शनमत्यन्तं निरूढ़म्, यतः···देहाद्याश्रयं कर्म्मात्मन्यध्यारोप्याहं कर्त्ता, ममैतत् कर्म्म, मयास्य कर्म्मणः फलं भोक्तव्यमिति च, तथाहं तूष्णीं भवामि, येनाहं निरायासोऽकर्म्मा सुखी स्यामिति कार्य्यकरणाश्रयव्यापारोपरमं कर्म्मैव, तत्कृतञ्च सुखित्वमात्मन्यध्यारोप्य न करोमि, किञ्च तूष्णीं सुखमासमित्यभिमन्यते लोकः" इति। श्रीमद्रामानुजो व्याचष्टे श्लोकमिममेवम्—"अकर्म्मणि चात्मज्ञाने वर्त्तमान एव यः कर्म्म पश्येत्। किमुक्तं भवति? क्रियमाणमेव कर्म्म आत्मयाथात्म्यानुसन्धानेन ज्ञानाकारं यः पश्येत्, तच्च ज्ञानं कर्म्मण्यन्तर्गततया कर्म्माकारं यः पश्येत्, इत्युक्तं भवति" इति। श्रीमच्छ्रीधर आह—"परमेश्वराराधनलक्षणे कर्म्मणि कर्म्मविषये अकर्म्म कर्म्मेदं न भवतीति यः पश्येत्, तस्य ज्ञानहेतुत्वेन बन्धकाभावात्, अकर्म्मणि च विहिताकरणे कर्म्म यः पश्येत, प्रत्यवायोत्पादकत्वेन बन्धहेतुत्वात् मनुष्येषु कर्म्म कुर्व्वाणेषु स बुद्धिमान्।" पक्षान्तरे—"कर्म्मणि देहेन्द्रियव्यापारे वर्त्तमानेऽपि ······अकर्म्म स्वाभाविकं नैष्कर्म्म्यमेव यः पश्येत्, तथा अकर्म्मणि च ज्ञानरहिते दुःखबुद्धा कर्म्मणां त्यागे यः कर्म्म पश्येत्, तस्य प्रयत्नसाध्य-

त्वेन मिथ्याचारत्वात्...स सर्व्वेषु मनुष्येषु बुद्धिमान्" इति । श्रीमः सूदन आह—"यत्त्वं मन्यसे कर्म्मणो बन्धहेतुत्वात्, तूष्णीमेव सुखेन स्यातव्यमिति तन्मृषा, असति कर्त्तृत्वाभिमाने विहितस्य । षिद्धस्य वा कर्म्मणो बन्धहेतुत्वाभावात्.........सति कर्त्तृत्वाभि तूष्णीमहमास इत्यौदासीन्याभिमानात्मकं यत्कर्म्म तदपि बन्धहेतु वस्तुतत्त्वापरिज्ञानात् । तस्मात् कर्म्मविकर्म्माकर्म्मणां तत्त्वमो ज्ञात्वा विकर्म्माकर्म्मणी परित्यज्य कर्त्तृत्वाभिमानफलाभिसन्धान नेन विहितं कर्म्मैव कुर्व्वित्यभिप्रायः" इति । स्वामिकृतव्याख्या दोषोद्भावनं श्रीमता नीलकण्ठेन श्रीमन्मधुसूदनेनैकवाक्येनैवं कृतम "यत्तु कर्म्मणि नित्ये परमेश्वरार्थेऽनुष्ठीयमाने बन्धहेतुत्वाभावादकम मिति यः पश्येत्, तथा अकर्म्मणि नित्यकर्म्माकरणे प्रत्यवायहेतु कर्म्मेदमिति यः पश्येत्, स बुद्धिमानिति, तदसङ्गतमेव, नित्यकर्म्म अकर्म्मेदमिति ज्ञानस्याशुभमोक्षहेतुत्वाभावात्, मिथ्याज्ञानत्वेन त वाशुभत्वाच्च । न चैतादृशं मिथ्याज्ञानं बोद्धव्यं तत्त्वं नाप्येतादृशस बुद्धिमत्त्वादिस्तुत्युपपत्तिः" इति । ये पुनः श्रीमन्मधुसूदनादयोऽसद पक्षे श्लोकमिमं व्याचक्षते तानपि स एवं प्रत्याचष्टे—"ये तु कर्म्म ज्ञानकर्म्मणि दृश्ये जड़े सद्रूपेण स्फुरणरूपेण वाऽनुस्यूतं सर्व्वभ्रमा ष्ठानम् अकर्म्म अवेद्यं स्वप्रकाशचैतन्यं परमार्थदृष्ट्या यः पश्येत् अकर्म्मणि स्वप्रकाशे दृग्वस्तुनि कल्पितं कर्म्म दृश्यं मायामयं न मार्थं सदिति यः पश्यति स बुद्धिमानिति परमार्थदर्शित्वात् वास्तवै गुणैः स्तूयत इत्यपि व्याचख्युः, तदप्यसङ्गतमेव । 'कर्म्म कुरु', 'क प्रवक्ष्यामि' इत्यनुष्ठेयकर्म्मप्रस्तावे तत्त्वज्ञानानवसरात्" इति । य प्यस्मिन् पद्ये कर्म्माकर्म्मेति पदद्वयमुपन्यस्तं, तथापि विकर्म्मापि व्याख्यातृभिः परामृश्यते, एकमेव कर्म्म पुनरधिकारिभेदे कर्म्मैव विकर्म च भवतीति तेषां धारणात् । उदाहृतमेतत् श्रीमन्नीलकण्ठ —"कर्मणि कर्माकर्मविकर्मरूपे अकर्म तद्वैपरीत्यं शास्त्रतो दृश्य यथा क्रतुः कर्मणि श्रद्धाहीनस्य कृतोऽप्यकृत एव भवतीत्यकर्म

यस्य सर्व्वे समारम्भाः कामसङ्कल्पवर्ज्जिताः ।
ज्ञानाग्निदग्धकर्म्माणं तमाहुः पण्डितं बुधाः ॥१८॥

पर्य्यवस्यति, दाम्भिकस्य तु विकर्मणि पर्य्यवस्यति।······एवमौदासीन्य-मकर्मापि शक्तस्यार्त्तपरित्राणाभावाद्विकर्मणि पर्य्यवस्यति ; दीक्षितस्य भगवद्ध्यानसक्तस्य वा स्वकाले पञ्चयज्ञाद्यकरणं······कर्मण्येव पर्य्यव-स्यति, नित्यकर्मकाले प्रत्यवायहेतोरन्यस्याविहितस्याकरणात्। एवं विकर्मापि हिंसा······यज्ञे कर्मैव भवति, सैव ह्ययानष्टे पशौ न कर्म विध्यर्थानिष्पत्तेः, नापि विकर्म कामकारेणाकृतत्वात्, किन्तु परिशे-षात् कृताप्यकृतत्यकर्मणि पर्य्यवस्यति।" इति। यत्तु कामकारेण कृतं तदेव विकर्म, यत्त्वकामकारेण कृतं तत्कर्मेति व्यवस्था न सर्व्वत्र समीचीना ; विकर्ममात्रस्य कामकारत्वापरिहार्य्यत्वात्, ज्ञानिकृत-मिदमिति न विकर्मेति निर्व्वन्धो भ्रान्तिविजृम्भित एव ;—"आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा। कामरूपेण" (३।३८) इत्याचार्य्यो-क्तेर्विषया ज्ञानिनोऽपि। "यो मां प्रयतते हन्तुं मोक्षमास्थाय पण्डितः। तस्य मोक्षरतिस्तस्य नृत्यामि च हसामि च॥" (म, प, १३अ, १८श्लो) इति सर्व्वत्र कामस्यापरिहार्य्यत्वम्। "हिंसाफलके सत्यादौ दानफलके-ऽनृतादौ च विकर्माकर्मत्वे बोध्ये" इति सिद्धान्तः शास्त्रदृष्ट्याचार्य्येणा-प्यनुमोदित इति प्रतीयते, किन्त्वत्र तस्य समायोग्यत्वात्स्वधर्मोचितकौ-शलानुसरणमुपेक्ष्य सत्यपरायणजीवनमेवास्माकमनुसरणीयं प्राचीनव्यव-हारशास्त्रोद्ध भूमौ तेन तस्यारोहात्। १८।

"कर्मण्यकर्म यः पश्येत्" इत्यनेनोक्तमर्थं विवृणोति पञ्चभिः यस्येति। समारभ्यन्त इति समारम्भाः कर्माणि। यस्य सर्व्वे समा-रम्भाः कर्माणि कामसङ्कल्पवर्ज्जिताः, कामः फलतृष्णा, सङ्कल्पः अहं करोमीति कर्त्तृत्वाभिमानः ताभ्यां वर्ज्जिताः, ज्ञानाग्निदग्धकर्माणं कर्मादावकर्मादिदर्शनं यत् ज्ञानं तदेवाग्निः तेन दग्धानि बन्धकानि कर्माणि यस्य तं बुधाः तत्त्वज्ञाः पण्डितं तत्त्वदर्शिनमाहुः। १९।

त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥२०॥
निराशीर्यतचित्तात्मा त्यक्तसर्व्वपरिग्रहः ।
शारीरं केवलं कर्म्म कुर्व्वन्नाप्नोति किल्बिषम् ॥२१॥
यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥२२॥
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म्म समग्रं प्रविलीयते ॥२३॥

उक्तमर्थं विशदयति त्यक्त्वेति । कर्मणि फले च कर्त्तृत्वाभिमानमासक्तिञ्च त्यक्त्वा नित्यतृप्तः निराकाङ्क्षः निराश्रयः योगक्षेमार्थमाश्रयणीयरहितः अस्थिरप्रकृतावाश्रयबुद्धिरहितः कर्मणि अभिप्रवृत्तोऽपि स नैव किञ्चित्करोति, कर्म तस्याकर्मतामाप्नोति । २० ।

किञ्च निराशीरिति । निराशीः कामनारहितः विगततृष्णः, यतचित्तात्मा संयतान्तःकरणः, त्यक्तसर्व्वपरिग्रहः त्यक्ताः सर्व्वे परिग्रहाः भोगोपकरणानि येन सः, शारीरं शरीरस्थितिमात्रप्रयोजनं कर्म कुर्व्वन् किल्बिषं पापं बन्धकारणं नाप्नोति । २१ ।

यदृच्छेति । यदृच्छालाभसन्तुष्टः, अप्रार्थितोऽयत्नतो लाभो यदृच्छालाभः, तेन सन्तुष्टः तृप्तः, द्वन्द्वातीतो द्वन्द्वानि क्षुत्पिपासाशीतोष्णादीनि अतीतः अतिक्रान्तः, विमत्सरः निर्व्वैरः अन्यैरुत्पीड़ितोऽपि वैरमकुर्व्वन्, सिद्धौ असिद्धौ च समः हर्षविषादरहितः, कृत्वा कर्मानुष्ठायापि न निबध्यते बन्धं प्राप्नोति । २२ ।

गतेति । गतसङ्गस्य फलासक्तिशून्यस्य मुक्तस्य रागद्वेषादिशून्यस्य ज्ञानावस्थितचेतसः ज्ञाने स्वात्मविषयके निविष्टमनसः यज्ञाय वेदविहितकर्मानुष्ठानाय आचरतः अनुतिष्ठतः समग्रं कर्म प्रविलीयतेऽकर्मतामापद्यते । २३ ।

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना ॥२४॥

भगवद्भाववर्ज्जितं निष्कामं कर्म्मापि बन्धाय, कर्म्माचरितं तत्र बन्धाय भविष्यति तदेव दर्शयति ब्रह्मार्पणमिति । अर्प्यतेऽनेनेति अर्पणं जुह्वादि ब्रह्म, हविर्घृतादिकमर्प्यमाणं ब्रह्म, ब्रह्माग्नौ ब्रह्मैवाग्निस्तस्मिन् ब्रह्मणा कर्त्रा हुतम्, एवं ब्रह्मकर्म्मसमाधिना ब्रह्मदृष्टिप्रधाने कर्म्मणि समाधिश्चित्तैकाग्रता ब्रह्मणि चित्ताभिनिवेशः तेन ब्रह्मैव गन्तव्यं प्राप्यम् । यज्ञीयोपकरणान्यत्र प्रतीकत्वेन गृहीत्वा तेषु ब्रह्मदृष्टिरत्र विधीयते, यज्ञकर्त्तरि त्वहंग्रहत्वेनेति भेदो द्रष्टव्यः । न हि प्रतीका ब्रह्म भवितुमर्हन्ति तेषां निकृष्टत्वात्, किन्तु ब्रह्मदृष्ट्या तेषामुत्कर्षोपादनमेवात्रोपासनायां नियमः, "ब्रह्मदृष्टेरुत्कर्षात्" (वे, सू, ४।१।५) इति न्यायात् । यो हि त्वंशब्दविषयः सर्व्वान्तरात्मा तं सर्व्वेषु पदार्थेषु दर्शनं प्रतीकोपासनाया उद्देश्यम् । न हि ते पदार्था ब्रह्म, किन्तु ब्रह्मसत्तया तेषां सत्तेति सत्यमाश्रित्य निकृष्टे ह्युत्कर्षदृष्टिर्नोत्कर्षे निकृष्टदृष्टिरिति न्यायः प्रतीकोपासनायां कदापि न भज्यते । प्रतीकानां ब्रह्मनिरपेक्षसत्ता नास्ति, ब्रह्मसत्ता तु न तेषां सत्तासापेक्षा, अतः प्रतीकानां प्रतीकत्वमुपासनाकालेऽपि न व्याहन्यते । "तदाविर्भावेषु भेदग्राहो निन्द्यते" इति न्यायस्तु प्रतीकादृष्टिं तिरोधाय त्वंशब्दविषये ब्रह्मणि दृष्टिस्थापनेन सिध्यति । आधिभौतिकयोगानुकूलेयमुपासना । केवलेनाधिभौतिकयोगेन न चरितार्थतेति "ब्रह्मणा हुतम्" इत्यनेनाध्यात्मयामिकयोगानुकूलाहंग्रहोपासनापि विधीयते । सर्व्वान्तर्यामिणोऽहमिति शब्देन परिग्रहो सर्व्वथात्मनोऽहन्तात्यागेन सम्भवति । आत्मनोऽहन्तापरित्यागः किं सत्यं नातिक्रामति, अहमनहं किं वा कदापि भवतीति संशयः साधकानां पूर्णकृतकृत्यतायै सर्व्वथा दूरेण हातव्यः । अहंग्रहोपासना यदि न सत्ये प्रतिष्ठिता हातव्य इति भवतो निर्म्मूलविधिवाक्येन न कोऽपि तदनुसरेदिति, कात्र युक्ति-

विंमृश्यैव मा। अहंशब्दः कर्त्तृवाचकः। सर्व्वासु क्रियास्वहं कर्त्तृत्वेनानुस्यूतं तिष्ठति। यदा सर्व्वत्र सर्व्वान्तर्यामिणः कर्त्तृत्वं पश्यतः स्वकर्त्तृत्वाभिमानस्तिरोधत्ते, कोऽयं कर्त्तेति ज्ञानमुपतिष्ठते, तदा कर्त्तृत्ववाचकोऽहंशब्दः सर्व्वान्तर्यामिणि नित्यप्रयोगयोग्य इति पश्यन् साधकस्तमेवाहंशब्देनाभिधत्ते। अतो नाहंग्रहोपासना जात्वसत्यप्रतिष्ठेति जानतां सार्व्वकालिकानां योगिनां तत्र समादरः। प्रतीकोपासनया, तयोरन्तरालगतया स्थितप्रज्ञतया, अहंग्रहोपासनयाधिभौतिक आध्यात्मिक आध्यान्तर्यामिको योगः श्रीमता योगाचार्य्येणैकत्र सामञ्जस्येन स्थापित इति तस्य सर्व्वसमन्वायकत्वं स्फुटतरमेवात्र प्रतिभाति। स्थितप्रज्ञता हि व्यावहारिकावस्थोपयोगिनीति पूर्व्वमुक्तम्। "अशिरस्कं हकाराभमशेषाकारसंस्थितम्। अजस्रमुच्चरन्तं स्वं तमात्मानमुपास्महे॥" (यो, वा, १८अ, २६श्लो) इत्यत्र योगतत्त्वमिदं निहितमस्ति। तद्यथा, अशिरस्को हकारो हि लुप्तोऽकारः, स यथा ककाराद्यशेषाकारे निगूढोऽप्यात्मानमजस्रमुच्चरति, तथाशेषाकारे पदार्थे निलीनोऽयं सर्व्वान्तरात्माऽजस्रमात्मानमहमस्मीत्युच्चरति सर्व्वत्र स्वकर्त्तृत्वाविष्करणेन। "मयि सर्व्वमिदं प्रोतं सूत्रे मणिगणा इव।" (७।७) इत्यादिषु तत्त्वमिदं द्रष्टव्यम्। ब्रह्मार्पणमित्युपलक्षणम्, आहारादिषु सर्व्वत्र ब्रह्मदृष्टिर्योगाकाङ्क्षिणा कर्त्तव्या, सिद्धस्य तु सा स्वाभाविकी। श्रीमता शङ्करेण ज्ञानयज्ञप्रधानोऽयमध्यायोऽतोऽर्पणादौ ब्रह्मदृष्टिरयुक्ता, तथाच सति प्रतीकब्रह्मणोर्भेदबुद्धिर्न विलुप्यते इत्युक्तं तदस्माभिर्नोदर्त्तव्यं, "सत्यं भूतमयं जगत्" इत्यसकृदुदाहृतन्यायानुसरणेन। "नैव किञ्चित् करोमि" इत्यादिकन्त्वहंग्रहे सर्व्वत्र ब्रह्मदर्शने स्वात्मकर्त्तृत्वविलोपात् सिध्यतीत्यस्माकं पक्षो दोषशून्य एव। यत्तु तेन ज्ञानयज्ञेन सर्व्वथा कर्मविलोपो मन्यते, तत्त्वनवधानात् "तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः। छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥" इत्यनेनोपसंहृतोऽध्यायो न त्वसम्भावितायज्ञलक्षणेन ज्ञानेन। २४।

दैवमेवापरे यज्ञं योगिनः पर्य्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥
श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥

यज्ञोपकरणेषु ब्रह्मदृष्टिं यज्ञकर्त्तरि चाहंग्रहमुपदिश्य भिन्नकर्त्तृकाणि विविधानि कर्म्माण्यनुष्ठेयानि सन्ति, तानि प्रवक्तुमुपक्रमते दैवमिति। अपरे योगिनः कर्मयोगिनः देवा इन्द्रादय इज्यन्ते येन स देवस्तं देवार्चनारूपं यज्ञं दर्शपूर्णमासज्योतिष्टोमादिकं पर्य्युपासते सम्यगनुतिष्ठन्ति। अपरे ब्रह्माग्नौ यज्ञेन यज्ञसाधनेन स्रुवादिना यज्ञं ब्रह्मात्मकमाज्यादिद्रव्यं जुह्वति होम एव निष्ठां कुर्व्वन्तीत्यर्थः। अत्र श्रीमच्छङ्करस्तदनुयायिनश्च ब्रह्माग्नौ सत्यज्ञानानन्दरूपे यज्ञं प्रत्यगात्मानं यज्ञेनात्मना उपजुह्वति तत्स्वरूपतया पश्यन्तीत्यर्थं निष्पादयन्ति। श्रीमद्विश्वनाथ इममेव पक्षमाश्रित्य 'यज्ञेन प्रणवरूपेण मन्त्रेण' इति विशेषमाह। २५।

यज्ञान्तरमाह श्रोत्रादीनीति। अन्ये श्रोत्रादीनीन्द्रियाणि संयमा एवाग्नयस्तेषु तत्तदिन्द्रियसंयमरूपेष्वग्निषु जुह्वति तानि निरुध्य संयमपरास्तिष्ठन्तीत्यर्थः। अन्ये शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति, "युक्ताहारविहारस्य युक्तचेष्टस्य कर्म्मसु। युक्तस्वप्नावबोधस्य" (६।१७) इति नियममाश्रित्य भगवदाज्ञापालनपरा यथोपयुक्तान् विषयान् सेवन्त इत्यर्थः। यज्ञत्वमस्य विहितमनुगीतायाम्, यथा—"अग्निर्वैश्वानरो मध्ये सप्तधा दीप्यतेऽन्तरा॥ घ्राणं जिह्वा च चक्षुश्च त्वक् च श्रोत्रञ्च पञ्चमम्।; मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्चिषः॥ घ्रेयं दृश्यञ्च पेयञ्च स्पृश्यं श्राव्यं तथैव च। मन्तव्यमथ बोद्धव्यं ताः सप्त समिधो मम॥ घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः। मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विजः॥ घ्रेये पेये च दृश्ये च स्पृश्ये श्रव्ये तथैव च। मन्तव्ये प्यथ बोद्धव्ये सुभगे पश्य सर्व्वदा। हवींष्यग्निषु

सर्व्वाणीन्द्रियकर्म्माणि प्राणकर्म्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥
अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ।
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ॥२९॥

होतारः सप्तधा सप्त सप्त ॥" (१०अ, १८—२३श्लो) इति । सर्व्वाणि स्वाभाविकानि कर्म्माणि ते यज्ञत्वेन पश्यन्ति । २६ ।

किञ्च सर्व्वाणीति । अपरे कर्म्मयोगिनः सर्व्वाणि इन्द्रियकर्म्माणि ज्ञानेन्द्रियाणां श्रोत्रादीनां श्रवणदर्शनादीनि कर्म्मेन्द्रियाणां वाक्पाण्यादीनां वचनादानादीनि, प्राणकर्म्माणि आकुञ्चनप्रसारणश्वासप्रश्वासादीनि ज्ञानदीपिते ज्ञानेन ध्येयविषयेण देहेन्द्रियप्राणमनोव्यतिरिक्तात्मज्ञानेन दीपिते प्रज्वलिते विवेकविज्ञानेनोज्ज्वलभावसम्पादिते आत्मसंयमयोगाग्नौ आत्मनो मनसः संयम एव योगः स एवाग्निस्तस्मिन् जुह्वति होमं सम्पादयन्ति ; मनसा इन्द्रियाणां प्राणानाञ्च विरुद्धगतिनिवारणाय प्रयतन्त इत्यर्थः । २७ ।

एवं संयमयज्ञमभिधाय पञ्चयज्ञानाह द्रव्ययज्ञा इति । तथाऽपरे कर्म्मयोगिनः द्रव्ययज्ञाः द्रव्यदानमेव यज्ञो येषां ते द्रव्ययज्ञाः, तपोयज्ञाः तपः कृच्छ्रव्रतोपवासादि एव यज्ञो येषां ते तपोयज्ञाः, योगयज्ञाः योगः सङ्गफलत्यागपूर्व्वकं नित्यानां कर्म्मणामनुष्ठानं स एव यज्ञो येषां ते योगयज्ञाः, स्वाध्यायः यथाविधि वेदाभ्यासः स एव यज्ञो येषां ते स्वाध्याययज्ञाः, ज्ञानयज्ञाः शास्त्रार्थपरिज्ञानं यज्ञो येषां ते ज्ञानयज्ञाः, यतयः प्रयत्नशीलाः, संशितव्रताः सम्यक् निशितं तीक्ष्णीकृतं व्रतं येषां ते संशितव्रताः दृढसङ्कल्पा इत्यर्थः । २८ ।

प्राणायामं प्राणनिरोधकं यज्ञमाह अपान इति । तथाऽपरे

अपाने अधोवृत्तौ प्राणमूर्द्ध्ववृत्तिं जुह्वति क्षिपन्ति, वाह्यतः श्वासमानीय अन्तर्धारयन्ति, तथाऽधोवृत्तिमपानम् ऊर्द्ध्ववृत्तौ प्राणे जुह्वति वहिः प्रच्छर्दयन्ति ; प्राणापानगती रुद्धा ऊर्द्धाधोगतिनिरोधेन समौ तौ नासाभ्यन्तरचारिणौ कृत्वा (५।२७) प्राणायामपरायणाः प्राणस्यायामो गतिविच्छेदस्तत्साधनपरायणाः भवन्ति। कोऽयं प्राणायामः ? "श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" (प, सू, २।४९), "वाह्यस्य वायोराचमनं श्वासः, कौष्ठस्य वायोर्निःसारणं प्रश्वासस्तयोर्गतिविच्छेद उभयाभावः प्राणायामः" (प, भा,)। "वाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः" (प, सू, २।५०)—"स तु वाह्यवृत्तौ रेचकः, आन्तरवृत्तिः पूरकः, अन्तःस्तम्भवृत्तिः कुम्भकः, त्रिविधोऽयं देशेन द्वादशाङ्गुलप्रमाणेन, कालेन षट्त्रिंशन्मात्रादिना, संख्यया इयतो वारान् कृत इति भेदेनोपलक्षितो दीर्घसूक्ष्मसंज्ञो भवति" (यो, च) इति। दृश्यते चायं श्वेताश्वतरोपनिषदि "प्राणान् प्रपीड्येह संयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत। दुष्टाश्वयुक्तमिव वाहमेनं विद्वान् मनो धारयेताप्रमत्तः॥" (२।९) इति। ननु स्वाभाविकमार्गानुसारिण आचार्य्यस्य किमिदं न स्वमतं परिहाय विपथगमनम् ? यदि बहवः प्राणायामाभ्यासपरायणा विकृतमार्गानुसारिणोऽभवन् दुष्प्रतिविधेयरोगैराक्रान्ताः स्खलितवृत्ताश्च, स्वाभाविकमार्गे स्थितानां न तेन कदाप्युत्पथगामिता सम्भवेत् ; नाप्याचार्य्यस्यास्वाभाविकपथानुमोदननिन्दा च। "निरोधच्छर्दि विधारणाभ्याम्" (३अ, ३३सू,) इति सांख्यसूत्रेण, "प्रच्छर्दनविधारणाभ्यां प्राणस्य" (१अ, ३८सू,) इति पातञ्जलसूत्रेण स्वाभाविकयोः श्वासप्रश्वासयोर्नियमनमेवाभिप्रेतम्। श्वासप्रश्वाससहयोगिन्यात्मचिन्ता परमात्मचिन्ता वा तयोर्यमिह स्वभावतो गतिच्छेदं साधयति, स एव प्राणायामः। चिन्तायाः प्रगाढ़त्वे पुनर्नासामतिक्रम्य न तयोरन्तर्वाह्ये वा प्रसरणं भवति। देशकालसंख्यासु द्वादशाङ्गुलिपरिमितदेशः षट्त्रिंशन्मात्रादयो यन्निर्द्दिष्टा न त ऐकान्तिकाः ; अतएवाह भाष्यकारः सामान्यतः, "त्रयोऽप्येते, देशेन

सर्व्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ।
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥३०॥

परिदृष्टः—इयानस्य विषयो देश इति, कालेन परिदृष्टः—क्षणानामियत्तावधारणेनावच्छिन्न इत्यर्थः, संख्याभिः परिदृष्टः—एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातः, तद्वन्निगृहीतस्यैतावद्भिर्द्वितीय उद्घातः, एवं तृतीयः, एवं मृदुरेवं मध्य एवं तीव्र एवं संख्यापरिदृष्टः। स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः" इति। किमत्र तत्त्वम्? जीवानां चिन्ता देशकालतः परिच्छिन्ना, सुतरां चिन्ताया व्याप्तिं देशे काले च पश्यन्, तस्या विच्छेदेनारम्भेण च संख्यां विगणयन् अधिककालसंख्याव्यापित्वेन दीर्घत्वं, स्वाभाविकभावेन प्रसरणात् सूक्ष्मत्वं निर्णयन्नाह "त्रयोऽप्येते देशेन परिदृष्टाः" इत्यादि। नास्मिन् शास्त्रे न पातञ्जलसूत्रे वा कुत्रा-पुरकम्—"दक्षिणनासापुटमङ्गुल्यावष्टभ्य वामेन वायुं पूरयेद्यथाशक्ति, ततोऽनन्तरमुत्सृज्यैव दक्षिणेन पुटेन समुत्सृजेत्; सव्यमपि धारयेत्। पुनर्दक्षिणेन पूरयित्वा सव्येन समुत्सृजेत् यथाशक्ति" इति। चिन्तया स्वाभाविकश्वासप्रश्वासगतिविच्छेदस्येदमनुकरणम्। नानेन कृतार्थता, प्रत्युत रोगोत्पत्तिर्लक्ष्यविच्युतिश्च। अपरे नियताहारा नियतः परि-मित आहारो येषां ते नियताहाराः सन्तः प्राणान् ज्ञानेन्द्रियकर्म्मे-न्द्रियरूपान् प्राणेषु परिक्षीणविरुद्धगतिषु जुह्वति, तत्तदिन्द्रियवृत्तिलयं विरुद्धभावपरिहारपूर्व्वकमात्मनैकभावापन्नतारूपं होमं भावयन्ती-त्यर्थः। श्रीमद्रामानुजस्तदनुयायिनश्च नियताहारा इति विशेषणं त्रिचप्यनुषज्य 'प्राणापानगती रुद्ध्वा प्राणान् प्राणेषु जुह्वति' इत्यन्वयमनु-मोदयन्ति। श्रीमन्मधुसूदनः "वाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" (प, सू. २य, ५१सू) इति सूत्रमत्र योजयति। एतेन वाह्याभ्यन्तरविषय-निरपेक्ष एव सर्व्वविधप्रक्रियानपेक्षो वा स्तम्भरूपो गतिविच्छेदो भव-तीत्यायाति। आत्मनि भगवति वा गाढ़ानुरागे सञ्जाते भवत्ययं स्वभावत एव। २९।

एवं द्वादशविधान् यज्ञानुक्त्वा तद्विदां फलमाह सर्व्वे इति। एते

नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥३१॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्म्मजान् विद्धि तान् सर्व्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२

श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।
सर्व्वं कर्म्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥

सर्व्वेऽपि यज्ञविदः यज्ञक्षयितकल्मषाः यज्ञैः क्षयितं नाशितं कल्मषं पापं येषां ते यज्ञक्षयितकल्मषाः, यज्ञशिष्टामृतभुजो यज्ञानां शिष्टं यज्ञशिष्टं यदमृतम् अन्नादि तद्भुञ्जत इति यज्ञशिष्टामृतभुजः सनातनं चिरन्तनं ब्रह्म यान्ति ब्रह्मानुध्यानप्रधानैस्तैर्यज्ञैः क्षयितपापा ब्रह्म प्राप्नुवन्ति। ३०।

नायमिति। अयज्ञस्य यज्ञमकुर्व्वतः नायं लोकोऽल्पसुखोऽस्ति, हे कुरुसत्तम, कुतोऽन्यो मोक्षलभ्यो लोकः। ३१।

एवमिति। एवं बहुविधा यज्ञा ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेण वितता विहिताः। "यज्ञा वितता विस्तीर्णा ब्रह्मणः परमात्मनो मुखे आस्ये" इति श्रीमद्धनूमान्। तान् सर्व्वान् कर्म्मजान् कायिकवाचिकमानसकर्म्मोद्भवान् विद्धि जानीहि। एवं कर्म्मतत्त्वं ज्ञात्वा विमोक्ष्यसे विमुक्तो भविष्यसि। ३२।

आत्मानुसन्धानं विना द्रव्यमययज्ञानुष्ठानेन न कृतार्थता, अतएव ज्ञानयज्ञस्य श्रेष्ठत्वमाह श्रेयानिति। हे परन्तप, द्रव्यमयाद्यज्ञात् विविधबाह्योपकरणैः साधितात् यज्ञात् ज्ञानयज्ञः "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (वृ, आ, उ, ४।४।५) इति श्रवणमननिदिध्यासनप्रधानात्मानुसन्धानरूप एव यज्ञः श्रेयान् प्रशस्यतरः। ज्ञाने सर्व्वं कर्म्म अखिलम् अविद्यमानं खिलं शेषोऽस्येत्यखिलं निःशेषं साङ्गं परिसमाप्यते समाप्तीभवति पूर्णतामापद्यते ; वैदिकस्य निखिलस्य द्रव्यमयस्य कामकृतस्य कर्म्मणो ज्ञानोत्पत्तौ ब्रह्मानुसन्धानं

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥३४॥
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥
अपि चेदसि पापिभ्यः सर्व्वेभ्यः पापकृत्तमः ।
सर्व्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥३६॥

विनाननुष्ठेयत्वात् । ज्ञानोदयात् प्राक् सर्व्वाणि कर्म्माणि बन्धहेतुभूतानि, कर्म्मानुष्ठानस्य तदा स्वात्मकर्त्तृत्वत्यागेन भगवदाज्ञापालनरूपस्य मूलोद्देश्यस्यापरिज्ञानात् । आत्मज्ञानप्रोद्भासितान्तःकरणेन कर्म्मानुष्ठेयमिति "ज्ञानासिनात्मनः, छित्त्वैनं संशयं योगमातिष्ठ" इत्युक्तिराचार्य्यस्य स्फुटं ज्ञापयति । ३३ ।

तज्ज्ञानप्राप्त्युपायमाह तद्विद्धीति । तत्त्वदर्शिनो ज्ञानिनः प्रणिपातेन परिप्रश्नेन सेवया ते तुभ्यं तत् ज्ञानमुपदेक्ष्यन्ति, उपदेशेन सम्पादयिष्यन्ति । ३४ ।

तस्य ज्ञानस्य लक्षणं फलञ्चाह यदिति । हे पाण्डव, यत् ज्ञानं ज्ञात्वा न पुनरेवं मोहं देहात्माभिमानरूपं तत्कृतममतास्पदं न यास्यसि न गन्तासि । कथं वा स्यान्मोहापनयः ? येन ज्ञानेन अशेषाणि भूतानि पितृपुत्त्रादीनि आत्मनि, अथो तदनन्तरं मयि सर्व्वान्तर्य्यामिणि द्रक्ष्यसि । न केनाप्यात्मना कस्मिन्नपि समये विच्छेदो भवेदिति ज्ञात्वा स्वस्थो भविष्यसीति भावः । ३५ ।

आत्मनि सर्व्वान्तर्य्यामिणि च सर्व्वभूतानां दर्शनेन न केवलं विच्छेदजनितशोकापनयः, किन्तर्हि पापविमुक्तिरपीत्याह अपि चेदिति । पापिभ्योऽपि चेत्त्वं पापकृत्तमोऽसि, ज्ञानप्लवेनैव सर्व्वं वृजिनं पापार्णवं सन्तरिष्यसि अतिक्रमिष्यसि । आत्मसाक्षात्कारे भगवत्साक्षात्कारे न पुनः पापस्पृहा तिष्ठति, विषयवासना च निवृत्ता भवति, "विषयेषु

यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन ।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा ॥३७॥
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥३८॥

गरिष्ठोऽपि रागो यत्र विलीयते" (ह, भ, र, सि,) इति न्यायात् । अस्यामवस्थायामनुतापेन पूर्व्वपापं निस्पृहत्वेन च भविष्यत्पापं निरोधत्ते । ३६ ।

कर्म्मणां बन्धकत्वं ज्ञानेनैव विनश्यतीत्याह यथेति । हे अर्ज्जुन, समिद्धः सम्यक् दीप्तोऽग्निः यथा एधांसि इन्धनानि भस्मसात् भस्मीभावं कुर्व्वन्ति तथा ज्ञानाग्निः सर्व्वकर्म्माणि बन्धकानि भस्मसात् कुरुते तद्दोषमपहरति । "यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः । तदर्थं कर्म्म कौन्तेय मुक्तसङ्गः समाचर ॥" (३।९) इति भगवदाराधनतदाज्ञापालनरूपाणि कर्म्माणि नात्राभिप्रेतानि, किन्तर्हि तान्येव यानि रागद्वेषेरितानि कामकृतानि । न खलु वक्तव्यम, शास्त्रस्य विद्वदधिकृतत्वादविद्वद्विषयाणि रागद्वेषकृतानि कर्म्माण्यत्र वक्तव्यत्वेन न ग्रहीतव्यानीति ; "सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥" (३।३३) इति ज्ञानवन्तमधिकृत्यैव रागद्वेषाधीनताया उक्तत्वात् । सर्व्वकर्म्माणीति विशेषणबलात् भगवदाराधनतदाज्ञापालनरूपाणि कर्म्माण्यप्यत्रान्तर्भूतानीति न मन्तव्यम्, शास्त्रेऽस्मिन् तादृशकर्म्मणां नित्यानुसरणीयत्वेनाभिहितत्वात् । सर्व्वाण्येतच्छास्त्रविरुद्धानि कर्म्माण्येवात्रत्यपद्यविषयाणीति सुधीभिर्विवेच्यम् ।३७

न हीति । न हि ज्ञानेनात्मज्ञानेन सदृशं पवित्रं शुद्धिकरमिह विद्यते । तत् ज्ञानं योगसंसिद्धः कर्म्मयोगेन संसिद्धः योग्यतां प्राप्तः कालेन यथासमयम् आत्मनि स्वयं विन्दति लभते । "ज्ञानाकारकर्म्मयोगेन संसिद्धः" इति श्रीमद्रामानुजः । किमयं ज्ञानाकारकर्म्मयोग इति ? "गुणा गुणेषु वर्त्तन्ते इति मत्वा" (३।२८) सर्व्वान्तर्यामिणि

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥३९॥
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥४०॥

"सर्व्वाणि कर्म्माणि सन्न्यस्याध्यात्मचेतसा । निराशीर्निर्म्ममो भूत्वा" (३।३०) अनुष्ठितानि कर्म्माणि ज्ञानाकारकर्म्मयोगाख्यायोग्यानि । येषु कर्म्मस्वीदृशं ज्ञानं न विद्यते, न ततो जात्वात्मज्ञानं परमात्मज्ञानं वा स्फुटमुद्भिद्यते । अतः श्रीमद्रामानुजीया व्याख्या कर्म्मयोगघटिता सर्व्वथादरणीया । उद्भिन्नमपि ज्ञानं न कर्म्म जहाति विस्पष्टमस्मद्-व्याख्याने । ३८ ।

कोऽयं ज्ञानमिदं लभते तदाह श्रद्धावानिति । श्रद्धावान्—"ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः । श्रद्धावन्तोऽनसूयन्तः" (३।३१) इत्यत्रोक्त आचार्य्यमते श्रद्धाशीलः, तादृशज्ञानभक्तिकर्म्मयोगोपदेशदातरि वा श्रद्धायुक्तः, श्रद्धायुक्तत्वेऽपि स्खलनं दृश्यते, अत आह तत्परः, तत् ज्ञानं परं प्रधानं यस्य ज्ञाननिष्ठः, ज्ञाननिष्ठत्वेऽपि गुणसम्मूढ़ता सम्भवति, अत आह संयतेन्द्रियः संयतानि विषयेभ्यो निवर्त्तितानीन्द्रियाणि यस्य स संयतेन्द्रियः, ज्ञानं लभते स्फुटोद्भिन्नमात्मज्ञानं परमात्मज्ञानञ्च लभते । ज्ञानं लब्ध्वा, अचिरेण क्षिप्रं परां शान्तिं मोक्षाख्याम् अधिगच्छति प्राप्नोति । ३९ ।

ज्ञानलाभयोग्यलक्षणान्युक्त्वा तदयोग्यं वर्णयति अज्ञश्चेति । अज्ञश्च मदुक्तमतमभ्यसूयन्ननुतिष्ठन् सर्व्वज्ञानविमूढ़ोऽचेताश्च (३।३२), अश्रद्दधानश्च तत्र श्रद्धाशून्यः संशयात्मा "कर्म्मभिर्मुच्यन्ते" (३।३१) इत्युक्तौ संशयवान् विनश्यति विनाशं गच्छति, तदुक्तमाचार्य्येण "विद्धि नष्टान्" (३।३२) इति । संशयात्मनः संशयवतोऽयं लोको नास्ति सदा संशयाकुलचित्तत्वादिह भोगसुखेऽपि न कृतार्थतास्ति, न परः स्वर्गाख्यः परलोकः; तत्रत्यसुखमपि न तस्मिन् सम्भवति । ४० ।

योगसन्न्यस्तकर्म्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्म्माणि निबध्नन्ति धनञ्जय ॥४१॥
तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४२॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानयोगो नाम चतुर्थोऽध्यायः ।

अधुनाध्यायान्ते प्रधानवक्तव्यत्वेन ज्ञानं कर्म्म भक्तिञ्च समुच्चिनोत्यविरोधित्वेन योगेति । योगेन यथोपदिष्टेन कर्म्मयोगेन सन्न्यस्तानि समर्पितानि कर्म्माणि येन तं योगसन्न्यस्तकर्म्माणं भक्तिविशेषमाश्रयवृत्तं ज्ञानसंछिन्नसंशयं ज्ञानेनात्मज्ञानेन परमात्मज्ञानेन च संछिन्नः संशयो यस्य स ज्ञानसंछिन्नसंशयः आत्मवन्तम् अप्रमत्तम् • अन्नपानादिभ्यः सर्व्वेभ्य आत्मैव पर इति ज्ञानसम्पन्नं कर्म्माणि नित्यानुष्ठितानि न निबध्नन्ति नानिष्टफलमारभन्ते । ४१ ।

यस्मादेवं तस्मादिति । तस्मादात्मनः अज्ञानसम्भूतं हृत्स्थम् एनं संशयं भगवदाराधनतदाज्ञापालनरूपेण कर्म्मणा न मुच्यत इति सन्देहं ज्ञानासिना छित्त्वा योगं प्रोक्तं कर्म्मयोगं, हे भारत, आतिष्ठ कुरु, समुत्तिष्ठ स्वयमुपस्थिताय युद्धायेति शेषः । ४२ ।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

अर्ज्जुन उवाच—

सन्न्यासं कर्म्मणां कृष्ण पुनर्योगञ्च शंससि ।

यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१॥

"सर्व्वं कर्म्माखिलं पार्थ ज्ञाने परिसमाप्यते" (४।३३) इत्यनेन निखिलकर्म्मसमापनमुक्त्वा पुनरध्यायान्ते स आह "योगसन्न्यस्तकर्म्माणं ज्ञानसंछिन्नसंशयम्। आत्मवन्तं न कर्म्माणि निबध्नन्ति धनञ्जय ॥ तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः। छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥" (४।४१।४२) इति कर्म्मणः कर्त्तव्यत्वेनोपस्थापनं संशयजनकमिति पृच्छत्यर्ज्जुनः सन्न्यासमिति। कर्म्मणां सन्न्यासं त्यागरूपं पुनर्योगञ्च कर्म्मयोगञ्च शंससि कथयसि, एतयोः कर्म्मसन्न्यासकर्म्मयोगयोः यच्छ्रेयः तत् मे सुनिश्चितं ब्रूहि। "योगसन्न्यस्तकर्म्माण"मित्यनेनाचार्य्यः कर्म्मसन्न्यासं सर्व्वथा कर्म्मत्यागमवोचदिति कथनमनवधानात्, तस्मिन्नेव पद्ये 'न कर्म्माणि निबध्न' इत्युक्तत्वात्; "मयि सर्व्वाणि सन्न्यस्य" (३।३०) इति ज्ञापकेन सन्न्यस्तस्य समर्पितार्थ एव। "श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः (४।३३)" इत्यत्र वैदिकाद्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञस्य श्रेष्ठत्वमुक्त्वा तस्यैव परिसमाप्तिराचार्य्येणाभिप्रेतेत्यस्य "सर्व्वं कर्म्माखिलम्" इत्यस्मिन् 'सर्व्वमखिल'मिति विशेषणद्वयं झटिति दृष्टौ प्रतिभासनं प्रतिबध्नाति। अतस्तदविषदत्वनिबन्धनं यत् सर्व्वथा [illegible] तदेव बुद्धिगोचरे समानीयार्ज्जुनस्य परिप्रश्नः। "आत्मविदो निवृत्तमिथ्याज्ञानत्वाद्विपर्य्ययज्ञानमूलस्य कर्म्मयोगस्यासम्भवः" इत्युक्तिस्तु मूलत एवानादृतास्माभिस्तत्संस्कारैरिता युक्तिश्च। १।

श्रीभगवानुवाच—

सन्न्यासः कर्म्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्म्मसन्न्यासात् कर्म्मयोगो विशिष्यते ॥२॥
ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते ॥३॥

आरब्धे पुनः साधकस्य भिन्नप्रकृतिकस्य ज्ञानयोगेन कर्म्मयोगेन वा साधनमुपलभ्यते ; सम्यगास्थित एकतरेऽप्यन्य उपतिष्ठते इति प्रदर्शितमस्माभिस्तृतीयेऽध्याये श्लोके प्रथमे (६८५,)। प्रश्नोत्तरे प्रथमत एवाचार्य्येण तत्प्रोक्तो नवीनतरः कर्म्मयोग एव विशेष इत्युच्यते तेन विनान्यद्योगद्वयं न तिष्ठत्विति वेत्येतदपि तत्रैव प्रदर्शितमस्माभिः । अधुना तदेव व्यक्ततरं भविष्यत्याचार्य्यवाक्येन सन्न्यास इति । सन्न्यासः, कर्म्मसन्न्यासः, ज्ञानयोगः । ज्ञानयोगः कर्म्मयोगश्च उभौ निःश्रेयसकरौ मोक्षसाधकौ ; सम्यगेकतरस्याभ्यासेनापरस्यापि फललाभात् । तयोः सन्न्यासकर्म्मयोगयोश्च कर्म्मसन्न्यासात् सर्व्वथा कर्म्मत्यागात् कर्म्मयोगो विशिष्यते ; सर्व्वथा कर्म्मत्यागासम्भवात्, त्यागे मिथ्याचारत्वात्, इतरयोगद्वयस्य कर्म्मोपजीव्यत्वात्, कर्म्मार्पणेन सन्न्यासस्य कर्म्मयोगेनाभिन्नत्वात् विशेषः । अनन्तरं यद्यदुक्तमाचार्य्येण तेन तेन चैयमेव व्याख्या सम्यक् । 'कर्म्मसन्न्यासात् केवलात् कर्म्मयोगो विशिष्यते', 'कर्म्मसन्न्यासादनधिकारित्वात् कर्म्मयोगो विशिष्यते' इत्याद्युक्तयस्तु संस्कारदोषमेव व्यञ्जन्ति । सत्यानुरोधात् श्रीमच्छङ्करानुयायिना श्रीमता हनूमता व्याख्यातम्—"तयोस्तु कर्म्मसन्न्यासात् कर्म्मत्यागात् कर्म्मयोगः श्रेयान् कर्म्मणां ज्ञानफलत्वेन विशेषविधानात् 'स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति'" इति । कथमाचार्य्योक्तस्य नवीनतरस्य कर्म्मयोगस्य विशेषत्वमित्यनन्तरश्लोके दर्शयिष्यामः । २ ।

सन्न्यासस्य कर्म्मयोगेनाभिन्नत्वमुच्यते ज्ञेय इति । यो भगवदाज्ञापालनैकचित्तोऽनीप्सितमपि कर्त्तव्यं कर्म्म न द्वेष्टि, कर्म्माव्यवहितात्मा-

नुभवानन्दपरितृप्तस्ततोऽन्यत्कर्म्मणा किञ्चिन्न काङ्क्षति, स कर्म्मयोगी नित्यसन्न्यासी नित्यं कर्म्मानुष्ठानकालेऽपि सन्न्यासी। एवम्भूतो योगी हि यस्मात् निर्द्वन्द्वः रागद्वेषादिद्वन्द्वशून्यः, तस्मात् सुखमनायासेन प्रमुच्यते मुक्तो भवति। श्रीमच्छङ्करोऽत्र कर्म्मयोगिनः सन्न्यासित्वं स्वीकृतवान्, तस्य रागद्वेषविरहितत्वात्। भाष्यानुसारेण श्रीमद्गिरिरपि कर्म्मयोगिनो नित्यसन्न्यासित्वज्ञानमन्यथाज्ञानत्वान्मिथ्याज्ञानमित्याशङ्कां निवार्य्याह 'कर्म्मिणोऽपि रागद्वेषाभावेन सन्न्यासित्वं ज्ञातुमुचितम्' इति।

कथं वाचार्य्येण तदुक्तस्य कर्म्मयोगस्य विशेषत्वं प्रख्यापितं, तदत्र विचार्य्यमभिव्यक्तिक्रमपर्य्यालोचनया। न हि जात्वन्तर्यामिणा विरहितो जनसमाज आसीत्। संहिताकालेऽप्यादिकामना या स्तोत्रेषु दृश्यते, न सा पुनरन्तर्यामिप्रेरणाविरहितेति मन्तव्यम् ; बाल्ये क्षुत्पिपासादिदैहिकाभावप्रपीड़ितानां बालानां तदर्थं रोदनं न स्वभावमतिक्रामति, तथैव वैदिकर्षीणाम्। यदा पुनस्तेषामाध्यात्मिकजीवनारम्भोऽभूत्, तदा बालोचितभावं ते कुटिलकटाक्षैरद्राक्षुः। अतो दृश्यते ब्राह्मणविभागे,—"आत्मयाजी श्रेयान्। देवतायाजीत्यात्मयाजीति ह ब्रूयात्। स ह वै आत्मयाजी यो वेद, 'इदं मे अनेनाङ्गं संस्क्रियते ; इदं मे अनेनाङ्गमुपाधीयते' इति। स यथाहिस्त्वचो निर्म्मुच्येत, एवमस्मान्मर्त्यात् शरीरात् पाप्मनो निर्म्मुच्यते ; स ऋङ्मयो यजुर्म्मयः साममय आहुतिमयः स्वर्गं लोकमभिसम्भवति। अथ ह स देवयाजी यो वेद देवानेव, 'अहमिदं यजे, देवान् समर्पयामि' इति स यथा श्रेयसे पापीयान् बलिं हरेत्, वैश्यो वा राज्ञे बलिं हरेत्, एवं सः। स ह न तावन्तं लोकं जयति यावन्तमितरः।" (श, प, ब्रा, ११।२।६।१३) इति। वेदान्तसमये वेदविहितान्यनुष्ठानान्यधःकृत्वाऽध्यात्मज्ञानमेव सर्व्वोच्चस्थानमधिकृतवत्। तद्यथा—"अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः। द्रन्द्रम्यमाणाः परियन्ति मूढ़ा अन्धेनैव नीयमाना यथान्धाः॥ न साम्परायः प्रतिभाति बालं

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

प्रमाद्यन्तं वित्तमोहेन मूढ़म् । अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ॥ श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विदुः । आश्चर्य्यो वक्ता कुशलोऽस्य लब्धाश्चर्य्यो ज्ञाता कुशलानुशिष्टः ॥" (कठ, २।७) इति । "अविद्यायां बहुधा वर्त्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः । यत् कर्म्मिणो न प्रवेदयन्ति रागात् तेनातुराः क्षीणलोकाश्च्यवन्ते ॥ इष्टापूर्त्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढ़ाः । नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति ॥" (मु, उ, १।२।८।१०) इति च । आत्मज्ञानपक्षपातिनः, "अथ धीरा अमृतत्वं विदित्वाऽध्रुवमध्रुवेष्विह न प्रार्थयन्ते" (कठ, ४।२) इत्यध्रुवविषयप्रार्थनां तत्प्राप्तिकारणानि च कर्म्माणि नाद्रियन्त । न जातु जनो वा जनसमाजो वा कर्म्मशून्यो भवितुं क्षमोऽतो वेदान्तवादिभिरवज्ञाता अपि बहवः कर्म्मनिरता आसन्, ये तु कर्म्मदोषदर्शिनस्तेऽधमज्ञानेन तान् नियतमनिन्दन् । एवं विवदमानानां कर्म्मिणां ज्ञानिनाञ्चैकताविधानायाचार्य्यो योगशब्दवाच्यं कर्म्मोपदिष्टवान् । योगेऽस्मिन् न केवलं कर्म्म, किन्त्वात्मज्ञानेन परात्मज्ञानेन च विशेषतां प्राप्तं योगाभिधं कर्म्म प्रतिव्यक्तिनिष्ठस्वभावानतिक्रमणेन तेन च भगवदाराधनं तदाज्ञापालनञ्चोपादिशत् । एवं वेदसिद्धां देवविषयिणीं भक्तिं रूपान्तरेण सर्व्वान्तर्यामिणि परमपुरुषे नियोज्य कर्म्मणो ज्ञानस्य भक्तेश्चाभिन्नभावत्वं साधितं तेन । एवञ्च कर्म्मज्ञानभक्तिसमन्वितः कर्म्मयोगो विशिष्ट एव । अयं हि चिरन्तनकीर्त्तिस्तम्भ आचार्य्यजीवनस्य, गीताशास्त्रप्रणयनस्य च लक्ष्मिदमेव । ३ ।

कर्म्मयोगज्ञानयोगयोः सप्रतिपत्तिकमेकत्वं दर्शयितुमाह सांख्ययोगाविति । सांख्ययोगौ सांख्यं ज्ञानं योगः कर्म्मयोगस्तौ पृथक्

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति ॥५॥
सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥६॥

बालाः प्रवदन्ति, न पण्डिताः । कथं न तौ पृथक् ? एकमपि सम्यगास्थितः उभयोः फलं विन्दते लभते । श्रीमता हनूमताच स्वरूपैक्याद्वैव फलैक्यमाह, तद्यथा "योगस्य सन्न्यासयोगत्वात् स्वरूपैक्येन फलैक्यम्" इति । तत्त्वमुक्तं तृतीयेऽध्याये प्रथमे श्लोके (६८पृ,) । ४ ।

तयोरेकत्वदर्शनमेव तत्त्वज्ञानमित्याह यत्सांख्यैरिति । सांख्यैर्यत्स्थानं मोक्षाख्यं प्राप्यते, योगैरपि तत्स्थानं मोक्षाख्यं गम्यते । सम्यगास्थितस्यैकस्यापरेणैकत्वोपस्थित्या स्वरूपतः फलत एकत्वम्, अतएवाह, सांख्यं योगञ्च य एकं पश्यति स पश्यति, स एव सम्यग्दर्शीत्यर्थः । ५ ।

कर्मसन्न्यासस्य कर्मयोगोपजीव्यत्वं दर्शयितुमाह सन्न्यास इति । हे महाबाहो, अयोगतः कर्मयोगं विना सन्न्यासः आप्तुं प्राप्तुं दुःखं दुःखहेतुरशक्य इत्यर्थः । योगयुक्तः कर्मयोगयुक्तः मुनिः मननशीलः न चिरेण अचिरेण क्षिप्रमेव ब्रह्म आत्मानं परमात्मानम् अधिगच्छति प्राप्नोति । किमत्र कारणम् ? कर्मनिरपेक्षज्ञानाभ्यासो न जातु सम्भवति । स्वाभाविकपानभोजनादि, ज्ञानसाधनानि श्रवणमननादीनि, विक्षेपवारणाय मनःसंयमादि, सर्व्वाण्येतानि कर्मजानि । सुतरां ज्ञानाभ्यासे कर्मनिरपेक्षता नास्ति । ये पुनरिदं तत्त्वमुपेक्ष्य कर्मत्यागाभिमानिनस्ते मिथ्याचारा एव । अतएवाहाचार्य्यः, "मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः" (१८।७) इति । यत् पुनर्मोहसम्भूतं न ततो ज्ञानसिद्धिः कदापि सम्भवति, केवलं ज्ञानाभ्यासे यत्नः श्रम एव पर्य्यवस्यति । अत आह 'दुःखमाप्तुमयोगतः' इति । न पुनर्वक्तव्यम्, बहवो जनाः कर्म्मानुष्ठाननिरता दृश्यन्ते, न ते ततो

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्व्वभूतात्मभूतात्मा कुर्व्वन्नपि न लिप्यते ॥७॥

ज्ञानमवाप्नुवन्ति, अतो विफलं कर्म्मानुष्ठानमिति। योगाख्यं भगवति सन्न्यस्तं कर्म्मैवात्मभूतज्ञानस्वहेतोर्ज्ञानोज्ज्वल्यसाधने कारणम्, नान्यत् काममूलकमज्ञानकृतं पुनः। मुनिरिति विशेषणेन तदेवाचार्य्यो दर्शयति। वैदिककर्म्मानुष्ठानेऽपि "ब्रह्मार्पणं ब्रह्म हविः" (४।२४) इति तत्र ब्रह्मदृष्ट्यहंग्रहतावशात् ज्ञानं सिध्यति। साक्षात् कर्मत्यागेन सन्न्यासिनां भ्रष्टाचारित्वमवश्यम्भावि, तदुक्तं वार्त्तिककारैः, "प्रमादिनो बहिश्चेताः पिशुनाः कलहोत्सुकाः। सन्न्यासिनोऽपि दृश्यन्ते दैवसन्दूषिताशयाः॥" इति। ६।

कथं वा कर्मयोगेन नियतप्रवृत्तिमता सन्न्यासः सर्व्वकर्मत्यागरूपज्ञानैकनिष्ठोत्पद्यते तदाह योगयुक्त इति। योगयुक्तः कर्म्मयोगयुक्तः आत्मज्ञानोत्पादके परमपुरुषाराधनरूपे कर्मणि वर्त्तमानः, ततो विशुद्धात्मा विशुद्धचित्तः, ततो विजितात्मा विजितदेहः विजितमनाः, जितेन्द्रियश्च; ततः सर्व्वभूतात्मभूतात्मा सर्व्वेषां भूतानाम् आत्मभूतः प्रेमास्पदीभूत आत्मा यस्य, यद्वा—"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं सात्त्विकं विदुः॥" (१८।२०) इत्यनुसारतः सर्व्वेषां भूतानामात्मभूत आत्माकारतां प्राप्त आत्मा यस्य सर्व्वभूतात्मभूतात्मा प्रेम्णा ज्ञानेन चैकात्मतां प्राप्तः कुर्व्वन्नपि न लिप्यते; कुर्व्वन्नपि न करोति निरभिमानत्वादित्येष युक्तः सन्न्यासः; विपरीतोऽस्य न किञ्चित् करोमि सुखमहं तूष्णीमासमिति वृथाभिमानविजृम्भितो मिथ्याचार एव। ज्ञानेन सर्व्वभूतानामात्माकारताप्राप्तिर्न सर्व्वेषामात्मनां मिथो भेदो निरस्यति 'अविभक्तं विभक्तेषु' इत्युक्तत्वात्। तात्त्विकं विभक्तत्वं ज्ञानाकारेण समं पश्यतो नैकात्म्यवादित्वम्। एवञ्च समदर्शनं वक्ष्यत्याचार्य्यः, "विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि" (५।१८) इत्यादिना। एकात्म्यरयोगोऽयं

नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥८
प्रलपन् विसृजन् गृह्णन्नुन्मिषन् निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्त इति धारयन् ॥९॥

"सर्व्वभूतस्थमात्मानं सर्व्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्व्वत्र समदर्शनः॥" (६।२९) इत्यत्रोक्तः। ७।

'कुर्व्वन्नपि न लिप्यते' इति विवृणोति द्वाभ्यां नैवेति, प्रलपन्निति। युक्तः योगयुक्तः कर्मयोगपरः तत्त्ववित् तत्त्वज्ञः नाहं कर्त्तेति सम्यग्-ज्ञानवान् चक्षुषा पश्यन्, श्रोत्रेण शृण्वन्, त्वचा स्पृशन्, घ्राणेन जिघ्रन्, रसनया अश्नन्, पद्भ्यां गच्छन्, श्रान्तिजनितवहिर्विषयनिवृत्तान्तःकरणेन स्वपन्, प्राणेन श्वसन्, वाचा प्रलपन्, पायुना जननेन्द्रियेण च विसृजन्, हस्तेन गृह्णन्, नागादिप्राणवायुभेदैरुन्मिषन् निमिषन्, एवं कर्म कुर्व्वन्नपि इन्द्रियाणि इन्द्रियार्थेषु स्वस्वविषयेषु वर्त्तन्ते इति धारयन् निश्चिन्वन् अनुसन्दधानः नैव किञ्चित् करोमीति मन्येत। पश्यन्नित्यादिविशेषणैः कर्त्तृत्वमनुभवत इन्द्रियाणि स्वस्वविषयेषु वर्त्तन्ते इति ज्ञानेनात्मकर्त्तृत्वपरिहारेण तत्तत्कर्मसु निर्लिप्तता कथं व सिध्यति? न हीन्द्रियाणि चेतनाप्रेरितानि किञ्चित् कर्त्तुं प्रभवन्ति निमेषोन्मेषश्वासप्रश्वासादीनि यदपि स्वयं प्रवर्त्तन्ते इत्यापाततः प्रति भाति, सूतस्य तदसम्भावनां पश्यतस्तेषामपि कश्चित्प्रेरयितास्तीति प्रतिभासते। अत आत्मनस्तत्सदृशस्य वा कस्याप्यन्यस्य प्रेरणां विन इन्द्रियक्रियाः प्राणक्रिया वा न सम्भवन्तीति तत्त्वतो ज्ञात्वा कोऽ प्रेरयितेत्यनुसन्धाने प्रवृत्ते प्रथमन्तावदात्मैव प्रेरयितेति निर्णीतव्य तद्यथा ऐतरेयोपनिषदि—"कतमः स आत्मा? येन वा रूपं पश्यति येन वा शब्दं शृणोति, येन वा गन्धानाजिघ्रति, येन वा वाचं व्या करोति, येन वा स्वादु चास्वादु च विजानाति" (३।१) इत्यादि। अपि शास्त्रे काम एवेन्द्रियाणां मनसो बुद्धेश्च प्रेरयिता, तद्यथा "इन्द्रिया

ब्रह्मण्याधाय कर्म्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥१०॥

मनो बुद्धिरस्याधिष्ठानमुच्यते । एतैर्विमोहयत्येष ज्ञानमावृत्य देहि-
नम् ॥" (३।४०) इति । ज्ञानं विवेकज्ञानं प्रज्ञानमात्मा वा । ननु
यदैवात्मा काममोहितस्तदैव कामस्य प्रेरयितृत्वम्, अन्यथात्मैव प्रेर-
यिता, अतएव तस्यैव कर्त्तृत्वं सत्यं भवितुमर्हति । यदि तस्यैव कर्त्तृत्वं
सत्यं तदा तदकर्त्तृत्वज्ञानमसत्यम्, असत्यमाश्रित्य निर्लिप्ततासाधनं
मिथ्याचार एव स्यात् । "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न
वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्य-
मृतः" इति, आत्मनः प्रेरयितान्तर्यामी परमात्मैव । स एवेन्द्रिया-
दीनां सर्व्वेषां प्रेरकः, आत्मनः कर्त्तृत्वं तदधीनमेव । यद्येवं कथं
कामस्य प्रेरयितृत्वम् ? न यदा सर्व्वान्तर्यामिप्रेरणाधीनोऽयमिति
वच्मः । ज्ञानावरणकर्म्मा कामो न चान्तर्यामिणैकत्वं भजते, यदि
तथा स्यात्, नाचार्य्येणोच्येत "धर्म्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ"
(७।११) इति । यत्र हि धर्म्माविरुद्धः कामस्तत्र तत्प्रेरयिता स्वयमन्त-
र्य्याम्येव । एकत्रात्मा प्रेरयिता, अन्यत्र कामः, अन्यत्रान्तर्यामी परमा-
त्मेति, किं वात्र तत्त्वम् ? आत्मा यदा परमात्माधीनः तदा तस्य
तदधीनत्वेन प्रेरयितृत्वं, धर्म्मे च तस्य स्थितिः । यदा त्वयं कामा-
धीनः तदा कामाधीनत्वेन प्रेरयितृत्वं पापेऽभिनिवेशश्च । परमात्मा-
धीनत्वेनैवास्यामृतत्वलाभः, तद्यथा 'पृथगात्मानं प्रेरयितारञ्च मत्वा
जुष्टस्तेनामृतत्वमेति ।" (श्वे, उ, १।६) इति । योगयुक्तत्वे पुनः पर-
मात्माधीन आत्मा स्थितप्रज्ञत्वेन व्यवहारेषु प्रवृत्तः, अन्तर्यामिणमिन्द्रि-
यादीनां प्रेरयितारं ज्ञात्वा धर्म्माविरुद्धभावेन भगवत्प्रेरणयैव विषयान्
सेवमानः, तत्रात्मकर्त्तृत्वं न पश्यतीति कुर्व्वन्नपि तस्य निर्लिप्तत्वं
सिध्यति । ८।९ ।

तत्त्वमिदं स्वयमाचार्य्यः प्रस्फुटमुक्तवान् ब्रह्मणीति । ब्रह्मणि पर-

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म्म कुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥११॥

मात्मनि सर्व्वान्तर्यामिणि आधाय समर्प्य सङ्गं फलाभिसन्धिं त्यक्त्वा यः कर्म्माणि करोति, अम्भसा जलेन पद्मपत्रमिव, न स पापेन लिप्यते, तस्य कामसम्बन्धहीनस्य तत्प्रेरणाधीनत्वेन कर्म्माणि प्रवृत्तत्वात्। श्रीमद्रामानुजेन तदनुगामिना श्रीमद्बलदेवेन च ब्रह्मशब्देन "मम योनिर्महद्ब्रह्म" (१४।३) इति वचनात् प्रकृतिं त्रिगुणावस्थं प्रधानं गृहीत्वा प्रकृतौ प्रधाने दर्शनादीनि कर्म्माण्याधायेति व्याख्या कृता, व्याख्येयं "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते॥ तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयोः। गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते॥" (३।२७।२८) "स्वभावस्तु प्रवर्त्तते" (५।१४) इत्यनयोर्विरुद्धैव। प्रकृतेरपि प्रेरयिता सर्व्वान्तर्यामी परमात्मेति तत्त्वालोचनयाऽन्येषामपि व्याख्यातृणां व्याख्यापि सम्यगिति तत्त्वानुरोधात् सैवास्माभिर्गृहीता। १०।

अन्तर्यामिणा प्रेरितः कर्म्म कुर्व्वन् कामकृतवैगुण्यानि जहाति योगीत्याह कायेनेति। कायेन देहेन मनसा बुद्ध्या च केवलैरिन्द्रियैरपि सङ्गं फलाभिलाषं त्यक्त्वा आत्मशुद्धये आत्मगतकामकृतवैगुण्यपरिहाराय कर्म्म कुर्व्वन्ति। कामो हि आत्मना सह व्यज्यते, न कदाप्यन्तर्धत्ते, अतो धर्म्माविरुद्धभावेन तमन्तर्यामिवशगं कृत्वा तद्वैगुण्यापहरणं कर्त्तव्यम्, तद्वैपरीत्ये तु स पुनर्बन्धहेतुर्भवति। को वा हेतुः जिज्ञासायां उत्तरं प्राचीनानां प्राचीनकर्म्मनिमित्तगुणसंसर्गः, अर्व्वाचीनानान्तु पितृपितामहाद्यागतदैहिकमानसिकगुणसंसर्गः। प्राचीनकर्म्मस्वीकारेण भगवतो वैषम्यदोषक्षालने यत्नस्य वैफल्यं श्रीमता शङ्करेणैव दर्शितम्—"हीनमध्यमोत्तमभावेन हि प्राणिभेदान् विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत। प्राणिकर्म्मापेक्षित्वाददोष इति चेत् न, कर्म्मेश्वरयोः प्रवर्त्त्यप्रवर्त्तयितृत्वेतरे-

युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥
सर्व्वकर्म्माणि मनसा सन्न्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्व्वन् न कारयन् ॥१३॥

तराश्रयदोषप्रसङ्गात्। अनादित्वादिति चेत्, न, वर्त्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषादन्धपरम्परान्यायापत्तेः।" (वे, सू, भा, २।२।३७) इति। अतीतानागतशून्यस्येश्वरस्य साक्षान्नित्यविद्यमानया प्रेरणया जीवानुत्तरोत्तरोर्द्ध्वभूमिमारोहयता तेन कामकृतैर्गुणापनयनं प्रतिमुहूर्त्तं साध्यते ज्ञातसारतोऽज्ञातसारतो वेति नात्र वैषम्यनर्घृण्यदोषस्यावसरः। कथं कामस्याभ्युदय इति जिज्ञासा व्यर्था, यतो हि क्रियात्मकस्य तस्य स्वतो न दोषत्वम्। भगवत्प्रेरणाविमुखानां सन्मार्गे प्रत्यानयनायैव तत्कृतविविधदुःखस्योत्पत्तिः, तेन चान्तिमे चैतन्योदयो जीवस्य। ११।

युक्तस्यायुक्तस्य भेदं दर्शयति युक्त इति। युक्तः योगयुक्तः कर्म्मफलं त्यक्त्वा नैष्ठिकीं स्थिरां शान्तिं मोक्षम् आप्नोति। अयुक्तः अयोगयुक्तः कामकारेण कामप्रेरिततया फले सक्तः अनुरक्तः निबध्यते बन्धं प्राप्नोति। १२।

एवं करोमि कारयामीति कर्त्तृत्वविरहितो योगी सर्व्वान्तर्यामिणं परमात्मानं देहेन्द्रियादिप्रेरयितारं साक्षात्प्रत्यक्षीकृत्य सर्व्वकर्म्माणि तस्मिन् समर्प्य देहे सुखं निवसतीत्याह सर्व्वकर्म्माणीति। मनसा विवेकबुद्ध्या सर्व्वकर्म्माणि दर्शनस्पर्शनादीनि अपराण्यनुष्ठेयानि च सन्न्यस्य सर्व्वान्तर्यामिणि समर्प्य नवद्वारे चक्षुःकर्णादीनि नवानि द्वाराणि यस्मिन् तस्मिन् नवद्वारे पुरे देहे वशी जितात्मा देही जीवः नैव कुर्व्वन् न कारयन् करोमि कारयामीत्यभिमानं परिवर्ज्जयन् सुखमास्ते वर्त्तते। पद्येऽस्मिन् सर्व्वथा कर्म्मत्याग एव विहित इति श्रीमच्छङ्करस्तदनुयायिनश्च। अथापि तेषां कतिचित् वाक्यानि अन्यथैव तं

न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः ।
न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥१४॥

प्रतिपादयन्ति। तद्यथा श्रीमच्छङ्करः—"सर्व्वाणि कर्म्माणि मनसा विवेकबुद्ध्या कर्म्मादौ अकर्म्मादर्शनेन सन्त्यज्य......आस्ते" इति। "अहङ्काराभावात् स्वयं तेन देहेन नैव कुर्व्वन् ममकाराभावात् न कारयन्" इति श्रीमच्छ्रीधरः। "नित्यादिक्रियाणामविद्ययात्मन्य-विक्रिये समारोपितानां विद्यया बाध एव सर्व्वकर्मसन्न्यास इत्युच्यते" इति श्रीमन्मधुसूदनः। "शरीराख्ये पुरे......अनेकैः कर्मसाधनैरधिष्ठिते सर्व्वाणि कर्म्माणि पुरपतिरिव राजकर्म्माणि सन्न्यस्य सुखम्...... आस्ते" इति श्रीमन्नीलकण्ठः। वाक्यैरेतैः प्रकृतेः क्रियमाणानि कर्म्माणि आत्मनि नारोप्य सुखमास्ते देहीति प्रतिपाद्यते, न तु 'गच्छतो गति-र्गमनव्यापारत्यागे न सम्भवति तद्'वदिति। गमनव्यापारे सत्यपि देही-ऽयं गमनव्यापारवान् नाहमिति कर्त्तृत्वाभिमानत्यागादकर्त्तृत्वमेवा-त्मनोऽनेन सिध्यति। आचार्य्यस्यायमेवाभिप्रायः—"प्रकृतेः क्रियमा-णानि गुणैः कर्म्माणि सर्व्वशः" (३।२७) "प्रकृत्यैव च कर्म्माणि क्रियमा-णानि सर्व्वशः। यः पश्यति तथात्मानमकर्त्तारं स पश्यति॥" (१३।२९) इत्येवमादिभिर्व्यक्ततरं प्रतिभाति। एकतः प्रकृतेः प्रेरयितारं सर्व्वा-न्तर्य्यामिणमन्यतस्तत्प्रेरितायाः प्रकृतेः तदधीनकर्त्तृत्वं पश्यतः कुर्व्व-न्नपि न कुर्व्वन् कारयन्नपि न कारयन्निति तत्त्वदर्शनेन प्रेरयिता जुष्टस्य सर्व्वथा भगवदाज्ञापालनरूपकर्म्मत्यागो नोपपद्यते केवलं कर्त्तृत्वाभि-मानत्याग एव। अतएवाह श्रीमद्रामानुजः—"प्रकृतौ कर्त्तृत्वसन्न्यास उच्यते" इति ; श्रीमद्बलदेवः—"सर्व्वकर्म्माणि सन्न्यस्यार्पयित्वा देहा-दिना वहिस्तानि कुर्व्वन्नपि वशी जितेन्द्रियः सुखमास्ते" इति ; श्रीम-द्विश्वनाथः—"सर्व्वाणि कर्म्माणि मनसा सन्न्यस्य कायादिव्यापारेण वहिः कुर्व्वन्नपि वशी जितेन्द्रियः सुखमास्ते" इति। १३।

यथात्मा न करोति कारयति वा कोऽसौ यः करोति कारयति वा

नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥१५॥

तदाह न कर्त्तृत्वमिति । प्रभुः प्रभविष्णुः देहेन्द्रियादीनां स्वामी आत्मा लोकस्य कर्त्तृत्वाभिमानवतो जनस्य न कर्त्तृत्वं न कर्म्माणि न कर्म्मफलसंयोगं कर्म्मणा सह तत्फलसंयोगं सृजति तत्कारणरूपेणोत्पादयति, स्वभावस्तु प्रवर्त्तते कर्त्तृत्वादिरूपेण चेष्टते । प्रभुरीश्वर इति श्रीमच्छ्रीधरः । जीवस्य प्रकृतिपारतन्त्र्य स्वातन्त्र्येण मुक्तामुक्त-व्यवस्थामुपलभ्य कुतो वा कर्त्तृत्वं कर्म्माणि कर्म्मफलस्येति निर्णयो युक्त एव । सर्व्वेन्द्रियव्यापारेषु देहस्यैव प्रयोजनसाधनानि भवन्ति न त्वात्मनः, देहस्तु प्रकृतिसम्भूतः तत्कर्त्तृत्वाधीनश्च, अतो देहेन्द्रियव्यापा-रात्पन्नानि कर्म्माणि तत्फलानि च स्वभावत एवोत्पद्यन्त इति निर्णी-यात्मनोऽकर्त्तृत्वं क्रिया-तत्फलानुत्पादकत्वमदर्शयदाचार्य्यः । १४ ।

स्वयं विकारशून्यः परमात्मा जीवानां पापेन रुष्टः, पुण्येन परि-तुष्टो भवतीत्यज्ञानां तस्मिन् विकारित्वारोपः भ्रमकृत एवेत्याह नादत्त इति । विभुरनन्तशक्तिपूर्ण ईश्वरः कस्यचित्पापं न आदत्ते भजते गृह्णाति, न चैव सुकृतं पुण्यम् आदत्ते भजते गृह्णाति । यद्येवं कथं तद्रोषभयात् जना भीताः, तत्सन्तोषबोधात् प्रफुल्लचित्ता वा भवन्ति ? अज्ञानेन ज्ञानमावृतं, तेन जन्तवो मुह्यन्ति, मोहं गच्छन्ति । यदि पापेन पुण्येन वा सर्व्वान्तरात्मनः परमेश्वरस्यानुकूल्यं प्रातिकूल्यं वा नोपतिष्ठते, तदा पापपुण्ययोः कोऽपि न भेदः ; शास्त्रवैयर्थ्यञ्च । न हि निर्व्विकारे परमात्मनि विकारसम्भावनास्ति, पापेन पुण्येन च यद्यानुकूल्यप्रातिकूल्ये तस्मिन्नुपतिष्ठेयाताम्, अस्मदादिवत् भवति सः । यद्येवं कथं पापस्यापरिहार्य्यं दुःखकरं फलम्, पुण्यस्य चित्तानन्द-करत्वञ्च ? यद्यज्ञानजन्ये ते, पापानि कृत्वा ज्ञानिन आनन्दमुपलभेरन् पुण्यैर्भोगादिसङ्कोचवशात् दुःखमेव । किमत्र तत्त्वम् ? पापेषु पुण्या-नाम्‌षु च परमात्मनः किमपि वैषम्यं नास्ति । न हि सूर्य्यरश्म्यादयः

साधूनेव सेवन्ते नासाधूनिति। प्रकृतेः प्रेरयिता तां तन्निहितधर्म्मानुसारत एव नियोजयति, अतस्तस्मिन्नवैषम्येऽपि प्रकृतेः क्रियावशात् सुखं दुःखञ्चोपतिष्ठेते तत्सम्पृक्तस्य जीवस्य। न हि पुण्यशीलत्वं शैलशिखरान्निपतितस्यास्थिविचूर्णनं प्रतिबध्नाति, न वा प्रकृतिधर्म्मानुगता नामपुण्यवतां शारीरिकस्फूर्त्तिर्व्याहतिः। जीवप्रकृतेरपि तन्निहितधर्म्मानुसारतो भगवदाज्ञापालने सुखं तदाज्ञोल्लङ्घने दुःखमपरिहार्य्यम् पराया जीवप्रकृतेरपरायाः प्रकृतेरधीनत्वं भगवद्वैमुख्येन पापहेतुः पुण्यहेतुश्च तां स्ववशे संस्थाप्य भगवदधीनत्वम्। अपरायाः परायाः प्रकृतेः कुतो धर्म्मा उत्पद्यन्ते? अपरायाः प्रकृतेः सत्त्वादयो गुणाः "मत्त एवेति तान् विद्धि" (७।१२) इत्युक्तत्वात् सर्व्वान्तर्य्यामित एवेति व्यक्ततरम्। "बुद्धिर्बुद्धिमतामस्मि" (७।१०) इत्येवमादिषु जीवस्यापि तत एव बुद्ध्यादयः सम्भवन्तीति निर्व्विवादविषयः। प्राचीनकर्म्मवशाद्बुद्ध्यादेर्भिन्नता जीवप्रकृतौ स्वाभाविकक्रियाशीलत्वस्याविद्यमानतायां न सम्भवति, अतएवाहाचार्य्यः "स्वभावस्तु प्रवर्त्तते" (५।१४) इति। कोऽयं स्वभावः? सृष्टादौ स्रष्टरि विद्यमानानां सृज्यशक्तीनामात्मनिष्ठभावः। "इतीयं मे भिन्ना प्रकृतिरष्टधा" (७।४), "प्रकृतिं विद्धि मे पराम्" (७।५), "बुद्धिर्बुद्धिमतामस्मि" (७।१०), "मत्त एवेति तान् विद्धि" (७।१२) इत्याद्युक्तत्वात् सृज्यशक्तीनां तदन्तरङ्गसृष्टिशक्तेरन्तरङ्गत्वं व्यनक्ति। अतएवाह श्रीमच्छङ्करः, "कारणस्यात्मभूता शक्तिः शक्तेरात्मभूतं कार्य्यम्" (वे, सू, भा, २।१।२८) इति। विष्णुपुराणे च "निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः। कथं सर्गादिकर्त्तृत्वं ब्रह्मणोऽभ्युपगम्यते॥" (१अं, ३अ, १श्लो) इति मैत्रेयकृतप्रश्नस्योत्तरे पराशर आह —"शक्तयः सर्व्वभावानामचिन्त्यज्ञानगोचराः। यतोऽतो ब्रह्मणस्तास्तु सर्गाद्याभावशक्तयः। भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता॥" (१अं, ३अ, २श्लो) इति। 'सर्गादिहेतुभूताः भावशक्तयः स्वभावसिद्धाः शक्तयः सन्त्येव, पावकस्य दाहकत्वादिशक्तिवत्;' सृज्यशक्तीनामपि तद्वत् स्वाभाविकत्वम्। एवञ्च सिध्यति मनोरुक्तिः "यन्तु

कर्म्माणि यस्मिन् स न्ययुङ्क्त प्रथमं प्रभुः। स तदेव स्वयं भेजे सृज्य-मानः पुनः पुनः॥" (१अ, २८श्लो) इति। "तदाविशन्ति भूतानि महान्ति सह कर्म्मभिः" (मनु १अ, १८श्लो) इत्यत्र कर्म्माणि सृज्यशक्तय एव। सृष्टिशक्त्या सृज्यशक्तयोऽभिन्ना, तस्याः सत्त्वे पुनरासां सत्त्वम्। अतः सिद्धं जीवानां पापञ्च पुण्यञ्च। जीवगतपापपुण्येन परमात्मनो विक्रियाचिन्तनमज्ञानकृतमिति पश्यन्नाह्वाचार्यः—"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इति, सर्व्वं निरवद्यम्। अथ श्रीमन्नीलकण्ठ आह, "ननु 'एष ह्येव साधु कर्म्म कारयति तं यमेभ्यो लोकेभ्य उन्नि-नीषते, एष ह्येवासाधु कर्म्म कारयति तं यमधो निनीषते' इति श्रुत्या परमेश्वरे कारयितृत्वं बोध्यते, तत्कथमुच्यते 'स्वभावस्तु प्रवर्त्तते', इति तत्राह नादत्ते इति। कस्यचित् कर्त्तुः पापमयं नादत्ते, नापि सुकृतमादत्ते कारयितृत्वाभावात्, यतो विभुर्व्यापको निष्क्रिय इति यावत्। सक्रियो ह्यन्यं प्रवर्त्तयति, तदीयं पापं पुण्यं वा लभते, अयन्तु न तथा किन्तु सूर्य्यवत् प्रकाशक एव, न तु स्वप्रकाश्यानां कर्त्रादीनां कर्म्मणा सम्बध्यत इति भावः। कारयितृत्वमप्यस्य सत्ता-मात्रेण सूर्य्यवत्, यथा घटः प्रकाशते सविता प्रकाशयतीति नोदाहृत-श्रुतिविरोधः।………ब्रह्मास्मीति प्रमाणेन ब्रह्मभावमजानन्त ईश्व-रादात्मानं पृथङ्मन्यमानाः ईशात्मनोः सेव्यसेवकभावञ्च पश्यन्तो मुह्यन्ति। तथाच श्रुतिः 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरेव स देवानाम्' इति, 'एष ह्येव' इति श्रुतिरपि भ्रान्तजनव्यवहारविषयैवेति भावः" इति। श्रीमन्नीलकण्ठीयव्याख्यया "भोक्ता भोग्यं प्रेरितारञ्च मत्वा" (श्वे, उ, १।१२), "महान् प्रभु‍र्वै पुरुषः सत्त्वस्यैष प्रवर्त्तकः" (३।१२), "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयति" इत्येवमाद्याः श्रुतयो विरुध्यन्ते। "यतः प्रवृत्तिर्भूतानां" (१८।४६), तस्य केवलं सूर्य्यवत् प्रकाशयितृत्वं न सिध्यति, अभिव्यक्तानां स्वभावोऽपि तत एव तेषु संसृष्ट इत्यायाति। तस्य सत्यसङ्कल्पत्वाच्च

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥

ततः संसृष्टस्य स्वभावस्य न जातु तेनोच्छेदः सम्भवति, अतः सृष्टान् स्वभावानुसारतस्तान् प्रेरयति स इति न तस्मिन् कदापि वैषम्यम् सूर्य्यादयो यं स्वभावमाश्रयन्तः, न ते तमतिक्रामन्ति, जीवस्तु कामक्रोधविकारवशात् स्वभावाद्विच्युतो भवति अतस्तस्मिन् पापसम्भावना यदा तस्य स्वभावे स्थितिर्भवति, तदा तस्मिन् पुण्यम्। कथमेव भवति ? स्वभावे स्थितौ भगवता स्वरूपैक्यम्, स्वरूपैक्येण च भगवदाविर्भावानुभवः, तेन च शुद्धसत्त्वत्वमित्यलं विस्तरेण। पूर्व्वतनश्लोके जीवे प्रभुशब्दप्रयोग आविर्भूतस्वरूपे तस्मिन्निति मन्तव्यम्, प्रेरयितुः सृष्टस्य तस्य वशीकृतप्रकृतित्वं दृश्यते । १५ ।

अज्ञानजनितमोहमुक्त्वाऽधुना तत्त्वदर्शनोपयोगि ज्ञानं स्तौति ज्ञानेनेति। येषामात्मनो ज्ञानेन तु तत् अज्ञानं परमपुरुषे विकारित्वदर्शनरूपं नाशितं तेषां ज्ञानम् आदित्यवत् तत्—कस्यचित् पापञ्च पुण्यञ्च विभुर्नादत्ते स्वभावस्तु प्रवर्त्तते इति परं परमार्थतत्त्वं प्रकाशयति । १६ ।

"महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्त्तकः" (श्वे, उ, ३।१२) इत्युक्तदिशा स्वभावस्य प्रवर्त्तकं परमपुरुषं रागाद्यनधीनं ज्ञात्वा किं भवति तदाह तद्बुद्धय इति। तस्मिन् विभौ बुद्धिः निश्चयात्मिकान्तःकरणवृत्तिर्येषां ते तद्बुद्धयः—तमतिक्रम्य तेषां बुद्धिर्नान्यत्र गच्छति, यतस्ते जानन्ति तस्मात् सर्व्वमन्यदनिश्चयात्मकं, तस्मिन् स्थितौ सर्व्वं तदायत्तमिति ; तदात्मानः स एव विभुरात्मैवात्मा येषां ते तदात्मानः—तमेव ते पुनः परमात्मीयत्वेन प्रियत्वेन गृह्णन्ति नान्यत् किञ्चन कमपीति भावः ; तन्निष्ठाः, स विभुरेव निष्ठाभिनिवेशस्तात्पर्य्यं येषां ते तन्निष्ठाः

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥१८॥
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥

—तं विना नान्यस्मिन् निविष्टचेतसस्तस्मिन्नेव तेषां स्थितिरिति यावत्; तत्परायणाः स एव परम् अयनम् आश्रयो येषां ते तत्परायणाः; ज्ञाननिर्धूतकल्मषाः ज्ञानेन तद्वैषम्यरूपेण निर्धूतं कल्मषं तद्वैमुख्यरूपं येषां ते ज्ञाननिर्धूतकल्मषाः, अपुनरावृत्तिं मुक्तिं स्वरूपेणावस्थितिं गच्छन्ति प्राप्नुवन्ति। कथं पूर्व्वोक्तेन ज्ञानेन तादृशत्वमिति जिज्ञासा चेत्, तत्त्वालोचनेन तदुत्तरं बुद्धौ प्रतिभासते। यदीश्वरोऽस्मदादिवत् रागद्वेषपरवश आसीत्, नास्माकं बुद्धिस्तस्मिन् स्थितिपदं लभेत, "अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः" इति लौकिकन्यायानुरोधात्। भ्रमप्रमादपरवशो जीवो न कदापि प्रमाकेदित्यसम्भवः, अतो धर्म्मात्मा साधुरपि तस्मिन् निरन्तरं दासमास्थां स्थापयितुं न शक्येत। एवं परमात्मीयत्वेन ग्रहणं तन्निष्ठत्वं तत्परायणत्वं तदेकरागद्वेषविरहितत्वेन सिध्यति। १७।

विभोः समभावः संक्रामति यदा योगिनि तदा तस्य ब्रह्मभावापन्नत्वं सिद्धमिति लक्ष्यते तदेवाह द्वाभ्यां विद्येति, इहैवेति। विद्याविनयसम्पन्ने विद्या आत्मबोधो ब्रह्मविद्या वा विनयो निरहङ्कारत्वमनौद्धत्यम्—"सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव। अमृतस्येव चाकाङ्क्षेदवमानस्य सर्व्वदा॥" (मनु २अ, १६२श्लो) इत्युक्तानुरूपम्—ताभ्यां सम्पन्नो विद्वान् विनीतो यो ब्राह्मणस्तस्मिन् श्वपाके चण्डाले च कर्म्मणा विषमयोस्तयोः, गवि हस्तिनि शुनि च जात्यैतेषु विषमेषु पण्डिताः ज्ञानिनः आत्मयाथात्म्यविदः समदर्शिनः प्रकृतिकृततत्तद्विशेषाकाराग्रहणात् ज्ञानैकाकारतया आत्मा तु सर्व्वत्र सम इति दृष्टिशीलाः, यद्वा सद्रूपेण भासमानं ब्रह्म सर्व्वत्र सममिति द्रष्टुं शीलं येषां

ते समदर्शिनः। इहैव जीवद्भिरेव तैः समदर्शिभिः पण्डितैः सं सारः जितः वशीकृतः; येषां साम्ये समत्वेऽवैषम्याख्ये ब्रह्मधर्मे मनः स्थितं निविष्टं नियतम्। कथं तैः संसारो जितः? हि यस्मात् ब्रह्म निर्दोषं सर्व्वविधविकारशून्यं रागद्वेषवर्ज्जितम्, समं वैषम्यविरहितम्; पण्डिता अपि रागद्वेषविरहिताः, सर्व्वत्र समदर्शिनः, तस्मात् ब्रह्मसमभाववशात् ते ब्रह्मण्येव स्थिताः।

अत्रेदं विवेच्यम्, विषमे समव्यवहारः शास्त्रे निन्दित एव। यैरेवासनवसनभूषणादिभिश्चण्डालः पूजितः, तैरेव सर्व्वगुणसम्पन्नो ब्रह्मविदिति पूज्यपूजाव्यतिक्रमो न केवलं ज्ञानधर्म्मादेरवमानो विषमव्यवहारोऽपि। कथं विषमव्यवहारः? चण्डालानां तद्योग्यैरेवासनवसनभूषणादिभिर्भवति पूजा, ब्रह्मविदान्तु तद्योग्यैरिति सत्यमनादृत्य साधितो व्यतिक्रमो विषमव्यवहार एव। "समासमाभ्यां विषमे समे पूजातः" इति व्याख्यानिरूपणस्य गौतमवचनस्यायमेवाभिप्रायः। तर्हि "पण्डिताः समदर्शिनः", "समं ब्रह्म" इति कथं सिध्यति? सिध्यति ज्ञानेन। ज्ञानदृष्टितश्चाण्डालब्राह्मणयोर्न कोऽपि भेदः। [illegible] यो व्यवहार उपतिष्ठते, तस्मिन्नपि समत्वं लक्ष्यते। नेदं समत्वं तत्तद्योग्यविषयानतिक्रामति, किन्तर्हि तत्तद्योग्यतयैव [illegible] व्यज्यते। एवञ्च दृश्यते परब्रह्मणि समत्वं जनानां ग्रह[illegible]योग्यतानुसारेण विषयदानात्। साधारणप्रयोजनानि वारिवाय्वग्निसूर्य्यरश्म्यादीनि आचाण्डालं सर्व्वेषां समानि, योगानन्दादयो न तथा, साधकेष्वसाधकेषु च तेषां समत्वे वैषम्यमेव स्यात्तद्दातरि। अत्र दानवैकादेव [illegible] इति नात्र भगवति वैषम्यम्। न तु वक्तव्यं करुणायाः समत्वे कथं तस्या जनभेदेषु तारतम्यं भवतीति। न त्वत्र करुणायास्तारतम्यम्, एकस्या अविकाराया अनन्तायास्तस्या ग्रहीतृगतयोग्यतास्तारतम्येन तदुपलक्ष्यत इत्यदोषः। चिन्मात्रे तस्मिन् वयमस्मदादिवत् प्रेमादय आरोप्यन्ते। नायमारोपः, एकस्यैव चित्स्वरूपस्य जीवैः सम्बन्धपर्य्यालोचनया तत्तत्स्वरूपत्वेन परिग्रहो-

न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥२०॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥२१॥

ऽवश्यम्भावी, अत आहाचार्य्यः—“पितामहस्य जगतो माता धाता पितामहः” (९अ, १७श्लो) “गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत्” (९अ, १८श्लो) इति। यो हि ममेहागमनात् प्राक् ममाभावनिचयान् जानन् तत्पूरणायायोजनानि सर्व्वाणि कृतवान् तस्य तज्ज्ञानं प्रेम्णैव मत्सन्निधौ प्रतिभाति, तत्कारणात् पिता माता सुहृत्कारणमित्यादयः सम्बन्धाः यथावदुद्यन्ति। अशक्तं मां स्वशक्त्या स नियतं पूर्णतामापादयति, अतस्तस्मिन् करुणा कृपाऽनुग्रहः प्रसाद इत्यादयो नियतविद्यमाना इति न कोऽप्यस्वीकर्त्तुं समर्थः। अतएवाहाचार्य्यः—“तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्” (१८।६२) इति। १८।१९।

समदर्शनरूपज्ञानविपाकस्य लक्षणमाह न प्रहृष्येदिति। प्रियमिष्टं प्राप्य लब्ध्वा न प्रहृष्येत् प्रहृष्टः स्यात्, अप्रियञ्च अनभीष्टं प्राप्य लब्ध्वा नोद्विजेत् न विषण्णः स्यात्; स्थिरबुद्धिः स्थिरा निश्चला बुद्धिर्यस्य स स्थिरबुद्धिः असम्मूढः सम्मोहवर्ज्जितश्च ब्रह्मवित् ब्रह्मणि स्थितः। एवंलक्षणो ब्रह्मणि स्थित इति बोध्यः। २०।

कथमीदृग्लक्षणं भवति समदर्शनस्य तत्कारणमाह बाह्येति। बाह्यस्पर्शेषु शब्दादिविषयेषु असक्त आत्माऽन्तःकरणं यस्य स असक्तात्मा आत्मनि स्वस्वरूपे यत् सुखं तत् विन्दते लभते। तत्सुखलाभानन्तरं स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगेन युक्तात्मा ऐक्यं प्राप्त आत्मा यस्य स ब्रह्मयोगयुक्तात्मा सन् अक्षयं शाश्वतं महदनुभवलक्षणं यत् सुखं तदश्नुते लभते। २१।

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥२२॥
शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥२३॥

दुःखपरिणामविषयभोगेषु न जातु ज्ञानवानामोदं लभते इत्याह ये हीति। संस्पर्शजाः विषयेन्द्रियसंस्पर्शेभ्यो जाता भोगा दुःखयोनयः दुःखस्यैव योनयः कारणभूताः रागद्वेषादीनुत्पाद्य हृदि नरकाग्नि-प्रज्वालनपरा एव ते। भवन्तु ते तथा, कुतो वाऽविमिश्रसुखं लभते जीव इति कुजल्पनिरसनाय विशिनष्टि,--आद्यन्तवन्तः, आदिमन्तः अन्तवन्तश्च; आदावपि क्षणिकत्वात् द्वेषाद्युपहतत्वात् दुःखकराः, अन्तेऽपि सम्यग्दुःखपर्य्यवसायित्वात् दुःखकराः। न पुनः सात्त्विक-सुखान्याद्यन्तवन्ति। यदुक्तमाचार्य्येण—"यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥" (१८।३७) इति, तत्तु संयमादिक्लेशेनारम्भात् विषमिव न विषमेव। सुखगर्भमेव तद्दुःखं शयम्, अन्यथा विषयसुखं परित्यज्य तत्र प्रवृत्तिरपि न स्यात्। रोगजनितक्लेशोपशम इव भोगत्यागस्तदनुषङ्गिदुःखापनयात् शमप्रधान इति सर्व्वे त्यागिनोऽनुभवन्ति; अतः शान्तिरूपसुखेनारम्भो संयमादेरिति तत्रादौ सुखमन्ते तु आह्लादानन्दलाभ इति अमृतत्वं तत्। हे कौन्तेय, तेषु भोगेषु बुधः पण्डितः ज्ञानवान् न रमते आमोदं लभते। २२।

"काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा" (३।३७) इत्यादिना [illegible] ज्ञानविज्ञाननाशनत्वेन (३।४१) परमशत्रुत्वमाहाचार्य्यः। तत्परमशत्रुप्रोद्भूताननुभावान् निरुध्य यो यावज्जीवितकालं जितकामो जितक्रोधः स एव कृतार्थ इत्युच्यते शक्नोतीति। यः शरीरविमोक्षणात् मरणात् प्राक् यावज्जीवं काम-क्रोधोद्भवं मनोनयनादिक्षोभलक्षणं वेगं सोढुं निरोद्धुं शक्नोति शक्तः,

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्व्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥

लभन्ते ब्रह्मनिर्व्वाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः सर्व्वभूतहिते रताः ॥२५॥

कामक्रोधविमुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्मनिर्व्वाणं वर्त्तते विदितात्मनाम् ॥२६॥

स नरो युक्तः योगी स सुखी। जितकामत्वेन जितक्रोधत्वेन योगित्वं सुखित्वं स स्वयमनुभवति, अन्ये च तं तादृशं जानन्ति, विपरीते विपरीतमेव। २३।

कामक्रोधनिरोधेन चित्तवृत्तिनिरोधरूपो योगः सिध्यति, न पुनर्ब्रह्मयोगः, स कदा सिध्यति तदाह योऽन्तरिति। योऽन्तःसुखः अन्तरात्मन्येव सुखं यस्य सोऽन्तःसुखः, अन्तरेवारामः क्रीड़ा यस्य स अन्तरारामः, तथा योऽन्तर्ज्योतिः अन्तरात्मनि ज्योतिर्ज्ञानप्रकाशो यस्य सोऽन्तर्ज्योतिः, अन्तर्दृष्ट्या साक्षादनुभूतं तत्त्वं येन स एव योगी ब्रह्मभूतः ब्रह्मणैकत्वमापन्नः ब्रह्मनिर्व्वाणं ब्रह्मणि निर्वृतिं मोक्षम् अधिगच्छति प्राप्नोति। २४।

किञ्च लभन्ते इति। क्षीणकल्मषाः क्षीणभगवद्वैमुख्यरूपपापदोषाः छिन्नद्वैधाः छिन्नसंशयाः, शीतोष्णादिद्वन्द्वैर्विमुक्ता इति श्रीमद्रामानुजः, यतात्मानः संयतेन्द्रियाः सर्व्वभूतहिते रताः सर्व्वेषां भूतानां हिते आनुकूल्ये रताः ऋषयः द्रष्टारः सम्यग्दर्शिनः सूक्ष्मवस्तुविवेचनसमर्थाः ब्रह्मनिर्व्वाणं ब्रह्मणि निर्वृतिं मोक्षं लभन्ते प्राप्नुवन्ति। २५।

किञ्च कामेति। कामक्रोधविमुक्तानां कामस्य क्रोधस्य ताभ्यां विमुक्तानां, न केवलं तयोरावेगसहनमात्रं किन्तु तद्वियुक्तानां यतीनां यत्नशीलानां यतचेतसां संयतान्तःकरणानां विदितात्मनां विदित आत्मा येषां ते विदितात्मानः सम्यग्दर्शिनः साक्षात्कृतपरमात्मानः वा अभितः

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥
भोक्तारं यज्ञतपसां सर्व्वलोकमहेश्वरम् ।
सुहृदं सर्व्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे कर्म्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः ।

उभयतो जीवतां मृतानाञ्च ब्रह्मनिर्व्वाणं ब्रह्मणि निर्वृतिं मोक्षं वर्त्तते । २६ ।

सम्यग्दर्शनेन ब्रह्मणि स्थितस्य योगित्वमुपतिष्ठते । योगस्याविच्छेदाय साधनं प्रयोजनम्, अन्यथा योगाद्भ्रंशोऽपरिहार्य्यो विषयेन्द्रियसम्बन्धवशात् । अनन्तराध्याये ध्यानयोगमेव वक्ष्यत्याचार्य्यः । सम्यग्दर्शनेन ब्रह्मणि स्थितस्य किं वा साधनं प्रयोजनमिति जनानां विमतिमवधार्य्यास्मिन्नध्याये सम्यग्दर्शनस्यान्तरङ्गसाधनं ध्यानयोगं सूचयन्नाचार्य्यस्त्रिभिः श्लोकैरुक्तवानाचार्य्यः स्पर्शानिति । बाह्यान् चिन्तायोगेनान्तःप्रविष्टान् स्पर्शान् शब्दादीन् विषयान् तच्चिन्तात्यागेन बहिः कृत्वा सर्व्वं बाह्येन्द्रियव्यापारमुपसंहृत्य, चक्षुश्च भ्रुवोरन्तरे एव कृत्वा संस्थाप्य नासाभ्यन्तरचारिणौ प्राणापानौ मन्दोच्छ्वासनिश्वासाभ्यां समौ कृत्वा यो यतेन्द्रियमनोबुद्धिः यताः संयता इन्द्रियमनोबुद्धयो यस्य स यतेन्द्रियमनोबुद्धिः मोक्षपरायणः मोक्ष एव परम् अयनं प्राप्यं यस्य स मोक्षपरायणः, विगतेच्छाभयक्रोधः इच्छा भयञ्च क्रोधश्च इच्छाभयक्रोधास्ते विगता यस्मात् स विगतेच्छाभयक्रोधो मुनिर्मननशीलः, स सदा मुक्त एव । २७।२८ ।

एवं योगयुक्तः कं ज्ञात्वा योगी मुच्यते इति तत्राह भोक्तारमिति ।

यज्ञतपसां भोक्तारं पालकं सर्व्वलोकमहेश्वरं सर्व्वेषां लोकानां महान्तमीश्वरं सर्व्वभूतानां सुहृदं मां सर्व्वान्तर्यामिणं ज्ञात्वा शान्तिं मोक्षमृच्छति प्राप्नोति । २९ ।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

श्रीभगवानुवाच—

अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः ।
स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

"स्पर्शान् कृत्वा बहिः" (५।२७.२८) इत्यादिभिर्ध्यानयोगोऽतीतानन्तराध्याये सूचितः । तमेव प्रपञ्चयितुं षष्ठाध्याय आरभ्यते । तत्र प्रथमं सन्न्यासस्य योगस्य चैकत्वमस्मिन् शास्त्रे प्रतिपाद्यमिति ध्यानयोगस्य सर्व्वोत्तमत्वमनभ्यर्थ्य मा हासीदिति तदेव व्यक्ततरवाक्येनावतारयति अनाश्रित इति । कर्म्मफलम् अनाश्रितोऽनपेक्षमाणोऽनिच्छन् कर्म्मफलतृष्णां त्यजन् कार्य्यम् अवश्यकर्त्तव्यं कर्म्म यः करोति, स एव कर्म्मफलत्यागात् सन्न्यासी च, फलतृष्णारूपचित्तक्षोभाभावात् योगी च । न स निरग्निः अग्निसाध्यकर्म्मत्यागी, न च अक्रियः अनग्निसाध्यकर्म्मत्यागी । "ब्रह्मार्पणं ब्रह्म हविः" (४।२४) इत्यादिना अग्निसाध्यं कर्म्म ब्रह्मदृष्ट्याऽहंग्रहेण च पूर्व्वमुपदिष्टम्, अनग्निसाध्यं तपोयज्ञादिकञ्च । न चाक्रियः दैहिककर्म्मत्यागी अर्द्धमुद्रितनयनो योगीति श्रीमदानन्दतीर्थयज्वलाद्यौ । अत 'ज्ञानयोगकर्म्मयोगसाध्यात्मावलोकनरूपयोगाभ्यासविधिरुच्यते' इति श्रीमद्रामानुजः । ध्यानयोगे नास्ति कर्म्मणोऽधिकार इति श्रीमच्छङ्करस्य प्रतिपत्तिं [illegible] प्रतिवदतीति विफलोऽत्र विचारावतारः । "योगी युञ्जीत सततमात्मानं रहसि स्थितः । एकाकी यतचित्तात्मा निराशीरपरिग्रहः" (६।१०), "सर्व्वकर्म्माणि मनसा सन्न्यस्यास्ते ……नैव कुर्व्वन्न कारयन्" (५।१३) "……मौनी सन्तुष्टो [illegible] । अनिकेतः स्थिरमतिः……" (१२।१९), "विहाय [illegible] पुमांश्चरति निस्पृहः" (२।७१),

यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन ॥ २ ॥
आरुरुक्षोर्मुनेर्योगं कर्म्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

"सर्व्वारम्भपरित्यागी" (१२।१६) इत्येतैर्गृहिणोऽनधिकारित्वं न सिध्यतीति तस्मिंस्तस्मिन् पद्ये स्फुटीभविष्यति । १ ।

कथं वा योगो सन्न्यास इति तत्र कारणमाह यमिति । हे पाण्डव, यं सन्न्यासं कर्म्मत्यागं प्राहुः, तं योगं कर्म्मयोगं विद्धि । सन्न्यासः कर्म्माकरणं कर्म्मयोगः कर्म्माकरणम्, कथं तयोरेकत्वमित्युच्यते—न हि असन्न्यस्तसङ्कल्पोऽपरित्यक्तफलाभिसन्धिः कश्चन योगी भवति । फलतृष्णाकर्त्तृत्वाभिमानत्यागेनानुष्ठितं कर्म्म कृत्वापि कर्म्माकरणमस्मिन् शास्त्रे यन्निर्द्दिष्टम्, स एव सन्न्यासः; फलतृष्णया कर्त्तृत्वाभिमानेन चित्तविक्षोभो जायते, तदुभयत्यागेन चित्तविक्षोभो निरुद्धो भवति, चित्तविक्षोभनिरोध एव योगः, अतएव तादृशः कर्म्मयोगो योग एव । एवं सङ्कल्पत्यागेन सन्न्यासयोगयोरेकत्वं सिध्यति । २ ।

ध्यानयोगस्य प्रथमं कर्म्मैव कारणं, तेन तस्योदयात्, उदिते तस्मिन् तस्य नित्यस्थितेः कारणं शम एवेत्याह आरुरुक्षोरिति । "यस्य सर्व्वे समारम्भाः कामसङ्कल्पवर्ज्जिताः" (४।१९) इत्युक्तादृशमवश्यं कर्म्मयोगं ध्यानयोगम् आरुरुक्षोरारोढुमिच्छोः कारणं तदुत्पादकं साधनम् उच्यते, तादृशेन कर्म्मणा चित्तविक्षोभप्रशमो भवति, यदा तु सर्व्वथा प्रशमो जायते तदा योगारूढावस्थोपतिष्ठते । अतएवाह तस्यैव योगमारुरुक्षोः प्रशान्तविक्षोभो योगारूढस्य शमः तृष्णोपरमः कर्त्तृत्वाभिमानोपरमश्च कारणम् आरूढावस्थाया उत्पादकमुच्यते । सर्व्वव्याख्यातृभिरारूढावस्थायां सर्व्वकर्म्मोपरमो वर्ण्यते । अनन्तरश्लोकार्थपर्य्यालोचनया न तस्य युक्तत्वं पश्यामः, आचार्य्यमतविरोधि च तत् । सर्व्वथा कर्म्मत्यागस्यासम्भावनां पश्यन्तः सर्व्वकर्म्मपरित्यागपक्ष-

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते ॥४॥
उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥५॥
बन्धुरात्मात्मनस्तस्य येनैवात्मात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्त्तेतात्मैव शत्रुवत् ॥६॥

पातिनोऽपि नाहं किञ्चित्करोमीत्यत्राभिमानशममेव वर्णयन्ति । ३ ।

किंलक्षणोऽयं योगारूढ इत्युच्यते यदा हीति । यदा हि न इन्द्रियार्थेषु शब्दादिषु, न तत्साधनेषु कर्मसु अनुषज्जते सक्तो न भवति, सर्वसङ्कल्पसन्न्यासी सर्वेषां सङ्कल्पानां फलाभिसन्धीनां त्यागशीलः स तदा योगारूढ उच्यते । "न ह्यसन्न्यस्तसङ्कल्पः" (६।२) इत्यत्र सङ्कल्पः फलाभिसन्धिरित्यर्थं निष्पाद्य, अत्र 'सर्वसङ्कल्पसन्न्यासी'ति विशेषणस्य सर्वान् कामान् कामात्मकान् सर्वाणि च कर्माणि सन्न्यसितुं शीलं यस्य स सर्वसङ्कल्पसन्न्यासीत्यर्थनिष्पादनं सहृदयक्लेशः । एवं ह्यनेकैकस्य शब्दस्य विशेषणस्य वा स्वमनः स्वसंस्कारानुसृत्य भिन्नभिन्नार्थोत्पादनेन प्रकृतोऽर्थ आच्छादित इत्यलमत्र । ४ ।

योगारूढो ह्यात्मनात्मानमुद्धरति, तत्सर्वेषां कर्त्तव्यमित्याह उद्धरेदिति । आत्मना विवेकयुक्तेन मनसा आत्मानं स्वं जीवमुद्धरेत् संसारात्; नात्मानमवसादयेत् अधो नयेत् संसारसागरे । जन्तु यदि न स्वयं यतते स्वस्योद्धाराय, न स भवितुं शक्तः । अतो योऽयम् आत्मानमुद्धर्त्तुं यतते स आत्मनो बन्धुः, यः पुनः संसारे मग्नस्तिष्ठति स आत्मनः शत्रुः । तदेवाह—आत्मैव हि आत्मनो बन्धुः, आत्मैवात्मनो रिपुरिति । ५ ।

किंलक्षण आत्मनो बन्धुः किंलक्षणो वा शत्रुरित्युच्यते बन्धुरिति ।

जितात्मनः प्रशान्तस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥७॥
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥८॥
सुहृन्मित्रार्य्युदासीनमध्यस्थद्वेष्यबन्धुषु।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥९॥

येनात्मना जीवेन आत्मा मन एव जितः वशीभूतः, तस्य आत्मनो जीवस्य आत्मा मनो बन्धुः। अनात्मनः अजितात्मनस्तु आत्मैव मन एव शत्रुवत् अपकारिवत् शत्रुत्वेऽपकारे वर्त्तेत। ६।

जितात्मत्वे किं भवति तदाह जितात्मन इति। जितात्मनो जितमनसः, प्रशान्तस्य रागद्वेषविमुक्तस्य आत्मा शीतोष्णसुखदुःखेषु तथा मानापमानयोः परम् अत्यर्थं समाहितः समाधिविषयो योगारूढो भवति। परं केवलमित्यर्थे प्रशान्तस्य परं केवलम् आत्मा समाहितो भवति नान्यस्येत्यर्थः। ७।

योगारूढस्य किं लक्षणान्तरं भवति तदाह ज्ञानेति। ज्ञानविज्ञानतृप्तात्मा ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवस्ताभ्यां तृप्त आत्मा यस्य स ज्ञानविज्ञानतृप्तात्मा, कूटस्थो विषयसन्निधावपि विकारशून्योऽप्रकम्पः सर्व्वकालमेकस्वभावतया स्थितः, विजितेन्द्रियः विजितानि वशीकृतानि रागद्वेषप्रवर्त्तितानि इन्द्रियाणि येन स विजितेन्द्रियः ; अतएव समलोष्टाश्मकाञ्चनः भोग्यविषयेष्वासक्तिविरहितत्वात् समानि लोष्टाश्मकाञ्चनानि मृत्पिण्डपाषाणसुवर्णानि यस्य स समलोष्टाश्मकाञ्चनः, एवम्भूतो योगी कर्म्मयोगी युक्तः योगारूढ इत्युच्यते। ८।

तत्र विशेषमाह सुहृदिति। सुहृत् प्रत्युपकारमनपेक्ष्योपकर्त्ता इति श्रीमच्छङ्करः, वयोविशेषानङ्गीकारेण स्वहितैषीति श्रीमद्रामानुजः, स्वभावेनैव हितशंसीति श्रीमच्छ्रीधरः, प्रत्युपकारमनपेक्ष्य पूर्व्व-

योगी युञ्जीत सततमात्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥१०॥

सुहृत् सम्बन्धं विनैवोपकर्त्ता इति श्रीमधुसूदनः; मित्रं स्नेहवानिति श्रीमच्छङ्करः, सवयसौ हितैषिणौ मित्रमिति [illegible]; अरिः शत्रुः अनिमित्ततोऽनर्थेच्छुः स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्य्येणापकर्त्ता घातुकः, उदासीनः विवदमानयोरुभयोरप्युपेक्षकः, मध्यस्थः विवदमानयोरुभयोरपि हिताकाङ्क्षी, द्वेष्यः आत्मनोऽप्रियः अपकारकारित्वाद्द्वेषार्हः स्वकृतापकारमनपेक्ष्यापकारी, बन्धुः सम्बन्धी जन्मत एव हितैषी सम्बन्धेनोपकर्त्ता, एतेषु साधुषु शास्त्रानुवर्त्तिषु सदाचारिषु धार्म्मिकेषु, पापेषु च प्रतिषिद्धकारिषु दुराचारिषु अधार्म्मिकेषु समबुद्धिः समा रागद्वेषशून्या बुद्धिर्यस्य स समबुद्धिः विशिष्यते विशिष्टो भवति। योगारूढानां सर्व्वेषामयमुत्तम इत्यर्थः। विमुच्यते इति पाठान्तरे विमुक्तो भवति। ९।

योगारूढस्य लक्षणं फलञ्चोक्त्वेदानीं साङ्गं योगमुपदिशति योगीत्यादिभिस्त्रयोविंशत्या श्लोकैः। योगी उक्तप्रकारकर्म्मयोगनिष्ठः सततमहरहर्योगकाले रहसि स्थितः निर्ज्जनदेशे स्थितः, एकाकी असहायः, यतचित्तात्मा यतौ संयतौ चित्तदेहौ यस्य स यतचित्तात्मा, निराशीः वितृष्णः आत्मात्मभावातिरिक्ते कृत्स्ने वस्तुनि निःस्पृहः निराकाङ्क्षः निस्पृहः, अतएवापरिग्रहः आत्मव्यतिरिक्ते कस्मिंश्चिदपि ममतारहितः यागप्रतिबन्धकेन परिग्रहेण शून्यः ग्रन्थवसनादिवस्तुपरिग्रहविरहितः, आत्मानं युञ्जीत युक्तं कुर्व्वीत। अत्र श्रीमच्छङ्करेण एकाकित्वादिविशेषणबलेन गृहिणो ध्यानयोगानधिकारित्वं समाश्रितं तत्तु स्वकृतभाष्यविरोधि। तथाहि छान्दोग्योपनिषदुपसंहारे, "आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्म्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्म्मिकान् विदधदात्मनि सर्व्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन् सर्व्वभूतान्यन्यत्र तीर्थेभ्यः, स खल्वेवं वर्त्तयन् यावदायुषं

ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्त्तते न च पुनरावर्त्तते" (५।१।१५), इत्यस्य भाष्यम्—"आचार्य्यकुलाद्वेदमधीत्य सशब्दार्थतोऽध्ययनं कृत्वा यथाविधानं यथोक्तैर्नियमैर्युक्तः सन्नित्यर्थः। सर्व्वस्यापि विधेः स्मृत्युक्तस्योपकुर्व्वाणकं प्रति कर्त्तव्यत्वे गुरुशुश्रूषायाः प्राधान्यप्रदर्शनार्थमाह गुरोः कर्म्म यत्कर्त्तव्यं तत्कृत्वा कर्म्मशून्यो योऽतिशिष्टः कालस्तेन कालेन वेदमधीत्येत्यर्थः। एवं हि नियमतोऽधीतो वेदः कर्म्मज्ञान-फलप्राप्तये भवति, नान्यथेत्यभिप्रायः। अभिसमावृत्य धर्म्मजिज्ञासां समापयित्वा गुरुकुलान्निवृत्तः न्यायतो दारानाहृत्य कुटुम्बे स्थित्वा गार्हस्थ्ये विहिते कर्म्मणि तिष्ठन्नित्यर्थः। तत्रापि गार्हस्थ्यविहितानां कर्म्मणां स्वाध्यायस्य प्राधान्यप्रदर्शनार्थमुच्यते, शुचौ विविक्तेऽमेध्यादि-रहिते देशे यथावदासीनः स्वाध्यायमधीयानो नित्यं नैमित्तिकं कर्म्मा-दिकञ्च यथाशक्तितो ऋगाद्यभ्यासञ्च कुर्व्वन् धार्म्मिकान् पुत्रान् शिष्यांश्च धर्म्मयुक्तान् विदधत् धार्म्मिकत्वेन तान् नियमयन्, आत्मनि स्वहृदये हार्द्दे ब्रह्मणि सर्व्वेन्द्रियाणि सम्प्रतिष्ठाप्योपसंहृत्य सर्व्वेन्द्रियग्रहणात् कर्म्माणि च सन्न्यस्य, अहिंसयन् हिंसां परपीड़ामकुर्व्वन्, सर्व्वभूतानि स्थावरजङ्गमानि भूतान्यपीड़यन्नित्यर्थः। भिक्षानिमित्तमटनादिनापि परपीड़ा स्यादित्यत आह अन्यत्र तीर्थेभ्यः— तीर्थं नाम शास्त्रानुज्ञा-विषयस्ततोऽन्यत्रेत्यर्थः। सर्व्वाश्रमिणां चैतत् समानम्। तीर्थेभ्यो-ऽन्यत्राहिंसैवेतरन्ये वर्णयन्ति। कुटुम्बे (गार्हस्थ्ये) एवैतत् सर्व्वं कुर्व्वन् स खल्वविकृतो यावदायुषं यावज्जीवमेवं यथोक्तेन प्रकारेण वर्त्तयन् ब्रह्मलोकमभिसम्पद्यते देहान्ते, न च पुनरावर्त्तते शरीरग्रहणाय पुन-रावृत्तेः प्राप्तायाः प्रतिषेधात्। अर्च्चिरादिमार्गेण कार्य्यब्रह्मलोकमभि-सम्पद्य यावद्ब्रह्मलोकस्थितिस्तावत् तत्रैव तिष्ठति प्राक्ततो नावर्त्तत इत्यर्थः" इति। 'आत्मनि स्वहृदये हार्द्दे ब्रह्मणि सर्व्वेन्द्रियाण्युपसं-हृत्य कर्म्माणि च सन्न्यस्य' इत्यनेन स्थितिः स्वकृतभाष्येणानुमोदिता ध्यान-योगाधिकारमेव गृहस्थस्य दर्शयति। यदा हि वेदाध्ययनायायं गृही ब्रह्मचार्य्यासीत्, तदैव स योगमभ्यस्तवान्, तथाहि मनुः—'धर्म्मतत्त्वे-

न्द्रियग्रामं संयम्य च मनस्तथा । सर्व्वान् संसाधयेदर्थानक्षिण्वन् योग-मात्मनः ॥" (२अ, १००श्लो) इति । गृहस्थस्य न जातु योगाभ्यासे विरतिरासीत् जनकवशिष्ठरामादीनामाचार्य्यैस्तु च नितरान्तस्ये तस्या-त्मभाविततेन दर्शनात् । महाप्रस्थानकाले, "योगयुक्ता महात्मान-स्त्यागधर्म्ममुपेयुषः । अभिजग्मुर्बहून् देशान् सरितः सागरांस्तथा ॥" (म, भ, प, १अ, २०श्लो) इति पाण्डवेयानां योगयुक्तत्वं न सम्भवति, यदि गृहावस्थानकाले तेषां योगयुक्तत्वं नासीत् । विशेषस्तु दृश्यते भागवते युधिष्ठिरमुद्दिश्य—"विसृज्य तत्र तत्सर्व्वं दुकूलवलयादिकम् । निर्म्ममो निरहङ्कारः सञ्छिन्नाशेषबन्धनः ॥ वाचं जुहाव मनसि तत्प्राण इतरे च तम् । मृत्यावपानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत् ॥ त्रित्वे हुत्वाथ पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः । सर्व्वमात्मन्यजुहवीद्ब्रह्मण्या-त्मानमव्यये ॥ चीरवासा निराहारो बद्धवाङ्मुक्तमूर्द्धजः । दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ॥ अनवेक्षमाणो निरगादशृण्वन् बधिरो यथा । उदीचीं प्रविवेशाशां गतपूर्व्वां महात्मभिः ॥ हृदि ब्रह्म परं ध्यायन्नावर्त्तेत यतो गतः ॥" (१स्क, १५अ, ४०—४४श्लो) इति । आत्मनि ब्रह्मणि वा चित्तसमाधानकाले एकाकित्वं निर्ज्जनप्रदेशे स्थितिः गृहे न सम्भवत इत्युक्तिस्तत्र योगानुष्ठातॄणां कर्म्मण्यकर्म्म पश्यतां नित्ययोगाभ्यासः प्रतिवदति । आचार्य्यप्रोक्तयोगरीतिर्गृहावस्थिति-मनुसृत्यैव तद्यथा—"योगमेकान्तशीलस्तु यथा विन्दति तच्छृणु । दृष्ट-पूर्व्वां दिशं चिन्त्य यस्मिन् सन्निवशेत् पुरे ॥ पुरस्याभ्यन्तरे तस्य मनः स्थाप्यं न वाह्यतः । पुरस्याभ्यन्तरे तिष्ठन् यस्मिन्नावसथे वसेत् । तस्मिन्नावसथे धार्य्यं स वाह्याभ्यन्तरे मनः ॥ प्रचिन्त्यावसथं कृत्स्नं यस्मिन् काले स तिष्ठति । तस्मिन् काले मनश्चास्य न कथञ्चन वाह्यतः ॥ सन्नियम्येन्द्रियग्रामं निर्घोषे निर्ज्जने वने । कायमभ्यन्तरं कृत्स्नमेकाग्रः परिचिन्तयेत् ॥ दन्तांस्तालु च जिह्वाञ्च गलं ग्रीवां तथैव च । हृदयं चिन्तयेच्चापि तथा हृदयबन्धनम् ॥" (अ, गी, १९अ, २३—२७श्लो) इति । आत्मदर्शनरीतिरपि तत्रैवोक्ता,—"यथा हि पुरुषः स्वप्ने दृष्ट्वा

पश्यत्यसाविति। तथा रूपमिवात्मानं साधु युक्तः प्रपश्यति॥ इषीकाञ्च यथा मुञ्जात् कश्चिन्निष्कृष्य दर्शयेत्। योगी निष्कृष्य चात्मानं तथा पश्यति देहतः॥" (अ, गी, १८अ, २१।२२श्लो) इति। सर्व्वविषयाद्यावलम्बननिरपेक्ष एव योगः, यथाह दक्षः—"नारण्यसेवनाद्योगो नानेकग्रन्थचिन्तनात्। व्रतैर्यज्ञैस्तपोभिश्च न योगः कस्यचिद्भवेत्॥ न च पद्मासनाद्योगो न नासाग्रनिरीक्षणात्। न च शास्त्रातिरिक्तेन शौचेन स भवेत् क्वचित्॥ न मौनमन्त्रकुहकैरनेकैः सुकृतैस्तथा। लोकयात्रावियुक्तस्य योगो भवति कस्यचित्॥ अभियोगात् तथाभ्यासात् तस्मिन्नेव तु निश्चयात्। पुनः पुनश्च निर्व्वेदात् योगः सिध्यति नान्यथा॥ आत्मचिन्ताविनोदेन शौचक्रीड़नकेन च। सर्व्वभूतसमत्वेन योगः सिध्यति नान्यथा॥ यश्चात्मनि रतो नित्यमात्मक्रीड़स्तथैव च। आत्मनिष्ठश्च सततमात्मन्येव स्वभावतः॥ रतश्चैव स्वयं तुष्टः सन्तुष्टो नान्यमानसः। आत्मन्येव सुतृप्तोऽसौ योगस्तस्य प्रसिध्यति॥ सुप्तोऽपि योगयुक्तः स्यात् जाग्रच्चापि विशेषतः। ईदृक्चेष्टः स्मृतः श्रेष्ठो गरिष्ठो ब्रह्मवादिनाम्॥" (द, सं, ७अ, ३—१०श्लो) इति। निकृष्टोत्कृष्टवर्णाद्यपेक्षात्र नास्ति, नार्य्योऽप्यत्राधिकारवत्यः, तद्यथा "अपि वर्णावकृष्टस्तु नारी वा धर्म्मकाङ्क्षिणी। तावप्येतेन मार्गेण गच्छेतां परमां गतिम्॥" (शा, प, २३८अ, ३४श्लो) इति। प्राणायामादिप्रयाससाध्यव्यापारो न हि नारीणामुपयोगीति विप्रवदन्तः स्वभावतो मनसो धारणैवात्र योगे प्रधानोपाय इत्यवधारयन्तु ते महाभारतवचनात्—"धारणञ्चैव मनसः प्राणायामश्च पार्थिव। एकाग्रता च मनसः प्राणायामस्तथैव च॥ प्राणायामो हि सगुणो निर्गुणं धारयेन्मनः। यद्यदृश्यति मुञ्चन् वै प्राणान् मैथिलसत्तम। वाताधिक्यं भवत्येव तस्मात्तन्न समाचरेत्॥" (शा, प, ३१६अ, १०श्लो)। अत एवाहाचार्य्यः—"शनैः शनैरुपरमेत् बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥ यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्। ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥ (६।२५।२६)

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥११॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥१२॥
समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥१३॥

इति। प्राणायामे वाताधिक्यमिति प्राञ्चः, स्नायुविकार इत्यर्वाञ्चः। प्राणायामादिप्रयासोऽपि दृश्यते योगिप्रधानमहेश्वरपत्न्यां दाक्षायण्यां योगतनुस्तनुत्यागकाले, यथा—"इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शान्तवाक्। स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग् योगपथं समाविशत्॥ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः। शनैर्हृदि स्थाप्य धियोरसि स्थितं कण्ठाद्भ्रुवोर्मध्यमनिन्दिताऽनयत्॥ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमङ्कमादरात्। जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणाम्॥ ततः स्वभर्त्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयती न चापरम्। ददर्श देहो हतकल्मषा सती सद्यः प्रजज्वाल समाधिजाग्निना॥" (भा. ४स्क, ४अ, २४—२७श्लो) इति। १०।

आसननियममाह शुचाविति द्वाभ्याम्। शुचौ शुद्धे देशे स्थाने स्थिरं निश्चलं नात्युच्छ्रितं नात्युच्चं नातिनीचं चैलाजिनकुशोत्तरं चैलं मृदुवस्त्रम् अजिनं मृदुव्याघ्रादिचर्म ते कुशेभ्य उत्तरे उपरि तने यत् तत्, कुशानामुपरि चर्म, तदुपरि वस्त्रमास्तीर्येत्यर्थः, ईदृशमात्मनः स्वस्य न तु परस्य आसनं प्रतिष्ठाप्य, तत्र आसने उपविश्य मन एकाग्रं विक्षेपरहितं कृत्वा, यतचित्तेन्द्रियक्रियः संयता चित्तेन्द्रियक्रिया यस्य स आत्मशुद्धये अन्तःकरणशुद्ध्यर्थं ब्रह्मसाक्षात्कारयोग्यतायै योगं युञ्ज्यादभ्यसेत् प्रवृत्तिप्रवाहनिरोधमनुतिष्ठन् आत्मावलोकनं कुर्वीत। ११।१२

अधुना शरीरधारणादिकमुच्यते सममिति, सार्धाभ्यामिति। काय-

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥१४॥
युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्व्वाणपरमां मत्संस्थामधिगच्छति ॥१५॥

शिरोग्रीवं कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः दृढ़प्रयत्नो भूत्वा स्वं नासिकाग्रं सम्प्रेक्ष्य अर्द्धनिमीलितनयनः दिशश्च अनवलोकयन् अन्तरान्तरा दिशाञ्चावलोकनमकुर्व्वन् प्रशान्तात्मा प्रकर्षेण शान्त आत्माऽन्तःकरणं यस्य सोऽयं प्रशान्तात्मा विगतभीः विगताशङ्कः ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणां व्रतं भिक्षाशनादिकं तस्मिन् स्थितः, मनः संयम्य मनसो वृत्तीरुपसंहृत्य मच्चित्तः मयि सर्व्वान्तर्यामिणि चित्तं यस्य सोऽयं मच्चित्तः परमपुरुषविषयकधारावाहिकचित्तवृत्तिमान् मत्परः अहमन्तर्यामी परः पुरुषार्थः प्रियो यस्य सोऽयं मत्परः युक्तः समाहितः विषयाकारसर्व्ववृत्तिनिरोधेन भगवदेकाकारचित्तवृत्तियुक्तः सन् आसीत उपविशेत्। 'ब्रह्मचारिव्रते स्थितः' इत्युक्त्या गृहिणो नात्राधिकार इति मन्यमानैर्गृहस्थोचित-ब्रह्मचर्य्यनियमः शास्त्रोक्तोऽत्र विहित इति द्रष्टव्यम्। "एतत्सर्व्वं गृहस्थस्य समाम्नातं यतेरपि। गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्त्तुगामिनः॥" (भा, ७स्क, १२अ, ११श्लो) इति। "वर्ज्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः" (भा, ७स्क, १२अ, ७श्लो) इत्येवं विकल्पोऽत्र ब्रह्मचर्य्यव्रतं बोध्यः। सर्व्वथाचार्य्यस्य स्वजीवनसिद्धेन "आपूर्य्यमाणमचलप्रतिष्ठम्" (२।७०) इत्याद्यकामकारेण गृहिणो ध्यानयोगफलमन्तर्यामिणैक्यमवश्यम्भावि। १३।१४।

एवं भगवदेकाकारचित्तवृत्तियुक्तस्य फलमाह युञ्जन्निति। एवं पूर्व्वोक्तप्रकारेण आत्मानं मनो युञ्जन् समाहितं कुर्व्वन् योगी नियतमानसः नियतं संयतमचञ्चलीकृतं मानसं येन स नियतमानसः सन् निर्व्वाणपरमां निर्व्वाणं मोक्षस्तत्परमा निष्ठा यस्याः शान्तेस्तां निर्व्वाण-

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्ज्जुन ॥१६॥

परमां मत्संस्थां मत्स्वरूपपरमानन्दरूपां शान्तिं संसारोपरमम् अधिगच्छति प्राप्नोति। अत्र श्रीमन्मधुसूदनो महता प्रयत्नेन पतञ्जलिप्रोक्तस्य योगस्य नियोगं कुर्व्वन्नेवमुपसंहृतवान्—"'युञ्जन्नेव' सदात्मानम्' इत्यनेन सम्प्रज्ञातसमाधिरेकाग्रभूमावुक्तः। 'नियतमानसः' इत्यनेन तत्फलभूतोऽसम्प्रज्ञातसमाधिर्निरोधभूमावुक्तः। 'शान्ति'मिति निरोधसमाधिजसंस्कारफलभूता प्रशान्तवाहिता; 'निर्व्वाणपरमा'मिति धर्म्ममेघसमाधिस्तत्त्वज्ञानद्वारा कैवल्यहेतुत्वम्; 'मत्संस्था'मित्यनेनौपनिषदभिमतं कैवल्यं दर्शितम्" इति। विक्षेपाभावात् यदा चिन्तनीयविषये चित्तमेकाग्रभावेन तिष्ठति, तदैकाग्रभूमौ सम्प्रज्ञातसमाधिरुत्पद्यते, चिन्तनीयविषयेणैकाकारतामापन्ना मानसिकवृत्तिर्यदा निरुद्धा भवति, तदा निरोधभूमावसम्प्रज्ञातसमाधिरुपतिष्ठते; अस्यैव समाधेः फलं प्रशान्तवाहिता—निरिन्धनाग्निवत् चित्तस्य प्रशमः [illegible]शम। एवं स्थैर्येनाभिमुखाज्ञानमुदेति, तेन चाफललिप्सोः प्रत्ययान्तराणामनुदये विवेकख्यातिपुष्टिर्भवति, ततो धर्म्ममेघाख्यसमाधिर्जायते। प्रकृष्टमशुक्लाकृष्णं धर्म्मं परमपुरुषार्थसाधकं मेहति सिञ्चतीति धर्म्ममेघः' इति श्रीमदनन्तः, 'सर्व्वान् धर्म्मान् ज्ञेयान् मेहति वर्षति प्रकाशनेनेति धर्म्ममेघः' इति श्रीमद्वाचस्पतिः, 'धर्म्मं प्रत्यग्ब्रह्मैक्यसाक्षात्कारं मेहति सिञ्चतीति धर्म्ममेघस्तत्त्वसाक्षात्कारहेतुः' इति श्रीमन्मधुसूदनः। धर्म्ममेघसमाधितः क्लेशकर्म्मनिवृत्तिः, ततोऽनावृतज्ञानेन चितिशक्तेः स्वरूपमात्रेणावस्थानरूपं कैवल्यं सिध्यति। अत्र कैवल्यमुक्तं तदुपनिषत्कथिता ब्रह्मणि स्थितिरिति श्रीमन्मधुसूदनस्याभिप्रायः। १५।

योगाभ्यासनिष्ठस्याहारविहारादिनियममाह नात्यश्नत इति। न अत्यश्नतः परिमाणातिरिक्तमश्नतो भुञ्जानस्य, न च एकान्तमनश्नतो-

युक्ताहारविहारस्य युक्तचेष्टस्य कर्म्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥१७॥

ऽभुञ्जानस्य, न च अतिस्वप्नशीलस्य अतिनिद्रालोः, नैव जाग्रतो जागरणशीलस्य, हे अर्ज्जुन, योगोऽस्ति योगी भवति। "नाध्मातः क्षुधितः श्रान्तो न च व्याकुलचेतनः। युञ्जीत योगं राजेन्द्र योगी सिद्ध्यर्थमादृतः॥ नातिशीते न चोष्णे वै न द्वन्द्वे नानिलात्मके। कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः॥" (मा, पु, ३८अ, ४७।४८श्लो)।१६।

कथम्भूतस्य योगी न भवति तदुक्तेदानीमाहारादिषु कान् स्वभावविहिताम् नियमाननुसृत्य योगी भवति तदाह युक्तेति। युक्ताहारविहारस्य युक्तौ नियतपरिमाणौ आहारविहारौ यस्य, कर्म्मसु लौकिकपारमार्थिककृत्येषु युक्तचेष्टस्य युक्ता नियता चेष्टा यस्य, युक्तस्वप्नावबोधस्य युक्तौ नियतौ स्वप्नावबोधौ निद्राजागरौ यस्य तस्य योगो दुःखहा दुःखनिवर्त्तको भवति। निद्राजागरणनियमो यथा—"पूर्व्वरात्रापरार्द्धे च धारयेन्मन आत्मनि।" (शा, प, २३४अ, १४श्लो) इति। 'युक्तचेष्टस्य कर्म्मसु' इत्यनेन स्वाभाविकत्वं योगस्य, वागादिचापल्ये विरक्तत्वमेव; कर्म्मसु भगवदाज्ञापालनरूपेषु न योगक्षतिः। "योजनाच परं गच्छेत्" इति विहारनियमः। योजनं चतुःक्रोशपरिमाणम्। "पूरयेदशनेनार्द्धं तृतीयमुदकेन तु। वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत्॥" इत्याहारनियमः। कालदेशोचितयोगाचरणं स्वाभाविकः पन्था योगस्य, अतएवाह दत्तात्रेयः—"दृढ़ता चित्तशुद्धिश्च जायते नात्र संशयः। स्थानकालप्रभावेण निश्चयं विद्धि भूमिप॥" (मा, पु, ३८अ, ५२श्लो) इति। देशकालविपरीताचरणेन रोगोत्पत्तिः स एवाह, यथा—"बाधिर्य्यं जड़ता लोपः स्मृतेर्मूकत्वमन्धता। ज्वरश्च जायते सद्यस्तत्तदज्ञानयोगिनः॥" (मा, पु, ३८अ, ५४श्लो) इति। अन्येऽपि रोगा उत्पद्यन्ते, यथा तत्रैव—"वातगुल्मप्रशान्त्यर्थमुदावर्त्ते तथोदरे। यवागूं वापि पवनं वायुग्रन्थिं प्रति क्षिपेत्॥" (मा, पु,

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निस्पृहः सर्व्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥
यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥२०॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥२१॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥२२॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्व्विण्णचेतसा ॥२३॥

३८अ, ५७श्लो) इति। हठयोगोक्तप्राणायामाद्यनुष्ठानेन रोगोत्पत्तिरस्माभिः प्रत्यक्षीकृता बहुषु। तेषु केऽपि तत्तद्रोगेण मृताः, केऽपि रोगातुरा अद्यापि जीवन्ति। १७।

कोऽसौ निष्पन्नयोग इत्यपेक्षया तल्लक्षणमाह यदेति। यदा विनियतं विशेषेण नियतमेकाग्रतामापन्नं निरुद्धं चित्तं विषयग्रहणसामर्थ्ये सत्यपि आत्मन्येव केवलेऽवतिष्ठते स्थितिं लभते, तदा सर्व्वकामेभ्यो निस्पृहः तृष्णाशून्यो योगी युक्तः समाहितो निष्पन्नयोग इति उच्यते कथ्यते। १८।

उपमायोगात् समाहितचित्तलक्षणं दर्शयति यथेति। यथा निवातस्थो निवाते वातवर्ज्जितस्थाने स्थितः दीपः नेङ्गते न चलति, आत्मनो योगं युञ्जतः यतचित्तस्य संयतान्तःकरणस्य योगिनः सा उपमा। १९।

कोऽयं योग इत्यपेक्षयाह यत्रेति चतुर्भिः। योगसेवया योगानु-

ष्ठानेन योगाभ्यासेन चित्तं निरुद्धं सर्व्वतो निवारितप्रचारमुपरतमेकाविषयकवृत्तिप्रवाहरूपामेकाग्रतां त्यक्त्वा निरिन्धनाग्निवदुपशाम्यत् यत्र उपरमते उपरतिं गच्छति अतिशयितसुखमिदमेवेति रमते सर्व्ववृत्तिनिरोधरूपेण परिणतं भवति ; यत्र एवं परिणते योगे च आत्मना मनसा समाधिपरिशुद्धेनान्तःकरणेन आत्मानं प्रत्यक्चैतन्यं निर्व्विकल्पं परमात्मनैकतामात्रं पश्यन् स्वे आत्मनि तुष्यति न तु देहेन्द्रियादिसङ्घाते न वा तद्भोग्ये ; यत्र योगे च बुद्धिग्राह्यम् इन्द्रियनिरपेक्षया बुद्ध्या निरुद्धसर्व्ववृत्तिकेनान्तःकरणेनैव गृह्यत इति बुद्धिग्राह्यमात्माकारतया ग्राह्यम्—सुषुप्तौ बुद्धेर्लयो भवति, सुषुप्तौ निगृहीतायां समाधौ शुद्धाया बुद्धेः स्थितिर्भवति तया ग्राह्यम्, योगे मूर्च्छा नादरणीया तस्याः सुषुप्त्याकारत्वात्,—अतीन्द्रियम् इन्द्रियगोचरातीतमविषयजनितम् आत्यन्तिकं निरतिशयं यत्तत् किमपि सुखं वेत्ति साक्षादनुभवति ; यत्र च योगे स्थितः सन् तत्त्वतः तद्भावादात्मस्वरूपात् न चलति विच्युतो भवति ; यञ्च निरतिशयात्मसुखव्यञ्जकं योगं लब्ध्वा अपरं लाभं ततोऽधिकं न मन्यते न चिन्तयति ; यस्मिन् सुखात्मके योगे स्थितः गुरुणापि महतापि गुणवत्पुत्त्रवियोगादिरूपेण दुःखेन न विचाल्यते न अभिभूयते, तं दुःखसंयोगवियोगं दुःखैः संयोगः दुःखसंयोगः तेन वियोगः दुःखसंयोगवियोगः तं दुःखसंयोगवियोगं योगसंज्ञितं योगाख्यं योगशब्दवाच्यं विद्यात् जानीयात् । स योगः निश्चयेनाध्यवसायेन अनिर्व्विण्णचेतसा निर्व्वेदशून्येन दुःखबुद्ध्या प्रयत्नशैथिल्यविरहितेन किमतः कष्टमिति बुद्ध्यानुतापवर्ज्जितेन चित्तेन सोत्साहेन योक्तव्यः अनुष्ठेयोऽभ्यसनीयः । "उत्सेक उदधेर्यद्वत् कुशाग्रेणैकविन्दुना । मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥" इति गौड़पादोक्तिः कीदृशं प्रयत्नशैथिल्यं योगे कर्त्तव्यं तत्प्रदर्शयति । अनन्तस्य परमात्मन आत्मस्थीकरणेऽध्यवसाय ईदृक् शोभत एव । साधूक्तं श्रीमन्मधुसूदनेन "एवम् [इताण्डार्णवशोषकपक्षिवत्] अखेदेन मनोनिरोधे परमधर्म्मे प्रवर्त्तमानं योगिनमीश्वरोऽनुगृह्णाति" इति २०—२३ ।

सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्व्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥२४॥
शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥२५॥

कया रीत्या योगो योक्तव्य इत्याह सङ्कल्पप्रभावानिति शनैः शनैरिति द्वाभ्याम् । सङ्कल्पप्रभवान् सङ्कल्पः इदं मे भूयादिति चित्तवृत्तिः स एव प्रभवो येषां कामानां तान् सर्व्वान् कामान् अशेषतः निरवशेषान् मनसा—पुत्रपौत्रवित्तादयः स्वरूपेण त्यक्तुमशक्याः, अतएव तेषामनित्यत्वादिचिन्तनेन—त्यक्त्वा परित्यज्य समन्ततः सर्व्वस्मात् विषयादिन्द्रियग्राममिन्द्रियसमूहं तेनैव नियम्य, धृतिगृहीतया धृत्या धारणया धैर्य्येण अखिन्नभावेन—"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥" (१८।३३) इत्युक्तलक्षणया गृहीता सम्यग्गृहीता या बुद्धिरवश्यकर्त्तव्यतानिश्चयरूपा तया मनः आत्मसंस्थम आत्मन्येव स्थितं निश्चलं कृत्वा शनैः शनैः अभ्यासक्रमेण न तु हठेन उपरमेत् उपरतिं कुर्य्यात् निवृत्तियोगमनुतिष्ठेत्, आत्मनोऽन्यत् किञ्चिदपि न चिन्तयेत् तस्मिन्नेव निवृतो निश्चलं तिष्ठेत् । शनैः शनैरुपरमक्रममाह श्रुतिः, यथा "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानं नियच्छेन्महति तद्यच्छेच्छान्त आत्मनि ॥" (कठ, ३।१३) इति । व्याख्यातैषा श्रीमन्मधुसूदनेन, "वागिति वाचं लौकिकीं वैदिकीञ्च मनसि व्यापारवति नियच्छेत् 'नानुध्यायेद्बहून् शब्दान् वाचो विग्लापनं हि तत्' इति श्रुतेः, वाग्वृत्तिनिरोधेन मनोवृत्तिमात्रशेषो भवेदित्यर्थः, चक्षुरादिनिरोधोऽप्येतस्यां भूमौ द्रष्टव्यः । —मनसीति छान्दसन्दैर्घ्यम् । तन्मनः कर्म्मेन्द्रियज्ञानेन्द्रियसहकारि नानाविधविकल्पसाधनं करणं ज्ञाने जानातीति ज्ञानमिति व्युत्पत्त्या ज्ञातर्य्यात्मनि ज्ञातृत्वोपाधावहङ्कारे नियच्छेत् मनोव्यापारान् परित्याज्याहङ्कारमात्रं परिशेषयेत्, तञ्च ज्ञानं ज्ञातृत्वोपाधिमहङ्कारमात्मनि

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥
प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥२७॥

महति महत्तत्त्वे सर्व्वव्यापके नियच्छेत् । द्विविधो ह्यहङ्कारो विशेषरूपः सामान्यरूपश्चेति । अयमहमेतस्य पुत्र इत्येवं व्यक्तमभिमन्यमानो विशेषरूपो व्यष्ट्यहङ्कारः । अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः समष्ट्यहङ्कारः । स च हिरण्यगर्भो महानात्मेति च सर्व्वानुस्यूतत्वादुच्यते । ताभ्यामहङ्काराभ्यां विविक्तो निरुपाधिकः शान्तात्मा सर्व्वान्तरश्चिदेकरसः तस्मिन् महान्तमात्मानं समष्टिबुद्धिं नियच्छेत्, एवं तत्कारणमव्यक्तमपि नियच्छेत्, ततो निरुपाधिकस्वंपदलक्ष्यः शुद्धात्मा साक्षात्कृतो भवति । शुद्धे हि चिदेकरसे प्रत्यगात्मनि जडशक्तिरूपमनिर्वाच्यमव्यक्तं प्रकृतिरुपाधिः, सा च प्रथमं सामान्याहङ्काररूपं महत्तत्त्वं नाम भूत्वा व्यक्तीभवति । ततो बहिर्विशेषाहङ्काररूपेण, ततो बहिर्मनोरूपेण, ततो बहिर्वागिन्द्रियरूपेण ।" इति । एवमुपरतेर्भूमिचतुष्टयमुक्तं स्फुटीकृतञ्च तत्र तेनैव—"(१) गवादिष्विव वाङ्निरोधः प्रथमा भूमिः, (२) बालमुग्धादिष्विव निर्म्ममत्वं द्वितीया, (३) तन्द्रादिष्विवाहङ्काराराहित्यं तृतीया, (४) सुषुप्ताविव महत्तत्त्वराहित्यं चतुर्थी" इति । सर्व्ववृत्तिनिवृत्तावपि आत्मचैतन्यनिवृत्तिर्न भवति, तदप्युक्तं तेन, "तत्र घटदुःखाद्यनात्माकारविरामप्रत्ययाभ्यासेन निवारितेऽपि निर्निमित्तोद्घटाकारो वारयितुं न शक्यते" इति । २४।२५ ।

"शनैः शनैरुपरमेत्" इति व्याचष्टे यतो यत इति । स्वभावतश्चञ्चलमस्थिरम् एकत्र स्थातुमसमर्थं मनो यतो यतो यं यं शब्दादिविषयं प्रति निश्चलति निर्गच्छति, ततस्तत एतन्मनो नियम्य प्रत्याहृत्य आत्मन्येव वशं नयेत् स्थिरं कुर्य्यात् । २६ ।

आत्मसंस्थे मनसि किं स्यात्तदाह प्रशान्तमनसमिति । प्रशान्त-

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥२८॥
सर्व्वभूतस्थमात्मानं सर्व्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्व्वत्र समदर्शनः ॥२९॥

प्रशान्तं प्रकर्षेण शान्तं मनो यस्य तमात्मनि न्यस्तमनसं शान्तरजसं विनष्टरजोगुणम् विक्षेपोऽन्याभिनिवेशस्तच्छून्यम्, अकल्मषं कल्मषं रजःप्रावल्यात् शुभकर्म्मक्षयहेतुस्तमोगुणस्तद्रहितं लयोऽनभिनिवेशस्तेन शून्यम्, एनं हि पूर्व्वोक्ताभ्यासवन्तं योगिनम् उत्तमं सुखं स्वरूपानुभवजनितमुपैति प्राप्नोति। २७।

आत्मसाक्षात्कारतज्जनितसुखानुभवानन्तरं किं भवति तदाह युञ्जन्निति। एवं यथोक्तेन क्रमेण सदा आत्मानं मनो युञ्जन् वशीकुर्व्वन् विगतकल्मषं विशेषेण गतं कल्मषं ब्रह्मयोगान्तरायतमोभूतं पापं यस्य स योगी सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणः संस्पर्शः साक्षात्कारस्तदेवात्यन्तं निरतिशयं सर्व्वोत्तमं सुखमश्नुते प्राप्नोति। २८।

एवं सिद्धे योगे प्रथमत आत्मदर्शिनोऽन्तर्वहिरात्मनैकत्वदर्शनं वर्णयति सर्व्वभूतस्थमिति। सर्व्वत्र समदर्शनः ज्ञानैकाकारतया समं स्वस्वरूपैकं पश्यतीति समदर्शनः, योगयुक्तात्मा योगेन युक्तः समाहितः प्रकृतिसम्बन्धविमुक्तः आत्मा अन्तःकरणं यस्य स, आत्मानं ज्ञानाकारेण सर्व्वभूतस्थं, सर्व्वभूतानि च आत्मनि ईक्षते प[श्य]ति। 'समदर्शनः ब्रह्मात्मैकविषयं दर्शनं ज्ञानं यस्य स' इति श्री[मच्छ]ङ्करः। एवमन्येऽपि व्याख्यातारः। विशेषस्त्वाह श्रीमद्रामानुजः, तद्यथा— "स्वात्मनः परेषाञ्च भूतानां प्रकृतिवियुक्तस्वरूपाणां ज्ञानैकाकारतया साम्याद्वैषम्यस्य च प्रकृतिगतत्वात् योगयुक्तात्मा प्रकृतिवियुक्तेष्वात्मसु सर्व्वत्र ज्ञानैकाकारतया समदर्शनः, सर्व्वभूतस्थं स्वात्मानं सर्व्वभूतानि च स्वात्मनीक्षते। सर्व्वभूतसमानाकारं स्वात्मानं स्वात्मसमानाकाराणि च सर्व्वभूतानि पश्यति। एकस्मिन्नात्मनि दृष्टे सर्व्वस्यात्मवस्तुनः साम्यात्

यो मां पश्यति सर्व्वत्र सर्व्वञ्च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥
सर्व्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।
सर्व्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते ॥३१॥

सर्व्वत्रस्तु दृष्टं भवतीत्यर्थः इति। सर्व्वभूतस्थमित्यारभ्य श्लोकचतुष्टये चतुःप्रकारा उत्तरोत्तरयोगविपाकदशा उच्यन्त इति श्रीमद्रामानुजः। २९।

इदानीं सर्व्वान्तर्यामिणात्मवेदिर्योगिनैक्यं तत्फलञ्च दर्शयति यो मामिति। यो मां सर्व्वान्तर्यामिणं सर्व्वत्र स्वात्मनि सर्व्वभूतेषु च पश्यति, सर्व्वञ्च स्वात्मानं सर्व्वाणि भूतानि च मयि पश्यति, तस्य योगिनोऽहं सर्व्वान्तर्यामी न प्रणश्यामि न परोक्षतां गमिष्यामि न अदृश्यो भवामि, स च योगी मे सर्व्वान्तर्यामिणः न प्रणश्यति न परोक्षो भवति न अदृश्यो भवति। एतेनात्मनः परमात्मनश्च मिथः साक्षात्कृतिर्भवति नैरन्तर्य्येणेति तत्त्वमुक्तमाचार्य्येणाभिव्यक्तञ्च मुक्तावपि जीवेश्वरयोरेकत्रावस्थितिः स्वरूपैक्येनेति स्वमतम्। ३०।

"वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः" (७।१९) इत्युक्तदिशा सर्वत्र सर्व्वान्तर्यामिणो दर्शनस्य फलमाह सर्व्वभूतेति। सर्व्वभूतस्थितं मां सर्व्वान्तर्यामिणम् एकत्वमास्थितः प्रतिभूतस्थं तं भिन्नत्वेनानवलोकयन् यो भजति, स योगी सर्व्वथा वर्त्तमानोऽपि भगवदाज्ञावशादृयां काञ्चिदवस्थां स्वीकृत्य विद्यमानोऽपि,—कदाचित् कर्म्म कुर्व्वन् कदाचिदकुर्व्वन् कदाचिद्ध्याननिमीलितनयनः कदाचिद्ध्यानशून्यः सन् तिष्ठन्नपि—मयि वर्त्तते न तु संसारे, अन्यैर्भ्रान्तिवशात्तथा दृष्टोऽपि। अत्र यत् श्रीमता नीलकण्ठेनोक्तं "दत्तात्रेयादिवन्निषिद्धकर्म्मणा वर्त्तमानः·········मय्येव वर्त्तते" इति तन्न युक्तम्, यतस्तादृशानां योगिनां रागद्वेषविरहितत्वात् निषिद्धकर्म्मणि प्रवृत्तिर्न सर्व्वथा सम्भवति, अपिच दत्तात्रेयोपदेशे विकर्म्मसम्बन्धत्याग एव दृश्यते, तद्यथा "मानापमानौ

आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्ज्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥३२॥

अर्ज्जुन उवाच—

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ॥३३॥
चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥३४॥

यावेतौ प्राग्रुद्वेगकरौ नृणाम । तावेव विपरीतार्थौ योगिनः सिद्धिकारकौ ॥ मानापमानौ यावेतौ तावेवाहुर्विषामृते । अपमानोऽमृतं तत्र मानन्तु विषमं विषम ॥ चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् । सत्यपूतं वदेद्वाणीं बुद्धिपूतञ्च चिन्तयेत् ॥" (मा, पु, ४१अ, २।३श्लो) इत्यादिषु । यदि कुत्रापि विकर्म्मानुसरणं तस्य वर्णितमस्ति, तद्विकर्म्माभासेनात्मगोपनार्थं सम्मानादुद्विग्नत्वेनेति तत्त्वम्, अन्यथा न तस्मिन् योगयुक्ते जातु तत् सम्भवति । अनन्तरोक्तं पद्यं 'आत्मौपम्येने'-त्यादि सर्व्वथा विकर्म्मविरोध्येव । ३१ ।

'सर्व्वथा वर्त्तमानोऽपी'त्युक्तिर्न यथेच्छाचारानुमोदनायेत्याह आत्मौपम्येनेति । हे अर्ज्जुन, आत्मौपम्येन आत्मैवौपम्यमुपमा तेनात्मदृष्टान्तेन स्वसादृश्येन सुखं वा यदि वा दुःखं समं तुल्यं यथैव सुखं ममेष्टं दुःखं ममानिष्टं तथैव सर्व्वेषां प्राणिनामिति यः पश्यति स योगी परमः श्रेष्ठो मतः । एवं जानन् स परपीड़ासु न प्रवर्त्तते, प्रत्युत सर्व्वेषां सुखमेव वर्द्धयति । ३२ ।

चित्तस्य चाञ्चल्यस्वभावात् पार्थो योगे स्वस्य प्रतिष्ठामपश्यन् तस्य दुष्करत्वमाविष्करोति योऽयमिति चञ्चलमिति द्वाभ्याम् । हे मधुसूदन, साम्येन समत्वेन चित्तगतविषमदृष्टिकारणरागद्वेषादीनां निराकरणेन, ज्ञानैकाकारतया परस्परसाम्येन अहिंसाप्राधान्येन आत्मसुखदुःखौपम्येन परेषां सुखदुःखानुभवेन योऽयं योगस्त्वया प्रोक्तः, एतस्य योगस्य

श्रीभगवानुवाच—

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥३५॥

स्थिरामचलां स्थितिं न पश्यामि। हे कृष्ण, मनो हि चञ्चलं प्रमाथि देहेन्द्रियक्षोभकरं, बलवत् दुर्निवारम्, दृढ़ं दुर्भेद्यम्, अहं तस्य मनसः वायोरिव निग्रहं निरोधं सुदुष्करं मन्ये। ३३।३४।

मनसो निरोधः सुदुष्कर एवेति स्वीकृत्य निरोधोपायमाह असंशयमिति। हे महाबाहो, मनो दुर्निग्रहं निरोद्धुमशक्यं चलं चञ्चलम् असंशयं निःसंशयमेवमेव। किन्तु, हे कौन्तेय, अभ्यासेन समानप्रत्ययावृत्त्या न तु हठेन, वैराग्येण विषयवैतृष्ण्येन च मनो गृह्यते निरुद्धते निग्रहीतुं शक्यते। अत्र पतञ्जलिः—"अभ्यासवैराग्याभ्यां तन्निरोधः" (१।१२) इति। भाष्यञ्च—"आसां [चित्तवृत्तीनां] निरोधे क उपाय इति? चित्तनदी नामोभयतो वाहिनी, वहति कल्याणाय वहति पापाय च। या तु कैवल्यप्राग्भारविवेकविषयनिम्ना, सा कल्याणवहा, या संसारप्राग्भाराविवेकविषयनिम्ना सा पापवहा। तत्र वैराग्येण विषयस्रोतः खिलीक्रियते, विवेकदर्शनाभ्यासेन कल्याणस्रोत उद्घाट्यते इत्युभयाधीनश्चित्तवृत्तिनिरोधः" इति। श्रीमन्मधुसूदन आह "अत्र प्रथमार्द्धेन चित्तस्य हठनिग्रहो न सम्भवतीति, द्वितीयार्द्धेन तु क्रमनिग्रहः सम्भवतीत्युक्तम्। द्विविधो हि मनसो निग्रहः, हठेन क्रमेण च। तत्र चक्षुःश्रोत्रादीनि ज्ञानेन्द्रियाणि वाक्पाण्यादीनि कर्म्मेन्द्रियाणि च तद्गोलकमात्रोपरोधेन हठान्निगृह्यन्ते, तद्दृष्टान्तेन मनोऽपि हठेन निग्रहीष्यामीति मूढ़स्य भ्रान्तिर्भवति। न च तथा निग्रहीतुं शक्यते, तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात्। अतएव क्रमनिग्रह एव युक्तः" इति। पुनः पुनरात्मनि परात्मनि वा चित्तस्थापनेन स्थैर्य्यप्राप्तिरभ्याससाध्या। वासनापरित्यागं विना केवलेनाभ्यासेन न कृतार्थता, अतएव वैराग्यं वासना-

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥३६॥

अर्जुन उवाच—

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥

परित्यागे प्रधानोपायः । तत्त्वालोचनसाधुसङ्गादिकन्त्वेतयोरेवान्तर्भूतम्, एतयोः पुष्टिसाधकत्वात् । परवैराग्येण चित्तवृत्तेः सर्व्वथा निरोध एव योग इति पक्षे निर्वृत्तिके चित्ते कथमात्मस्वरूपानुभवानन्दः ब्रह्मसंस्पर्शसुखानुभवो वेति संशयस्य समाधानं सुकरमेव । सुखमहमनुभवामीति सविकल्पमनोवृत्तिः सुखास्वादे हेतुः, तां निरुध्य यदा चित्तं वृत्तिशून्यं भवति तदा शुद्धात्मा मेघनिर्म्मुक्तचन्द्रमा इव स्वस्वरूपेणोदेति । तस्योदये पुनः परमात्मा तत्सन्निधौ प्रकाशते स्वरूपैक्यात् । स तु स्वयमानन्दोऽतो ब्रह्मसंस्पर्शजन्यसुखमात्मनः सहजलभ्यं भवति । योगे निर्वृत्तिकचित्तत्वं प्राचाम्, अहंममवर्ज्जितात्मत्वान्वीचामिति वस्तुत एकमेव । अहमस्मिता च योगे निरोधविषयावतो न प्राचीनार्व्वाचीनमार्गयोरत्यन्तभेदः । ३५ ।

कस्य वा योगो दुष्प्रापः कस्य चोपायसाध्य इत्याह असंयतेति । असंयतात्मना अभ्यासवैराग्याभ्यां न संयतो निरुद्ध आत्माऽन्तःक[illegible] यस्य तेन असंयतात्मना योगो दुष्प्रापः प्राप्तुमशक्य इति मे [illegible]तः सम्मतिरभिप्रायः । वश्यात्मना अभ्यासवैराग्याभ्यां वश्यो वश्य[illegible]ताम् आत्माऽन्तःकरणं यस्य तेन वश्या[illegible]त्मना तु यतता भूयोऽपि प्रयत्नं कुर्व्वता उपायतः पूर्व्वोक्तात् भगवदाराधनतदाज्ञापालनरूपकर्म्मयोगात् श्रीमधुसूदनमते पुरुषकारात् स योगः समदर्शनरूपोऽवाप्तुं प्राप्तुं शक्यः । ३६ ।

एवं योगमार्गस्यासंसाध्यत्वं पश्यन् योगाद्भ्रंशोऽपरिहार्य्य इति मन्वानः पृच्छत्यर्ज्जुनः अयतिरिति कच्चिदिति द्वाभ्याम् । अथवा

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढ़ो ब्रह्मणः पथि ॥३८॥

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥३९॥

श्रीभगवानुवाच—

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति ॥४०॥

योगेनात्मसाक्षात्कारः ब्रह्मसंस्पर्शसुखञ्च भविष्यतीति विश्वासेनोपेतः युक्तः, अयतिः अप्रयत्नवान् दृढ़तराभ्यासरूपयत्नैकल्यवान् अल्पयत्नः योगाच्चलितमानसः भ्रष्टस्मृतिर्मन्दवैराग्यः ; एवमभ्यासवैराग्यशैथिल्यात् योगसंसिद्धिं योगफलं सम्यग्दर्शनम् अप्राप्य अलब्ध्वा, हे कृष्ण, कां गतिं गच्छति ? हे महाबाहो, ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे विमूढ़ः विक्षिप्तः अप्रतिष्ठो निराश्रयः निरालम्बः कच्चिन्न उभयविभ्रष्टः फलाभिसन्धिविरहितकर्मयोगानुसरणात् कर्मानुष्ठानफलतो योगेनात्मसाक्षात्कारभगवदुपलब्धेश्च भ्रंशादुभयविभ्रष्टः छिन्नाभ्रमिव पूर्व्वस्मादभ्रतो मेघाच्छिन्नः परं महान्तं मेघमप्राप्य मेघशकलो यथा तथा नश्यति विनष्टो भवति ? ३७।३८ ।

एतन्मे इति । हे कृष्ण, एतं मे मम संशयं छेत्तुमपनेतुमर्हसि । अशेषतः त्वदन्यः त्वत्तोऽन्यः अस्य संशयस्य छेत्ता नाशयिता न हि उपपद्यते न सम्भवति । ३९ ।

एवं पृष्ट आचार्य्य आह पार्थेति । हे पार्थ, तस्य योगभ्रष्टस्य नैव इह इहलोके नामुत्र परलोके विनाशोऽसद्गतिर्विद्यते, हे तात हे वत्स, न हि कश्चित् कल्याणकृत् शुभानुष्ठाता दुर्गतिं गच्छति प्राप्नोति । ४० ।

लीलायां त्वन्येन संयोग एव" इत्यादि श्रीकृष्णसन्दर्भवचनस्वरसेन श्रीमता विश्वनाथेन रागवर्त्मचन्द्रिकायां प्रकटलीला सर्व्वकालिकीति निर्द्धार्य्य यस्मिन् ब्रह्माण्डे तस्मिन् काले प्रकटलीला वर्त्तते तत्रैव साधनसिद्धस्य देहस्य भङ्गे गोपीगर्भगतोऽयं भगवदाश्रित: सम्भवतीति वदता, "अन्ये त्वेवमजानन्त: श्रुत्वान्येभ्य उपासते । तेऽपि चातितरन्त्येव मृत्युं श्रुति-परायणा: ॥" (१३।२५), "मां हि पार्थ व्यपाश्रित्य येऽपि स्यु: पाप-योनय: । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥" (९।३२) इत्याचार्य्योक्तिरनुगम्यते । न खलु वक्तव्यमत्युक्तिरेषेति । यद्य-ग्निरेव विद्या अग्निरेव कर्म्मेति ध्यानेनामृतत्वलाभ:, कथं न स पर-मात्मध्यानेन । वदति हि ब्राह्मणम्—"एष ह एव सा विद्या यदग्नि: एतद् ह एव तत्कर्म्म यदग्नि: । ते ये एवमेतद्विदु: ये वा एतत्कर्म्म कुर्व्वते मृत्वा पुन: सम्भवन्ति । ते सम्भवन्त एव अमृतत्वमभिसम्भवन्ति" (श, प, ब्रा, १०।४।३।९।१०) इति । सिध्यते चैवमृगुक्तं निखिलविश्व-भ्रमणं स्वप्रतिपत्त्यनुसारत एव । अनात्मयाजिनो गति: पुनरुक्ता छान्दोग्ये ; तद्यथा, "तद्यथेह कर्म्मजितो लोक: क्षीयते एवमेवामुत्र पुण्यजितो लोक: क्षीयते, तस्य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्व्वेषु लोकेष्वकामचारो भवति, अथ य इहा-त्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्व्वेषु लोकेषु कामचारो भवति" (८।१।६) इति । तस्य आत्मयाजिन: कामचार एवं वर्णित:— "स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितर: समुत्तिष्ठन्ति, तेन पितृलोकेन सम्पन्नो महीयते । अथ यदि मातृलोक-कामो भवति सङ्कल्पादेवास्य मातर: समुत्तिष्ठन्ति, तेन मातृलोकेन सम्पन्नो महीयते ।" एवं भ्रातृलोककाम:, स्वसृलोककाम:, सखि-लोककाम:, गन्धमाल्यलोककाम:, अन्नपानलोककाम:, गीतवादित्र-लोककाम:, स्त्रीलोककामो भवति तेन तेन च सम्पन्नो महीयते इत्युक्ता सङ्कल्पादुक्ता श्रुति:—"यं यमन्तम् (प्रदेशम्) अभिकामो भवति यं यं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठन्ति तेन सम्पन्नो महीयते ।"

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥४२॥
तत्र तं बुद्धिसंयोगं लभते पौर्व्वदैहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥४३॥

(८।१०।२) इति । श्रीमन्माध्वप्रणीते गीताभाष्ये (२।५०) प्रारम्भे 'स यदि पितृलोककामः' इति श्रुतिमुदाहृत्य मध्ये मुक्तानामप्राकृतशरीरत्वं स्वीकृतम् । तद्यथा—"न च 'न ह वै सशरीरस्य' इत्यादि विरोधः, दैलक्षण्यात्तच्छरीराणाम् । अभौतिकानि हि तानि, नित्योपाधिनिर्म्मितानोश्वरशक्त्या । तथा चोक्तम्—'शरीरं जायते तेषां षोड़श्या कलयैव हि' इति नारायणरामकल्पे । वदन्ति च लौकिकाः देहस्येर-ऽभावशब्दम्—'अप्रहर्षमनानन्दम्', 'सुखदुःखवाह्यः' इत्यादिषु । निकृष्टभावाच्च न तानि शरीराणि, तथाहि श्रुतिः 'अशरीरं तच्छरीरमभवत्' इति । न हि तानि शीर्णानि भवन्ति—'सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' इत्यादिवचनात् ।" इति । श्रीमद्भागवते वैकुण्ठवासिनोऽधिकृत्य—"देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्" (७स्क, १अ, ३३श्लो) इति । अत्र स्वामी—"जन्महेतुभूतैः प्राकृतैर्देहेन्द्रियासुभिर्हीनानां शुद्धसत्त्वमयदेहानामित्यर्थः" इति । मनोभावानुसारी प्रकृतिसम्बन्धः स एव तनुग्रह इति दृष्ट्वा युक्तमुक्तमाचार्य्येण "देहान् यथेष्टमभ्येति हित्वेमां मानुषीं तनुम् । निर्व्वेदस्तु न कर्त्तव्य" इति (भ, गी, १८अ, २१श्लो) । ४१ ।

अल्पकालं योगमभ्यस्य या गतिर्लभ्यते तामुक्त्वा दीर्घकालयोगाभ्यासस्य फलं त्वरितगतिरित्युच्यते अथवेति । अथवा पुण्यकृतां लोकानप्राप्यैव ब्रह्माण्डान्तरे प्रकटलीलावत्यप्रकटलीलावति वा धीमतां विवेकज्ञानवतां योगिनां योगैकधनानां कुले भवति सम्भवति । लोके लोकलोकान्तरे यदीदृशं योगिकुले जन्म, एतद्धि दुर्लभतरं दुर्लभादपि दुर्लभं प्राकृतानामिति शेषः । ४२ ।

दुर्लभत्वं कथमेतादृशजन्मद्वयस्येत्याह तत्रेति । तत्र श्रीमतां गेहे

पूर्व्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ॥४४॥
प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥४५॥
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्म्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्ज्जुन ॥४६॥

योगिकुले च पौर्व्वदैहिकं "क्रतुमयोऽयं पुरुषः" इति न्यायात् पूर्व्वदेहे भवं बुद्धिसंयोगं "एवं क्रतुर्ह्यमुं लोकं प्रेत्याभिसम्भवति" इति न्यायात् यावतीं योगभूमिं जित्वा यावती बुद्धिर्लब्धा तावत्या बुद्ध्या संयोगं लभते, अनुष्ठानस्याविनाशित्वात्। ततः तज्जितयोगभूमित एव, हे कुरुनन्दन, संसिद्धौ भूयः यतते च यत्नं करोति च। ४३।

पौर्व्वदैहिकबुद्धियोगात् किं भवति तदाह पूर्व्वाभ्यासेनेति। तेनैव पूर्व्वाभ्यासेन पूर्व्वसंस्कारेण स योगभ्रष्टः अवशोऽपि केनचिद्विघ्नेनानिच्छन्नपि ह्रियते आकृष्यते योगेनेति शेषः। हीति प्रसिद्धोऽयं योगमहिमा। धनजनादिकामनयानुष्ठितवेदविहितयागापेक्षया योगस्य श्रेष्ठत्वमाह योगस्येति। योगस्य जिज्ञासुरपि ज्ञातुमिच्छुरपि शब्दब्रह्म वेदम् अतिवर्त्तते अतिक्रामति। ४४।

योगित्वं कथं श्रेय इत्याह प्रयत्नादिति। प्रयत्नात् यत्नातिशयात् यतमानः यत्नं कुर्व्वंस्तु योगी संशुद्धकिल्बिषः निर्द्धौतान्यवासनः, अनेकजन्मसंसिद्धः अनेकेषु जन्मसूपचितेन पुण्येन संसिद्धः, ततो लब्धसम्यग्दर्शनः परां श्रेष्ठां गतिं मुक्तिं याति प्राप्नोति। ४५।

ज्ञानकर्म्मभक्तीनां योगप्रधानत्वेन श्रेष्ठत्वमिति तस्य सर्व्वेभ्यः श्रेष्ठत्वमाह तपस्विभ्य इति। योगी ब्रह्मणा योगेच्छुः तपस्विभ्यः तपःपरायणेभ्यः कृच्छ्रसाधनेन लोकान् जयाम इत्यभिमानवद्भ्योऽपि अधिकः श्रेष्ठः, ज्ञानिभ्यः शास्त्रविज्ञानविद्भ्योऽपि अधिकः विशिष्टो

योगिनामपि सर्व्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥४७॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे ध्यानयोगो नाम षष्ठोऽध्यायः ।

मतः, कर्म्मिभ्यः अग्निहोत्रादिवैदिकानुष्ठानपरायणेभ्योऽपि अधिकः श्रेष्ठः । हे अर्ज्जुन, तस्मात्त्वं योगी परमात्मना योगाकाङ्क्षी भव । ४६ ।

केवलं योगाभ्यासेन न कृतार्थता, अत आह योगिनामिति । सर्व्वेषामेतदध्यायोक्तानां चतुर्विधानां योगिनां योगयुक्तानां—"सर्व्वभूतस्थमात्मानम्" इत्येकः, "सर्व्वभूतानि चात्मनि" इति द्वितीयः, "यो मां पश्यति सर्व्वत्र" इति तृतीयः, "सर्व्वञ्च मयि पश्यति" इति चतुर्थः—मद्गतेन मयि सर्व्वान्तर्यामिणि समाहितेन अन्तरात्मनाऽन्तःकरणेन श्रद्धावान् श्रद्धायुक्तः सन् यो मां भजते मदाज्ञापालनेन सेवते, स मे मम युक्ततमोऽतिशयेन युक्तः सर्व्वेभ्यो योगयुक्तेभ्यः श्रेष्ठः मतः । अन्तरात्मनेति वचनेन ज्ञानम्, तच्च ज्ञानं मद्गतेनेति विशेषणेन नाच्युतभाववर्ज्जितम् ; श्रद्धावानिति विशेषणेन भजत इति क्रियया च भक्तिकर्म्मणी, एवं त्रयाणां समावेशः । 'योगिनामपि सर्व्वेषां रुद्रादित्यादिध्यानपरायणानाम्' इति श्रीमच्छङ्करमधुसूदनौ ; "'दैवमेवापरे यज्ञम्' इत्यादिना चतुर्थाध्यायप्रोक्ता द्वादश योगा तद्वतां योगिनां" मिति श्रीमन्नीलकण्ठः । पञ्चम्यर्थे षष्ठीं साधयित्वा सर्व्वेभ्यस्तपस्व्यादिभ्यो योगिभ्यो युक्ततम इति श्रीमद्रामानुजबलदेवविश्वनाथाः ।

षट्त्रिकेऽस्मिन् शास्त्रे व्याख्यातॄणां मतनिर्व्वाचने बहूनां ज्ञानादेव मुक्तिरिति सिद्धान्तः ; ज्ञानकर्म्मानुष्ठितया ध्यानलक्षणया भक्त्या मोक्ष इति श्रीमद्रामानुजीयाः ; केवलया भक्त्येति श्रीमच्छ्रीधरस्वाम्यादयः, अतो विशेषमाह श्रीमद्बलदेवः "कर्म्मणा हृद्विशुद्ध्या ज्ञानोदयेन मुक्तौ सत्यां भक्त्या को विशेषः ? उच्यते ज्ञानमेव किञ्चिद्विशेषाद्भक्तिरिति ।" वेदान्तस्यमन्तके स पुनराह "परोक्षं शाब्दं [ज्ञानम्] ;

अपरोक्षस्तु ह्लादिनीसारसमवेतसंविद्रूपम्, यच्च भक्तिशब्दव्यपदेश्यं दृष्टम्" इति; भगवत्प्रसादेन श्रीमन्माध्वः, यथा तत्कृतगीताभाष्ये (२।२४) "मोक्षो हि महापुरुषार्थः।.........स च विष्णुप्रसादादेव सिध्यति" इति।

भाष्यारम्भे श्रीमद्बलदेवेन गीताया विषयविभाग एवं कृतः—"षट्त्रिकेऽस्मिन् शास्त्रे प्रथमेन षट्केनेश्वरांशस्य जीवस्यांशीश्वरभक्त्युपयोगिस्वरूपदर्शनम्। तदन्तर्गतज्ञाननिष्कामकर्मसाध्यं निरूप्यते। मध्येन परमप्राप्यस्यांशीश्वरस्य प्रापणी भक्तिस्तन्महिमधीपूर्व्विकाभिधीयते, अन्त्येन तु पूर्व्वोदितानामेवेश्वरादीनां स्वरूपाणि परिशोध्यन्ते। त्रयाणां षट्कानां कर्म्मभक्तिज्ञानपूर्व्वताव्यपदेशस्तु तत्तत्प्राधान्येनैव। चरमे भक्तेः प्रतिपक्षेयोक्तिस्तु रत्नसम्पुटोर्द्धलिखिततत्सूचकलिपिन्यायेन।" इति। श्रीमन्मधुसूदनेन तु—"तत्र तु प्रथमे काण्डे कर्म्मतत्त्यागवर्त्मना। त्वम्पदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते॥ द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना। भगवान् परमानन्दस्तत्पदार्थोऽवधार्य्यते॥ तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम्। एवमप्यत्र काण्डानां सम्बन्धोऽस्ति परस्परम्॥" इति। श्रीमन्नीलकण्ठेन तु—"कर्म्मोपास्तिज्ञानभेदैः शास्त्रं काण्डत्रयात्मकम्।" श्रीमद्विश्वनाथेन तु—"प्रथमेन षट्केन निष्कामकर्म्मयोगः, द्वितीयेन भक्तियोगः, तृतीयेन ज्ञानयोगो दर्शितः। तत्रापि भक्तियोगस्यातिरहस्यत्वादुभयसञ्जीवकत्वेनाभ्यर्हितत्वात् सर्व्वदुर्लभत्वाच्च मध्यवर्त्तीकृतः। कर्म्मज्ञानयो भक्तिराहित्येन वैयर्थ्यात् ते द्वे भक्तिमिश्रे एव सम्मतीकृते।" इति।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये षष्ठोऽध्यायः।

सप्तमोऽध्यायः ।

श्रीभगवानुवाच—

मय्यासक्तमनाः पार्थ योगं युञ्जन् मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥१॥

द्वितीयेनाध्यायषट्केन भजनीयस्य स्वरूपं भजनञ्च वक्तुमारभते। उपक्रान्तमेतत् पूर्व्वाध्यायान्ते "मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो माम्" इत्यनेन। अत्र श्रीमद्रामानुज आह,—"प्रथमेनाध्यायषट्केन परमप्राप्यभूतस्य परस्य ब्रह्मणः·········प्राप्त्युपायभूतं तदुपासनं वक्तुं तदङ्गभूतमात्मज्ञानपूर्व्वककर्म्मानुष्ठानसाध्यं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनमुक्तम्। इदानीं मध्यमेन षट्केन परब्रह्मभूतं परमपुरुषस्वरूपं तदुपासनञ्च भक्तिशब्दवाच्यमुच्यते।·········'सत्त्वशुद्धौ ध्रुवा स्मृतिः सर्व्वग्रन्थीनां विप्रमोक्षः,' 'भिद्यते हृदयग्रन्थिः' इत्यादिभिरैकार्थ्यात् स्मृतिसन्तानरूपदर्शनसमाकारं ध्यानमुपासनशब्दवाच्यमित्यवगम्यते। पुनश्च·········विशेषेण तत्परेणात्मना वरणीयताहेतुभूतं स्मर्य्यमाणविषयस्यात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रियरूपं स्मृतिसन्तानमेवोपासनशब्दवाच्यमिति हि निर्णीयते। तदेव हि भक्तिरित्युच्यते। 'स्नेहपूर्व्वमनुध्यानं भक्तिरित्युच्यते बुधैः' इति वचनात्" इति। श्रीमन्माध्वस्त्वाह—"साधनं प्राधान्येनोक्तमतीतैरध्यायैः, उत्तरैस्तु षड्भिर्भगवन्माहात्म्यं प्राधान्येनाह" इति। सर्व्वान्तर्यामिणं परमपुरुषमज्ञात्वा न जातु तद्भजनं सम्भवति, अतः प्रथमं तज्ज्ञानं यथा लभेत तन्निर्व्वचनायाह मयीति। हे पार्थ, मयि सर्व्वान्तर्यामिणि आसक्तमनाः आसक्तमभिनिविष्टं निबद्धमतिमात्रनिरतं मनो यस्य सः, मदाश्रयः अहं सर्व्वान्तर्यामी एवाश्रयो यस्य सः, योगं परैणैक्यलक्षणं युञ्जन् कुर्व्वन् असंशयं संशयशून्यं यथा स्यात् तथा समग्रं समस्तं

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥२॥
मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥३॥
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥४॥

विभूतिबलशक्त्यैश्वर्यादिगुणसम्पन्नं मां सर्वान्तर्यामिणं यथा येन प्रकारेण ज्ञास्यसे तत् मया वक्ष्यमाणं शृणु । १ ।

वक्ष्यमाणज्ञानस्य महिमानमाह ज्ञानमिति । अहं सर्वान्तर्यामी ते तुभ्यमिदं सविज्ञानम् स्वानुभवप्रधानापरोक्षज्ञा- हितं ज्ञानं शास्त्रीयं परोक्षम्—श्रीमन्मधुसूदनमते स्वतोऽपरोक्षमपि प्र[illegible]बन्धवशात् परोक्षतां प्राप्तम्—अशेषतः कार्त्स्न्येन वक्ष्यामि, यज्ज्ञानं [illegible]त्वा इह भूयः पुनरपि अन्यत् ज्ञातव्यं नावशिष्यते नावशिष्टं भवति, सर्वथा कृतार्थतामापद्यत इति भावः । २ ।

भगवज्ज्ञानस्य दौर्लभ्यमाह मनुष्याणामिति । मनुष्याणां सहस्रेषु कश्चित् सिद्धये ज्ञानोत्पत्तये यतते, यततां यतमानानां यत्नं कुर्वतां सिद्धानामुत्पन्नज्ञानानां सहस्रेषु कश्चित् मां तत्त्वतः यथावस्थितं याथात्म्येन वेत्ति साक्षात्करोति । पृथग्जना हि विषयनिरता न चिन्तयन्ति तेषामधिकारं ब्रह्मविज्ञाने, येऽपि पुनर्ज्ञानानुशीलनपरास्तेऽपि [illegible]ना- तीतत्वं परतत्त्वस्य भावयन्तो न तत्साक्षात्काराय यत्नं [illegible]न्ति । यद्यप्यनन्तस्य परब्रह्मणः 'नाहं मन्ये सुवेदेति' (त, उ, १०) इति न्यायात् निःशेषज्ञानं न सम्भवति, तथापि 'नो न वेदेति' (त, उ, १०) इति न्यायात् ब्रह्मज्ञानं मोक्षोपयोग्यवश्यम्भावीति विश्वासपर एव तं परमात्मानं साक्षात्करोति । "नैव वाचा, न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथन्तदुपलभ्यते ॥" (कठ, ६।१२) इति ब्रह्मविज्ञाने विश्वासस्य साम्राज्यम् । ३ ।

सविज्ञानं ज्ञानं वक्ष्यामीति प्रतिज्ञातम् । तदधुना शास्त्रसिद्धज्ञानं

चक्रमारभते भूमिरिति। भूमिः चितिः, आपः जलम्, अनलः तेजः, वायुः मरुत्, खं व्योम इति पञ्च महाभूतानि, मनो बुद्धिः अहङ्कारः इति मे अष्टधा भिन्ना प्रकृतिः सर्जनशक्तिः। भूमिर्गन्धतन्मात्रम्, आपो रसतन्मात्रम्, अनलो रूपतन्मात्रम्, वायुः स्पर्शतन्मात्रम्, खं शब्दतन्मात्रम् इति भूतसूक्ष्माणात्यनेके। गन्धादयो भूम्यादीनां गुणा इत्याचार्यो न तान् पृथक्कोक्तवान्। "महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः॥" (१३।५) इत्यत्र गन्धादयः पञ्च इन्द्रियगोचरा इत्युक्तः पृथिव्यादिषु तेषामुपलब्धिरेवाभिप्रेता तेन। सांख्यशास्त्रगास्या उक्तैरेकत्वसाधनाय भूम्यादिशब्दैस्तत्प्रकृतितन्मात्राणि व्याख्यातृभिरर्थ्यन्ते। सांख्यशास्त्रे तु प्रकृतिविकृती इति भेदं साधयित्वा अष्टौ प्रकृतयः षोड़श विकृतय उक्ताः। अव्यक्ताख्या प्रधानाख्या प्रकृतिस्त्रिगुणात्मिका मूलप्रकृतिः। तस्या गुणवैषम्यात् बुद्ध्यन्तःकरणचित्ताख्यः महान्; महान् मूलप्रकृतेर्विकृतिरहङ्कारस्य प्रकृतिः; विकृतिरप्यहङ्कारस्तन्निहितप्रकाशात्मकतमोगुणविकारेण पञ्चतन्मात्राणां, प्रकाशात्मकसत्त्वगुणविकारेणैकादशेन्द्रियाणां प्रकृतिः। तन्मात्राणामिन्द्रियाणाञ्च क्रियाकारित्वं सत्त्वतमोगुणयोः रजोगुणसंस्रवेण। पञ्चतन्मात्राणि विकृतिरपि पृथिव्यादिपञ्चभूतानां प्रकृतिः। एवं पञ्चतन्मात्राणि अहङ्कारो महानव्यक्तमित्यष्टौ प्रकृतयः। पृथिव्यादिपञ्चभूतानि एकादशेन्द्रियाणि च न केषाञ्चित्प्रकृतिर्विकृतिरेव। अतस्तानि षोड़शविकृतयः षोड़शविकारा इत्युच्यन्ते। कथमाचार्य्येण गन्धस्पर्शादीननुक्त्वा भूम्यादिस्थूलभूतानि प्रकृतित्वेन विन्यस्तानीत्यस्य कारणजिज्ञासायां यान्याश्रित्यानुमितान्येतानि तत्त्वानि तान्येव प्रकृतित्वेन निर्दिष्टानीति सरलसिद्धान्तः। तद्यथा, पञ्चमहाभूतमयं स्थूलं जगत् दृष्ट्वा तत्कारणान्वेषणे प्रवृत्तिर्भवति। स्थूलेषु पञ्चभूतेषु गन्धादयो गुणा उपलभ्यन्ते। गन्धादिमयान्येव तानीत्यनुमाय व्यापित्वेनैतेषां कारणत्वमवधार्य्य घ्राणादिभिरुपलभ्यमाना गन्धादिसूक्ष्मांशास्तन्मात्रत्वेनानुमीयन्ते। मननलक्षणेन

मनसा जगद्दृश्यते मनो विना न तत् सम्भवतीति मनः प्रकृतौ गृहीतम्। मनसा चक्षुःश्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि संगृहीतानि। उक्तञ्चाचार्य्येण, "श्रोत्रञ्चक्षुः स्पर्शनञ्च रसनं घ्राणमेव च। अधिष्ठाय मनश्चायं विषयानुपसेवते॥" (१५।९) इति। मननपूर्व्वकम् अहं पश्यामीति अभिमानः, ततः क्रियोपतिष्ठते, अतः पञ्च कर्म्मेन्द्रियाणि अहङ्कारेण संगृहीतानि। मनो हि विकृतिमात्रमिति दृष्ट्वा पूर्व्वव्याख्यातृभिः मनःशब्देन मनसः कारणमहङ्कारोऽत्र गृहीतः। किमिदमभिप्रेतमाचार्य्यस्य तत्रास्माकं महान् संशयः। उपात्तस्तेनाहङ्कारशब्दः। स तु पुनरविद्यासंयुक्तमव्यक्तमिति तैः साधितम्। न वयं तद्बहु मन्यामहे। एका मे प्रकृतिरष्टधा भिन्नेति कथनेनाव्यक्तं महेश्वरस्य सर्ज्जनशक्तिभूतं लब्धं किमत्र वृथा कष्टकल्पनया। साधूक्तं श्रीमच्छङ्करेण शारीरकसूत्रभाष्ये, "प्रलीयमानमपि चेदं जगच्छक्त्यवशेषमेव प्रलीयते शक्तिमूलमेव च प्रभवति, इतरथाकस्मिकत्वप्रसङ्गात्" (वे, सू, १पा, ३अ, ३०सू, भा,), "यदि वयं स्वतन्त्रां काञ्चित् प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छाम: प्रसञ्जयेम तदा प्रधानकारणवादम्। परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते न स्वतन्त्रा। सा चावश्यमभ्युपगन्तव्या, अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति, शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः।" (वे, सू, १पा, ४अ, ३सू, भा) इति। नेयं शक्तिर्महेश्वरतो भिद्यते। अतो युक्तमाचार्य्येण 'मे प्रकृतिः' इति। कथमस्या अव्यक्तमिति संज्ञा? जगतः प्रागवस्था न कस्यापि दर्शनपथगता; अतः साऽव्यक्तसंज्ञां लभते। कुतो वैतदनुमीयते? सर्व्वेषां जीवानां भिन्नभिन्नपदार्थानाञ्च प्रागवस्था ह्यव्यक्ता, ततो व्यक्तावस्थायामव्यक्ततो व्यक्तिरिति प्रसिद्धिः। भवतु तत्तथैव, मनो हि विकृतिरेवाहङ्कारस्य, तत्कथं तस्य प्रकृतित्वेनात्र ग्रहणम्? मनो मननमत्र वस्तुनिर्द्धारणात्मकं बुद्धिरूपस्य महत्तत्त्वस्य कार्य्यम्—यथोक्तं सांख्यसूत्रे—"महदाख्यमाद्यं कार्य्यं तन्मनः" (१अ, ७१सू,) "चरमोऽहङ्कारः" (१अ, ७३सू)। यदा

जगद्दर्शनेन तन्मनन भवति तदा प्रथमं बुद्धेः कार्य्यं चक्षुरादिज्ञानेन्द्रि-याधिष्ठातृ मनः, ततोऽहं पश्यामि, अहं शृणोमीत्यस्याभिमानेन कर्म्मेन्द्रियाधिष्ठाताऽहङ्कारोऽनुमीयते। "एकादशपञ्चतन्मात्रं यत्कार्य्यम्" (२।१३) इति सूत्रेण यो विरोधः स तु तन्त्रव्यस्तत्त्वास्तस्यैव पूर्व्वापर-सङ्गतिरक्षार्थम्। रूपं पश्यामि, रसमास्वादयामि, शब्दं शृणोमी-त्यादिभिस्तन्मात्राण्यनुमीयन्ते। अहं पश्यामीत्यादिषु वस्तुनिश्चया-त्मिका हृत्तिरनुभूयते, तां विनाहङ्कारस्य स्थितिर्न जातु सम्भवति। सेयं वृत्तिर्बुद्धिर्महानिति संज्ञावती। ये ये विषयास्तया निश्चितास्तेषु तेषु सुखदुःखमोहानां सम्बन्धः पुनरुपलभ्यते। तेन चानुमीयन्ते सत्त्व-रजस्तमोगुणाः। तेषां मूलानुसन्धानेऽमूलं मूलं प्रकृतिर्बुद्धौ प्रति-भाति, ततोऽनुसन्धाननिवृत्तिश्च। इयं पुनर्महेश्वरस्य शक्तिस्तस्माद-भिन्ना। अनया शक्त्या पुरुषस्य भोग्यविषया उत्पद्यन्ते। तान्, तेषां धर्म्मान्, पुरुषेण सम्बन्धं, स्थितिकालञ्चोक्तवानाचार्य्योऽनुगीतायां, तद्यथा—"विषयो विषयित्वञ्च सम्बन्धोऽयमिहोच्यते। विषयो पुरुषो नित्यं सत्त्वञ्च विषयः स्मृतः॥ व्याख्यातं पूर्व्वकल्पेन मशकोडुम्बरं यथा। भुज्यमानं न जानीते नित्यं सत्त्वमचेतनम्॥ यस्त्वेवं तं विजानीते यो भुङ्क्ते यश्च भुज्यते। नित्यं द्वन्द्वसमायुक्तं सत्त्वमाहु-र्मनीषिणः॥ निर्द्वन्द्वो निष्कलो नित्यः क्षेत्रज्ञो निर्गुणात्मकः। समः संज्ञानुगश्चैव स सर्व्वत्र व्यवस्थितः॥ उपयुङ्क्ते सदा सत्त्वमपः पुष्कर-पर्णवत्। सर्व्वैरपि गुणैर्विद्वान् व्यतिषक्तो न लिप्यते॥ जलविन्दुर्यथा लोलः पद्मिनीपत्रसंस्थितः। एवमेवाप्यसंयुक्तः पुरुषः स्यान्न संशयः॥ द्रव्यमात्रमभूत्तत्त्वं पुरुषस्येति निश्चयः। यथा द्रव्यञ्च कर्त्ता च संयोगो-ऽप्यनयोस्तथा॥ यथा प्रदीपमादाय कश्चित्तमसि गच्छति। तथा सत्त्वप्रदीपेन गच्छन्ति परमैषिणः॥ यावद्द्रव्यगुणास्तावत् प्रदीपः सम्प्रकाशते। क्षीणे द्रव्ये गुणे ज्योतिरन्तर्द्धानाय गच्छति। व्यक्तः सत्त्वगुणस्त्वेवं पुरुषोऽव्यक्त इष्यते॥" (५० अ, ८—१७ श्लो) इति। ४।

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत् ॥५॥
एतद्‌योनीनि भूतानि सर्व्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥६॥

जड़प्रपञ्चोपादानभूतां प्रकृतिमुक्त्वेदानीं जीवप्रकृतिमाह, **अपरेय-मिति** । इयं सर्व्वाचेतनवर्गा प्रकृतिरपरा निकृष्टा जड़त्वात् परार्थ-त्वाच्च । इतोऽचेतनायाश्चेतनभोग्यभूताया प्रकृतेस्तु **अन्यां परां श्रेष्ठां** चेतनवर्गरूपां जीवभूतां प्राणधारणनिमित्तभूतां प्रकृतिं, **हे महाबाहो, विद्धि**, यया अन्तःप्रविष्टया इदं जगत् धार्य्यते स्वकारणे लयादुत्तभ्यते । "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" (छा, उ, ६।३।२) इति जीवेन 'प्राणधारणकर्त्रे'ति वचनात् सर्व्वं खल्विदं जगत् जीव-शक्तेः प्रथमाभिव्यक्तिप्राणशक्तेः रङ्गभूमिः, न हि तां विना सर्व्वमिदं जगदाकारेण परिणमते । एकस्यास्तस्याः शक्तेरभिव्यक्तिस्तु विविधा । पाषाणमृदादौ सा पुनः 'ज्ञानबलक्रिया' (श्वे, उ, ६।८) इति न्यायात् बलरूपेणानुभूयते, प्राणिषु प्राणरूपेण, जीवेषु ज्ञानरूपेण । ५ ।

एवं प्रकृतिद्वयं दर्शयन् तद्द्वारेव निखिलजगत्कारणत्वं परब्रह्मण आह एतदिति । निर्द्दिष्टाणि सर्व्वाणि स्थिरचराणि भूतानि एतद्‌योनीनि एते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनी कारणभूते येषां तानि । प्रकृतिद्वयोत्पन्नानि सर्व्वाणि चेत्, किं परब्रह्मणा ? न हि तत्कर्त्तृत्वं विना क्षेत्रक्षेत्रज्ञयोः स्रष्टृत्वादिकं सम्भवति ; यतोऽचे-तनस्य क्षेत्रस्य चेतनेन क्षेत्रज्ञेनाधिष्ठितस्य जगद्रूपेण परिणतिः सम्भवति चेत्, क्षेत्रज्ञस्य नियन्तृत्वमीश्वरत्वञ्च भवति, क्लेशेण तस्य ज्ञानावरणं न सम्भवति । क्षीरवत् क्षेत्रस्य प्रवृत्तिश्चेत्, प्रवृत्तिर्नियमा-नुपूर्व्विका दृश्यते, नियमानुपूर्व्विकत्वन्तु चेतनत्वं चेतनाधीनत्वं वा दर्शयति, ततः क्षेत्रस्याचेतनत्वचेतनानधीनत्वप्रतिज्ञाहानिः, प्रतिज्ञा-हानौ क्षेत्रस्येवेश्वरत्वं तदधीनत्वं वायाति । एवमस्वीकृतसम्भावनायाः

चेतनस्य नियमानुपूर्व्विकायाः क्रियायाः सिद्धेः "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवी-मन्तरो यमयति, एष त आत्माऽन्तर्याम्यमृतः" (बृ, उ, ५।७।३) इत्या-दिका अन्तर्यामिश्रुतयः नियन्तारं दर्शयन्ति चेतनस्य। उक्तञ्च श्रीम-च्छङ्करेण "नामरूपयोरपि निर्व्वहणं निरङ्कुशं न ब्रह्मणोऽन्यत्र सम्भ-वति। 'अयमेव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति ब्रह्मकर्त्तृत्वश्रवणात्। ननु जीवस्यापि नामरूपविषयं निर्व्वोढृत्वमस्ति, वाढ़मस्ति, अभेदस्त्वत्र विवक्षितः।" (वे, सू, १अ, ३पा, ४१सू, भा,) इति। चेतनपक्षे पुनरचेतनेन चेतनेणावृतस्य तस्याल्पज्ञत्वादिधर्म्मत्व-स्यापरिहार्य्यत्वात्, न तस्यास्ति स्वात्मदोषपरिहारसामर्थ्यम, किं पुन-र्वक्तव्यं जगत्स्रष्टृत्वादिषु तस्य सामर्थ्यमस्तीति। काले शास्त्राचार्य्योप-देशेन तस्य विवेकोदये दोषपरिहारः सम्भवेदित्युक्तिस्तु मूलशून्या। किमिदं शास्त्रमुपदेशो वा यस्यानुशासनं स स्वात्मदोषपरिहाराय गृह्णीयात्? भवन्मते चेतनं विनान्यस्य शास्त्रप्रणयनोपदेशदाने न कर्त्तृत्वमस्ति। चेतनेणावृतज्ञानस्य तस्य शास्त्रप्रणयनोपदेशदाने कुत्र वास्ति सामर्थ्यमन्यानुग्रहेणानावृतज्ञानत्वं विना। यदि स्वत एव शास्त्रमात्मानमाविष्करोति, तदा तस्यैव शास्तृत्वादीश्वरत्वमायाति, तदनुशासनानुसरणेन नियमपूर्व्वकक्रियावतः चेतनस्य चेतनज्ञस्य च प्रवृत्ति-सत्त्वात्। मोक्ष एव शास्त्रस्य प्रभुत्वं, न पुनः स्रष्टृत्वादिष्विति चेत्, चेतनन्तु स्वयमचेतनं, चेतनज्ञस्त्वावृतज्ञानः, एवमवस्थायां मोक्षोपयोगि-व्यापारसाधने चेतनचेतनज्ञयोः प्रवृत्तिः प्रेरणान्तरं विना न सम्भवति। बन्धनजन्यदुःखेनैव चेतनज्ञस्य मोक्षे प्रयत्न उपतिष्ठेत, किमु प्रेरणान्त-रेण? चिरबद्धस्य न पुनर्बन्धनज्ञानमुदेति, परोपदेशेनात्मावस्थापरि-ज्ञानं विना। सुखज्ञानन्तु स्वाभाविकं तेनैव निरवच्छिन्नसुखलाभाय दुःखपरिहाराय च चेष्टा भवेत्; उपायज्ञानं विना न तत् सम्भवति। शास्त्रन्तूपायं प्रदर्शयेत्। यदि केवलं शास्त्रमेवात्र कारणं, बहूनां शास्त्रज्ञानां कथं न तदुपायानुसरणे प्रवृत्तिर्भवति। परन्तु शास्त्रस्य

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।
मयि सर्व्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७॥

स्वतः प्रादुर्भावो न सम्भवति, तथा सति प्रकृतिपुरुषौ विना स्वतन्त्र-तत्त्वान्तरास्वीकारप्रतिज्ञाहानिः। स्वयम्भोर्ब्रह्मणो हृदि तस्य प्रादु-र्भावोऽभूत् चेत्, को वा तस्य प्रादुर्भावकः? प्रकृतिं पुरुषञ्च विना प्रादुर्भावकान्तरस्वीकारे पूर्व्ववत् प्रतिज्ञाहानिः। प्रादुर्भावकस्य तस्य तदा तत्त्वान्तरत्वम्। एवं क्षेत्रक्षेत्रज्ञयोरतीतं कमपि नियन्तारं पुरुषमस्वीकृत्य न सम्भवति तयोर्जगद्योनित्वम्। अतएवाहाचार्य्यः— अहं सर्व्वान्तर्यामी कृत्स्नस्य निखिलस्य जगतः प्रभवः उत्पत्तिस्थानं, प्रलयो लयस्थानञ्च। परापरप्रकृती ममेत्युक्तत्वात् श्रीमद्रामानुजेन व्याख्यातमिदं पद्यमेवम्—"एतच्चेतनाचेतनसमष्टिरूपमदीयप्रकृतिद्वय-योनीनि ब्रह्मादिस्तम्बपर्य्यन्तानि उच्चावचभावेनावस्थितानि चिदचि-न्मिश्राणि सर्व्वाणि भूतानि मदीयानीत्युपधारय, मदीयप्रकृतिद्वययो-नीनि तानि मदीयान्येव। तथा प्रकृतिद्वययोनित्वेन कृत्स्नस्य जगत-स्तयोर्द्वयोरपि मद्योनित्वेन मदीयत्वेन च कृत्स्नस्य जगतोऽहमेव प्रभवः, अहमेव प्रलयः, अहमेव शेषीत्युपधारय। तयोश्चिदचित्सम-ष्टिभूतयोः प्रकृतिपुरुषयोरपि परमपुरुषयोनित्वं श्रुतिस्मृतिप्रसिद्धम्" इति। परब्रह्माधीनावं प्रकृतिपुरुषौ इति तत्त्वम्। ६।

प्रकृतिजीवब्रह्मातिरिक्तं नान्यत् किञ्चिदस्तीत्याह मत्त इति। मत्तः सर्व्वान्तर्यामिणः अन्यत् कारणान्तरं किञ्चित् न परतरम् अस्ति। हे धनञ्जय, मयि सर्व्वान्तर्यामिणि इदं सर्व्वं सूत्रे मणिगणा इव प्रोतं ग्रथितम्। सूत्रे मणिगणा इवेति दृष्टान्तेन प्रविष्टोऽपि ह्यनिविष्टः स्वतन्त्र इति बुध्यते। "पृथिवीमन्तरो यमयति" (वृ, आ, ५।७।३) इति तदेव व्यनक्ति। "यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः। सूत्रं सूत्रस्य यो विद्यात् स विद्यात् ब्राह्मणं महत्॥" (अथर्व्व, १०।८।३७) इत्यत्र सूत्रस्य सूत्रमिति विशेषणेन जगज्जीवगतस्य

तस्य जगज्जीवातीतत्वं सूचयति । "मत्स्थानि सर्व्वभूतानि न चाहं तेष्ववस्थितः" (९।४) इत्यादि पश्चाद्वक्ष्यति । अतो न जगद्वा जीवो वा तस्योपाधिः शरीरं वा, श्रुतौ पृथिव्यादीनां शरीरत्वकथनं तद्गतत्वात् । तद्गतोऽप्यन्तर्यामी तेषामतीत इति तत्रैवोक्तम् । ननु शरीरी जीवः शरीरस्थोऽपि तदतीतः, यतोऽयं शरीरातीतदूरतमपदार्थानां ग्राहकः । सत्यम्, किन्तु तस्मिन्नस्ति ज्ञानप्रतिबन्धः शरीरस्थत्वात्, न स सर्व्वान्तर्यामिणि सम्भवति । अतो नास्य शरीरित्वम् । "अस्थूलमनणुह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमवाह्यम् ।" (बृ, आ, ५।८।८), "सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्" (वा, सं ३, ८) इत्याद्याः श्रुतयस्तदेव स्पष्टवाक्यैनोद्घोषयन्ति । ननु कथं श्रीमन्माध्वप्रणीते गीताभाष्ये प्रोक्तम्—'न चैतस्य ब्रह्मणोऽशरीरत्वादेतत्कल्पनम्, तस्यापि शरीरश्रवणात्—'आनन्दरूपममृतम,' 'सुवर्णज्योतिः', 'दहरोऽस्मिन्नन्तराकाशः' इत्यादिषु । यदि रूपं न स्यात्, 'आनन्दम्' इत्येव स्यात्, न तु 'आनन्दरूपम्' इति । कथञ्च सुवर्णरूपत्वं स्यादरूपस्य ? कथञ्च दहरत्वम् ? दहरस्थस्य 'कञ्चित् स्वदेहे' इत्यादौ रूपवानुच्यते । 'सहस्रशीर्षं पुरुषम्', 'रुक्मवर्णं कर्त्तारम्', 'आदित्यवर्णं तमसः परस्तात्', 'सर्व्वतः पाणिपादन्तत्' 'विश्वतश्चक्षुः' इत्यादिवचनात् विश्वरूपाध्यायादेश्च रूपवानवसीयते' इति । उच्यते कारणमस्य प्रथममेतद्विरुद्धं तस्य स्ववचनं तत्कृतवेदान्तसूत्रभाष्यादुद्धृत्य,—"अरूपवदेव हि तत् प्रधानत्वात्" (वे, सू, ३अ, २पा, १४सू) इति सूत्रस्य भाष्ये स आह, "रूपवत्त्वादनित्यत्वमिति, अतो वक्ति प्रकृत्यादिप्रवर्त्तकत्वेन तदुत्तरसत्त्वान्नैव रूपवद्ब्रह्म" इति ; "प्रकाशवच्चावैयर्थ्यात्" (१५सू) इत्यत्र—" 'यदापश्यं पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्', 'श्यामाच्छबलं प्रपद्ये सुवर्णज्योतिः' इत्यादि श्रुतीनाञ्च न वैयर्थ्यम्, विलक्षणरूपत्वात्" इति । किमिदं विलक्षणं रूपं तदाह, "आह च तन्मात्रम्" (१६सू) इति सूत्रे—"वैलक्षण्य-

श्रोच्यते रूपस्य विज्ञानानन्दमयत्वम्" इति। "दर्शयति चाथो अपि स्मर्यते" (१७सू)—"दर्शयति चानन्दस्वरूपत्वं 'तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति' इति; 'शुद्धस्फटिकसङ्काशं वासुदेवं निरञ्जनम्। चिन्तयीत यतिर्नान्यं ज्ञानरूपादृते हरेः॥' इति च मात्स्ये।" इति। एतावदुक्त्वा न स विरराम, [illegible] पुनस्तेन, "तथान्यप्रतिषेधात्" (वे, सू, ३अ, २पा, ३६सू) [illegible]—"ध्यानकाले यच्चित्तेदृश्यते तदेव ब्रह्मरूपम्, अतः कथमव्यक्त[illegible], यथा जीवानन्दादेरन्यद्ब्रह्म तथोपास्या [illegible]तादपि 'यन्मनसा न [illegible]नुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' [illegible]ति प्रतिषेधात्" इति। "अन्तवत्त्वमसर्वज्ञता वा" (वे, सू, २अ, [illegible] ४१सू) इत्यत्र चोक्तं—"देहवत्त्वेऽन्तवत्त्वमन्यथा ज्ञानाभावः, शरी[illegible] हि ज्ञानोत्पत्तिर्दृष्टा" इति। स तु पुनः पृथिव्यादिर्भगवच्छ[illegible]त्वं न स्वीचकार। तद्यथा, "अन्तर्याम्यमधिदैवादिषु तद्धर्मव्यप[illegible]त्" (वे, सू, १अ, २पा, १८सू) इत्यत्रोक्तं तेन—"न हि विष्णोः पृथि[illegible]दिशरीरत्वमङ्गीक्रियते इत्यत आह 'यं पृथिवी न वेद पृथिव्या अन[illegible]" इति। शरीरत्वव्यपदेशो जगतस्तत्रान्तर्यामितया विराजमानत्वा[illegible]ाद्धानन्तरसूत्रे "रमते च परो ह्यस्मिन् शरीरं तस्य तज्जगत्" इ[illegible] प्रमाणेन। यद्येवं तस्य मतं, किं कारणं "न चैतस्य ब्रह्मणोऽ[illegible]रत्वादेतत् कल्प्यं तस्यापि शरीरश्रवणात्," "रूपवानवसीयते" [illegible]क्तं तेन। पुरुषसूक्तावलम्बनमेव शरीरत्वरूपवत्त्वावधारणस्य कारणं; दृश्यते चैतत् "शब्दादिभ्योऽन्तः प्रतिष्ठानाच्चेति चेत् न, तथा दृष्ट्युपदेशादसम्भवात् पुरुषविधमपि चैनमधीयते" (वे, सू, १अ, २पा, २६सू) इत्यत्र—"च-शब्देन सकलवेदशास्त्रागमतन्त्रयामलपुराणादिषु विष्णुपरत्वं पुरुषसूक्तस्य सूचयति" इति। "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्य अत्यतिष्ठद्दशाङ्गुलम्॥" इति पुरुषसूक्तस्य (ऋक्, १०म, ९०सू) प्रथमा ऋक्। पुरुषादेव विराट् यथा "तस्माद्विराड्-जायत विराजो अधि पुरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो

पुरः।" (ऋक् ५) इति। "भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्-स्वरूपत्वात्। ८५।" इति शाण्डिल्योक्त्यनुसारी जगद्रूपः पुरुषो भज-नीयत्वेन गृहीतः। श्रीकृष्णचैतन्यवैष्णवशास्त्रमीमांसाकृता श्रीमता जीवेन सर्व्वसंवादिन्याम्—"तस्मात्तस्मिन् [परमात्मनि] विश्वस्य स्थूल-तया सूक्ष्मतया वा नित्यं भगवद्रूपत्वमस्त्येव।" इति। स्वरूपकृत-रूपत्वन्तु वृहद्भागवतामृते—"सदा सम्पत्त्यर्थं बहुतरविशेषं वितनुते यथा स्वस्मिंस्तत्तत्प्रकृतिरहितेऽपि भुवतरम्।"—टीका च—"एतदुक्तं भवति परब्रह्मरूपत्वेन स्वभावतो निर्व्विशेषस्यापि स्वस्य परमात्मतादि-रूपेण विचित्रावतारात्मतया यथा" इति। रूपवत्त्वं हि तत्त्वतः स्वरूपकृतम्। यथा श्रीमन्माध्वधृतायां श्रुतौ (वे, सू, २।२।४।४सू) "यदात्मको भगवान् तदात्मिका व्यक्तिः। किमात्मको भगवान्? ज्ञानात्मकः ऐश्वर्य्यात्मकः" इति। स्वरूपत्वं हि मूर्त्तत्वं वैष्णव-सिद्धान्तकृतां मते—यथा भगवत्सन्दर्भे—"'सत्यज्ञानानन्तानन्दमात्रैक-रसमूर्त्तयः। अस्पृष्टभूरिमाहात्म्या अपि ह्युपनिषद्दृशाम्॥' सत्य-ज्ञानादिमात्रैकरसं यद्ब्रह्म तदेव मूर्त्तिर्येषा"मिति। वैशिष्ट्ये नैव भगवत्त्वं स्पष्टं तत्र, यथा—"तत्र (अद्वयं ज्ञानं) वैशिष्ट्यं विनोपलभ्य-मानं ब्रह्मेति शब्द्यते, वैशिष्ट्येन सह तु श्रीभगवानिति" इति। तत्त्व-मुक्तं प्रमेयरत्नावल्यां श्रीबलदेवेन, "न भिन्ना धर्म्मिणो धर्म्मा भेदभानं विशेषतः। यस्मात् कालः सर्व्वदास्तीत्यादि विविदुषामपि॥ एव-मुक्तं नारदपञ्चरात्रे 'निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मक-शरीरगुणैश्च हीनः। आनन्दमात्रकरपादमुखोदरादि सर्व्वत्र च स्वगतभेदविवर्ज्जितात्मा॥'" इति। "सर्व्वकर्म्मा सर्व्वकामः सर्व्वगन्धः सर्व्वरसः" (छा, उ, ३।२) इत्याद्यासु श्रुतिषु यदुक्तं तस्य तत्त्वं भगव-त्सन्दर्भवाक्येनैव विशदीभवति, तद्यथा "तस्य शब्दस्पर्शरूपरसगन्धानां सर्व्वेषामेव धर्म्माणां सच्चिदानन्दघनात्मत्वं साधितम्" इति। एतावता न सन्तोष आसीद्वैष्णवाचार्य्याणामतः "यः एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व्व एव सुवर्णः"

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्य्ययोः ।
प्रणवः सर्व्ववेदेषु शब्दः खे पौरुषं नृषु ॥८॥

(३।६।६) इत्यनत्यसत्यस्तोत्रामनाय 'त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफपित्तवातम् । जीवच्छवं भजति कान्तमतिर्विमूढ़ा या ते पदाब्जमकरन्दमजिघ्रती स्त्री ॥" इति भागवत-(१०स्क, ६०अ, ४३श्लो) पद्यमाश्रित्य प्रोक्तं श्रीजीवेन "अत्र श्रीभगवति केशादीनां श्रूयमाणानामानन्दरूपत्वमन्येषां स्वभाव एवेति वैलक्षण्यं स्पष्टमेव" इति । 'सच्चिदानन्दघनात्मत्व' न जातु साकारत्वं साधयति । अतएव साक्षाद्दर्शनं हृद्येव जायत इति स्वीकृतं वैष्णवाचार्य्यैः, तद्यथा बृहद्भागवतामृते, "कदाचिद्भक्तवात्सल्याद्याति [illegible]यतां दृशोः । ध्यानदृष्ट्यैव तज्ज्ञानमभिमानं परं दृशोः ॥ तस्य क[illegible] प्रयशया वा दृश्योऽस्त्वपि वहिर्दृशोः । तथापि दर्शनानन्दः स्वयोनौ जा[illegible] हृदि ॥" इति "न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥" (क[illegible], ६।९) इत्येवमाद्या अस्मिन्नर्थे श्रुतयः । ७ ।

केन केन च भावेन सर्व्वान्तर्यामिणि सर्व्वमिदं प्रोतमिति सङ्क्षेपेणाह रस इत्यादिभिश्चतुर्भिः । हे कौन्तेय, अहम् अप्सु जलेषु रसः तत्सारभूतः, न हि रसं विना जलस्य जलत्वं सम्भवति, अतएव जलत्वे मूलं रस इति तद्भावत्वमात्मनो वर्णितम् । अनन्तरपद्ये ग[illegible] [illegible]विक्रतित्वसूचनाय यत् विशेषणं तत्रोपन्यस्तं, न तस्यात्रोपन्यासः, सामान्यतो रसशब्द उपन्यस्ते अविकृतभावो गम्यत इति हेतोः । एवं शशिसूर्य्ययोः प्रभा अस्मि अहम्, प्रभां विना न चन्द्रस्य चन्द्रत्वं सूर्य्यस्य सूर्य्यत्वमिति प्रभैवाहं तयोः । सर्व्ववेदेषु अहं प्रणवः ब्रह्मवाचकः, ब्रह्मप्रतिपादकः प्रणव एव सर्व्वेषां वेदानां सारभूत इति तथोक्तिः । खे आकाशे शब्दोऽहं तत्सारभूतत्वात्तस्य । नृषु पौरुषं शौर्य्यवीर्य्यादिकमहम् । ८ ।

पुण्यो गन्धः पृथिव्याञ्च तेजश्चास्मि विभावसौ।
जीवनं सर्व्वभूतेषु तपश्चास्मि तपस्विषु ॥९॥

पुण्य इति। पृथिव्याञ्च पुण्यो विशुद्धोऽविकृतो गन्धोऽहम्। अथ वा पुण्य इति विशेषणमत्रोपन्यस्तमिति दर्शयितुं श्रीमच्छङ्कर आह "अपुण्यत्वन्तु गन्धादीनामविद्याधर्म्माद्यपेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं भवति" इति; श्रीमन्मधुसूदन आह "शब्दस्पर्शरूपरसगन्धानां हि स्वभावत एव पुण्यत्वमविकृतत्वम्, प्राणिनामधर्म्मविशेषात्तु तेषामपुण्यत्वं न तु स्वभावत इति द्रष्टव्यम्" इति। उपनिषदि च दृश्यते देवासुरभावाभिनिवेशेन सुरभित्वदुर्गन्धित्वादिकं यथा—"देवासुरा ह वै यत्र संयेतिरे, उभये प्राजापत्याः। तद्ध देवा उद्गीथमाजह्रुः, अनेनाभिभविष्याम इति। ते ह नासिक्यं प्राणमुद्गीथमुपासाञ्चक्रिरे, तꣳहासुराः पाप्मना विविधुः, तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः। अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे, ताꣳहासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यञ्चानृतञ्च, पाप्मना ह्येषा विद्धा। अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे, तद्धासुराः पाप्मना विविधुः, तस्मात्तेनोभयं पश्यति दर्शनीयञ्चादर्शनीयञ्च पाप्मना ह्येतद्विद्धम्। अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे, तद्धासुराः पाप्मना विविधुः, तस्मात्तेनोभयं शृणोति श्रवणीयञ्चाश्रवणीयञ्च पाप्मना ह्येतद्विद्धम्। अथ ह मन उद्गीथमुपासाञ्चक्रिरे, तद्धासुराः पाप्मना विविधुः, तस्मात्तेनोभयं सङ्कल्पते सङ्कल्पनीयं चासङ्कल्पनीयञ्च पाप्मना ह्येतद्विद्धम्। अथ ह य एवायं मुख्यप्राणः तमुद्गीथमुपासाञ्चक्रिरे, तꣳहासुरा ऋत्वा विदध्वंसुर्यथाश्मानमाखणमृत्वा विध्वंसेत, एवं यथाश्मानमाखणमृत्वा विध्वंसते, एवꣳहैव स विध्वंसते य एवंविदि पापं कामयते यश्चैनमभिदासति, स एषोऽश्माखणः। नैवैतेन सुरभि न दुर्गन्धि विजानाति, अपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान् प्राणानवति" (छा, उ, १।२।२।१—९) इति।

अथेदं तत्त्वं विविच्यम्। प्रकृतौ सुरभि दुर्गन्धि च, सत्यमनृतञ्च, दर्शनीयमदर्शनीयञ्च, श्रवणीयमश्रवणीयञ्च सङ्कल्पनीयमसङ्कल्पनीयञ्च गृह्यन्ते, तत्त्वस्माकं केवलं ग्रहणसामर्थ्यतारतम्याद्भवती[illegible] न वक्तव्यम्, एकमस्माकं ग्रहणीयमन्यदस्माकं परिहार्य्यमिति प्रदर्श्यते तेन तेन युग्मेन। यत्तु ग्रहणीयं तद्ग्रहणेनास्मासु दैवभाव उपतिष्ठते, यत्तु परिहार्य्यं तद्ग्रहणेनासुरभाव इत्युपनिषदुक्तौ[illegible]ऽभिप्रायः, अन्यथा दैवभावेनासुर-भावेन चाविकृतं नामात्रावाक्चक्षुरादीनां न तयोच्येत। प्रकृतौ यत् सुरभिदुर्गन्धिनादिकं तन्न विकृतं, यतस्तत्तद्द्रव्यसाहाय्यात्तदुपल-भ्यते। विषवृक्षोत्कटगन्धं, जीवानां विषपरिहाराय तत्, अथापि तस्यात्यधर्म्मापनयनसामर्थ्यं तस्य कल्याणकारित्वं सुस्पष्टं व्यनक्ति। स्वास्थ्यावस्थायां विषग्रहणं यथाऽसुरिकभावस्य व्यञ्जकं न तथास्वास्थ्या-वस्थायाम्, अतएवैकस्यैव ग्रहणभेदेन सुखत्वं दुःखत्वमिति न तस्य प्रकृतौ विकृतत्वं मन्तव्यम्, विकृतत्वन्तु प्राणिनामधर्म्मवशादज्ञानता-हेतोर्व्वेति प्राचां सिद्धान्तोऽस्माभिरादरणीयः। 'सत्यमनृतञ्च' कथं प्रकृतौ सम्भवति, एष संशयोऽपाकर्त्तव्यः। "सत्याद्भूतानि जातानि" इत्याचार्य्यवचनेन सर्व्वत्र सत्यस्यैव साम्राज्यं, न त्वनृतस्य। अथाप्य-ज्ञानतावशात् सत्येऽनृतदर्शनं सम्भवतीति बोध्यम्। "ज्ञान[illegible]र्विशुद्धौ वाक् सत्यानृताभिधिना भवत्यत[illegible] तदुभयं वदति स[illegible]नृतञ्च" इति। देवाः सत्यवाचः मनुष्या अनृतवाच इति ब्राह्मणविभागस्य सिद्धान्तो दर्शयति सत्यवाक्त्वे दैवत्वं, सत्यानृताभिधित्वे मनुष्यत्वम्। सत्येऽनृतदर्शनं कथं सम्भवतीति दृष्टान्तेनैकेन तद्बुद्धिविषयं स्यात्। ईश्वरोऽस्तीति ज्ञानं सर्व्वेषां जनानां साधारणम्, किन्तु ज्ञाने न केवलं ता[illegible]तम्यमुपतिष्ठते, तत्स्वरूप[illegible]त्वाच्च तज्ज्ञानस्य। द्वेष-हिंसादिपरवश ईश्वरो न जातीश्वरो भवितुमर्हति, अथाप्यज्ञानिनो [illegible] तमुपगच्छन्, अद्यापि तथैव बहवस्तं गच्छन्ति। एवं सिध्यति प्रकृतौ शब्दादीनां पुण्यत्वं, विकृतत्वन्तु प्राणिनामधर्म्मवशादिति।

बीजं मां सर्व्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥१०॥
बलं बलवताञ्चाहं कामरागविवर्ज्जितम् ।
धर्म्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥११॥

विभावसौ अग्नौ तेजः दीप्तिर्दहनशक्तिश्चाहमस्मि, तद्विना नाग्नेरस्तित्वम् । चकाराद्वायौ शीतस्पर्शोऽहमस्मीति श्रीमद्बलदेवमधुसूदनौ । सर्व्वभूतेषु सर्व्वेषु प्राणिषु जीवनं जीवन्त्यनेनेति जीवनं प्राणधारणसामर्थ्यमहमस्मि । तपस्विषु तपोनिरतेषु तपः शीतोष्णक्षुत्पिपासादिद्वन्द्वसहनसामर्थ्यमहमस्मि । चकारात् आन्तरं वाह्यञ्च नियहसामर्थ्यं समुच्चीयते । ९ ।

बीजमिति । हे पार्थ, मामन्तर्यामिणं सर्व्वभूतानां सर्व्वेषां प्राणिनां सनातनं नित्यं कारणान्तरैरव्यवहितमुत्तरोत्तरसर्व्वकार्य्येष्वनुस्यूतं, न तु प्रतिव्यक्तिभिन्नं, बीजं कारणं विद्धि जानीहि । कारणपरम्पराचिन्तायामनवस्थादोषो दुस्त्याज्यः । सर्व्वेषु कार्य्येष्वेकमेव कारणमनुस्यूतमिति सिद्धान्ते तस्यापनय इति सनातनमिति विशेषणेन तदेव साधितं व्याख्यातृभिः । एकेन कार्य्येणान्यत् कार्य्यमुत्पद्यत इति दृष्ट्वा कार्य्यस्य कार्य्यान्तरोत्पादनसामर्थ्यवशात् कारणत्वनिर्णयो लौकिकव्यापारनिवृत्तये पृथग्जनैः कृतः । "अविभक्तं विभक्तेषु" (१८।२०) इति ज्ञानवन्तो न पुनस्तं बहु मन्यन्ते ; परमार्थदृष्टिवशात्त एव दार्शनिका इति ख्यातिं लभन्ते । बुद्धिमतां बुद्धिर्विवेकशक्तिस्तत्त्वातत्त्वविवेकसामर्थ्यमहमस्मि । तेजस्विनां तेजः प्रागल्भ्यं पराभिभवसामर्थ्यं परैरनभिभाव्यत्वञ्च तद्वतां तेजः प्रागल्भ्यमहमस्मि । १० ।

बलमिति । बलवतां कामरागविवर्ज्जितं कामोऽसन्निकृष्टविषयेषु तृष्णा, रागः प्राप्तेषु विषयेषु अत्यासक्तिः, ताभ्यां विवर्ज्जितं बलमहमस्मि । हे भरतर्षभ, भूतेषु प्राणिषु धर्म्माविरुद्धो धर्म्मेण शास्त्रेणाप्र-

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि ॥१२॥

र्यामिणाप्रतिषिद्धो धर्म्मानुकूलः कामोऽहमस्मि । अत्रेदं विवेच्यम् । न हि परमात्मशक्तिं विना कुत्रापि शक्तेरभिव्यक्तिः सम्भवति । बलन्तु शक्तेरभिव्यक्तिरेव । कामो रागो वा यदि चित्ताकर्षणे समर्थः, तदा तत्र शक्त्यभिव्यक्तिरवश्यस्वीकार्य्या, अपिच परमेश्वरादेव सा प्रवर्त्तते इति सिद्धान्तोऽप्यनिवार्य्यः । एवं सति कथमुक्तमाचार्य्येण कामरागविवर्ज्जितं बलमहमिति उच्यते । अभिलाषात्मके कामे रागे वा यद्बलं तदीश्वरादेव, न हि जात्वभिलाषः स्वयं दोषत्वेन गण्यः । शुद्धोऽप्ययं पुरुषकर्त्तृकनियोगानुसारतस्तत्तत्पुरुषाणां धर्म्मायाधर्म्माय वा भवति । यत्र भगवता निषिद्धोऽपि निषिद्धे विषयेऽभिलाषं नियोजयति पुरुषः, तदा स तस्य बलक्षयाय न तु बलवर्द्धनाय भवति । अतएव कामस्य रागस्य वा चरितार्थतायै विषयेषु प्रवृत्तौ बलहीनतामुपैति ; भगवदाज्ञापालनाय तूत्तरोत्तरबलशाली भवतीति हेतोरुक्तमाचार्य्येण बलवतां कामरागविवर्ज्जितं बलमहमस्मीति । धर्म्मानुकूलः कामोऽहमस्मीत्युक्तिरप्येवमेव सामञ्जस्यं भजते । कामरागविवर्ज्जितमित्यत्र कामश्च रागश्च न धर्म्माविरुद्ध इति गम्यते 'धर्म्माविरुद्धः कामोऽस्मी'त्युक्त्या । ११ ।

एवं सङ्क्षेपतः सूत्रात्मनान्तर्यामिणा सर्व्वमिदं केन भावेन तत-मित्युक्त्वात्मनः सर्व्वातीतत्वं प्रदर्शयितुमाह ये चैवेति । ये चैव सात्त्विकाः सत्त्वगुणनिर्वृत्ता भावा धर्म्मज्ञानवैराग्यैश्वर्य्यशमदमादयो देवाद्याश्च, राजसा रजोगुणनिर्वृत्ता हर्षदर्पलोभप्रवृत्त्यादयो मानवाद्याश्च, तामसास्तमोगुणनिर्वृत्ताः शोकमोहालस्यादयो नरभुग्विमूढ़ाद्याश्च, तान् मत्तोऽन्तर्यामिण एव जायमानानिति विद्धि जानीहि । एवमपि न तु अहं तेषु जीववत्तदधीनो वर्त्ते, मयि ते मदधीना मद्वशा वर्त्तन्ते । "सत्त्वं रजस्तम इति गुणा जीवस्य नैव मे" (भा, ११स्क,

त्रिभिर्गुणमयैर्भावैरेभिः सर्व्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥१३॥

२५अ, १२श्लो) इति जीवानां गुणाधीनत्वं न तु भगवत इति दर्शयति। "योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः। सर्व्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ॥" (मनु, १अ, ७श्लो) इति परमात्मनः सृष्ट्यादौ सर्व्वभूतमयत्वं सर्व्वान्तर्भावकत्वेन सिध्यति; अतस्तस्य सर्व्वातीतत्वम्। "यन्तु कर्म्मणि यस्मिन् स न्ययुङ्क्त प्रथमं प्रभुः। स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः॥ हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते। यद्यस्य सोऽदधात् सर्गे तत्तस्य स्वयमाविशत्॥" (मनु, १अ, २८।२९ श्लो) इति गुणानां प्रवृत्तिर्भगवत एवेति दृश्यते। यदत्र दोषसम्भावना लक्ष्यते विवेक्तव्या सा गुणत्रयविभागाध्याये। १२।

परमात्मनः सर्व्वातीतत्वं सर्व्वान्तर्भावकत्वं मोहवशतो जीवो न जानातीत्याह त्रिभिरिति। त्रिभिर्गुणमयैर्भावैः सत्त्वरजस्तमोगुणविकारैः रागद्वेषमोहादिभिरिदं सर्व्वं जगत् चराचरं प्राणिजातं मोहितमाच्छादितविवेकज्ञानं सत् एभ्यो गुणमयभावेभ्यः परं व्यतिरिक्तं तैरस्पृष्टम्, अव्ययं सर्व्वविकारातीतं मामन्तर्यामिणं नाभिजानाति। "य आत्मनि तिष्ठन्नात्मनोऽन्तरः" इत्यादिना विशेषदृष्टिं विना परमात्मदर्शनं न जातु भवतीति यदुक्तं तत्तत्त्वमत्र स्फुटीकृतमाचार्य्येण। बाह्यविषयैराकृष्टो मनसस्तत्राभिनिवेशवशान्न पुनर्जीवस्तं हृदयस्थं सर्व्वान्तरस्थञ्च पश्यति। एषा वहिर्दृष्टिरेव भगवद्विमुख्यरूपो मोहः। "वारुणीदिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयात्" इति न्यायेन वहिर्दृष्टेरन्तर्दृष्टितो भेदो बोध्यः। कथमनुमन्यतेऽस्य मोहस्य प्रसरो भगवतेति जिज्ञासा मृषैव। न हि यथा बालो वृद्धवज्ज्ञानी भवितुमर्हति वयोवृद्ध्युत्तरोत्तरपरीक्षालब्धज्ञानोपचयं विना, तथा प्रकृत्यात्मना च सम्बन्धवशादुत्तरोत्तरतद्घटितज्ञानोपचित्या यो प्रकृतिपरिचय आत्मपरिचयश्चोपतिष्ठते तावते न जातु ब्रह्मपरिचयः सम्भवति। इम-

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥१४॥

मेव क्रममाचार्य्योऽनुमोद्य स्वसुहृदमुपदिष्टवानित्यल्पपर्य्यालोचनयैव प्रतिभाति । कृपया यत् सकृद्दर्शनं भवति, भगवत्कामाय तत्, न तेन परिचय इति ज्ञेयम् । १३ ।

सृष्टेरन्तरामे "मया ततमिदं सर्व्वं जगदव्यक्तमूर्त्तिना" (९।४) इति न्यायेनाव्यक्तभावेनावस्थितस्य सर्व्वान्तर्यामिण आवरणं भगवद्दर्शनशक्तिरेव । भगवति भक्त्यारूढे ऽपि: सर्व्वावरणभेदकरणसामर्थ्यमुद्भूयते, तेन च सर्व्वं स्वच्छत्वमापद्यते ; ततः "मत्स्थानि सर्व्वभूतानि न चाहं तेष्ववस्थितः" (९।४) इति न्यायेनान्तर्यामिणि चराचरं प्राणिजातं पश्यति स भक्तः, तत्र सर्व्वातीतं "न च मत्स्थानि भूतानि" (९।५) इति तैरसंस्पृष्टं भूतभृद्भावेन विराजमानमित्याह दैवीति । देवस्य ममेश्वरस्येयं दैवी गुणमयी सत्त्वरजस्तमोमयी एषा मम माया मत्स्वरूपभूता विचित्रशक्तिः दुरत्यया दुरतिक्रमा । ये मामन्तर्यामिणं प्रपद्यन्ते शरणं गच्छन्ति, एतां मायां ते तरन्ति अतिक्रामन्ति साक्षात्सम्बन्धेन मां पश्यन्ति । केयं माया ? "तत्त्वप्रतिभासप्रतिबन्धेनातत्त्वप्रतिभासहेतुरावरणविक्षेपशक्तिद्वयवत्यविद्या" इति श्रीमन्मधुसूदनः, "अनृतस्य प्राक्स्वप्नजालादेरिव प्रकाशिका" इति श्रीमन्नीलकण्ठः । ज्ञानशक्तिस्तस्याः क्रियोन्मुखत्वे विचित्रशक्तिर्दैवी माया, मिथ्यादृष्टिसम्भूता तामसी प्रज्ञासुरी माया तन्न्या, तद्यथा "अधारयत् पृथिवीं विश्वधाय समस्तभ्नान्मायया द्यामवस्रसः" (ऋक् २म, १७सू, ५ऋक्) ; "मायां वां मित्रावरुणा दिवि श्रिता सूर्य्यो ज्योतिश्चरति चित्रमायुधम्" (ऋक् ५म, ६३सू, ४ऋक्) ; मायया प्रज्ञया विचित्रशक्त्या विविधरूपधारणं यथा "रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय । इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश" (६म, ४७सू, १८ऋक्) ; "स्वर्भानोरध यदिन्द्रमाया अवो वर्त्तमाना

अशाम्यन्" (५म, ४०सू, ६ऋक्); ब्राह्मणे यथा "यो हैनं पाप्मा मायया चरति, न हैनं सोऽभिभवति" (श, प,ब्रा, ११।१।६।१२) इति। इत्थं दैव्यासुरीति भेदं दृष्ट्वा आचार्य्येण 'दैवी गुणमयी' इति विशेषण-द्वयेन मिथ्यादृष्टिसम्भूता तामसी प्रज्ञासुरी माया निरस्ता। "केतः केतुः चेतः चित्तम् क्रतुः असुः धीः शचीः माया वयुनमभिख्या इत्येका-दश प्रज्ञानामानि।" (नि, ३अ, ९ख)। ऋते श्वेताश्वतरोपनिषदं मायाशब्दो नान्यासु दृश्यते। बृहदारण्यके पुनः "रूपं रूपम्" इति ऋचमुद्धृत्य "अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च। तदेतद्ब्रह्मापूर्व्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्व्वानुभूः" इत्यर्थं निष्पाद्य प्रज्ञाकृतविविधत्वेऽप्येकत्वं साधितम्। श्वेताश्वतरे तु, "यस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः" (श्वे, उ, ४।९) इत्यनन्तरं को वा मायी केयं साकाङ्क्षायामुच्यते "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" (श्वे, उ, ४।१०) इति। अध्या-यारम्भे "य एकोऽवर्णो बहुधा शक्तियोगात् वर्णाननेकान्निहितार्थो दधाति। विचैति चान्ते विश्वमादौ स देवः" (श्वे, उ, ४।१); अन्तिमे "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वे, उ, ६।८); मूलादौ "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणै-र्निगूढाम्।" (श्वे, उ, १।३) इत्यत्र दैवी मायैव वर्ण्यते। "अजो-ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" (श्वे, उ, ४।५) "तस्याभिध्यानाद्योजनात् तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः" (श्वे, उ, १।१०) इत्यत्र 'मायामेतां तरन्ति ते' इत्यनुरूपोक्तिः। "यस्तूर्ण-नाभ इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः स्वमावृणोत्। स नो दधाद्ब्रह्माप्ययम्।" (श्वे, उ, ६।१०) इत्येषा स्रष्टुरावरणत्वं व्यनक्ति। मायया आवरणशक्तिर्विक्षेपशक्तिश्च यात्र वर्ण्यते श्रीमन्मधुसूदनेन, तत्र यत् सत्यमस्ति "मोहितं नाभिजानाति" (७।१३) इत्याचार्य्यवाक्येन स्फुटं भवति तत्। स्रष्टौ स्वकर्तृत्वाभिमाने चाभिनिवेशवशाद्भवत्या-वृतिर्विक्षेपश्च; अभिनिवेशस्तु कामकृत एव। कामोऽस्माकमोऽभि-

अग्नेरभिव्यक्त: (१०४पृ,)। "ध्यायतो विषयान् पुंस: सङ्गस्तेषूपजायते। सङ्गात् संजायते काम:" (२।६२) इत्युद्धृतवचनमस्य, अन्यथा कामस्य प्रथमावस्था सङ्गस्तदसत्त्वे न सम्भवति। भवत्वावरणस्य विक्षेपस्य च सत्यत्वं सिद्धमेवम्, कथं सिध्यति अत्र पद्ये व्याख्याता श्रीमन्मधुसूदनेनोक्तम् "बिम्बस्थानीय: परमेश्वर उपाधिदोषानास्कन्दित:" "प्रतिबिम्बस्थानीयश्च जीव उपाधिदोषस्कन्दित:" इति, श्रीमता नीलकण्ठेन च "अनृतस्य प्रपञ्चस्य" इति ?

उच्यते। निरवयवस्याकाशदिगादेरिव प्रतिबिम्बायोगात् बिम्बत्वप्रतिबिम्बत्वे न तु तात्त्विके; नाप्यनुक्तिर्न दार्शनिकी, किन्त्वालङ्कारिक्येव। जीवब्रह्मणोर्ज्ञानादिस्वरूपैक्यप्रदर्शनाय तथा भाषणमिति तत्त्वम्। अज्ञानकृतं जगदिति प्रपञ्चस्य मिथ्यात्वं न साक्षात्सम्बन्धेन सिध्यति। न हि कुत्रापि वेदान्तशास्त्रे तथा वर्णितमस्ति। युक्तमुक्तं श्रीमता स्वप्नेश्वरेण, "सत्यत्वमेवाह नितराञ्च 'सत्यसङ्कल्प:' इत्यादिना परमेश्वरसर्गस्य। नापि भगवान् बादरायण: क्वचिदपि सूत्रे संसारस्याज्ञानकल्पितत्वमुक्तवान्, प्रत्युत स्वप्नसृष्टिनिराकरणेन जाग्रत्सृष्टे: सत्यत्वम्।" इति। अज्ञानेन जगदिदमिति चेत्, तदज्ञानं ब्रह्मणि जीवे वा ? नाद्य:, ज्ञानस्वरूपे तस्मिन्नज्ञानं न जातु सम्भवति, तथा सति शुद्धचैतन्यत्वस्य हानिरेव स्यात्। नापि द्वितीय:, अज्ञानकार्य्यात् प्राक् जीवस्यास्तित्वस्वीकारे द्वैतापत्ति:। वस्तुतस्तु वेदान्तप्रोक्ताया अविद्याया अवकाशोऽस्ति "ज्ञाज्ञौ द्वावजावीशनीशौ (श्वे, उ, १।९) इति जीवस्याज्ञत्वान्मशक्तित्वोक्त्या। जीवो हि स्वकल्पनया मिथ्यासृष्टिमुद्भाव्य तत्परिवृतस्तिष्ठति। कैषा मिथ्यासृष्टि: ? भगवत्स्वरूपविभवरसानुभवभूमावस्यां सृष्टौ स्वाज्ञानेन परिकल्पितताया: कामकृतविकारचरितार्थतायोग्याभिनवसृष्टेरारोप:। अस्मिन्नेवासत्कार्य्यवादस्य सिद्धिर्योगमतस्य च। व्यञ्जितं सत्यमिदम् "अनित्याशुचिदु:खानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति सूत्रे महर्षिपतञ्जलिना। "सत्याद्भूतानि जातानि सत्यं भूतमयं जगत्" (अ, गी, २५अ, २५श्लो)

इति परमेश्वरसर्गमधिकृत्योक्तमाचार्य्यैश्च । परमेशशक्तिर्न जातु तदा-
वरिका भवितुमर्हति । जीवस्याहंममाभिमानवशतो यद्देहसुखसुपति-
हृते तस्य कथञ्चिदपनये भगवत्स्वरूपविभवरसानुभवभूमिः सैव सदा-
यत्वमुपागच्छतीति भङ्ग्यन्तरेणाह श्रुतिः, "ब्रह्म ह देवेभ्यो विजिग्ये ।
तस्य ह ब्रह्मणो विजये देवा अमहीयन्त । त ऐक्षन्तास्माकमेवायं
विजयोऽस्माकमेवायं महिमेति । तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव,
तन्न व्यजानत किमिदं यक्षमिति । तेऽग्निमब्रुवन्, जातवेद एतद्वि-
जानीहि किमेतद्यक्षमिति । तथेति, तदभ्यद्रवत् । तमभ्यवदत्
कोऽसीति । अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ।
तस्मिंस्त्वयि किं वीर्य्यमिति ? अपीदं सर्व्वं दहेयं यदिदं पृथिव्या-
मिति । तस्मै तृणं निदधावेतद्दहेति । तदुपप्रेयाय सर्व्वजवेन, तन्न
शशाक दग्धुम्, स तत एव निववृते, नैतदशकं विज्ञातुं यदेतद्यक्ष-
मिति । अथ वायुमब्रुवन्, वायवेतद्विजानीहि, किमेतद्यक्षमिति ।
तथेति, तदभ्यद्रवत् । तमभ्यवदत् कोऽसीति ? वायुर्वा अहमस्मीत्यब्रवीत्
मातरिश्वा वा अहमस्मीति । तस्मिंस्त्वयि किं वीर्य्यमिति ? अपीदं
सर्व्वमाददीयं यदिदं पृथिव्यामिति । तस्मै तृणं निदधावेतदादत्-
स्वेति । तदुपप्रेयाय सर्व्वजवेन, तन्न शशाकादातुम्, स तत एव
निववृते ; नैतदशकं विज्ञातुं यदेतद्यक्षमिति । अथेन्द्रमब्रुवन्, मघव-
न्नेतद्विजानीहि किमेतद्यक्षमिति । तथेति, तदभ्यद्रवत्, तस्मात्तिरो-
दधे । तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं ;
तां होवाच किमेतद्यक्षमिति, ब्रह्मेति होवाच, ब्रह्मणो वा एतद्विजये
महीयध्वमिति, ततो हैव विदाञ्चकार ब्रह्मेति ।" (त, उ, १४—
२६) इति । जगज्जीवयोराश्रयसत्यत्वेन सत्यत्वे "यत्र हि द्वैतमिव
भवति तदितर इतरं पश्यति" (बृ, आ, ६।४।५।१५) इत्यादि-
श्रुतेः का गतिः ? 'द्वैतमिव' इतीवशब्दबलात् "तद्यथा प्रियया
स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्, एवमेवायं
शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥१५॥

नान्तरम्" (बृ, आ, ६।३।२१) इत्युक्तरीत्या समाधौ तादृगवस्था । १४ ।

यदि त्वामन्तर्यामिणं प्रपन्ना मायाया आवरणात् स्वाभिमानकृतविक्षेपाच्च मुच्यन्ते तत्कथं न सर्वे त्वां प्रपद्यन्त इति प्रश्नमाशङ्क्य तत्कारणमाह न मामिति । दुष्कृतिनो दुराचारिणोऽतएव मूढा विवेकज्ञानशून्यास्ततएव नराधमा नराणां मध्ये निकृष्टास्ततएव मायया जगद्रूपेणैव भासमानया मच्छक्त्या अपहृतज्ञानाः समाच्छादितज्ञानाः आसुरं भावमाश्रिताः 'असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्" (१६।८) इत्यादिषु प्रदर्शितं कुतर्कजालं कुमार्गमाश्रित्य मामन्तर्यामिणं न प्रपद्यन्ते न शरणं गच्छन्ति । तत्र श्रुतिः—"नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥" (कठ, २।२४) इति । चरित्रशुद्धौ ज्ञानमप्यकिञ्चित्करमित्यनया प्रतिभाति । श्रीमद्बलदेवो व्याख्यातवानिदं पद्यमेवम्, "दुष्टाश्च ते कृतिनः शास्त्रकुशलाश्चेति दुष्कृतिनः कुपण्डितास्ते मां न प्रपद्यन्ते । ....ते चतुर्विधाः । एके मायया मूढाः कर्मजडा इन्द्रादिवन्मामपि विष्णुं कर्माङ्गं जीवविशेषं कर्माधीनं वा मन्यमानाः ; अपरे मायया नराधमा विप्रादिकुलजाता नराकृतिं प्राप्यापि सत्कार्य्यार्थेच्छया पामरतामापन्नाः......... ; अन्ये मायापहृतज्ञानाः साङ्ख्यादयः । ते हि सार्वज्ञ्यसर्वेश्वरत्वसत्यकामत्वादिधर्म्मैः श्रुतिसहस्रप्रसिद्धमपि मामीश्वरमजानन्तः प्रकृतिमेव सर्व्वस्रष्ट्रीं मोक्षदात्रीं च कल्पयन्ति । तत्र तादृक्कुतर्कमतानुसारयन्ती मायैव हेतुः । अपरे आसुरं भावमाश्रिता निर्विशेषचिन्मात्रवादिनः । असुरा यथा निखिलानन्दमयं विग्रहं शरैर्विध्यन्ति तथा दृश्यत्वादिहेतुभिस्ते नित्यचैतन्यानन्दमयं श्रुतिप्रसिद्धमपि तं खण्डयन्तीति

चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्ज्जुन।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥१६॥

तत्रापि तादृशत्वुद्ध्युत्पादनी मायैव हेतुरिति।" श्रीमद्विश्वनाथस्तु मूलत इदमेव व्याख्यानमनुसृतवान्। अत्र यत्किञ्चित् शङ्करादीनां निन्दा दृश्यते सैषा तत्सम्प्रदायप्रसिद्धा। तथाहि भक्तिसन्दर्भे,—"ततो विशिष्टायां सविशेषायां ममायां भक्तौ च श्रीविष्णुरूपमबहुमानाः केचिन्निराकारेश्वरस्यान्याकारेश्वरस्य च उपासनायां मन्यन्ते सापि व्यक्तैवास्ति। यतो हिरण्यकशिपोरपि 'नित्य आत्माव्ययः शुद्धः' इत्यादि वाक्येन 'यदृच्छयेमाः सृजतीदमव्ययः' इत्यादि तदुदाहृततिहासवाक्येन तेन कृतब्रह्मस्तवेन च ब्रह्मज्ञानं निराकारेश्वरज्ञानञ्च तस्यास्तीति वर्ण्यते" इति। १५।

के पुनः सुकृतिनस्ते सर्व्वान्तर्यामिणं भजन्त इत्याह चतुर्व्विधा इति। हे अर्ज्जुन, आर्त्तो रोगविपदाद्यभिभूतः, जिज्ञासुः आत्मतत्त्वं ज्ञातुमिच्छुः, अर्थार्थी धनकामः, ज्ञानी भगवन्तं प्रेप्सुः—ज्ञानं भगवत्तत्त्वसाक्षात्कारस्तेन नित्ययुक्तः, एते चतुर्व्विधाः सुकृतिनः पुण्यकर्म्माणो जनाः मामन्तर्यामिणं भजन्त सेवन्ते। आर्त्तो यथा—वसनापकर्षणविपद्ग्रस्ता द्रौपदी, जिज्ञासुर्यथा शौनकादिः, अर्थार्थी यथा ध्रुवादिः, ज्ञानी यथा शुकादिः। त्रयः सकामाः, एको ज्ञानी निष्कामः, यथा शान्तिपर्व्वण्यर्ज्जुनं प्रत्याचार्य्यः—"चतुर्व्विधा मम जना भक्ता एवं हि मे श्रुतम्। तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः। अहमेव गतिस्तेषां निराशीःकर्म्मकारिणाम्॥ ये च शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः। सर्व्वे च्यवनधर्म्मास्ते प्रतिबुद्धस्तु श्रेष्ठभाक्॥" (शा, प, ३४१अ, ३३।३४श्लो) इति। अत्र श्रीमद्विश्वनाथः—"प्रधानीभूतभक्तावधिकारिणश्चत्वारो निरूपिताः। तत्रादिमेषु त्रिषु कर्म्ममिश्रा भक्तिः अन्तिमे चतुर्थे ज्ञानमिश्राः। 'सर्व्वद्वाराणि संयम्य' इत्यग्रिमे ग्रन्थे योगमिश्रापि वक्ष्यते। ज्ञानकर्म्माद्यमिश्रा केवला भक्तिर्या सा तु

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥१७॥

सप्तमाध्यायारम्भे एव 'मय्यासक्तमनाः पार्थ' इत्यनेनोक्ता, पुनश्चाष्टमेऽध्याये 'अनन्यचेताः सततम्'इत्यनेन, नवमे 'महात्मानस्तु मां पार्थ' इति श्लोकद्वयेन 'अनन्याश्चिन्तयन्तो माम्' इत्यनेन निरूपयितव्येति। प्रधानीभूता केवलेति द्विविधैव भक्तिर्मध्यमेऽस्मिन्नध्यायषट्के भगवतोक्ता। या तु तृतीया गुणीभूता भक्तिः कर्म्मिणि ज्ञानिनि योगिनि च कर्म्मादिफलसिद्ध्यर्था दृश्यते, तस्याः प्राधान्याभावान्न भक्तित्वव्यपदेशः,, किन्तु......कर्म्मत्वज्ञानत्वयोगत्वव्यपदेशस्तद्वतामपि कर्म्मित्वज्ञानित्वयोगित्वव्यपदेशो न तु भक्तत्वव्यपदेशः" इति। केचिदर्व्वाञ्चः—अत्र 'ज्ञानी' इति ज्ञानस्य प्राधान्यं, षष्ठे 'तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः' (६।४६) इति योगेन तस्याधःकरणम्, योगादपि पुनर्ज्ञानस्य 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥" (४।३८) इति चतुर्थे श्रेष्ठत्वमुपवर्णयत्याचार्य्य इति मन्यमानाः—अव्यवस्थितमतत्वं तस्मिन्नारोपयन्ति। पूर्व्वापराविचार एव मूलमीदृग्वालोचितप्रलापस्य। अत्र ज्ञानी भजनशीलः साक्षाद्भगवद्दर्शनपरायणः, ज्ञानिभ्योऽपि योग्यधिक इत्यत्र ज्ञानी शास्त्रविज्ञानविन्न त्वपरोक्षज्ञानविशिष्टो भक्तः, 'न हि ज्ञानेन' इत्यत्र योगः कर्म्मयोगो न तु ध्यानयोगः, अतो नास्त्याचार्य्येऽव्यवस्थितत्वं मतस्य। एवमन्यत्रापि तेषां प्रलापस्य निर्म्मूलत्वं ध्येयम्। १६।

'चतुर्व्विधा भजन्ते मां सुकृतिनः' इत्युक्त्या सर्व्वे समाना इत्यायाति तन्निवारयितुमाह तेषामिति। तेषां चतुर्णां मध्ये नित्ययुक्तः नियतभगवद्योगयुक्तः साक्षादपरोक्षज्ञानवान्, न तथार्थादिकामास्तेषां विषयान्तरैराकृष्टहृदयत्वात् ; एकभक्तिः एकस्मिन् भगवत्येव भक्तिरनुरक्तिर्यस्य स, अन्येषां तयाणान्तु यतोऽभीष्टसिद्धिस्तत्रैवानुरागः, ज्ञानी

उदारा: सर्व्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थित: स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८
बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेव: सर्व्वमिति स महात्मा सुदुर्लभ: ॥१९॥

विशिष्यते विशिष्टो भवति । ज्ञानिनो ह्यहमन्तर्यामी अत्यर्थमतिमात्रं प्रिय: । प्रतिभात्यस्य तदतिप्रियत्वं "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन:" (भा, ६स्क, १७अ, २८श्लो) इत्यादिषु ज्ञानिभक्तानामन्त:करणावस्थाद्योतकेषु वाक्येषु । न केवलमहमन्तर्यामी तस्य प्रिय: "ये यथा मां प्रपद्यन्ते" (४।११) इति न्यायात् स च सोऽपि मम प्रिय: प्रेमास्पदम् । १७ ।

तेषां ज्ञान्यतिमात्रं प्रिय इत्युक्त्या यदप्यन्येषां प्रियत्वं नास्वीकृतं तथापि भ्रान्तिसम्भावनां पश्यन् तदेव विशदयत्युदारा इति । एते आर्त्तादयस्त्रय: सर्व्व एव उदारा उत्कृष्टा महान्त:, देवतान्तरं परित्यज्य कृत्स्नस्येश्वरस्याश्रयग्रहणात् । ज्ञानी तु आत्मैव धनादिकामाव्यवधानेन भजनात् परमान्तरङ्ग इति मे मतम् । कथम् ? स हि युक्तात्मा योगयुक्तचित्त: मत् अनुत्तमां न विद्यते उत्तमा यतस्तां सर्व्वोत्तमां गतिं मामेवान्तर्यामिणमास्थित आश्रितवान् । 'स युक्तात्मा अहमेव भगवान् वासुदेव इत्यभेदेन मयि समाहितचित्त:' इत्येवं वचनं न युक्तमिति श्रीमद्बलदेवेन भङ्ग्यन्तरेण प्रतिपादितम्—'ममात्मैव स:, न च ज्ञानिजीवस्य हरि: स्वेनाभेदमाहेति वाच्यम, ज्ञानिभक्तत्वासिद्धे:, भजतां चातुर्व्विध्यासिद्धेर्मोचे भेदव्याकोपाच्च" इति । १८ ।

कथं ज्ञानिनमात्मत्वेनाटङ्क्षात्तत्कारणमाह बहूनामिति । बहूनां जन्मनामन्ते बहुजन्मार्ज्जितपुण्यसञ्चयानन्तरं ज्ञानवान् साक्षाद्भगवद्दर्शनपरायण: सन् वासुदेवो ह्यधिष्ठितपरमपुरुष: सर्व्वं, सर्व्वं जगच्च जीवश्चात्मन्यन्तर्भूय वर्त्तमान इति मामन्तर्यामिणं प्रपद्यते भजते, अत: स महात्मा सुदुर्लभ: मनुष्याणां सहस्रेषु (७।३) दु:खेनापि लब्धुमशक्य: ।

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥२०॥
यो यो यां यां तनुं भक्तः श्रद्धयार्च्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥२१॥

वासुदेवः सर्व्वमित्यस्य व्याख्याने श्रीमच्छङ्करः 'सर्व्वात्मे'ति, श्रीमद्रामानुजः "वासुदेव एव मम परमप्राप्यं प्रापकं चान्यदपि यत मनोरथवर्त्ति स एव मम तत्सर्व्वम्" इति, श्रीमच्छ्रीधरः "चराचरं सर्व्वं वासुदेवः" इति, श्रीमद्बलदेवः "श्रीकृष्ण एव सर्व्वं कृष्णायत्तस्वरूपस्थितिप्रवृत्तिकं सर्व्वं वस्त्वित्यर्थः........सर्व्वं वस्तु वासुदेवेन व्याप्यमतः सर्व्वं वासुदेव इत्यर्थः" इति, श्रीमन्मधुसूदनः "सकलमहमिदञ्च वासुदेवः" इति, श्रीमद्विश्वनाथः "सर्व्वत्र वासुदेवदर्शी" इत्याह। श्रीमदर्ज्जुनस्तोत्रे श्रूयते — "नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्व्वत एव सर्व्व। अनन्तवीर्य्यामितविक्रमस्त्वं सर्व्वं समाप्नोषि ततोऽसि सर्व्वः॥" (११।४०) इति। तथाच छान्दोग्ये — "आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्व्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड़ आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्व्वेषु लोकेषु कामचारो भवति" (७।२।२५) इति। वासुदेवशब्देन हृदधिष्ठितः परमेश्वरः, सर्व्वमिति पदेन "यो मां पश्यति सर्व्वत्र सर्व्वञ्च मयि पश्यति" (६।३०) इति सर्व्वं जगच्च जीवश्चात्मन्यन्तर्भूय वर्त्तमान इति यदुपरिष्टाद्व्याख्यातं तदेत-द्व्याख्यानकदम्बप्रमाणैः समञ्जसम्। १९।

धनकामादिव्यवधानेनापि हृदधिष्ठितमीश्वरं भजन्तः कथमुदारा इत्यस्य हेतुरुच्यते कामैरिति। तैस्तैः पुत्रवित्तादिविषयैर्हृतज्ञाना अपहृतविवेकज्ञानाः स्वया प्रकृत्या नीचवासनया नियता नियन्त्रिताः, तं तं नियमं तत्तद्देवाराधने प्रसिद्धमुपवासादिव्रतम् आस्थाय आश्रित्य इन्द्राद्या अन्यदेवताः प्रपद्यन्ते भजन्ते। २०।

न हि देवतानां श्रद्धोत्पादने सामर्थ्यमस्ति, अतएव तत्तद्देवतापूजने

स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हि तान्॥२२॥
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि॥२३॥
अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममाव्ययमनुत्तमम्॥२४॥

प्रवृत्तानां तत्तद्देवतासु श्रद्धामहमन्तर्याम्येवोत्पादयामीत्याह यो य इति। भक्तः अनुरक्तः सन् यो यो यां यां तनुं मूर्त्तिं श्रद्धया अर्च्चितुमिच्छति, तस्य तस्य जनस्य तामेवाचलां श्रद्धामहमन्तर्यामी विदधामि। कथमन्तर्याम्येवं करोतीति जिज्ञासायां जिज्ञासोरिदं ज्ञातव्यं यत् तत्तद्भूमितो भूमावुच्चतमायां तेषामारोहणं भविष्यतीति जानतान्तर्यामिणाचञ्चलश्रद्धोत्पादनं क्रमेण च विवेकज्ञानदानं तस्य जीववात्सल्यमेव व्यनक्ति न त्वमोघाय प्रोत्साहदानम्। २१।

न केवलं श्रद्धोत्पादनं तत्तत्कामनालाभोऽपि मत्तोऽन्तर्यामिण एव न त्विन्द्रादित इत्याह स तयेति। स तया श्रद्धया युक्तः तस्या इन्द्रादितनोः राधनं पूजनमीहते चेष्टते करोति ततः राधनतः मयैव विहितान् तान् कामान् लभते च। २२।

यदि त्वमन्तर्याम्येव तेषामाराधने फलदाता, तदा त्वद्भक्तानां को विशेषस्तदाह अन्तवत्त्विति। तेषामन्यदेवताराधनपराणां फलन्तु अन्तवत्। देवयजो देवान् यान्ति प्राप्नुवन्ति न तु मामावृतविवेकज्ञानत्वात्; मद्भक्ता मामन्तर्यामिणमपि यान्ति। अपिशब्दात्प्राप्तेर्दुर्ल्लभत्वं भक्तानाञ्च परमसौभाग्यं सूचयति। २३।

कथन्ते सर्व्वान्तर्यामिणं परिहाय विविधां देवतनुमाराध्यत्वेनाश्रयन्ते तत्कारणमाह अव्यक्तमिति। अबुद्धयोऽतत्त्वज्ञा अविवेकिनो लौकिका जनाः मम अव्ययं नित्यं सर्व्वविधपरिवर्त्तनरहितं सदैक-

...मनुत्तमं सर्व्वोत्तमं नित्यपूर्णं परं भावं परमात्मस्वरूपमजा-नन्तः अव्यक्तं प्रपञ्चातीतमिन्द्रियाविषयं सर्व्वकारणं मामन्तर्यामिणं व्यक्तिं प्रकाशं कार्य्यरूपतां मनुष्यादिभावमापन्नं प्राप्तं मन्यन्ते । अत्र श्रीमच्छङ्करः—"अव्यक्तमप्रकाशं [शरीरग्रहणात् पूर्व्वम्—गिरिः] व्यक्तिमापन्नं प्रकाशं गतम्, इदानीं लीलाविग्रहपरिग्रहावस्थायाम्—गिरिः] मन्यन्ते मां नित्यप्रसिद्धमीश्वरमपि" इति ; श्रीमद्रामानुजः—"सर्व्वसमाश्रयणीयत्वाय अजहत्स्वभाव एव वसुदेवगृहे अवतीर्ण इति ममैव परं भावमव्ययमनुत्तममजानन्तः प्राकृतराजसुतसमानम्, इतः-पूर्व्वमनभिव्यक्तमिदानीं कर्म्मणा जन्मविशेषं प्राप्य व्यक्तिमापन्नमबुद्धयो मां मन्यन्ते" इति ; श्रीमन्माध्वः—"अव्यक्तमिति कार्य्यदेहादिवर्ज्जि-तम्·········व्यक्तिमापन्नमिति कार्य्यदेहाद्यापन्नम् । तथाहि श्रुतम्—'सद-सतः परम्', 'न तस्य कार्य्यम्', 'अपाणिपादः', 'आनन्ददेहं पुरुषं मन्यन्ते गौणदैहिकम्' इत्यादौ" इति ; श्रीमच्छ्रीधरः—"अव्यक्तं प्रपञ्चातीतं मां व्यक्तिं मनुष्यमत्स्यकूर्म्मादिभावं प्राप्तमल्पबुद्धयो मन्यन्ते ·········जगद्रक्षणार्थं लीलयाविष्कृतनानाविशुद्धोर्ज्जितमूर्त्तिं मां परमेश्वरं कर्म्मनिर्म्मितभौतिकदेहं देवतान्तरसमं पश्यन्तो मन्दमतयो मां नातीवाद्रियन्ते, प्रत्युत क्षिप्रफलप्रदं देवतान्तरमेव भजन्ते" इति । एवमन्येऽपि व्याख्यातारः । परिपूर्णो भगवान् न कुतश्चिद् वैकुण्ठा-दिभ्य आगत्यावतरतीत्युक्ता श्रीमद्विश्वनाथेन "तदाविर्भावसमये वैकुण्ठ-श्वेतद्वीपादिभ्यस्तदंशा आगत्य तत्र मिलिता भवन्ति, लीलान्ते त एव च पुनस्तत्र तत्र यान्तीति तेषामेव वैकुण्ठादिभ्योऽवतरणं वैकुण्ठाद्या-रोहणञ्चेति प्रसिद्धिर्ज्ञेया" इति भागवतटीकायां (१०स्क, १अ, २६श्लो) यदुक्तं तेनैव शाकस्यास्थार्थं आदित्यवत् पूर्व्वसंस्कारादूषित-बुद्धौ प्रतिभाति । न हि सर्व्वत्र नियतविद्यमानः परमपुरुष आत्मानं मनुष्यादिरूपेण सङ्कोच्य स्वस्यानन्त्यं परिहाय तत्तदाकारं भजत इति परमसिद्धान्तः पद्येऽस्मिन् विवृत आचार्य्येण । यद्येवं कथं तेनाह "अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो

नाहं प्रकाशः सर्व्वस्य योगमायासमावृतः ।
मूढ़ोऽयं नाभिजानाति लोको मामजमव्ययम् ॥२५॥

मम भूतमहेश्वरम् ॥" (८।११) इति । 'भूतमहेश्वरम्' इति विशेषणेनान्तर्यामितया धर्म्मसंस्थापनादिहेतोः कस्मिंश्चिल्लोकातीतप्रकृष्टे प्रादुष्कृतं स्वज्ञानमिति लक्ष्यते । विमूढ़ास्तज्ज्ञानं तस्य मनुष्यस्यैव न तु परस्येति मन्वाना न तच्छ्रद्दधते, अतएवाह अवजानन्ति मामिति । ज्ञातान्तेऽस्मिन्ननादृते "मया ततमिदं सर्व्वं जगदव्यक्तमूर्त्तिना । मत्स्थानि सर्व्वभूतानि" (८।४) इत्यादिपूक्त ऐश्वरो योगो न सिध्यति ।२४।

कथं न ते जानन्तीत्याह नाहमिति । योगमायासमावृतः योगः सृज्यशक्तीनां सम्मेलनं स एव माया प्रकटभावापन्ना प्रकृतिः तया समावृत आच्छादितोऽहमन्तर्यामी सर्व्वस्य लोकस्य न प्रकाशः प्रकटः, अतः अयं मूढ़ः विवेकज्ञानशून्यो लोकः माम् अजं जन्मरहितम् अव्ययं सदैकरूपं नाभिजानाति । योगः—"गुणानां युक्तिघटनम्" इति श्रीमच्छङ्करः, "मनुष्यत्वादिसमानसंस्थानम्" इति श्रीमद्रामानुजः, "योगेन सामर्थ्योपायेन" इति श्रीमन्माध्वः, "अचिन्त्यः प्रज्ञाविलासः" इति श्रीमच्छ्रीधरः, "भगवद्विमुखव्यामोहकत्वं योगः" इति श्रीमद्बलदेवः, 'सङ्कल्पः' इति श्रीमन्मधुसूदनः, "हे योग योगिन्" इति श्रीमन्नीलकण्ठः, "गुणैर्योग एव माया" इति श्रीमद्धनूमान्, श्रीमन्माध्वधृतपाद्मवचने—"आत्मनः प्राकृतस्यैव लोकचित्तस्य बन्धनम् । स्वसामर्थ्येन देव्या च कुरुते स महेश्वरः ॥" इति सामर्थ्यमेव योग इति व्यज्यते । वयन्तु सृज्यशक्तीनां सम्मेलनमेव योग इति मन्यामहे । कथम् ? यदा हि भगवतश्चिच्छक्तिमायया सृष्ट्युन्मुखा भवति तदैव ततः सृज्यशक्तीनां प्रादुर्भावः, तासां सम्मेलनेनैव प्रकृतिकार्य्यं जगदुत्पद्यते, उत्पद्यमानं तद्ब्रह्मावरकं भवति, अतएव सृज्यशक्तिसम्मेलनरूपा माया भगवत्प्रज्ञा भगवन्तमावृणोति तद्गतत्वात् । स तु भगवान् तद्गतोऽपि तदतीत इति ज्ञानिनां दृष्टिने तु प्राकृतजनानाम् । २५ ।

वेदाहं समतीतानि वर्त्तमानानि चार्ज्जुन।
भविष्याणि च भूतानि मान्तु वेद न कश्चन ॥२६॥
इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत।
सर्व्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥२७॥

योगमायासमावृत इत्युक्तेः किन्त्वयाच्छादितज्ञानस्त्वमिति संशयं निरसितुमाह वेदेति। हे अर्ज्जुन, समतीतानि भूतानि, वर्त्तमानानि विद्यमानानि, भविष्याणि आगामीनि भूतानि चराचराणि सर्व्वाणि अहं, सर्व्वान्तर्यामी वेद जानामि, मान्तु कश्चन न वेद। अतएव न मां भजते। २६।

सर्व्वान्तर्यामिणं त्वां हृद्यवस्थितेऽपि कथं न ते जानन्तीत्यपेक्षया तत्कारणमाह इच्छेति। सर्व्वभूतानि निखिलप्राणिनः इच्छाद्वेषसमुत्थेन इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थस्तेन द्वन्द्वमोहेन सुखदुःखशोभनाशोभनसत्यासत्यनित्यानित्यात्मानात्मसु यो मोहविपर्य्ययस्तेन सर्गे—'सृष्टिविषये' इति श्रीमन्नीलकण्ठः, 'जन्मन्युत्पत्तिकाले' इति श्रीमच्छङ्करोऽन्ये च, 'जगत्सृष्ट्यारम्भकाले' इति श्रीमद्विश्वनाथः, 'सर्गे सर्गकाले आरभ्यैव, शरीरे हि सति इच्छादयः, पूर्व्वस्वज्ञानसाधम्' इति श्रीमन्माध्वः। हे भारत, हे परन्तप, सम्मोहं सम्मूढतामविवेकं यान्ति। व्याख्यातॄणां व्याख्यानानामेवं सामञ्जस्यं भवति। सुखे दुःखं दुःखे सुखं, शोभनेऽशोभनम् अशोभने शोभनम्, सत्येऽसत्यमसत्ये सत्यम, नित्येऽनित्यम् अनित्ये नित्यम, आत्मन्यनात्मा अनात्मन्यात्मा, एवमिच्छाद्वेषजनितं मिथ्याज्ञानं सृष्टिविषये जनानां भवति। ततो जिज्ञासोपतिष्ठते। कुतोऽस्य मिथ्याज्ञानस्यारम्भः? शरीरारम्भात्। न हि शरीरमुपादानमनपेक्ष्योत्पद्यते, यदि नोपादाने मिथ्याज्ञानस्य स्थितिः स्यात्, कुतो वा तस्य शरीरे संक्रमः? पितरौ मातृतश्चेत्, तयोरपि कुत इति जिज्ञासोपतिष्ठते। परम्परयेत्युत्तरे,

येषामन्तगतं पापं जनानां पुण्यकर्म्मणाम् ।
ते द्वन्द्वमोहनिर्म्मुक्ता भजन्ते मां दृढ़व्रताः ॥२८॥

आरम्भकाले कुत इति जिज्ञासायां जगत्सृष्ट्यारम्भादेव मिथ्याज्ञानस्य जीवे प्रतिष्ठायाति । "ज्ञाज्ञौ द्वावजावीशनीशौ" (श्वे, उ, १।९) इति जीवनिष्ठाज्ञानता प्रारम्भादेवेति सिध्यति । कथं तस्मिन्नज्ञानता प्रारम्भादिति जिज्ञासा निष्फला, न जातु तस्मिन्ननन्तज्ञानं सम्भवत्य-नीश्वरत्वात्, सति पुनः स्वीकार्य्यमीश्वरद्वयम् । तत्त्वसम्भवं द्वयोरनन्त-योर्यतो नावसरः । वस्तुतस्तु सृष्टिविषये पूर्णज्ञानं स्रष्टुः परमेश्वरस्य, न तु सृष्टस्य जीवस्य । आत्मनि प्रकृतिसंसर्गकालादेव कामस्य तस्मिन् स्थितिः प्रतिपादिता प्राक् । न हि कामो जातु तद्विपरीतेनाकामेन विना स्थातुं शक्यते । यं कञ्चिद्विषयमधिकृत्य कामस्योदयः, तद्विप-रीतेऽकामो द्वेषो वा स्वभावत एवोपतिष्ठते । अतोऽज्ञानेन मिथ्या-ज्ञानेन मोहेनैतयोः सम्बन्धः स्वाभाविकः । एवं पश्यामो व्याख्यातृभिः प्राक्प्रथमवर्त्तमानावस्था अधिकृतत्र व्याख्यातमिदं पद्यमिति सर्व्वं समञ्जसम् । २७ ।

यदि प्रारम्भादेव मोहस्तदा जीवानां तस्मान्मुक्तिर्न सम्भवतीतया-शङ्कानिवारणायाह येषामिति । येषां पुण्यकर्म्मणां पुण्याचरणशीलानां जनानां पापं दुष्कृतं मोहजनितभगवदिच्छाविरोधि कार्य्यम् अन्तगतं क्षयप्राप्तं, ते द्वन्द्वमोहनिर्म्मुक्ता दृढ़व्रता दृढ़नियमपरायणा मामन्तर्यामिणं भजन्ते । अत्रेदं तत्त्वमुन्नयते । सत्त्वरजस्तमोगुणसंसर्गाज्जीवजन्म । तेषु कोऽपि सत्त्वगुणप्रधानः, कोऽपि रजोगुणप्रधानः, कोऽपि तमोगुण-प्रधान इति गुणानुसारि भवति आचरणम् । न हि तं गुणानुसारतः स्वस्वाचरणे चिरनिबद्धः । यतो गुणव्यतिकरं विना न कस्यापि सम्भवः, अतो यद्यद्गुणानुकूलमाचरणं यस्मिन् घटते तत्तद्गुणस्योपचयः तद्विपरीतगुणस्यापचय उपतिष्ठते । अस्ति हि सर्व्वस्मिन् देहभृति सत्त्वगुणस्य प्रवेशः । तमवलम्ब्यात्र पुण्याचरणेन भवति सत्त्वगुणोद्रेकः ;

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म्म चाखिलम् ॥२९॥
साधिभूताधिदैवं मां साधियज्ञञ्च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥३०॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे विज्ञानयोगो नाम सप्तमोऽध्यायः ।

तेन च चित्तं स्वच्छत्वमेति । चित्ते स्वच्छे भगवद्दर्शनोपयोगितोपतिष्ठते, तद्भजने स्पृहा च । २८ ।

किमर्थन्ते भगवन्तं सर्व्वान्तर्यामिणं भजन्ते तदाह जरेति । मामन्तर्यामिणमाश्रित्य जरामरणमोक्षाय जरामरणयोर्मोक्षार्थं ये यतन्ति यतन्ते मदर्पितानि फलाभिसन्धिशून्यानि विहितानि कर्म्माणि कुर्व्वन्ति ते तद्ब्रह्म अक्षरम्, कृत्स्नं समग्रम् अध्यात्मं स्वभावम् आत्मस्वरूपम्, अखिलञ्च कर्म्म विदुर्विजानन्ति । परमात्माश्रयणेन तेषां ब्रह्मविषयकमात्मविषयकमाज्ञापालनरूपकर्म्मविषयकं ज्ञानमुत्पद्यते । २९ ।

मृत्युकालेऽपि भगवद्भक्तानां तद्विस्मरणं नाशङ्कनीयमित्याह साधिभूतेति । साधिभूताधिदैवम् अधिभूतञ्चाधिदैवञ्च अधिभूताधिदैवं तेन सह वर्त्तते साधिभूताधिदैवं साधियज्ञञ्च यत्किञ्चिज्जनिमहत्त्, पुरुषं दैहवर्त्तियज्ञाधिष्ठातृदेवञ्चान्तर्भूय वर्त्तमानं मामन्तर्यामिणं ये विदुः, ते युक्तचेतसः मय्यासक्तमनसः प्रयाणकालेऽपि मृत्युकालेऽपि मां विदुः विजानन्ति ।

अस्मिन्नध्यायस्याध्यायसंग्रहे श्रीमद्यामुनमुनिः —"स्वयाथात्म्यं प्रकृत्यास्य तिरोधिः शरणागतिः । भक्तभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तम उच्यते ॥" श्रीमद्धरिः—"तदनेन सप्तमेनोत्तममधिकारिणं प्रति ज्ञेयं निरूपयता तदर्थमेव सर्व्वात्मकत्वादिमुपदिशता प्रकृतिद्वयद्वारेण सर्व्वकारणत्वा-

दिति च वदता तत्पदवाच्यं सम्यक्त्वोपलक्षितम् ।" श्रीमद्बलदेवः—"मां विदुस्तत्त्वतो भक्ता मन्मायामुत्तरन्ति ते । ते पुनः पञ्चधेत्येष सप्तमस्य विनिर्णयः ॥" श्रीमन्मधुसूदनः—"तदत्रोत्तमाधिकारिणं प्रति ज्ञेयं, मध्यमाधिकारिणं प्रति ध्येयं, लक्षणया मुख्यया च वृत्त्या तत्पदप्रतिपाद्यं ब्रह्म निरूपितम् ।" श्रीमद्विश्वनाथः—"भक्ता एव हरेस्तत्त्वविदो मायां तरन्ति च । ते चोक्ताः षड्विधा सप्तमाध्यायार्थो निरूपितः ॥" इति । ३० ।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

अर्जुन उवाच—

किं तद्ब्रह्म किमध्यात्मं किं कर्म्म पुरुषोत्तम ।
अधिभूतञ्च किं प्रोक्तमधिदैवं किमुच्यते ॥१॥
अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥२॥

श्रीभगवानुवाच—

अक्षरं परमं ब्रह्म स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्म्मसंज्ञितः ॥३॥

अतीताध्यायान्ते प्रश्नबीजान्युपक्षिप्तानि "ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मम्" इत्यादिना । ब्रह्मशब्दस्य भिन्नार्थे प्रयोगो न विरलस्त्वात्मशब्दस्य च । "विज्ञानं यज्ञं तनुते कर्म्माणि तनुतेऽपि च" (तै, उ, २।५) इति श्रुतौ कर्म्मणोऽपि द्वैविध्यम् । अधिभूतशब्देन किंवा पृथिव्यादिकृत्स्नकार्य्यजातं वोच्यते, उत किञ्चिदेव, तथा चाधिदैवतशब्देन देवविषयकमनुध्यानमादित्यमण्डलादिष्वधिष्ठितं चैतन्यं वा, वाधियज्ञशब्दन यज्ञमधिकृतो विज्ञानात्मा परमात्मा वाभिप्रेयत इति प्रश्नकारणानि पश्यन् पृच्छत्यर्ज्जुनो द्वाभ्यां, किन्तदिति, अधियज्ञ इति । किन्तद्ब्रह्म इत्येकः, किमध्यात्ममिति द्वितीयः, किं कर्म्म इति तृतीयः, किमधिभूतमिति चतुर्थः, किमधिदैवमिति पञ्चमः, अधियज्ञः कथं केन प्रकारेण चिन्तनीयः किं स बुद्ध्यादिस्तद्व्यतिरिक्तो वेति षष्ठः, प्रयाणकाले अन्तकाले नियतात्मभिः नियतचित्तैः पुरुषैः कथं केनोपायेन ज्ञेयोऽसीति सप्तमः प्रश्नः । ज्ञेयत्वेन सप्त पदार्था एवं सूचिता इति प्राञ्चः । १।२ ।

अर्ज्जुनपरिप्रश्नोत्तरमाह अक्षरमिति, अधिभूतमिति, अन्तकाल

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥४॥
अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥५॥

इति । प्रथमस्य किन्तद्ब्रह्मेत्यस्योत्तरम्—अक्षरं परमं ब्रह्म ; न क्षरतीत्यक्षरं परमात्मा, "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः । एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः" (बृ, आ, उ, ४।८।९) इति ; द्वितीयस्य किमध्यात्ममित्यस्योत्तरम्—स्वभावोऽध्यात्ममिति, स्वभावः स्वो भावः स्वरूपमध्यात्मम्, प्रकृतिसंसर्गवशाद्देहे भोक्तृत्वेन प्रकाशमानमात्मस्वरूपम ; तृतीयस्य किं कर्म्मेत्यस्योत्तरम्—भूतभावोद्भवकरो विसर्गः कर्म्मसंज्ञितः, भूतानां भावं सात्त्विकादिस्वभावमुद्भवञ्च करोति यो विसर्गस्त्यागो देवोद्देशे द्रव्यवितरणम, स कर्म्मसंज्ञितः कर्म्मशब्दितः, यतो भूतानां स्वभावप्राप्तिरुत्पत्तिश्च तत्कर्म्मेति फलितार्थः ; चतुर्थस्य अधिभूतञ्च किमित्यस्योत्तरम्—अधिभूतं क्षरो भावः, क्षरतीति क्षरो विनाशी भावो वस्तु यत्किञ्चिज्जनिमद्वस्त्वित्यर्थः, अधिभूतं प्राणिजातमधिकृत्य भवतीत्यधिभूतम् ; पञ्चमस्य अधिदैवं किमित्यस्योत्तरम्—पुरुषश्चाधिदैवतम्, पुरुषः समष्टिविराट् अधिदैवतमग्न्यादित्यादिदेवानधिकृत्य चक्षुरादिकरणान्यनुगृह्णातीत्यधिदैवतम् ; षष्ठस्य अधियज्ञः कथं क इत्यस्योत्तरम्—अधियज्ञोऽहमेवात्र देहे, अत्र देहेऽधियज्ञः सर्व्वयज्ञाभिमानिनी देवता "यज्ञो वै विष्णुः" इति श्रुतेरहमेव । यज्ञस्य मनुष्यदेहनिर्व्वर्त्त्यत्वात् देहे तदभिमानिन्या देवतायाः स्थितिः, तथाहि श्रीमन्माध्वधृते गीताकल्पे, "देहस्थविष्णुरूपाणि अधियज्ञ इतीरितः । कर्म्मेश्वरस्य सृष्ट्यर्थं तच्चापीच्छाद्यमुच्यते ॥ अधिभूतं जडं प्रोक्तमध्यात्मं जीव उच्यते । हिरण्यगर्भोऽधिदैवं देवः सङ्कर्षणोऽपि वा । ब्रह्म नारायणो देवः सर्व्वदेवेश्वरे

श्वर: ॥" इति ; ममस्य अन्तकाले कथं श्रेयोऽभीत्यस्य— अन्तकाले मरणकाले मामेवान्तर्यामिणं परमेश्वरं स्मरन् कलेवरं देहं त्यक्त्वा य: प्रयाति स मद्भावं मत्स्वरूपं याति प्राप्नोति, अत्र न संशयोऽस्ति ।

श्रीमद्रामानुजेन तदनुसारिणा श्रीमद्बलदेवेन, अक्षरं समष्टिरूपं चेतनं परमं प्रकृतिविनिर्मुक्तात्मस्वरूपम् ; स्वभाव: स्वस्य जीवस्य भाव: भूतसूक्ष्मं तद्वासनादिकञ्च, पञ्चाग्निविद्यायां मनुष्यादिभावोद्भवकरो यो विसर्ग: श्रद्धासोमादिरूपस्तत् कर्म्म इति व्याख्यातम् । यदपि वयं श्रीमच्छङ्करस्तदनुयायिनौ श्रीमन्मधुसूदननीलकण्ठौ च तत्सम्प्रदायस्य प्रतिनिधित्वेन, श्रीमद्रामानुजमाध्वाचार्य्यौ तयोर्भावानुसारिणौ तत्सम्प्रदाययो: प्रतिनिधित्वेन श्रीमद्बलदेवविश्वनाथाविवावलम्बितवन्तो गीतार्थनिर्णयाय, तथाप्यन्येषां व्याख्यातॄणां प्रोक्तसम्प्रदायानुवर्त्तिनां यथासम्भवं व्याख्यानसमालोचने नास्माकमनादरोऽस्ति । अत: श्रीमत्कल्याणभट्टविरचितायां रसिकरञ्जन्यां पदे पदे प्रकाशमान: स्वरविश्लेषेण पदाक्षरविभजनेन च भक्तिपक्षसमर्थनाय महान् प्रयासो यदपि नास्माकं रुचिकर:, तथाप्यत्र तस्य 'अक्षरं परमं ब्रह्म' इत्यस्य व्याख्यानस्य तदंशं न वयमुपेक्षामहे यस्मिन् ब्रह्म विभूतित्वेन परिगृहीतम् । तद्यथा—"एकादशे 'पृथिवीवायुराकाश आपो ज्योतिरहं महान् । विकार: पुरुषोऽव्यक्तं रज: सत्त्वं तम: परम् ॥' इत्यत्र परमित्यनेन परं ब्रह्मेति व्याख्यया च तस्य विभूतित्वोक्ति: ; ब्रह्मसंहितायां—'यस्य प्रभाप्रभवतो जगदण्डकोटिकोटिष्वशेषवसुधादिविभूतिभिन्नम् । तद्ब्रह्म निष्कलमनन्तमशेषभूतं गोविन्दमादिपुरुषं तमहं भजामि ॥ इत्युक्त्या । अत्र कारिके—'निष्कलादिस्वरूपं तत् ब्रह्माण्डार्ब्बुदकोटिषु । विभूतिभिर्धराद्याभिर्भिन्नं भेदमुपागतम् ॥ महाप्रभावयुक्तस्य ब्रह्म यस्य प्रभा भवेत् । तं गोविन्दं भजामीति पद्यार्थ: स्फुटीकृत: ॥' इति । श्रीमद्भागवतामृतस्य तद्व्याख्यया च विभूतित्वव्यञ्जनात् ।" इति । श्रीमद्भागवतामृत हरिभक्तिरसामृतसिन्धुप्रभृतिषु ब्रह्मणो भगवद्विभूतित्वं दृश्यते, यथा श्रीमद्भागवतामृते—"भगवांस्तु परब्रह्म परात्मा परमेश्वर: ।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥६॥

सुमान्द्रसच्चिदानन्दविग्रहो महिमार्णवः ॥ सगुणत्वागुणत्वादिविरोधाः प्रविशन्ति तम् । महाविभूतिर्ब्रह्मास्य प्रसिद्धत्थं तयोर्भिदा ॥" इति । "परात्परं ब्रह्म च ते विभूतयः" इति तट्टीकाधृतोक्तिः । हरिभक्तिरसामृतसिन्धौ च यथा—"यदरीणाञ्च प्रियाणाञ्च प्राप्यमेकमिवोदितम् । तद्ब्रह्मकृष्णयोरैक्यात् किरणार्कोपमाजुषा: ॥" "सच्चिदानन्दसान्द्राङ्गश्चिदानन्दघनाकृतिः ।" इत्यत्र "यस्य प्रभाप्रभवतः" इति ब्रह्मसंहितावचनमुद्धृत्य सिद्धान्तितम्—"अतः श्रीविष्णवैः सर्वश्रुतिस्मृतिनिदर्शनैः । तद्ब्रह्म श्रीभगवतो विभूतिरिति कीर्त्यते ॥ इति । अत्र यत् विचार्यमस्ति वक्ष्यते तद्बादरो । श्रीमत्कल्याणभट्टस्वीकृते सम्प्रदाये ब्रह्मणो विभूतित्वनिर्वचनं प्रामादिकम, यतस्तैर्भगवतो ब्रह्मोपादानत्वं स्वीकृतम् । यथा श्रीमद्भागवतामृते—"सदा सम्यक्त्वेऽपि बहुतरविशेषं वितनुते यथा स्वस्मिंस्तत्तत्प्रकृतिरहितेऽपि प्रभुवरम् ।" टीका च, "एतदुक्तं भवति परब्रह्मरूपत्वेन स्वभावतो निर्विशेषस्यापि स्वस्य परमाकाशादिरूपेण विचित्रावताराकृतया यथा" इति । भगवतो ब्रह्मोपादानत्वे तस्यैव विभूतित्वमाविष्टस्वरूपत्वं न तु ब्रह्मण इति कोऽपि नास्वीकर्त्तुं समर्थः । "जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" (श्वे, उ, ४।७) ; "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" (कठ, ५ १५) इत्यत्र महिमत्वं भारूपत्वं न ब्रह्मणो विभूतित्वं प्रतिपादयति, प्रत्युत ब्रह्मणा जीवजगतोः सम्बन्धमेव दर्शयति । निर्विशेषसविशेषविचारे या भ्रान्तिर्विद्यते सापि वक्ष्यते सविचारं तत्र । ३—५ ।

अन्तकाले पूर्वनियतचिन्तनानुरूपैव चिन्ता समुदेति, अतः भगवच्चिन्तया भगवत्प्राप्तिरन्यविषयचिन्तयान्यविषयप्राप्तिरित्याह यं यमिति । हे कौन्तेय, सदा नियतं तद्भावभावित तत्पदार्थचिन्तया वासितचित्तः

तस्मात् सर्व्वेषु कालेषु मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम् ॥७॥
अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥८॥

कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद्यः।
सर्व्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ॥९॥

यं यं वापि भावं पदार्थं स्मरन् अन्ते मरणकाले कलेवरं देहं त्यजति तं तं भावं पदार्थं याति प्राप्नोति। चिन्तामयो हि पुरुषः, चिन्तारूपा हि तस्य गतिः, चिन्तया हि को वा किंस्वरूपोऽधुना वर्त्तते भविष्यति च भविष्यति ज्ञायते इति तत्त्वम्। ६।

यतः पूर्व्वनियतचिन्तनानुरूपैवान्त्या चिन्ता भवति, तया च तदनुगुणा गतिरत आह तस्मादिति। यत एवं तस्मात् सर्व्वेषु कालेषु मामन्तर्यामिणमनुस्मर चिन्तय, युध्य च युध्यस्व स्वधर्म्मं कुरु। एवमन्तर्यामिणि अर्पिते मनोबुद्धी यस्य स त्वं मामन्तर्यामिणम् एष्यसि प्राप्स्यसि, असंशयो नास्ति संशयोऽत्र। ७।

मननानुचिन्तनेऽभ्यासो हि कारणमतस्तमेवाहाभ्यास इति। अभ्यासः सजातीयप्रत्ययप्रवाहः 'विराट्सूत्रान्तर्यामिषु मनसः स्थिरीकरणार्थो यत्नोऽभ्यासः' इति श्रीमन्नीलकण्ठः, स एव योगस्तेन युक्तेन अनन्यगामिना नान्यत्र गन्तुं शीलमस्येति तेन चेतसा चित्तेन, हे पार्थ, अनुचिन्तयन्ननुध्यायन् दिव्यं—'सृष्ट्यादिक्रीडायुक्तं' दिवु क्रीडति धातोः' इति श्रीमन्माध्वः—अप्राकृतं द्योतनात्मकं परमपुरुषं याति प्राप्नोति। ८।

तं दिव्यं पुरुषं विशिनष्टि कविमिति। कविं सर्व्वज्ञं, पुराणं

प्रयाणकाले मनसाऽचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥१०॥

चिरन्तनमनादिम्, अनुशासितारं नियन्तारमुपदेष्टारम्, अणोरणीयांसं सूक्ष्मादपि सूक्ष्मतरम्, सर्व्वस्य धातारं धारणपोषणकर्त्तारम्, अचिन्त्यरूपं नियतविद्यमानमप्यस्य रूपं न केनचिच्चिन्तयितुं शक्यते इत्यविचिन्त्यरूपम्, आदित्यवर्णम् आदित्यस्येव स्वपरप्रकाशको वर्णः स्वरूपं दीप्यमानता यस्य तम्, तमसः परं तमोऽव्यक्तं प्रकृतिः ततः परस्तादुपरिष्टात् विद्यमानम्, "तमसः परस्तादज्ञानलक्षणान्मोहान्धकारात् परं तमनुचिन्तयन् यातीति पूर्व्वेणैव सम्बन्धः" इति श्रीमच्छङ्करः, अन्ये तु 'स तं परं पुरुषमुपैति दिव्यम्' इति परेण सम्बन्धमुक्तवन्तः । 'सप्रपञ्चप्रकृतिं भित्त्वा यस्तिष्ठति एवम्भूतं पुरुषम्' इति श्रीमच्छ्रीधरः, सप्रपञ्चप्रकृतिमन्तर्भूयोपरिष्टात् तदतीतत्वेन विद्यमानमिति वयम् । ९ ।

प्रयाणकाल इति । प्रयाणकालेऽन्तकाले अचलेन स्थिरेण मनसा भक्त्या परमेश्वरविषयेण परमेण प्रेम्णा युक्तः योगबलेन स्वचित्तस्थैर्य्यलक्षणस्य योगस्य बलेन भ्रुवोर्मध्ये प्राणं सम्यक् आवेश्य भगवच्चिन्तनस्थानाद्धृदयात् हार्द्दं प्राणं भ्रुवोर्मध्ये सम्यक् निवेश्य, तत्र परमपुरुषचिन्तापरायणः सन्नित्यर्थः, तं दिव्यं परं पुरुषमुपैति प्रपद्यते । मरणकाले हृत्पिण्डस्य क्रियाशैथिल्याच्छ्वासकृच्छ्रता, तयोर्द्ध्वगामित्वं श्वासस्य । श्वासो हि प्राणक्रिया । अतएव श्वासञ्च प्राणञ्चाभिन्नभावेन गृहीत्वा प्राणक्रियाश्वाससहकारेण भगवच्चिन्तनाभ्यासवान् योगी प्रयाणकाले हार्द्दस्य प्राणस्योर्द्ध्वगामित्वादूर्द्ध्वभूमावेव भ्रुवोर्मध्ये भगवच्चिन्तनानुरतो भवति, योगेन च तनुं त्यजतीति फलितार्थः । योगेन तनुत्यागे ब्रह्मसंस्पर्शानन्देन मुखं प्रसन्नं प्रस्फुटितकमलमिव प्रफुल्लं भवतीति प्रत्यक्षम् । १० ।

यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति
तत् ते पदं संग्रहेण प्रवक्ष्ये ॥११॥

सर्व्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥१३॥

अन्तकालेऽवलम्बनीयमुपायं सङ्क्षेपेण वक्तुमुपक्रमते यदक्षरमिति । वेदविदो ब्रह्मज्ञा यदक्षरं वदन्ति—"एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनणु्वह्रस्वम" इत्यादि (वृ, आ, ५।८।८) ; वीतरागा निस्पृहा यतयो यत्नशीलाः यत् विशन्ति प्राप्नुवन्ति, यत् अक्षरमिच्छन्तो ज्ञातुमिच्छवः ब्रह्मचर्य्यं चरन्ति, तत्तेऽक्षराख्यं ब्रह्माख्यं पदं संग्रहेण सङ्क्षेपेण प्रवक्ष्ये कथयिष्यामि । पद्यमिदं कठोक्तस्य प्रवचनस्यानुरूपम्, तद्यथा "सर्व्वे वेदा यत्पदमामनन्ति तपांसि सर्व्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति तत्ते पदं सङ्क्षेपेण ब्रवीमि ; ओमित्येतत् ॥" (१।२।१५) इति । ११ ।

योगधारणमाह सर्व्वद्वाराणीति ; ओमिति । सर्व्वद्वाराणि स[illegible]णीन्द्रियद्वाराणि संयम्य वहिर्विषयग्रहणान्निवृत्य, मनो हृदि निरुध्य अन्तर्विषयचिन्तनादवरुध्य च आत्मनः प्राणं मूर्ध्नि भ्रुवोर्मध्ये तदुपरि च निधाय योगधारणां सद्भावनामास्थितः कुर्व्वन्, आत्मन इति पदं योगधारणामित्यनेन सम्बध्य श्रीमन्मधुसूदनो व्याचष्टे "आत्मनो योगधारणाम् आत्मविषयसमाधिरूपां धारणामास्थितः, आत्मन इति देवतादिव्यावृत्त्यर्थम" इति । ओमिति एकाक्षरं ब्रह्म ब्रह्मवाचकं, नामनामिनोरभिन्नत्वात् ब्रह्मेत्युक्तिः, व्याहरन्नुच्चारयन् मामन्तर्यामिणमनु-

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥१४॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥१५॥

स्मरन् चिन्तयन् ध्यायन् यो देहं त्यजन् प्रयाति स परमां प्रकृष्टां गतिं याति प्राप्नोति । "एतद्ध्येवाक्षरं ब्रह्म एतदेवाक्षरं परम् । एतद्ध्ये-वाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥" (कठ, १।२।१६) । इत्यु-क्तेरोङ्कारेणान्तर्यामिणं परमपुरुषं चिन्तयन्नेव तं गच्छति, न पुनः केवलेन तदुच्चारणेनेति पश्यताचार्य्येण परमपुरुषानुचिन्तनं विहितम् । आह च प्रश्नोपनिषदि—"यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत, स तेजसि सूर्य्ये सम्पन्नः, यथा पादोदरस्त्वचा विनिर्म्मुच्यत एवं ह वै स पाप्मना विनिर्म्मुक्तः, स सामभिरुन्नीयते ब्रह्म-लोकं, स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते ।" (५।५) इति । १२।१३ ।

न हि सर्व्वेषां मरणकाले योगधारणया मरणं सम्भवति । वायु-निरोधविधुराणां न तिष्ठति तादृग्धारणासामर्थ्यम् । विशेषतश्चिरा-भ्यासं विना तादृशी स्मृतिर्न जातु तदोपतिष्ठते, अपिच भगवत्प्राप्ति-र्नित्याभ्यासपरायणानामेव भवति, नान्यस्येत्याहाचार्य्यः अनन्यचेता इति । अनन्यचेताः नान्यविषये चेतो यस्य स अनन्यचेता यः सततं निरन्तरं नित्यशः यावज्जीवं मां स्मरति चिन्तयति, तस्य नित्ययुक्तस्य सदा समाहितस्य योगिनः, हे पार्थ, अहं सुलभः सुखेन लभ्यः । ये पुनर्वायुनिरोधविधुरतयोक्तरीत्या स्वेच्छाप्रयुक्तोत्क्रमणे न समर्था भवेयुः, तेषां किं स्यादित्यपेक्षायामुक्तमेवमिति श्रीमद्गिरिमधुसूदनौ । कर्म्ममिश्रां योगमिश्रां प्रधानभूतां भक्तिमुक्त्वा पद्येऽस्मिन् केवलां भक्तिमाहेति श्रीम-द्विश्वनाथबलदेवौ । १४ ।

अनन्यचिन्तेन सर्व्वनियन्तारं विचिन्त्य किं भवति तदाह । माम-

आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्ज्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥१६॥

न्तर्यामिणमुपेत्य प्राप्य दुःखालयं बहुक्लेशपूर्णम्, अशाश्वतं निरन्तर-परिवर्त्तनाधीनं पुनर्जन्म प्रकृतिसम्बन्धं न आप्नुवन्ति, य एते महात्मानः परमां सर्व्वोत्कृष्टां संसिद्धिं भगवत्प्राप्तिरूपां गताः प्राप्ताः। केवल-भगवदाश्रितानाम् "एषास्य परमा गतिरेषास्य परमा सम्पदेषोऽस्य परमो लोको एषोऽस्य परम आनन्दः" (बृ, आ, ६।३।३२) इति भगवत्येव नित्यस्थितिर्भवति। १५।

भगवदाश्रयं विना नैकान्तिकी गतिरिति स्पष्टवाक्येनोच्यते आब्रह्मेति। हे अर्ज्जुन, आब्रह्मभुवनात् सह ब्रह्मभुवनेन लोकाः पुनराव-र्त्तिनः पुनरावर्त्तनस्वभावाः पुनः पुनः परिवर्त्तनशीला नैकान्तिका इति यावत्। हे कौन्तेय, मामन्तर्यामिणमुपेत्य प्राप्य पुनर्जन्म रूपान्तर-ताप्राप्तिर्न विद्यते। "अथ हैषोऽनन्तमपारमक्षय्यं लोकं जयति यः परिणादित्यम्" (तै, ब्रा, ३।११।८) इति ब्रह्मलोकस्याक्षयत्वं प्रसज्यते, तत् कथं पुनरत्रास्य पुनरावर्त्तिषु लोकेषु गणना? "नास्याहोरात्रे लोकमाप्नुतः" (३।११।८) इत्यत्र श्रीमत्सायन आह "ब्रह्मलोके हि नैते अहोरात्रे अनाल्पे प्रसरतः किन्तु कल्पमात्रमेकमहः, तस्मादितरलोके-ष्विव नास्य आयुः क्षीयते" इति। "आब्रह्मभुवनात्" इत्युक्तिमवल-म्ब्यैव स एवमाहेति प्रतिभाति। "तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः" (बृ, आ, ८।२।१५), इत्यत्र ब्रह्मलोका-ख्येषु विविधेषु लोकेषु भ्रमणं भवति, न त्वहोरात्रयुक्तेषु लोकेष्विति 'न पुनरावृत्तिः' इति वाक्येन लक्ष्यते; अन्यथा 'आब्रह्मभुवनात्' इत्युक्तिर्न समञ्जसा स्यात्। "स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमी-क्षते" (प्र, उ, ५।५) इत्यत्र पुरुषेक्षणमात्रमुक्तं न तेनैक्यम्। अतो न यावत् परमपुरुषेणैकत्वमापन्नस्य जीवस्य तस्मिन् स्थितिर्भवति, न भवति स एव परमपुरुषोऽस्य परमो लोकः। उक्ता चैषैकत्वावस्था तस्यामेवो-

पनिषदि षष्ठे प्रश्ने "स यथेमा नद्यः स्यन्दमानाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते एवमेवास्य परिद्रष्टुरिमाः षोड़श कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति, भिद्येते तासां नामरूपे, पुरुष इत्येवं प्रोच्यते, स एषोऽकलोऽमृतो भवति" (६।५) इति। अत्र 'अकलः' इति पदेन देहसम्बन्धव्यापनयः, 'अमृतः' इति पदेन मृत्युमतिक्रम्य परमपुरुषे स्थितिश्चोच्यते। पुरुषस्य परमपुरुषेण स्वरूपैकत्वप्राप्तावेकत्वेऽपि श्रीमच्छङ्करोक्तिरेवात्रादरणीया—"सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्। सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः॥" इति। यत्तु श्रीमन्माध्वाचार्य्योक्तं गीतातात्पर्य्यनिर्णये—" 'न च जीवेश्वरैक्यं मुक्तावपि,' 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥' 'यो वेद निहितं गुहायां परमे व्योमन्, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता।' 'एवमानन्दमयमात्मानमुपसंक्रम्य इमांल्लोकान् कामान्नीकामरूप्यनुसञ्चरन्………' 'न समो ब्रह्मणा कश्चित् मुक्तावपि कथञ्चन। ततः सहस्रगुणिता श्रीस्ततः परमो हरिः॥'………इत्यादि मोक्षानन्तरमपि भेदवचनेभ्यः। न च 'यत्र त्वस्य सर्व्वमात्मैवाभूत् तत् केन कं पश्येत् तत् केन किं जिघ्रेत्,' 'यद्वै तं न पश्यति पश्यन् वै तन्न पश्यति,' 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं पश्येत परमम्', 'ब्रह्म वेद ब्रह्मैव भवति,' 'तत्त्वमसि,' 'अहं ब्रह्मास्मि' इति वाक्यविरोधः। संज्ञानाशो यदि भवेत् किं मुक्त्या नः स्यात्।………'न च ज्ञेयविनाशः स्यात् आत्मनाशः कुतः पुनः।'………'तस्मात् स्वभावज्ञानेन भिन्ना विष्णुसमीपगाः। भुञ्जते सर्व्वभोगांश्च मुक्तिरेषा न चान्यथा॥'" इति—तदेतेनासमञ्जसम्; 'सत्यपि भेदापगमे नाथ' इत्यादिना श्रीमच्छङ्करोऽपि तदेवाह। श्रीमन्माध्वकृतगीताभाष्यस्य टीकायां प्रमेयदीपिकायां श्रीमज्जयतीर्थेन विचारतो यत् सिद्धान्तितम्, तदपि न स्वरूपैक्यविरोधि। १६।

सहस्रयुगपर्य्यन्तमहर्यद्ब्रह्मणो विदुः।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥१७॥
अव्यक्ताद्व्यक्तयः सर्व्वाः प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥१८॥
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥१९॥

ब्रह्मलोकसहिताः सर्व्वे लोकाः कथं पुनरावर्त्तिनस्तत्कारणमाह सहस्रेति। सहस्रयुगपर्य्यन्तं सहस्राणि युगानि पर्य्यन्तमवसानं यस्याह्नस्तदहः, युगसहस्रान्तां तत्परिमाणां रात्रिं ये विदुः, ते जना अहोरात्रविदः। अतो नात्ययो ब्रह्मणो लोकः। अत्र श्रीमच्छ्रीधरोऽहोरात्रमानमेवमाह—"युगशब्देनात्र चतुर्युगमभिप्रेतम्, 'चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते' इति विष्णुपुराणोक्तेः। ब्रह्मण इति च महर्लोकादिवासिनामुपलक्षणार्थम्। तत्रायं कालगणनाप्रकारः;—मनुष्याणां यद्वर्षं तद्देवानामहोरात्रं, तादृशैरहोरात्रैः पक्षमासादिकल्पना। द्वादशभिर्वर्षसहस्रैश्चतुर्युगं भवति, चतुर्युगसहस्रन्तु ब्रह्मणो दिनम्, तावत्प्रमाणैव रात्रिस्तादृशैरहोरात्रैः पक्षमासादिक्रमेण वर्षशतं ब्रह्मणः परमायुरिति।" इति। १७।

किमनेन कालगणनेनेत्याह अव्यक्तादिति। ब्रह्मणोऽहरागमे प्रबोधकाले अव्यक्ताद्ब्रह्मणः स्वापावस्थायाः सर्व्वा व्यक्तयः स्थावरजङ्गमलक्षणाः सर्व्वाः प्रजाः प्रभवन्ति प्रादुर्भवन्ति, रात्र्यागमे ब्रह्मणः स्वापकालेऽव्यक्तसंज्ञके तत्रैव प्रलीयन्ते प्रलयं यान्ति। १८।

"सत्याद्भूतानि जातानि सत्यं भूतमयं जगत्" इति प्रतिज्ञाया न जातु हानिरस्तीति प्रदर्शनाय प्रलयेऽपि तेषां स्वकारणेऽव्यक्तावस्थायां स्थितिः पुनस्ततो व्यक्तिरिति निर्णीय कृतस्य न हानिरकृतस्य च नाभ्यागमः प्रदर्श्यते, भूतग्राम इति। स एवायं भूतग्रामः भूतसमूहः

भूत्वा भूत्वा उत्पद्योत्पद्य ब्रह्मणो रात्र्यागमे अवशः स्थिरतरनियमपरतन्त्रः, हे पार्थ, प्रलीयते स्वकारणे लीनो भवति, ब्रह्मणोऽहरागमे प्रभवति जायते। लयप्रभवयोर्विचारेण सृष्टिचिन्ता मनस्युदेति। सा पुनर्बहिरगम्येति स्मार्त्तो वैदिकश्च सिद्धान्तः, तद्यथा "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः॥" (मनु, १अ, ५श्लो); "इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न। योऽस्याध्यक्षः परमे व्योमन्त्सोऽङ्ग वेद यदि वा न वेद॥" (ऋक्सं, १०म, १२९सू, ७ऋक्) इति। सृष्टितत्त्वविषये स्मृतेर्वेदस्य चाज्ञेयत्वप्रतिज्ञा सर्व्वथादरणीया। न आत्वनन्तशक्तेः प्रसुप्तावस्था सम्भवति, तथा सति क्रियारहितायास्तस्या अशक्तित्वमेव प्रसज्येत। यद्हि न कदापि प्रसुप्तावस्था, तदानादिशक्तेः क्रियाप्यनाद्येत्यायाति। यद्यनाद्या तदा सृष्टिरप्यनाद्या भवति। विना स्थगितगतिमारम्भो न बुद्धौ प्रतिभासते। नास्ति चेदारम्भस्तदा सृष्टेरपि न सम्भावनास्ति, यतः सर्ज्जनं सूचयति क्रियारम्भमेव। एवमज्ञेयत्वापत्तेराचार्य्यप्रदर्शितो न्याय एव सर्व्वं समादधाति। व्यक्तेः प्राक् कारणे कार्य्यस्य विलीनभावेन स्थितिः कार्य्यस्यात्यन्तासत्तां वारयति, अथापि कार्य्यं विना यदकारणत्वं कारणस्य तदपि न, अन्तर्विलीनकार्य्यत्वात्। क्रियावत्तां विना न कारणत्वं सम्भवति, अन्तर्विलीनकार्य्यत्वावस्थायां न पुनः कारणस्य क्रियावत्ता, अतएव तस्याकरणत्वमिति चेत, प्रणिधानाभाव एव एवंविधोक्तेर्हेतुः। व्यञ्जने धारणे च समानमेव क्रियावत्ता। यद्यन्तःकार्य्यं न स्यात् धारणं न सम्भवेत्, क्रियाविच्छेदोऽपि। अतः कारणात् कार्य्यस्य क्रमिकाभिव्यक्तिरेव सृष्टिः, सैवारम्भशब्दवाच्या, अनारम्भत्वन्तु कारणे कार्य्यस्य नित्यस्थित्यैवावधारणीयम्। ननु कारणब्रह्मव्यतिरिक्तं न किञ्चिदासीदिति वेदान्तप्रतिज्ञाहानिः। न, कारणं ब्रह्म नाशक्ति, तस्य शक्तिः कार्य्यबीजमिति कार्य्यत्वव्यपदेशः शक्तेः। कार्य्याभिव्यक्तौ कारणस्य तस्मिन्नव्यक्तावस्थायां स्थितिः, अत उक्तमाचार्य्येण "मया ततमिदं सर्व्वं जगदव्यक्तमूर्त्तिना" (९।४) इति। कार्य्यस्य

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः ।
यः स सर्व्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥
अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम ॥२१॥

पुनरनभिव्यक्तौ कारणमेवाद्वितीयं सदित्युच्यते । तत एव पुनः कार्य्यस्याभिव्यक्तिः, कारणस्याव्यक्तावस्थायां स्थितिः । ब्रह्मणः सर्व्वनशक्तेः स्वापो जागरणमिति मंज्ञालङ्कारिकौ ; धारणं प्रकाशनमित्येव दर्शनसम्मता सा । न ह्यनन्तशक्तेरन्तर्निहितनिखिलसामर्थ्यस्याभिव्यक्तिः सम्भवति, तथा सति कुतस्तस्या अनन्तत्वम् ? अतो धारणप्रकाशनयोर्नित्यत्वं तस्यामवश्यमभ्युपगन्तव्यम् । आलङ्कारिकयोस्त्वा स्वापजागरणयोस्तथा नित्यत्वम् । एवं धारणप्रदेशे लयः, प्रकाशनप्रदेशे प्रभव इति तयोरपि नित्यत्वम् । लयात् प्रभवः, प्रभवाल्लय इति क्रमः स्रष्टृविवक्षातः सम्भवतीति तथोक्तिः । १८ ।

"कारणस्यात्मभूता शक्तिः शक्तेरात्मभूतं कार्य्यम्" (वे, सू, भा, २।१।१८) इति शक्तिशक्तिमतोरभिन्नत्वेऽपि भिन्नत्वेन ग्रहणं बोधसौकर्य्यार्थमिति भेदनिर्द्देशाच्चार्य्यः पर इति । तस्मादव्यक्तात् प्रकृतेस्त्वन्यो विलक्षणः, अव्यक्तः इन्द्रियागोचरः, सनातनो विकारविरहितो नित्यः यो भावः सत्पदार्थः, स सर्व्वेषु भूतेषु नश्यत्सु तिरोहितेषु न विनश्यति तिरोधत्ते । तच्छक्ताविव भूतानां तिरोधानम्, न तस्यास्ति कुत्रापि तिरोधानभूमिः, यदि स्यात् सैव परतत्त्वं भवेत् तस्याः पुनस्तिरोधानस्थानकल्पनेऽनवस्थादोषापत्तिः । २० ।

यतः शक्तेरात्मभूतं कार्य्यमतः शक्तौ विलीनं कार्य्यसम्बन्धवशात् पुनः पुनः रूपान्तरतायाः सम्भावना न विलुप्यते । सनातनेऽव्यक्तेऽक्षरे पुनः स्थितौ न रूपान्तरताप्राप्तिरतस्तदेवाहाचार्य्योऽव्यक्त इति । योऽसावव्यक्तोऽक्षर इत्युक्तः, तं परमां प्रकृष्टां गतिं प्राप्यस्थानमाहुस्तत्त्वविदः । यमक्षरं प्राप्य न निवर्त्तन्ते, तन्मम परमं धाम स्वरूपम्

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्व्वमिदं ततम् ॥२२॥
यत्र काले त्वनावृत्तिमावृत्तिञ्चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥२३॥
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते ॥२५॥

"एषोऽस्य परमो लोक" इति न्यायात् । अत्र श्रीमद्रामानुजः—"सोऽव्यक्तोऽक्षर इत्युक्तः·········प्रकृतिसंसर्गवियुक्तस्वरूपेणावस्थित आत्मेत्यर्थः । यमेवं स्वरूपेणावस्थितं प्राप्य न निवर्त्तन्ते तन्मम परमं धाम परमं नियमनस्थानम् । अचेतनप्रकृतिरेकं नियमनस्थानम्, तत्संसृष्टरूपा जीवप्रकृतिर्द्वितीयं नियमनस्थानम्, अचित्संसर्गवियुक्तं स्वरूपेणावस्थितं मुक्तस्वरूपं परमं नित्यं मम नियमनस्थानम्, तच्चापुनरावृत्तिरूपम् । अथवा प्रकाशवाची धामशब्दः । प्रकाशश्च ज्ञानमभिप्रेतम् । प्रकृतिसंसृष्टात् परिच्छिन्नज्ञानरूपात्मनोऽपरिच्छिन्नज्ञानरूपतया मुक्तस्वरूपं परं धाम" इति । २१ ।

सोऽव्यक्तोऽक्षरः पुरुषः केनोपायेन लभ्यः, केन भावेन वा ग्रहणीय इत्याह पुरुष इति । यस्य पुरुषस्य अन्तःस्थानि भूतानि, येन इदं सर्व्वं ततं व्याप्तम्, स पुरुषः पुरिशयनात् पूर्णत्वाद्वा परः निरतिशयः, अनन्यया एकान्तया भक्त्या प्रेमलक्षणया लभ्यः प्राप्यः । अखण्डसच्चिदानन्दपरमपुरुषो निखिलं प्राणिजातं विश्वञ्चात्मन्यन्तर्भूय सर्व्वं व्याप्य स्थित इत्येवं धारणया योऽनन्यमनसा तं भजते, स तं प्राप्य तस्मिन् सर्व्वाणि परिवर्त्तनान्यतीत्य नित्यं निवसतीति फलितार्थः । २२ ।

प्रयाणकाले यासौ योगधारणोक्ता तया योगी परमपुरुषं प्राप्य न

निवर्त्तते, अन्ये तु निवर्त्तन्त इत्युक्तम् । अधुना ब्राह्मणविभागनिर्दिष्टं देवलोकपितृलोकगमनकालं वर्णयन् तन्निरपेक्षत्वं योगिनां वक्तुमुपक्रमते त्रिभिः यत्रेति, अग्निरिति, धूम इति । हे भरतर्षभ, यत्र काले तु प्रयाता मृता योगिनः आवृत्तिमनावृत्तिञ्च यान्ति, तं कालं वक्ष्यामि । अग्निः, ज्योतिः, अहः, शुक्लः शुक्लपक्षः, उत्तरायणं षण्मासाः, तत्र काले प्रयाता मृता ब्रह्मविदो जनाः ब्रह्म गच्छन्ति प्राप्नुवन्ति । धूमः रात्रिः, तथा कृष्णः कृष्णपक्षः, दक्षिणायनं षण्मासाः, तत्र काले चान्द्रमसं ज्योतिः प्राप्य योगी कर्म्मानुष्ठाता निवर्त्तते पुनरावर्त्तते । अग्निर्ज्योतिर्धूमो न हि कालः, तत्कथं कालशब्दोपन्यासः ? वृत्तान्तरसत्त्वेऽपि आम्रवृक्षाणां प्राधान्यात् यथाम्रवणमिति निर्देशस्तद्वदिति व्याख्यातारः । अहरायास्तत्तदभिमानिन्यो देवता इति तेषां सिद्धान्तः, अन्यथा जडानां तेषां सूक्ष्मदेहावृतजीववहनक्षमता कुतः ? वस्तुतस्तु अनन्तरोक्तेन 'शुक्लकृष्णे गती' इति पद्येन शुक्लत्वद्योतका अग्न्याद्याः, कृष्णत्वद्योतका धूमाद्या गृहीता इति तत्त्वम् । ब्राह्मणविभागे मूलमीदृग्विश्वासस्य दृश्यते—"वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतवः, शरद्धेमन्तः शिशिरस्ते पितरः । य एवापूर्य्यतेऽर्द्धमासः स देवाः, योऽपक्षीयते स पितरः, अहरेव देवाः, रात्रिः पितरः । पुनरह्नः पूर्व्वाह्णो देवाः, अपराह्णः पितरः । ते वा एते ऋतवो देवाः पितरः । स यो हैवं विद्वान् देवाः पितर इति ह्वयति, आ हास्य देवा देवहूयं गच्छन्ति, आ पितरः पितृहूयम । अवन्ति हैनं देवा देवहूये, अवन्ति पितरः पितृहूये, य एवं विद्वान् देवाः पितर इति ह्वयति । स यत्रोदगावर्त्तते, तर्ह्यग्नीह आदधीतापहतपाप्मानो देवाः । अथ पाप्मानं हतेऽमृता देवाः । नामृतत्वस्याशास्ति सर्व्वमायुरेति यस्तर्हि आधत्ते । अथ यत्र दक्षिणावर्त्तते यस्तर्हि आधत्तेऽनपहतपाप्मानः पितरः । न पाप्मानमपहते मर्त्याः पितरः, पुरा ह्यायुषो म्रियते यस्तर्ह्याधत्ते" (श, प, ब्रा, २।१।३।१।२।४) । इति । सूर्य्यो ज्योतिर्देवानां, चन्द्रमा ज्योतिः पितॄणाम्, तद्यथा, "प्रजापतिं वै भूतान्युपासीदन्, प्रजा

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्यययावर्त्तते पुनः॥ २६॥

वै भूतानि, वि नो धेहि यथा जीवामेति। ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदंस्तानब्रवीद्यज्ञो वोऽन्नममृतत्वम् ऊर्ग्वः सूर्य्यो वो ज्योतिरिति। अथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्योपासीदंस्तानब्रवीन्मासि मासि वोऽशनं स्वधा वो मनो जवो वश्चन्द्रमा वो ज्योतिरिति" (२।४।२।१।२) इति। चन्द्रसायुज्यं वर्णितमेवं तैत्तिरीयब्राह्मणे ;—"चन्द्रमा वा अकामयत—अहोरात्रानर्द्धमासान्मासानृतून्संवत्सरमाप्त्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोत्। अहोरात्रान् ह वा अर्द्धमासान् मासानृतून्संवत्सरमाप्त्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोति य एतेन हविषा यजते" (३।१।६)" इति। कथमाचार्य्येण "अहः शुक्लः षण्मासा उत्तरायणं," "रात्रिः कृष्णः षण्मासा दक्षिणायनम्" इत्येवमुक्तं न तु तत्तच्छब्दैस्तदभिमानिन्यो देवता इति, तत्कारणं दृश्यतेऽत्र ब्राह्मणे 'अहरेव देवाः,' 'रात्रिः पितरः,' 'ते वा एते ऋतवः देवाः पितरः' इत्यभेदनिर्द्देशात्। कालेष्वेतेषु हविरावर्त्तनेन देवलोकं पितृलोकं वा गच्छति हविरावर्त्तयितेति तत्तत्काल एवाचार्य्येण प्राधान्येन गृहीतः। तैत्तिरीये चन्द्रसायुज्यस्तुतिवर्णनेऽहोरात्रोल्लेखो दृश्यते, तदनुरूपमेव अग्निर्ज्योतिर्धूम इति। अग्निर्ज्योतिरिति तु ब्रह्मलोकस्याहोरात्रानधीनत्वप्रदर्शनार्थम्, धूम इति ज्योतिरज्योतिर्विमिश्राहोरात्रनिदर्शनार्थम्। सुतरां क्षयिष्णुत्वाक्षयिष्णुत्वे सूचयन्तौ तौ। तद्यथा—"अहोरात्रे ह वा अमुष्मिंल्लोके परिप्लवमाने पुरुषस्य सुकृतं क्षिणुतः। अर्व्वाचीनं वा अतोऽहोरात्रे, तयो ह्यस्याहोरात्रे सुकृतं न क्षिणुतः।" (श, प, ब्रा, २।३।३।११) इति। २३—२५।

ज्ञानाज्ञानजनितं गतिद्वयं चिरन्तनमपरिहार्य्यमिति दर्शयत्याचार्य्यः शुक्लकृष्णे इति। एते शुक्लकृष्णे शुक्ला ज्ञानप्रकाशमया कृष्णा च ज्ञानप्रकाशशून्या गती जगतः सर्व्वस्य शाश्वते नित्ये मते स्मृते। एकया

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ।
तस्मात् सर्व्वेषु कालेषु योगयुक्तो भवार्ज्जुन ॥२७॥
वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।

शुक्लया अनावृत्तिं स्वरूपावस्थितिं याति प्राप्नोति, अन्यया कृष्णया पुनः आवर्त्तते रूपान्तरतां भजते । ब्राह्मणवेदान्तानुसारिणीं द्विविधां गतिं तद्वाक्येनैव प्रदर्श्य तन्निहितं सत्यं पद्येनैतेनाचार्य्यो निबद्धवान् । अग्न्यादिकं सर्वं ज्योतिःप्रधानत्वात् ज्ञानस्य निदर्शनम्, धूमादिकं सर्वं पुनस्तमःप्रधानत्वादज्ञानताव्यञ्जकम् । ज्ञानं हि शुक्लम्, अज्ञानं हि कृष्णम् ; गतिस्तु मनुष्याणां ज्ञानेनाज्ञानेन च नियन्त्रिता भवति । ज्ञानेन परब्रह्म विदित्वा अनावृत्तिरूपा तस्मिन् स्थितिर्भवति, अज्ञानेन तु भोगकामनावशात् प्रकृतिसम्बन्धं न हातुं शक्यते जीवः, अत आवृत्तिरेव । २६ ।

तत्त्वस्यास्य व्याख्याने किं फलं तदेव विस्पष्टयति नैते इति । हे पार्थ, एते सृती शुक्लकृष्णे गती जानन् कश्चन योगी न मुह्यति, अर्च्चिरादिमार्गेण मोक्षाय गतिर्भविष्यति, धूमादिमार्गेण पुनः संसारप्राप्तिर्भविष्यतीति बुद्ध्या न मुह्यति मोहं प्राप्नोति । तस्मात् तत एव, हे अर्ज्जुन, त्वमपि सर्व्वेषु कालेषु योगयुक्तो भव अपुनरावृत्तये । श्रीमच्छङ्करो वेदान्तसूत्रभाष्ये साधूक्तम् ;—"न क्वचित् परब्रह्मविषया गतिः श्रूयते । तद्गया गतिप्रतिषेधः श्रावितः 'न तस्य प्राणा उत्क्रामन्ति' इति । 'ब्रह्मविदाप्नोति परम्' इत्यादिषु तु सत्याप्नोतेर्गत्यर्थत्वे वर्णितेन न्यायेन देशान्तरप्राप्त्यसम्भवात् स्वरूपप्रतिपत्तिरेवेयमविद्याध्यारोपितनामरूपप्रपञ्चप्रविलयापेक्षयाभिधीयते ।" (वे, सू, ४अ, ३पा, १४सू,) इति । सर्व्वेषु कालेषु ज्ञानी ज्ञानफलं प्राप्नोतीति निर्णीय श्रीमद्बादरायणोऽनुसृतवानाचार्य्यं सर्व्वथैव । २७ ।

परमात्मानमाश्रित्य सर्व्वेषु कालेषूत्कृष्टां गतिं प्राप्नोति योगीति

अत्येति तत्सर्व्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥२८॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे तारकब्रह्मयोगो नाम अष्टमोऽध्यायः।

निष्ठार्थं योगानुष्ठायिनं स्तौति वेदेष्विति। वेदेषु सम्यगधीतेषु, यज्ञेषु सम्यगनुष्ठितेषु, तपःसु सम्यक् चरितेषु, दानेषु च सम्यग्दत्तेषु यत् पुण्यफलं प्रदिष्टं शास्त्रेणोक्तम्, इदं गतिकारणं विदित्वा तत्सर्व्वम् अत्येति अतिक्रामति; योगी प्रागुक्तयोगयुक्तः परमुत्कृष्टम् आद्यं जगन्मूलभूतं स्थानं पदम् उपैति प्राप्नोति।

अध्यायतात्पर्य्यं श्रीमद्यामुनमुनिनिर्द्दिष्टम्—"ऐश्वर्य्याक्षरयाथात्म्यभगवच्चरणार्थिनाम्। वेद्योपादेयभावानामष्टमे भेद उच्यते॥" श्रीमच्छङ्करविरचितगीतार्थसारसंग्रहे—"भक्तियोगसुखप्राप्यतत्पदार्थो निरूपितः। प्राधान्येन तदङ्गन्तु त्वंपदार्थोऽत्र गौणतः॥" इति। २८।

इति श्रीमद्भगवद्गीतासमन्वयभाष्येऽष्टमोऽध्यायः

नवमोऽध्यायः ।

श्रीभगवानुवाच—

इदन्तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥
राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्त्तुमव्ययम् ॥२॥

अस्मिन्नध्याये 'सविज्ञानं ज्ञानमुपदिश्यते' इति श्रीमच्छङ्करः, 'भक्तिरूपस्योपासनस्य स्वरूपमुच्यते' इति श्रीमद्रामानुजः, 'अत्याश्चर्य्यं भगवदैश्वर्य्यं प्रपञ्च्यते' इति श्रीमच्छ्रीधरः, 'भक्त्युद्दीपकं निजैश्वर्य्यं तस्याः प्रभावञ्चाभिधास्यति' इति श्रीमद्बलदेवः, तदनुरूपञ्च निश्चिनोति श्रीमद्विश्वनाथः, 'साक्षान्मोक्षप्राप्तये भगवत्तत्त्वस्य तद्भक्तेश्च विस्तरेण ज्ञापनाय नवमोऽध्याय आरभ्यते ; अष्टमे ध्येयब्रह्मनिरूपणेन तद्ध्याननिष्ठस्य गतिरुक्ता, नवमे तु ज्ञेयब्रह्मनिरूपणेन ज्ञाननिष्ठस्य गतिरुच्यते' इति श्रीमन्मधुसूदनः, 'ज्ञेयब्रह्मविषयं प्रश्नद्वयं किन्तद्ब्रह्म किमध्यात्ममिति, तद्विवरणाय नवमोऽध्याय आरभ्यते' इति श्रीमन्नीलकण्ठः, 'सप्तमाध्यायोक्तं स्पष्टयत्यस्मिन्नध्याये' इति श्रीमन्माध्वः। वस्तुतस्तु देवयानपितृयाणनिरपेक्षस्य भगवद्भक्तस्य साक्षात्साधनं साक्षाद्भगवज्ज्ञानमुपदिशत्यध्यायेऽस्मिन्नाचार्य्यः तदनुक्रमते इदमिति। अनसूयवे दोषाविष्करणशून्याय उपदेष्टर्य्याविर्भूतस्वरूपे मनुष्यबुद्ध्या दोषदृष्टिविरहिताय ते तुभ्यं गुह्यतमं गोप्यतमं—देहादिविविक्तात्मज्ञानं गुह्यं, भगवदैश्वर्य्यज्ञानं गुह्यतरं साक्षात्परमात्मज्ञानं गुह्यतमम्—इदं विज्ञानसहितं साक्षादनुभवसहितं ज्ञानं ब्रह्मतत्त्वविषयकं प्रवक्ष्यामि, यत् ज्ञात्वा अशुभात् संसारबन्धनात् मोक्ष्यसे । १ ।

तज्ज्ञानं स्तौति राजविद्येति । इदं ज्ञानं राजविद्या विद्यानां

राजा, ब्रह्मविद्याया विद्यान्तरेभ्यो दीप्यतिशयित्वाच्छ्रेष्ठत्वाच्च राजेति विशेषणम्; राजगुह्यं गुह्यानां रहस्यानां राजा, गोप्यासु विद्यासु अतिरहस्यम्; पवित्रं पावनं भगवद्दर्शनविरोधिपापसमूहभस्मीकरणसमर्थम्; उत्तमं पुनःपापप्ररोहासम्भवकरणादुत्कृष्टम्, "प्रायश्चित्तैः किञ्चिदेकमेव पापं निवर्त्तते, निवृत्तञ्च तत् स्वकारणे सूक्ष्मरूपेण तिष्ठत्येव, यतः पुनस्तत् पापमुपचिनोति पुरुषः; इदन्तु अनेकजन्मसहस्रसञ्चितानां सर्व्वेषामपि पापानां स्थूलसूक्ष्मावस्थानां तत्कारणस्य चाज्ञानस्य सद्य एवोच्छेदकम्, अतः सर्व्वोत्तमं पावनमिदमेव" इति श्रीमन्मधुसूदनः; प्रत्यक्षावगमम्—प्रत्यक्षोऽवगमोऽवबोधोऽस्मिन्—प्रत्यक्षावबोधम् अन्तःसाक्षिणेदं धर्म्यमिदमधर्म्यमिति साक्षात्प्रदर्श्यमानत्वात्। प्रत्यक्षावगमं प्रत्यक्षफलं प्रदर्श्यमानधर्म्मानुसरणाधर्म्मपरिहारजनितसुखावाप्त्या, तथाहि श्रीमन्मधुसूदनः—"अवगम्यतेऽनेनेत्यवगमो मानम्, अवगम्यते प्राप्यत इत्यवगमः फलम्। प्रत्यक्षमवगमो मानमस्मिन्निति स्वरूपतः साक्षिप्रत्यक्षत्वम्, प्रत्यक्षोऽवगमोऽस्येति फलतः साक्षिप्रत्यक्षत्वम्, मयेदं विदितमतो नष्टमिदानीमत्र ममाज्ञानमिति हि सार्व्वलौकिकः साक्ष्यनुभवः" इति; धर्म्यं धर्म्मादनपेतं नित्यप्रत्यक्षत्वेऽपि लौकिकानुभवसिद्धत्वेऽपि वेदवेदान्तादिप्रतिपादितधर्म्मानुरूपम्; कर्त्तुं सुसुखं सुखेन कर्त्तुं शक्यम्, कृच्छ्रसाधनाद्यनपेक्षत्वात् श्रवणमननादिव्यापारमात्रसाध्यत्वाच्च; यदल्पायाससाध्यं तदल्पकालस्थायि, तन्न, अव्ययमविनाशि मोक्षेऽपि तस्यानुवृत्तेः। राज्ञां विद्या, राज्ञां गुह्यमिति समासे क्षत्रियाद्ब्रह्मविद्याधिगतिरिति ध्वन्यते; श्रीमद्बलदेवम्—"राज्ञामिवोदारचेतसां कारुणिकानामियं विद्या, न तु शीघ्रं पुत्रादिलिप्सया देवानभ्यर्च्चतां दीनचेतसां कर्म्मिणाम्। राजानो हि महारत्नादिसम्पदमनिह्नुवानाः स्वमन्त्रं यथातियत्नान्निह्नुवते, तथान्यां विद्यामनिह्नुवाना महान्त एतामतियत्नान्निह्नुवीरन्" इति। २।

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्त्तन्ते मृत्युसंसारवर्त्मनि ॥३॥
मया ततमिदं सर्व्वं जगदव्यक्तमूर्त्तिना ।
मत्स्थानि सर्व्वभूतानि न चाहं तेष्ववस्थितः ॥४॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥५॥

'कर्त्तुं सुसुखम्' इति चेत् कथं जना नानुतिष्ठन्ति धर्म्ममेतमित्यपेक्षयाह अश्रद्दधाना इति । अस्य—आत्मज्ञानस्येति श्रीमच्छङ्करमधुसूदनौ, उपासनाख्यस्येति श्रीमद्रामानुजः, भक्तिसहितज्ञानलक्षणस्येति श्रीमच्छ्रीधरः, भक्तिलक्षणस्येति श्रीमद्बलदेवविश्वनाथौ—धर्म्मस्य स्वरूपे तत्फले च श्रीमच्छङ्करः, स्वरूपे, साधने, तत्फले च श्रीमन्मधुसूदनः, धर्म्मस्येति कर्म्मणि षष्ठीत्यपरे व्याख्यातारः, इमं धर्म्मम् अश्रद्दधाना दृढविश्वासेन तमनुतिष्ठन्तः मामन्तर्यामिणमप्राप्य मृत्युसंसारवर्त्मनि मृत्युयुक्ते संसारवर्त्मनि निवर्त्तन्ते नितरां वर्त्तन्ते परिभ्रमन्ति । ३ ।

एवं विधिनिषेधमुखेन ज्ञानं स्तुत्वा श्रोतारमभिमुखीकृत्य तदेव ज्ञानं स्वमहत्त्वद्योपकमद्भुतैश्वर्य्यञ्चाह द्वाभ्यां मयेति, न चेति । अव्यक्तमूर्त्तिनेन्द्रियागोचरस्वरूपेण स्वप्रकाशसच्चिदानन्दरूपेण मयाऽन्तर्यामिणेदं सर्व्वं जगत् भूतभौतिकतत्कारणरूपं दृश्यजातं ततं व्याप्तम् । सर्व्वभूतानि सर्व्वाणि चराचराणि भूतानि व्यापके धारके नियामकेऽन्तर्यामिणि मयि स्थितानि । एवं सति देहदेहिवत्सम्बन्धोऽनेन जगता तवान्तर्यामिण इत्याशङ्क्याह, न च अहमन्तर्यामी तेषु स्थितः । व्यस्तं जगदनन्ते ब्रह्मणि सर्षपकणावस्तिष्ठतीति तस्मिंस्तस्य स्थितिर्जातु न सम्भवति । यदधीना हि यस्य स्थितिः, तस्मिंस्तस्य स्थितिरिति न्यायम्, अतः परे जगतः स्थितिर्न तु जगति तस्येति सरलसिद्धान्तः ।

ननु यद्येवम्, यदि सर्व्वभूतानि त्वय्यन्तर्यामिणि स्थितानि तदा तत्संसर्गस्यपरिहार्य्यः, संसर्गजनितमालिन्यमप्यनिवार्य्यमित्याशङ्कां परिहर्त्तुमाह, भूतानि कार्य्यजातानि न च मत्स्थानि, न ममान्तर्यामिणः संसर्गित्वेन स्थितानि। त्वयि स्थितेऽपि न त्वयि स्थितानीति विरुद्धं कथं सिध्यति तत्राह, मे मम ऐश्वरं योगमघटनघटनं पश्य। वस्तुतस्तु न हि निरवयवस्य चैतन्यस्य जड़वत् केनापि संश्लेषः सम्भवति, अतएव हि तस्मिन्नित्यं निर्लेपत्वम्। विना चैतन्याश्रयं पुनर्न जातु जगत् स्थातुं शक्नोति नियामकाभावात्, अतो जगतस्तस्मिन् स्थितिरपरिहार्य्या। तदेवमाहाचार्य्यः—अहमन्तर्यामी भूतभृत् भूतानां धारकः, न च भूतस्थः नाहं भूतस्थः भूतसंयुक्तः, मम आत्मा—मनोमयः सङ्कल्प इति श्रीमद्रामानुजः, परं स्वरूपमिति श्रीमच्छ्रीधरः, परमार्थस्वरूपभूतः सच्चिदानन्दघन इति श्रीमन्मधुसूदनः, परमानन्दरूप इति श्रीमन्नीलकण्ठः,—चित्स्वरूपः कार्य्योन्मुखे शक्तितया प्रकाशमानः भूतभावनः भूतानां पालयिता। "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" (७।६) इत्युक्त्या स एव जगत उत्पत्तिहेतुः प्रवेशस्थानञ्च चेत्, तदा तस्यत्त्वोपादानं जगद्भवति। एवं सति कथं तस्य निर्लिप्तता सिध्यति? सिध्यति मनसस्तच्चिन्तायाश्चैकत्वेऽपि भिन्नत्वदर्शनात्। एकत्वेऽपि भिन्नत्वं सिध्यति मनसश्चिन्तायाश्च दृष्टान्तेन, किन्तु यावन्मानसक्रियं चिन्तायाः स्थितेर्नित्यचैतन्यक्रियापेक्षित्वं जगतो नैकान्तनिर्लेपतां दर्शयति। सत्यम्; संश्लेषसम्बन्धयोर्भिन्नत्वं बुद्धिस्थं कृत्वैवोक्तं 'भूतभावनः' इति; न हि जातु भगवता निःसम्बन्धं जगत् क्षणमात्रमपि स्थातुं शक्यते। भवतु, चिन्ता हि मनसोऽवकृष्टगतित्वस्य निदर्शनम्, सा कथमनन्तज्ञाने सम्भवति। दृष्टान्तमात्रमेतत्, न हि दृष्टान्तो दार्ष्टान्तिकेन सर्व्वांशिकत्वं भजते; जगत्सम्पर्कीणं यज्ज्ञानं भगवति नित्यमस्ति, तदेव व्यक्ततां गतं जगदाकारेण परिणमते; अस्माकं क्षुद्रबुद्धेर्विषयीकरणाय तज्ज्ञानं दृष्टान्तत्वेन चिन्ताख्यानीयं कृतम्। चिन्तावागम्बरविन्यासैर्जगज्जीवपरमात्मसम्बन्धप्रदर्शनमपि तथैव ज्ञेयम्। ४।५।

यथाकाशस्थितो नित्यं वायुः सर्व्वत्रगो महान् ।
तथा सर्व्वाणि भूतानि मत्स्थानीत्युपधारय ॥६॥
सर्व्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥७॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥८॥

असङ्गेऽन्तर्यामिणि स्थितानि भूतानि ; भूतेषु स स्थितोऽपि अस्थित इत्यत्र लोकदृष्टिप्रवेशार्थं दृष्टान्तमाह यथेति । यथा सर्व्वत्रगो महान् वायुः नित्यमाकाशस्थितः, तथा सर्व्वाणि भूतानि मत्स्थानीत्युपधारय विमृश्य निश्चिनु । अत्रेदमुक्तं भवति, आकाशो हि नित्यमसङ्गो निरवयवत्वात् । वायुस्तस्मिन् निवसन्नपि असंश्लेषवशाद्विना बाधया सर्व्वत्र गच्छति । स्थूलसूक्ष्मभावेन सर्व्वत्र वायोरस्तित्वसम्भावनायामप्यसीमाकाशस्यैकदेशे तस्य स्थितिः । अतोऽसंश्लिष्टयोराधाराधेयभावोऽवगम्यते । असङ्गस्वभावेऽन्तर्यामिण्येवमसंश्लिष्टभावेनावस्थितानि भूतानि विचरन्ति, न तेषां गतिषु काचिद्बाधोपतिष्ठते । ६ ।

एवं भूतानां स्थितिर्भगवत्युक्ता सम्प्रति तेषामुत्पत्तिं प्रवेशस्थानञ्चाह सर्व्वभूतानीति । हे कौन्तेय, सर्व्वभूतानि स्थावरजङ्गमात्मकानि कल्पक्षये ब्राह्मे प्रलयकाले मामिकां मदीयां प्रकृतिं—'त्रिगुणात्मिकामपरां निकृष्टाम्' इति श्रीमच्छङ्करः, मामिकां मच्छरीरभूतां प्रकृतिं तमःशब्दवाच्यां नामरूपविभागानर्हाम्' इति श्रीमद्रामानुजः, 'त्रिगुणात्मिकायां मायायाम्' इति श्रीमच्छ्रीधरमधुसूदनविश्वनाथाः, 'प्रकृतिशक्तिके मयि' इति श्रीमद्बलदेवः—यान्ति प्रविशन्ति तस्यां सूक्ष्मरूपेण लीयन्ते ; कल्पादौ सृष्टिकाले तानि—'संस्कारात्मना स्थितानि एकतां गतानि' इति श्रीमन्नीलकण्ठः—पुनर्व्विसृजामि विविधरूपेण सृजामि 'प्रकृतावविभागापन्नानि विभागेन व्यञ्जमि' इति श्रीमन्मधुसूदनः । ७ ।

कथं सृजति तदाह, प्रकृतिमिति । स्वां प्रकृतिं सर्व्वशक्ति-

न च मां तानि कर्म्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्म्मसु ॥९॥

मवष्टभ्याधिष्ठाय प्रकृतेर्वशात् स्वभाववशादवशमस्वतन्त्रमिमं कृत्स्नं समग्रं भूतग्रामं भूतसमूहं पुनः पुनरहमन्तर्यामी विसृजामि विविधरूपेण सृजामि । 'प्रकृतेर्वशादवशम्' इत्यत्र प्राचीनकर्म्मनिमित्त-तत्तत्-स्वभाववशादस्वतन्त्रमिति व्याख्या तु परास्ता पञ्चमाध्याये पद्य एकादशे पञ्चदशे च । यत्तु श्रीमन्मधुसूदनः कथं सृष्टिरिति प्रश्नस्य मीमांसार्थमाह—"किंनिमित्ता परमेश्वरस्येयं सृष्टिः ? न पुनः स्वभोगार्था, तस्य सर्व्वसाक्षिभूतचैतन्यमात्रस्य भोक्तृत्वाभावात्, तथात्वे वा संसारित्वेनेश्वरत्वव्याघातात् ; नाप्यन्यो भोक्ता, यदर्थेयं सृष्टिः, चेतनान्तराभावात्, ईश्वरस्यैव सर्व्वत्र जीवरूपेण स्थितत्वात्, अचेतनस्याभोक्तृत्वात् ; अतएव नापवर्गार्थापि सृष्टिः, बन्धाभावादपवर्गाविरोधित्वाच्चेत्यान्यनुपपत्तिः सृष्टेर्मायामयत्वं साधयन्ती नास्माकं प्रतिकूलेति न परिहर्त्तव्येत्यभिप्रेत्य मायामयत्वान्मिथ्यात्वं प्रपञ्चस्य वक्तुमारभते त्रिभिः प्रकृतिमिति । प्रकृतिं मायाख्यामनिर्व्वचनीयां स्वां स्वस्मिन् कल्पितामवष्टभ्य स्वसत्तास्फूर्त्तिभ्यां दृढीकृत्य तस्याः प्रकृतेर्मायाया वशादविद्यास्मितारागद्वेषाभिनिवेशकारणावरणविक्षेपात्मकशक्तिप्रभावाज्जायमानमिमं सर्व्वप्रमाणसन्निधापितं भूतग्राममाकाशादिभूतसमुदायमहं मायावी पुनः पुनर्विसृजामि विविधं सृजामि कल्पनामात्रेण स्वप्नदृगिव स्वप्नप्रपञ्चम्" इति,—तत्त्वाचार्य्यानभिप्रेतत्वात् परमेश्वरस्य सर्ज्जनशक्तेरवश्यस्वीकार्य्यत्वाद्द्वैव्या मायाया भगवज्ज्ञानत्वाच्च मिथ्यातेति प्राक् प्रदर्शितमलमत्र पुनर्विचारेण ।८।

जगत्सृष्टौ कथं न वैषम्यादिदोषैराविद्धत्वं भगवतस्तदाह न चेति । हे धनञ्जय, तेषु सृष्ट्यादिकर्म्मस्वसक्तं स्वाभिलाषपरिपूरणानुरागविरहितमुदासीनवन्निरपेक्ष इवासीनं मां तानि कर्म्माणि च न निबध्नन्ति न मयि वैषम्यादि प्रसञ्जयन्ति । कथं न भगवति वैषम्यादिदोषा-

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्त्तते ॥१०॥

पत्तिः, विचारिता सा पञ्चमाध्याये पञ्चे पञ्चदशे । क्रियाशालित्वेऽपि कथमुदासीनत्वं भगवतस्तदेवात्र विवेच्यम् । "न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः । न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥" (५।१४) इत्यत्र तन्मूलमभिहितमाचार्य्येण । 'कोऽयं स्वभावः ?' इति प्रश्नमुद्भाव्य तदुत्तरे प्रोक्तमस्माभिः 'सृष्ट्यादौ स्रष्टरि विद्यमानानां सृष्टिशक्तीनामामनिष्टभावः' इति । पावकस्य दाहकत्वादिशक्तिवत् सर्व्वासां सृष्टिशक्तीनां स्वाभाविकशक्तिमत्त्वं प्रदर्शितमत्र पराशरादिवाक्येन । प्रकृतिः सर्ज्जनशक्तिर्न जातु भगवतः स्वतन्त्रा, तस्यां क्रियारूपेण यत्किञ्चाभिव्यज्यते तत्परे समारोप्यं युक्त एव । अतएव 'स्वभावस्तु प्रवर्त्तते' इत्युक्त्या न प्राकृतिकक्रियया असम्बन्धो भगवतो वक्तुं शक्यः । प्राकृतिकक्रियासु कल्याणं विना यद्यकल्याणं विद्यत इति ज्ञानदृशा प्रमाणितं स्यात्, भवेत्तदा भगवति दोषसंस्रवः । यत्र च जीवकृतकर्म्मणा पापापराध उत्पद्यते, तेन च दुःखम्, तथापि कल्याणमयी प्रकृतिस्तच्च दुःखं जीवस्य कल्याणाय नियोजयति । अतः प्राकृतिकक्रियासु भगवत्सम्बन्धो न दोषाय । यदि सम्बन्ध एवास्ति, तदा कथं तस्योदासीनत्वम् ? उच्यते, न तूक्तमुदासीन इति किन्त्वुदासीनवदिति । उदासीन इव भासमानो न तूदासीनः । तथा भासमानतायां कारणमसक्तत्वं तस्य, सक्तो न जातु भवत्युदासीनः । कर्त्तापि सोऽकर्त्ता तत्फलभोक्तृत्वाभावात् परार्थत्वाच्च तस्य सर्व्वासु क्रियासु । तदेव ह्यसक्तत्वम् । जीवकर्म्मानुसारतः सृष्टिशक्तीनां नियोगात् कल्याणाय न तस्मिन् वैषम्यादि प्रसज्यते, इत्यलं पल्लवितेन । ९ ।

उदासीनवच्च तूदासीन इति स्पष्टं दर्शयति मयाध्यक्षेणेति । अध्यक्षेण नियामकेन—अधिष्ठात्रेति श्रीमच्छ्रीधरः, नियन्त्रेति श्रीमन्मधुसूदनः, प्रवर्त्तकेनेति श्रीमन्नीलकण्ठः— मयाध्यक्षेण मया प्रकृतिर्भक्तिः,

'माया त्रिगुणात्मिकाविद्यालक्षणे'ति श्रीमच्छङ्करस्तदनुवर्त्तिनश्च, सचराचरं स्थावरजङ्गमलक्षणं जगत् सूयते उत्पादयति, हे कौन्तेय, अनेन हेतुनाध्यक्षत्वेन जगत् विपरिवर्त्तते विविधावस्थां भजते। तत्त्वमुक्तं श्वेताश्वतरैः प्रश्नमुखेनारभ्य, यथा—"किं कारणं ब्रह्म ? कुतः स्म जाताः ? जीवाम केन ? क्व च सम्प्रतिष्ठिताः ?। अधिष्ठिताः केन सुखेतरेषु जीवामहे ? ब्रह्मविदो व्यवस्थाम ॥" (श्वे, उ, १।१) इत्येतेषां प्रश्नानां भिन्नभिन्नवादिनामुत्तराण्याह "कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्या"—चिन्त्या विचार्य्यं निरूपणीयम्। एषां कारणत्वं न सम्भवति। कथम् ? "संयोग एषां न त्वात्मभावात्"—एषैकान सृष्टिकार्य्ये समर्थः। एषां संयोग एव सृष्टिकारणं भवतु, तन्न सम्भवति, आत्मभावात् चेतनभावादेव संयोगः सम्भवति, स तु कालादिषु न विद्यते। पुरुषश्चेतनः स एवात्मा, तत्तेषां संयोगस्तेन च नियमनमस्तु ; "आत्माप्यनीशः"—आत्मा स्वयं संयोगे नियमने वा न समर्थः, कथम् ? "सुखदुःखहेतोः"—तस्य च सुखदुःखाधीनत्वं विद्यते, अतएव स नियम्यो न नियन्ता भवितुमर्हति (श्वे, उ, १।२)। प्रश्नानां यथायथमुत्तरं वदति "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्। यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः।" (श्वे, उ, १।३) इति। स्वगुणैस्त्रिगुणैरुपरतत्त्वैकरूपाधिभिर्निगूढां देवात्मशक्तिं देवस्य आत्मा च शक्तिश्च तयोरेकात्मकत्वेन स्थितत्वात् 'देवात्मशक्तिम्' इत्येकवचनम्, तथा चान्यत्र "भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्व्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्" (श्वे, उ, १।१२), "ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता। अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत्॥" (श्वे, उ, १।९) इति। परापरप्रकृतियुक्तमीश्वरं ते ब्रह्मविदोऽपश्यन्, य एक ईश्वरः कालात्मयुक्तानि कालमारभ्यात्मान्तानि यानि कारणानि तैर्युक्तानि निखिलानि कारणान्यधितिष्ठति। अध्यक्षत्वन्तु स्पष्टमुक्तं तत्रैव —"एको देवः सर्व्वभूतेषु गूढः सर्व्वव्यापी सर्व्वभूतान्तरात्मा। कर्म्मा-

अवजानन्ति मां मूढ़ा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥११॥

अध्यक्षः सर्व्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च ॥" (श्वे, उ, ६।११) इति ; कर्म्माध्यक्षः परापरप्रकृतिसम्भूतानां कर्म्मणां क्रियाणामध्यक्षो नियामकः । तथाच ऋक्संहितायां—"योऽस्याध्यक्षः परमे व्योमन्" (१०म, १२९सू, ७ऋक्) इति । १० ।

"ईश्वरः सर्व्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति" (१८।६१), "तमेव शरणं गच्छ सर्व्वभावेन भारत" (१८।६२) इत्यनेन हृदयाधिष्ठितमन्तर्यामिणमुपास्यत्वेन निर्द्दिष्टवानाचार्य्यः । स तु लोकातीतपुरुषमधिष्ठाय विशेषभावेन मार्गमुपदिशति । तं मर्त्त्यबुद्ध्या पुनरज्ञानिनोऽवजानन्ति । कथं तथा कुर्व्वन्ति ते तदवाह अवजानन्तीति । मानुषीं तनुमाश्रितं भूतमहेश्वरं भूतानां महान्तमीश्वरं मामन्तर्यामिणं मूढ़ा अविवेकिनः परमसामान्यं भावं तत्त्वमजानन्तोऽवजानन्ति अवज्ञां कुर्व्वन्ति । "अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः । परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥" (७।२४) इत्यत्र यदुक्तं तदेव 'परं भावमजानन्तः' इत्यस्य पुनरुक्तत्वेनास्मिन् पद्ये परामृशति । प्रागव्यक्तभावापन्नोऽधुना मानुषीं तनुमाश्रित्य व्यक्ततां गत इति केचिन्मन्यन्ते, ते एकविधां मूढ़तां व्यञ्जन्ति । न हि परं ब्रह्म कुतश्चिदागत्य मनुष्यदेहं स्वीकृतवत्, किन्तर्हि सर्व्वत्र समभावेन तिष्ठदप्यात्मानं भक्तसन्निधौ निरन्तरमेव प्रकटयतीत्यज्ञानवशात्ते न जानन्तीति मूलमस्या मूढ़तायाः । अपरे पुनः "मया ततमिदं सर्व्वं जगदव्यक्तमूर्त्तिना" (९।४) इति तत्त्वमवधारयन्तो न जातु तस्य मानवतनावाविर्भूयाव्यक्ततापरिहारः सम्भवतीत्युपदेष्टृणामुपदेशवाक्यानि मानवबुद्धिप्रसूतानि न तु परमपुरुषवक्तृकाणीति मत्वा तं तद्वाक्यानि चावजानन्ति । एतदपि तेषां मूढ़त्वव्यञ्जकम् । ते पुनस्तत्त्वविदो ये नित्यविद्यमानं न त्वव्यक्ताद्व्यक्तिमापन्नमन्तर्यामिणं स्वाव्यक्तमूर्त्तिं सर्व्वदा-

तद्गुणनरूपापरिहारार्थैव लोकातीतपुरुषे स्वज्ञानविभवमाविष्करो-तीति जानन्तस्तमेव महयति। कथं लोकातीतपुरुषे भगवद्दर्शनेन भावार्पणमिति जिज्ञासायां पूजास्थानान्येकादश शास्त्रनिर्दिष्टान्यत्र चिन्त्यानि, तद्यथा श्रीमद्भागवते—"सूर्य्योऽग्निर्ब्राह्मणो गावो वैष्णवं खं मरुज्जलम्। भूरात्मा सर्व्वभूतानि भद्र पूजापदानि मे॥" (११स्क, ११अ, ४२श्लो) इति। कुत्र केन भावेन भगवानर्च्चनीयः तत्रैव तदाहाचार्य्यः—"सूर्य्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम्। आतिथ्येन तु विप्राग्र्ये गोष्वङ्ग यवसादिना॥ वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया। वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः॥ स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि। क्षेत्रज्ञं सर्व्वभूतेषु समत्वेन यजेत माम्॥" (११स्क, ११अ, ४३—४५श्लो) इति। सर्व्वेष्वेतेषु शङ्खचक्रादियुक्तं रूपं ध्यायेदिति तत्र व्यवस्था। रूपमिदं विश्वरूपस्य महापुरुषस्य परिकल्पितम्, तद्यथा भागवते द्वादशस्कन्धे—"मायाद्यै-र्नवभिस्तत्त्वैः सविकारमयो विराट्। निर्म्मितो दृश्यते यत्र सचित्के भुवनत्रयम्॥ एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः। नाभिः सूर्य्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः॥ प्रजापतिः प्रजननमपानो मृत्युरीशितुः। तद्बाहवो लोकपाला मनश्चन्द्रो भ्रुवौ यमः॥ लज्जो-त्तरोऽधरो लोभो दन्ता ज्योत्स्ना स्मयो भ्रमः। रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः॥ यावानयं वै पुरुषो यावत्या संस्थया मितः। तावानसावपि महापुरुषो लोकसंस्थया॥ कौस्तुभव्यपदेशेन स्वात्म-ज्योतिर्बिभर्त्यजः। तत्प्रभा व्यापिनी साक्षात् श्रीवत्समुरसा विभुः॥ स्वमायां वनमालाख्यां नानागुणमयीं दधत्। वासश्छन्दोमयं पीतं ब्रह्मसूत्रं त्रिवृत् स्वयम्॥ बिभर्त्ति सांख्ययोगञ्च देवो मकरकुण्डले। मौलिं पदं पारमेष्ठ्यं सर्व्वलोकाभयङ्करम्॥ अव्याकृतमनन्ताख्यमासनं यदधिष्ठितः। धर्म्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते॥ ओजः सहो बलयुतं मुख्यतत्त्वं गदां दधत्। अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनम्॥ नभोनिभं नभस्तत्त्वमसिं चर्म्म तमोमयम्। कालरूपं

धनुः शार्ङ्गं तथा कर्म्ममयेषुधिम् ॥ इन्द्रियाणि शरानाहुराकूति स्यन्दनम् । तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मताम् ॥" (१२ ११अ, ५—१६श्लो) इति । किमिदं रूपमेवोपासकानां सर्व्वस्वम् ? तथा सति नैवं तत्राप्युक्त "तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेत मनो निर्व्विषयं युक्त्वा ततः किञ्चन न स्मरेत् । पदं तत्परमं वि मनो यत्र प्रसीदति ॥" (भा, २स्क १अ, १९श्लो) इति । "स सर्व्वधीवृत्त्यनुभूतसर्व्व आत्मा यथा स्वप्नजनेक्षितैकः । तं मानन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ॥" (भा, १अ, ३९श्लो) इति । यद्येवं तत्कथं स्थूले विश्वे चित्तधारणाय भगवद्भावेन सर्व्वस्य ग्रहणाय, तद्यथोक्तमाचार्य्येण—"मामेव भूतेषु बहिरन्तरपावृतम् । ईक्षेतात्मनि चात्मानं यथाखममलाश इति सर्व्वाणि भूतानि मद्भावेन महाद्युते । सभाजयन् मन्यमानो केवलमाश्रितः ॥ ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके । क्रूरके चैव समदृक् पण्डितो मतः ॥ नरेष्वभीक्ष्णं मद्भावं पुंसो यतोऽचिरात् । स्पर्द्धाऽसूयातिरस्काराः साहङ्कारा वियन्ति हि ॥ वि स्मयमानान् स्वान् दृशं व्रीडाञ्च दैहिकीम । प्रणमेद्दण्डवद्भुमाव चाण्डालगोखरम ॥ यावत् सर्व्वेषु भूतेषु मद्भावो नोपजायते । देवमुपासीत वाङ्मनःकायवृत्तिभिः ॥ सर्व्वं ब्रह्मात्मकं तस्य विद्यय मनीषया । परिपश्यन्नुपरमेत सर्व्वतो मुक्तसंशयः ॥" (भा, ११ २९अ, १२—१८श्लो) इति । लोकातीते पुरुषे शार्ङ्गिपरमपुरु दर्शनार्थं कथमाचार्य्यस्य निर्व्वन्धः ? तस्मिन्थितस्वरूपस्याधिकाभिव्य तद्यथा—"हरिरेव एक उर्व्वीश यन्मयं वै चराचरम । पात्रन्त्वत्र नि वै कविभिः पात्रवित्तमैः ॥ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादि राजन् यदग्रपूजायां मतः पात्रतयाच्युतः ॥ जीवराशिभिराकीर्ण अ काशाङ्घ्रिपो महान् । तन्मूलत्वादच्युतेज्या सर्व्वजीवात्मतर्पणम् ॥ ? स्यनेन सृष्टानि नृतिर्य्यगृषिदेवताः । शेते जीवेन रूपेण पुरेषु पु रुषो ॥ तेष्वेषु भगवान् राजंस्तारतम्येन वर्त्तते । तस्मात् पा

मोघाशा मोघकर्म्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीञ्चैव प्रकृतिं मोहिनीं श्रिताः ॥१२॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥१३॥

पुरुषो याथात्मा यथेयते ॥" (भा, ७स्क, १४अ, ३४—३८श्लो) इति । 'मानुषीं तनुमाश्रितम' इत्युक्तेस्तत्र प्रकाशमानत्वमेव लक्ष्यते न तु नराकृतित्वम्, तथा सति "अव्यक्तं व्यक्तिमापन्नम" इत्युक्त्या विरोधः स्यात् । आह च श्रीमद्भाष्यः—"मानुषीं तनुं मूढानां मानुषवत्प्रतीताम् । उक्तञ्च मोक्षधर्म्मे—'यत्किञ्चिदिह लोके वै देहबद्धं विशाम्पते । सर्व्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः ॥ ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट् । भूतान्तरात्मा वरदः सगुणो निर्गुणोऽपि च ॥'" इति । यदत्र विशेषोऽस्ति विवेक्ष्यामस्तद्द्वादशाध्याये । ११ ।

कथन्तेऽवजानन्ति तत्कारणमाह मोघाशा इति । मोघाशाः मोघा वृथा आशा येषां ते, मोघकर्म्माणः मोघानि निष्फलानि कर्म्माणि येषां ते, मोघज्ञानाः मोघमफलं ज्ञानं येषां ते, विचेतसो विगतविवेकास्ते राक्षसीं हिंसादिप्रचुरां तामसीम्, आसुरीं कामगर्व्वादिबहुलां राजसीं, मोहिनीं विवेकविलोपिनीं प्रकृतिं स्वभावं श्रिता आश्रिताः । भगवन्तं परित्यज्यान्यत्र निबद्धहृदयत्वात् तेषां विवेकज्ञानप्रमोषः, आशा निष्फला, अनुष्ठानं ज्ञानञ्च श्रममात्रे पर्य्यवसितं, कामलाभहिंसादिभिश्च राक्षसासुरभावोदयो भवति । १२ ।

के पुनः श्रद्दधाना भजन्ति तानाह महात्मानस्त्विति । हे पार्थ, महात्मानस्तु महान् प्रकृष्टः श्रवणमननादिनोन्नत आत्मा सत्त्वं येषां ते अक्षुद्रचित्ता दैवीं देवानां प्रकृतिम् 'अभयं सत्त्वसंशुद्धिः' इत्यादि वक्ष्यमाणां सात्त्विकीं प्रकृतिं स्वभावमाश्रिता मामन्तर्यामिणं भूतादिं

सततं कीर्त्तयन्तो मां यतन्तश्च दृढ़व्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥

सर्व्वेषां भूतानामादिं कारणम्, अव्ययं सदैकरूपं नित्यं ज्ञात्वा अनन्यमनसोऽनन्यचित्ता मामन्तर्यामिणं भजन्ति सेवन्ते । १३ ।

कथन्ते भजन्ति तदाह सततमिति । सततं नियतं मामन्तर्यामिणं कीर्त्तयन्तः कीर्त्तनं कुर्व्वन्तः स्वरूपगुणादीनि मम पुनः पुनरालोचयन्तः, दृढ़व्रताः दृढ़मचञ्चलं व्रतं नियमपालनं येषां ते, यतन्तश्च यत्नं कुर्व्वन्तः, भक्त्या मां भजनीयं नमस्यन्तः नमस्कारं कुर्व्वन्तश्च नित्ययुक्ता नियतयोगयुक्ताः समाहितचित्ताः मामुपासते सेवन्ते । श्रीमन्मधुसूदनो व्याचष्टे पद्यमिदमेवम् ;—“प्रणवजपापनिषदावर्त्तनादिभिर्मां सर्व्वोपनिषत्प्रतिपाद्यं ब्रह्मस्वरूपं कीर्त्तयन्तः, वेदान्तशास्त्राध्ययनरूपश्रवणव्यापारविषयीकुर्व्वन्त इति यावत् ; तथा यतन्तश्च गुरुसन्निधावन्यत्र वा वेदान्तविरोधितर्कानुसन्धानेनाप्रामाण्यशङ्कानास्कन्दितगुरूपदिष्टमत्स्वरूपावधारणाय यतमानाः श्रवणनिर्द्धारितार्थबाधशङ्कापनोदकतर्कानुसन्धानरूपमननपरायणा इति यावत् ; तथा दृढ़व्रताः दृढ़ानि प्रतिपक्षैश्चालयितुमशक्यानि अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहादीनि व्रतानि येषां ते शमदमादिसाधनसम्पन्ना इति यावत्…………तथा नमस्यन्तश्च मां कायवाङ्मनोभिर्नमस्कुर्व्वन्तश्च मां भगवन्तं वासुदेवं सकलकल्याणगुणनिधानमिष्टदेवतारूपेण गुरुरूपेण च स्थितम्, चकारात् ………वन्दनादिसहितं श्रवणाद्यपि बोद्धव्यम् । अर्च्चनं पादसेवनमित्यादि गुरुरूपे तस्मिन् सुकरमेव । अत्र मामिति पुनर्व्वचनं सगुणरूपपरामर्शार्थम्, अन्यथा वैयर्थ्यप्रसङ्गात् । तथा भक्त्या सहितयेण परेण प्रेम्णा नित्ययुक्ताः सर्व्वदा संयुक्ताः । एतेन सर्व्वसाधनपौष्कल्यं प्रतिबन्धकाभावश्च दर्शितः । तदेवं शमदमादिसाधनसम्पन्ना वेदान्तश्रवणमननपरायणाः परमेश्वरे परमगुरौ प्रेम्णा नमस्कारादिना च विगतविघ्नाः परिपूर्णसर्व्वसाधनाः सन्तो मामुपासते विजातीयप्रत्ययानन्तरि-

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥१५॥
अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥१६॥

तेन स्वजातीयप्रत्ययप्रवाहेण श्रवणमननोत्तरभाविना सन्ततं चिन्तयन्ति महात्मानः । अनेन निदिध्यासनं चरमसाधनं दर्शितम् ।" इति । अत्र श्रीमन्मधुसूदनेन या पुनरुक्तिसम्भावना प्रदर्शिता, निराकृता सा श्रीमद्बलदेवेनैवं व्याचक्षाणेन ;—"[मां] कीर्त्तयन्तो मामुपासते इति मत्कीर्त्तनादिकमेव मदुपासनमिति वाक्यार्थः, अतो मामिति न पौनरुक्त्यम्" इति । १४ ।

कीर्त्तनवन्दनादिना भक्तानामुपासनमुक्त्वा शास्त्रार्थचिन्तकानामुपासनारीतिमाह ज्ञानयज्ञेनेति । ज्ञानयज्ञेन शास्त्रानुशीलनोद्भूतं भगवद्विषयं ज्ञानमेव यज्ञस्तेन च यजन्तः पूजयन्तोऽन्येऽपरे उपासका एकत्वेनाभेदेन, पृथक्त्वेन पित्रादिसम्बन्धप्रयुक्तभेदेन, बहुधा वेदोक्तेन्द्रादयो बहुप्रकारेणावस्थिताः—"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥" (ऋक्सं, १म, १६४सू, ४६ऋक्) इति—विश्वतोमुखं विश्वतः सर्व्वतः मुखमाननं भक्तानुग्राहकं साम्मुख्यं यस्य तं मामन्तर्यामिणमुपासते । चतुर्थाध्याये ज्ञानयज्ञं (४।२८) शास्त्रार्थज्ञानत्वेन निर्णीयापि केचिद्व्याख्यातारो यदन्यविधार्थं निष्पन्नवन्तो तन्न रुचिरम् । अतस्तदर्थमुपेक्ष्य मुख्यार्थ एवात्र गृहीतः । एकत्वेन पृथक्त्वेन बहुधात्वेनोपासनं शास्त्रे दृश्यते, अतः केवलशास्त्रालोचनेन बुद्धिभेदस्यावश्यम्भावित्वात् ज्ञानयज्ञे ह्युपासनाया बहुभेदोऽवश्यम्भावी । दर्शितोऽस्माचार्य्येण स एव । वक्ष्यमाणश्लोकैस्तद्विविधोपासनासु केनोपायेन भगवल्लाभः स्यात्तदेव दर्शयिष्यत्याचार्य्यः । १५ ।

"ब्रह्मार्पणं ब्रह्म हविः" (४।२४) इति यज्ञोपादानि प्रतीकत्वेन

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक् साम यजुरेव च ॥१७॥
गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥१८॥

यज्ञकर्त्तरि त्वहंग्रहत्वेन साधनं श्रीमताचार्य्येण विहितम् । शास्त्रोक्तो-पासनाभेदानां भगवल्लाभोपयोगिताविधानायाधुना विशेषं वक्तुमुपक्रम्य प्रथममेकत्वेन कथमुपासना भवति तदाह अहमिति । अहं क्रतुर्ज्योतिष्टोमादिः, अहं यज्ञो वैश्वदेवादिः, अहं स्वधा पितृभ्यो दीयमानमन्नम्, अहमौषधं भेषजम्, अहं मन्त्रो येन दीयते सः, अहमाज्यं हविः, अहमग्निः, अहं हुतं हवनकर्म्म । ननु कथं क्रतुप्रभृतीनामन्तर्यामिणैकत्वं सम्भवति, यतः केनाप्युपायेन तेषां न द्रव्यत्वं विलुप्यते, द्रव्यत्वाविलोपे चक्षुरादिभिस्तत्तद्भावेन ग्रहणमपरिहार्य्यम् । उच्यते, *तत्तद्द्रव्यशक्तीनां नान्तर्यामिणः स्वतन्त्रता, तच्छक्तीरनपेक्ष्य तेषां स्वाधीनसत्ताभावात्* । यत्सत्तया तेषां सत्तावत्ता, तत्सत्ताया एव सत्यत्वमिति जानन् तस्यां सत्तायां चित्तस्थापने केवलोऽन्तर्याम्येव बुद्धिविषयो भवति । मन्त्रस्तु न द्रव्यं, स तु वाक्यात्मम्, तत्कथं तस्यात्र सन्निवेश इति प्रश्नोऽकिञ्चित्करः, श्रुतिगोचरत्वादिन्द्रियग्राह्यविषयेषु वाचः परिग्रहः । "ब्रह्मार्पणं ब्रह्म हविः" इत्यत्र यच्छ्रीमन्माध्व आह "सर्व्वमेतद्ब्रह्मेत्युच्यते तदधीनसत्त्वादिप्रतीतित्वान्न तु तत्स्वरूपत्वात्," तत्तु तत्र तथैव । अत्राहमित्यपरोक्षज्ञानेन त्वभेदविवक्षावशात् स्वरूपमेव ग्राह्यम्, शक्तिसन्निवेशेन यद्द्रव्यं न तु तत् । "अजस्रमुच्चरन्तं स्वम्" (यो, वा, १८।२६) इति न्यायेन तत्तद्द्रव्यादहमस्मीत्यवाक्याणीमुच्चरन्तमात्मानं साधकसन्निधावाविष्करोति परमात्मा, तेन च साधकस्य द्रव्यज्ञानमतीत्य तत्प्रत्यक्षज्ञानमुदेतीति तत्त्वम् । १६ ।

एकत्वेनोपासनाविषयमाह द्वाभ्यां पितेति, गतिरिति । अहमन्तर्यामी अस्य जगतः स्थिरचरस्य पिता जनयिता, माता जनयित्री, धाता

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतञ्चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥
त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।

फलविधाता, पितामहः पितुः पिता । अतः परमात्मनि जनकजननी-पालकादिदृष्ट्या साधक आत्मानं पुत्रभृत्यादित्वेन गृह्णन् भेदेन तं पश्यति । अहं वेद्यं पवित्रं पावनमित्यत्र वेद्यत्वेन पावनत्वेनात्मनो भेदः, ओङ्कारः जप्यत्वेनात्मनो भेदः, ऋक् साम यजुरिति वहिःस्थ-शास्त्रत्वेन ग्रहणादात्मनो भेदः । "शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः । तमृते परमात्मानं जन्तुः कः केन शास्यते ॥" (वि, पु, १अं, १७अ, २०श्लो) इत्यत्र शास्ता भेददर्शनमित्यन्यदेव । अहं गतिः प्राप्यस्थानम्, भर्त्ता पोषणकर्त्ता, प्रभुः, साक्षी पापपुण्यद्रष्टा, निवासः वासस्थानम्, शरणं शीर्य्यते दुःखमस्मिन्निति व्युत्पत्त्या प्रपन्ना-र्त्तिहरः, सुहृत् निर्निमित्तहितकृत् हितैषी, प्रभवत्यनेनेति प्रभवः स्रष्टा, प्रलीयन्तेऽनेनेति प्रलयः संहर्त्ता, तिष्ठन्त्यस्मिन्निति स्थानमाधारः, निधीयतेऽनन्तकालभोगयोग्यानन्तसम्पदस्मिन्निति निधानमनन्तसम्पद-धिकरणम्, अव्ययमविनाशि वीजं कारणम् । तत्तद्विशेषवशादात्मनो भेदोऽत्र बोध्यः । १७।१८ ।

वहुधोपासनविषयं विवृणोति तपामीति । हे अर्जुन, अहमन्त-र्यामी आदित्यरूपेण तपामि, वर्षं वृष्टिं निगृह्णामि प्रतिष्टभ्नामि, उत्सृ-जामि च प्रवर्षामि च । अमृतञ्च जीवनञ्च, मृत्युश्च मरणञ्च, सत् स्थूलं दृश्यं कार्य्यमिति श्रीमन्माध्वः, असत् सूक्ष्ममदृश्यञ्च कारणमिति श्रीमन्माध्वः, अहमन्तर्यामी । सूर्य्येन्द्रादीनां क्रतुभिर्याजनं तापवृष्टि-जीवनादिलाभाय मृत्य्वादिपरिहारायेति प्रथमन्तद्दृष्ट्या सदसच्छब्देन दृश्यादृश्यजगत् संगृह्य वहुधोपासनविषयमुक्तवानाचार्य्यः । १९ ।

वहुधोपासनं त्रैविध्यं सकाममिति तदेव प्रथममाह त्रैविद्या इति ।

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम् ॥२३॥

अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥२४॥

न खलु भगवति विद्यते किमपि वैषम्यं चेत्, तत्कथं साक्षाद्भगवदाराधने नित्यं तस्मिन् स्थितिः, अज्ञानतावशाद्देवतान्तरभजने पुनः पुनरवस्थान्तरमाप्राप्तिरिति। यदि स्वस्वकर्म्मानुसारिफलभोग एव नियमः, श्रद्धादीनां फलं तेषामवश्यप्राप्यम्, तत्कथं न तैस्तेषामुत्तमा गतिर्भवति, तदाह य इति। हे कौन्तेय, येऽपि भक्ता भजनशीलाः श्रद्धयान्विताः श्रद्धायुक्ताः अन्यदेवता भजन्ते, तेऽपि मामन्तर्यामिणमेव अविधिपूर्व्वकम्—अविधिरज्ञानमिति श्रीमच्छङ्करः, मोक्षापकं विधिं विनेति श्रीमच्छ्रीधरः, विधिरभेदबुद्धिस्तद्राहित्यादिति श्रीमन्नीलकण्ठः, मत्प्रापकं विधिं विनेति श्रीमद्विश्वनाथः—यजन्ति। यं नियममाश्रित्य भजनेन साक्षाद्भगवत्प्राप्तिस्तमनादृत्य क्षुद्रविषयकामनया देवतान्तरं भजन्ते तेऽतः क्षुद्रफललाभ एव तेषाम्। मामेव यजन्तीत्युक्त्या भगवत्सम्मतेऽर्च्चनीयदेवतान्तरं नास्तीति सूचितमाचार्य्येण। अतएवाह श्रीमच्छ्रीधरः—"त्वद्व्यतिरेकेण वस्तुतो देवतान्तरस्याभावादिन्द्रादिसेविनोऽपि त्वद्भक्ता एव" इति। वेदेषु या इन्द्रादिदेवता गीयन्ते, तासां स्वरूपतो भगवतोऽभेद एव तत्र वर्णितः, केवलं विविधाभिधानैः विधै-तिहासिकघटनाभिश्च संयोगवशाद्भिन्ना देवता इति प्रतिभासनेन तद्रूपेण ग्रहणात् तुच्छफलप्रार्थनेन चाविधिपूर्व्वकत्वमाराधनायास्तासाम्। २३।

यदि भगवन्तमेव ते यजन्ति कथं तेषां न भवत्युत्तमा गतिस्तदेव स्वयमाचार्य्यः स्पष्टं कथयति अहमिति। अहमन्तर्यामी सर्व्वयज्ञानां भोक्ता च स्वीकर्त्ता च, प्रभुश्च फलदाता च। तत्त्वेन यथावत् ते तु

यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्॥२५॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥२६॥
यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥२७॥

मामन्तर्यामिणं नाभिजानन्ति, अतस्ते च्यवन्ति अवस्थान्तरतां भजन्ति । २४ ।

अविधिविधिपूर्व्वकभजनस्य गतिप्रकारमाह यान्तीति । देवव्रता देवयजनशीला देवान् यान्ति प्राप्नुवन्ति, पितृव्रताः श्राद्धादिक्रियापराः पितॄन् यान्ति प्राप्नुवन्ति, भूतेज्याः विनायकादिपूजकाः भूतानि विनायकादीनि यान्ति प्राप्नुवन्ति, मद्याजिनो मामन्तर्यामिणं पूजयन्तो मां यान्ति प्राप्नुवन्ति । २५ ।

न च भगवतः किञ्चित्प्रयोजनमस्ति, तत्कथं पूजाग्रहणम् ? भक्तानुग्रहार्थमिति चेत्, किमत्र तद्व्यग्रहणमथवा स्वीकारमात्रम् "न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ते" इति श्रीमन्मधुसूदनधृता श्रुतिः स्वीकारमात्रमेव दर्शयति, तत्स्वीकारमेवमाहाचार्य्यः पत्रमिति । यो मे मह्यं पत्रं पुष्पं फलं तोयं भक्त्या प्रयच्छति ददाति, प्रयतात्मनः शुद्धबुद्धेः निष्कपटहृदयस्य भक्त्युपहृतं तदहम् अश्नामि गृह्णामि स्वीकरोमि । शुद्धभक्ताः पुनः तस्मिन् सर्व्वमर्पयन्तो भुञ्जते । तदनन्तरपद्ये वक्ष्यते । २६ ।

कथं भक्त्या प्रदत्तं भगवान् स्वीकरोति ? भक्तानुग्रहायेत्युक्तम् । अधुना सर्व्वं तस्मिन्नर्पणमेव भक्तानां कर्त्तव्यमिति व्यपदेशमुपदिशति यदिति । हे कौन्तेय, यत् शास्त्रीयं लौकिकं वा कर्म्म करोषि आचरसि, यत् अदनादि अश्नासि भुङ्क्षे, यत् जुहोषि हवनं निर्व्वर्त्तयसि, यत् हिरण्यादिकं ददासि प्रयच्छसि, यत् उपवासादिकं तप-

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८॥

खादसि, तपस्यसि, तत्सर्वं मदर्पणं मय्यर्पितं यथा स्यात् तथा कुरुष्व —"आत्मनेपदेन समर्पकनिष्ठमेव समर्पणफलम्" इति श्रीमन्मधुसूदनः। लौकिकं शास्त्रीयं वा निखिलं कर्म भगवत्यर्पणं दर्शयति, न किञ्चिदपि कर्म तुच्छमस्ति। कायमनोवाग्भिर्यदेव करोति पुरुषः, तदेव सुखाय दुःखाय वा भवति तस्य। "यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम्। स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥" (१८।४६) इत्युक्तरीत्या "अवश्यम्भाविनां कर्म्मणां मयि परमगुरौ समर्पणमेव मद्भजनं न तु तदर्थं पृथग्व्यापारः कश्चित् कर्त्तव्यः" इति यदस्य पद्यस्याभिप्रायस्तेन निष्पन्नं श्रीमन्मधुसूदनेन तत्सिद्धं भवति। श्रीमद्विश्वनाथस्त्वस्य समर्पणव्यापारस्योत्कृष्टतमतां न स्वीकरोति, "अनन्या भक्तिर्हि कृत्वापि न भगवत्यर्प्यते किन्तु भगवत्यर्पितैव क्रियते" इति युक्त्या मदर्पणमित्यस्य यदा 'मह्यं समर्पय' इत्यर्थो निष्पन्नो भवति, तदा "नारायणायेति समर्पयेत्" (भा, ११स्क, २अ, ३६श्लो) इति रीत्या कृत्वा समर्पणं भवति, 'यथा मयि समर्पितं भवति तथा कुरु' इति श्रीमद्रामानुजादिभिर्निष्पन्नं व्याख्यानं दर्शयति, यदिदं कर्म्मानुष्ठीयते तद्भगवदाज्ञापालनमिति बुद्ध्या तत्कर्म्मानुतिष्ठति भक्तः, इदमेव गीतासम्मतं कर्म्मसमर्पणम्। कायमनःप्राणादिकं सर्व्वं भगवति समर्प्यार्पितैस्तैः कर्म्मसाधनं भगवत्प्रेरणयैव यदा भवति, तदा स्वतोऽर्पितत्वात् तदर्पणसंज्ञां न भजते। एतत्सिद्धस्य, तत्तु साधकस्येति विशेषः। कतिषु क्रियासु सिद्धेऽपि क्रियाणामानन्त्यात् सिद्धस्यापि साधकावस्था न सर्व्वथा तिरोधत्ते। अतः कर्म्मसमर्पणव्यापारस्य न घटते पुनरनित्यत्वम्। एवं सति सिद्धस्यासिद्धस्य को वा विशेष इति न वक्तव्यम्, कतिषु क्रियासु सिद्धे समर्पणव्यापारो न प्रयत्नसाध्यस्तिष्ठति। ततो न कतिषु सिद्धत्वमकिञ्चित्करम्। २७।

एवं कर्म्मसमर्पणे यद्भवति तदेवाहाचार्य्यः शुभेति। एवं मय्यन्त-

समोऽहं सर्व्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥

यौमिरपि कर्म्मसमर्पणेन शुभाशुभफलैः शुभाशुभफले इष्टानिष्टफले येषां तैः कर्म्मबन्धनैः मोक्ष्यसे विमुक्तो भविष्यसि। जीवन्नेव विमुक्तः सन् सन्न्यासयोगयुक्तात्मा सन्न्यासो भगवति कर्म्मसमर्पणं स एव योगः तेन युक्त आत्मा चित्तं यस्य स त्वं मामन्तर्यामिणमुपैष्यसि प्राप्स्यसि। भगवत्यनर्पितकर्म्मैव बन्धनकारणम्, अर्पितात्मा सदाज्ञापालनाय कर्म्मानुष्ठानमहंममभावाभावात् जीवन्मुक्तेर्हेतुः। ननु कुत्र योगत्रयमिलनम्? भगवत्यर्पणे भगवज्ज्ञानस्यावश्यकत्वादर्पणस्य तु भक्तिव्यापारत्वात्, न पुनर्योगत्रयस्यैकीभावो बाध्यते। अस्यैकीभावस्यैव प्राधान्यमस्मिन् शास्त्र इति पुनः पुनरुक्तम्। २८।

एवं भक्तानुग्रहशीलस्य भगवतो न वैषम्यं तदेवाह सम इति। अहमन्तर्यामी सर्व्वभूतेषु सर्व्वेषु प्राणिषु समः तुल्यः वैषम्यविहीनः, न मे मम द्वेष्योऽस्ति न प्रियोऽस्ति, ये तु मां भक्त्या भजन्ति, मयि ते, तेषु च अपि अहम्। किमिदं न वैषम्यम्? न। कथम्? 'मयि ते तेषु चाप्यहम्' इति वचनमात्मनस्तेषां भक्तिनिर्म्मलमनःपथगतत्वमेव व्यनक्ति, न तु कस्यापि परित्यागेनान्यस्य ग्रहणम्; तस्यासम्भवं सर्व्वगतत्वात्। विद्यमानमपि वस्तु यथा दृग्दोषान्न दृग्विषयं भवति, तथा भगवान् नित्यसन्निहितोऽप्यभक्तानां न नयनगोचरो भवतीति तेषामेव दृष्टिदोषः, न भगवतो वैषम्यम्। आह च श्रीमद्गिरिः—"तेनैव भजनेनाचिन्त्यमाहात्म्येन परिशुद्धबुद्धयो मयि मत्समीपे वसन्ते मदभिव्यक्तियोग्यचित्ता भवन्ति" इति। "सर्व्वेष्वाविषमेऽपि मयि स्वाश्रितवात्सल्यलक्षणं वैषम्यमस्ती"ति वैष्णवसिद्धान्तो न विचारसहः। सर्व्वत्र वात्सल्ये समेऽपि तदनुभवसामर्थ्यस्य तारतम्यादनुग्रहोपलब्धेस्तारतम्यं घटते। वात्सल्यं पुनस्तदेव नियहत्वेनानुभूयते, यदा पापवासनाकृतविकारवशात् स्वकल्याणमकल्याणमिव प्रतिभाति। युक्तमुक्तं श्रीमन्मधुसूद-

अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥३०॥
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥३१॥

नेन—"यथा हि सर्व्वत्र विद्यमानेऽपि सावित्रः प्रकाशः स्वच्छदर्पणादावेवाभिव्यज्यते, न त्वस्वच्छे घटादौ, तावता न दर्पणे रज्यति, न वा द्वेष्टि घटम्, एवं सर्व्वत्र समोऽपि स्वच्छे भक्तचित्तेऽभिव्यज्यमानोऽस्वच्छे चाभक्तचित्ते नाभिव्यज्यमानोऽहं न रज्यामि कुत्रचित्, न वा द्वेष्मि कञ्चित्। सामग्रीमर्य्यादया जायमानस्य कार्य्यस्यापर्य्यनुयोज्यत्वात् वह्निवत् कल्पतरुवच्चावैषम्यं व्याख्येयम्" इति। २९।

पापीयसामपि भगवद्भजनेऽधिकारोऽस्त्यन्यथा तेषां चिरानिर्म्मोक्षः प्रसज्येत, भगवति च सर्व्वशक्तौ स्वकृतमर्य्यादाभङ्गश्च, यतः स्वेच्छया तान् सोऽसृजत्तेषामनुमोदनमनपेक्ष्यैव। अतएव तेषां मोक्षोपायमाहाचार्य्यः द्वाभ्याम् अपि चेदिति, क्षिप्रमिति। सुदुराचारोऽतिविगर्हितकर्म्मा अपि चेत् अनन्यभाक् अन्यं न भजतीत्यनन्यभाक् अनन्यभक्तिर्देवतान्तरभजनमकुर्व्वन् मामन्तर्यामिणं भजते स साधुरेव प्रागसाधुरपि साधुरेव मन्तव्यः। कथम्? हि यस्मात् स सम्यग्व्यवसितः, सम्यक् शोभनं व्यवसितः निश्चितः साधुनिश्चयवान्। न केवलं स शोभनमध्यवसायं कृतवान्, क्षिप्रं स धर्म्मात्मा सदाचारनिष्ठमना भवति, शश्वच्छान्तिं शाश्वतीमपुनरावर्त्तिनीं शान्तिमुपशमं दुराचारोपरमम्—मत्प्राप्तिविरुद्धाचारनिवृत्तिमिति श्रीमद्रामानुजः चित्तोपप्लवोपरमरूपां परमेश्वरनिष्ठामिति श्रीमच्छ्रीधरः, शश्वत् पुनः पुनरनुतप्यन् मत्स्मृतिप्रतिकूलात्तस्माच्छान्तिं निवृत्तिं नितरां गच्छतीति श्रीमद्बलदेवः, विषयभोगस्पृहानिवृत्तिमिति श्रीमन्मधुसूदनः—निगच्छति प्राप्नोति। ननु दृश्यते, कश्चिद्भजनशीलोऽपि चिराभ्यस्तपापं न हातुं शक्नोति, जीवनान्तपर्य्यन्तं तत्पापं तदुपरि स्वप्रभुत्वं विस्तृणोति। एवं सति कथं

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥३२

सिध्यति, 'क्षिप्रं स धर्म्मात्मा भवति' इत्यादि । न हि पापं नित्य-
कालस्थायि ; स्वविनाशस्य बीजं वक्षसि कृत्वैव तदुदेति, तद्यथा
क्रोधः स्वस्यालम्बनमुन्मूलयन् स्वयं विध्वंसते, न तथा प्रेमा ; स तु
स्वस्यालम्बनस्य स्थायितां काङ्क्षति च नित्यकालं स्थायितां लभते ।
यद्येवं, भगवत्समुद्दिश्यानुष्ठितं किञ्चिदपि न जातु क्षयमुपगच्छति,
तद्यथाजामिलस्य यौवनारम्भेऽनुष्ठितः सदाचारो भ्रंशावस्थायां तस्मिन्
गूढ़रूपेण निवसन् विपत्काले स्वशक्तिमाविष्कुर्वन् तमनुतप्तं योगानु-
ष्ठाने स्थिरप्रतिज्ञं कृतवान्, तेन च तस्य मोक्षलाभोऽभवत् । अत
एवाह, हे कौन्तेय, विस्तृतजनसंसदि साक्षित्वेनोपस्थाय प्रतिजानीहि
निश्चितां प्रतिज्ञां कुरु, मे ममान्तर्यामिणो भक्तो न प्रणश्यति, दुर्गतिं
नाप्नोति । यद्यपि सर्व्वान्तर्यामिण एवेयं प्रतिज्ञा जनहृदये नित्य-
प्रतिष्ठिता, तथापि पापाक्रान्तहृदये तस्या अनभिव्यज्यमानत्वान्न तत्र
तस्याः क्रियाकारित्वम्, अतएव ये पापाचारात् प्रतिनिवृत्तां मतिञ्च
लब्धवन्तः, तेषां तद्घोषणमेव निराशचित्तानामाशासञ्चारकमिति तथैव
भगवन्मुखवाणीमुद्घोषयदाचार्य्यः । ३०।३१ ।

कुलगतदोषहीनानां दुराचाराणां सद्गतिमुक्त्वाधुना वंशपरम्परया
सदोषा आत्महीना ये तेषामपि भगवदाश्रयणादुत्तमा गतिर्भवतीत्याह
मामिति । हे पार्थ, येऽपि पापयोनयः पापजन्मानः निकृष्टवंशो-
त्पन्नाः, स्त्रियः स्त्रीप्रज्ञावत्यः न तु ब्रह्मवादिन्यः, वैश्याः कृष्यादि-
मात्ररताः न तु शास्त्रानुचिन्तकाः, शूद्रा नीचवृत्तिकाः शोच्या न
तु दासीगर्भजनारदवत् भगवद्गुणश्रवणकीर्त्तनरताः, तेऽपि मामन्त-
र्यामिणं व्यपाश्रित्याश्रयत्वेन गृहीत्वा परां प्रकृष्टां गतिं यान्ति
प्राप्नुवन्ति । ३२ ।

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्॥३३॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥३४॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजगुह्ययोगो नाम नवमोऽध्यायः।

निकृष्टवंशजन्मानो यदि प्रकृष्टां गतिं लभन्ते किं पुनरुत्तमवंशजानामित्याह किं पुनरिति। किं पुनः पुण्याः पुण्ययोनयो भक्ता ब्राह्मणास्तथा राजर्षयो राजानश्च परां गतिं लभन्ते इति वक्तव्यम्। अतस्त्वं राजर्षिकुले जातः इममनित्यमशाश्वतमसुखं दुःखनिलयं लोकं प्राप्य मामन्तर्यामिणं वक्ष्यमाणनियममाश्रित्य भजस्व। ३३।

कथं भजनीयं तदाह मन्मना इति। मन्मनाः मयि मनो यस्य तव स त्वं मन्मना भव, संसारिणां मनो हि विषयनिविष्टं, तव तु मय्यन्तर्यामिणि भवतु तत्, एतेन ज्ञानयोगो भवेत्युक्तम्; मद्भक्तो मद्भजनशीलो भव, एतेन भक्तियोगो भवेत्युक्तम्; मद्याजी मद्यजनशीलो भव, एतेन कर्मयोगो भवेत्युक्तम्। मन्मना मद्भक्तो मद्याजीति युगपदेकस्मिन् सम्भवत्यतो योगत्रयैक्यं न तु पृथक्त्वेन स्थितिरिति सिद्धम्। किमनेन भविष्यति? मत्परायणो मदेकाश्रयः सन् आत्मानं मनो युक्त्वा मामेवान्तर्यामिणमेष्यसि प्राप्स्यसि।

नवमाध्यायार्थसंग्रहे यदुक्तमस्माद्पथाश्रयिभिस्तस्य सारार्थो निबद्धः श्रीमच्छङ्करकृतगीतार्थसारसंग्रहे यथा—"मयि स्थितं जगत्सर्वं नाहं तत्रेति चोक्तितः। अधिष्ठानस्य सत्यत्वं मिथ्यात्वं कल्पितस्य हि॥ इत्युक्तं भगवता लोकदृष्ट्यैव तन्मतम्। स्वदृष्ट्या तु ह्यधिष्ठानं नाहमस्मीति सुस्थिरम्॥ सत्तास्फूर्त्तिप्रदत्वेन नियन्तृत्वेन संस्थितः। जीववत्सैव लिप्येत येन योगः स ऐश्वरः॥ तमेव दर्शयामास मायाशक्ति-

विजृम्भितम्। व्याख्यानादिसंयुक्तमष्टमं श्रुतियुक्तिभिः॥" इति। श्रीमच्छ्रीधरकृतसारसंग्रहो यथा—"निजमैश्वर्य्यमाश्चर्य्यं भक्तेश्चाद्भुतवैभवम्। नवमे राजगुह्याख्ये कृपयाबोचदच्युतः॥" इति। श्रीमद्बलदेवकृतसारसंग्रहो यथा—"पात्रापात्रधिया शून्या सर्वांत्सर्वाघनाशिनी। गङ्गेव भक्तिरेवेति राजगुह्यमिह स्मृता॥" इति। ३४।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये नवमोऽध्यायः।

दशमोऽध्यायः।

श्रीभगवानुवाच—

भूय एव महाबाहो शृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१॥

सप्तमे सङ्क्षेपतो भगवद्विभूतिरुक्ता, नवमे च "अहं क्रतुः" (९।१६) इत्यादिना। केवलं परमात्मत्वेन ग्रहणे न ज्ञानभक्त्यादेः परिपुष्टिर्भवति, अतो भगवदैश्वर्य्यदर्शनं स्वरूपज्ञानदृढीकरणाय भवतीति तदर्थमध्यायस्यास्यारम्भः। "सप्तमेऽध्याये भगवतस्तत्त्वं विभूतयश्च प्रकाशिता नवमे च" इति श्रीमच्छङ्करोक्तौ किमिदं तत्त्वं विभूतिश्चेत्यपेक्षा श्रीमता गिरिणोक्तं—"तत्त्वं सोपाधिकं निरुपाधिकञ्च, विभूतयः सविशेषनिर्विशेषप्रतिपत्त्युपयोगिन्यः" इति। "अथेदानीं येषु येषु भावेषु चिन्त्यो भगवांस्ते भावा वक्तव्याः" इत्यत्र तेनोक्तम—"वक्तव्याः सविशेषध्याने, निर्विशेषप्रतिपत्तौ शेषत्वेन" इति। श्रीमता शाण्डिल्येन "तामैश्वर्य्यपरां काश्यपः परत्वात्। २९।" "आत्मैकपरं बादरायणः। ३०।" "उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्यः। ३१।" इत्युक्त्वा स्वीकृताप्यैश्वर्य्यविशिष्टपरमात्मोपासना विभूति[illegible]ये तेनोक्तम्—"प्राणित्वान्न विभूतिषु। ५०।" इति। "वृष्णीनां वासुदेवोऽस्मि" (१०।३७) इति विभूतिषु वासुदेवस्योल्लेखः स परिहृतो ब्रह्मण आकारमात्रत्वात् स एव परब्रह्मेति प्रत्यभिज्ञानात्। वस्तुतस्तु सर्व्वत्र ब्रह्मदर्शनसहायार्थं विभूतिकीर्त्तनम्। वृष्णिवंशावतंसवसुदेवतनयो भगवत्स्वरूपाविर्भावभूमिरिति तास्तु तस्योल्लेख इति तत्त्वम्। श्रीमद्गिरिणोद्भावितं सविशेषनिर्विशेषादितत्त्वमुपरिष्टाद्विचारणीयम्। इह [illegible]ाचार्य्यः प्रपन्नायार्ज्जुनाय भगवदैश्वर्य्येषु तद्दर्शननिष्पत्तये भूयो वदति भूय एवेति। हे महाबाहो, प्रीयमाणाय मद्वचःश्रवणे प्रीतिं

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणाञ्च सर्व्वशः ॥२॥
यो मामजमनादिञ्च वेत्ति लोकमहेश्वरम् ।
असंमूढ़ः स मर्त्त्येषु सर्व्वपापैः प्रमुच्यते ॥३॥

क्रियते ते तुभ्यमहमन्तर्यामी हितकाम्यया हितकाङ्क्षया यत् वक्ष्यामि, तद्भूय एव पुनरपि पूर्व्वं सङ्क्षेपत उक्तमपि, मे मम परमोत्कृष्टं तद्वचः शृणु। पुनः पुनः कथनेन वैरस्यमुत्पद्यते, यत्र प्रीतिस्तत्र तदेव मधुरतमं प्रतीयते । १ ।

यत् पूर्व्वमुक्तं कथन्तत् पुनर्वक्तुं तवोद्यम इति जिज्ञासामुद्भाव्य ज्ञानस्यास्य सुदुर्लभत्वमुखेन तदुत्तरमाह न मे इति। मे मम प्रभवं —नामरूपस्वरूपस्वभावादिकमिति श्रीमद्रामानुजः, विभूतिभिराविर्भावमिति श्रीमच्छ्रीधरमधुसूदनौ, अनादिदिव्यस्वरूपगुणविभूतिमत्तया वर्त्तनमिति श्रीमद्बलदेवः—प्रभावं शक्त्यतिशायित्वं तस्य पारमिति श्रीधरः सुरगणा देवगणा महर्षयो भृग्वादयो न विदुः न जानन्ति। कथम्? अहमन्तर्यामी सर्व्वशः सर्व्वप्रकारैः देवानां महर्षीणाञ्च आदिः कारणम्। यो हि यस्यादिः स तमतीत्य वर्त्तते, अतस्तद्विषयकं ज्ञानं पूर्णं ततः समुत्पन्नस्य न सम्भवतीति स्वयमहं तज्ज्ञानं वच्मि । २ ।

तज्ज्ञानमेव मोक्षसाधनमित्याह य इति। यो जनो मामन्तर्यामिणमजं जन्मरहितम् अनादिं नित्यकालविद्यमानं लोकमहेश्वरं लोकानां महान्तमीश्वरं वेत्ति जानाति, स मर्त्त्येषु मनुष्येषु असंमूढ़ः सम्मोहविवर्ज्जितः सर्व्वैः पापैः कलुषैर्विमुच्यते मुक्तो भवति। पद्यस्यास्याभिप्रायः श्रीमद्रामानुजेनैवं निर्णीयते ;—"लोके मनुष्याणां राजा इतरमनुष्यसजातीयः केनचित् कर्म्मणा तदाधिपत्यं प्राप्तः ; तथा देवानामधिपतिरपि, तथा ब्रह्माण्डाधिपतिरपि च संसारिसजातीयः तस्यापि भुवनत्रयान्तर्गतत्वात्, 'यो ब्रह्माणं विदधाति' इति श्रुतेश्च ;

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवोऽभावो भयञ्चाभयमेव च ॥४॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥

तथान्येऽपि ये केचन अणिमाद्यैश्वर्य्यं प्राप्तवन्तः । लोकमहेश्वरः कार्य्यकारणावस्थाद्यचेतनात् बद्धान्मुक्ताच्च चेतनादीशितव्यात् सर्व्वस्मात् निखिलहेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणगुणैकतानतया नियन्तृत्वैकस्वभावतया च विसजातीयः । इतरविसजातीयतया मोहवर्जितो यो वेत्ति सर्व्वपापैः प्रमुच्यते" इति । श्रीमद्बलदेवः श्रीमद्रामानुजमनुसृत्य विशेषणानां सार्थकतामेवमाह ;—"अजमित्यनेन प्रधानादचिद्वर्गात् संसारिवर्गाच्च भेदः ; आद्यस्य स्वपरिणामिनाऽन्यस्य देहजन्मना च जन्मित्वात् । अनादिमित्यनेन विशेषिते तु मुक्तचिद्वर्गाच्च भेदः तस्याजत्वमादिमदेव, देहसम्बन्धेन जन्मित्वस्य पूर्व्ववृत्तित्वात् । लोकमहेश्वरमित्यनेन नित्यमुक्तचिद्वर्गात् प्रकृतिकालाभ्याञ्च भेदः, तेषामनाद्यजत्वे सत्यपि लोकमहेश्वरत्वाभावात् । पुनरनादिमित्यनेन विशेषिते विधिरुद्राभ्याञ्च भेदः, तयोर्लोकमहेश्वरतायाः सादित्वात्, सर्व्वेश्वरेणैव तयोः सा" इति । ३ ।

सर्व्वलोकमहेश्वरात् मत्त एव बुद्ध्यादयो जीवानामित्याह बुद्धिरिति अहिंसेति द्वाभ्याम् । बुद्धिः—अन्तःकरणस्य सूक्ष्माद्यर्थानामवबोधनसामर्थ्यम् इति श्रीमच्छङ्करः श्रीमद्बलदेव-मधुसूदन-विश्वनाथाश्च, मनसा चिदचिद्वस्तुनिरूपणसामर्थ्यमिति श्रीमद्रामानुजः, कार्य्याकार्य्यविनिश्चय इति श्रीमन्माध्वः, सारासारविवेकनैपुण्यमिति श्रीमच्छ्रीधरः ; ज्ञानम्—आत्मादिपदार्थानामवबोध इति श्रीमच्छङ्करः श्रीमन्मधुसूदनश्च, चिदचिद्वस्तुविशेषविषयो निश्चय इति श्रीमद्रामानुजः श्रीमद्बलदेवश्च, प्रतीतिरिति श्रीमन्माध्वः, आत्मानात्मविवेक इति श्रीमद्विश्वनाथः, आत्मविषयमिति श्रीमच्छ्रीधरः ; असम्मोहः—प्रत्युत्पन्नेषु बोद्धव्येषु

कृत्येषु विवेकपूर्व्विका प्रवृत्तिरिति श्रीमच्छङ्करः, पूर्व्वं दृष्टशीतादृजता-देर्विसजातीयशुक्तिकादिवस्तुनि सजातीयताबुद्धिनिवृत्तिरिति श्रीमद्रा-मानुजः, व्याकुलत्वाभाव इति श्रीमच्छ्रीधरः, व्ययत्वाभाव इति श्रीम-द्बलदेवः, प्रत्युत्पन्नेषु बोद्धव्येषु कर्त्तव्येषु चाव्याकुलतया विवेकेन प्रवृत्ति-रिति श्रीमन्मधुसूदनः ; क्षमा—आक्रुष्टस्य ताड़ितस्य वा अविकृत-चित्ततेति श्रीमच्छङ्करः, मनोविकारहेतौ सत्यविकृतमनस्त्वमिति श्रीम-द्रामानुजः, सहिष्णुत्वमिति श्रीमच्छ्रीधर बलदेव विश्वनाथाः, आक्रु-ष्टस्य वा भीतस्य वा निर्व्विकारचित्ततेति श्रीमन्मधुसूदनः ; सत्यम्—यथादृष्टस्य यथाश्रुतस्य चात्मानुभवस्य परबुद्धिसंक्रान्तये यथैवोच्चार्य्य-माणा वागिति श्रीमच्छङ्करः, यथादृष्टविषयं भूतहितरूपवचनं तच्च सत्यं तदनुगुणमनोवृत्तिभिरीहाभिः प्रयतमनोवृत्तिप्रकारकमिति श्रीम-द्रामानुजः, यथार्थभाषणमिति श्रीमच्छ्रीधरविश्वनाथौ, यथादृष्ट-विषयं परहितभाषणमिति श्रीमद्बलदेवः, प्रमाणेनावबुद्धस्यार्थस्य तथैव भाषणमिति श्रीमन्मधुसूदनः ; दमः—बाह्येन्द्रियोपशमः वहिरिन्द्रिय-संयमः, सर्व्वबाह्यकरणानामनर्थविषयेभ्यो नियमनमिति श्रीमद्रामानुजः, इन्द्रियनिग्रह इति श्रीमन्माध्वः ; शमः—अन्तःकरणोपशमः अन्तःकरण-संयमः, परमात्मनिष्ठेति श्रीमन्माध्वः ; सुखम्—आह्लादः अनुकूलानु-भवजनितो मनसो हर्षः ; दुःखम्—सन्तापः प्रतिकूलानुभवजनितो मनसो विषादः ; भवः—उद्भवः, जन्म, सत्ता ; अभावः—तद्विपर्य्ययो मृत्युरसत्ता ; भयञ्च—त्रासश्च, आगामिदुःखदर्शनजं दुःखमिति श्रीम-द्रामानुजः श्रीमद्बलदेवश्च ; अभयम्—भयनिवृत्तिः ; अहिंसा—प्राणि-नामपीड़ा, परपीड़ानिवृत्तिः, परादुःखहेतुत्वमिति श्रीमद्रामानुजः ; समता—समचित्तता, आत्मनि सुहृत्सु विपक्षेषु चार्थानर्थयोः समम‌ति-त्वमिति श्रीमद्रामानुजः, रागद्वेषादिराहित्यमिति श्रीमच्छ्रीधरः ; तुष्टिः—सन्तोषः, पर्य्याप्तबुद्धिर्लाभेष्विति श्रीमच्छङ्करः, सर्व्वेषु लाभेषु तोषस्वभावत्वमिति श्रीमद्रामानुजः, अलंबुद्धिरिति श्रीमन्माध्वः, दैव-लब्धेन सन्तोष इति श्रीमच्छ्रीधरः, भोगेष्वेतावताऽलमिति बुद्धिरिति

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥६॥

श्रीमन्मधुसूदनः ; तपः—इन्द्रियसंयमपूर्वकं शरीरपीडनमिति श्रीमच्छङ्करः, शास्त्रीयसम्भोगसङ्कोच इति श्रीमद्रामानुजः, शास्त्रीयमार्गेण कायेन्द्रियशोषणमिति श्रीमन्मधुसूदनः ; दानम्—यथाशक्ति संविभाग इति श्रीमच्छङ्करः, स्वकीयभोग्यानां परस्मै उपादानमिति श्रीमद्रामानुजः, न्यायार्जितधनादेः पात्रेऽर्पणमिति श्रीमच्छ्रीधरः, स्वभोग्यस्य सत्पात्रेऽर्पणमिति श्रीमद्बलदेवः, देशकाले श्रद्धया यथाशक्त्यर्थानां सत्पात्रेऽर्पणमिति श्रीमन्मधुसूदनः ; यशः—धर्मनिमित्ता कीर्त्तिरिति श्रीमच्छङ्करः, गुणवत्तया प्रथितिरिति श्रीमद्रामानुजः, सत्कीर्त्तिरिति श्रीमच्छ्रीधरः ; अयशः—तद्विपरीतम् । भूतानां प्राणिनां यथोक्ता भावाः पृथग्विधाः पृथग्लक्षणा नानाविधा मत्तोऽन्तर्यामिन एव भवन्ति स्वकर्मानुरूपेणेति श्रीमच्छङ्करः, भावाः प्रवृत्तिनिवृत्तिहेतवो वृत्तयो मत्त एव मत्सङ्कल्पायत्ता भवन्ति, मच्छेषस्य भूतजातस्य सृष्टिस्थित्योः प्रवर्त्तयितारश्च मत्सङ्कल्पायत्तप्रवृत्तयः इति श्रीमद्रामानुजः, धर्माधर्मादिसाधनवैचित्र्येण नानाविधाः इति श्रीमन्मधुसूदनः । सत्त्वरजस्तमोगुणानुसारिणः पृथग्विधा भावा इति तत्त्वम् । ४।५ ।

न केवलं भावाः किन्तर्हि तद्भावसम्भूताः प्रजातन्तुविस्तारका ऋषिमनवः मदुत्पन्ना इत्याह महर्षय इति । महर्षयः सप्त भृग्वादयः, तेभ्योऽपि पूर्वे चत्वारो महर्षयः सनकादयः, तथा मनवः स्वायम्भुवादयश्चतुर्दश मद्भावा मत्सामर्थ्यार्पिताः मत्सङ्कल्पानुवर्त्तिन इति श्रीमद्रामानुजः, मच्चिन्तनपरा मद्भावनावशादाविर्भूता मामसानैश्वर्यशक्तय इति श्रीमन्मधुसूदन-बलदेवौ, मय्येव भावो मनो येषामिति श्रीमन्नीलकण्ठः, —मानसा मनसोत्पादिताश्चित्स्वरूपप्रभवाः जाता उत्पन्नाः लोके येषामिमाः प्रजाः सन्ततयः । बुद्ध्यादयो भावा इत्युक्त्वा मद्भावा इति कथनात् भगवति प्रतिष्ठितेभ्यो नित्येभ्यस्तेभ्यो भावेभ्यः समुत्पन्नाः

एतां विभूतिं योगञ्च मम यो वेत्ति तत्त्वतः ।
सोऽविकल्पेन योगेन युज्यते नात्र संशयः ॥७॥
अहं सर्व्वस्य प्रभवो मत्त एव प्रवर्त्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥८॥

प्रज्ञानस्य प्रवर्त्तका इति गम्यते । अतएव तेषां केऽपि ज्ञानप्रधानाः, केऽपि तपःप्रधानाः, केऽपि क्षमाप्रधानाः, केऽपि सत्यप्रधाना इत्येवं-रूपाः । एते भावा एकस्य चित्स्वरूपस्यैव विलासाः, अतः सर्व्वे चित्स्वरूपप्रभवा एवेति तत्त्वम् । ६ ।

बुद्ध्याद्युपादानत्वेनैव ते बुद्ध्यादयो विभूतिर्भगवतस्तत्तदर्थसाधन-सामर्थ्यञ्च योगः । तस्या विभूतेस्तस्य च योगस्य ज्ञानात् विकल्प-वर्ज्जितयोगस्य प्राप्तिरित्याह एतामिति । एतां मम विभूतिम्—विस्तारमिति श्रीमच्छङ्करः, विविधा भूतिर्भवनं वैभवं सर्व्वात्मकत्व-मिति श्रीमच्छ्रीधरः, मदायत्तोत्पत्तिस्थितिप्रवृत्तिरूपामिति श्रीमद्रामा-नुजः, जगत्प्रपञ्चो मदधीनस्थितिप्रवृत्तिज्ञानैश्वर्य्यशक्तिको भवतीत्येवं पारमैश्वर्य्यलक्षणामिति श्रीमद्बलदेवः, बुद्ध्यादिमहर्ष्यादिरूपां विभूतिं विविधभावं तत्तद्रूपेणावस्थितिमिति श्रीमन्मधुसूदनः ; योगञ्च—युक्ति-रात्मनो घटनमथवा योगैश्वर्य्यसामर्थ्यमिति श्रीमच्छङ्करः, ईश्वरस्य तत्तदर्थसम्पादनसामर्थ्यमिति श्रीमच्छ्रीधरः, हेयप्रत्यनीककल्याणगुणाख्य-मिति श्रीमद्रामानुजः, अनाद्यजत्वादिभिः कल्याणगुणरत्नैर्मम सम्बन्ध-ञ्चेति श्रीमद्बलदेवः, तत्तदर्थनिर्म्माणसामर्थ्यं पारमैश्वर्य्यमिति श्रीमन्मधु-सूदनः,—यः तत्त्वतो यथावत् वेत्ति जानाति सोऽविकल्पेन अप्रकम्प्येन योगेन —सम्यग्दर्शनस्थैर्य्यलक्षणेनेति श्रीमच्छङ्करः, मद्भक्तियोगेनेति श्रीम-द्रामानुजः श्रीमद्बलदेवश्च, सम्यग्ज्ञानस्थैर्य्यलक्षणेन समाधिनेति श्रीम-न्मधुसूदनः, मत्तत्त्वज्ञानलक्षणेनेति श्रीमद्विश्वनाथः- युज्यते युक्तो भवति । ७ ।

कीदृशेन योगेन युज्यत इत्युच्यते अहमिति । अहं सर्व्वान्तर्यामी

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥९॥

सर्व्वस्य जगतः प्रभव उत्पत्तिहेतुः, सर्व्वं जगत् मत्तोऽन्तर्यामिनः प्रवर्त्तते चेष्टते क्रियावद्भवति इति मत्वा मामन्तर्यामिणं बुधाः पण्डिताः परमार्थतत्त्वज्ञाः भावसमन्विताः प्रीतियुक्ता मदनुध्यानपरायणा भजन्ते सेवन्ते । भावसमन्विता इत्यत्र भावो भावना परमार्थतत्त्वाभिनिवेशः तेन समन्विताः संयुक्ता इति श्रीमच्छङ्करव्याख्यानस्य व्याख्याने श्रीमद्गिरिराह,—प्रेमादरावभिनिवेशाख्यौ भवतस्तेन संयुक्तत्वञ्च भगवद्भजने भवति हेतुरिति । ८ ।

कथन्ते सेवन्ते तदाह मच्चित्ता इति । मच्चित्ता मयि निविष्टमनसो मत्स्मृतिपराः मद्रूपनामगुणलीलामाधुर्य्यास्वादेष्वेव लुब्धमनस इति श्रीमद्विश्वनाथः ; मद्गतप्राणा मयि गताः प्राप्ताः प्राणाश्चक्षुरादयो येषां ते मद्गतप्राणा मय्युपसंहृतकरणा इत्यर्थः, अथवा मद्गतप्राणा मद्गतजीवना इति श्रीमच्छङ्करः, मद्गतजीविता मया विना आत्मधारणमलभमाना इति श्रीमद्रामानुजः, मां विना प्राणान् धर्त्तुमक्षमा मीना इव विनाम्भ इति श्रीमद्बलदेवः, अहमेव गतो विद्यमानो येष्विति श्रीमन्नीलकण्ठः ; परस्परं बोधयन्तः—आचार्य्येभ्यः श्रुत्वा वादकथया परस्परं भगवन्तं सब्रह्मचारिणो बोधयन्तीति श्रीमद्गिरिः, परस्परं मद्रूपगुणलावण्यादि बोधयन्त इति श्रीमद्बलदेवः, विद्वद्गोष्ठीषु परस्परमन्योन्यं श्रुतिभिर्युक्तिभिश्च मामेव बोधयन्तः तद्बुभुत्सुकथा ज्ञापयन्त इति श्रीमन्मधुसूदनः, भक्तिस्वरूपप्रकारादिकं सौहार्द्देन ज्ञापयन्त इति श्रीमद्विश्वनाथः ; मां कथयन्तश्च—कथयन्तो ज्ञानबलवीर्य्यादिधर्म्मविशिष्टं मामिति श्रीमच्छङ्करः, आगमोपपत्तिभ्यां भगवन्तमेव विशिष्टधर्म्माणं शिष्येभ्यो गुरवो व्यपदिशन्तीति श्रीमद्गिरिः, मदीयानि दिव्यानि रमणीयानि च कर्म्माणि कथ॰ तः इति श्रीमद्रामानुजः, मां भक्तवात्सल्यनीरधिमतिविचित्रचरितं कथयन्त इति श्रीमद्बलदेवः,

तेषां सततयुक्तानां भजतां प्रीतिपूर्व्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥१०॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥११॥

स्वशिष्येभ्यो मामेव कथयन्त उपदिशन्तश्च, मद्रूपादिव्याख्यानेनोत्कीर्त्त-नादिकं कुर्व्वन्त इति श्रीमद्विश्वनाथ:, एवं स्मरणश्रवणकीर्त्तनलक्षणै-र्भजनै: सुपामेरिवेति श्रीमद्बलदेव:, मयि चित्तार्पणं तथा वाह्यकरणा-र्पणं तथा जीवनार्पणम् एवं समानानामन्योन्यं मद्बोधनं, स्वन्यूनेभ्यश्च मदुपदेशनमित्येवंरूपं यन्मद्भजनं तेनैवेति श्रीमन्मधुसूदन:, तुष्यन्ति च परितोषमुपयान्ति च—एतावतैव लब्धसर्व्वशब्दार्था वयम् अलमन्येन लब्धव्येनेत्येवंप्रत्ययरूपसन्तोषस्तं प्राप्नुवन्ति चेति श्रीमन्मधुसूदन:, तेन सन्तोषेण च रमन्ति च रमन्ते सुखमनुभवन्ति । ९ ।

एवं भजतां तत्त्वज्ञानोदय आह भगवदनुग्रहेण तेषामिति । तेषां सततयुक्तानां नियतयोगयुक्तानां भगवत्येकाग्रचित्तानां प्रीतिपूर्व्वकं प्रीति: प्रेम। तत्पूर्व्वकं भजतां सेवमानानां तं बुद्धियोगं बुद्धि: सम्य-ग्दर्शनं मत्तत्त्वविषयं तेन योगो बुद्धियोगस्तमिति श्रीमच्छङ्कर:, बुद्धि-रूपं योगमुपायमिति श्रीमच्छ्रीधर:, ज्ञाननिष्ठामिति श्रीमन्नीलकण्ठ: —सम्यग्दर्शनं ददामि, येन सम्यग्दर्शनेन ते मामन्तर्यामिणमुपयान्ति प्रतिपद्यन्ते । १० ।

कथं बुद्धियोगेन ते भगवन्तमुपयान्तीत्याह तेषामिति । तेषां भजतामेवानुकम्पार्थमनुग्रहाय आत्मभावस्थ:—आत्मनो भावोऽन्त:कर-णाशयस्तस्मिन्नेव स्थित इति श्रीमच्छङ्कर:, तेषां मनोवृत्तिविषयतया स्थित इति श्रीमद्रामानुज:, बुद्धिवृत्तौ स्थित इति श्रीमच्छ्रीधर:, अर-विन्दकोषे भृङ्ग इव तद्भावे स्थित इति श्रीमद्बलदेव:, आत्माकारान्त:-करणवृत्तौ विषयत्वेन स्थित इति श्रीमन्मधुसूदन:, अन्त:करणगृहं तत्स्थ इति श्रीमन्नीलकण्ठ:—हृदि स्थित: सन् भास्वता दीप्यमानेन

ज्ञानदीपेन विवेकप्रत्ययरूपेण अहमन्तर्यामी अज्ञानजं तमः मोहान्धकारं नाशयामि। एवं व्याख्यातवान् ज्ञानदीपं श्रीमच्छङ्करः—"भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्य्यादिसाधनसंस्कारवत्प्रज्ञावर्त्तिनापि विरक्तान्तःकरणाधारेण विषयव्यावृत्तचित्तरागद्वेषाकलुषितनिवातापवरकस्थेन नित्यप्रवृत्तैकाग्र्यध्यानजनितसम्यग्दर्शनभास्वता ज्ञानदीपेन" इति। साधने प्रवृत्तानां पूर्व्वसंस्कारवशात् कर्म्म कुर्व्वतां न जातु कृतार्थता स्यात् चेद्भगवदनुग्रहस्तेषामुपयोगीनि साधनान्यन्तर्नाविष्कुर्य्यात्। तदाविष्कृतानि च तान्यनुकृत्य सत्वरं कृतकृत्यतामुपयान्ति ते। एवं यावज्जीवं भगवतान्तःप्रकाशितेन ज्ञानालोकेनोत्तरोत्तरोर्द्ध्वभूमावारोहन्ति ते। तदालोकानुसरणाप्रमादित्वात् विच्युतिसम्भावना निरोधते, भगवति च नित्यं स्थितिर्भवति। अयमालोको ज्ञानदीपत्वेनात्र प्रेरणात्वेनच्च, तद्यथा—"तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥" (ऋक्सं ३म, ६२सू, १०ऋक्) इति। भक्तियामितहृदये त्वियं प्रेरणा भगवद्वाणीत्वेनात्मानमाविष्करोति, तद्यथा श्रीमन्नारदवर्णितस्ववृत्तान्ते—"तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आस्थितः। आत्मनात्मानमात्मस्थं यथाश्रुतमचिन्तयम्॥ ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा। औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः॥ प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः। आनन्दसंप्लवे लीनो नापश्यमुभयं मुने॥ रूपं भगवतो यत्तन्मनःकान्तं शुचापहम्। अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्मना इव॥ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः॥ एवं यतन्तं विजने मामाहागोचरो गिराम्। गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव॥ हन्तास्मिन् जन्मनि भवान्न मां द्रष्टुमिहार्हति। अविपक्वकषायाणां दुर्द्दर्शोऽहं कुयोगिनाम्॥ सकृद्यद्दर्शितं रूपमेतत् कामाय तेऽनघ। मत्कामः शनकैः साधुः सर्व्वान् मुञ्चति हृच्छयान्॥ सत्सेवया दीर्घया ते जाता मयि दृढा मतिः। हित्वाऽवद्यमिमं लोकं गन्ता मज्जनता-

अर्ज्जुन उवाच—

परं ब्रह्म परं धाम पवित्रं परमं भवान्।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥१२॥
आहुस्त्वामृषयः सर्व्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासः स्वयञ्चैव ब्रवीषि मे॥१३॥

स्मि॥ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित्। प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात्॥ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिङ्गमलिङ्गमीश्वरम्। अहञ्च तस्मै महतां महीयसे शीर्ष्णाऽवनामं विदधेऽनुकम्पितः॥ नामान्यनन्तस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन्। गां पर्य्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः॥" (भा, १स्क, ६अ, १६—२७श्लो) इति। ११।

एवं विभूतिं योगञ्च श्रुत्वाचार्य्यस्याविर्भूतस्वरूपत्वमनुभूयार्ज्जुन आह, परमिति आहुरिति। भवान् परं ब्रह्म परमात्मा, परं धाम प्रकाश आश्रयो वा, पवित्रं पावनं परमं प्रकृष्टम्। सर्व्वे ऋषयः देवर्षिर्नारदः, तथा असितो देवलो व्यासः त्वां पुरुषं, शाश्वतं सदैकरूपं, दिव्यं निखिलप्रपञ्चातीतम्, आदिदेवं देवानामादिभूतं स्वप्रकाशमादिकारणम्, अजं जन्मरहितम्, विभुं व्यापकं सर्व्वगतम्, आहुः। स्वयञ्च मे मह्यं त्वं ब्रवीषि,—"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च" (७।४) इत्यारभ्य "अहं सर्व्वस्य प्रभवो मत्तः सर्व्वं प्रवर्त्तते" (१०।८) इत्यन्तेन। पूर्व्वप्रतिपत्तिं विना न जात्वाविर्भूतस्वरूपत्वं प्रतीतिविषयं भवति, अन्यथा दौत्यकार्य्ये नियुक्त आचार्य्यो बन्धनोद्यतं दुर्य्योधनं सभामध्ये यद्घोररूपमदर्शयत्, न तेनाभक्तस्य तस्य तस्मिन् विश्वासः समुत्पन्नः, प्रत्युतैन्द्रजालिकत्वेन तमग्रहीत् सः। तद्यथा—"न माया ह्यैन्द्रजालं वा कुहका वापि भीषणाः। आत्तशस्त्रस्य संग्रामे वहन्ति प्रतिगर्ज्जनाः॥" (उ, प, १५९अ, २०श्लो); "सभामध्ये च यद्रूपं मायया कृतवानसि। तत्तथैव पुनः कृत्वा

सर्व्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥१४॥
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥१५॥

चार्ज्जुनो मामभिद्रव ॥" (उ, प, १५८अ, ५४श्लो) इति । सौहृद्य-वशादर्ज्जुनोऽपि न नियतमाचार्य्यं स्वरूपाविर्भावं प्रत्यक्षीकृतवान्, तथापि तस्मिन् नासीदपराधकृतः कोऽपि प्रतिबन्धस्तमनुभवविषयं चार्ज्जुन । १२।१३ ।

यदुक्तमाचार्य्येण तदन्तर्यामिणोक्तमिति ज्ञानाद्वदति स सर्व्वमिति । हे केशव, यत् मां वदसि, एतत् सर्व्वम् ऋतं सत्यं मन्ये । हे भगव-न्नन्तर्यामिन्, ते तव व्यक्तिमात्माविष्करणं—प्रभवमिति श्रीमच्छङ्करः, निरुपाधिकस्वभावमिति श्रीमद्धरिः, व्यक्तमप्रकारं प्रकाशप्रकारमिति श्रीमद्रामानुजः, परब्रह्मत्वादिगुणां श्रीमूर्त्तिमिति श्रीमद्बलदेवः, जन्मेति श्रीमद्विश्वनाथः,—देवा दानवाः परिमितज्ञानत्वात् न हि विदुः जानन्ति । १४ ।

परिमितज्ञाना देवा दानवा न जानन्तीति सम्भवति, त्वमात्मानं न जानास्यनन्तत्वादिति वादस्तु न समीचीन इत्याह स्वयमिति । हे पुरुषोत्तम, हे भूतभावन भूतानामुत्पादयितः, हे भूतेश भूतानां नियन्तः, हे देवदेव देवानामपि देवतम, हे जगत्पते, त्वं स्वयमेव आ-त्मानं वेत्थ जानासि । यद्येवं कथं सिध्यति भागवतस्येयमुक्तिः:—"द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि यदन्तराण्डनिचया ननु सावरणाः । ख इव रजांसि वान्ति वयसा सह यच्छ्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ॥" (भा, १०स्क, ८७अ, ४१श्लो) इति । व्याख्यातमिदं पद्यं श्रीमच्छ्रीधरेणैवम्—"हे भगवन्, ते अन्तं द्युपतयः स्वर्गादिलोकपतयो ब्रह्मादयो न ययुर्न प्रापुः । तत् कुतः ? यदन्तवद्वस्तु तत् किमपि त्वं न भवसि । आस्तां द्युपतयो न ययुरिति

यस्मात् त्वमपि आत्मनोऽन्तं न यासि। कुतस्तर्हि सर्व्वज्ञता सर्व्व-शक्तिता वा अत आह अनन्ततया अन्ताभावेन, न हि शशविषाणाज्ञानं सार्व्वज्ञ्यं तदप्राप्तिर्वा शक्तिवैभवं विहन्ति। अनन्तत्वमेवाह यदन्तरेति। यस्य तव अन्तरा मध्ये ननु अहो सावरणाः उत्तरोत्तरं दश-गुणसमावरणयुक्ता अण्डनिचया ब्रह्माण्डसमूहा वान्ति परिभ्रमन्ति वयसा कालचक्रेण खे रजांसीव सह एकदैव न तु पर्य्यायेण। किं यस्मादेवमतः श्रुतयः त्वयि फलन्ति तात्पर्य्यवृत्त्या पर्य्यवस्यन्ति, न तु साक्षादुदन्ययमेतावानिति, सगुणस्य गुणानन्त्यान्निर्गुणस्यागोचरत्वात् 'कथं तर्हि पदार्थे तात्पर्य्य'मिति? तत्र विधिमुखवाक्ये भवेदयं नियमः 'पदार्थस्यैव वाक्यार्थत्वम्' इति; निषेधमुखे तु नायं नियम इत्याह अतन्निरसनेनेति 'अन्यदेव तद्विदितात् अथो अविदितादधि, अन्यत्र धर्म्मादन्यत्राधर्म्मात्, अन्यत्रास्मात् कृताकृतात्,' 'अन्यत्र भूताच्च भव्याच्च यत् पश्यसि तद्वद', 'अथात आदेशो नेति नेति,' 'अस्थूलमनणु' इत्यादि-प्रकारेण, लक्षणया च 'तत्त्वमसि' इत्यादयः, पर्य्यवस्यन्ति। न च वाच्यं निषेधैः शून्यमेव ज्ञाप्यत इति यतो भवन्निधनाः भवति त्वयि निधनं समाप्तिर्यासां तास्तथा। न हि निरवधिर्निषेधः सम्भवति, अतोऽवधिभूते त्वयि फलन्तीत्यर्थः।" इति। नायं विरोधः;—यस्य नास्त्यन्तः, स जातु स्वस्यान्तं न जानातीति ज्ञानवत्त्वेव तस्य, नाज्ञा-नत्वम्। न मम कोऽप्यन्तो विद्यत इति ज्ञानन्त्वाज्ञानमेव। "इयं विसृष्टिर्यत आ बभूव यदि वा दधे यदि वा न। योऽस्याध्यक्षः परमे व्योमन्त्सो अपि वेद यदि वा न वेद॥" (ऋक्सं, १०म, १२९सू, ७ऋक्) इत्यत्र 'दधे यदि वा न', 'वेद यदि वा न वेद' इति वचनेन असतो जगतः सृजनमित्येकपक्षः, शक्त्यन्तर्निहितस्य तस्या-भिव्यञ्जनमिति द्वितीयः पक्षः; आत्मशक्तेः सामर्थ्यरतता प्रथमः पक्षः, शक्तेरनन्ततया तस्याः सामर्थ्यस्यान्तज्ञानवर्ज्जितत्वं द्वितीयः पक्षः—भविष्यद्दार्शनिकानां चिन्ताबीजमावपतीति न कोऽपि विरोधः। १५।

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥१६॥
कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन् मया ॥१७॥
विस्तरेणात्मनो योगं विभूतिञ्च जनार्द्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥१८॥

विनान्तर्यामिणोद्बोधनं तदभिव्यक्तिस्थानं न ज्ञातव्यमपुर्षि प्रति-भाति, अतस्त्वामेव पृच्छत्यर्ज्जुनो वक्तुमिति। दिव्या असाधारणा अद्भुता अप्राकृता या विभूतयोऽभिव्यक्तय ऐश्वर्य्याणि ता अशेषेण साम-स्त्येन वक्तुम् अर्हसि त्वमेव योग्योऽसि, याभिर्विभूतिभिर्विशेषप्रकाशे-रात्ममायामयविस्तरैस्त्वमिमान् लोकान् समग्रं विश्वं व्याप्य नियम्य तिष्ठसि। १६।

न तद्वचनं निरर्थकं, यतो भविष्यति तद्भगवच्चिन्तने सहाय इत्याह कथमिति। हे योगिन् विचित्रसामर्थ्यशालिन्, अघटनघटनपटीयः, त्वामन्तर्यामिणं सदा सततं परिचिन्तयन्ननुसन्दधानः केषु केषु च भावेषु चेतनाचेतनात्मकेषु वस्तुषु, हे भगवन्, मया चिन्त्योऽसि ध्येयो-ऽसि, कथमहं विद्यां विजानीयाम्। अत्र श्रीमन्नीलकण्ठः केषु केष्विति प्रश्नस्याभिप्रायमेवमुपावर्णयत्, "विश्वरूपदर्शनस्य दौर्लभ्यं मन्वानः कतिपयेष्वेव स्थानेषु भगवन्तं चिन्तयिष्यामि विश्वरूपदर्शनेऽधिकार-सिद्ध्यर्थमित्याशयेनाह केष्विति" इति। वस्तुतस्तु विभूत्युपवर्णनेन तदभिनिविष्टचेता विश्वरूपदर्शनेऽधिकारी सोऽभवत्। किमिदं विश्वरूपं तत्त्वमेकादशे वक्ष्यते। १७।

ननूक्ता विभूतिस्तत्कथं पुनस्तच्छ्रवणे तव निर्ब्बन्ध इत्याशयमुद्भाव्याह विस्तरेणेति। हे जनार्द्दन, हे जनानां शास्तः, आत्मनो योगं तत्त-द्वस्तुसम्पादनसामर्थ्यं कल्याणगुणरत्नैः सम्बन्धं—(१०।७) ऐश्वर्य्यमिति

श्रीभगवानुवाच—

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥१९॥

श्रीमन्नीलकण्ठः,— विभूतिश्चाभिव्यक्तिमैश्वर्य्यञ्च—नियमनमिति श्रीमद्रामानुजः, ध्यानावलम्बनमिति श्रीमन्मधुसूदननीलकण्ठौ—भूयः पूर्व्वमुक्तमपि विस्तरेण कथय, अमृतं वाक्यामृतं शृण्वतो मे मम तृप्तिरलंबुद्धिर्नास्ति। १८।

एवं स्पृष्टः सन्नाहाचार्य्यो हन्तेति। हन्तेदानीमनुकम्पायां सम्बोधने च। दिव्या असाधारणा अप्राकृता या विभूतयस्तास्ते तुभ्यमिदानीं प्राधान्यतः योगोपकारित्वात् प्राधान्येन, योगस्तु सङ्क्षेपेणेति शेषः, कथयिष्यामि। व्याख्यानमिदं श्रीमन्नीलकण्ठानुमोदितम्, प्राधान्यशब्देनोत्कर्षो विवक्षित इति श्रीमद्रामानुजः। हे कुरुश्रेष्ठ, मे मम विभूतीनामानन्त्यात् विस्तरस्य नान्तोऽस्ति, अतो या या बुद्धिगोचरीभविष्यन्ति ता एव वच्मि न तु सर्व्वाः, असम्भवात्। सत्यपि "प्राणित्वाच विभूतिषु। ५०।" इति श्रीमच्छाण्डिल्यकृतनिषेधे विभूतीनां भगवत्तया ध्येयत्वं स्वीकृतं श्रीमद्वैष्णवाचार्य्यैः, तद्यथा श्रीमद्विश्वनाथः "अत्र विभूतिशब्देन प्राकृताप्राकृतवस्तून्येवोच्यन्ते, तानि सर्व्वाण्येव भगवच्छक्तिसमुद्भूतत्वात् भगवद्रूपेणैव तारतम्येन ध्येयत्वेनाभिमतानि ज्ञेयानि" इति। अत्र श्रीमद्रामानुजः—"विभूतित्वं नाम नियम्यत्वं सर्व्वेषां भूतानां बुद्ध्यादयः पृथग्विधाः भावा मत्त एव भवन्तीत्युक्त्वा 'एतां विभूतिं योगञ्च मम यो वेत्ति तत्त्वतः' इत्युपादानात्। तथा तत्र योगशब्दनिर्द्दिष्टं श्रेष्ठत्वादिकं विभूतिशब्दनिर्द्दिष्टं तत्प्रवर्त्त्यत्वमिति; पुनश्च 'अहं सर्व्वस्य प्रभवो मत्तः सर्व्वं प्रवर्त्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥' इत्युक्तम्। तत्र सर्व्वभूतानां प्रवर्त्तनरूपं नियमनमात्मतयावस्थानादिसमर्थं योगशब्दनिर्द्दिष्टं सर्व्वेश्वरत्वम्" इति। वचनमिदमर्थयुक्तम्, न हि जातु नियम्यं आत्म-

अहमात्मा गुडाकेश सर्व्वभूताशयस्थितः ।
अहमादिश्च मध्यञ्च भूतानामन्त एव च ॥२०॥

विषयं भवितुमुचितं, तन्नियन्तैव तस्य विषयः। विभूतीनां कीर्त्तनन्तु भगवदाविर्भावदर्शनसहायार्थमिति तत्त्वम् । १९ ।

प्रथमन्तावत् सङ्क्षेपेण योगमाह अहमिति । हे गुडाकेश विजितनिद्र, सर्व्वभूताशयस्थितः सर्व्वेषां भूतानामाशयेऽन्तर्हृदि स्थितः— सर्व्वभूतो यो वैराजस्तस्याशये स्थित इति समष्टिविराडन्तर्यामी, सर्व्वेषां भूतानामाशये स्थित इति व्यष्टिविराडन्तर्यामी, इति श्रीमद्विश्वनाथबलदेवौ ; सर्व्वभूताशयस्थित इत्यत्र पदविश्लेषेण सर्व्वभूताशयः सर्व्वेषां भूतानामाशय एकीभावस्थानं, स्थितः अचल इति श्रीमन्नीलकण्ठः— अत्रत्यश्चायमर्थोऽहमन्तर्यामी आत्मा प्रत्यगात्मा । अहमन्तर्यामी आत्मत्वेन ध्येय इत्यर्थः । "न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः । आत्मत्वात् सर्व्वभूतानां सिद्धत्वादिह सर्व्वतः ॥" (भा, ७स्क, ६अ, १९श्लो) इति प्रह्लादोक्तन्यायेनानायाससाध्यत्वं ध्यानस्यास्य । आत्मन आत्मेति भावेन ग्रहणमनायाससाध्यत्वे हेतुः । "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः । ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥" (बृ, आ, उ, ४।४।१८) इति रीत्या आत्मन आत्मेति सिद्ध्यति । कथमहमिति निर्द्देशः ? कर्त्तृत्वसूचनायेत्युक्तम् । आत्मैव पारमार्थिकं पारमेश्वरं रूपं पश्चाद्वक्ष्यमाणन्तु सोपाधिकं का[illegible]नकमिति श्रीमद्गिरिः । अत्र श्रीमद्रामानुज आह,—"सर्व्वेषां भूतानां मम शरीरभूतानाम् आशये हृदये अहमात्मतयावस्थितः । आत्मा हि नाम शरीरस्य सर्व्वात्मनाधारो नियन्ता स्रष्टा च । तथा वक्ष्यते 'सर्व्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च', 'ईश्वरः सर्व्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति । भ्रामयन् सर्व्वभूतानि यन्त्रारूढानि मायया ॥' इति । श्रूयते च 'यः सर्व्वेषु भूतेषु तिष्ठन् सर्व्वेभ्यो भूतेभ्योऽन्तरो, यं सर्व्वाणि भूतानि न विदुः, यस्य सर्व्वाणि भूतानि शरीरं, यः सर्व्वाणि

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥२१॥

भूतान्यन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः' इति, 'स आत्मा अन्तर्याम्यमृत' इति च।" इति।

योगशब्देन श्रीमच्छीधरपादः "एतां विभूतिं योगञ्च मम" (१०।७) इत्यत्र "विश्वतोमुखे भगवति मनःसमाधानम्" इत्यर्थं पर्य्यवशीत्, तत्र रुचिरम्; अन्तर्यामिणो भगवति चित्तसमाधानस्यासम्भवात्, ममेति पदेन च विभूतियोगशब्दयोः समानसम्बन्धवशात् सम्बन्धविच्छेदेनार्थान्तरसाधनस्यायुक्तत्वात्। स तु 'सर्व्वभूताशयः' इत्यस्य 'सर्व्वभूतानामिकोभावस्थानम्' इत्यर्थं यश्चिच्छवान् स एव योगशब्दस्यान्तर्यामिपक्षे सुघट एव, "मयि सर्व्वमिदं प्रोतं सूत्रे मणिगणा इव" (७।७) इत्युक्तदिशा। विचित्रसामर्थ्यशालित्वमघटनघटनपटीयस्त्वं विस्पष्टयति—अहमेव भूतानामादिर्मध्यमन्तश्च उत्पत्तिस्थितिप्रलयहेतुः। आत्मत्वेन ध्यानं मुख्यं तदशक्तादैश्वर्य्यवत्त्वेन। न हि विभूतयो ध्यानविषयाः किन्तर्हि तेषु नियन्तृत्वेन परमात्मैव चिन्तनीयः। अतएवाह श्रीमच्छङ्करः—"प्रत्यगात्मा नित्यं ध्येयः, तदशक्तेन चोत्तरेषु भावेषु चिन्त्योऽहम्" इति। आह च श्रीमद्गिरिः—"सर्व्वकारणत्वेन सर्व्वज्ञत्वेन सर्व्वेश्वरत्वेन च परस्य ध्येयत्वमपेक्षितं नान्यस्य कस्यचित्कारणस्यादित्यादिषु ध्येयता।" इति। २०।

"यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्ज्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोऽंशसम्भवम्॥" (१०।४१) इत्युक्त्या भगवच्छक्तिविभवप्रकाशभूमेर्विभूतित्वसिद्धौ तत्प्रकाशाधिक्यक्रमेणैव तासां तारतम्यं मनसिकृत्य "आदित्यानामहं विष्णुः" इत्याद्यारभ्यते आचार्य्येण। "तेष्वेषु भगवान् राजंस्तारतम्येन वर्त्तते। तस्मात् पात्रं हि पुरुषो यावानात्मा यथेयते॥" (भा, ७स्क, १४अ, ३८श्लो) इत्यत्र सुव्यक्तमेतत्। आदित्यानामिति। आदित्यानां द्वादशसंख्यकानां मध्ये विष्णुरहमन्तर्यामी। आदित्या

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥२२॥

द्वादशसंख्यकाः, यथा विष्णुधर्म्मोत्तरे—"धाता मित्रोऽर्य्यमा रुद्रो वरुणः सूर्य्य एव च । भगो विवस्वान् पूषा च सविता दशमः स्मृतः । एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते ॥" इति । सर्व्वेषामादित्यानां कथं विष्णोः प्राधान्यमिति जिज्ञासायामेतेषां वैदिकदेवतानां स्थाननिर्णयं परिचिन्त्य दृश्यते, धात्रादीनां स्थानं ह्यन्तरिक्षं ; वरुणस्य स्थानमन्तरिक्षं द्युस्थानञ्चेति निर्द्दिष्टेऽपि "अन्तरिक्षे उदकमावृणोति" इति भाष्यवचनात् अन्तरिक्षमेव तस्य प्रधानं स्थानं, तथाच सविता— "सर्व्वकर्म्मणां वृष्टिप्रदानादिना सविता अभ्यनुज्ञाता" इत्युक्तत्वात्, "सूर्य्यादिदेवपत्न्यन्ता द्युस्थानदेवता" इति वचनात् भगोऽपि अन्तरिक्षस्थो देव एव ; सूर्य्यः, पूषा, मनुर्विवस्वदाख्यः, विष्णुः, एते द्युस्थानस्था देवाः । एषु सूर्य्यः "सर्व्वदैवोदयास्तमयौ प्रति ईर्य्यति" इति, पूषा "यदा रश्मिभिः परिपुष्टो भवति तदा पूषा" इति, मनुः "मननात् स्वाधिकारादेः" इति विष्णोर्न्यून एव । स हि "तीव्रैः रश्मिभिः सर्व्वत्र व्याविशति" इति तस्य प्राधान्यम् । यज्ञनामसु पठितो विष्णुरपि "विश्वेषामाप्नोति स्वगतः" इति भाष्यवचनात् न पुनः न तस्य प्राधान्यस्य क्वापि क्षतिः । ज्योतिषां प्रकाशकानामन्यानां मध्ये अंशुमान् चिररश्मियुक्तो रविः सूर्य्योऽहमन्तर्यामी, मरुतां सप्तसप्तकानां मध्ये मरीचिः अस्मि अहम् ; नक्षत्राणां मध्ये शशी चन्द्रमा अहम् । २१ ।

वेदानामिति । वेदानां मध्ये सामवेदोऽस्मि अहम् । यद्यपि ऋक्संहितोक्तानामृचामेव गेयत्वेन सामत्वं, तथापि तस्य निरतिशयेन चित्ताकर्षकत्वहेतोः श्रेष्ठत्वम् । देवानां मध्ये वासव इन्द्रोऽस्मि अहम् । वैदिकानां देवानां यद्यपि समत्वं परिलक्ष्यते स्वरूपसमालोचनया, तथापि लोके पुनरिन्द्रस्यास्मिन् भारते प्राधान्यमासीदित्युपनिवध्य वासी-

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥२३॥
पुरोधसाञ्च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥२४॥
महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥२५॥

ओऽत्रमस्मतै, चणापि तथैव। इन्द्रियाणां मध्ये मनोऽहम्। प्रेरकत्वात् भूतानां सम्बन्धिनी चेतना चाहम्। भूतेषु चिदभिव्यञ्जिकायाः चेतनायास्तन्माभिव्यक्तित्वात्ताद्गोक्तिः। २२।

रुद्राणामिति। रुद्राणामेकादशानां मध्ये शङ्करः अस्मि अहम्, यक्षरक्षसां मध्ये वित्तेशः कुवेरः अहम्, वसूनामष्टानां मध्ये पावकोऽग्निः अहम्, शिखरिणां पर्व्वतानां मध्ये मेरुः अहम्। २३।

पुरोधसामिति। हे पार्थ, पुरोधसां पुरोहितानाञ्च मध्ये मुख्यं प्रधानं बृहस्पतिं देवपुरोहितं मामन्तर्यामिणं विद्धि, सेनानीनां सेनापतीनां मध्ये स्कन्दो देवसेनापतिः अहम्, सरसां स्थिरजलाशयानां मध्ये सागरः समुद्रोऽस्मि अहम्। २४।

महर्षीणामिति। महर्षीणां मरीच्यादीनां सप्तानां मध्ये भृगुः अहम्, तस्यातितेजस्वित्वात्; गिरां वाचां मध्ये एकमक्षरमोङ्कारोऽस्मि अहम्, तस्य ब्रह्मवाचकत्वात्; यज्ञानां मध्ये जपयज्ञोऽस्मि अहम्, तस्य हिंसादोषशून्यत्वेनातिशोधकत्वादुपांशुजपेन च ध्यानसमत्वात्; स्थावराणां स्थितिमतां मध्ये हिमालयोऽहम्, उच्चशिखरवतां मध्ये मेरुरित्युक्तोऽत्र स्थितिमतां मध्ये हिमालय इत्युक्तत्वात् न पुनरुक्तिरिति व्याख्यातारः। योगिनिवासोऽयं हिमालयः स्थितिमत्त्वेनाचञ्चलत्वेन तेषां तद्भावमुद्दीपयतीति विशिष्टो ह्येष इति वयम्। २५।

अश्वत्थः सर्व्ववृक्षाणां देवर्षीणाञ्च नारदः।
गन्धर्व्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥२६॥
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्।
ऐरावतं गजेन्द्राणां नराणाञ्च नराधिपम् ॥२७॥
आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥२८॥
अनन्तश्चास्मि नागानां वरुणो यादसामहम्।
पितॄणामर्य्यमा चास्मि यमः संयमतामहम् ॥२९॥

अश्वत्थ इति। सर्व्ववृक्षाणां सर्व्ववनस्पतीनां मध्ये अश्वत्थः अहम्, तस्य छायादिदानेन बहुप्राणितर्पणात्; देवर्षीणाञ्च मध्ये नारदोऽहम्, तस्य भक्तश्रेष्ठत्वात्; गन्धर्व्वाणां मध्ये चित्ररथः, तस्य गायकश्रेष्ठत्वात्; सिद्धानां जन्मत एव ज्ञानवैराग्ययुक्तानां मध्ये मुनिः कपिलः अहम्, तस्य परमार्थतत्त्वप्रदर्शकत्वात्। २६।

उच्चैःश्रवसमिति। अश्वानां मध्ये अमृतोद्भवममृतनिमित्तमथनोद्भवम् उच्चैःश्रवसं मामन्तर्यामिणं विद्धि, गजेन्द्राणां मध्ये अमृतोद्भवमैरावतं मां विद्धि, नराणां मध्ये मां नराधिपं नरपतिं विद्धि। २७।

आयुधानामिति। आयुधानामस्त्राणां मध्ये वज्रम् अहम्, धेनूनां मध्ये कामधुक् कामानां दोग्ध्री अस्मि अहम्, प्रजनः प्रजोत्पत्तिहेतुः कामः अहम्, भोगवासनाचरितार्थतोद्देश्यकस्य भगवदिच्छाविरोधित्वात्तथोक्तिः, सर्पाणां सविषाणामेकशिरसां मध्ये सर्पराजः वासुकिः अहम्। २८।

अनन्त इति। नागानां निर्विषाणामनेकशिरसां मध्ये नागराजः अनन्तः शेषः अहम्, यादसां जलजन्तूनां राजा वरुणः अहम्, पितॄणां मध्ये अर्य्यमा अर्य्यमाख्यः पितृराजः अहम्, संयमतां दण्डदातॄणां मध्ये यमः अहम्। २९।

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणाञ्च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥३०॥

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसां चास्मि जाह्नवी ॥३१॥

सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्ज्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥३२॥

प्रह्लाद इति । दैत्यानां मध्ये प्रह्लादश्च अस्मि अहम्, तस्य परम-भक्तत्वात्; कलयतां—गणनं कुर्व्वतामिति श्रीमच्छङ्करस्तदनुयायि-नश्च, वशीकुर्व्वतामिति श्रीमच्छ्रीधरबलदेवविश्वनाथाः—मध्ये कालः अहम्, स हि गणनाहेतुः, तस्य हि वशे सर्व्वं वसन्तीति हेतोः; मृगाणां पशूनां मध्ये मृगेन्द्रः सिंहः अहम्; पक्षिणां मध्ये वैनतेयः गरुड़ः अहम् । ३० ।

पवतामिति । पवतां पावनानां वेगवतां वा मध्ये पवनः वायुः अहम्, तस्य सर्व्वसंशोधकत्वात्, शस्त्रभृतां मध्ये रामः दाशरथिः—परशुराम इति श्रीमद्बलदेवः—अहम्, अवताराणां मध्ये रामो दाश-रथिर्गणनीय इति पश्चवाह श्रीमन्मधुसूदनः,—"साक्षात्स्वरूपस्यापि अनेन रूपेण चिन्तनार्थं 'वृष्णीनां वासुदेवोऽस्मी'तिवदयं पाठः ।" आविर्भूतस्वरूपत्वेऽपि 'प्राकृतवैभवे' प्रकाशमानत्वात् विभूतिमध्ये गणन-मिति तत्त्वम् । झषादीनां मत्स्यानां मध्ये मकरः अस्मि अहम्, स्रोतसां प्रवाहोदकानां मध्ये जाह्नवी गङ्गा अस्मि अहम् । ३१ ।

सर्गाणामिति । हे अर्ज्जुन, सर्गाणामाकाशादीनाम् आदिः मध्य-मन्तश्च अहम्—"अहमादिश्च मध्यञ्च भूतानामन्त एव च" (१०।२०) इत्यत्र भूतानामित्यतो भेदः । विद्यानां मध्ये अध्यात्मविद्या आत्म-विद्या अहम्, तस्याः सर्व्वश्रेष्ठत्वात् । तथाहि "अपरा ऋग्वेदो यजु-र्व्वेदः सामवेदोऽथर्व्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिष-

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥३३॥

मिति । अथ परा यया तदक्षरमधिगम्यते ॥" (मु, उ, १।१।५) इति । आत्मविद्यया ब्रह्माधिगम इति तस्याः श्रेष्ठत्वे हेतुः । प्रवदतां वादिनां जल्पवितण्डे कुर्व्वतां मध्ये वादः अहम्, तत्त्वार्थनिर्णयहेतुत्वात् । वादजल्पवितण्डाविषये श्रीमच्छ्रीधरः—"यत्र द्वाभ्यामपि प्रमाणतस्तर्कतः स्वपक्षः स्थाप्यते परपक्षश्छलजातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम, यत्र त्वेकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैस्तत्पक्षं दूषयति न तु स्वपक्षं स्थापयति सा वितण्डा नाम कथा । तत्र जल्पवितण्डे विजिगीषमाणयोर्वादिनोः शक्तिपरीक्षामात्रफले ; वादस्तु वीतरागयोः शिष्याचार्य्ययोरन्ययोर्वा तत्त्वनिरूपणफलः ।" इति । तथाच यतीन्द्रमतदीपिकायाम् "वीतरागकथा वादः ; पक्षद्वयसाधनवती विजिगीषुकथा जल्पः ; स्वपक्षस्थापनहीना तु वितण्डा ; अविवक्षितशब्दार्थारोपणाद्दूषणं छलम् ; स्वव्याघाति दूषणं जातिः, असदुत्तरं जातिरिति वा ; पराजयहेतुर्निग्रहस्थानम्" इति । ३२ ।

अक्षराणामिति । अक्षराणां वर्णानां मध्ये अकारोऽस्मि अहम्, "अशेषाकारसंस्थितम्" इति तस्य स्वयं प्रच्छन्नस्याप्यशेषवर्णानामुच्चारणहेतुत्वात्, "अकारो वै सर्व्वा वाक्" इति श्रुत्युक्तन्यायादिति प्राहुः ; सामासिकस्य समाससमूहस्य मध्ये द्वन्द्वः द्वन्द्वसमासः अहम्, अत्र श्रीमन्नीलकण्ठ आह—"सामासिकस्य समाससमूहस्य मध्ये द्वन्द्वोऽस्मि, उभयपदप्रधानत्वादिति प्राहुः ; युग्ममेकत्रासनं समासो विदुषां वा गुरुशिष्याणां मन्त्रार्थकथनार्थं वा एकत्रावस्थानं, तत्र विदितमर्थजातं सामासिकं·······तस्य मध्ये द्वन्द्वो रहस्योऽर्थोऽहम्—'द्वन्द्वं रहस्ये'ति सूत्रे द्वन्द्वशब्दस्य रहस्यवाचित्वं शाब्दिकप्रसिद्धम्" इति । अक्षयः निरवच्छिन्नः—'कालः कलयता'मित्यत्र क्षणमुहूर्त्तादिपरिच्छेदयुक्त इति भेदः—कालः अहम्, "संहर्तॄणां मध्येऽक्षयः कालः

मृत्युः सर्व्वहरश्चाहमुद्भवश्च भविष्यताम्।
कीर्त्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥३४

सङ्कर्षणमुखाग्निः कालाग्निः" इति श्रीमद्बलदेवः ; "महाकालो रुद्रः" इति श्रीमद्विश्वनाथः; कर्म्मफलदातृणां मध्ये विश्वतोमुखो धाता कर्म्मफलस्य विधाता अहम्। ३३।

मृत्युरिति। मृत्यूनां मध्ये सर्व्वहरः सर्व्वस्मृतिविलोपकः प्रलयकालिकः सर्व्वसंहारकारी मृत्युः अहम्, भविष्यतां भाविनां भव्यानां विकाराणां मध्ये उद्भवो जन्म अहम्, भाविनां कल्याणानाम् उद्भवः उत्कर्षः अहम् इति श्रीमच्छङ्करस्तदनुयायिनश्च ; नारीणां मध्ये कीर्त्तिः श्रीः वाक् स्मृतिर्मेधा धृतिः क्षमा च अहम् — "अर्थो विष्णुरियं वाणी नीतिरेषा नयो हरिः। बोधो विष्णुरियं बुद्धिर्धर्म्मोऽसौ सत्क्रिया त्वियम्॥" इत्यारभ्यान्ते सङ्क्षेपेणोक्तम् "किञ्चातिबहुनोक्तेन सङ्क्षेपेणेदमुच्यते। देवतिर्य्यङ्मनुष्यादौ पुन्नाम्नि भगवान् हरिः। स्त्रीनाम्नि लक्ष्मीर्मैत्रेय नानयोर्विद्यते परम्॥" (वि, पु, १अं, ८अ, १९—३२श्लो) इति मूलमस्य वचनस्य। अत्र श्रीमन्मधुसूदनः—"नारीणां मध्ये कीर्त्तिः श्रीर्वाक् स्मृतिर्मेधा धृतिः क्षमेति च सप्त धर्म्मपत्न्योऽहमेव। तत्र कीर्त्तिर्धार्म्मिकत्वनिमित्ता प्रशस्तत्वेन नानादिग्देशीयलोकज्ञानविषयतारूपा ख्यातिः, श्रीर्धर्म्मार्थकामसम्पत्, शरीरशोभा कान्तिः, वाक् सरस्वती सर्व्वस्यार्थस्य प्रकाशिका संस्कृता वाणी, चकारात् मूर्त्त्यादयोऽपि धर्म्मपत्न्यो गृह्यन्ते, स्मृतिश्चिरानुभूतार्थस्मरणशक्तिः, अनेकार्थधारणाशक्तिर्मेधा, धृतिरवसादेऽपि शरीरेन्द्रियसङ्घातोत्तम्भनशक्तिः, उच्छृङ्खलप्रवृत्तिकारणेन चापलप्राप्तौ तन्निवर्त्तनशक्तिर्वा, क्षमा हर्षविषादयोरविकृतचित्तता, यासामाभासमात्रसम्बन्धेनापि जनः सर्व्वलोकादरणीयो भवति ; तासां सर्व्वस्त्रीषूत्तमत्वमतिप्रसिद्धमेव" इति। ३४।

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः॥ ३५॥

बृहत्सामेति। 'वेदानां सामवेदोऽस्मि' इत्युक्तम्। साम्नां मध्ये बृहत्साम इन्द्रस्तुतिरूपं "त्वामिद्धि हवामहे" इति ऋचि गीयमानम् अहम्, छन्दसां छन्दोविशिष्टानामृचां मध्ये गायत्री अहम्, द्विजत्वोत्पादकत्वात् सोमाहरणेन श्रेष्ठत्वादिति स्वामी। सोमाहरणकथैवं ब्राह्मणे श्रूयते,—सोमाहरणमिच्छद्भिर्देवैस्तदर्थं प्रेरितयो[illegible]र्जगती-च्छन्दसोरग्रगयोर्मार्गमध्ये जगत्या त्यक्तानि त्रीण्यक्षराणि त्रिष्टुभा चैकमक्षरम्। ततस्ते न्यूनाक्षरे भवतः अष्टचत्वारिंशदक्षरा जगती पञ्चचत्वारिंशदक्षरा, चतुश्चत्वारिंशदक्षरा त्रिष्टुप् त्रिचत्वारिंशदक्षरेति। ततो गायत्री रक्षकान् विजित्य सोममाहरत, त्यक्तानि चाक्षराण्याहरन्ती चतुरक्षरा साष्टाक्षरा संवृत्ता। पश्चाद्याचमाना स्वाक्षरैर्न्यूनैस्ते पूरयामास। तद्यथा—"चतुरक्षराणि ह वा अग्रे छन्दांस्यासुः। ततो जगती सोममच्छापतत्, सा त्रीण्यक्षराणि हित्वाजगाम; ततस्त्रिष्टुप् सोममच्छापतत्, सैकमक्षरꣳ हित्वाजगाम; ततो गायत्री सोममच्छापतत्, सैतानि चाक्षराणि हरन्त्यागच्छत् सोमं च, ततोऽष्टाक्षरा गायत्र्यभवत्। तस्मादाहुरष्टाक्षरा गायत्रीति।............ताꣳ ह त्रिष्टुबुवाच उप त्वाहमायानि, त्रिभिरक्षरैरुप मा ह्वयस्व, मा मा यज्ञादन्तर्गा इति, तथेति तामुपाह्वयत, तत एकादशाक्षरा त्रिष्टुबभवत्.........। ताꣳ ह जगत्युवाच उप त्वाहमायानि, एकेनाक्षरेण उप मा ह्वयस्व, मा मा यज्ञादन्तर्गा इति, तथेति तामुपाह्वयत, ततो द्वादशाक्षरा जगत्यभवत्.........। तदाहुः, गायत्राणि वै सर्व्वाणि भवन्ति, गायत्री ह्येतदुपसृजमानैदिति।" (श, प, ब्रा, ४।२।२।७—१०) इति; "गायत्री वा इदं सर्व्वं भूतं यदिदं किञ्च" (छा, उ, ३।१२।१) इति। मासानां मध्ये अभिनवशस्यसम्पत्सम्पन्नः मार्गशीर्षः अहम्, ऋतूनां मध्ये कुसुमाकरः वसन्तः तस्यातिरमणीयत्वात्। ३५।

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥३६॥

द्यूतमिति। छलयतां मिथो वञ्चनां कुर्व्वतां सम्बन्धि द्यूतं सर्व्व-स्वहरमस्मि अहम्—"यस्याहमनुगृह्णामि हरिष्यामि च तद्धनम्" इति न्यायात् सर्व्वस्वहरणमनुग्रह एवेत्यात्मनो द्यूतत्वनिरूपणम्। अत्र श्रीमच्छाण्डिल्यो विभूतिषु न परा भक्तिः कर्त्तव्येति निर्द्धार्य्याह "द्यूत-राजसेवयोः प्रतिषेधाच्च।" ५१। "केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया" (१०।१७) इत्यर्ज्जुनप्रश्नस्योत्तरे विभूतीराहाचार्य्यः; अतो द्यूतस्य नराधिपस्यापि च चिन्तनीयत्वमायाति। एवं विभूतीनां चिन्तने तत्र तत्राबद्धचेतास्तत्तद्गतदोषाणामास्पदं स्यादिति साधूक्तं श्रीमच्छाण्डिल्येन विभूतिषु परा भक्तिर्न कर्त्तव्येति। यदि श्रीम-च्छाण्डिल्योक्तसिद्धान्त एव सर्व्वथानुसरणीयः स्यात् प्रश्नस्य तदुत्तरे विभूतिवचनस्य च निरर्थकत्वमुपपद्येत। कं वा पन्थानमवलम्ब्य विभूतिषु चिन्त्यो भगवानिति निर्द्धारितो को वा परभक्तिविषयः, विभूतीनां वा तत्र कोपयोगिता स्फुटं प्रतिभास्यते। न हि विभूतयो भगवान्, तासु भगवान् स्वशक्त्याद्याविष्करणेन प्रकाशमान इति तच्छक्त्यादय एव तत्र चिन्तनीया न तु विभूतय इति सर्व्व-मनवद्यम्। न हि शक्त्यादिपरिचिन्तनेन साक्षाद्भगवान् परिचि-न्तितो भवतीति तत्तच्छक्त्यादयोऽहंशब्दवाच्यस्यान्तर्यामिण एवेति तत्त्वमुपलभ्य तन्मयः स एवाहंशब्देन सर्व्वासु विभूतिष्वाचार्य्येणोप-दिष्टः। अत्र द्यूतं सर्व्वस्वहरणं भगवदनुग्रहकृतमिति जानन् द्यूता-सक्तश्चेत् द्यूते तमन्तर्यामिणं पश्यतु, तस्मिंश्च चित्तं समादधातु, द्यूतासक्त्यतिक्रमणेन भगवद्भक्तो भविष्यतीति विभूतिष्वात्मनो द्यूत-त्वेनाक्षेपः। तेजस्विनां सम्बन्धि तेजः अहम्, जेतॄणां सम्बन्धी जयोऽस्मि अहम्, व्यवसायिनामुद्यमशीलानां व्यवसाय उद्यमोऽस्मि अहम्, सत्त्ववतां सात्त्विकानां सम्बन्धि सत्त्वं धर्म्मज्ञानवैराग्यैश्वर्य्य-

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥३७॥

बलं सत्त्वम्—बलिनां सत्त्वमस्मि बलमिति श्रीमद्बलदेवविश्वनाथौ—अहम्। ३६।

वृष्णीनामिति। वृष्णीनां यादवानां मध्ये वासुदेवः वसुदेवतनयोऽस्मि अहम्। अत्र श्रीमद्बलदेवः—वसुदेवतनयः सङ्कर्षण इति; श्रीमद्विश्वनाथः स्वार्थिकेनाणा वसुदेव इत्यर्थो निष्पन्नः। एवं कष्टसाध्येनार्थेन न तयोः कृतार्थता रामशङ्करयोरपि विभूतिषु परिगणनात्, श्रीमच्छाण्डिल्यादिभिश्च वासुदेवशब्देनोपदिष्टा श्रीकृष्ण एवेति निर्णीतत्वात्, स्वयञ्च तेन "अहं यूयमसावार्य्य इमे च द्वारकौकसः। सर्व्वेऽप्येवं यदुश्रेष्ठ विमृश्याः सचराचरम् ॥" (भा, १०स्क, ८५अ, २०श्लो) इत्युक्त्वात्मनो विभूतित्वं साधितम्। आविर्भूतस्वरूपत्वमस्येत्युक्तमस्माभिः। अत्र 'पाण्डवानां धनञ्जयः' इत्युक्त्या नरनारायणाख्यौ तावेव तिसिद्धान्तस्यापरिहार्य्यत्वात् सर्व्वे व्याख्यातारस्तमेवाश्रयन्तीति सर्व्वा दुर्व्याख्या अपास्ताः। पाण्डवानां युधिष्ठिरादीनां मध्ये धनञ्जयः अहम्। ननु खलु युधिष्ठिरस्य परमधार्म्मिकत्वात् तस्यैव विभूतिमध्ये परिगणनमुचितं, कथं धनञ्जयस्येति वादः परसमये जयद्रथे युधिष्ठिरस्य मिथ्यावचनेन धनञ्जयस्य तु सत्यनिष्ठया दूरेणापसारितः। अपि चात्मनो ब्रह्मचर्य्योचितदीर्घकालवनवासदुःखं जानन्नपि स हृतगोधनस्य ब्राह्मणस्य दुःखप्रशमनाय द्रौपद्या सहोपविष्टं युधिष्ठिरमतिक्रम्य शस्त्रग्रहणायागारं प्रविवेश, सम्यक्परितेन युक्ताभासेन समयप्रतिपालनात् प्रतिनिवर्त्तयितुं कृतयत्नस्यापि स्वाग्रजस्य सत्यरक्षणाय वाक्यमनभिनन्द्येति, तस्य युधिष्ठिरादपि श्रेष्ठत्वं सुव्यक्तम्। तद्यथा—"ब्राह्मणं समुपाकृत्य यशः प्राप्य च पाण्डवः। ततस्तद्गोधनं पार्थो दत्त्वा तस्मै द्विजातये ॥ आजगाम पुरं वीरः सव्यसाची धनञ्जयः। सोऽभिवाद्य गुरून् सर्व्वान् सर्व्वैश्चाप्यभिनन्दितः ॥ धर्म्मराज-

सुवाचेदं व्रतमादिश मे प्रभो । समयः समतिक्रान्तो भवत्संदर्शने मया ॥ वनवासं गमिष्यामि समयो ह्येष नः कृतः । इत्युक्तो धर्म्मराजस्तु सहसा वाक्यमप्रियम् ॥ कथमित्यब्रवीत् वाचा शोकार्त्तः सज्जमानया । युधिष्ठिरो गुडाकेशं भ्राता भ्रातरमच्युतम् ॥ उवाच दीनो राजा च धनञ्जयमिदं वचः । प्रमाणमस्मि यदि ते मत्तः शृणु वचोऽनघ ॥ अनुप्रवेशे यद्वीर कृतवांस्त्वं ममाप्रियम् । सर्व्वं तदनुजानामि व्यलीकं न च मे हृदि ॥ गुरोरनुप्रवेशो हि नोपघातो यवीयसः । यवीयसोऽनुप्रवेशो ज्येष्ठस्य विधिलोपकः ॥ निवर्त्तस्व महाबाहो कुरुष्व वचनं मम । न हि ते धर्म्मलोपोऽस्ति न च मे धर्षणा कृता ॥ अर्ज्जुन उवाच—न व्याजेन चरेद्धर्म्ममिति मे भवतः श्रुतम् । न सत्याद्विचलिष्यामि सत्येनायुधमालभे ॥ वैशम्पायन उवाच—सोऽभ्यनुज्ञाप्य राजानं वनचर्य्याय दीक्षितः । वने द्वादश-वर्षाणि वासायानुजगाम ह ॥" (आ, प, २१५अ, २५—३५श्लो) इति । मुनीनां वेदार्थमननपराणां व्यासो द्वैपायनोऽहम् । न खलु व्यासो वेदविभागकर्त्तृक एव कृष्णद्वैपायन आसीत्, अष्टाविंशतिसंख्य-केषु व्यासेषु स तु चरमः, तत्कथं तस्य प्राधान्यं नान्येषामिति वादस्तु भिन्नवर्त्मनां समन्वयव्यापारे तस्याचार्य्यस्य सहायत्वात् तथात्वमिति-हेतोरपाकर्त्तव्यः । पञ्चमवेदमहाभारतप्रणयनेन तस्य माहात्म्यमिति विष्णुपुराणं, तद्यथा—"कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् । कोऽन्यो हि भुवि मैत्रेय महाभारतकृद्भवेत् ॥" (वि, पु, ३अं, ४अ, ५श्लो) इति । कवीनां सूक्ष्मार्थदर्शिनां मध्ये कविः उशना भार्गवो-ऽहम्, तस्य नीतिवित्तमत्वात् । स त्वात्ममाहात्म्यमेवमवोचत्—"अचिन्त्यं ब्रह्म निर्द्वन्द्वमैश्वरं हि बलं मम । यत्र किञ्चित् सर्व्वगतं भूमौ वा यदि वा दिवि । तस्याहमीश्वरो नित्यं तुष्टेनोक्तः स्वय-म्भुवा ॥ अहं जलं विमुञ्चामि प्रजानां हितकाम्यया । पुष्णाम्योष-धयः सर्व्वा इति सत्यं ब्रवीमि ते ॥" (आ, प, ७८अ, २७—२८श्लो) इति । ३७ ।

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।
मौनञ्चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥३८॥

दण्ड इति। दमयतां दण्डप्रणेतॄणां सम्बन्धी दण्डो दमोऽहम्—दण्डस्य भयेन सम्भ्रमाच्च पापाविरक्तिस्तेन च पापशोधनं भवतीति दण्डस्य भगवद्विभूतित्वम्। उक्तञ्च मनुना "तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजम्। ब्रह्मतेजोमयं दण्डमसृजत् पूर्व्वमीश्वरः॥ तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च। भयाद्भोगाय कल्पन्ते स्वधर्म्मान्न चलन्ति च॥" (मनु, ७म, १४।१५श्लो) इति। अपिच "दण्डः शास्ति प्रजाः सर्व्वाः दण्ड एवाभिरक्षति। दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्बुधाः॥" (मनु, ७म, १८श्लो) इति। दण्डेन पापशोधनं यथा तत्रैव "राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः। निर्म्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥" (मनु, ८म, ३१८श्लो) इति। जिगीषतां जेतुमिच्छतां नीतिर्नयोऽस्मि अहम्—"मयि नीतिर्बलं भीमे रक्षिता चावयोर्जयः। मागधं साधयिष्याम इष्टिं त्रय इवाग्नयः॥" (म, प, २०अ, ३श्लो) इत्यत्र दैहिकं बलं विना यद्यपि केवला नीतिर्न विजये हेतुरिति लक्ष्यते तथापि नीतिः प्रधानबलत्वमविवादविषयं तां विना बलप्रयोगस्यासकृद्व्यर्थत्वं स्फुटतरं सर्व्वत्र। गुह्यानां गोपनीयानां मौनं वाङ्नियमनमेव चास्मि अहम्। ज्ञानवतां तत्त्वज्ञानां ज्ञानमहम्; श्रवणादिद्वारा परिपक्कसमाधिजन्यं ज्ञानमिति श्रीमद्गिरिः। "तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥" (१०।११) इति स्वयमेवान्तर्यामी ज्ञानदीपः। अल्पज्ञानां जीवानां मोहप्रमादाधीनता खल्वपरिहार्य्या, यदा हि जायते तेषां भगवता सम्बन्धस्तदा तज्ज्ञानेन भवन्ति तेषां ज्ञानवत्ता, अतएवाहाचार्य्यः—"ज्ञानं ज्ञानवतामहम्" इति। ३८।

यच्चापि सर्व्वभूतानां बीजं तदहमर्ज्जुन ।
न तदस्ति विना यत् स्यान्मया भूतं चराचरम् ॥३९॥
नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥४०॥
यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्ज्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥४१॥
अथवा बहुनैतेन किं ज्ञातेन तवार्ज्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥४२॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः ।

यच्चापीति । सर्व्वभूतानां यच्चापि बीजं प्ररोहकारणं, हे अर्ज्जुन, तत् अहमेव । कथम्? चराचरं स्थिरचरं भूतं न तदस्ति यत् मया विना स्यात् । "अहमात्मा गुडाकेश सर्व्वभूताशयस्थितः ।" इत्यनेनारभ्य "न तदस्ति विना यत् स्यान्मया भूतं चराचरम्" इत्यनेनाध्यायमिममुपसंहृतवानाचार्य्यः । शास्त्रेऽस्मिन्नन्तर्यामिणं हृत्स्थमीश्वरमुपास्यत्वेनोपस्थापितवान् स इति तत्त्वं द्रष्टव्यं सुधीभिः । ३९ ।

अनन्तस्येश्वरस्य विभूतेरन्तो न भवितुमर्हति, अतएवाहाचार्य्यो नान्त इति । हे परन्तप, मम दिव्यानां विभूतीनां नान्तोऽस्ति । एष तु विभूतेर्विस्तरो मया उद्देशतः एकदेशेन प्रोक्तः । ४० ।

अनुक्तानां संग्रहार्थमाह यदिति । यत् यत् सत्त्वं वस्तुजातं विभूतिमत् ऐश्वर्य्यवत् श्रीमत् समृद्धिमत् शोभावत् कान्तिमत् सौन्दर्य्येण युक्तम्, ऊर्ज्जितं बलाद्यतिशयेन युक्तं, तत्तत् मम तेजोंऽशसम्भवं चिच्छक्त्यंशसमुत्पन्नम् अवगच्छ जानीहि । ४१ ।

एवं परिच्छिन्नभावेन चिन्तनोपायमुक्त्वाधुना पुनरखण्डभावेन दर्श-

नोपायमाह अथवेति। हे अर्ज्जुन, बहुना एतेन ज्ञातेन तव किम्, न किमपि प्रयोजनमिति भावः, इदं कृत्स्नं जगत् एकांशेन एकदेश-मात्रेण विष्टभ्य व्याप्य अहमन्तर्यामी स्थितः तदतीतत्वेनेति शेषः। "मया ततमिदं कृत्स्नं जगदव्यक्तमूर्त्तिना। मत्स्थानि सर्व्वभूतानि न चाहं तेष्ववस्थितः॥" (९।४) इत्यत्र तत्त्वमुक्तम्।

अध्यायस्यास्यार्थसंग्रहः श्रीमद्धरिणा—"तदनेन भगवतो नाना-विधविभूतीर्ध्येयत्वेन ज्ञेयत्वेन चोपदिश्यान्ते सर्व्वप्रपञ्चात्मकं ध्येयं रूपं दर्शयित्वा 'त्रिपादस्यामृतं दिवि' इति प्रपञ्चाधिकं निरूपाधिकं तत्त्वमुपदिशता परिपूर्णः सच्चिदानन्दैकतानस्तत्पदलक्ष्योऽर्थो निर्द्धा-रितः" इति; श्रीमच्छ्रीधरेण—"इन्द्रियद्वारतश्चित्ते वहिर्धावति सत्यपि। ईशदृष्टिविधानाय विभूतीर्दशमेऽब्रवीत्॥" इति; श्रीम-द्बलदेवेन "यच्छक्तिलेशात् सूर्य्याद्या भवन्त्यत्युग्रतेजसः। यदंशेन धृतं विश्वं स कृष्णो दशमेऽर्च्यते॥" इति; श्रीमद्विश्वनाथेन—"विश्वं श्रीकृष्ण एवातः सेव्यस्तद्भक्तया धिया। स एवास्वाद्यमाधुर्य्य इत्यधारा-यार्थं ईरितः॥" इति; श्रीमन्नरहरिणा—"विभूतीनां परिज्ञानं सगुणध्यानकारणम्। ध्यानयोगान्निर्विशेषं ज्ञातुं शक्नोति बुद्धिमान्॥" इति। ४२।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये दशमोऽध्यायः।

अर्जुन उवाच —

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥१॥
भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥२॥
एवमेतद्यथात्थ त्वमात्मानं परमेश्वर।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥३॥
मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥४॥

अध्यायस्यास्यारम्भे श्रीमच्छङ्कर आह —"भगवतो विभूतय उक्ताः, तत्र च 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति भगवताभिहितं श्रुत्वा यज्जगदात्मकं रूपमाद्यमैश्वरं तत् साक्षात्कर्त्तुमिच्छन्नर्ज्जुन उवाच" इति। श्रीमद्रामानुज आह—"एवं भक्तियोगनिष्पत्तये तद्वृद्धये च सकलेतरविलक्षणेन स्वाभाविकेन भगवदसाधारणेन कल्याणगुणगणेन सह भगवतः सर्व्वात्मकत्वं तद्व्यतिरिक्तस्य कृत्स्नस्य चिदचिदात्मकस्य वस्तुजातस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित्वञ्चोक्तम्। तदनन्तरं तदेव भगवदसाधारणस्वभावं कृत्स्नस्य तदायत्तस्वरूपस्थितिप्रवृत्तिताञ्च भगवत्सकाशादुदेत्यन्वेति च निश्चित्य तथाभूतं भगवन्तं साक्षात्कर्त्तुकामोऽर्ज्जुन उवाच" इति। श्रीमच्छ्रीधरः— "पूर्व्वाध्यायान्ते 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति विश्वात्मकं पारमेश्वररूपमुपक्षिप्तं, तद्दिदृक्षुः पूर्व्वोक्तमभिनन्दन्नर्ज्जुन उवाच" इति। श्रीमद्बलदेव आह—"पूर्व्वेण 'अहमात्मा गुडाकेश

सर्व्वभूताशयस्थितः' इति विभूतिकथनोपक्रमे 'विष्टभ्याहमिदं कृत्स्न-मेकांशेन स्थितो जगत्' इति तदुपसंहारे निखिलविभूत्याश्रयी महत्-स्रष्टा पुरुषः यस्य श्रीकृष्णस्यावतारः स तु महत्स्रष्ट्रादिसर्व्वावतारोति तन्मुखात् प्रतीत्य सद्यानन्दसिन्धुनिमग्नोऽर्ज्जुनस्तत्पुरुषरूपं दिदृक्षुः कृष्णोक्तमनुवदति" इति। श्रीमन्मधुसूदन आह—"पूर्व्वाध्याये नाना-विभूतीरुक्त्वा 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति विश्वात्मकं पारमेश्वरं रूपं भगवताऽन्तेऽभिहितं श्रुत्वा परमोत्कण्ठित-स्तत्साक्षात्कर्त्तुमिच्छन् पूर्व्वोक्तमभिनन्दन्नर्ज्जुन उवाच" इति। श्रीम-न्नीलकण्ठ आह—"पूर्व्वस्मिन्नध्याये योगो विभूतिश्च व्याख्येयत्वेन प्रतिज्ञातौ 'एतां विभूतिं योगञ्च मम यो वेत्ति' इति, 'आत्मनो योगं विभूतिञ्च जनार्द्दन, भूयः कथय' इतीतरेण च श्रोतव्यत्वेन च प्रार्थितौ। तत्र 'अहमात्मा गुडाकेश सर्व्वभूताशयस्थितः' इति सङ्क्षेपेण योगो भगवतः सर्व्वाधारत्वलक्षण उक्तः प्राग्विभूतिकथनात्; तदन्ते च 'विष्ट-भ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति कुसूलेन धान्यमिव मयेदं जगद्विष्टब्धमित्युक्त्वा स एव स्मारितः। तदेव भगवतः सर्व्वभूता-धारत्वं साक्षात्कर्त्तुकामोऽर्ज्जुन उवाच" इति। श्रीमद्विश्वनाथ आह —"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति सर्व्वविभूत्या-श्रयमादिपुरुषं स्वांशमस्यांशं श्रुत्वा परमानन्दनिमग्नस्तद्रूपं दिदृक्ष-माणो भगवदुक्तमभिनन्दति" इति। सर्व्वेषां व्याख्यातॄणां मतसंग्रह-णेनेदमायाति—नीरूपस्य रूपमिदं जगत् तस्य भगवतो देह इतीय-त्वेन, स तु स्वयं तस्यात्मा सर्व्वावयवशून्यः, न च जगद्रूपे देहे बद्धः, किन्तर्हि तदतीतः; अतीतमप्यस्य जगतस्तस्मिन्नेव तं द्रष्टुकामोऽर्ज्जुन उवाचेति।

प्रथमस्तावदाचार्य्योक्तमभिनन्दन् सर्व्वान्तर्यामिणो रूपमैश्वरं दिदृ-क्षुराह चतुर्भिः मदनुग्रहायेति, भवाप्ययाविति, एवमिति, मन्यस इति। मदनुग्रहाय मदनुग्रहार्थं परमं निरतिशयं गुह्यं गोपनीयम् अध्यात्मसंज्ञितमात्मानात्मविवेकविषयं यत् वचस्त्वयान्तर्यामिणोक्तं

श्रीभगवानुवाच—

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥५॥
पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्व्वाणि पश्याश्चर्य्याणि भारत ॥६॥
इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥७॥
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥८॥

तेन वचसा मम मोहोऽशोच्यशोचनादिरूपो विगतो विनष्टः। हे कमलपत्राक्ष, त्वत्त आचार्य्येतनावधिष्ठितादन्तर्यामिनो भूतानां भवाप्ययावुत्पत्तिप्रलयौ विस्तरशो मया श्रुतौ, अव्ययं माहात्म्यञ्च श्रुतं तवेति शेषः, "मत्तः परतरं नान्यत् किञ्चिदस्ति" (७।७) इत्यादिभिः। हे परमेश्वर, त्वमात्मानं यथा आत्थ कथयसि, एतदेवमेव। हे पुरुषोत्तम, ते तव ऐश्वरं रूपं द्रष्टुमिच्छामि। हे प्रभो, तत् रूपं मया द्रष्टुं शक्यमिति यदि मन्यसे, हे योगेश्वर, ततः त्वमात्मानमव्ययं जगति प्रकाशमानमपि स्वयं रूपान्तरमभजन्तं दर्शय मम प्रत्यक्षविषयं कुरु। १—४।

एवं प्रार्थितोऽर्ज्जुनेनाचार्य्य आह चतुर्भिः पश्येति, पश्येति, इहेति, न त्विति। हे पार्थ, मम रूपाणि नानाविधानि दिव्यान्यप्राकृतानि नानावर्णाकृतीनि शुक्लपीतादयो विविधा वर्णास्तथा आकृतयोऽवयवविशेषा येषां तानि शतशः सहस्रशः पश्य। श्वेतद्वीपगतेन नारदेन विश्वरूपमदृश्यत तत्प्रतिपत्त्यनुसारतः, इह तु युद्धोद्यतेनार्ज्जुनेन तन्मनोभावानुसारीणि भीषणानि रूपाण्यवालोक्यन्तेति विशेषोऽत्र बोद्धव्यः। नारदस्य विश्वरूपदर्शनं यथा शान्तिपर्व्वणि—"प्राप्य श्वेतं महाद्वीपं

नारदो भगवानृषिः। ददर्श तानेव नरान् श्वेतांश्चन्द्रसमप्रभान्॥ पूजयामास शिरसा मनसा तैश्च पूजितः। दिदृक्षुर्जप्यपरमः सर्व्वकृच्छ्रगतः स्थितः॥ भूत्वैकाग्रमना विप्र ऊर्द्ध्वबाहुः समाहितः। स्तोत्रं जगौ स विश्वाय निर्गुणाय गुणात्मने॥" (शा, प, ३३८ अ, १—३ श्लो) इति। स्तोत्रानन्तरं सोऽदर्शत्तद्रूपमेवम्—"एवं स्तुतः स भगवान् गुह्यैस्तथ्यैश्च नामभिः। तं मुनिं दर्शयामास नारदं विश्वरूपधृक्॥ किञ्चिच्चन्द्राद्विशुद्धात्मा किञ्चिच्चन्द्राद्विशेषवान्। कृशानुवर्णः किञ्चिच्च किञ्चिद्धिष्ण्याकृतिः प्रभुः॥ शुकपत्रनिभः किञ्चित्किञ्चित् स्फाटिकसन्निभः। नीलाञ्जनचयप्रख्यो जातरूपप्रभः क्वचित्॥ प्रवालाङ्कुरवर्णश्च श्वेतवर्णस्तथा क्वचित्। क्वचित् सुवर्णवर्णाभो वैदूर्य्यसदृशः क्वचित्॥ नीलवैदूर्य्यसदृश इन्द्रनीलनिभः क्वचित्। मयूरग्रीववर्णाभो मुक्ताहारनिभः क्वचित्॥ एतान् बहुविधान् वर्णान् रूपैर्बिभ्रत् सनातनः। सहस्रनयनः श्रीमाञ्छतशीर्षः सहस्रपात्॥ सहस्रोदरबाहुश्च अव्यक्त इति च क्वचित्। ओङ्कारमुद्गिरन् वक्त्रात् सावित्रीञ्च तदन्वयाम्॥ शेषेभ्यश्चैव वक्त्रेभ्यश्चतुर्व्वेदान् गिरन् बहून्। आरण्यकं जगौ देवो हरिर्नारायणो वशी॥ वेदीं कमण्डलुं शुभ्रान् मणीनुपानहौ कुशान्। अजिनं दण्डकाष्ठञ्च ज्वलितञ्च हुताशनम्। धारयामास देवेशो हस्तैर्यज्ञपतिस्तदा॥ तं प्रसन्नं प्रसन्नात्मा नारदो द्विजसत्तमः। वाग्यतः प्रणतो भूत्वा ववन्दे परमेश्वरम्॥" (शा, प, ३३९ अ, १—१० श्लो) इति। इह श्रीमद्दषिनारायणापहृतचित्तो नारदो विश्वमूर्त्तिसंपश्यत्तद्भावानुरूपामेव, अर्ज्जुनस्त्वाचार्य्यप्रतिपत्तिविमिश्रस्वप्रतिपत्त्यनुसारतस्तद्रूपमेव रूपान्तरितमपश्यदिति तत्त्वम्। दुर्य्योधनसभायामदर्शयदाचार्य्यो यद्रूपं तत्र यत् किञ्चिद्विशेषत्वं लक्ष्यते तदपि तत्समयोचितभावानुसारतस्तद्यथा—"एकोऽहमस्मि यन्मोहान्मन्यसे मां सुयोधन। परिभूय सुदुर्बुद्धे ग्रहीतुं मां चिकीर्षसि॥ इहैव पाण्डवाः सर्व्वे तथैवान्धकवृष्णयः। इहादित्याश्च रुद्राश्च वसवश्च महर्षिभिः॥ एवमुक्ता अहासमाः केशवः परवीरहा। तस्य संस्मयतः शौरेर्विद्युद्रूपा महा-

त्मनः ॥ अङ्गुष्ठमात्रास्त्रिदशाः मुमुचुः पावकार्च्चिषः । अस्य ब्रह्मा ललाटस्थो रुद्रो वक्षसि चाभवत् ॥ लोकपाला भुजेष्वासन्नग्निरास्यादजायत । आदित्याश्चैव साध्याश्च वसवोऽथाश्विनावपि ॥ मरुतश्च सहेन्द्रेण विश्वदेवास्तथैव च । बभूवुश्चैकरूपाणि यक्षगन्धर्व्वरक्षसाम् ॥ प्रादुरास्तां तथा दोर्भ्यां सङ्कर्षणधनञ्जयौ । दक्षिणेऽर्ज्जुनो धन्वी हली रामश्च सव्यतः ॥ भीमो युधिष्ठिरश्चैव माद्रीपुत्रौ च पृष्ठतः । अन्धका वृष्णयश्चैव प्रद्युम्नप्रमुखास्ततः ॥ अग्रे बभूवुः कृष्णस्य समुद्यतमहायुधाः । शङ्खचक्रगदाशक्तिशार्ङ्गलाङ्गलनन्दकाः ॥ अदृश्यन्तोद्यतान्यस्य सर्व्वप्रहरणानि च । नानाबाहुषु कृष्णस्य दीप्यमानानि सर्व्वशः ॥ नेत्राभ्यां नस्तश्चैव श्रोत्राभ्याञ्च समन्ततः । प्रादुरासन् महारौद्राः सधूमाः पावकार्च्चिषः ॥ रोमकूपेषु च तथा सूर्य्यस्येव मरीचयः । तं दृष्ट्वा घोरमात्मानं केशवस्य महात्मनः ॥ न्यमीलयन्त नेत्राणि राजानस्त्रस्तचेतसः । ऋते द्रोणञ्च भीष्मञ्च विदुरञ्च महामतिम् ॥" (उ, प, १३०अ, २—१४श्लो) इति ।

वैदिकपुरुषसूक्तानुसारतः साधनं योगिषु तादृशीं प्रतिपत्तिमधात् । तामिमां—योगप्रभावत इति प्राञ्चः, इच्छाशक्तेः क्रियया तादृक्प्रबलाकाङ्क्षोद्दीपनेन चेति नव्याः,—तत्प्रभावाधीनेषु प्रतिफलितवन्तस्ते । न केवलं विश्वमूर्त्तिं, स्वेच्छानुसारतोऽन्यामपि प्रतिपत्तिमुदभावयंस्ते, यथा व्यासो मृतपुत्रादीनदर्शयद्गान्धारीं कुन्तीं सुभद्रां द्रौपदीमन्यांश्च । स तदा तत्रोपस्थितानाह—"यच्च वै हृदि सर्व्वेषां दुःखमेतच्चिरं स्थितम् । तदद्य व्यपनेष्यामि परलोकागताद्भयात् ॥ सर्व्वे भवन्तो गच्छन्तु नदीं भागीरथीं प्रति । तत्र द्रक्ष्यथ तान् सर्व्वान् ये हतास्मिन् रणाजिरे ॥" (आ, वा, प, ३१अ, १८।१९श्लो) इति । सर्व्वेषु निशायां व्यासमुपागच्छत्सु—"ततो व्यासो महातेजाः पुण्यं भागीरथीजलम् । अवगाह्य जुहावाथ सर्व्वान् लोकान् महामुनिः ॥ पाण्डवानाञ्च ये योधाः कौरवाणाञ्च सर्व्वशः । राजानश्च महाभागा नानादेशनिवासिनः ॥ ततः स तुमुलः शब्दो जलान्ते जनमेजय । प्रादु-

रासीद्यथा पूर्व्वं कुरुपाण्डवसेनयोः॥ ततस्ते पार्थिवाः सर्व्वे भीष्मद्रोणपुरोगमाः। ससैन्याः सलिलात् तस्मात् समुत्तस्थुः सहस्रशः॥ विराटद्रुपदौ चैव सहपुत्रौ ससैनिकौ। द्रौपदेयाश्च सौभद्रो राक्षसश्च घटोत्कचः॥ कर्णदुर्य्योधनौ चैव शकुनिश्च महारथः। दुःशासनादयश्चैव धार्त्तराष्ट्रा महाबलाः॥ जारासन्धिर्भगदत्तो जलसन्धश्च वीर्य्यवान्। भूरिश्रवाः शलः शल्यो वृषसेनश्च सानुजः॥ लक्ष्मणो राजपुत्रश्च धृष्टद्युम्नस्य चात्मजः। शिखण्डिपुत्राः सर्व्वे च धृष्टकेतुश्च सानुजः॥ अचलो वृषकश्चैव राक्षसश्चाप्यलायुधः। बाह्लिकः सोमदत्तश्च चेकितानश्च पार्थिवः॥ एते चान्ये च बहवो बहुत्वाद्ये न कीर्त्तिताः। सर्व्वे भासुरदेहास्ते समुत्तस्थुर्जलात्ततः॥ यस्य वीरस्य यो वेशो यो ध्वजो यच्च वाहनम्। तेन तेन व्यदृश्यन्त समुपेता नराधिपाः॥ दिव्याम्बरधराः सर्व्वे सर्व्वे भ्राजिष्णुकुण्डलाः। निर्वैरा निरहङ्कारा विगतक्रोधमत्सराः॥ गन्धर्व्वैरुपगीयन्तस्तूयमानाश्च वन्दिभिः। दिव्यमाल्याम्बरधरा वृताश्चाप्सरसां गणैः॥ धृतराष्ट्रस्य च तदा दिव्यं चक्षुर्नराधिप। मुनिः सत्यवतीपुत्रः प्रीतः प्रादात् तपोबलात्॥ दिव्यज्ञानबलोपेता गान्धारी च यशस्विनी। ददर्श पुत्रांस्तान् सर्व्वान् ये चान्येऽपि मृधे हताः॥" (आ, वा, प, ३२अ, ४—१८श्लो॰) इति।

किं वा तत्त्वं विश्वमूर्त्तेस्तदत्र विवेच्यम्। जगदिदं भगवद्रूपमिति प्राचां सिद्धान्तो न पुनः संहितोपनिषद्विरुद्धः। वैष्णवा म-हात्मानो नेमं सिद्धान्तमनुसृतवन्तः, अथापि सर्व्वथास्वीकारमप्यस्यास-म्भवं पश्यन्तः "एतावानस्य महिमातो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥" (ऋक्सं, १०म, ९०सू, ३ऋक्), "तस्माद्विराडजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥" (५ऋक्) इति पुरुषसूक्तमनुसारत-स्तेषामाराध्यो देवः परमपुरुषोऽवतारी ; अतः कृष्णाद्यावतारस्तस्यांश इति निर्णीय सच्चिदानन्दस्वरूपरूपोऽयमिति निश्चित्य केशादयः सर्व्वे-

ऽवगता: सच्चिदानन्दोपादाना न तु मायिका इति व्याचचते। शैषा-
दयो जगदुपादानव्यतिरिक्ता न भवन्तीति "तस्मात्तस्मिन् विश्वस्य स्थूल-
तया सूक्ष्मतया च नित्यं भगवद्रूपत्वमस्त्येव" इत्याद्यास्तु तेषामुक्तिषु
तैरपि स्वीकृतम्। "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्"
(१०।४२) इति विश्वस्य भगवत्यन्तर्यामिणि स्थितिः, स तु तस्मिन्
स्थित्वा तदतीत इति विश्वरूपस्य स्वान्तर्भूतविश्वस्य "वासुदेवः सर्व्वम्"
(७।१९) इत्याचार्य्यैः प्रकाशमानस्यान्तर्यामिणः सर्व्वान्तर्भावकत्वं श्रुप-
निषदनुसारतोऽनुभूतमर्ज्जुनेन। "पादोऽस्य विश्वा भूतानि" इत्या-
दित्यादीन् सर्व्वान् स तस्मिन्नपश्यत्। अनुक्रमणिकापर्व्वणि विश्वरूप-
दर्शनमेवमुपनिबद्धम्—"यदाश्रौषं कश्मलेनाभिपन्ने रथोपस्थे सीदमाने-
ऽर्ज्जुने वै। कृष्णं लोकान् दर्शयानं शरीरे तदा नाशंसे विजयाय
सञ्जय॥" (आ, प, १अ, १७९श्लो) इति। नात्र तत्त्वोपदेशदानस्यो-
ल्लेखोऽस्त्यतः केवलं विश्वरूपमदर्शयन्नेवार्ज्जुनस्य मोहमपनीतवानाचार्य्य
इति संशयस्त्वाकिञ्चित्करः। विश्वरूपदर्शनमात्रस्योल्लेखोऽर्ज्जुनस्य सौ-
भाग्यातिशयप्रदर्शनाय, यतोऽन्यथा पर्व्वसंग्रहाध्याये सौतिना नोक्तम्
—"अतः परं विचित्रार्थं भीष्मपर्व्व प्रचक्षते। जम्बूखण्डविनिर्म्माणं
यत्रोक्तं सञ्जयेन च॥ यत्र यौधिष्ठिरं सैन्यं विषादमगमत्परम्। यत्र
युद्धमभूद्घोरं दशाहानि सुदारुणम्॥ कश्मलं यत्र पार्थस्य वासुदेवो
महामतिः। मोहजं नाशयामास हेतुभिर्मोक्षदर्शिभिः॥" (आ, प,
२अ, २५३—२५६श्लो) इति।

हे भारत, आदित्यान् द्वादश, वसूनष्टौ, रुद्रानेकादश, अश्विनौ
द्वौ, मरुतः सप्तसप्तगणान् पश्य, तथा अदृष्टपूर्व्वाणि बहूनि आश्चर्य्याणि
रूपाणि पश्य। हे गुडाकेश, इह अस्मिन् मम देहे अद्य एकस्थं सच-
राचरं कृत्स्नं जगत्, यच्च अन्यत् द्रष्टुमिच्छसि, पश्य। अनेनैव स्वच-
क्षुषा मामन्तर्यामिणं सर्व्वान्तर्भावकत्वेन न तु द्रष्टुं शक्नोषि, तं तुभ्यं
दिव्यं चक्षुः स्वप्रभावसंक्रमणेनाद्भुतं ददामि, मे मम ऐश्वरं योगमघ-
टनघटनासामर्थ्यं पश्य। ५—८।

सञ्जय उवाच—

> एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
> दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥९॥
> अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
> अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥१०॥
> दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
> सर्व्वाश्चर्य्यमयं देवमनन्तं विश्वतोमुखम् ॥११॥
> दिवि सूर्य्यसहस्रस्य भवेद्युगपदुत्थिता ।
> यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥१२॥
> तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा ।
> अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥१३॥

किम्भूतं रूपं स दर्शितवान् तदाह सञ्जयः षड्भिः । हे राजन् धृतराष्ट्र, महायोगेश्वरो हरिः एवमुक्त्वा ततः पार्थाय परमैश्वरं रूपं दर्शयामास । किम्भूतम्—"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्" (ऋक्‌सं, १०म, ९०सू, १ऋक्) इत्युक्तप्रकारेण अनेकवक्त्रनयनम्, अनेकाश्चर्य्योऽनन्तवार्य्योति श्रीमध्वाचार्य्यः, अनेकानि वक्त्राणि नयनानि यस्मिंस्तत्, अनेकाद्भुतदर्शनम् अनेकानि अद्भुतानि दर्शनानि यस्मिंस्तत्, अनेकदिव्याभरणम् अनेकानि दिव्यानि अप्राकृतानि आभरणानि यस्मिंस्तत्, दिव्यानेकोद्यतायुधम् दिव्यानि अप्राकृतानि अनेकानि उद्यतानि आयुधानि यस्मिंस्तत्, दिव्यमाल्याम्बरधरं दिव्यानि अप्राकृतानि माल्यानि अम्बराणि च धारयतीति तत्, दिव्यगन्धानुलेपनं दिव्योऽप्राकृतो गन्धो यस्य तदनुलेपनं यस्य तत्, सर्व्वाश्चर्य्यमयम् अनेकाद्भुतप्रचुरम्, देवं द्योतनात्मकम्, अनन्तम् अविच्छिन्नम्, विश्वतोमुखं विश्वतः सर्व्वतः मुखानि यस्मिंस्तद्रूपमिति पूर्व्वेणान्वयः । ९—११ ।

यदा परमात्मनान्तर्भावितं विश्वमेवमन्तश्चक्षुषः प्रत्यक्षं भवति

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥१४॥

अर्जुन उवाच—

पश्यामि देवांस्तव देव देहे
सर्व्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्व्वानुरगांश्च दिव्यान् ॥१५॥

तदा सर्व्वा दिशः प्रसन्ना अपूर्व्वदीप्त्या समावृताः प्रतिभान्तीति निखिलसाधकानुभूतिः सञ्जयेन विव्रियते दिवीति । दिवि अन्तरिक्षे यदि युगपत् सूर्य्यसहस्रस्य भा उत्थिता भवेत् तदा सा भास्तस्य महात्मनो विश्वमूर्त्तेर्भासः सदृशी स्यात्, सहस्रशब्दोऽनन्तवाचीति श्रीमन्माध्वः । तत्र तस्मिन् देवदेवस्य शरीरे एकस्थम् एकस्मिन् स्थितं कृत्स्नं जगत् अनेकधा विभक्तं पाण्डवस्तदापश्यत् दृष्टवान् । ततस्तदनन्तरं सं दृष्ट्वा विस्मयाविष्टः विस्मयरसेनाप्लुतः हृष्टरोमा पुलकितो धनञ्जयोऽर्ज्जुनो देवं शिरसा प्रणम्य भक्त्यतिशयेन नमस्कृत्य कृताञ्जलिः सम्पुटीकृतकरः सन् अभाषत उक्तवान् । १२—१४ ।

किन्तद्विश्वरूपं यदहं पश्यामीत्याहार्ज्जुनः । हे देव, तव देहे देवान् तथा सर्व्वान् भूतविशेषसङ्घान् भूतविशेषाणां स्थिरचराणां नानासंस्थानविशेषाणां सङ्घाः समूहास्तान्, कमलासनस्थम् ईशं प्रजानां स्वामिनं ब्रह्माणम्, तदन्तर्यामिणमीशं गर्भोदकशयमिति श्रीमद्बलदेवः, ऋषींश्च सर्व्वान्, दिव्यान् दिवि भवान् उरगांश्च । दिवि भवाः सर्पाः, यथा तैत्तिरीयब्राह्मणे—"इदं सर्पेभ्यो हविरस्तु जुष्टम् आश्रेषा येषामनुयान्ति चेतः । येऽन्तरिक्षं पृथिवीं क्षियन्ति ते नः सर्पासो हवमागमिष्टाः ॥ ये रोचने सूर्य्यस्यापि सर्पाः ये दिवं देवीमनुसञ्चरन्ति । येषामाश्रेषा अनुयन्ति कामं तेभ्यः सर्पेभ्यो मधुमज्जुहोमि ॥" (३।१।१।५।६) 'आश्रेषा आश्लेषाः—नक्षत्रदेवताः' इति सायनः । १५ ।

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्व्वतोऽनन्तरूप ।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ॥१६॥

किरीटिनं गदिनं चक्रिणञ्च
तेजोराशिं सर्व्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ता-
द्दीप्तानलार्कद्युतिमप्रमेयम् ॥१७॥

अनेकेति। हे अनन्तरूप, अनेकबाहूदरवक्त्रनेत्रम् अनेके बाहव उदराणि वक्त्राणि नेत्राणि यस्य तव त्वाम्—अनेकशब्दोऽनन्तवाचीति श्रीमध्वाचार्य्य:—सर्व्वत: पश्यामि, हे विश्वेश्वर, विश्वरूप—विश्वशब्दोऽप्यनन्तवाचीति श्रीमध्वाचार्य्य:—न अन्तं न मध्यं न पुनस्तव आदिं पश्यामि । १६ ।

किरीटिनमिति। किरीटिनं शिरोभूषणयुक्तं, गदिनं गदायुक्तम्, चक्रिणं चक्रयुक्तं, तेजोराशिं तेज:पुञ्जं, सर्व्वतो दीप्तिमन्तं, दुर्निरीक्ष्यं दु:खेन निरीक्ष्यस्त्वां, समन्तात् सर्व्वत्र दीप्तानलार्कद्युतिं दीप्तयोरनलार्कयो: द्युतिरिव द्युतिर्यस्य तव त्वाम्, अप्रमेयमपरिच्छेद्यं प्रमातुमशक्यं त्वां पश्यामि। किमिदं किरीटादिकं प्रदर्शितं तद्भागवतवचनेन प्राक्। यतीन्द्रमतदीपिकायान्तु दृश्यते—"भगवतोऽप्राकृतदिव्यमङ्गलविग्रहस्तु अस्त्रभूषणाध्यायोक्तसर्व्वोपाश्रय: ; तद्यथा—पुरुषस्य कौस्तुभाकारत्वं प्रकृते:, श्रीवत्सरूपत्वं महतो, गदारूपत्वं सात्त्विकाहङ्कारस्य, शङ्खरूपत्वं तामसाहङ्कारस्य, शार्ङ्गत्वं ज्ञानस्य, खड्गरूपत्वमज्ञानस्य, तदावरकत्वं मनसश्चक्रत्वं, ज्ञानेन्द्रियाणां शररूपत्वं, सूक्ष्मस्थूलभूतानां वनमालात्वम्" इति । १७ ।

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्म्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥१८॥

अनादिमध्यान्तमनन्तवीर्य्य-
मनन्तबाहुं शशिसूर्य्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥१९॥

त्वमिति । त्वमक्षरं परमं परं ब्रह्म वेदितव्यं ज्ञातव्यं मुमुक्षुभिः, त्वमस्य विश्वस्य परं निधानमाश्रयः, त्वमव्ययः रूपान्तरविरहितः, शाश्वतधर्म्मगोप्ता शाश्वतस्य नित्यस्य धर्म्मस्य गोप्ता पालयिता, त्वं सनातनः चिरन्तनः पुरुषो मे मम मतः अभिप्रेतः । १८ ।

अनादीति । अनादिमध्यान्तम् आदिमध्यान्तरहितम्, अनन्तवीर्य्यम्—'वीर्य्यशब्दः प्रदर्शनार्थः—अनवधिकातिशयज्ञानबलैश्वर्य्यशक्तितेजसां निधानम्' इति श्रीमद्रामानुजः, अनन्तबाहुम्—'सोऽपि प्रदर्शनार्थः—अनन्तबाहूदरवक्त्रादिकम्' इति श्रीमद्रामानुजः, शशिसूर्य्यनेत्रम् चन्द्रादित्यनयनम्, 'शशिवत् सूर्य्यवच्च प्रसादप्रतापयुक्तसर्व्वनेत्रम् देवादीननुकूलान्नमस्कारादिकुर्व्वाणान् प्रति प्रसादः, तद्विपरीतानसुरराक्षसादीन् प्रति प्रतापः' इति श्रीमद्रामानुजः, दीप्तहुताशवक्त्रम्—'प्रदीप्तकालानलवत् संहारानुगुणवक्त्रम्' इति श्रीमद्रामानुजः, स्वतेजसा इदं विश्वं तपन्तं सन्तापयन्तम्—'स्वतेजसा चैतन्यज्योतिषा इदं विश्वं विश्वरूपं तपन्तं प्रकाशयन्तम् ; अनादित्वादिसर्व्वविशेषणविशिष्टं विश्वमपि कर्म्मीभूतं तापयन्तं त्वां परं ज्योतीरूपं पश्यामि जानामि ; चित्रपटस्थानीयं विश्वरूपं मकरन्दकारकाम्भोजमनोपितं

द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्व्वाः।
दृष्ट्वाद्भुतं रूपमिदं तवोग्रं
लोकत्रयं प्रव्यथितं महात्मन् ॥२०॥
अमी हि त्वां सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति।
स्वस्तीत्युक्त्वा सिद्धमहर्षिसङ्घा
वीक्षन्ते त्वां स्तुतिभिः पुष्कलाभिः ॥२१॥
रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्व्वयक्षासुरसिद्धसङ्घा
वीक्षन्ते त्वां विस्मिताश्चैव सर्व्वे ॥२२॥

येन ज्योतिषा प्रकाशते तदेव त्वमसीति जानामीति भावः इति श्रीमन्नीलकण्ठः। १९।

द्यावेति। द्युशब्दः पृथिवीशब्दश्चोपरितनानामधःस्थानाञ्च लोकानां द्योतनार्थौ। द्यावापृथिव्योरिदमन्तरमन्तरीक्षम् एकेन हि त्वया व्याप्तम्, सर्व्वा दिशश्च त्वया व्याप्ताः। हे महात्मन्, तव इदमद्भुतं विस्मापकम् उग्रं क्रूरं भीषणं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं त्रस्तम्। २०।

अमीति। अमी हि सुरसङ्घा देवसमूहा भीताः सन्तः त्वां विशन्ति प्रविशन्ति, केचित् पुनः प्राञ्जलयः कृतसम्पुटकराः त्वां गृणन्ति स्तुवन्ति। स्वस्तीति उक्त्वा महर्षिसिद्धसङ्घाः महर्षीणां सिद्धानाञ्च सङ्घाः पुष्कलाभिः पूर्णाभिः स्तुतिभिः त्वां वीक्षन्ते। २१।

रुद्रेति। रुद्रादित्या रुद्राश्चादित्याश्च वसवश्च ये च साध्यास्तन्नाम-देवाः विश्वे विश्वदेवाः अश्विनौ मरुतश्च उष्मपाः पितरश्च गन्धर्व्वयक्षा-

रूपं महत् ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥२३॥
नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमञ्च विष्णो ॥२४॥
दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म्म
प्रसीद देवेश जगन्निवास ॥२५॥

सुरसिद्धसङ्घा। गन्धर्व्वाश्च यक्षाश्च असुराश्च सिद्धाश्च तेषां सङ्घाः सर्व्वे विस्मिताः विस्मयापन्ना एव त्वां वीक्षन्ते । २२ ।

रूपमिति । हे महाबाहो, बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं बह्वीभिर्दंष्ट्राभिः करालं भीषणम्, ते तव महत् रूपं दृष्ट्वा लोकाः प्रव्यथिताः त्रस्ताः, तथा अहं प्रव्यथितः त्रस्तः । २३ ।

नभःस्पृशमिति । हे विष्णो सर्व्वव्यापिन्, नभःस्पृशमाकाशव्यापिनं दीप्तं प्रज्वलितम्, अनेकवर्णं विविधवर्णं व्यात्ताननं विवृतमुखं दीप्तविशालनेत्रं प्रज्वलितवृहन्नयनं त्वां दृष्ट्वा प्रव्यथितान्तरात्माऽतीवभीतमनाः धृतिं धैर्य्यं शमं शान्तिञ्च न विन्दामि न लभे । २४ ।

दंष्ट्रेति । दंष्ट्राकरालानि दंष्ट्राभिर्भीषणानि कालानलसन्निभानि प्रलयकालाग्निसदृशानि ते तव मुखानि दृष्ट्वैव दिशः पूर्व्वादिविवेकेन न जाने, न च शर्म्म सुखं लभे । अतः हे देवेश, हे जगन्निवास, प्रसीद प्रसन्नो भव । २५ ।

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्व्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ
सहास्मदीयैरपि योधमुख्यैः ॥२६॥

वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥२७॥

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभितो ज्वलन्ति ॥२८॥

अमी चेति । अमी च धृतराष्ट्रस्य पुत्राः सर्व्वे अवनिपालसङ्घैः सहैव त्वां विशन्तीत्यग्रेणान्वयः । तथा अमी भीष्मः द्रोणः सूतपुत्रः कर्णः अस्मदीयैरपि योधमुख्यैः धृष्टद्युम्नादिभिः सह त्वां विशन्तीति सम्बन्धः । २६ ।

वक्त्राणीति । एते सर्व्वे त्वरमाणा धावमानाः ते तव दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति । केचित् चूर्णितैः उत्तमाङ्गैः शिरोभिः दशनान्तरेषु विलग्नाः संदृश्यन्ते । २७ ।

यथेति । यथा नदीनां बहवोऽम्बुवेगाः वारिप्रवाहाः अभिमुखाः समुद्राभिमुखाः सन्तः समुद्रमेव द्रवन्ति द्रुतवेगेन प्रविशन्ति, तथा अमी नरलोकवीरा अभितो ज्वलन्ति सर्व्वतः प्रदीप्यमानानि तव वक्त्राणि विशन्ति । २८ ।

यथा प्रदीप्तं ज्वलनं पतङ्गा
विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोका-
स्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥

लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान् समग्रान् वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य्य जगत् समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ॥३०॥

आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥३१॥

यथेति । यथा पतङ्गाः शलभाः समृद्धवेगा अतीव त्वरमाणा नाशाय आत्मविनाशाय प्रदीप्तं दीप्यमानं ज्वलनमग्निं विशन्ति, तथैव लोकाः समृद्धवेगाः स्वयमेव त्वरमाणाः नाशाय आत्मविनाशाय तवापि वक्त्राणि विशन्ति । २९ ।

लेलिह्यस इति । समग्रान् लोकान् ग्रसमानस्त्वं ज्वलद्भिर्दीप्यमानैर्वदनैः समन्तात् सर्व्वतः लेलिह्यसे आस्वादयसि अतिशयेन भक्षयसि पुनः पुनः लेढि । हे विष्णो, समग्रं जगत् तेजोभिरापूर्य्य तव उग्रास्तीव्राः भासो दीप्तयः प्रतपन्ति सन्तापयन्ति । ३० ।

आख्याहीति । उग्ररूपो भीषणमूर्त्तिः भवान् कः, मे मह्यम् आख्याहि कथय । हे देववर, ते तुभ्यं नमः अस्तु । प्रसीद प्रसन्नो भव । आद्यं सर्व्वकारणं भवन्तं विज्ञातुं विशेषेण ज्ञातुमिच्छामि, तव प्रवृत्तिं चेष्टां न प्रजानामि । ३१ ।

श्रीभगवानुवाच—

कालोऽस्मि लोकक्षयकृत् प्रवृद्धो
लोकान् समाहर्त्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्व्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥३२॥
तस्मात् त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्व्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥३३॥
द्रोणञ्च भीष्मञ्च जयद्रथञ्च
कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ॥३४॥

को भवानिति प्रश्नस्योत्तरमाह कालोऽस्मीति। लोकक्षयकृत् प्रवृद्धो महान् कालोऽस्मि। लोकान् समाहर्त्तुं संहर्त्तुम् इह प्रवृत्तः, प्रत्यनीकेषु प्रतिपक्षभूतेष्वनीकेषु सैन्येषु ये सर्व्वे योधाः योद्धारः भीष्म-द्रोणकर्णप्रभृतयोऽवस्थिताः त्वामृते त्वां विना अपि न भविष्यन्ति न जीविष्यन्ति। ३२।

मया हतानेव त्वं हनिष्यसीति मा शङ्किष्ठा इत्याह तस्मादिति। तस्मात् त्वमुत्तिष्ठ, शत्रून् जित्वा यशो लभस्व, समृद्धं राज्यं भुङ्क्ष्व। मया कालरूपेणैव एते पूर्व्वमेव हताः, हे सव्यसाचिन्, त्वं निमित्तमात्रं भव। ३३।

येषां जयेऽर्ज्जुनस्याशङ्कासीत् हतांस्तान् हन्तुं न तस्य कोऽपि प्रयासः स्यादित्याह द्रोणञ्चेति। द्रोणञ्च भीष्मञ्च जयद्रथञ्च कर्णं तथा-

सञ्जय उवाच —

एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥३५॥

अर्ज्जुन उवाच —

स्थाने हृषीकेश तव प्रकीर्त्या
जगत् प्रहृष्यत्यनुरज्यते च।

न्यानपि योधवीरान् संग्रामकुशलान् भूरिश्रवःप्रभृतीन् मया हतानिति त्वं जहि घातय, मा व्यथिष्ठा मा शङ्किष्ठाः, युध्यस्व युद्धं कुरु, रणे सपत्नान् शत्रून् जेतासि जेष्यसि। मयान्तर्यामिणा कालात्मना हतान् जहीत्युक्तिः परमात्मना वधादिप्रवृत्तिं सूचयति, अतस्तस्मिन् मानववद्वैषम्यनैर्घृण्यादिदोषप्रसक्तिरिति विप्रतिपत्तिर्व्यर्थवादमूलापन्नेति। जन्म भगवदिच्छाप्रतिनिर्मितमिति यदि चेन्न कोऽपि दोषः, मृत्यावपि तथैव, तस्यापि कृपान्तरेण जन्मकत्वात्। यद्येवं सा भगवति दोषशून्या कथं नास्मदादिभिः साधितं वधकर्म्म भवति नाधर्म्मायास्माकम्। न वयं जीवनदातारः, मृत्युञ्च नवीनतरजीवने परिणमयितुं समर्थाः। अतोऽस्माकं भगवता नात्र साम्यम्। अर्ज्जुनस्य वधकर्म्मणि प्रवृत्तिः स्वधर्म्मत्वादधर्म्महतानां हननाच्च नाधर्म्मायेत्याचार्य्यस्याभिप्रायः। ३४।

आचार्य्यस्य वचनमिदं श्रुत्वा किमकरोदर्ज्जुनस्तदाह सञ्जय एतदिति। केशवस्य श्रीकृष्णस्य एतत् वचनं श्रुत्वा किरीटी पार्थः वेपमानः कम्पितकलेवरः कृताञ्जलिः नमस्कृत्वा नमस्कृत्य भीतभीतः अतिभयाकुलः सन् प्रणम्य भूयः पुनरपि कृष्णं भयहर्षादिवशादवरुद्धकण्ठत्वेन सगद्गदम् आह। ३५।

एकादशभिरर्ज्जुनस्योक्तिः स्थाने इति। हे हृषीकेश सर्व्वेन्द्रियप्रवर्त्तक अन्तर्यामिन्, तव प्रकीर्त्त्या माहात्म्यकीर्त्तनेन जगत्प्रहृष्यति

रक्षांसि भीतानि दिशो द्रवन्ति
सर्व्वे नमस्यन्ति च सिद्धसङ्घाः ॥३६॥
कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥
त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम्।

प्रकर्षेण हर्षं प्राप्नोति, अनुरज्यते च अनुरागञ्चोपैति यत् तत् स्थाने युक्तम्। सर्व्वे पुनरात्मप्रतिपत्त्यनुसारतो भीताः प्रीतियुक्ता वा भवन्तीत्याह—रक्षांसि भीतानि भयाविष्टानि दिशः द्रवन्ति पलायन्ति, सर्व्वे सिद्धसङ्घा नमस्यन्ति नमस्कुर्व्वन्ति च। एतदपि स्थाने इति। ३६।

ते सिद्धा नमस्कुर्व्वन्तीति न चित्रं तदाह कस्मादिति। हे महात्मन्, हे अनन्त, हे देवेश, हे जगन्निवास, ब्रह्मणो हिरण्यगर्भस्यापि आदिकर्त्रे 'पञ्चमहाभूतसृष्टिद्वारा ब्रह्माणं सृजते' इति श्रीमन्नीलकण्ठः, अतः गरीयसे गुरुतराय ते तुभ्यं कस्माच्च न नमेरन् न नमस्कुर्य्युः, यत् सत् कार्य्यं यत् असत् कारणम, यत् तत्परं का कारणावस्थातीतं तत् त्वमक्षरं ब्रह्म, त्वमेव सर्व्वरूप इत्यर्थः। अत्र श्रीमद्रामानुजः—"न क्षरतीत्यक्षरं जीवात्मतत्त्वम्………जीवात्मवस्तु सदसच्च त्वमेव—सदसच्छब्दनिर्द्दिष्टं कार्य्यकारणभावेनावस्थितं प्रकृतितत्त्वं, नामरूपविभागवत्तया कार्य्यावस्थं सच्छब्दनिर्द्दिष्टं, तदनर्हतया कारणावस्थमसच्छब्दनिर्द्दिष्टं, तत्परं यत्—तस्मात्प्रकृतेः प्रकृतिसम्बन्धिनश्च जीवात्मनः परमन्यत् मुक्तात्मतत्त्वं यत् तदपि त्वमेव।" इति। ३७।

त्वमिति। त्वमादिदेवः जगतः स्रष्टृत्वात्, पुरुषः पुरि शयनात्

वेत्तासि वेद्यञ्च परञ्च धाम
त्वया ततं विश्वमनन्तरूप ॥३८॥
वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥३९॥
नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्व्वत एव सर्व्व ।
अनन्तवीर्य्यामितविक्रमस्त्वं
सर्व्वं समाप्नोषि ततोऽसि सर्व्वः ॥४०॥

सर्व्वशरीरशायित्वात्, पुराणश्चिरन्तनः शरीरनाशादप्यविनाशित्वात्, त्वमेव अस्य विश्वस्य परं निधानमाश्रयः, वेत्ता वेद्यञ्च परञ्च धाम प्राप्यस्थानं त्वमेवासि । कथम्? हे अनन्तरूप, त्वया विश्वं ततं व्याप्तम । ३८ ।

सर्व्वदेवात्मत्वेन स्तौति वायुरिति । त्वं वायुः, यमः, अग्निः, वरुणः, शशाङ्कः, प्रजापतिः कश्यपादिः, प्रपितामहः पितामहस्य ब्रह्मणः पिता, ते तुभ्यं सहस्रकृत्वः नमो नमोऽस्तु, पुनश्च भूयोऽपि ते तुभ्यं नमो नमः । ३९ ।

"वासुदेवः सर्व्वम्" (७।१९) इत्यत्रोक्तस्य सर्व्वपदस्य सार्थकतां स्मरन् स्तौति नम इति । पुरस्तादग्रभागे ते तुभ्यं नमः, अथ पृष्ठतः ते तुभ्यं नमः, हे सर्व्व सर्व्वत एव ते तुभ्यं नमोऽस्तु ; अनन्तवीर्य्यामितविक्रमः अनन्तं वीर्यं सामर्थ्यं यस्य तथा अमितो विक्रमः पराक्रमो यस्य स त्वं सर्व्वं समाप्नोषि—'सर्व्वं समस्तं जगत् प्राप्नोषि सम्यगेकेनात्मना व्याप्नोषि अतस्तस्मादसि सर्व्वः त्वया विनाभूतं न किञ्चिदस्तीत्यर्थः' इति श्रीमच्छङ्करः ; 'सर्व्वमात्मतया समाप्नोषि ततः सर्व्वोऽसि—यस्त्वं

सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि ॥४१॥
यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं
तत् क्षामये त्वामहमप्रमेयम् ॥४२॥

सर्वं चिदचिद्वस्तुजातमात्मतया सम प्राप्नोषि, अतः सर्वस्य चिदचिद्वस्तु-जातस्य त्वच्छरीरतया त्वत्प्रकारत्वात् सर्वप्रकारस्त्वमेव सर्वशब्दवाच्यो-ऽसीत्यर्थः।' इति श्रीमद्रामानुजः; 'सर्वं विश्वं सम्यगन्तर्बहिश्च समा-प्नोषि व्याप्नोषि सुवर्णमिव कनककुण्डलादि स्वकार्यं व्याप्य वर्तसे ततः सर्वस्वरूपोऽसि' इति श्रीमच्छ्रीधरः; 'सर्वं सम प्नोषि एकीभावेनाप्रमत्तात् व्याप्नोषि ततो हेतोः सर्वः।' इति श्रीमत्नील-कण्ठः। ४०।

इदानीं स्वापराधं क्षमापयति सखेति। सखा इति मत्वा प्रसभ-मविनयेन हे कृष्ण, हे यादव, हे सखे इति यदुक्तं तत् तव महिमानं महत्त्वम्, इदं विश्वरूपम्, इममिति पुंल्लिङ्गपाठे इमं विश्वरूपात्मकं महिमानम् अजानता मया प्रमादादनवहितचित्ततया प्रणयेन स्नेहेन वापि उक्तमिति शेषः। ४१।

यच्चेति। यच्च अवहासार्थं परिहासार्थं विहारशय्यासनभोजनेषु एको जनान्तरविरहितोऽथवा तत्समक्षं जनसन्निधौ असत्कृतोऽसि लङ्घितमर्यादोऽसि, हे अच्युत तादृशामदरवहारेणाप्रच्युतस्वभाव, त्वाम-प्रमेयमचिन्त्यप्रभावमहं क्षामये क्षमापये। ४२।

पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ॥४३॥
तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥४४॥
अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥४५॥

पितेति । हे अप्रतिमप्रभाव, न विद्यते प्रतिमा उपमा यस्य तव प्रभावस्य स त्वं चराचरस्य स्थिरचरस्य लोकस्य प्राणिजातस्य त्वं पिता जनयितासि । अस्य जगतः पूज्यः गरीयान् गुरुतरः गुरुः स्वामी शास्त्रोपदेष्टा च असि, लोकत्रयेऽपि त्वत्समो नास्ति, कुतस्त्वत्तोऽन्योऽभ्यधिकः—द्वितीयस्येश्वरस्याभावात् यस्य समो नास्ति तस्याधिकः कोऽपि स्यादित्यसम्भवमेवेति सरलार्थः । ४३ ।

तस्मादिति । यस्मादेवं तस्मात् प्रणम्य नमस्कृत्य कायं देहं प्रणिधाय प्रकर्षेण नीचैर्धृत्वा त्वामीड्यं स्तुत्यमीशं प्रसादये प्रसादं कारयामि । पिता यथा पुत्रस्य, सखा यथा सख्युः, प्रियः यथा प्रियायाः अपराधं क्षमते, तथा, हे देव, सोढुं क्षन्तुमर्हसि । अत्रेव-शब्दलोपः सन्धिरार्षः । ४४ ।

एवं क्षमापयन् स्वाभीष्टं प्रार्थयते अदृष्टपूर्वमिति । अदृष्टपूर्वं

किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्त्ते ॥४६॥

रूपं दृष्ट्वा हृषितोऽस्मि उल्लसितोऽस्मि, तथा करालरूपञ्च दृष्ट्वा मनो मे भयेन प्रव्यथितम्, अतः हे देव, हे देवेश, हे जगन्निवास, तदेव रूपं धारणाविषयभूतं मे मह्यं दर्शय । ४५ ।

किन्तद्रूपं तदाह किरीटिनमिति । हे सहस्रबाहो, हे विश्वमूर्त्ते, किरीटिनं गदिनं चक्रहस्तं तथैव अहं त्वां द्रष्टुमिच्छामि, अतः तेनैव चतुर्भुजेन रूपेण मम धारणाविषयो भव । स्थूलधारणायां विश्वरूपम्, सूक्ष्मधारणायां चतुर्भुजरूपं यथा भागवते "जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः । स्थूले भगवतो रूपे मनः सन्धारयेद्धिया ॥ विशेषस्तस्य देहोऽयं स्थविष्ठस्य स्थवीयसाम् । यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् ॥ आण्डकोषे शरीरेऽस्मिन् सप्तावरणसंयुते । वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः ॥ पातालमेतस्य हि पाद-मूलं पठन्ति पार्ष्णिप्रपदे रसातलम् । महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे ॥" (भा, २स्क, १अ, २३—२६श्लो) इत्यादि । "केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् । चतु-र्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥" (भा, २स्क २अ, ८श्लो) इत्यादि । वैष्णवसिद्धान्तकृता श्रीमता बलदेवेन वेदान्तस्यमन्तके रूपत्रयं साधितमानन्दसंहितावचनेन—"स्थूलमष्टभुजं प्रोक्तं सूक्ष्मं चैव चतुर्भुजम् । परन्तु द्विभुजं प्रोक्तं तस्मादेतत्त्रयं यजेत् ॥" इति । लोकातीतपुरुषे धारणार्थं कल्पितमिदं रूपम्, न तु स्वयं द्विभुज एव । अतएव "स्वकं रूपं दर्शयामास भूयः" (११।५०) इत्यत्र श्रीमन्नीलकण्ठ आह—"स्वकं मानुषं रूपं भूयः पुनर्दर्शयामास, यदर्जुनेन प्रार्थितं चतुर्भुजं धारणाविषयं तदपि तिरोदधे इत्यर्थः" इति । शङ्खचक्रादि-

श्रीभगवानुवाच—

मया प्रसन्नेन तवार्ज्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्व्वम् ॥४७॥

न वेदयज्ञाध्ययनैर्न दानै-
र्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८॥

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥४९॥

चिह्नधारणात्तु केवलमलौकिकपुरुषे तदानीमामोहप्रवेशात्, अन्यथा पौण्ड्रवासुदेवस्य तच्चिह्नधारणेन न भवेन्निन्दार्हत्वं शासनार्हत्वञ्च । ४६ ।

भीतमर्ज्जुनं समाश्वासयन्नाहावार्थ्यो मयेति, न वेदेति, मा त इति त्रिभिः । हे अर्ज्जुन, प्रसन्नेन मया आत्मयोगात् स्वीययोगप्रभावात्—'आत्मन ऐश्वर्य्यस्य सामर्थ्यात्' इति श्रीमच्छङ्करः, 'आत्मनः सत्यसङ्कल्पत्वयोगयुक्तत्वात्' इति श्रीमद्रामानुजः, 'आत्मनो मम योगात् योगमायासामर्थ्यात्' इति श्रीमच्छ्रीधरः, 'निजाचिन्त्यशक्त्या' इति श्रीमद्बलदेवः, 'असाधारणनिजसामर्थ्यात्' इति श्रीमन्मधुसूदनः, 'स्वसामर्थ्यात्' इति श्रीमन्नीलकण्ठः—इदं परं श्रेष्ठं रूपं दर्शितम्, यत् तेजोमयं तेजःप्रचुरं तेजोराशिं—चिद्रूपमिति श्रीमन्नीलकण्ठः—अनन्तम् आद्यं विश्वं विश्वात्मकं मे मम रूपं त्वदन्येन त्वत्तोऽन्येन केनचित् न दृष्टपूर्व्वम् । न वेदयज्ञाध्ययनैः वेदानां यज्ञविद्यानां कल्प-

सञ्जय उवाच—

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥

अर्जुन उवाच—

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥५१॥

स्वाध्यायाच्च अध्ययनैः, न दानैः, न च क्रियाभिरग्निहोत्रादिभिः, नापि उग्रैः कृच्छ्रतमैः तपोभिः एवंरूपोऽहं, हे कुरुप्रवीर, त्वदन्येन त्वत्तोऽन्येन नृलोके मनुष्यलोके द्रष्टुं शक्यः । ईदृक् घोरं भीषणं मम इदं रूपं दृष्ट्वा मा ते व्यथा भूत् मा च विमूढ़भावो विमूढ़चित्तता भूत्, व्यपेतभीः विगतभयः प्रीतमनाः पुनस्त्वं तदेव त्वत्प्रार्थितमिदं रूपं प्रपश्य । ४७—४९ ।

इत्युक्त्वा किं कृतं तेनेत्याह सञ्जयः, इत्यर्जुनमिति । इत्येवमर्जुनं प्रति वासुदेवस्तथाभूतं वचनमुक्त्वा भूयः धारणाद्वयं स्वकं रूपं चतुर्भुजं—मानुषरूपमिति श्रीमन्नीलकण्ठः—दर्शयामास । पुनः महात्मा श्रीकृष्णः सौम्यवपुः द्विभुजो भूत्वा भीतमेनमर्जुनम आश्वासयामास च । "संग्रामनिर्विष्टसहस्रबाहुः" रघु, ६स, ३८ । "संग्रामेषु युद्धेषु निर्विष्टा अनुभूताः सहस्रं बाहवो यस्य, स तथोक्तः, युद्धादन्यत्र द्विभुज एव दृश्यत इत्यर्थः" इति श्रीमल्लिनाथः कृतकालिदासीयव्याख्या यद्यप्यन्या तथाप्युद्दोष्टभावनिबन्धनान्यथादृष्टिः समर्थयतेऽनया । ५० ।

तस्य सौम्यं मानुषं रूपं दृष्ट्वार्जुन आह दृष्ट्वेति । हे जनार्दन, तव इदं सौम्यं मानुषं रूपं दृष्ट्वा इदानीं सचेताः प्रसन्नचित्तः संवृत्तः जातः, प्रकृतिं गतः स्वाभाविकावस्थां लब्धवान् । ५१ ।

श्रीभगवानुवाच—

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥५२॥
नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि यन्मम ॥५३॥
भक्त्या त्वनन्यया शक्यो अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तप ॥५४॥
मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।

विश्वरूपदर्शनं दुर्लभमिति प्रतिपादयन्नाहाचार्य्यः सुदुर्दर्शमिति। यन्ममान्तर्यामिण इदं रूपं दृष्टवानसि तत् सुदुर्दर्शं, इन्द्रियगोचरीभावेन सर्वमात्मन्यन्तर्भूय वर्त्तमानं द्रष्टुमधिकारी विरल एव। देवा अपि अस्य रूपस्य नित्यमविच्छेदेन दर्शनकाङ्क्षिणः दर्शनेप्सवः। ५२।

विविधसाधनसाध्यं नेदं दर्शनमित्याह नाहमिति। न वेदैः ऋग्यजुःसामाथर्व्ववेदैः, न तपसा कृच्छ्रसाधनेन, न दानेन गोभूमिहिरण्यादिवितरणेन, न च इज्यया यज्ञेन पूजया वा एवंविधोऽहं द्रष्टुं शक्यः यत् यथा मम रूपं दृष्टवानसि त्वम्। ५३।

साधनं चेन्निष्फलं किं प्रयासेनेत्यभिप्रायमभ्युपेत्य, भक्त्या स्यात् सफलप्रयास इत्याह भक्त्येति। अनन्यया अव्यभिचारिण्या मदेकनिष्ठया ऐकान्तिक्या भक्त्या तु, हे अर्जुन, एवंविधोऽहं तत्त्वेन तत्त्वतः यथायथं ज्ञातुं, द्रष्टुं साक्षात्कर्त्तुं, प्रवेष्टुमेकत्वमाप्तुं, हे परन्तप, शक्यः। ५४।

नेयमनन्या भक्तिर्हृदयस्यार्द्रभावमात्रं किन्तर्हि कर्म्मादीनामेकत्र सन्निवेशरूपेत्याह मत्कर्म्मकृदिति। मत्कर्म्मकृत् मदर्थं कर्म्म करोतीति

निर्वैरः सर्व्वभूतेषु यः स मामेति पाण्डव ॥५५॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा-
र्जुनसंवादे विश्वरूपदर्शनो नामैकादशोऽध्यायः ।

मत्कर्म्मकृत्; तादृशकर्म्मानुष्ठानेऽभीष्टान्तरसिद्धिः स्यादित्यभिप्रायस्त-
स्मिन् विद्यते इति विशेषणान्तरेण दर्शयति—मत्परमः अहमस्यैव
परमः प्राप्यत्वेन निश्चितः; मत्प्राप्त्याशयैव—मद्भक्तः मम भजनशीलः,
भजने नास्यास्ति विघ्नसम्भावना यतः—सङ्गवर्ज्जितः आसक्तिशून्यः।
आसक्तिशून्यत्वेऽपि विद्वेषिषु द्वेषोऽपरिहार्य्यस्तेन च स्याद्भजनबाधः,
नास्यापि सम्भावनेत्याह—सर्व्वभूतेषु निर्व्वैरः शत्रुभावरहितः, एवम्भूतो
यो भक्तः, हे पाण्डव, स मामन्तर्यामिणमेति प्राप्नोति। पद्येऽस्मिन्
गीताशास्त्रस्य सारभूतोऽर्थो निबद्ध इति स्वीकृत्य सर्व्वसम्प्रदायमेवानु-
मोदितवन्तः प्राचीनव्याख्यातार इति सत्यस्यैव महिमा। “अधुना
सर्व्वस्य गीताशास्त्रस्य सारभूतोऽर्थो निःश्रेयसार्थमनुष्ठेयत्वेन समुच्चित्यो-
च्यते मत्कर्म्मकृदिति” इति श्रीमच्छङ्करस्तदनुयायिनश्च। श्रीमद्रामा-
नुजो व्याख्यातवानिमं श्लोकमेवम्—“वेदाध्ययनादीनि सर्व्वाणि मदा-
राधनरूपाणीति यः करोति स मत्कर्म्मकृत्, मत्परमः सर्व्वेषामारम्भा-
णामहमेवोपदेश्यो यस्य स मत्परमः; मत्यर्थमत्प्रियत्वेन मत्कीर्त्तन-
[illegible]नामादिभिर्विनात्मधारणमलभमानो मदे[illegible]योजन-
तया यः सततं तानि करोति स मद्भक्तः; सङ्गवर्ज्जितः [illegible]कप्रियत्वे-
नेतरसङ्गमसहमानः; निर्व्वैरः सर्व्वभूतेषु मत्संश्लेषवियोगैकसुखदुःख-
स्वभावत्वात् स्वदुःखस्य स्वापराधनिमित्तत्वानुसन्धानात् सर्व्वभूतानां
परमपुरुषतन्त्रत्वानुसन्धानाच्च सर्व्वभूतेषु वैरनिमित्ताभावात् तेषु निर्व्वैरः;
य एवम्भूतः स मामेति मां यथावदवस्थितं प्राप्नोति निरस्ताविद्याद्य-
शेषदोषगन्धो मदेकानुभवो भवतीत्यर्थः” इति। श्रीमता नील-
कण्ठेन पद्येनानेन सर्व्वशास्त्रार्थसंग्रह एवं कृतः—“मदर्थमेव कर्म्म
करोतीति मत्कर्म्मकृत्, अहमेव परमो निष्कृष्टः प्राप्यो यस्येति

मत्परमः, [illegible] [illegible] [illegible] [illegible] [illegible]
उक्तः; मम [illegible] [illegible] [illegible], [illegible]-
वर्जित [illegible] एकान्तभावनिष्ठ इत्युक्तम्, निर्वैरं [illegible] [illegible]
भगवदात्मना पश्येदित्युक्तम्, अन्यथा भेदबुद्धिमतो निर्वैरं [illegible]"
इति । ५५ ।

इति श्रीमद्भगवद्गीतान्वयभाष्ये एकादशोऽध्यायः ।

द्वादशोऽध्यायः ।

अर्जुन उवाच—

एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥

एकादशाध्यायात् पूर्व्वं यदुक्तं तेन निरुपाधिकं ब्रह्मैवोपास्यमित्यायातम्, एकादशेन सोपाधिकं ब्रह्मोपास्यमिति प्रतिभाति। पूर्व्वमुक्तं निरुपाधिकं ब्रह्म, सम्प्रत्युक्तं सोपाधिकं ब्रह्म ; एतयोरुपास्यत्वे सिद्धे कस्य वा तयोरुपासनं श्रेयस्तदेव पृच्छति एवमिति। अत्र श्रीमच्छङ्कर आह "द्वितीयप्रभृतिष्वध्यायेषु विभूत्यन्तेषु परमात्मनो ब्रह्मणोऽक्षरस्य विध्वस्तसर्व्वविशेषणस्योपासनमुक्तम्, सर्व्वयोगैश्वर्य्यसर्व्वज्ञानशक्तिमत्सर्व्वोपाधेरीश्वरस्य तव चोपासनं तत्र तत्रोक्तम्। विश्वरूपाध्याये तु ऐश्वरमाद्यं समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासनार्थमेव त्वया। तच्च दर्शयित्वोक्तवानसि मत्कर्मकृदित्यादि। अतोऽनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीति अर्जुन उवाच एवमिति" इति। श्रीमद्रामानुज आह—"भक्तियोगनिष्ठानां प्राप्यभूतस्य भगवतो नारायणस्य निरङ्कुशैश्वर्यं साक्षात्कर्तुकामायार्जुनाय अनवधिकातिशयकारुण्यसौन्दर्य्यौदार्य्यसौशील्यादिगुणसागरेण सत्यसङ्कल्पेन भगवता स्वैश्वर्यं यथावदवस्थितं दर्शितम्, उक्तञ्च तत्त्वतो भगवज्ज्ञानदर्शनप्राप्तीनामैकान्तिकात्यन्तिकभगवद्भक्तिलभ्यत्वम्। अनन्तरमात्मप्राप्तिसाधनभूतादात्मोपासनात् भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादनशैघ्र्यात् सुखोपादानाच्च श्रैष्ठ्यम् ; भगवदुपासनोपायश्च तदशक्तस्याक्षरनिष्ठता तदपेक्षिताश्चोच्यन्ते। भगवदुपासनस्य प्राप्यभूतोपायस्य शैघ्र्यात् श्रैष्ठ्यम्—'योगिनामपि सर्व्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥'

इत्यवोक्तम्।" इति। श्रीमन्माध्व आह—"अव्यक्तोपासनात् व्यक्तोपासनस्योत्तमत्वं प्रदर्श्य तदुपायं दर्शयत्यस्मिन्नध्याये" इति। श्रीमच्छ्रीधर आह—"पूर्व्वाध्यायान्ते 'मत्कर्म्मकृत् मत्परमो मद्भक्तः' इत्येवं भक्तिनिष्ठस्य श्रेष्ठत्वमुक्तम्, 'कौन्तेय प्रतिजानीहि' इत्यादिना च तत्र तत्रैव श्रेष्ठत्वं निर्णीतम्, तथा 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इत्यादिना 'सर्व्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि' इत्यादिना च ज्ञाननिष्ठस्य श्रेष्ठत्वमुक्तम्, एवमुभयोः श्रेष्ठत्वविशेषजिज्ञासया भगवन्तमर्ज्जुन उवाच एवमिति।" इति। श्रीमद्बलदेव आह—"जीवात्मानं यथावज्ज्ञात्वा, विज्ञाय च तदंशी हरिर्ध्येय इति 'अविनाशि तु तद्विद्धि' इत्यादिभिर्द्वितीयादिष्वेकः पन्था वर्णितः। जीवात्मानं हरेरंशं ज्ञात्वैव तदंशी हरिः तच्छ्रवणादिभक्तिभिर्ध्येय इति 'मय्यासक्तमनाः पार्थ' इत्यादिभिः सप्तमादिषु द्वितीयः पन्थाः प्रदर्शितः। तत्रैव 'प्रयाणकाले' इत्यादिना योगोपसृष्टा 'ज्ञानयज्ञेन चाप्यन्ये' इत्यनेन ज्ञानोपसृष्टा च भक्तिरुक्ता। भक्तिषट्कात् प्राक् षष्ठान्ते केवलां भक्तिमुपदेक्ष्यतो 'योगिनामपि सर्व्वेषाम्' इत्यादिपद्येन स्वैकान्तिनां युक्ततमता चाभिहिता। तत्रार्ज्जुनः पृच्छत्येवमिति।" इति। श्रीमन्मधुसूदन आह—"पूर्व्वाध्यायान्ते 'मत्कर्म्मकृत् मत्परमो मद्भक्तः सङ्गवर्ज्जितः। निर्व्वैरः सर्व्वभूतेषु यः स मामेति पाण्डव' इत्युक्तम्। अत्र मच्छब्दार्थे सन्देहः। किं निराकारमेव सर्व्वस्वरूपं वस्तु मच्छब्देनोक्तं भगवता, किं वा साकारम् इत्युभयत्रापि प्रयोगदर्शनात्, 'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते। वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः' इत्यादौ निराकारं वस्तु व्यपदिष्टम्, विश्वरूपदर्शनानन्तरञ्च 'नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥' इति साकारं वस्तु। उभयोश्च भगवदुपदेशयोरधिकारिभेदेनैव व्यवस्थया भवितव्यम्, अन्यथा विरोधात्। तदेवं सति मया मुमुक्षुणा किं निराकारमेव चिन्तनीयम्, किं वा साकारमिति स्वाधिकारनिश्चयाय सगुणनिर्गुणयोर्विशेषबुभुत्सया अर्ज्जुन उवाच एवमिति"

इति । श्रीमच्छ्रीकण्ठ आह—"पूर्व्वाध्यायान्ते 'मत्कर्म्मकृत् मत्परमः' इत्यादिना स्वभजनमुक्तम्, तत्र मच्छब्दार्थं किं सगुणमुत निर्गुणं ब्रह्म, उभयथापि मच्छब्दस्य पूर्व्वं प्रयोगदर्शनात् सन्दिहानः पृच्छति एवमिति" इति । श्रीमद्विश्वनाथ आह—"भक्तिप्रकरणस्योपक्रमे 'योगिनामपि सर्व्वेषां मद्गतेनान्तरात्मना । श्रद्धावान् भजते यो मां स मे युक्ततमो मतः' इति भक्तेः सर्व्वोत्कर्षो यथा श्रुतः तथैवोपसंहारेऽपि तस्या एव सर्व्वोत्कर्षं श्रोतुकामः पृच्छति" इति । "'द्वे रूपे वासुदेवस्य व्यक्तं चाव्यक्तमेव च । अव्यक्तं ब्रह्मणो रूपं व्यक्तमेतच्चराचरम् ॥' इति स्मरणात् अव्यक्तं निर्व्विशेषं परं ब्रह्म, व्यक्तन्तु मायोपाधिकमपरं ब्रह्म सकार्य्यम्" इति यन्निर्णीतं श्रीमता शङ्करानन्देन तात्पर्य्यबोधिन्यां 'ये यथा मां प्रपद्यन्ते' (४।११) इत्यत्र तदेवाभिमतं श्रीमच्छङ्करस्य तदनुगामिनाञ्च, वैष्णवाचार्य्याणान्त्वेतद्विपरीतम् । तेषां पुनरैश्वर्य्यवदेव परं ब्रह्म, अनैश्वर्य्यवदपरं विभूतिर्वा । उक्तञ्च श्रीमन्माध्वभाष्यव्याख्याप्रमेयदीपिकाकृता श्रीमता जयतीर्थेन "भगवतो विष्णोः साकारत्वेऽपि ब्रह्मणो निराकारत्वमेव । न च भगवानेव ब्रह्म तस्य तदुत्तमत्वेन ततोऽन्यत्वात्" इति । तथाच श्रीमता रूपेण लघुभागवतामृते "भगवांस्तु परब्रह्म परात्मा परमेश्वरः । सुसान्द्रसच्चिदानन्दविग्रहो महिमार्णवः ॥ सगुणत्वागुणत्वादिविरोधाः प्रविशन्ति तम् । महाविभूतिर्ब्रह्मास्य प्रसिद्धेत्यं तयोर्भिदा ॥" इति ।

अन्वोऽर्थ्यस्त्वेवमिति । एवं सततयुक्ताः 'मत्कर्म्मकृत्' इत्याद्युक्तप्रकारेण नित्यं समाहितचित्तास्त्वन्निष्ठाः सन्तो ये भक्तास्त्वां सर्व्वान्तर्यामिणं यथादर्शितविश्वरूपमिति श्रीमच्छङ्करः पर्य्युपासते ध्यायन्ति, ये चापि अक्षरम् अस्थूलादिलक्षणं निर्व्विशेषं ब्रह्म, अतोऽव्यक्तं चक्षुराद्यगोचरं पर्य्युपासते, तेषां मध्ये योगवित्तमाः के ? अत्र श्रीमद्रामानुजः—"एवं 'मत्कर्म्मकृत्' इत्युक्तेन प्रकारेण सततयुक्ता भगवन्तं त्वामेव परमप्राप्यं मत्वाना ये भक्तास्त्वां सकलविभूतियुक्तमनवधिकातिशयसौन्दर्य्यसौशील्यसार्व्वज्ञ्यसत्यसङ्कल्पत्वाद्यनन्तकल्याणगुणसागरं परि-

श्रीभगवानुवाच—

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।

श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥

पूर्व्वमुपासते, ये चाप्यक्षरं प्रत्यगात्मस्वरूपं तदेवाव्यक्तं चक्षुरादिकरणैर्नानभिव्यक्तस्वरूपमुपासते तेषामुभयेषां के योगवित्तमाः के स्वसाध्यं प्रति शीघ्रगामिन इत्यर्थः । 'भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्' इत्युत्तरत्र योगवित्तमत्वं शैघ्र्यविषयमिति व्यञ्जयिष्यते" इति । श्रीमन्मधुसूदनः—"एवं 'मत्कर्म्मकृत्' इत्याद्यनन्तरोक्तेन प्रकारेण सततयुक्ता निरन्तर्य्येण भगवत्कर्म्मादौ सावधानतया प्रवृत्ता भगवद्भक्ताः साकारावस्थैकशरणास्त्वामित्थंविधं साकारं पर्य्युपासते सततं चिन्तयन्ति, ये चापि सर्व्वतो विरक्तास्त्यक्तसर्व्वकर्म्माणोऽक्षरं·········सर्व्वोपाधिरहितं निर्गुणं ब्रह्म, अतएवाव्यक्तं सर्व्वकरणागोचरं निराकारं त्वां पर्य्युपासते, तेषामुभयेषां मध्ये के योगवित्तमा अतिशयेन योगिनः······केषां मार्गं मयानुसरणीयमित्यर्थः" इति । १ ।

प्रश्नस्योत्तरमाह मय्येति । मयि सर्व्वान्तर्य्यामिणि—विश्वरूपे परमेश्वरे इति श्रीमच्छङ्करः, परमेश्वरे सर्व्वज्ञत्वादिगुणविशिष्टे इति श्रीमच्छ्रीधरः, नीलोत्पलश्यामलत्वादिधर्म्मिणि स्वयं भगवति देवकीसूनाविति श्रीमद्बलदेवः, श्यामसुन्दराकारे इति श्रीमद्विश्वनाथः, भगवति वासुदेवे परमेश्वरे सगुणे ब्रह्मणि इति श्रीमन्मधुसूदनः—नित्ययुक्ताः सततोद्युक्ता मन्निष्ठाः, परया प्रकृष्टया श्रद्धया उपेता युक्ता उपासते, ते युक्ततमा योगवित्तमा मे मम मताः । अत्र सगुणब्रह्मोपासनस्य श्रेष्ठत्वमाचार्य्याभिमतं पश्यन्तो निर्गुणब्रह्मोपासनस्य श्रेष्ठत्वादिमसहमाना इव अर्ज्जुनस्य निर्गुणोपासनानधिकारित्वमेव श्रेष्ठत्ववचने कारणमुन्नाययन्ति, तथाहि श्रीमन्मधुसूदनः—"अत सर्व्वज्ञो भगवानर्ज्जुनस्य सगुणविद्यायामेवाधिकारं पश्यंस्तं प्रति तां विधास्यति यथाधिकारं तारतम्योपेतानि साधनानि च" इति । श्रीमन्नीलकण्ठस्तु "निर्गुणस्य

ये त्वक्षरमनिर्द्देश्यमव्यक्तं पर्य्युपासते ।
सर्व्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम् ॥३॥
संनियम्येन्द्रियग्रामं सर्व्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्व्वभूतहिते रताः ॥४॥

दुष्प्राप्यत्वोक्त्यैव श्रेष्ठत्वं सूचयन् सगुणप्राशस्त्यञ्च शब्दतो दर्शयन् श्रीभगवानुवाच" इत्युक्त्वा "मे मम 'ज्ञानी त्वात्मैव मे मतम्' इति ज्ञानिनमात्मत्वेनैव पश्यतो मूर्खेष्वपि कारुण्यात् पक्षपातवतः सर्व्वज्ञस्य युक्ततमा मताः" इत्याह । स्वयं श्रीमच्छङ्करस्तु "न हि भगवत्स्वरूपाणां सतां युक्ततमत्वमयुक्ततमत्वं वा वाच्यम्" इति युक्त्या निर्गुणोपासकानां श्रेष्ठत्वं संसाध्य सगुणोपासकानां श्रेष्ठत्वनिर्व्वचने हेतुर्नैरन्तर्य्येण भगवच्चित्ततया तेषामहोरात्रातिवाहनमित्युक्तवान् । वस्तुतस्तु स्वसाध्यं प्रति शीघ्रगामित्वमशीघ्रगामित्वमेव युक्ततमत्वे हेतुरिति श्रीमद्रामानुजदत्ता युक्तिरेव साधीयसी स्वयमाचार्य्येण तथैवोक्तत्वात्—"क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" "भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्" इत्यत्र । २ ।

अक्षरोपासनेनापि सर्व्वान्तर्यामिणमेव प्राप्नुवन्तीत्याह ये त्विति संनियम्येति । ये तु अक्षरं परमं ब्रह्म—प्रत्यगात्मस्वरूपमिति श्रीमद्रामानुजः, निर्व्विशेषं ब्रह्मेति श्रीमन्मधुसूदनः, अस्थूलमनण्वादिश्रुत्या सर्व्वधर्म्मशून्यमिति श्रीमन्नीलकण्ठः—अनिर्द्देश्यं निर्द्दिष्टुमशक्यम्—देहादन्यतया देवादिशब्दानिर्द्देश्यमिति श्रीमद्रामानुजः, शब्देन व्यपदेष्टुमशक्यमिति श्रीमन्मधुसूदनः ; अव्यक्तं प्रपञ्चातीतमिन्द्रियाविषयम्—न केनापि प्रमाणेन व्यज्यत इत्यव्यक्तमिति श्रीमच्छङ्करः, रूपादिहीनमिति श्रीमच्छ्रीधरः, शब्दप्रवृत्तिनिमित्तजातिगुणक्रियासम्बन्धरहितमिति श्रीमन्मधुसूदनः—सर्व्वत्रगं सर्व्वव्यापि—सर्व्वव्यापि सर्व्वकारणमतो जात्यादिशून्यमिति श्रीमन्मधुसूदनः, सत्तारूपेण स्फुरणरूपेण सर्व्वत्र गतमिति श्रीमन्नीलकण्ठः ; अचिन्त्यं चिन्तयितुमशक्यम्—

देवादिदेहेषु वर्त्तमानमपि तद्विजातीयतया तेन रूपेण चिन्तयितुमन-र्हमिति श्रीमद्रामानुजः ; कूटस्थं निर्व्विकारं सर्व्वकालमेकस्वभाव-तया स्थितं संसर्गानित्यताशून्यम्—मायाप्रकृत्यादिशब्दवाच्यतया प्रसिद्धं यत् तत् कूटं तस्मिन् कूटे स्थितमिति श्रीमच्छङ्करस्तदनुयायिनश्च, कूटस्थं सर्व्वसाधारणमतो देवाद्यसाधारणाकारासम्बन्धमिति श्रीमद्रामा-नुजः, 'ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्य्यनुत्पत्त्यवृद्ध्यव्यययोगि यत् तन्नित्यम्' इति श्रीपतञ्जलिप्रोक्ते नित्यलक्षणे श्रीमत्कैयट आह 'तत्र ध्रुवं कूटस्थमिति संसर्गानित्यता परिहृता,' 'संसर्गानित्यता यथा स्फाटिकस्य लाक्षाद्युपधाने स्वरूपतिरोधानेन पररूपभासः'— ; अचलं निःस्पन्दम्, ध्रुवं नित्यं वृद्ध्यादिरहितमप्रच्युतस्वभावम् इन्द्रि-यग्राममिन्द्रियसमुदायं संनियम्य संहृत्य सर्व्वत्र सर्व्वस्मिन् काले समबुद्धयः इष्टानिष्टप्राप्तौ समा तुल्या बुद्धिर्येषां ते मां सर्व्वान्त-र्यामिणमेव प्राप्नुवन्ति । कथम् ? सर्व्वभूतहिते रताः, सर्व्वेषां भूतानां मदन्तःस्थानां हिते रताः । अक्षरस्य सर्व्वत्रगत्वचिन्तया मया सर्व्वं ततमिति ज्ञातवन्तः, कूटस्थत्वचिन्तया लब्धेनाक्षरस्य प्रपञ्चातीतत्वज्ञानेन भूतानां तदन्तःस्थत्वनिर्द्धारणवन्तः । एवं निर्द्धार्य्य तेषां हिते रताः, सुतरां "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्व्वमिदं ततम् ॥" (८।२२) इति परमपुरुषज्ञानं लब्धवन्तो ये "परस्तस्मात्तु भावोऽन्यो-ऽव्यक्तोऽव्यक्तात् सनातनः । यः स सर्व्वेषु भूतेषु नश्यत्सु न विनश्यति । अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ॥" (८।२०।२१) इत्यक्षर-चिन्तनरता आसन् ।

'मय्यावेश्य मनः' 'ते प्राप्नुवन्ति मामेव' इत्यत्र व्याख्यातारो विश्व-रूपादिकं निर्द्धारितवन्तः, वयन्तु सर्व्वान्तर्यामिणमिति पार्थक्यं संस्का-रदोषमस्माकमुद्भावयतीति विप्रतिपत्तिः—'वयन्तु यस्याश्चेयं गीता प्रधानतस्तदुक्त्यनुसरणेन तस्या व्याख्याने कृतमनोरथाः' इत्यस्माकं समयं स्मारयित्वा, कोऽयमुपास्योऽस्मिन् शास्त्रे स्वयमाचार्य्येणोपदिष्ट

इति तदन्यमेव दर्शयित्वा—अपाकर्त्तव्या । "सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः" (६।३१) इत्यादिषु सर्वभूतस्थस्यान्तर्यामिणो भजनमेव स्वयमाचार्य्येणोपदिष्टमिति न केनाप्यस्वीकर्त्तुं शक्यम् । अयं भाष्यकृता श्रीमता शङ्करेणातएव भाष्यारम्भे पौराणिकवचनेनान्तर्यामि-णमेवानुस्मृतवान् । तद्यथा—"ओं नारायणः परोऽव्यक्तादण्डमव्यक्त-सम्भवम् । अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥" उक्तो-ऽस्याभिप्रायः श्रीमद्‌गिरिणा—"भगवान् भाष्यकारः·········इतिहास-पुराणयोः प्रख्याभिख्यापितगीताशास्त्रेण एकवाक्यतामभिप्रेत्य पौरा-णिकश्लोकमेकमेवान्तर्यामिविषयमुदाहरति नारायण इति । 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥' इति स्मृतिसिद्धः स्थूलदृशां नारायणशब्दार्थः, सूक्ष्म-दर्शिनः पुनराचक्षते—नरशब्देन चराचरात्मकं शरीरजातमुच्यते, तत्र नित्यसन्निहिताश्चिदाभासा जीवा नारा इति निरुच्यन्ते, तेषामयनमा-श्रयो नियामकोऽन्तर्यामी नारायण इति यमधिकृत्यान्तर्यामिब्राह्मणम्, श्रीनारायणाख्यमथाम्नायश्चाधीयते, तदनेन शास्त्रप्रतिपाद्यं विशिष्टं तत्त्वमादिष्टं भवति ।" इति । ननु स्थूलं विश्वरूपमेव गीताशास्त्र-स्योपास्यं भवितुमर्हति, अन्यथा तत्प्रदर्शनस्य व्यर्थत्वमायाति । न, "त्वया ततं विश्वमनन्तरूप" (११।३८), "सर्वं समाप्नोषि ततोऽसि सर्वः" (११।४०) इत्यादिभिः प्रदर्श्यते "यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्" (८।२२) इति परमपुरुषस्य सर्वान्तर्भावकत्वं सर्व-गतत्वञ्च प्रत्यक्षविषयं कर्त्तुं विश्वरूपप्रदर्शनम्, अन्यथाचार्य्येणोपसंहारे "ईश्वरः सर्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति" (१८।६१), "तमेव शरणं गच्छ सर्वभावेन भारत" (१८।६२) इति सर्वान्तर्याम्युपास्यत्वेन नोप-न्यस्येत । यद्येवं कथमाचार्य्येणोक्तम् "इदं रूपं परं दर्शितमात्म-योगात्" (११।४७) इति ? "न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः । एवंरूपः शक्यो अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर" (११।४८) इति यदाचार्य्येणोक्तं तेन 'अहमन्तर्यामी एवंरूपः' सर्वगत :

सर्वमस्तमूर्त्तं विद्यमान इति तत् तदुपयोगित्वं रूपं 'विश्वरूपत्व'-मिति परामर्शः, तच्च प्रतरणीकरणमेवाभिप्रेतम्। यत्तु विष्णुपुराणे प्रोक्तम्—"सर्व्वेषु समस्तेषु विविधध्यानकर्म्मसु। विश्वमेतत् परं चान्यस्माद्भेदभिन्नदृशां नृप॥ प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्। वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्॥ तच्च विष्णोः परं रूप-मरूपस्याजमक्षरम्। विश्वरूपाच्च वैरूप्यलक्षणं परमात्मनः॥ न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः। ततः स्थूलं हरे रूपं चिन्तयेद्विश्वगोचरम्॥ हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः। मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः॥ गन्धर्व्वयक्षा दैत्याद्याः सकला देवयोनयः। मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः॥ भूप भूतान्यशेषाणि भूतानां ये च हेतवः। प्रधानादिविशेषान्तं चेतनाचेतनात्मकम्॥ एकपादं द्विपादञ्च बहुपादमपादकम्। मूर्त्त-मेतत् हरे रूपं भावनात्रितयात्मकम्॥" (वि, पु, ६अं, ७अ, ५२—५८श्लो) इति, तत् पुनर्भगवच्छक्तिव्याप्तत्वेन चिन्तनीयं स्थूलरूपमित्य-भिप्रेत्य, अतएवोक्तम् "एतत्सर्व्वमिदं विश्वं जगदेतच्चराचरम्। पर-ब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम्॥" (६०श्लो); टीका च—"एतच्च न तत्त्वतो विष्णोः स्वरूपमिति चिन्तनीयं किन्तु तच्छक्ति-व्याप्तमित्याह शक्तिसमन्वितमिति।" इति। मूर्त्तं भगवच्छक्ति-व्याप्तत्वं चिन्तनीयम् अमूर्त्तं तु अक्षरः परमपुरुषश्च, तद्यथा—"अमूर्त्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः। समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः॥ तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्महत्। समस्त-शक्तिरूपाणि तत्करोति जनेश्वर॥ देवतिर्य्यङ्मनुष्यादिचेष्टावन्ति स्वली-लया। जगतामुपकाराय न सा कर्म्मनिमित्तजा। चेष्टा तस्याप्रमे-यस्य व्यापिन्यव्याहतात्मिका॥" (वि, पु, ६अं, ७अ, ६८—७१श्लो) इति। अस्मिन् शास्त्रे परोक्षभावं परित्यज्यापरोक्षभाव एवोपदिष्ट इति अक्षरस्य परमपुरुषस्योपास्यत्वेनोपस्थापितः—"परस्तस्मात्तु भावो-ऽन्योऽव्यक्तोऽव्यक्तात् सनातनः। यः स सर्व्वेषु भूतेषु नश्यत्सु न विन-

यति ॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम ॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यान्तःस्थानि भूतानि येन सर्व्वमिदं ततम् ॥" (८।२०—२२) इत्येवमादिभिः।

गीताशास्त्रस्य सर्व्ववेदवेदान्तसारभूतत्वात् कुतो वैतद्द्विविधमुपासनं क्रमेणाभिव्यक्तमित्यत्र चिन्तनीयम्। दृश्यते पुनर्ऋक्संहितायां सर्व्वासु मन्त्रेषु क्रियास्वेकैव शक्तिर्विराजतेऽतः शक्त्यैकया सर्व्वस्यैकत्वम् —"महद्देवानामसुरत्वमेकम्" (ऋक्सं, ३म, ५५सू, १—२२ऋक्) इति ऋचामन्तिमवाक्येन। "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्ज्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्" (१०।४१) इत्युक्तिस्त्वाचार्य्यस्य ऋगुक्तं शक्त्यैकत्वं ज्ञानभूमावधिरोहयति। वेदान्तेषु पुनः प्रथमं (छा, उ, ४।५) प्रकाशवत्त्वेन दिक्षु, अनन्तत्वेन पृथिव्यन्तरिक्षदिवसमुद्रेषु, ज्योतिष्मत्त्वेनाग्निसूर्य्यचन्द्रविद्युत्सु, आयतनत्वेन प्राणचक्षुःश्रोत्रमनःसु ब्रह्मोपासना विहिता। तदनन्तरम् (छा, उ, ७।१—१५) उत्तरोत्तरभूयस्त्वेन नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नतेजआकाशस्मराशाप्राणेषु ब्रह्मदृष्टिं विधाय सर्व्वांस्तानात्मन्यन्तर्भूय (छा, उ, ७।२३—२६) भूमाहमात्मसु व्याप्तित्वेन ब्रह्मोपासनं विहितम्। आदित्यादिष्वात्मनि चाधिष्ठितेन पुरुषेणाभिदा ब्रह्मोपासना च (बृ, आ, उ, ४।१) दृश्यते। अन्नप्राणमनोविज्ञानानन्देषु ब्रह्मान्वेषणमन्नमयादिपञ्चकोषविचारत्वेन गृहीतम्। तत्र (तै, उ, २।१—५) अन्नरसमयो हि पुरुषस्य देहः, सुतरामन्नमयकोषविचारे प्रथमन्तावत् स्वदेहे ब्रह्मान्वेषणं विहितम्। अन्नन्तु मूर्त्तं जगत् (ऐ, उ, ३।२), अतोऽन्नमयकोषविचारे सर्व्वं विश्वं देहत्वेन परिकल्प्य तत्र ब्रह्मान्वेषणमपि सिद्ध्यति। यतः प्राण एवान्नस्य भोक्ता (छा, उ, ५।२।१), देहस्य सर्व्वाश्चेष्टाश्च तत एव प्रसरन्ति, अतोऽन्नात् प्राणस्य श्रेष्ठत्वात् तस्मिन् ब्रह्मान्वेषणं प्राणमयकोषविचारे विहितम्। "प्राणो ह्येष यः सर्व्वभूतैर्विभाति" (मु, उ, ३।१।४) इत्यत्र प्राणस्य प्राणत्वेन प्रत्यक्षी-

अन्नं ब्रह्मेत्यन्यदेव। प्राणमयत्वात्मनः प्राणादपि तस्य केवलत्वम्। मनसि ब्रह्मान्वेषणं न सम्यग्भवति तस्य सङ्कल्पविकल्पमयत्वादतो विज्ञाने बुद्धौ निश्चयात्मिकायां ब्रह्मान्वेषणं विज्ञानमयकोषविचारे द्रष्टव्यम्। बुद्धा निश्चयात्मिकयानुष्ठीयमानेन कर्मणा चित्तशुद्धावानन्दस्योदयः। आनन्दे ब्रह्मान्वेषणस्य पूर्णता। अत आनन्दमयकोषपरमः। किमिदं ब्रह्म? "सत्यं ज्ञानमनन्तम्" (तै, उ, २।१) इति। एवं वेदान्तेषु सर्वत्र मूर्त्तामूर्त्तेषु ब्रह्मविमर्शनम्—"द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चामूर्त्तञ्च—मर्त्यञ्चामृतञ्च, स्थितञ्च यच्च, सच्च त्यच्च। (बृ, आ, उ, ४।३।१) इति। अस्या अर्थः—मूर्त्तं हि मर्त्यं, स्थितं परिच्छिन्नं, सत् प्रत्यक्षेणोपलभ्यम्; अमूर्त्तं पुनः अमृतम्, यत् अपरिच्छिन्नं व्यापि, त्यच्च चक्षुरादेरविषयम्। मूर्त्तं पृथिव्यप्तेजश्च, अमूर्त्तं वायुरन्तरिक्षञ्च (बृ, आ, उ, ४।३।२—५)। "शं नो मित्रः, शं वरुणः, शं नो भवत्वर्यमा, शं न इन्द्रो बृहस्पतिः, शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे, नमस्ते वायो, त्वमेव प्रत्यक्षं ब्रह्मासि, त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि (तै, उ, १।१) इत्यत्रामूर्त्तवायुरेव प्रत्यक्षब्रह्मत्वेन गृहीतः। एवं दृश्यते जगता जीवेन चाभिदा ब्रह्मोपलब्धिर्न पुनस्तदतीतत्वेन। "सर्वं खल्विदं ब्रह्म तज्जलानिति" (छा, उ, ३।१४।१) इति सर्वदृष्ट्या ब्रह्मोपासनम्। इयं शाण्डिल्यविद्या, अतएव हि तदनुसारि शाण्डिल्यसूत्रम्—"भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपत्वात्। ८५।" इति। "वासुदेवः सर्वम्" (७।१९) इत्यत्र, "सर्वं समाप्नोषि ततोऽसि सर्वः" (११।४०) इत्यनेनान्यदेव। एवं यदि वेदान्तेषु जगज्जीवस्य ब्रह्मत्वेनोपास्यत्वेन परिगृहीतं, कुतस्तदतीतत्वेन तस्य ग्रहणं प्रशस्तम्? तदपि वेदान्ते परिलक्ष्यते, तद्यथा—"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं, न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्, अदृष्टमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतम् चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः (मा, उ, ७) इति। युगपज्जगज्जीवत्वेन तदतीतत्वेन च गृहीत्वोपासनमन्तर्यामिब्राह्मणे स्फुटतर-

मासीत् । तद्यथा—"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः" इत्येवं पृथिव्यबग्न्यन्तरिक्षवायुदिवादित्यदिक्चन्द्रतारकाकाशतमस्तेजोभूतप्राणवाक्चक्षुःश्रोत्रमनस्त्वग्विज्ञानात्मरेतःसु तिष्ठन्तं तदतीतमन्तर्यामिणमुपदिश्यैवदन्तर्यामिब्राह्मणम् । गीताशास्त्रे पुनस्तस्यैवोपास्यत्वम् ।

अन्तर्यामी पुनर्ब्रह्मापि सर्व्वात्मत्वेन गृहीतः । आचार्य्योऽपि विभूतिनिर्व्वचनप्रारम्भे तमात्मत्वेन गृहीतवान् । यथा—"अहमात्मा गुडाकेश सर्व्वभूताशयस्थितः" (१०।२०) इति । "आत्मैव पारमार्थिकं रूपम्" इति श्रीमद्गिरिणोक्तम् । तस्तु स्वरूपैक्यवशाद्यदपि नासमञ्जसमिति लक्ष्यते तथापि जीवात्मनोऽल्पज्ञत्वादिवशात् परमात्मनो भिन्नत्वमस्य नापैति । "सर्व्वकारणत्वेन सर्व्वज्ञत्वेन सर्व्वेश्वरत्वेन च परस्य ध्येयत्वमपेक्षितं नान्यस्य कस्यचित्कारणस्यादित्यादिषु ध्येयता" इति यत्नेनोक्तं तदिहापि बोध्यम् । "अहमात्मा" इत्यत्राहंशब्दवाच्योऽन्तर्याम्येव ध्येयो न तु जीवः । अन्तर्यामिणो ध्येयत्वे "नभोलिङ्गमलिङ्गमीश्वरम्" (भा, १स्क, ६अ, १६श्लो) इति युक्तिमनुसृत्यात्मलिङ्गेन तस्य ध्यानमिति प्राहुः । "नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथन्तदुपलभ्यते ॥" (कठ, ६।१२) इत्यस्तित्वमात्रत्वेन ग्रहणं न जातु दुष्करं चिन्तया तस्यानपाकरणीयत्वात् । अनपाकरणीयमस्तित्वमिदमात्मनः परमात्मनो वेति संशयोऽकिञ्चित्करोऽनन्तसत्तायामात्मनोऽणुत्वेन भासमानत्वात् । प्रथमन्तावत् सत्तामात्रधारणां विना परमात्मनो विशेषज्ञानं न सम्भवत्यत आचार्य्यः "तस्मात्तु भावोऽन्योऽव्यक्तः" (८।२०) इति सत्तामात्रमुपदिष्टवान् । तदनन्तरं "यस्यान्तःस्थानि भूतानि येन सर्व्वमिदं ततम्" (८।२२) इति परमपुरुषं ध्येयत्वेनाख्यापयत् । अस्मिन्नपि "मया ततमिदं सर्व्वं जगदव्यक्तमूर्त्तिना । मत्स्थानि सर्व्वभूतानि न चाहं तेष्ववस्थितः ॥" (९।४), "अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः" (७।२४) इत्यादि-

स्मिन् तस्य सत्तामात्रत्वं कदाप्यपैति । सा सत्ता भूमत्वेन गृहीता एवं ध्येया—"स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदं सर्व्वम्" इति ; अन्तर्यामित्वेन गृहीता —"अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतो-ऽहमुत्तरतोऽहमेवेदं सर्व्वम्" इति ; आत्मत्वेन गृहीता—"आत्मैवाध-स्तादात्मोपरिष्टादात्मा पुरस्तादात्मा पश्चादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्व्वम्" इति (छा, उ, ७।२५।१।२)। एवंचिन्तनस्य फलन्तु तत्रैव—"एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड़ आत्म-मिथुन आत्मानन्दः स स्वराड़् भवति तस्य सर्व्वेषु लोकेषु कामचारो भवति" (७।२५।२) इति । "यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखम्" (छा, उ, ७।२३।१), "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" (छा, उ, ७।२४।१) इत्यनुसारतः—"सत्यं ज्ञानमनन्तं ब्रह्म" (तै, उ, २।१) इति श्रुत्या सम्भिन्नस्य यदानन्तत्वेनोप-लभ्यते—तदैव भूमत्वं तस्य साधकसन्निधौ प्रत्यक्षं भवति । "यः सर्व्वज्ञः सर्व्वविद्यस्यैष महिमा भुवि दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः । मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति ॥" (मु, उ, २।२।७) इत्यस्यां श्रुतौ पञ्चकोषविचारनिष्पन्नब्रह्मज्ञानस्य विस्तृत-भूमौ नियोगः, तस्मिन्नानन्दानुभवश्च सुव्यक्तः । अतः "सत्यं ज्ञानमन-न्तम्" इति ब्रह्मस्वरूपसाधनस्य परिपूर्त्तिर्जगति जीवे च तदनुभूय कृत्वा, न पुनस्तदतीतत्वेन । तत्तु "एकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतम्" (मा, उ, ७) इत्यत्र । प्रपञ्चातीतोऽपि परमपुरुषः शिवस्वरूपत्वेन स्रष्टा पाता चाद्वैतत्वेन विविधेषु भावेषु प्रकाशमानो-ऽपि न स्वस्य स्वरूपैक्यं जहातीति बोध्यम् । शिवस्वरूपस्य निर्व्वचनं श्वेताश्वतरोपनिषदि यथा—"सर्व्वाननशिरोग्रीवः सर्व्वभूतगुहाशयः । सर्व्वव्यापी स भगवान् तस्मात् सर्व्वगतः शिवः ॥" (श्वे, उ, ३।११), "सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम् । विश्व-

स्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥" (श्वे, उ, ४।१४), "घृतात्परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्व्वभूतेषु गूढ़म् । विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्व्वपापैः ॥" (श्वे, उ, ४।१६), "भावग्राह्यमनीड़ाख्यं भावाभावकरं शिवम् । कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ॥" (श्वे, उ, ५।१४) इति । "शान्तं शिवमद्वैतम्" इति श्रुत्या स्वरूपचिन्तनेन किं भवति श्रुत्यन्तरेण तदाकलयितव्यम्, तद्यथा—"यस्तु सर्व्वाणि भूतानि आत्मन्येवानुपश्यति । सर्व्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ यस्मिन् सर्व्वाणि भूतानि आत्मैवाभूत् विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ स पर्य्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥" (वा सं, उ, ६।७८) इति । एकत्वमनुपश्यतः सर्व्वभूतेषु विद्वेषभावं परिजहतः "शुद्धमपापविद्धम्" इति ब्रह्मस्वरूपैक्यमुपतिष्ठते, हृदयस्य शुद्धतया "याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः" इति भगवतो लीलां पश्यन् स "रसो वै सः" (तै, उ, २।७) इति रसस्वरूपमानन्दघनं ब्रह्म साक्षात्सम्बन्धेनोपलभते । अस्यामवस्थायां साधकस्यास्य भगवतोऽणुमात्रविच्छेदोऽपि विषमो भवति—"यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति ।" (तै, उ, २।७) इति । साधकं वल्लभसम्प्रदायानुसारिण्यामृततरङ्गिण्या "सर्व्वभूतस्थमात्मानम्" (६।२९), "यो मां पश्यति सर्व्वत्र" (६।३०) इति श्लोकद्वयस्य व्याख्यायाम्—"सर्व्वभूतस्थमिति । योगयुक्तात्मा भगवत्संयोगे युक्त आत्मा सर्व्वत्र संयोगवियोगभावे समदर्शनः । आत्मानं भगवन्तं सर्व्वभूतस्थं वियोगावस्थायां पुनः आत्मनि भगवत्स्वरूपे, संयोगावस्थायां सर्व्वभूतानि आत्मनि ईक्षते पश्यतीत्यर्थः । एतेन भगवत्स्वरूपज्ञानात् अत्यन्तसुखयुक्तमिति भावः ।" "एवं स्वरूपज्ञानफलमाह यो मामिति । यः सर्व्वत्र जीवेषु वियोगावस्थायां मां पश्यति, संयोगावस्थायां मयि सर्व्वं

पश्यति तस्य अहं न प्रणश्यामि न कदाचिदपि वियुक्तो भवामि, स च मेऽतः न प्रणश्यति वियुक्तो भवतीत्यर्थः ।" इति । संयोगे विप्रयोगे च साधकानुभूतिर्निबद्धा वैष्णवाचार्य्यैरेवम्—"सङ्गमविरह-विकल्पे वरमिह विरहो न सङ्गमस्तस्य । एकः स एव सङ्गे त्रिभुवन-मपि तन्मयं विरहे ॥" इति ।

"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म" (तै, उ, ३।१) इति वेदान्त-सम्मतं ब्रह्मलक्षणं "प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्" (९। १८) इत्यत्र दृश्यते । नैतावन्मात्रेण साधकस्य कृतार्थता, अतो विविध-सम्बन्धा अप्याचार्य्येणोपदिष्टाः परेण—"पितामहस्य जगतो माता धाता पितामहः ।" (९।१७) "गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् । (९।१८) "सखा पिता पितृतमः पितॄणाम् (४।१७।१७) इत्या-द्यासु श्रुतिषु दृश्यन्ते विविधाः सम्बन्धाः । अतो निर्विशेषात्मवादिभिरुपा-स्यनिर्णये साधितमाचार्य्येण । अन्तर्यामिण्येव सम्बन्धारोपः किमा-त्मानमन्तः सर्व्वथा तस्यानिर्व्वचनीयत्वात् ? वचनविषयं कृत्वा सर्व्वथा-निर्व्वचनीयत्वापत्तिर्न खलु शोभते । "एकात्मप्रत्ययसारम्" (मा, उ, ७) इत्यात्मप्रत्ययगोचरत्वं तस्य, सुतरां वचनविषयतां तस्यायाति । अस्तीति निरूपणं कस्याप्यस्तित्वं सूचयति । कस्य ? यो भूतानां प्रवृत्तिः, येन च तेषां जीवननिर्व्वाहः, यस्मिंश्च तेषां स्थितिरिति । नेति नेतीति निषेधेऽपि निरवधिनिषेधस्यासम्भवात् तस्मिन्नेव शब्दस्य पर्य्य-वसानम् । अतएवाह भागवतम्—"श्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः" (भा, १०स्क, ८७अ, ३७श्लो) इति । एवं सति सर्व्वथा-निर्व्वचनीयत्ववादो वृथा वितण्डैव । अनिर्व्वचनीयत्वं खल्वनन्तस्य सम्यग्वचनीयत्वासम्भवात् । अतएवाह श्रुतिः—"यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम् । यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते, मन्ये विदितम् ॥ नाहं मन्ये सुवेदेति नो न वेदेति वेद च । यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ यस्यामतं तस्य

मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्॥ प्रतिबोधविदितं मतममृतत्वं हि विन्दते॥" (तल, उ, ९—१२) इति। "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति" इति, तस्य शक्तिमत्त्वम् "प्रतिबोधविदितम्" इत्यस्य सर्व्वप्रत्ययदर्शित्वम् ज्ञानस्वरूपत्वं वा। "सत्यं ज्ञानमनन्तम्" (तै, उ, २।१) इत्यत्र सत्यं "सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" (छा, उ, ६।४।८) इति शक्तिमत्तैव सत्स्वरूपम्। क्रियोन्मुखं ज्ञानमेव शक्तिरिति मतं नासमञ्जसम्, ज्ञानस्यैव स्वप्रकाशपरप्रकाशसामर्थ्ययुक्तत्वात्। न हि परब्रह्मणि परस्परविरुद्धानि स्वरूपाणि जातु सम्भवन्त्यत्यन्तभिन्नानि वा। एकस्वरूपस्य तस्य जगज्जीवाभ्यां सम्बन्धपर्य्यालोचनया भिन्नस्वरूपत्वं प्रतिभातीति तत्त्वे ज्ञायमाने ब्रह्मस्वरूपघटितो विवादो निर्म्मूल एवेत्यवभासते। यदि सन्मूलमेव सर्व्वं तदा सच्छक्तिमत्, अन्यथा न ततो जगज्जीवप्रवृत्तिः स्यात्। "परास्य शक्तिर्व्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वे, उ, ६।८) इति शक्तित्वे कथं सतः शक्तिरित्युक्तिः? शक्तिर्हि क्रियाव्यञ्जिका। विनारम्भेण क्रिया न बुद्धौ प्रतिभाति। आरम्भत्वे विकारित्वमेवायाति। सत्स्वरूपस्यानन्तत्वे तस्मिन्नेव क्रियाया निरवच्छेदप्रकाशो न विक्रियां व्यनक्ति सतोऽविक्रियत्वेनावस्थानात्। अतएवाह्णाचार्य्यः—"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" (१०।४२) इति, "पादोऽस्य विश्वा भुवनानि" (ऋक्सं, १०म, ९०सू, ३ऋक्) इति च। सतः [illegible] न भिन्नत्वमस्या अनन्तत्वात् सद्व्यापित्वाच्छक्तेरेव व्यक्ताव्यक्तव्यवस्थोचितत्वाच्च। अतएवाह श्रीमच्छङ्करः "कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्य्यम्" (वे, सू, २अ, १पा, १८सू, भा) इति। सतो जगज्जीवाभिव्यक्तिर्ज्ञानमेव सूचयति। वेदान्तवादिनां ब्रह्मणश्चित्स्वरूपत्वे नास्त्यसम्मतिः। ज्ञेयं विना ज्ञानस्य स्थितिर्न सम्भवति; ज्ञानाज्ज्ञेयान्तरे स्वीकृते सर्व्वकारणस्य ज्ञानस्यान्यापेक्षित्वप्रसङ्गोऽतो न सिध्यति ज्ञानस्वरूपत्वं ब्रह्मण इत्यर्व्वाचां ज्ञेयाभावत्वेन ज्ञानस्यासम्भाव-

नेति विप्रतिपत्तिस्तस्य ज्ञानस्यात्मज्ञाने सर्व्वेषां ज्ञेयानामन्तर्भावितत्वात् निर्मूला। अव्यक्तानां ज्ञेयानां तस्मिन् ज्ञानेऽभिन्नभावेन स्थितिर्नानुभूतिविरुद्धा। यतोऽस्माकमपि ज्ञानेऽभिन्नभावेन स्थिताः शब्दार्थाः कार्य्यकाले बुद्धौ प्रतिभासन्ते न तु तत्पूर्व्वम्; न च पुनस्तेनास्माकं तज्ज्ञानवत्त्वाभावः। ज्ञानस्वरूपमधिकृत्याह च श्रीमच्छङ्करः—"आत्मनः स्वरूपं ज्ञप्तिर्न ततो व्यतिरिच्यतेऽतो नित्यैव तथापि बुद्धेरुपाधिलक्षणायाश्चक्षुरादिद्वारैर्विषयाकारपरिणामिन्या ये शब्दाद्याकारावभासास्त आत्मविज्ञानस्य विषयभूता उत्पद्यमाना एवात्मविज्ञानेन व्याप्ता उत्पद्यन्ते। तस्मादात्मविज्ञानावभासाश्च ते विज्ञानशब्दवाच्याश्च धात्वर्थभूता आत्मन एव धर्मा विक्रियारूपा इत्यविवेकिभिः परिकल्प्यन्ते। यत्तु ब्रह्मणो विज्ञानं तत्सवितृप्रकाशवदग्न्युष्णत्ववच्च ब्रह्मस्वरूपाव्यतिरिक्तं स्वरूपमेव तत्, न तत्कारणान्तरसव्यपेक्षं नित्यस्वरूपत्वात्। सर्व्वभावानाञ्च तेनाविभक्तदेशकालाकाशादिकारणत्वाच्च निरतिशयसूक्ष्मत्वाच्च न तस्यान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भविष्यद्वास्ति तस्मात् सर्व्वज्ञं तद्ब्रह्म। मन्त्रवर्णाच्च—'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' इति। 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयोऽस्ति' इत्यादि श्रुतेश्च। विज्ञातृस्वरूपाव्यतिरेकात् करणादिनिमित्तानपेक्षित्वाच्च ब्रह्मणो ज्ञानस्वरूपत्वेऽपि नित्यत्वप्रसिद्धिः।" इति। न तु पुनर्ज्ञानमिदमन्तर्विशिष्टं भवितुमर्हति, तथा सति ज्ञानस्याज्ञानविमिश्रत्वमेवायाति। सच्च ज्ञानञ्च न भिन्ने, सदित्युक्ते ज्ञानस्यैव सत्त्वं नान्यस्य, यतः सतो जगदुत्पत्तौ नामरूपं सर्व्वत्र ज्ञानक्रियानुस्यूतत्वात्। अनन्तत्वन्तु सतो ज्ञानस्य च पूर्व्वमेव प्रतिपादितम्। एवं सत्यं ज्ञानमनन्तं न भिन्नस्वरूपमेकमेवेति सिद्धेऽन्येषामपि स्वरूपाणां तदभिन्नत्वमिति साधनं न दुष्करम्। ज्ञानमेव शिवम्, यतो जीवानां प्रयोजनानि जानाति ब्रह्म पूर्णज्ञानत्वात्, तत एवोत्पद्यन्ते तदायोजनानि च

पूर्व्वमेव। अनन्तत्वेन हि तस्य प्रपञ्चातीतत्वमतो न पृथग्युक्तेरावश्यकता। ज्ञाने नाज्ञानस्यास्तित्वमतोऽस्य शुद्धत्वं स्वाभाविकमेव। अविनश्वरत्वं दुःखहेतुरतो विशुद्धत्वेऽस्य स्वाभाविकी सुखस्वरूपत्वमिति एकस्यैव चित्स्वरूपस्य भिन्नदृष्ट्या दर्शनेन भिन्नस्वरूपवत्त्वेन प्रतीतिर्न तु स्वरूपत एव भिन्नत्वम्।

साधने प्रवृत्तस्य प्रथमं सत्तामात्रधारणं निर्व्विशेषवादस्य, सत्तायां चित्स्वरूपस्य चित्स्वरूपस्य च शिवस्वरूपत्वेन शुद्धस्वरूपत्वेन सुखस्वरूपत्वेन दर्शनं सविशेषवादस्य च मूलम्। ब्रह्मणि सदैकरूपत्वमेव। साधकगतदृष्टिभेदात् यद्यपि भिन्नत्वेन प्रतिभाति तदेकमेव स्वरूपम्, तथापि परब्रह्मणि नास्ति निर्व्विशेषसविशेषवादयोरवकाशः। निर्व्विशेषसविशेषवादिभिर्यदा सच्चिदानन्दघनं ब्रह्मेति स्वीकृतं, तदा निष्फल एव निर्व्विशेषसविशेषविचारः। साधूक्तवान् श्रीमद्बलदेवः गोविन्दभाष्ये (वे, सू, १।१।१०) "सगुणं निर्गुणञ्चेति द्विरूपता नास्ति।" "ननु निर्गुणोऽपि गुणवानिति विरुद्धम्। मैवं वस्तुस्वाभाव्याभावात्। तथाहि निर्गुणादयः शब्दाः नैर्गुण्यादिना निमित्तेन तत्र प्रवर्त्तेरन् सर्व्वज्ञादयस्तु सर्व्वज्ञादिना। तेन प्राकृतैः सत्त्वादिभिर्गुणैर्व्विहीनः स्वरूपानुबन्धिभिरनन्तैस्तु विशिष्टोऽसाविति न कापि विचिकित्सा।" इति। सगुणनिर्गुणादिविरोधः पुनरीश्वरास्तित्वास्वीकारकारणं कुतस्त्य—"ते तत्त्वतोऽर्थविज्ञाः पुरुषं वदन्ति व्यापिं प्रदेशगतं शाश्वतमाहुरेके। मूर्त्तं न मूर्त्तं सगुणं गुणिनं तथैव कर्त्ता न कर्त्ता इति चाप्यपरे ब्रुवन्ति।" (म, बि, २१म) इति। या तु नारूपे ब्रह्मणि नास्ति भक्तेः सम्भावनेति केषाञ्चिद्युक्तिः, सा निरस्ता सुष्ठु भगवद्भक्तिचन्द्रिकायां शाण्डिल्यसूत्रव्याख्यायां श्रीमता नारायणतीर्थेन —"ननु अस्मिन् मते कथं भगवति भक्तिः सम्भवति, नीरूपत्वेन सौन्दर्य्याभावात्। रूपवत्त्वे तु अनित्यत्वदोषापत्तिभिया माहात्म्यज्ञानस्य बाधेन सुतरामिति चेत् न, प्रकृत्यादिप्रवर्त्तकतया प्राकृतरूपशून्यत्वेऽपि सत्यज्ञानानन्दादिलक्षणरूपवत्त्वादेव सुन्दरतमे तस्मिन् भक्ति-

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।

सम्भवात्" इति । श्रीमद्बलदेव आह गोविन्दभाष्ये (वे, सू, १।१।२) —"सत्यं हरेरात्ममूर्त्तित्वमनुभूतेरनुभवितृत्वं स्वात्मकधर्म्माधिष्ठानत्वं जगत्कर्त्तृनिर्व्विकारत्वं चेत्यादि युग्मगाणरूपतया चास्योपासनं सिध्यति" इति । सत्यज्ञानानन्दे परब्रह्मणि पितृत्वादिसम्बन्धो न पुनः काल्पनिकः । चित्स्वरूपस्य शिवस्य "येन जातानि जीवन्ति," "य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्म्मिमाणः" (कठ, ५।८), "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् (श्वे, उ, ६।१३)" इत्याद्यासु श्रुतिषु वर्णितेन पालनप्रयोजनार्पणादि-व्यापारेण तत्तत्सम्बन्धस्य निरतिशयतात्त्विकत्वात् । "नित्यो नित्या-नाम्" इत्यादि श्रुत्या परब्रह्मणा जीवस्य नित्यसम्बन्धत्वात् पितृत्वादि-सम्बन्धो नित्य एव । जगत् सत्यं जीवो जीवभावेन नित्य इति सिद्धान्तो यैर्न बहु मन्यते, तेऽपि जीवेश्वरयोः सम्बन्धोऽनित्य इति वक्तुं नोत्सहते । आह च श्रीमच्छङ्करः—"प्रकृतिं पुरुषञ्चैव विद्ध्यनादी" (१३।१९) इत्यत्र, "प्रकृतिं पुरुषञ्चैवेश्वरस्य प्रकृती तौ प्रकृतिपुरुषावु-भावप्यनादी न विद्यते आदिर्ययोस्तावनादी नित्यत्वादीश्वरस्य तत्प्रकृ-त्योरपि युक्तं नित्यत्वेन भवितुम् ।" इति । स ईश्वरो यदा साधक-स्यान्तश्चक्षुःपथगतः, तदा तं स त्वम्पदेन स्तौति, न यदान्तश्चक्षुर्गोचर-स्तदा तत्पदेन । तत् स्तोत्रं प्रधानतः स्वरूपानुबन्ध्येव भवति, तद्यथा —"नमाम सर्व्वं सर्व्वेशमनन्तमजमव्ययम् । लोकधामधराधारमप्रकाश-मभेदिनम् ॥ नारायणमणीयांसमशेषाणामणीयसाम् । समस्तानां गरिष्ठं यद्भवादीनां गरीयसाम् ॥" (वि, पु, १अं, ९अ, ३९।४०श्लो) इति । अन्तश्चक्षुर्गोचरे त्वम्पदेन यथा—"कथयामि ततः किन्ते सर्व्वं वेत्सि हृदि स्थितम् । सर्व्वात्मन् सर्व्वभूतेश सर्व्वसत्त्वसमुद्भव ॥" (वि, पु, १अं, १२अ, ७४श्लो) इति । ३।४ ।

यद्यक्षरोपासनेनापि परमपुरुषमेव प्राप्नोति साधकः, ततः कथं

अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥
ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥६॥

न सर्वे सर्वविकल्पवर्ज्जितं प्रथममक्षरं परमं ब्रह्मोपास्य तेन च परमपुरुषप्राप्तौ प्रयतन्ते ? तत्राह क्लेश इति । अव्यक्तासक्तचेतसाम् अव्यक्तेऽक्षरे परब्रह्मणि आसक्तं चेतो येषां तेषां क्लेशोऽधिकतरः । कथम् ? देहवद्भिः देहाभिमानवद्भिः दुःखं दुःखेन कृच्छ्रेण अव्यक्ता गतिः अव्यक्तविषया निष्ठा अवाप्यते प्राप्यते । सत्तामात्रमनुभवविषयं कर्त्तुं देहादिकं सर्व्वं चिन्तापथादपसारणीयम् । तत्तु देहाभिमानिभिरशक्यम्, यदि वा शक्यमत्यन्तक्लेशसाध्यम । अतः जगज्जीवयोः परेण सम्बन्धस्थित्वादनपनीय तस्मिन् चित्तसमाधानं सुकरमिति तदेवानन्तरश्लोके उपदेक्ष्यत्याचार्य्यः । इममेवार्थं विष्णुपुराणमाह—"त्रिविधा भावना भूप विश्वमेतन्निबोध मे । ब्रह्माख्या कर्म्मसंज्ञा च तथाचैवोभयात्मिका ॥ ब्रह्मभावात्मिका ह्येका सर्व्वभावात्मिका परा । उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥ सनन्दनादयो ब्रह्मन् ब्रह्मभावनया युताः । कर्म्मभावनया चान्ये देवाद्याः स्थावराश्चराः ॥ हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा । बोधाधिकारयुक्तेषु विद्यते भावभावना ॥ अक्षीणेषु समस्तेषु विशेषज्ञानकर्म्मसु । विश्वमेतत् परं चान्यत् भेदभिन्नदृशां नृप ॥" (वि, पु, ६अं, ७अ, ४८—५२श्लो) इति । अत्र श्रीमच्छ्रीधरः—"ब्रह्मभावनावन्तोऽपि सनन्दनादयो जीवा एव देहानुसन्धानानिवृत्तेः" इति । "विश्वमेतत् परं चान्यत्" इति भेदज्ञानं न विलुप्यते, अतः "प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥" (वि, पु, ६अं, ७अ, ५३श्लो) इत्येवं सत्तामात्रत्वेन ग्रहणं दुष्करमेव जीवानां देहाद्यनुसन्धानवतामिति भावः । ५ ।

विश्वमन्तस्यस्तुषस्तिरोधाय देहाद्यनुसन्धानवतां केवलायाः सत्ताया

तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥७॥

धारणं क्लेशकरमित्युक्त्वा जगज्जीवान्तर्यामित्वेन परब्रह्मणो धारणं जीवानां सुकरमिति पक्ष्यन्नाह ये त्विति, तेषामिति । ये तु सर्व्वाणि कर्म्माणि मयि सर्व्वान्तर्यामिणि सन्न्यस्य समर्प्य मत्पराः सन्तः अनन्येन केवलेन ऐकान्तिकेनैव योगेन मां सर्व्वान्तर्यामिणं ध्यायन्त उपासते, —एतेनोपासने योगत्रयसमन्वयनमुक्तम्,—मयि सर्व्वान्तर्यामिणि आवेशितचेतसां समाहितचित्तानां तेषामहं सर्व्वान्तर्यामी, हे पार्थ, मृत्युसंसारसागरात् मृत्युयुक्तात् संसारार्णवात् न चिरात् क्षिप्रमेव समुद्धर्त्ता सम्यगुद्धारकर्त्ता भवामि । स्वात्मन्यन्तर्यामिणं स्वात्मातीतं सर्व्वाणि भूतान्यात्मन्यन्तर्भूय वर्त्तमानं सत्यज्ञानादिस्वरूपिणं ज्ञानतयात्मानमुपासीनैः पुनः सत्तामात्रध्याननिरतानां दृष्टितारतम्यकृतं नात्यन्तभेदः । ये त्वक्षरमनपेक्ष्य अंशत्वेन भगवन्तं सर्व्वान्तर्यामिणं लोकातीतपुरुषविशेषाविर्भूतमर्च्चयन्तो वयं अंशोपासका इति मन्यन्ते, न ते तत्त्वदर्शिनः, सत्तामात्रेऽनिवेशितचेतसां न परब्रह्मणि चित्तं स्थितिपदं लभते, तस्मिन्नेव हि स्वरूपवैशिष्ट्यमुपलब्धव्यम्, अतएवोक्तं विष्णुपुराणे, "अमूर्त्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः । समस्तशक्तयश्चैता नृप यत्र प्रतिष्ठिताः ॥" (वि, पु, ६अं, ७अ, ६८श्लो) इति । कारणे तस्मिन्नेकस्याः शक्तेर्विविधत्वेन प्रकाशमानाः शक्तयः कार्य्यस्यात्मभूताः । ये त्वक्षरमेव परमप्रापणीयं मन्यन्ते न तु परमपुरुषं तेऽपि न भवन्ति सम्यग्दर्शिनः, यतश्चित्सत्तया स्वात्मनो विविधसम्बन्धं परिजिज्ञासतां तेषां तदसम्भवत्वात् मिथ्याचारत्वमेव विषमं फलम् । "आत्मा क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर्गुणैः । तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः ॥" (शा, प, १८७अ, २४श्लो) इति यदुक्तं तदात्मपरमात्मनोर्द्वैविकाय, प्राकृतैर्गुणैरविचाल्यस्य चात्मनः परमात्माधीनत्वेन तत्स्वरूपैक्येन कैवल्यसम्भावनाप्रदर्शनाय च । अक्षरशब्देन जीवस्यास्मिन् शास्त्रे नोपास्यत्वेन

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्द्ध्वं न संशयः ॥८॥
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥९॥

गृहीतः स्वयमाचार्य्येण "अक्षरं परमं ब्रह्म" (८।३) इत्युक्तत्वात् "अव्यक्तोऽक्षर इत्युक्तः" (८।२१) इतयत्र तस्यैव परामृष्टत्वात् । जीवत्वेनाक्षरस्याधःकरणमतएषाव न न्याय्यम, "क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते" (१५।१६) इतयध्यायान्तरोदीरितप्रमाणवलात् । अयन्त्वन्य एव "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः" (१५।१८) इति, "मम योनिर्महद्ब्रह्म" (१४।३) इतिवद्विशेषवचनात् । ६।७ ।

यत एवं तस्मान्मय्येवेति । मयि सर्व्वान्तर्यामिणि मनः सङ्कल्पविकल्पात्मकम् स्थिरीकुरु, बुद्धिं व्यवसायात्मिकां मयि सर्व्वान्तर्यामिणि निवेशय स्थापय । एवं कृत्वा किं भविष्यति ? अत ऊर्द्ध्वं शरीरपातादनन्तरं मयि सर्व्वान्तर्यामिण्येव निवसिष्यसि निवासं करिष्यसि नात्र संशयः । यस्य हि शरीरपातात् पूर्व्वमेव परब्रह्मणि चित्ताभिनिवेशो जातः, स एव तस्मिन् निवत्स्यति नान्यः, चित्ताभिनिवेशानुसारत एव गतेरवश्यम्भावित्वात् । ८ ।

सर्व्वान्तर्याम्येव परमप्राप्य इति जानतोऽपि सर्व्वविधान् सङ्कल्पान् विहाय तस्मिन् मनसः स्थापनं बुद्धेरध्यवसायश्च सुदुष्कर इति तदशक्तस्य मम किं कर्त्तव्यं, तदेवाह अथेति । अथ यदि मयि सर्व्वान्तर्यामिणि स्थिरमचलं यथा स्यात् तथा चित्तं समाधातुं स्थापयितुं न शक्नोषि ततस्तर्हि अभ्यासयोगेन मत्तो निश्चलतो मनसो मयि पुनः पुनः स्थापनरूपेण मां सर्व्वान्तर्यामिणमाप्तुं प्राप्तुम् इच्छ प्रार्थी भव । "सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत् पुनरर्थिता यतः । स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवम् ॥" (भा, ५स्क, १९अ, २७श्लो) इति भगवत्प्राप्तीच्छा नामकरादभूत्पूर्व्वा-

अभ्यासेऽप्यसमर्थोऽसि मत्कर्म्मपरमो भव ।
मदर्थमपि कर्म्माणि कुर्व्वन् सिद्धिमवाप्स्यसि ॥१०॥
अथैतदप्यशक्तोऽसि कर्त्तुं मद्योगमाश्रितः ।
सर्व्वकर्म्मफलत्यागं ततः कुरु यतात्मवान् ॥११॥
श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्म्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२॥

भ्यासपरित्यागेन नूतनाभ्यासरतानां तत्प्राप्तिरेव भवति तं प्रति चित्तस्य लौल्यात् । ८ ।

पुनः पुनः सर्व्वान्तर्यामिणि निश्चलतया मनसः स्थापनमपि न सम्भवति, देहादिरक्षाव्यापारव्यापृतस्य ममेत्युपायान्तरमाह अभ्यास इति । अभ्यासे मयि पुनः पुनश्चित्तस्थापनरूपे यदि असमर्थोऽशक्तोऽसि तर्हि मत्कर्म्मपरमः मामाश्रित्य यानि कर्म्माणि श्रवणकीर्त्तनादीनि तत्परमस्तदेकनिष्ठो भव । मदर्थं मामुद्दिश्य कर्म्माणि श्रवणकीर्त्तनादीनि कुर्व्वन् सिद्धिं मत्प्राप्तिरूपाम् अवाप्स्यसि प्राप्स्यसि । १० ।

तदशक्तस्य किं कर्त्तव्यं तदाह अथेति । अथ यदि मद्योगं मदेकशरणत्वं मयि सर्व्वान्तर्यामिणि कर्म्मार्पणरूपं योगं वा आश्रितः सन् एतत् श्रवणकीर्त्तनादिकं कर्त्तुमशक्तोऽसि, ततः तर्हि यतात्मवान् यतः संयतेन्द्रियः आत्मवान् विवेकी च सन् सर्व्वकर्म्मफलत्यागं कुरु फलाभिसन्धिं त्यज । ११ ।

एवं सर्व्वकर्म्मफलत्यागस्य सुकरत्वप्रतिपादनेन पूर्व्वोक्तेभ्य उपायेभ्यस्तस्य निकृष्टत्वमभिप्रेतमिति प्रतिपत्तिनिरसनायाहाचार्य्यः श्रेय इति । अभ्यासात् उपदेशजनितसम्यग्ज्ञानविरहितात् ज्ञानम् उपदेशजनितसम्यग्ज्ञानं श्रेयः प्रशस्ततरम् ; ज्ञानादुपदेशजनितसम्यग्ज्ञानात् ध्यानं तज्ज्ञानप्रत्यक्षीकरणार्थचिन्तनं विशिष्यते विशिष्टं भवति ; ईदृशात् ध्यानात् कर्म्मफलत्यागः विशिष्यते विशिष्टो भवति । कथम् ? त्यागा-

अद्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च ।
निर्म्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥१३॥
सन्तुष्टः सततं योगी यतात्मा दृढ़निश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१४॥

दनन्तरं शान्तिरुपशमः। अभ्यासे प्रवृत्तानां यदान्तराया उपतिष्ठन्ते तदा तन्निवारणोपायाज्ञानात् यत्नशैथिल्यं जायते, अतो ह्यन्तरायनिरसनोपायज्ञानमभ्यासात् श्रेयः। अन्तरायनिरसनोपायज्ञाने सत्यपि यदि चिन्तनानुरता न भवेयुस्ते, तदोपायज्ञानं निरर्थकमेव स्यात्, अतो ज्ञानाद्ध्यानं विशिष्टं भवति। ध्यानशीलानामपि न जातु शान्तिरुपतिष्ठते यद्यनुष्ठीयमानेन ध्यानेनावान्तरसिद्धिलाभादात्माभिमानो जायते, तथा ह्याह पतञ्जलिः—"व्युत्थाने सिद्धयः समाधौ विघ्नाः (प, सू, ३।३८) इति। सर्व्वथा कर्म्मत्यागं विना ध्यानजनितविघ्ना नापगच्छन्ति, अतो ध्यानात् कर्म्मफलत्यागस्य सर्व्वश्रेष्ठत्वम्। भगवति मनःसमाधानं बुद्धिनिवेशनञ्च कर्म्मफलाकाङ्क्षयाविशुद्धसत्त्वानां न सम्भवतः, अतः कर्म्मफलत्यागस्य सर्व्वेषूपायेषु साम्राज्यमिति न वृथा स्तुतिस्तस्य। निकृष्टत्वेन न तस्य सुकरत्वप्रदर्शनं, किन्तर्हि ततः साधकानां भगवत्प्राप्त्युद्देश्यानां साधनारम्भ इति तं परित्यज्य न कृतार्थतासम्भावनेति कर्म्मफलत्यागपूर्व्वकं यत् यत् साधनमुपदिष्टं तत्तत्साधनाशक्तौ सर्व्वसाधारणकर्म्मफलत्यागेन साधनमारम्भणीयमित्युपदेशः। अतो यथोक्तसाधकानां तथा भगवत्प्राप्तिकामानां निकृष्टानामपि साधकानां कर्म्मफलत्याग आश्रयणीय इति गीताशास्त्रसम्मतः पन्थाः। त्यागेनामृतत्वं प्राप्नुवन्तीति वेदान्तवादिनां मतमतएव समीचीनम्। १२।

त्यागादनन्तरमेव शान्तिरिति साधारणत उक्ता तन्माध्यीदितात्म्यद्वेष्टृत्वादित्यागफलान्युपवर्णयन् त्यागस्य श्रेष्ठत्वं दर्शयत्याचार्य्योऽद्वेष्टेति सप्तभिः। अद्वेष्टृत्वादिधर्म्मसमूहोऽक्षरोपासकानामित्युक्तिस्तु न कृत-

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥१५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्व्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥१६॥

यत्यानुसारिणी। सर्व्वभूतानामद्वेष्टा द्वेषविरहितः, मैत्रः मित्रतया वर्त्तत इति मैत्रः, करुणः कृपालुः—उत्तमेषु द्वेषशून्यः, समेषु मैत्रः, अधमेषु करुण इति यथायथं बोध्यम्; निर्म्ममो ममेति प्रत्ययवर्ज्जितः, निरहङ्कारोऽभिमानशून्यः, समदुःखसुखः समे दुःखसुखे यस्य, क्षमी आक्रुष्टोऽभिहतो वा क्षमावान्, सततं नित्यं सन्तुष्टः लाभालाभे प्रसन्नचित्तः, योगी समाहितचेताः, यतात्मा संयतस्वभावः, दृढ़निश्चयः दृढ़ः कुतर्कादिनानभिभवनीयो निश्चयो यस्य स्थिराध्यवसायः, मयि सर्व्वान्तर्यामिणि अर्पितमनोबुद्धिः अर्पिते मनोबुद्धी यस्य, मद्भक्तः मद्भजनशीलो यः स मे प्रियः। १३।१४।

यस्मादिति। यस्मात् लोको न उद्विजते नोद्वेगं प्राप्नोति, यः लोकात् न उद्विजते नोद्वेगं गच्छति, हर्षामर्षभयोद्वेगैः हर्षः प्रियलाभे प्रोत्फुल्लता, अमर्षः अभिलषितप्रतिघातेऽसहिष्णुता परस्य लाभेऽसहनं वा, भयं त्रासः, उद्वेगश्चित्तक्षोभः, एतैर्विमुक्तो यः स च मे प्रियः। १५।

अनपेक्ष इति। अनपेक्षः भोगनिरपेक्षः, शुचिः बाह्याभ्यन्तरशौचसम्पन्नः, दक्षः उपस्थितेषु कर्त्तव्येषु ज्ञातव्येषु च सद्य एव कर्त्तुं ज्ञातुञ्च समर्थः, उदासीनः पक्षपातविरहितः, गतव्यथः आधिशून्यः, सर्व्वारम्भपरित्यागी अहं करोमीत्यभिमानयुक्तान् सर्व्वानारम्भानुद्यमान् परित्यक्तुं शीलं यस्य सः—इहामुत्रफलभोगार्थानि कामहेतूनि कर्म्माणि समारभ्यास्तान् परित्यक्तुं शीलमस्येति श्रीमच्छङ्करः, शास्त्रीयकर्म्मव्यतिरिक्तसर्व्वकर्म्मारम्भपरित्यागीति श्रीमद्रामानुजः—मद्भक्तो मद्भजनशीलो यः स मे प्रियः। १६।

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥१७॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्ज्जितः ॥१८॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥१९॥
ये तु धर्म्मामृतमिदं यथोक्तं पर्य्युपासते ।

य इति । योऽभिलषितप्राप्तौ न हृष्यति, अनभिलषितप्राप्तौ न द्वेष्टि, प्रियवियोगे न शोचति, अप्राप्तमर्थं न काङ्क्षति, शुभाशुभपरित्यागी शुभं पुण्यमशुभं पापं ते शुभाशुभे परित्यक्तुं शीलं यस्य सः— इदं शुभमतएव करोमि इदमशुभमतएव न करोमीति निश्चयं परित्यज्य सर्व्वथा भगवत्प्रेरणानुसरणमेव यः करोतीत्यर्थः, न खलु वक्तव्यमेवं विचारशून्ये सति पापपुण्ययोः प्रभेदः सर्व्वथा विलुप्येत, भगवत्प्रेरणानुसरणे न जातु पापस्पर्शो भवेदिति तदनुसरणे भवति तस्याभिलाषः, भक्तिमान् भक्तियुक्तो यः स मे प्रियः । १७ ।

सम इति, तुल्येति । शत्रौ च मित्रे च समः एकरूपः, मानापमानयोरपि तथा समः हर्षविषादशून्यः, शीतोष्णसुखदुःखेषु समः, सङ्गवर्ज्जितः सर्व्वत्रासक्तिविरहितः, तुल्यनिन्दास्तुतिः तुल्ये निन्दास्तुती यस्य सः, मौनी संयतवाक्, येन केनचित् सन्तुष्टः यदृच्छालाभपरितृप्तः, अनिकेतः नियतवासशून्यः निकेतादिष्वसक्त इतरानिकेत इति श्रीमद्रामानुजः, स्थिरमतिर्व्यवस्थितचित्तः, भक्तिमान् भक्तियुक्तः यः स मे प्रियः । १८।१९ ।

स्थितप्रज्ञतायामात्मन्येव स्थितिरभिहिता, द्वितीयषट्कान्तेऽत्र तु सर्व्वान्तर्यामिण्यनन्याभिलाषत्वेन मनोबुद्धी समर्प्पयन्तो ये धर्म्माः स्थितप्रज्ञत्वमन्तर्भूयोपतिष्ठन्ते तानुक्त्वोपसंहरति ये त्विति । ये तु

श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥२०॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः।

श्रद्दधानाः श्रद्धां कुर्व्वन्तो मत्परमा अहं सर्व्वान्तर्य्यम्येव परमो निरतिशयः प्राप्यो येषां ते, भक्ता भजनशीलाः सन्तः यथोक्तमिदं धर्म्मामृतं धर्म्ममेवामृतं पर्य्युपासतेऽनुतिष्ठन्ति ते मेऽतीव प्रियाः। तात्पर्य्यमुक्तमध्यायस्य श्रीमच्छ्रीधरेण—"सोपाधिकाभिध्यानपरिपाकान्निरुपाधिकमनुसन्दधानस्याद्वेष्टा सर्व्वभूतानामित्यादिधर्म्मविशिष्टस्य मुख्यस्याधिकारिणः श्रवणाद्यावर्त्तयतस्तत्त्वसाक्षात्कारसम्भवात् ततो मुक्त्युपपत्तेस्तद्धेतुवाक्यार्थधीविषयोऽन्वययोग्यस्त्वत्पदार्थोऽनुसन्धेयः" इति। श्रीमच्छ्रीधरेण तु—"दुःखमव्यक्तवर्त्मनद्धतुविघ्नमतो बुधः। सुखं कृष्णपदाम्भोजं भक्तिमत्याश्रयवान् भजेत्॥" इति। श्रीमन्मधुसूदनस्तु स्वसम्प्रदायमनुसृत्य—"सोपाधिकब्रह्मध्यानपरिपाकात् निरुपाधिकं ब्रह्मानुसन्दधानस्याद्वेष्टृत्वादिधर्म्मविशिष्टस्य मुख्यस्याधिकारिणः श्रवणमनननिदिध्यासनान्यावर्त्तयतो वेदान्तवाक्यार्थतत्त्वसाक्षात्कारसम्भवात् ततो मुक्त्युपपत्तेर्मुक्तिहेतुवेदान्तमहावाक्यान्वययोग्यस्त्वत्पदार्थोऽनुसन्धेय इति मध्यमषट्केन प्रसिद्धम्" इति। २०।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये द्वादशोऽध्यायः।

———

त्रयोदशोऽध्यायः ।

श्रीभगवानुवाच—

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः ॥१॥

एवं प्रथममध्यमयोः षट्कयोरुपासकस्यात्मन उपास्यस्य च परमात्मनस्तत्त्वं पूज्यपूजकप्रयोज्यप्रयोजकत्वसम्बन्धञ्च सहोपायेनाभिधाय तयोः कर्म्मादीनाञ्च विशेषज्ञानं विज्ञानमूलकमवतारयितुमन्तिमषट्कस्यारम्भः । प्रकृतिः पुरुषः परमात्मेति तत्त्वत्रयं सर्व्वज्ञानमूलमिति तदेवास्मिन्नध्याये प्रथममुच्यत आचार्य्येण । अत्र श्रीमच्छङ्कर आह,—"सप्तमेऽध्याये सूचिते द्वे प्रकृती ईश्वरस्य—त्रिगुणात्मिकाष्टधा भिन्नाऽपरा संसारहेतुत्वात्, परा चान्या जीवभूता क्षेत्रज्ञलक्षणा ईश्वरात्मिका, याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते । तत्र क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण तद्वत ईश्वरस्य तत्त्वनिर्द्धारणार्थं क्षेत्राध्याय आरभ्यते" इति ; श्रीमद्गिरिराह—"प्रथममध्यमयोः षट्कयोस्त्वंतत्पदार्थावुक्तौ, अन्तिमस्तु षट्को वाक्यार्थनिष्ठः सम्यग्धीप्रधानोऽधुनारभ्यते" इति ; श्रीमद्रामानुज आह—"पूर्व्वस्मिन् षट्के परमप्राप्यस्य परस्य ब्रह्मणो वासुदेवस्य प्राप्त्युपायभक्तिरूपभगवदुपासनाङ्गभूतं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनं ज्ञानयोगकर्म्मयोगलक्षणनिष्ठाद्वयसाध्यमुक्तम् । मध्यमे च परमप्राप्यभूतभगवत्तत्त्वयाथात्म्यतन्माहात्म्यज्ञानपूर्व्वकैकान्तिकात्यन्तिकभक्तियोगनिष्ठा प्रतिपादिता, अतिशयैश्वर्य्यापेक्षाणामात्मकैवल्यमात्रापेक्षाणाञ्च भक्तियोगस्तत्तदपेक्षितसाधनमिति चोक्तम् । इदानीमुपरितनषट्के प्रकृतिपुरुषतत्संसर्गरूपप्रपञ्चेश्वरतत्त्वयाथात्म्यकर्म्मज्ञानभक्तिस्वरूपतदुपादानप्रकाराश्च षट्कद्वयोदिता विशोध्यन्ते । तत्र तावत्त्रयोदशे देहात्मनोः स्वरूपं देह-

याथात्म्यशोधनं देहवियुक्तात्मप्राप्त्युपायं विविक्तात्मस्वरूपसंशोधनं तथाविधस्यात्मनश्चाचित्सम्बन्धहेतुस्ततो विवेकानुसन्धानप्रकाराश्चोच्यन्ते" इति; श्रीमन्माध्व आह—"पूर्व्वोक्तज्ञानज्ञेयक्षेत्रपुरुषान् पिण्डीकृत्य विवेच्य दर्शयत्यनेनाध्यायेन" इति; श्रीमच्छ्रीधर आह—"भक्तानामहमुद्धर्त्ता संसारादित्यवादि यत्। त्रयोदशेऽथ तत्सिद्धौ तत्त्वज्ञानमुदीर्य्यते॥ 'तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्। भवामि न चिरात् पार्थ' इति पूर्व्वं प्रतिज्ञातम्। न चात्मज्ञानं विना संसारोद्धरणं सम्भवतीति तत्त्वज्ञानोपदेशार्थं प्रकृतिपुरुषविवेकाध्याय आरभ्यते। तत्र यत्सप्तमाध्याये अपरा परा चेति प्रकृतिद्वयमुक्तं ययोरविवेकाज्जीवभावमापन्नस्य चिदंशस्यायं संसारः, याभ्याञ्च जीवोपभोगार्थमीश्वरस्य सृष्ट्यादिषु प्रवृत्तिः, तदेव प्रकृतिद्वयं क्षेत्रक्षेत्रज्ञपदवाच्यं परस्परविभक्तं तत्त्वतो निरूपयिष्यन् श्रीभगवानुवाच" इति; श्रीमद्बलदेव आह—"आद्यषट्के निष्कामकर्म्मसाध्यं जीवात्मज्ञानं परमात्मज्ञानोपयोगितया दर्शितम्। मध्यमषट्के तु भक्तिशब्दितं परमात्मोपासनं तन्महिमनिगदपूर्व्वकमुपदिष्टम्। तच्च केवलं तद्दर्शनाकारं सत् तत्प्रापकम्। आर्त्तादीनान्तु तदुपासीनानामार्त्तिविनाशादिकरं तदेकान्तिप्रसङ्गेन केवलं सत् तत्प्रापकञ्च। योगेन ज्ञानेन चोपसृष्टं त्वैश्वर्य्यप्रधानतद्रूपोपलम्भकं मोचकञ्चेत्युक्तम्। तथाश्मिन्नन्त्यषट्के प्रकृतिपुरुषतत्संयोगहेतुकजगत्तदीश्वरस्वरूपाणि कर्म्मज्ञानभक्तिस्वरूपाणि च विविच्यन्ते। ज्ञानदेशत्वाय एतावत्त्रयोदशेऽस्मिन्नध्याये देहजीवपरेशस्वरूपाणि विवेचनीयानि देहादिविविक्तस्यापि जीवात्मनो देहसम्बन्धहेतुस्तद्विवेकानुसन्धिप्रकारश्च विमर्शनीयः" इति; श्रीमन्नीलकण्ठ आह—"'यत्र त्वस्य सर्व्वमात्मैवाभूत् तत् केन कं पश्येत्' इति श्रुतेर्विद्यावस्थायां भेदाभावेऽपि, अविद्यावस्थायाम् 'अन्तःप्रविष्टः शास्ता जनानाम्,' 'एष ह्येव साधु कर्म्म कारयति यमेभ्यो लोकेभ्य उन्निनीषते' इति व्यवहारदशायां शास्यशासितृभावेन कर्त्तृकारयितृभावेन प्रसक्तस्य जीवेश्वरयोर्भेदस्य निरासार्थत्वादुत्तरग्रन्थस्यारम्भः" इति;

क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥२॥

श्रीमद्विश्वनाथ आह—"तदेवं द्वितीयेन षट्केन केवलया भक्त्या भगवत्प्राप्तिः, ततोऽन्या अहंग्रहोपासनाद्यास्तिस्र उपासनाश्चोक्ताः । अथ प्रथमषट्कोदितानां निष्कामकर्म्मयोगिनां भक्तिमिश्रज्ञानादेव मोक्षस्तस्य ज्ञानं सङ्क्षेपादुक्तमपि पुनः क्षेत्रक्षेत्रज्ञादिविवेचनेन विवरितुं तृतीयं षट्कमारभते" इति । प्रकृतिः पुरुषः परमात्मेति तत्त्वत्रयं प्रथयताचार्य्येण मतविरोधी नहि युक्ततमः, यतः प्रकृतिर्माया चाविद्येति प्रख्यानेन न भवति प्रकृतितत्त्वस्य निरसनं परस्य शक्तित्वेन तस्य ग्रहणस्यापरिहार्य्यत्वात् । जीवतत्त्वस्य च—"अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते । नित्यः सर्व्वगतः स्थाणुरचलोऽयं सनातनः ॥" इति तत्स्वरूपेण "ये त्वक्षरमनिर्द्देश्यमव्यक्तं पर्य्युपासते । सर्व्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम् ॥" इति परमात्मस्वरूपैक्यात् न सम्भवति तयोर्भेदः, न च पुनर्द्वयोः सर्व्वगतत्वं सम्भवति अन्योन्यव्याहतत्वेनासर्व्वगतत्वापत्तेः, अपिच तत्तदात्मगतविशेषाः सन्तीति प्रमाणाभावात् इत्युक्त्या—न चाग्रहणमुपपद्यते यतः सर्व्वगतत्वेऽपि नास्ति सर्व्वातीतत्वं तस्य जीवतत्त्वस्य, तत्तु परस्यैवेति विशेषः, "ज्ञाज्ञा"वित्यादिश्रुतिषु तत्तदात्मगतविशेषाणाञ्च श्रवणात् न च तत्र प्रमाणाभावः । एवं तत्त्वत्रयस्य सिद्धत्वात् तदेव वक्तुमुपक्रमते इदमिति । हे कौन्तेय, इदं भोगायतनं शरीरं क्षेत्रं—क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवद्वास्मिन् कर्म्मफलनिष्पत्तेः क्षेत्रमिति श्रीमच्छङ्करः—इत्यभिधीयते कथ्यते । एतत् क्षेत्रं यो वेत्ति ममेदमिति जानाति तद्विदः क्षेत्रक्षेत्रज्ञविदः तं क्षेत्रज्ञमिति प्राहुः । १ ।

देहजीवयोर्निर्व्वचनानन्तरं परमात्मा निरूप्यते क्षेत्रज्ञमिति । हे भारत, सर्व्वक्षेत्रेषु मां सर्व्वान्तर्य्यामिणमपि च क्षेत्रज्ञं विद्धि । जीवस्य हि स्वस्य देहविषयकं परिमितं ज्ञानं सम्भवति, न पुनस्तदन्येषां

देहानां, स्वदेहनियन्तृत्वमपि जीवस्य परिमितमेव, किन्तु अन्यामन्येषां देहानां नियन्तृत्वमस्ति तस्येति, सर्व्वेषां देहानां ज्ञानं नियन्तृत्वञ्च परमात्मन एव, अतः स एव सर्व्वक्षेत्राणां क्षेत्रज्ञः। एवं तस्य क्षेत्रज्ञत्वे सिद्धे क्षेत्रक्षेत्रज्ञयोर्यत् ज्ञानं सर्व्वेषां क्षेत्राणां क्षेत्रज्ञः परमात्मेति यत् ज्ञानं तत् ज्ञानं मम सर्व्वान्तर्यामिणो मतम् अभिप्रेतम्। प्रथमन्तावद्देहस्य चात्मनश्च ज्ञानं जीवस्योत्पद्यते, तदनन्तरं स्वस्यासर्व्वज्ञत्व-परिमितत्वज्ञानेन सर्व्वज्ञस्यापरिमेयस्य परमात्मनो ज्ञानं तस्मिन् प्रादुर्भवति। अतः प्रकृतिपुरुषविवेकप्रधानस्य सांख्यशास्त्रस्य प्रथमसोपानत्वम्, तस्मिन्नारूढस्य ततः परमात्मज्ञानं स्वत उपतिष्ठते, अतएवाहाचार्य्यः—क्षेत्रक्षेत्रज्ञयोर्ज्ञानं मम ज्ञानमिति।

अथोऽस्मिन् 'क्षेत्रज्ञञ्चापि मां विद्धि' इत्युक्त्या अत्रेश्वरजीवेशयोर्नास्ति भेदः, भेदस्त्वज्ञानकृत इति सिद्धान्तः स्वयमाचार्य्यस्य वचनैर्निरूप्यते, तद्यथा—"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम। जीवभूतां महाबाहो ययेदं धार्य्यते जगत्॥ एतद्योनीनि भूतानि सर्व्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥ मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय। मयि सर्व्वमिदं प्रोतं सूत्रे मणिगणा इव॥" (७।४—७); "सर्व्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥" (८।७।८); "मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्। हेतुनानेन कौन्तेय जगद्विपरिवर्त्तते॥" (८।१०); प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि। विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्॥ कार्य्यकारणकर्त्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥" (१३।१९।२०); "उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः। परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः॥" (१३।२२); "मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्। सम्भवः

सर्व्वभूतानां ततो भवति भारत ॥” (१४।३) ; “ममैवांशो जीवलोके जीवभूतः सनातनः ।” (१५।७) ; “द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः ॥ यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मिन् लोके वेदे च प्रथितः पुरुषोत्तमः ॥” (१५।१६—१८) इति ।

पद्यमिदं श्रीमच्छङ्करेणैवं व्याख्यातम्—“क्षेत्रज्ञं यथोक्तलक्षणञ्चापि मां परमेश्वरमसंसारिणं विद्धि जानीहि, योऽसौ सर्व्वक्षेत्रेष्वेकः क्षेत्रज्ञो ब्रह्मादिस्तम्बपर्य्यन्तानेकक्षेत्रोपाधिप्रविभक्तः, तं निरस्तसर्व्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धीत्यभिप्रायः, हे भारत, यस्मात् क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति तस्मात् क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यत् ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते तत् ज्ञानं सम्यक् ज्ञानमिति मतमभिप्रेतमित्यभिप्रायो ममेश्वरस्य विष्णोः” इति ; श्रीमद्रामानुजेन—“देवमनुष्यादिसर्व्वक्षेत्रेषु वेदितृत्वैकाकारं क्षेत्रज्ञं मां विद्धि ‘क्षेत्रज्ञं चापी’त्यपिशब्दात् क्षेत्रमपि मां विद्धीत्युक्तमित्यवगम्यते । यथा क्षेत्रं क्षेत्रज्ञैकविशेषणस्वभावतया तदपृथक्सिद्धेस्तत्सामानाधिकरण्येनैव निर्द्दिष्टं तथा क्षेत्रं क्षेत्रज्ञञ्च मद्विशेषणैकस्वभावतया मदपृथक्सिद्धेर्मत्सामानाधिकरण्येनैव निर्द्दिश्याविति हि वक्ष्यते । क्षेत्रज्ञात् बद्धमुक्तोभयावस्थात् क्षराक्षरशब्दनिर्द्दिष्टादर्थान्तरत्वं परस्य ब्रह्मणो वासुदेवस्य ‘उत्तमः पुरुषस्त्वन्यः’ इति । पृथिव्यादिसङ्घातरूपस्य भगवच्छरीरत्वैकस्वभावतया भगवदात्मकत्वम्·········सामानाधिकरण्येन व्यपदिशति ।” इति ; श्रीमद्बलदेवेन “हे भारत, सर्व्वक्षेत्रेषु माञ्च क्षेत्रज्ञं विद्धि । अपिरवधारणे । जीवाः स्वं स्वं क्षेत्रं स्वभोगमोक्षसाधनं जानन्तः क्षेत्रज्ञाः प्रजावत् ; अहन्तु सर्व्वेश्वर एक एव सर्व्वाणि तानि नियम्यानि भर्त्तव्यानि च जानन् तत्सर्व्वक्षेत्रज्ञो राजवदित्यर्थः । सर्व्वेश्वरस्यापि क्षेत्रज्ञत्वम्—‘क्षेत्राणि हि शरीराणि बीजं चापि शुभाशुभे ।

तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥३॥
ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥४॥

तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते' इत्यादिस्मृतिभ्यः । किं ज्ञानमित्यपेक्षायामाह क्षेत्रेति । क्षेत्रेण सहितौ क्षेत्रज्ञौ जीवपरौ क्षेत्रक्षेत्रज्ञौ, तत्सहितयोस्तयोर्मिथो विवेकेन यज्ज्ञानं तदेव ज्ञानं मम मतं ततोऽन्यथा त्वज्ञानमित्यर्थः'' इति । एकात्मवादखण्डनायाञ्च यदुक्तं श्रीमद्रामानुजप्रभृतिभिः, तदुद्धरणेनालम्, तदर्थमाचार्यचरणो-पचरणसमयत्वादस्माकम् । २ ।

सङ्क्षेपेणोक्तमर्थं विशदयितुमाह तदिति । तत् क्षेत्रं शरीरं यच्च यद्द्रव्यं, यादृक् च इच्छादिधर्मकम्, यद्विकारि यैर्विकारैरिन्द्रियादि-भिर्युक्तम्, यतश्च कारणात् यत् स्थावरजङ्गमादिभेदैर्भिन्नं कार्य्यम् । स च क्षेत्रज्ञः जीवलक्षणः परेशलक्षण इति श्रीमद्बलदेवः—यः यत्-स्वरूपः यत्प्रभावः यच्छक्तिकः, तत्समासेन सङ्क्षेपेण सङ्कलितसारेण मे मत्तः शृणु । ३ ।

क्षेत्रक्षेत्रज्ञयोस्तत्त्वस्य ऋषिपरम्परागतत्वमाह ऋषिभिरिति । ऋषिभिर्मन्त्रद्रष्टृभिः विविधैश्छन्दोभिः ऋग्भिर्बहुधा कः पुरुषो हिरण्य-गर्भ इत्यादि बहुप्रकारेण पृथक् गीतम् । ब्रह्मसूत्रपदैश्च—ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते गम्यते ज्ञायते ब्रह्मेति तानीति श्रीमच्छङ्करः, ब्रह्मप्रतिपादकसूत्राख्यपदैः शारीरकसूत्रैरिति श्रीमद्रामानुजः, ब्रह्मसूत्राणि शारीरकमिति श्रीमन्माध्वः, ब्रह्म सूत्र्यते सूच्यते एभिरिति ब्रह्मसूत्राणि—'यतो वा इमानि भूतानि जायन्ते' इत्यादीनि तटस्थलक्षणपराणि उपनिषद्वाक्यानि ; तथा ब्रह्म पद्यते साक्षाज्ज्ञायते एभिरिति पदानि स्वरूपलक्षणपराणि—'सत्यं ज्ञान-मनन्तं ब्रह्म' इत्यादीनि च तैरिति श्रीमच्छ्रीधरः, ब्रह्मसूत्ररूपैः पदै-

र्वाक्यैरिति श्रीमद्बलदेवः, ब्रह्मणः सूचकानि पदानि समुच्चितवाक्यभावमापन्नानि तैर्ब्रह्मसूचकैर्ब्राह्मणवाक्यैरिति श्रीमन्नीलकण्ठः—बहुधा गीतम्; विनिश्चितैरुपक्रमोपसंहारैकवाक्यतया निश्चितप्रत्ययोत्पादकैर्हेतुमद्भिः वाक्यैरिति शेषः—ब्रह्मसूत्रपदैरित्यस्य वा विशेषणम्—'सदेव सोम्येदमग्र आसीत्' (छा, उ, ६।१), 'कथमसतः सज्जायेत' (छा, उ, ६।२), 'को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' (तै, उ, २।८) इत्यादिभिर्बहुधा गीतम्। तत् श्रुतिरिति पूर्वेण सम्बन्धः। ब्रह्मसूत्रपदैरित्युक्तेर्भारतयुद्धात् प्राक् महर्षिवेदव्यासेन शारीरकसूत्राणि विरचितानीति प्रतीयते। महाभारतव्याख्यात्रा श्रीमता नीलकण्ठेनायं पक्षो न समाद्रियत इति प्रतिभाति तद्व्याख्यानेन। श्रीमद्द्वैपायनादिभिर्नूतनमार्गप्रवर्त्तकत्वेनाचार्यैः परिगृहीतः व्याख्यातश्च तस्य तन्मार्गो बहुधा। सोऽपि तेषां गौरववृद्धये प्रायतत। तथाहि शान्तिपर्व्वणि "स्वयं किमर्थन्तु भवान् श्रेयो न प्राह पाण्डवम्। किन्ते विवक्षितञ्चात्र तदाशु वद माधव॥" इत्युक्ते भीष्मे स प्राह—"आधेयन्तु मया भूयो यशस्तव महाद्युते। ततो मे विपुला बुद्धिस्त्वयि भीष्म समर्पिता॥ यावद्धि पृथिवीपाल पृथ्वीयं स्थास्यति ध्रुवा। तावत्तवाक्षया कीर्त्तिर्लोकाननुचरिष्यति॥ यच्च त्वं वक्ष्यसे भीष्म पाण्डवायानुपृच्छते। वेदप्रवाद इव ते स्थास्यते वसुधातले॥" (शा, प, [illegible] २७—२८ श्लो) इति। यदि श्रीमद्द्वैपायनस्य यशसे तत्प्रणीतं [illegible] मेवानुद्घोषितवानाचार्य्यः, तदपि न चित्रं नित्यपरगौरववर्द्धनोत्सुकस्य तस्य। श्रीमन्नीलकण्ठस्तु यं पक्षमाश्रितवान् न स सम्यगयुक्तः, यतो वर्त्तमानब्रह्मसूत्रग्रन्थ विविधानामाचार्य्याणां मतसंग्रहो दर्शयति, आसन् तत्पूर्व्वं वेदान्तमीमांसका बहवो ग्रन्था इति, येषामुल्लेखोऽस्मिन् पक्षे दृश्यते। श्रीमद्द्वैपायनस्त्वाचार्य्यप्रदर्शितमार्गेण वेदान्तवाक्यानि मीमांसमानो यं सूत्रग्रन्थं प्रणीतवान् तेनान्ये सूत्रग्रन्थाः पाणिनिप्रणीतशब्दानुशास[illegible] शब्दानुशासनानीव विलुप्तप्रचारा इति सुधीभिर्विवे[illegible] [illegible] पायनमाचा-

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः॥५॥
इच्छा द्वेष सुखं दुःखं सङ्घातश्चेतना धृतिः।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम्॥६॥

ऽश्वमेधानन्तरमप्यभूत्, दर्शयति तत् शतपथब्राह्मणम्—"एतेन हेन्द्रोतो दैवापः शौनकः। जनमेजयं पारिक्षितं याजयाञ्चकार। तेनेष्ट्वा सर्व्वां पापकृत्याᳬ सर्व्वां ब्रह्महत्यामपजघान सर्व्वाᳬ ह वै पापकृत्याᳬ सर्व्वां ब्रह्महत्यामपहन्ति योऽश्वमेधेन यजते। तदेतद्गाथयाभिगीतम्—'आसन्दीवति धान्यादᳬ रुक्मिणᳬ हरितस्रजम्। अबध्नादश्वᳬ सारङ्गं देवेभ्यो जनमेजयः॥' इति।" (श, प, ब्रा, १३।८।४।१।२) इति। ४।

तत् क्षेत्रस्वरूपमाह द्वाभ्यां महाभूतानीति। महाभूतानि क्षित्यादीनि क्षेत्रारम्भकद्रव्याणि, तत्कारणमहङ्कारोऽहंप्रत्ययः, अहङ्कारकारणं बुद्धिः, बुद्धेः कारणमव्यक्तं मूलप्रकृतिः। क्षेत्राश्रितानीन्द्रियाणि दश—वाक्पाण्यादीनि पञ्च कर्म्मेन्द्रियाणि, चक्षुःश्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि, एकञ्च मनः, पञ्च चेन्द्रियगोचरा इन्द्रियप्रत्यक्षास्तन्मात्ररूपाः शब्दादयो विषया आकाशादिविशेषगुणतया व्यक्ताः। एतच्चतुर्व्विंशतितत्त्वात्मकं क्षेत्रम्। यदत्र विशेषवक्तव्यमस्त्युक्तं तत् सप्तमस्य चतुर्थश्लोके। अत्रोक्तं श्रीमन्नीलकण्ठेन—"एतान्येव सांख्यैश्चतुर्व्विंशतितत्त्वानि गण्यन्ते। एतावांस्त्वस्माकं विशेषः—तैः स्वतन्त्रा सत्या च प्रकृतिरुच्यते, अस्माभिर्मायारूपा मिथ्या ईश्वराधीना चोच्यत इति; तथा च श्रुतिः—'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्' इति। तस्मात् सांख्यप्रक्रिया भगवताश्रितेति न भ्रमितव्यम्" इति। प्रकृतिरीश्वराधीना सत्या तदभिन्नेति शास्त्रस्यास्य सिद्धान्तः। ५।

एवं यदात्मकं क्षेत्रं तदुक्त्वा क्षेत्राश्रिता मनोवृत्तीराह इच्छेति। इच्छा स्पृहा, द्वेषो विरागः, सुखं सुखानुभवः, दुःखं दुःखानुभवः,

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः ॥७॥

सङ्घातः देहेन्द्रियाणां संहतिः, चेतना सुखदुःखानुभवशक्तिः, धृतिर्धारणाशक्तिः, एतत् सविकारम् इन्द्रियविकारसहितं क्षेत्रं समासेन सङ्क्षेपेण उदाहृतम् । इच्छादयो देहधर्म्मा न त्वात्मधर्म्मा इति सिद्धान्तं नैयायिका न बहु मन्यन्ते, तेषां मते आत्मधर्म्मा एवैते । अर्व्वाचीनानामपि नैयायिकमते सम्मतिः । अत्रेदं विचार्य्यम्—सुखमनुभूय तत्र स्पृहा उदेति । यत्र विषयेन्द्रिययोगात् सुखानुभवः, तत्र स दैहिक एव न त्वात्मिकः । न खलु वक्तव्यम्—ब्रह्मसंस्पर्शसुखानुभूतिरपि दैहिकत्वेन ग्राह्या देहे तज्जनिताश्रुपुलकादिदर्शनादिति । दैहिकसुखानुभवे बाह्यविषयः प्रथमं देहं सविकारं करोति, तेन च विकारेण सुखमनुभवति मनः ; ब्रह्मसंस्पर्शसुखे तु ब्रह्मस्वरूपं प्रथममात्मानुभवति, तदनुभूतिर्देहस्याश्रुपुलकादिविकारान् जनयति, अतएवाध्यात्मिकमेव तत्सुखम् । यदोदेति विषयसुखे स्पृहा, तदा सा देहधर्म्म एव ; ब्रह्मसंस्पर्शसुखमनुभूय या स्पृहा [illegible] वर्द्धते सात्मधर्म्म [illegible]-
एवं ब्रह्मयोगविरोधिनि पापि विद्वेषो [illegible] न [illegible]
एव । "ब्रह्मसंस्पर्शमत्यन्तसुखमश्नुते" ([illegible] अर्पित [illegible],
(८।७), "मन्मनाः" (९।३४) इत्यादिषु [illegible] [illegible]ानुभूतिः, [illegible]
पितमनोबुद्धित्वात् तद्वृत्तयो विशुद्धाः चैता [illegible]गुणतत्वादात्मन [illegible]
अन्यथा "यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः" (छा, उ, ८।५।६।१२), "न हि द्रष्टुर्द्दृष्टेर्विपरिलोपो विद्यते" (बृ, आ, उ, ६।३।२३) इत्याद्याः श्रुतयः प्रकुप्येयुः । एवं विषयविभागतो नैयायिकं मतं समञ्जसं भवति । ६ ।

देहाभिनिवेशत्यागेन परमात्मन्यभिनिविष्टचित्तस्यात्मज्ञानमुत्पद्यते तदेवास्य दिव्यमानसचक्षुर्दिव्या बुद्धिरतस्तदुपयोगीनि साधनानि वक्तुमुपक्रमते अमानित्वमिति पञ्चभिः । अमानित्वमात्मश्लाघाराहित्यम्—

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥८॥

उत्कृष्टजनेष्ववधीरणरहितत्वमिति श्रीमद्रामानुजः, स्वसत्कारानपेक्षत्वमिति श्रीमद्बलदेवः, विद्यमानैरविद्यमानैर्वा गुणैरात्मनः श्लाघनं मानित्वं तस्य विवर्जनमिति श्रीमन्मधुसूदनः ; अदम्भित्वम् स्वधर्मप्रकटीकरणाभावः—धार्म्मिकत्वयशःप्रयोजनतया धर्म्मानुष्ठानं दम्भस्तद्रहितत्वमिति श्रीमद्रामानुजः, आत्माल्पत्वं ज्ञात्वापि महत्त्वप्रदर्शनं दम्भ इति श्रीमन्माध्वः ; अहिंसा वाङ्मनःकायैः प्राणिनामपीडनम् ; क्षान्तिः परैः पीड्यमानोऽपि तान् प्रत्यविकारचित्तत्वम् अपराधसहनम् ; आर्ज्जवमकौटिल्यमक्रूरत्वम्—मनोवाक्कायकर्म्मणामवैपरीत्यमिति श्रीमन्माध्वः ; आचार्य्योपासनम् आचार्य्यसेवा उपदेष्टुरानुगत्यम् ; शौचमन्तर्बाह्यमालिन्यापनयनं—मृज्जलाभ्यां बाह्यं रागादिप्रतिपक्षभावनयाभ्यन्तरमिति भेदः—आत्मज्ञानतत्साधनयोग्यत्वं मनोवाक्कायगतं शास्त्रसिद्धमिति श्रीमद्रामानुजः, बाह्याभ्यन्तरपावित्र्यमिति श्रीमद्बलदेवः ; स्थैर्य्यम्—स्थिरभाव इति श्रीमच्छङ्करः, अध्यात्मशास्त्रोदितेष्वर्थेषु निश्चलत्वमिति श्रीमद्रामानुजः, सन्मार्गे प्रवृत्तस्य तदेकनिष्ठता इति श्रीमच्छ्रीधरः, मोक्षसाधने प्रवृत्तस्यानेकविघ्नप्राप्तावपि तदपरित्यागेन पुनः पुनर्यत्नाधिक्यमिति श्रीमन्मधुसूदनः ; आत्मविनिग्रहः आत्मसंयमः—आत्मन उपकारकस्यात्मशब्दवाच्यस्य कार्य्यकारणसङ्घातस्य विनिग्रहः स्वभावेन सर्व्वतः प्रवृत्तस्य सन्मार्गे एव निरोध इति श्रीमच्छङ्करः, आत्मस्वरूपव्यतिरिक्तविषयेभ्यो मनसो निवर्त्तनमिति श्रीमद्रामानुजः, शरीरसंयम इति श्रीमच्छ्रीधरः, आत्मानुसन्धिप्रतीपाद्विषयान्मनसो नियमनमिति श्रीमद्बलदेवः, आत्मनो देहेन्द्रियसङ्घातस्य स्वभावप्राप्तां मोक्षप्रतिकूले प्रवृत्तिं निरुध्य मोक्षसाधन एव व्यवस्थापनमिति श्रीमन्मधुसूदनः, देहेन्द्रियादिप्रचारसङ्कोच इति श्रीमन्नीलकण्ठः । ७ ।

इन्द्रियार्थेष्विति । इन्द्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु भोगेषु वैराग्यं

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥९॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥१०॥

रागाभावः—आत्मव्यतिरिक्तेषु विषयेषु दोषानुसन्धानेनोद्वेजनमिति श्रीमद्रामानुजः, शब्दादिषु प्रतीपेषु वैराग्यं रत्यभाव इति श्रीमद्बल-देवः ; अनहङ्कारः अभिमानशून्यता—अनात्मनि देहे आत्माभिमान-रहितत्वम्, प्रदर्शनार्थमिदम्—आत्मीयेष्वात्मीयाभिमानरहितत्वञ्चापि विवक्षितम् इति श्रीमद्रामानुजः, देहादिष्वात्माभिमानत्याग इति श्रीमद्बलदेवः, आत्मश्लाघनाभावेऽपि मनसि प्रादुर्भूतोऽहं सर्वोत्कृष्ट इति गर्वोऽहङ्कारः, अयोगव्यवच्छेदार्थ एवकारः समुच्चयार्थश्चकारः—तेनामानित्वादीनां विंशतिसंख्यकानां समुच्चितयोग एव ज्ञानमिति प्रोक्तं न त्वेकस्याभाव इति श्रीमन्मधुसूदनः ; जन्ममृत्युजराव्याधिदुःख-दोषानुदर्शनम् जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु दोषानुदर्शनं पुनः पुनरालोचनम्—शरीरत्वे जन्ममृत्युजराव्याधिदुःख-रूपस्य दोषस्यावर्जनीयत्वानुसन्धानमिति श्रीमद्रामानुजः । ८ ।

असक्तिरिति । असक्तिः सक्तिः आसक्तिः निषिद्धेषु विषयेषु प्रीति-स्तदभावोऽसक्तिः, आत्मव्यतिरिक्तविषयेषु सङ्गरहितत्वमिति श्रीमद्रामा-नुजः, ममेदमित्येतावन्मात्रेण प्रीतिः तद्राहित्यमिति श्रीमन्मधुसूदनः ; पुत्रदारादिष्वनभिष्वङ्गः अन्यस्मिन्नात्मभावलक्षणोऽभिष्वङ्गः अन्यस्मिन् सुखिनि अहमेव सुखी अन्यस्मिन् दुःखिनि चाहमेव दुःखीति भावः, पुत्रदारादिषु तादृशभावस्याभावः,—पुत्रदारगृहादिषु शास्त्रीयकर्मो-पकरणत्वातिरेकेण श्लेषरहितत्वम् इति श्रीमद्रामानुजः, सक्तिः स्नेहः स एवातिपक्वोऽभिष्वङ्ग इति श्रीमन्माध्वः इष्टानिष्टोपपत्तिषु इष्टानामनु-कूलानामनिष्टानां प्रतिकूलानाञ्चोपपत्तयः प्राप्तयस्तासु नित्यं सर्वदा समचित्तत्वं हर्षविषादरहितत्वम् । ९ ।

मयीति । मयि सर्वान्तर्यामिणि अनन्ययोगेन एकान्तित्वाभि-

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥११॥

अनन्येन—नान्यो भगवतो वासुदेवात् परोऽस्त्यतः स एव नो गतिरित्येवं निश्चिताऽव्यभिचारिणी बुद्धिरनन्ययोगस्तेनेति श्रीमच्छङ्करः, एकान्तयोगेनेति श्रीमद्रामानुजः, सर्वात्मदृष्ट्येति श्रीमच्छ्रीधरः, एकान्तिकत्वेनेति श्रीमद्बलदेवः, ज्ञानकर्मतपोयोगाद्यमिश्रत्वेनेति श्रीमद्विश्वनाथः, अव्यभिचारिणी एकान्ता स्थिरा—केनापि प्रतिकूलेन हेतुना निवारयितुमशक्या इति श्रीमन्मधुसूदनः—भक्तिः ; विविक्तदेशसेवित्वं जनकोलाहलशून्यस्थानप्रियता—स्वभावतः संस्कारेण वा अशुच्यादिभिः सर्पव्याघ्रादिभिश्च रहितः अरण्यनदीपुलिनदेवगृहादिर्विविक्तो देशः तं सेवितुं शीलमस्येति विविक्तदेशसेवी तद्भावो विविक्तदेशसेवित्वमिति श्रीमच्छङ्करः, जनवर्जितदेशवासित्वमिति श्रीमद्रामानुजः, विविक्तः शुद्धचित्तप्रसादकरस्तं देशं सेवितुं शीलं यस्य तस्य भावस्तत्त्वमिति श्रीमच्छ्रीधरः, निर्जनस्थानप्रियत्वेनेति श्रीमद्बलदेवः ; जनसंसदि अरतिः जनानामात्मज्ञानविमुखानां भोगविलासरतानां संसत् समवायः तस्यामरतिरप्रीतिः । अरतिरसतां सङ्गे, न तु सतां सङ्गदोषहरत्वात् मोक्षजनकत्वाच्च ; तथाहि "प्रसङ्गमजरं पाशमात्मनः कवयो विदुः । स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥" (भा, ३स्क, २५अ, २०श्लो), "त एते साधवः साध्वि सर्वसङ्गविवर्जिताः । सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥" (भा, ३स्क, २५अ, २४श्लो) इति । १० ।

अध्यात्मेति । अध्यात्मज्ञाननित्यत्वम् आत्मविषयकज्ञाननिष्ठत्वम्, तत्त्वज्ञानार्थदर्शनं तत्त्वज्ञानप्रयोजनं यत् तद्दर्शनं तस्य पुनः पुनरालोचनं प्रत्यक्षीकरणम् । एतत् अमानित्वादि विंशतिसंख्यकं ज्ञानं ज्ञानसाधनम्—ज्ञानार्थत्वात् ज्ञानमिति श्रीमच्छङ्करः, ज्ञायतेऽनेनात्मेति ज्ञानमात्मज्ञानसाधनमिति श्रीमद्रामानुजः—इति प्रोक्तम्,

अतोऽन्यथा यत् तदज्ञानम् अज्ञानतापादकम् । अमानित्वादीनि विंशतिमुपलक्ष्याह श्रीमद्विश्वनाथः—"अत्राष्टादश भक्तानां ज्ञानिनाञ्च साधारणानि, किन्तु भक्तैः—'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी' इत्येकमेव भगवदनुभवसाधनत्वेन यत्नतः क्रियते । अन्यानि साष्टदश तज्ञाभ्यासवतां तेषां स्वत एवोत्पद्यन्ते न तेषु यत्न इति साम्प्रदायिकाः । अन्तिमे द्वे तु ज्ञानिनामसाधारणे एव ।" इति । श्रीमन्मधुसूदनस्त्वाह—"अमानित्वादीनां विंशतिसंख्यकानां समुच्चितो योग एव ज्ञानमिति प्रोक्तं न त्वेकस्याभावः" इति । स्वयं श्रीमता श्रीचैतन्येनोक्तं—"तृणादपि सुनीचेन तरोरपि सहिष्णुना । अमानिना मानदेन कीर्त्तनीयः सदा हरिः ॥" इति । अतोऽमानित्वादिकं विना भक्तिर्न सिद्ध्यतीत्यायाति । "न ह्यपुण्यवतां लोके मूढानां कुटिलात्मनाम् । भक्तिर्भवति गोविन्दे कीर्त्तनं श्रवणं तथा ॥" इति तदनुमाभिभिव्यक्तं प्रमाणमपि दर्शयति पुण्यभूमावेव भक्तेरभ्युदयः । अमानित्वादिकं ज्ञानसाधनं चित्तभूमेः पवित्रत्वमेव साधयति । न पुनः पावित्र्यं विना भक्तेरभ्युदये सम्भावनास्ति । यत्तूक्तम्—"अथ 'श्रुतिस्मृती ममैवाज्ञे' इत्यादिनिन्दितमावश्यकक्रियानिषेधयोरुल्लङ्घनं द्विविधम् । तौ हि धर्म्मशास्त्रोक्तौ भक्तिशास्त्रोक्तौ चेति । तत्र भगवद्भक्तिविश्वासेन दौःशील्येन वा पूर्व्वयोरकरणकरणप्रत्यामक्तौ न दैष्णवभावात् भ्रंशः 'देवर्षिभूताप्तनृणाम्' इत्याद्युक्तेः, 'अपि चेत् सुदुराचारः' इत्याद्युक्तेश्च । तादृग्रुचिमति तु तयैव रुच्या हिष्टत्वादपुनर्भवाद्यानन्दस्यापि वाञ्छा नास्ति, किमुत घृणास्पदस्य ततस्तत्र स्वत एव न प्रवृत्तिः । प्रमादादिना कदाचित् जातं चेत् विकर्म्म तत्क्षणादेव नश्यत्यपि । उक्तञ्च—'विकर्म्म यच्चोत्पतितं कथञ्चित् धुनोति सर्व्वं हृदि सन्निविष्टः' इति । अथ वैष्णवशास्त्रोक्तौ तर्हि विष्णुसन्तोषैकप्रयोजनावेव भवतः, तयोश्च तादृगत्वे श्रुते सति तदीयरागरुचिमतः स्वत एव प्रवृत्ती स्यातां, तत्सन्तोषैकजीवनत्वात् प्रीतिजातेः । अतएव न तत्र स्वानुगम्यमानरागात्मकसिद्धभक्तविशेषेण ज्ञातत्वाज्ञातत्वयोरनुस

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते।
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ॥१२॥

ध्यानस्यापेक्षा स्यात्, किन्तु तत्कृतत्वे सति विशेषेणापक्षो भवतीत्यत्र विशेषः। अथ क्वचित् शास्त्रोक्तकर्मविध्यपेक्षा च रागकृत्यैव प्रवर्त्तितेति रागानुगान्तःपात एव" इति—तत्तु रागोदये स्वत एव विधिनिषेधयोरनुसरणं न तु प्रयत्नत इति प्रतिपादयति। रागोदयात् प्राक् अमानित्वादिकं साधनत्वेनावश्यमपेक्ष्यम्, रागोदये तु तेषां स्वाभाविकत्वम्। यत्तु श्रीमद्विष्णुपुर्य्योक्तौ दृश्यते—"अनुचितमुचितं वा कर्म कोऽयं विभागो भगवति परमास्तां भक्तियोगो द्रढीयान्। किरति विषमहीन्द्रः सान्द्रपीयूषमिन्दुर्द्वयमपि स महेशो निर्विशेषं बिभर्त्ति ॥" इति, तत्तु रागवतां कर्मविभागं विनापि निषिद्धस्य त्यागः कर्त्तव्यस्यानुसरणञ्च स्वतो भवतः, कदाचिदवस्थावैगुण्यात् विकर्म्मजाताक्रान्ता अपि ते भगवत्यनुरागवशात् चेतसो विशुद्धिमनपहायैव ततो मेघविमुक्तचन्द्रमा इव वहिरायान्तीति प्रदर्शनार्थम्। 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी' इत्यत्र भक्तेः साधनान्तःपातित्वात् अन्यैः साधनैरस्या विप्रयोगो न युज्यते, साधनभक्तिरियम्; उक्तञ्च श्रीमता बलदेवेन—"भक्तिः श्रवणाद्येति"। अतः साधूक्तं श्रीमन्मधुसूदनेन—"समुच्चितो योग एव ज्ञानमिति प्रोक्तं न त्वेकस्याभावः" इति। ११।

अमीभिर्ज्ञानसाधनैर्यत् ज्ञातव्यं तदुच्यते ज्ञेयमिति। ज्ञेयं ज्ञातव्यं यत् तत् प्रवक्ष्यामि। यत् ज्ञेयं ज्ञातव्यं ज्ञात्वा विदित्वाऽमृतं मोक्षमश्नुते लभते। किन्तज्ज्ञेयम्? परं ब्रह्म, अनादिमत् न आदिमत् अनादिमत्—आदिमदिदं कार्य्यकारणात्मकं विश्वं, तज्ज्ञेयं न विश्ववत् आदिमत्। अनेनास्य विश्वातीतत्वं विश्वभिन्नत्वं सूचयति। आदिमद्देहादि तद्वर्जितमनादिमदिति श्रीमन्माध्वः। एतदेव विस्पष्टयति—न सत् स्थूलं कार्य्यं न असत् सूक्ष्मं कारणं तत् उच्यते। अनादिमदिति विशेषणम्, अनादि मत्परमिति पदच्छेदेन केचिद्व्या-

ख्यायते अनादीति बहुव्रीहौ चार्थे निष्पन्ने तत्र मतुप आनर्थक्यं यद्युक्तिः ।

श्लोकमिमं श्रीमद्रामानुजस्तदनुगः श्रीमद्बलदेवः प्रत्यगात्मपक्षे नियोजयति । तथाहि श्रीमद्रामानुजः—"अमानित्वादिभिः साधनैर्ज्ञेयं यत् प्रत्यगात्मस्वरूपं तत् प्रवक्ष्यामि, यत् ज्ञात्वा जन्मजरमरणादि-प्राकृतधर्म्मरहितममृतमात्मानं प्राप्नोति । अनादि आदिर्यस्य न विद्यते तदनादि, अस्य हि प्रत्यगात्मन उत्पत्तिर्न विद्यते, तत एवान्तो न विद्यते……… । मत्परम् अहं परो यस्य तन्मत्परम्……… । ब्रह्म बृहद्गुणयोगि शरीरादर्थान्तरभूतं, स्वतः शरीरादिभिः परिच्छेद-रहितं क्षेत्रज्ञतत्त्वमित्यर्थः । 'स चानन्त्याय कल्पते' इति श्रूयते, शरीरपरिच्छिन्नत्वं चास्य कर्म्मकृतं, कर्म्मबन्धमुक्तावनन्तत्वम् । आत्मन्यपि ब्रह्मशब्दः प्रयुज्यते……… । न सत्तासदुच्यते कर्म्मकारणरूपावस्था-द्वयरहिततया सदसच्छब्दाभ्यामात्मस्वरूपं नोच्यते ।" इति । श्रीमद्बलदेव आह—"उक्तैः साधनैर्यज्ज्ञेयमुपलभ्यं जीवात्मवस्तु परमात्मवस्तु च तदहं प्रकर्षेण सुबोधतया वक्ष्यामि, यज्ज्ञात्वा जनोऽमृतमश्नुते लभते । तत्र जीवात्मवस्तूपदिशति अनादीत्यर्द्धकेन । नास्त्यादिर्यस्य तत् जीवस्यादिकत्पत्तिर्नास्त्यन्तोऽन्तोऽपि नेति नित्योऽमावित्यर्थः ………अहमेव परः स्वामी यस्य तत्……… । जीवे ब्रह्मशब्दस्तु 'विज्ञानं ब्रह्म चेद्वेद' इत्यादिश्रुतेः……… । न सदिति । तद्विशुद्धं जीवात्मवस्तु कार्य्यकारणावस्थाविरहात् सत्तासच्च नोच्यते ।" इति । श्रीमद्बलदेवोऽनन्तरश्लोकं परमात्मपक्षे व्याचष्टे श्रीमद्रामानुजस्तु प्रत्यगात्मपक्षेऽपि, तद्यथा—"परस्य ब्रह्मणोऽपाणिपादस्यापि सर्व्वतः पाणिपादादिकार्य्यकर्तृत्वं श्रूयते, प्रत्यगात्मनोऽपि परिशुद्धस्य तत्साम्यापत्त्या सर्व्वतः पाणिपादादिकार्य्यकर्तृत्वं श्रुतिसिद्धमेव ।" इति ।

श्रीमच्छङ्करस्तदनुयायिनश्च निर्व्विशेषब्रह्मपक्षे श्लोकमिमं व्याख्यातवन्तः । अनादि मत्परमिति पदच्छेदं श्रीमच्छङ्कर एवं प्रत्याचष्टे—

"अहं वासुदेवाख्या परा शक्तिर्ब्रह्म तस्मात्परमिति"......पर्यो न सम्भवति, ब्रह्मणः सविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वात् न सदसदुच्यत इति। विशिष्टशक्तिमत्त्वप्रदर्शनं विशेषप्रतिषेधश्च विप्रतिषिद्धः" इति। श्रीमच्छ्रीधरेण तु—"मम विष्णोः परं निर्विशेषरूपं ब्रह्म" इत्यर्थो निष्पाद्यते। विधिमुखेन सच्छब्देन निषेधमुखेनासच्छब्देनोच्यते, इदन्तु तदुभयविलक्षणमिति न केनचिच्छब्देनोच्यत इति श्रीमच्छङ्करस्तदनुयायिनश्च। शब्दो हि जातिगुणक्रियासम्बन्धद्वारेणार्थावबोधे हेतुः। न हि ब्रह्मणि जातिगुणक्रियासम्बन्धानां सम्भवः; यतः 'एकमेवाद्वितीयम्' इति जातिनिषेधः, 'निर्गुणं निष्क्रियं शान्तम्' इति गुणक्रियासम्बन्धानां निषेधः। अपरा परा चेति प्रकृतिद्वयवत्त्वेन परब्रह्मणस्तयोः सम्बन्धोऽवश्यम्भावी। सम्बन्धे सति चिदचिन्नियन्तृनियामकत्वादिगुणक्रियाभेदोऽपि सिध्यति। एवं भेदे सिद्धे अयमीश्वरः, अयं जीवः, इयं प्रकृतिरिति भिन्नत्वेन ग्रहणं सम्भवति। एवंग्रहणात्तु शब्दैरेव निर्वक्तव्यम्। अतस्तथा निरूप्यते श्रुतिभिरीश्वरो जीवः प्रकृतिश्च ;—"स वा अयमात्मा सर्व्वेषां भूतानामधिपतिः सर्व्वेषां भूतानाᳫं राजा। तद्यथा रथनाभौ रथनेमौ चाराः सर्व्वे समर्पिता एवमेवास्मिन्नात्मनि सर्व्वाणि भूतानि सर्व्व एव आत्मानः समर्पिताः" (वृ, आ, उ, ५।५।१५), "एतस्य वाक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः। एतस्य वाक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः। एतस्य वाक्षरस्य प्रशासने गार्गि निमेषा मुहूर्त्ता अहोरात्राण्यर्द्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति। एतस्य वाक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्व्वतेभ्यः प्रतीच्योऽन्या यां यांश्च दिशमन्वेति" (वृ, आ, उ, ४।८।९) इत्येवमाद्याः। अनिर्व्वचनीयत्वादिवादिन्यः श्रुतयः कथं न विरुध्यन्ते प्रोक्तं तत् प्राक्।

अत्रार्द्धकस्य विषयो जीव इति पक्षो न सर्व्वथा रुचिरोऽनन्तरश्लोकस्य न तत्पदेन परामृष्टत्वात् पूर्व्वस्य। अमानित्वादिज्ञानसाधनानि

सर्व्वतः पाणिपादन्तत् सर्व्वतोऽक्षिशिरोमुखम् ।
सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति ॥१३॥

पद्यान्तरे यथायथं लक्षणानि धातुः चिद्रूपस्य भगवज्ज्ञानिस्तस्य । अतो नास्ति तन्निर्व्वचने विशेषप्रयोजनम् । १२ ।

तज्ज्ञेयं ब्रह्म कार्य्यकारणातीतमित्युक्तम् । न हि कार्य्यकारणातीतं किमपि वस्तुमात्रं ज्ञानगोचरं भवितुं शक्यम् । सुतरां ज्ञेयत्व-मस्य न सिध्यति । सिध्यति तस्य कार्य्यकारणानां साक्षात् कारक-त्वात् । नहि तन्नियमनं विना किमपि क्रियावद्भवितुं समर्थम् । अत-स्तदेव प्राणिनिचयस्य पाणिपादादियुक्तस्य सर्व्वेन्द्रियाधिष्ठातृ नियन्त्रिति भङ्ग्यन्तरेणाह सर्व्वत इति । तत् ज्ञेयं ब्रह्म सर्व्वतः पाणिपादं सर्व्वत्र पाणयः पादाश्च यस्य तत्—'सर्व्वतः सर्व्वत्र सर्व्वेषु पाणयः पादा-श्चाचेतनाः स्वस्वव्यापारेषु प्रवर्त्तनीया यस्य चेतनस्य क्षेत्रज्ञस्य तत्' इति श्रीमन्मधुसूदनः—सर्व्वतः सर्व्वत्र अक्षिशिरोमुखम् अक्षीणि शिरांसि मुखानि च यस्य 'प्रवर्त्तनीयानि' तत्, सर्व्वतः सर्व्वत्र श्रुतिमत् श्रुतयः श्रवणेन्द्रियाणि तानि विद्यन्ते 'प्रवर्त्तनीयत्वेन' यस्य तत् । न च पाणि-पादादियुक्तमेव तज्ज्ञेयं वस्त्वित्याह—लोके प्राणिनिकाये सर्व्वमावृत्य संव्याप्य तिष्ठति स्थितिं लभते । पाणिपादादिकं यत् किञ्च तत् संव्याप्य आत्मन्यन्तर्भूय विद्यते तत् । यद्येवं कथं 'सर्व्वतः पाणिपा-दन्तत्' इत्युक्तिः ? धावनग्रहणादिक्रियाणां प्रकाशस्थानानि पाणिपा-दादयस्ताभ्यः क्षेत्रज्ञपतिप्रेरणासम्भूताभ्य उत्पद्यन्ते तिष्ठन्ति च यतः । येभ्यो बीजेभ्यो देहानामुत्पत्तिस्तेषां बीजानामेकत्वेऽपि ततः पाणिपा-दादीनां भिन्नाकारत्वमन्तर्भूतक्षेत्रज्ञशक्तेर्वैचित्र्यतानुसारतः क्षेत्रज्ञपतेः प्रेरणयैव भवतीति सैव तेषामुत्पत्तौ, उत्पत्त्यनन्तरं तच्छक्त्यावस्थानात् स्थितौ च हेतुः । उक्तस्यैव स्वयमाचार्य्येणानन्तरश्लोके । "सकलप्राणि-करणोपाधिद्वारेण ज्ञेयब्रह्मणोऽस्तित्वं प्रतिपाद्यते" इति श्रीमच्छङ्क-राचार्य्यः श्रीमच्छङ्करवाक्यानुसरणेन । "अपाणिपादो जवनो ग्रहीता

सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१४॥
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१५॥
अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१६॥

[illegible]चक्षुः स शृणोत्यकर्णः" (श्वे, उ, ३।१८) इति । पाणिपादाद्य-
[illegible]न्योऽपि प्रेरकत्वेन तत्कार्य्यकृदिति सरलः पन्थाः । १३ ।

'सर्व्वतः पाणिपादम्' इत्युक्त्वा पाणिपादादियुक्तत्वमस्य न विभाव्य-
[illegible] पूर्व्वोक्तवचनस्य हेतुमाह सर्व्वेन्द्रियेति । तत् ज्ञेयं ब्रह्म
[illegible]न्द्रियगुणाभासं सर्व्वेषामिन्द्रियाणां गुणानां तद्विषयाणाञ्च आभासः
[illegible] प्रकाशो यस्मात् तत्—"तस्य भासा सर्व्वमिदं विभाति"
[illegible], ५।१५) इति श्रुतिः, सर्व्वेन्द्रियाणि गुणांश्चाभासयतीति श्रीम-
[illegible]ः,—स्वयन्तु सर्व्वेन्द्रियविवर्ज्जितं सर्व्वैरिन्द्रियैर्हीनम्, असक्तं सङ्ग-
[illegible]तम्, अथापि सर्व्वभृत् सर्व्वेषां धारयिता पोषयिता चैव, निर्गुणं
[illegible]वरजस्तमोगुणविरहितम्, अथच गुणभोक्तृ सत्त्वरजस्तमोगुणानां
भोक्तृ पालकं तत्तत्क्रियाणामविच्छेदप्रवर्त्तनेन । अत्र श्रुतिः—"सर्व्वे-
न्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् । सर्व्वस्य प्रभुमीशानं सर्व्वस्य
शरणं बृहत् ॥" (श्वे, उ, ३।१७) इति । १४ ।

पाणिपादाद्यसंयुक्तत्वं दर्शयति हेत्वन्तरेण बहिरिति । तत् ज्ञेयं
ब्रह्म भूतानां बहिरन्तश्च सर्व्वगतं सर्व्वमन्तर्भूय वर्त्तमानम्, अचरम्
अचलमविकारित्वात् चरं चलमेव च क्रियाकारित्वात्, सूक्ष्मत्वात्तद-
विज्ञेयं संसारिभिरिति शेषः, दूरस्थम् अन्तिके च तत् । अत्र श्रुतिः
—"तदेजति तन्नैजति तद्दूरे तद्वन्तिके । तदन्तरस्य सर्व्वस्य तदु सर्व्व-
स्यास्य बाह्यतः ॥" (वा, स, उ, ५) इति । १५ ।

अविभक्तमिति । भूतेषु प्राणिषु अविभक्तम् एकमपि विभक्तमिव

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य धिष्ठितम् ॥१७॥

अविभक्तञ्च विभक्तम् प्रतिहृदयान्तर्यामित्वेन, तज्ज्ञेयं भूतभर्तृ च भूतानां पोषकम्, ग्रसिष्णु ग्रसनशीलं प्रवेशस्थानम्, प्रभविष्णु च प्रभवहेतुश्च । अत्र श्रुतिः—"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति ।" (तै, उ, ३) इति । १६ ।

ज्योतिषामिति । ज्योतिषां सूर्य्यादीनामपि तत् ज्योतिः, तमसः परं तत् उच्यते । स्वयं तत् ज्ञानं ज्ञानस्वरूपं, ज्ञेयं ज्ञातव्यम्, ज्ञानगम्यम् अमानित्वादिज्ञानसाधनैर्गम्यं प्राप्यम, सर्व्वस्य हृदि धिष्ठितं सन्निहितम् । अत्र श्रुतयः—"न तत्र सूर्य्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ॥" (कठ, ५।१५) इति, 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्" (श्वे, उ ३।८) इति, "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्य्येण नित्यम् । अन्तःशरीरे ज्योतिर्म्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ॥" (मु, उ, ३।१।५) इति ।

सर्व्वतः पाणिपादम्" इत्यारभ्य परात्मतत्त्वमुपदिष्टवानाचार्य्यः । स हि परात्मा जनानन्तकोटिहस्तैः प्रयोजनानि विदधाति, अनन्तकोटिचरणैस्तानुपागच्छति, अनन्तकोटिनयनैस्तान् पश्यति, अनन्तकोटिशिरोमुखैस्तानुपदिशति, अनन्तकोटिश्रुतिभिस्तेषां वचनानि शृणोति, अथापि न तस्मिन् हस्तचरणनयनाननश्रवणानि विद्यन्ते, तैर्विना तत्तत्कार्य्यं साधयति स स्वशक्त्येति तत्तच्छब्दैर्निर्द्दिशः ; एकस्य चित्स्वरूपस्य विलासा एते इति प्राक् प्रतिपादितम् । विविधकल्याण-साधनेऽनासक्तः सन् स व्यापृतः, अचलत्वेनात्मन्येव स्थित्वा स चलत्वं कार्य्यव्यापृतत्वं भजते । स हि पापकलुषितचित्तसन्निधौ दूरस्थ इति प्रतिभाति, भक्तानान्तु सन्निधाविति, दूरमन्तिकं सर्व्वमेव व्याप्य च स

इति क्षेत्रं तथा ज्ञानं ज्ञेयञ्चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१८॥
प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥१९॥

स्थितः । स सर्वातीतोऽपि सर्वमात्मव्याप्तभूय विद्यमान इति प्रतिहृदयं तस्याधिष्ठानम्, यथाप्येकोऽखण्डः सः । ततो भूतानामुत्पत्तिस्तस्मिन् स्थितिस्तस्मिन्ननुप्रवेशश्च । १७ ।

यथोक्तार्थमुपसंहरति इति क्षेत्रमिति । इति एवं क्षेत्रं महाभूतादि धृत्यन्तं, तथा ज्ञानममानित्वादि तत्त्वज्ञानार्थदर्शनान्तं, ज्ञेयञ्च अनादिमदित्यादि तमसः परमित्यन्तं समासतः सङ्क्षेपतः सारसंग्रहेणोक्तम् । एतद्विज्ञानस्य फलमुच्यते—मद्भक्तः मदेकशरणः सर्वान्तर्यामिणो मम भजननिरतः, एतत् यथोक्तं क्षेत्रं ज्ञानं ज्ञेयञ्च विज्ञायापरोक्षज्ञानविषयं कृत्वा मद्भावाय मम सर्वान्तर्यामिणो भावाय स्वरूपैक्याय प्रपद्यते युज्यते । १८ ।

एवं तत् क्षेत्रं यद्द्रव्यं यत्स्वभावकं यैर्विकारैर्युक्तं तदुक्त्वा यस्माच्च जायते यत्स्वरूपो यत्प्रभावश्च क्षेत्रज्ञः क्षेत्रज्ञश्चेति वक्तुमुपक्रमते । अनादिमदित्यादिभिः क्षेत्रज्ञपतेः स्वरूपमुक्तमिति दृष्ट्वा श्रीमन्नीलकण्ठेन स्वरूपमुक्तमिति निर्धार्य 'यस्माद्यज्जायते तच्च क्षेत्रज्ञस्य प्रभावश्चेति द्वयं' वक्तव्यत्वेन निर्दिष्टम् । अमानित्वादिभिर्ज्ञानम् अनादिमदित्यादिभिर्ज्ञेयमेवोक्तम्, पुरुषस्य भोक्तृत्वस्वरूपं, परमपुरुषस्य चोपद्रष्टृत्वादिकस्वरूपमनन्तरमुच्यत इति तथैवास्माभिरन्यैर्व्याख्यातृभिः सम्बिभाव्यते । अनादी प्रकृतिमिति । प्रकृतिं पुरुषञ्चैव उभावपि अनादी नित्यौ विद्धि । विकारांश्च देहेन्द्रियादीन् इच्छादीनिति श्रीमन्नीलकण्ठः, गुणांश्च सत्त्वरजस्तमोरूपान्—गुणपरिणामान् सुखदुःखमोहादीनिति श्रीमच्छ्रीधरः, बुद्धीन्द्रियादीनिति श्रीमन्नीलकण्ठः

—प्रकृतिसम्भवान् प्राकृतान् विद्धि। अत्र श्रीमच्छङ्करः—"प्रकृति पुरुषश्चैवेश्वरस्य प्रकृती तौ प्रकृतिपुरुषावुभावप्यनादी न विद्यते आदिर्ययोस्तावनादी, नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम्, प्रकृतिद्वयवत्त्वमेव हीश्वरस्येश्वरत्वं याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुः। ते द्वे अनादी सत्यौ संसारस्य कारणम्। न आदी अनादी इति तत्पुरुषसमासं केचिद्वर्णयन्ति, तेन हि केवलेश्वरस्य कारणत्वं सिध्यति। यदि पुनः प्रकृतिपुरुषावेव नित्यौ स्यातां तत्कृतमेव जगन्नेश्वरस्य जगतः कर्त्तृत्वं, तदसत्; प्राक् प्रकृतिपुरुषयोरुत्पत्तेरीशितव्याभावात् ईश्वरस्यानीश्वरत्वप्रसङ्गात् संसारस्य निर्निमित्तत्वे निर्मोक्षत्वप्रसङ्गात् शास्त्रानर्थक्यप्रसङ्गात् बन्धमोक्षाभावप्रसङ्गाच्च; नित्यत्वे पुनरीश्वरप्रकृत्योः सर्व्वमेतदुपपन्नं भवेत्" इति। श्रीमद्रामानुजस्तु—"प्रकृतिपुरुषावुभावन्योन्यसंसृष्टावनादी विद्धि। बन्धहेतुभूतान् विकारानिच्छाद्वेषादीन् अमानित्वादिकांश्च गुणान् मोक्षहेतुभूतान् प्रकृतिसम्भवान् विद्धि पुरुषेण संसृष्टेयमनादिकालप्रवृत्ता क्षेत्राकारपरिणता प्रकृतिः स्वविकारैरिच्छाद्वेषादिभिः पुरुषस्य बन्धहेतुर्भवति, सैवास्य अमानित्वादिभिः स्वविकारैः पुरुषस्यापवर्गहेतुर्भवतीत्यर्थः" इति। श्रीमन्मधुसूदन आह—"तत्र सप्तमे ईश्वरस्य द्वे प्रकृती परापरे क्षेत्रक्षेत्रज्ञलक्षणे उपन्यस्य 'एतद्योनीनि भूतानि' इत्युक्तं तत्रापरा प्रकृतिः क्षेत्रलक्षणा परा जीवलक्षणा इति तयोरनादित्वमुक्त्वा तदुभययोनित्वं भूतानामुच्यते। प्रकृतिर्मायाख्या त्रिगुणात्मिका पारमेश्वरी शक्तिः क्षेत्रलक्षणा या चापरा प्रकृतिरित्युक्ता; या तु परा प्रकृतिर्जीवाख्या प्रागुक्ता स इह पुरुष इत्युक्त इति पूर्व्वापराविरोधः" इति।

अत्रेदं विवेच्यम्;—परापरे प्रकृती न परमपुरुषतो भिन्ने, तच्छक्तित्वात्। अभिन्नत्वेऽपि तयोर्जगदाकारेण जीवाकारेण प्रकाशमानत्वात् परतो भिन्नता। साधूक्तं श्रीमच्छङ्करेण—"ज्ञाननित्यत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यव्यपदेशो नोपपद्यते इति चेत्, न, प्रततौष्ण्यप्रका-

शेऽपि सवितरि दहति प्रकाशयतीति स्वातन्त्र्यव्यपदेशदर्शनात्। ननु सवितुर्दाह्यप्रकाश्यसंयोगे दहति प्रकाशयतीति व्यपदेशः स्यात्; न तु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्म्मसंयोगोऽस्तीति विषमो दृष्टान्तः, न, असत्यपि कर्म्मणि सविता प्रकाशत इति कर्त्तृत्वव्यपदेशदर्शनात्; एवमसत्यपि ज्ञानकर्म्मणि ब्रह्मणस्तदैक्षतेति कर्त्तृव्यपदेशोपपत्तेर्न वैषम्यम्। कर्म्मापेक्षायान्तु ब्रह्मणि ईक्षितृत्वश्रुतयः सुतरामुपपन्नाः। किं पुनस्तत्कर्म्म यत्प्रागुत्पत्तेरीश्वरज्ञानस्य विषयो भवतीति। तत्त्वान्यत्वाभ्यामनिर्वचनीये नामरूपे अव्याकृते व्याचिकीर्षिते इति ब्रूमः। यत्प्रसादाद्धि योगिनामप्यतीतानागतविषयं प्रत्यक्षज्ञानमिच्छन्ति योगशास्त्रविदः, किमु वक्तव्यं तस्य नित्यसिद्धेश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यं ज्ञानं भवतीति। यदप्युक्तं प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसम्बन्धमन्तरेणेक्षितृत्वमनुपपन्नमिति न तच्चोद्यमवतरति; सवितृप्रकाशवत् ब्रह्मणो ज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपिच अविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य।" (वे, सू, भा, १।१।५) इति। जीवतत्त्वमधिकृत्य श्रीमद्रामानुज आह—"नात्मोत्पद्यते......। कथं तर्हि एकविज्ञानेन सर्व्वविज्ञानप्रतिज्ञोपपद्यते? इत्थमुपपद्यते;—जीवस्यापि कार्य्यत्वात् कार्य्यकारणयोरनन्यत्वाच्च। एवं तर्हि वियदादिवदुत्पत्तिमत्त्वमङ्गीकृतं स्यात्; नेत्युच्यते, कार्य्यत्वं हि नामैकस्य द्रव्यस्यावस्थान्तरापत्तिः, तज्जीवस्याप्यस्त्येव। इयांस्तु विशेषः—वियदादेरचेतनस्य यादृशोऽन्यथाभावो न तादृशो जीवस्य। ज्ञानसङ्कोचविकाशलक्षणो जीवस्यान्यथाभावो वियदादेस्तु स्वरूपान्यथाभावलक्षणः। सेयं स्वरूपान्यथाभावलक्षणोत्पत्तिर्जीवे प्रतिषिध्यते। एतदुक्तं भवति—भोग्यभोक्तृनियन्तॄन् विविक्तस्वभावान् प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तरि प्रतिषिध्य तस्य नित्यताञ्च प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तृगतञ्चापुरुषार्थाश्रयत्वञ्च नियन्तरि प्रतिषिध्य तस्य नित्यत्वं निरवद्यत्वं सर्व्वदा सर्व्वज्ञत्वं सत्यसङ्कल्पत्वं करणाधिपाधिपत्वं विश्वस्य पतित्वञ्च

कार्य्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥२०॥

प्रतिपाद्य सर्व्वावस्थयोश्चिदचितोस्तं प्रति शरीरत्वं तस्य चात्मत्वं प्रतिपादितम्।" (वे, सू, भा, २।१।१८) इति। स च परापरप्रकृतियुक्तत्वं परस्य ब्रह्मणः स्वभावयैव समीक्षावान्—"एवं सदा चिदचिद्वस्तुविशिष्टस्य ब्रह्मणः प्राक् सृष्टेरेकत्वावधारणञ्च नामरूपविभागाभावादुपपद्यते—'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते' इति हि नामरूपविभागभावाभावाभ्यां नानात्वैकत्वे वदन्तीति।" (२।१।१८) इति। यद्यपि श्रीमद्रामानुजेन चिदचिच्छरीरं ब्रह्मेत्युक्तं तथाप्यन्तर्यामिब्राह्मणानुसारिणा तेन न तदतीतत्वं तस्यास्वीकर्त्तुं शक्यम्। एवं सत्याचार्य्यमतेन तन्मतस्य सामञ्जस्यं भवतीत्यलं पल्लवितेन। १९।

कस्य वा हेतुः प्रकृतिः पुरुषश्च तद्दर्शयति कार्य्येति। कार्य्यकारणकर्त्तृत्वे कार्य्यं शरीरम् एकादशेन्द्रियाणि पञ्च विषया इति षोडश विकाराः, कारणानि समनस्कानीन्द्रियाणि महानहङ्कारो भूततन्मात्राणीति प्रकृतिविकृतयः सप्त, तेषां कर्त्तृत्वे क्रियाकारित्वे प्रकृतिर्हेतुराश्रयः। सुखदुःखानां भोग्यानां भोक्तृत्वे उपलब्धृत्वे पुरुषो हेतुः सुखदुःखानुभवाश्रय इत्यर्थः। पुरुषो विषयी प्रकृतिपरिणामो विषयः, विषयविषयिसम्बन्धो हि भोग्यभोक्तृत्वमूलम्। यथाहाचार्य्योऽनुगीतायाम्—"अतः परं प्रवक्ष्यामि सत्त्वक्षेत्रज्ञयोर्यथा। संयोगो विप्रयोगश्च तन्निबोधत सत्तमाः। विषयो विषयित्वञ्च सम्बन्धोऽयमिहोच्यते॥ विषयी पुरुषो नित्यं सत्त्वञ्च विषयः स्मृतः। व्याख्यातं पूर्व्वकल्पेन मशकोडुम्बरं यथा॥ भुज्यमानं न जानीते नित्यं सत्त्वमचेतनम्। यस्त्वेवं तं विजानीते यो भुङ्क्ते यश्च भुज्यते॥ नित्यं द्वन्द्वसमायुक्तं सत्त्वमाहुर्मनीषिणः। निर्द्वन्द्वो निष्कलो नित्यः क्षेत्रज्ञो निर्गुणात्मकः॥ समः संज्ञानुगश्चैव स सर्व्वत्र व्यवस्थितः। उपभुङ्क्ते सदा सत्त्वमपः पुष्करपर्णवत्॥ सर्व्वैरपि गुणैर्विद्वान् व्यतिषक्तो न लिप्यते। जल-

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥२१॥

बिन्दुर्यथा लोलः पद्मिनीपत्रसंस्थितः ॥ एवमेवाप्यसंयुक्तः पुरुषः स्यान्न संशयः। द्रव्यमात्रमभूत्तस्य पुरुषस्येति निश्चयः ॥ यथा द्रव्यञ्च कर्म्म च संयोगोऽप्यनयोस्तथा। यथा प्रदीपमादाय कश्चित्तमसि गच्छति ॥ तथा सत्त्वप्रदीपेन गच्छन्ति परमैषिणः। यावद्‌द्रव्यगुणास्तावत् प्रदीपः सम्प्रकाशते ॥ क्षीणे द्रव्ये गुणे ज्योतिरन्तर्द्धानाय गच्छति। व्यक्तः सत्त्वगुणस्त्वेवं पुरुषोऽव्यक्त इष्यते ॥" (म, गी, ५०अ, ७—१७श्लो) इति। पुरुषो हि चित्स्वरूपोऽव्यक्तश्चक्षुराद्यगोचरः। प्रकृतिपरिणामाधिष्ठितो हि स सर्व्वमुपलभते, उपलभ्यते चान्यैः। अतएव हि प्रकृतिपरिणामस्य सत्त्वस्य दृश्यमानस्य प्रदीपत्वम्। यदा हि योगप्रभावतो भवति तस्य तिरोधानं तदा हि पुरुषस्य स्वस्वरूपं साक्षात्-प्रत्यक्षं भवति। अतएवाहाचार्य्यः—'क्षीणे द्रव्यगुणे' इत्यादि। आह च पतञ्जलिः—"सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्" (३।५५) इति। प्रकृतिपरिणामस्य सत्त्वस्य पुरुषस्य च यदा भेदज्ञानं प्रत्यवतिष्ठते तदा सत्त्वं स्वायत्तं तथा सर्व्वविधज्ञानस्योपतिष्ठते। अतएवाहाचार्य्यः—"तथा सत्त्वप्रदीपेन गच्छन्ति परमैषिणः। यावद्‌द्रव्यगुणास्तावत् प्रदीपः सम्प्रकाशते ॥" इति। आह च पतञ्जलिः—"सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्व्वभावाधिष्ठातृत्वं सर्व्वज्ञातृत्वञ्च" (३।५०) इति। 'क्षीणे द्रव्यगुणे' इत्युक्त्या विषयमात्रस्य स्थूलत्वापनयनेन स्वच्छत्वप्राप्तिः प्रदर्श्यते, अतः स्वरूपप्रत्यक्षीकरणे नान्तरायस्तिष्ठति। २०।

पुरुषस्य कथं भोक्तृत्वं सिध्यति तदाह पुरुष इति। प्रकृतिस्थः प्रकृतिपरिणामाभिनिविष्टः पुरुषः प्रकृतिजान् गुणान् सुखदुःखादीन् भुङ्क्ते। एवं प्रकृतिपरिणामाभिनिविष्टः किं भवति तदाह—अस्य पुरुषस्य गुणसङ्गः विषयाभिनिवेशः सदसद्योनिजन्मसु कारणम्। चिन्मात्रस्य पुरुषस्य सदसत्त्वं सत्त्वादिगुणनिमित्तं भवति। अभेदं

उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः॥२२॥

विवेच्यम्—स्वरूपतः पुरुषोऽन्यस्मात् पुरुषान्न भिद्यते, यथापि यस्य यादृशे विषयेऽभिनिवेशस्तादृशो चित्तवृत्तिस्तस्य भवति। अतएवोक्तं विष्णुपुराणे—"अशुभमतिरसत्प्रवृत्तिसक्तः सततमनार्य्यविशालसङ्गमत्तः। अनुदिनकृतपापबन्धयत्नः पुरुषपशुर्न हि वासुदेवभक्तः॥" (वि, पु, ३यं, ७अ, ३१श्लो) इति। तथाच—"विमलमतिर्विमत्सरः प्रशान्तः शुचिचरितोऽखिलसत्त्वमित्रभूतः। प्रियहितवचनोऽस्तमानमायो वसति सदा हृदि तस्य वासुदेवः॥" (वि, पु, ३यं, ७अ, २४श्लो) इति। भगवत्यभिनिवेशः सद्गुणाय विषयाभिनिवेशोऽसद्गुणाय भवति। अत-एवाह भागवतम्—"यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्व्वैर्गुणैस्तत्र समासते सुराः। हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो वहिः॥" (भा, ५स्क, १८अ, १२श्लो) इति। २१।

पुरुषं निर्णीय सम्प्रति परमात्माख्यः परमपुरुषो निर्णीयते उप-द्रष्टेति। उपद्रष्टा साक्षी—समीपस्थः सन् द्रष्टा स्वयमव्यापृतः, यतः परोऽन्तरो नास्ति द्रष्टा सोऽतिशयसामीप्येन द्रष्टृत्वादुपद्रष्टा, यज्ञोप-द्रष्टृवद्वा सर्व्वविषयीकरणादुपद्रष्टा इति श्रीमच्छङ्करः; अनुमन्ता अनु-मोदिता—अनुमोदनमनुमननं कुर्व्वंस्तु तत्क्रियासु परितोषस्तत्कर्त्ता अनुमन्ता, अथवा अनुमन्ता कार्य्यकरणप्रवृत्तिषु स्वयमप्रवृत्तोऽपि प्रवृत्त इव तदनुकूलो विभाव्यते तेनानुमन्ता, अथवा प्रवृत्तान् स्वव्यापारेषु तत्साक्षिभूतः कदाचिदपि न निवारयतीत्यनुमन्ता इति श्रीमच्छङ्करः, तत्तत्कर्म्मानुरूपप्रवर्त्तक इति श्रीमज्जीवः, अनुमतिदाता तदनुमतिं विना जीवः किञ्चिदपि कर्त्तुं न क्षम इति श्रीमद्बलदेवः, अनुमन्तेत्य-नेन पापस्य नानुमन्तेति बोद्धव्यम्; भर्त्ता धारयिता पोषयिता; भोक्ता पालकः—बुद्धेः सुखदुःखमोहात्मकाः प्रत्ययाः सर्व्वविषयविषया-श्चैतन्यात्मग्रस्ता इव जायमाना विभक्ता विभाव्यन्त इति भोक्ता इति

य एवं वेत्ति पुरुषं प्रकृतिञ्च गुणैः सह ।
सर्व्वथा वर्त्तमानोऽपि न स भूयोऽभिजायते ॥२३॥

श्रीमच्छङ्करः, पालयितेति श्रीमज्जीवः, निर्व्विकार एवोपलब्धा इति श्रीमन्मधुसूदनः ; महेश्वरः सर्व्वेषामीशितृणामीश्वरः पतिः—सर्व्वात्मत्वाच्च महान् ईश्वर इति श्रीमच्छङ्करः ; एवम्भूतोऽस्मिन् देहे परः पुरुषः परमपुरुषः परमात्मा इति चाप्युक्तः । श्रीमच्छङ्करस्तदनुयायिनश्च जीवेश्वरैक्यप्रदर्शनाय पूर्व्वस्मिन् पद्ये पुरुषस्य प्रकृतिमिथ्यातादात्म्यात् संसारं प्रदर्श्य अस्मिन् पद्ये किंविधं वा तस्य स्वरूपं यत्र न भवति तस्य संसारस्तदेव प्रदर्शितवानाचार्य्य इत्याहुः । श्रीमद्रामानुजस्य तु व्याख्या पुरुषपक्ष एव, न तु परमपुरुषपक्षे । श्रीमच्छ्रीधरजीवबलदेवविश्वनाथा स्तत्रेश्वरपक्षमेव स्थापितवन्तः । अनन्तरेषु श्लोकेषु "समं सर्व्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्" (१३।२७), "समं पश्यन् हि सर्व्वत्र समवस्थितमीश्वरम्" (१३।२८), "अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः" (१३।३१) इत्युक्तत्वादीश्वरतत्त्वमेवात्रोक्तमाचार्य्येणेति सरलः पन्थाः । 'देहेऽस्मिन्' इति कथनेन प्रतिहृदयं तं शास्तृरूपेण द्रष्टुमुपदेशोऽयमिति सिध्यति । उपद्रष्टेत्यादिविशेषणानि तदनुरूपाण्येव । सर्व्वे जना आत्मन्यधिष्ठितस्य परमात्मनः सत्कर्म्मण्यनुमोदनमसत्कार्म्मण्यननुमोदनमनुभवन्ति । अतएवाह मनुः—"यत्कर्म्म कुर्व्वतोऽस्य स्यात् परितोषोऽन्तरात्मनः । तत् प्रयत्नेन कुर्व्वीत विपरीतन्तु वर्ज्जयेत् ॥" (मनु, ४अ, १६१श्लो) इति । "सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम्" (श्वे, उ, ४।१४) इत्यत्र भाष्येऽन्तःसाक्षित्वेन गृहीतः परात्मा सर्व्वेषां जनानां शास्तोपदेष्टा पथप्रदर्शकश्च । अतएव स्वपितरं प्रति प्रह्लादः—"शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः । तमृते परमात्मानं तात कः केन शास्यते ॥" (वि, पु, १अं, १७अ, २०श्लो) इति । २२ ।

उपद्रष्टानुमन्तेत्यादिरूपेण परमपुरुषं तच्छक्तिं प्रकृतिञ्च ज्ञात्वा

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्म्मयोगेन चापरे ॥२४॥

किं भवति तदाह य इति। यः पुरुषमेवमुपद्रष्टानुमन्तेत्यादिरूपेण, गुणैः सविकारैः प्रकृतिञ्च परामपराञ्च वेत्ति जानाति स सर्व्वथा सर्व्वप्रकारेण वर्त्तमानोऽपि न भूयः अभिजायते देहसम्बन्धं भजते देहाभिनिवेशशून्यः परमात्मन्येव निवसति। अतएवानन्तराध्याये वक्ष्यति "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥" (१४।२) इति। एतमिदं प्रमाणत्वेन गृहीत्वा गीतातात्पर्य्यनिर्णये श्रीमतानन्दतीर्थेनोक्तं 'न च जीवेश्वरैक्यं मुक्तावपि' इति। ऐक्यमत्र जीवस्यास्तित्वविलोपः, स्वरूपैक्ये तु न तस्य तन्निरसम्मतिः; तथा सति 'मम साधर्म्यमागताः' इति विशेषणं व्यर्थं स्यात्। २३।

प्रकृतिपरमपुरुषज्ञानान्मुक्तिरित्युक्तोपायान्तरमाह ध्यानेनेति। केचित् ध्यानेन—ध्यानं नाम शब्दादिभ्यो विषयेभ्यो श्रोत्रादीनि करणानि मनस्युपसंहृत्य मनश्च प्रत्यक्चेतयितर्य्येकाग्रतया यच्चिन्तनं तद्ध्यानं ......तैलधारावत् सन्ततोऽविच्छिन्नप्रत्ययो ध्यानमिति श्रीमच्छङ्करः, आत्मानं पश्यन्ति परमात्मतयेति श्रीमद्गिरिः,—आत्मना मनसा आत्मनि बुद्धौ आत्मानं परमात्मानं पश्यन्ति अन्तर्नयनगोचरं कुर्व्वन्ति। अन्ये सांख्येन योगेन ज्ञानेन प्रकृतिपुरुषविवेकेन, अपरे च कर्म्मयोगेन परमात्मानं पश्यन्तीति शेषः। ननु यद्यपि येन केनचिदुपायेन परमात्मानमपरोक्षज्ञानविषयं कर्त्तुं शक्यते, कथं तर्ह्यस्मिन् शास्त्रे योगत्रयसमन्वये महान् यत्नः? उच्यते, ईश्वरो हि परमकारुणिकः स्वात्मानं साधकसन्निधौ तत्प्रतिपत्त्यनुसारत आविष्करोति, अतः केचित्तं सत्तामात्रेण, केचित्तं ज्ञानमात्रेण, केचित्तं फलदातृस्वरूपेण पश्यन्ति। एकत्र योगत्रयसाधनपराणां सन्निधौ पुनः सर्व्वस्वरूपाविष्करणं भवति, सुतरां तेन तेषां महती कृतार्थता। न खलु वाच्यं सांख्ययोगिनः

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥२५॥
यावत् संजायते किञ्चित् सत्त्वं स्थावरजङ्गमम्।
क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ ॥२६॥

परमात्मानं द्रष्टुमनधिकारिणः पुरुषव्यतिरिक्तस्य तस्यास्वीकारात्। विमुक्तस्य पुरुषस्येश्वरत्वस्वीकारेण तैरपि परात्मस्वीकारावकाशोऽदायि। सेश्वरसांख्यपरिशोधितबुद्धीनान्तु भवति परमात्मना योगः, स एव पन्थाऽत्र परिलक्षितः। भागवते कपिलोक्तावतएव सेश्वरसांख्यस्य प्राधान्यम्। २४।

ये पुनरध्यात्मज्ञानानुशीलनपरास्तेऽपि कथं तरन्ति तदाह अन्ये त्विति। अन्ये तु एवं प्रकृतिपुरुषतत्त्वमजानन्तोऽन्येभ्य आचार्य्येभ्यः श्रुत्वा उपासते चिन्तयन्ति परमात्मानं साक्षात्कर्त्तुं यतन्ते। श्रुतिपरायणा उपदेशश्रवणपरायणास्तेऽपि मृत्युं संसारमतितरन्त्येव। न हि पुनः सर्व्वे वस्तुस्वस्वीकारेणात्मतत्त्वसाक्षात्कारे यत्नं कर्त्तुं समर्थाः, अपरेषां समुपार्ज्जितं तत्त्वं ते सहजेनैवाधिकृत्य श्रद्धया तत्साक्षात्कारे यत्नं कुर्व्वाणास्तस्मिन् कृतार्था मुक्ता भवन्ति। २५।

सर्व्वभूतोत्पत्तिमाह यावदिति। यावत् किञ्चित् सत्त्वं वस्तु संजायते, तत् वस्तु, हे भरतर्षभ, क्षेत्रक्षेत्रज्ञसंयोगाद्विद्धि जानीहि। जीवतत्त्वेन मिलितं प्रकृतितत्त्वं सर्व्वान्तर्यामिणाऽध्यक्षत्वेन जगत् सूयत इत्यस्य शास्त्रस्य सिद्धान्तः। जीवतत्त्वप्रकृतितत्त्वयोः परमपुरुषस्य शक्तित्वेन नाद्वैततत्त्वस्य हानिः। "वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥" (भा, १स्क, २अ, ११श्लो) इत्येकस्य चित्स्वरूपस्य यथा साधकग्रहणशक्तितारतम्येन भिन्नभावेनोपलब्धिस्तथा तस्यात्मशक्तिप्रकाशेन स्रष्टृत्वमुपलभ्यते, सृष्टिश्चास्वतन्त्रास्वातन्त्र्ये च। २६।

समं सर्व्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥२७॥
समं पश्यन् हि सर्व्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥२८

को वा सम्यग्दर्शी तदाह सममिति । सर्व्वेषु भूतेषु समं निर्व्विशेषं सम्यगप्रच्युतस्वरूपेणावस्थितं तिष्ठन्तं विनश्यत्सु स्वरूपविच्युतिं भजत्सु अविनश्यन्तं स्वरूपे नियतविद्यमानं परमेश्वरं यः पश्यति स पश्यति सम्यगिति शेषः । भूतेषु तारतम्येन चित्स्वरूपस्य प्रकाशदर्शनात् भगवान् तारतम्येन तेषु वर्त्तते इति पृथग्जना मन्यन्ते । न हि जातु भगवत्स्वरूपस्य कुत्रापि तारतम्यमस्ति, सर्व्वत्रैव तस्य पूर्णस्वरूपेण विद्यमानत्वात्—"पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥" (वृ, आ, उ, ७।१।१) इति । ये पुनर्मन्यन्ते पूजनार्च्चनादिभिर्भगवन्तं परितोषयन्तस्तमनुकूलयितुं तद्विपरीतैः प्रतिकूलयितुं च समर्था जनाः, ते पुनरज्ञानतावशात् मानववत् तं चलं कुर्व्वन्ति । न हि भगवति चलतास्ति पूर्णस्वरूपेण नियतविद्यमानः स इति जानंस्तस्मिन् पूर्णाश्वस्तता साधकस्य । २७ ।

न केवलमेतेन सम्यग्दर्शित्वमुत्कृष्टा गतिरपीत्याह सममिति । सर्व्वत्र समं सम्यगप्रच्युतस्वरूपेण समवस्थितमीश्वरं पश्यन् आत्मना स्वेन आत्मानं न हिनस्ति न सन्तापयति, ये पुनः क्रोधाद्यधीनं घोररूपं देवं मन्यन्ते ते निरतिशयकृच्छ्रसाधनेन स्वदेहं कर्शयन्नात्मानं हिनस्ति, अतएवाहाचार्य्यः—"कर्शयन्तः शरीरस्थं भूतग्राममचेतसम् । माञ्चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥" (१७।६) इति । एवमात्मनोऽहिंसया भगवदुपासनस्य फलमाह,—ततोऽहिंसनात् परामुत्कृष्टां गतिं याति प्राप्नोति । 'आत्मानं' सर्व्वभूतस्थमात्मानमिति ग्रहणे भवत्यर्थः—न कमपि स मनसा हिनस्ति । कथम् ? सर्व्वभूतेषु समवस्थितमीश्वरं दृष्ट्वा तेषु मैत्र्येव तस्य जायते । यथाह प्रह्लादः—

प्रकृत्यैव च कर्म्माणि क्रियमाणानि सर्व्वशः ।
यः पश्यति तथात्मानमकर्त्तारं स पश्यति ॥२९॥

"सर्व्वभूतस्थिते तस्मिन् मतिर्मैत्री दिवानिशम् । भवतां जायतामेवं सर्व्वक्लेशान् प्रहास्यथ ॥" (वि, पु, १अं, १७अ, ७८श्लो) इति । भूतद्वेषिणः पूजां न स्वीकरोति परमेशः । अतएवाह भागवतम्—"अहं सर्व्वेषु भूतेषु भूतात्मावस्थितः सदा । तमवज्ञाय मां मर्त्त्यः कुरुतेऽर्च्चाविडम्बनम् ॥ यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरम् । हित्वार्च्चां भजते मौढ्यात् भस्मन्येव जुहोति सः ॥ द्विषतः परकाये मां मानिनो भिन्नदर्शिनः । भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति ॥ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे । नैव तुष्येऽर्च्चितोऽर्च्चायां भूतग्रामावमानिनः ॥" (भा, ३स्क, २९अ, २१—२४श्लो) इति । २८ ।

रागद्वेषहिंसादिवशात् पीड़नपरान् समभावेन द्रष्टुं को वा समर्थः ? आत्मनश्च तत्तद्विकाराधीनत्वात् क्षमापरायणत्वं न सम्भवति । यदि वा सर्व्वत्र भगवन्तं पश्येत्, तथापि जीवानां व्यवहारवैगुण्यं दृष्ट्वा तस्मिन् तेषामनैक्यं परेण सम्भाव्य न तान् क्षमेत, तादृशी क्षमा दोषायेति च स चलेत । एवमापतिता समभावस्यासम्भवनीयता प्रत्याख्यायते तत्त्वमाचक्षाणेन प्रकृत्यैति । प्रकृत्या एव च देहेन्द्रियादिरूपेण परिणतया—चास्मदधिष्ठितयेश्वरप्रेरितयेति श्रीमद्बलदेवः—सर्व्वशः सर्व्वप्रकारैः क्रियमाणानि कर्म्माणि, तथात्मानमकर्त्तारं तत्तत्कर्म्मभिरपरामृष्टं यः पश्यति स पश्यति तत्त्वं प्रत्यक्षीकरोति—सर्व्वत्र समं पश्यतीति पूर्व्वेणान्वय इति श्रीमन्नीलकण्ठः । किमत्र तत्त्वम् ? देहेन्द्रियादिस्वभावात् क्रियमाणानि कर्म्माणि न पुनरात्मन्यारोपितव्यानि, तैस्तस्य भिन्नत्वात् । प्रकृतेर्वश्यतामुपागच्छन्नात्मा विषयानुपभुञ्जानो यदपि रागाद्यधीनस्तथापि न तत् स्वरूपकृतमिति जानता न तस्मिन् विषमदृष्टिः कर्त्तव्या । रागादिवशाद्येऽपराधास्तस्मिन्नुपतिष्ठन्ते तानाक्षिपताप्यात्मा स्वरूपत एव ग्रहणीयः, न तु प्रकृत्याविष्टभावत्वेन । न

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
अतएव च विस्तारं ब्रह्म सम्पद्यते तदा ॥३०॥
अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥३१॥

हि प्रकृतिकर्म्माणि तदनुमोदनं विना सिद्ध्यन्तीत्यनमन्यमानः स आत्मार्हः इति चेत्, करुणार्हः स पुनरवश्यमन्तव्यः विस्मृतस्वरूपतया दुर्गतत्वात् । एवं सिध्यति समभावेन दर्शनमात्मनः । २९ ।

आत्मनो ज्ञानाकारेणैकत्वात्तत्र समदर्शनं सम्भवति, न तु भूतानां स्थिरचराणां, यतस्तेषां बहुत्वमेव स्वाभाविकम् । तथा सति न तेषु समदृष्टेर्व्यवस्था युज्यते, तत्राह यदेति । यदा भूतपृथग्भावं भूतानां चराचराणां विच्छिन्नत्वेऽपि पृथग्भावं पृथक्त्वं देवत्वमनुष्यत्वह्रस्वत्व-दीर्घत्वादिकम् एकस्थं प्रकृतिस्थं प्रकृतिक्रियाजन्यम्, अतः प्रकृतित एव विस्तारमुत्तरोत्तरविविधभावेन प्रकटनमनुपश्यति, तदा भगवच्छक्ते्य-कत्वदर्शनवेलायां ब्रह्म सम्पद्यते ब्रह्मणा सम्पन्नो भवति ब्रह्मणैकत्वं भजते । एकस्थमित्यत्र एकस्मिन्नात्मनि स्थितमिति श्रीमच्छङ्करस्तदनु-यायिनश्च । श्रीमन्माध्वोऽप्याह—"एकस्थमेकस्मिन् विष्णौ स्थितम्, तत एव च विष्णोर्विस्तारम्" इति । "सर्व्वभूतानि चात्मनि" (६।२९) इति योगयुक्तावस्थायां तथा दर्शनम्, अत्र तु क्षेत्रक्षेत्रज्ञतत्त्वोद्भावनेन तद्विज्ञानात् भगवद्भावप्राप्तिरिति प्रतिज्ञानात् श्रीमद्रामानुज-श्रीधर-प्रभृतीनां पक्ष एवात्र परिग्रहीतः । कथं भगवच्छक्तौ भूतानामेकत्व-दर्शनेन ब्रह्मसम्पन्नतेति विवेच्यम् । ज्ञानाकारेणात्मन एकत्वदर्शनेन परमात्मदर्शनं भवति, परमात्मनि तस्यांशत्वेन स्थितेरुपलभ्यमानत्वात्, एवं भगवच्छक्तौ प्रकृतौ सर्व्वेषां भूतानामेकत्वदर्शनेन तच्छक्तेर्भगवदा-श्लिष्टत्वेन स्थितत्वात्, भवति तस्यां भगवान् साधकस्योपलब्धेर्विषयः । प्रकृतिपुरुषयोर्विवेकस्येदमेव प्रयोजनम् । ३० ।

पूर्व्वं यथा प्रकृतिं पुरुषञ्चाभिधाय "उपद्रष्टानुमन्ते"त्यादिभिः

परमात्मानमुद्दिष्टवान्, तथैवात्र प्रकृतिपुरुषतत्त्वाभिधानानन्तरं परमात्मतत्त्वमवतारयत्यनादित्वादिति । अयं नित्यप्रत्यक् सर्व्वेषां प्राणिनां नित्यापरोक्ष इति श्रीमन्नीलकण्ठः—परमात्मा—परमो देहादिभ्योऽपरमेभ्य आत्मभ्योऽन्यः कोषपञ्चकातीत आत्मा परमात्मा इति श्रीमन्नीलकण्ठः—अव्ययः सर्व्वविकारशून्यः—न व्येति परिच्छिद्यते देशतः कालतो वस्तुतश्चेत्यव्यय इति श्रीमन्नीलकण्ठः । कथम् ? अनादित्वात् । आदिः कारणं तद्यस्य नास्ति सोऽनादि तस्य भावोऽनादित्वं तस्मादनादित्वात् सर्व्वकारणकारणत्वात् न व्येति रूपान्तरतां न भजते । तस्यां रूपान्तरतायां कार्य्यत्वापत्तिः । कार्य्याणां कारणत्वं हि गौणं सर्व्वकारणकारणस्य तु मुख्यम् । निर्गुणत्वात् गुणातीतत्वात् । गुणानामपाये तद्वतोऽपायो भवति, सोऽस्मिन् सम्भवत्यतो न व्येति न विकारमधिगच्छति । गुणानां साङ्कर्य्ये परस्परविरोधसम्भावना, एकस्यानन्तत्वे तेनापरस्य सङ्कोचात् । एवं या विकारसम्भावना न सास्ति निर्गुणत्वात् । एवं सति कथं तस्यानन्तकल्याणगुणत्वम् ? तस्यैकस्य चित्स्वरूपस्य विविधसम्बन्धदर्शनरीत्येति पूर्व्वमुक्तम् (२५६ पृ,) । अयं परमात्मा शरीरस्थोऽपि शरीरं क्षेत्रं (१३।१) तत्स्थोऽपि न करोति, अतो न लिप्यते क्रियाफलेन युज्यते । "उपद्रष्टानुमन्ते"त्यादिभिस्तस्य द्रष्टृत्वमनुमन्तृत्वं स्वीकृतम् । दर्शनक्रियायां न सर्व्वथाकर्तृत्वं पश्यतीति क्रियायाः कर्तृत्वात् । भवत्वौदासीन्यं दर्शने, न तथा स्यादनुमन्तृत्वे । अनुमन्ता हि अनुमोदितक्रियाफलभाग्भवति । अत्रोच्यते—फले निराकाङ्क्षाऽस्मिन् शास्त्रेऽक्रियत्वं निर्लिप्तत्वं, तदेव परमात्मनि पूर्णतया विद्यते परिपूर्णस्वरूपत्वात् नित्यतृप्तत्वाच्च । श्रीमद्बलदेवस्तु श्लोकमिमं परम् आत्मेति पदं विभज्य व्याख्यातवान्, तन्न रुचिरम्, यतस्तेनापि "उपद्रष्टानुमन्ता" इत्यत्र परमात्मा परिगृहीतः । एकत्र प्रकृतिपुरुषयोरुक्तेरानन्तरं परमात्मोक्तेः स्वीकृत्यान्यत्र तदकरणमशोभनमेव । ३१ ।

यथा सर्व्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्व्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥३२॥
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥३३॥

अधुना जीवात्मपरमात्मनोरकर्त्तृत्वं निर्लिप्तत्वं साधारणधर्मौ वक्तुं श्लोकद्वये आत्मेति क्षेत्रीति तद्वाचकसाधारणशब्देन किमिव न करोति न लिप्यत इति दृष्टान्तेनावगमयति । प्रथमन्तावन्निर्लेपं प्रतिपादयत्याकाशदृष्टान्तेन यथेति । यथा सर्व्वगतं सर्व्ववस्तुभिः संयुक्तमाकाशं सौक्ष्म्यात् सूक्ष्मभावादसङ्गस्वभावत्वान्निरवयवत्वात् नोपलिप्यते सर्व्ववस्तुस्वभावैर्न सम्बध्यते, तथा देहे क्षेत्रे सर्व्वत्र देवमनुष्यादाववस्थित आत्मा न उपलिप्यते न सम्बध्यते । ३२ ।

असङ्गत्वान्निर्लिप्तत्वमाकाशदृष्टान्तेन प्रदर्शयन् प्रकाशक्रियाकर्त्तृत्वेऽपि प्रकाश्यधर्म्मैर्निर्लिप्तस्यादित्यस्य दृष्टान्तेन न करोति न लिप्यत इति क्रियाद्वयस्य नायुक्तत्वं समर्थयति यथेति । यथा एको रविः कृत्स्नमिमं लोकं प्रकाशयति स्वप्रभया, तथा हे भारत, एकः क्षेत्री कृत्स्नं क्षेत्रं प्रकाशयति । अत्र श्रीमन्नीलकण्ठः—"यथा सूर्य्यः स्वसत्तामात्रेण विश्वं प्रकाशयति, न तु व्यापाराविष्टतया कुविन्द इव पटं, यथा चैष प्रकाश्यधर्म्मैर्दुर्गन्धादिभिर्न लिप्यते, एवमयं क्षेत्री क्षेत्रज्ञः सूर्य्यवदेकः सन् अनेकधाभूतं क्षेत्रं 'महाभूतानि' इत्यादिना चतुर्व्विंशतितत्त्वात्मकमिच्छाद्वेषादिविकारयुक्तमुक्तम्, तत् स्वसत्तामात्रेण प्रकाशयति, हे भारत, न तु व्यापाराविष्टतया तत् सम्पादयति, तद्धर्म्मैर्वा पुण्यपापादिभिर्न लिप्यते । सूर्य्यदृष्टान्तेन एकत्वमकर्त्तृत्वप्रयुक्तमलेपत्वञ्च दर्शितम् ; तथाच श्रुतयः—'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥' 'सूर्य्यो यथा सर्व्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्व्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥' इति ।" ३३ ।

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षञ्च ये विदुर्यान्ति ते परम् ॥३४॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे प्रकृतिपुरुषविवेकयोगो नाम त्रयोदशोऽध्यायः।

इदानीमध्यायार्थं सफलमुपसंहरति क्षेत्रेति। ज्ञानचक्षुषा शास्त्राचार्य्योपदेशात्मप्रत्ययजनितेन एवं क्षेत्रक्षेत्रज्ञयोरन्तरं वैलक्षण्यं भूतप्रकृतिमोक्षञ्च भूतानां प्रकृतिः ततो मोक्षम् अमानित्वादिसाधनोपायेन वियोगं तदभिनिवेशत्यागं ये विदुर्जानन्ति ते परं परमात्मानं यान्ति प्राप्नुवन्ति। क्षेत्रे प्रकृतावभिनिविष्टस्य क्षेत्रज्ञस्य पुरुषस्य न केवलमात्मवैमुख्यं भगवद्वैमुख्यमपि तेन भवति। तत्राभिनिवेशं परित्यज्य यदा हि क्षेत्रज्ञ आत्मज्ञानेऽभिनिविष्टस्तदात्मानं परमात्मनि प्रविष्टं पश्यन् कृतार्थतामेतीति फलितार्थः।

अध्यायतात्पर्य्यमाह श्रीमच्छ्रीधरस्वामी:—"अमानित्वादिनिष्ठतया क्षेत्रक्षेत्रज्ञयाथात्म्यविज्ञानवतः सर्व्वानर्थनिवृत्त्या परिपूर्णपरमानन्दाविर्भावलक्षणपुरुषार्थसिद्धिः" इति; श्रीमन्मधुसूदनः:—"इदमत्र तात्पर्य्यम्;—अमानित्वादिज्ञानसाधननिष्ठतया क्षेत्रक्षेत्रज्ञयाथात्म्यज्ञानमात्रवतः पुरुषस्य सर्व्वानर्थमूलमविद्यासाद्यज्ञाननिवृत्त्या स्वस्वरूपेणावस्थानलक्षणामुक्तिरिति" इति; श्रीमद्बलदेवः:—"जीवेशौ देहमध्यस्थौ तत्राद्यो देहधर्म्मयुक्। बध्यते मुच्यते बोधादिति ज्ञानं त्रयोदशात् ॥" इति। ३४।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये त्रयोदशोऽध्यायः।

चतुर्द्दशोऽध्यायः ।

श्रीभगवानुवाच—

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्व्वे परां सिद्धिमितो गताः ॥१॥

पूर्व्वाध्याये क्षेत्रक्षेत्रज्ञयोर्ज्ञानं परमात्मतत्त्वञ्चोपदिष्टवान् । तत्र "पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् । कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥" (१३।२१) इति गुणानां पुरुषभोग्यत्वं तेस्तस्य सदसद्देहप्राप्तमुक्ता न तद्विवृतवान्, क्षेत्रक्षेत्रज्ञयोः परमात्मपरतन्त्रत्वञ्च नोक्तवान् स्पष्टतरवाक्येन । आरभ्यमाणाध्याये तदेव वक्तुमुपक्रमते । आह च श्रीमच्छङ्करः—"सर्व्वमुत्पद्यमानं क्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यत इति उक्तं, तत् कथमिति तत्प्रदर्शनार्थं 'परं भूयः' इत्यादिरध्याय आरभ्यते, अथवा ईश्वरपरतन्त्रयोः क्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वं, न तु सांख्यानामिव स्वतन्त्रयोरित्येवमर्थम् । प्रकृतिस्थत्वं गुणेषु च सङ्गः संसारकारणमित्युक्तम्, कस्मिन् गुणे, कथं सङ्गः, के वा गुणाः, कथं वा बध्नन्तीति, गुणेभ्यश्च मोक्षणं कथं स्यात्, मुक्तस्य च लक्षणं वक्तव्यमित्येवमर्थञ्च" इति । श्रीमद्रामानुजः—"त्रयोदशे प्रकृतिपुरुषयोरन्योन्यसंसृष्टयोः स्वरूपयाथात्म्यं विज्ञाय अमानित्वादिभिर्भगवद्भक्त्यनुगृहीतैर्बन्धान्मुच्यत इत्युक्तम् । तत्र बन्धहेतुः पूर्व्वपूर्व्वसत्त्वादिगुणमयसुखादिसङ्गरतित्वञ्चाभिहितं 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु' इति । अथेदानीं गुणानां बन्धहेतुताप्रकारो गुणनिवर्त्तनप्रकारश्चोच्यते" इति । श्रीमन्माध्वः—"साधनं प्राधान्येनोत्तरैरध्यायैरुक्ति" इति । श्रीमच्छ्रीधरः—"पुंप्रकृत्योः स्वतन्त्रत्वं वारयन् गुणसङ्गतः । प्राह संसारवैचित्र्यं विस्तरेण चतुर्द्दशे ॥ 'यावत् संजायते किञ्चित् सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि' इत्युक्तं, स च

क्षेत्रक्षेत्रज्ञयोः संयोगो निरीश्वरसांख्यानामिव न स्वातन्त्र्येण, किन्त्वी-
श्वरेच्छयैवेति कथनपूर्वकं 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु'
इत्यनेनोक्तं सत्त्वादिगुणकृतं संसारवैचित्र्यं प्रपञ्चयिष्यन्नेवंभूतं वक्ष्य-
माणमर्थं स्तौति" इति। श्रीमद्बलदेवः—"पूर्वाध्याये मिथः संपृक्तानां
प्रकृतिजीवेश्वराणां स्वरूपाणि विविच्य ज्ञानम् अमानित्वादिधर्मवि-
शिष्टः प्रकृतिबन्धाद्विमुच्यते बन्धहेतुश्च गुणसङ्ग इत्युक्तम्। तत्र के
गुणाः, कस्मिन् गुणे कथं सङ्गः, कस्य गुणस्य सङ्गात् किं फलं, गुण-
सङ्गिनः किं वा लक्षणं, कथं वा गुणेभ्यो मुक्तिरित्यपेक्षायां वक्ष्यमाण-
मर्थमात्मव्युत्पत्तये भगवान् स्तौति" इति। श्रीमन्मधुसूदनः—
"पूर्वाध्याये 'यावत् सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम्। क्षेत्र-
क्षेत्रज्ञसंयोगात् तद्विद्धि' इत्युक्तम्। तत्र निरीश्वरसांख्यनिराकरणेन
क्षेत्रक्षेत्रज्ञसंयोगस्येश्वराधीनत्वं वक्तव्यम्। एवं 'कारणं गुणसङ्गोऽस्य
सदसद्योनिजन्मसु' इत्युक्तम्—एकस्मिन् गुणे कथं सङ्गः, के वा गुणाः,
कथं वा ते निबध्नन्तीति वक्तव्यम्। तथा 'भूतप्रकृतिमोक्षञ्च ये विदु-
र्यान्ति ते परम्' इत्युक्तम्—तत्र भूतप्रकृतिशब्दितेभ्यो गुणेभ्यः कथं
मोक्षणं स्यात्, मुक्तस्य च किं लक्षणमिति वक्तव्यम्। तदेतत्सर्वं
विस्तरेण वक्तुं चतुर्दशोऽध्याय आरभ्यते" इति। श्रीमन्नीलकण्ठः—
"पूर्वाध्यायान्ते 'भूतप्रकृतिमोक्षञ्च ये विदुस्ते परं यान्ति' इत्युक्तम्।
तत्र का वा भूतप्रकृतिः, किमाश्रयेण तस्या भूतजनकत्वं, कथं वा
बन्धकत्वं कथञ्च ततो मोक्षः, किञ्च मुक्तानां लक्षणम् इत्येतदर्थजातं
विवरीतुं चतुर्दशोऽध्याय आरभ्यते" इति। श्रीमद्विश्वनाथः— पूर्वा-
ध्याये 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु' इत्युक्तम्। तत्र के
गुणाः, कीदृशो गुणसङ्गः, कस्य कस्य गुणस्य सङ्गात् किं किं फलं
स्यात्, गुणयुक्तस्य किं किं लक्षणं, कथं वा गुणेभ्यो मोचनम् इत्यपे-
क्षायां वक्ष्यमाणमर्थं स्तुवानो वक्तुं प्रतिजानीते" इति। परमिति।
ज्ञानानां ज्ञानसाधनानाममानित्वादीनां—प्रकृतिविषयकाणामिति
श्रीमद्बलदेवः—मध्ये परमुत्तममत्युत्तमं—परं पूर्वोक्तादन्यं प्रकृति-

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥२॥

जीवात्मगतमेव गुणविषयकमुत्तमं श्रेष्ठं नवनीतवदुद्धृतत्वादिति श्रीम-द्बलदेवः—ज्ञानं ज्ञायतेऽनेनेति ज्ञानं ज्ञेयप्रकाशकं परमात्मसाधन-मुपदेशं वा वक्ष्यामि ; यज्ज्ञात्वा मुनयो मननशीलाः तत्त्वानुध्यान-शीलाः इतो देहबन्धनात् परां सिद्धिं गताः प्राप्ताः । १ ।

कथं परां सिद्धिं गता इत्युच्यते इदमिति । इदं ज्ञेयप्रकाशकं ज्ञानमुपाश्रित्य उपायत्वेन गृहीत्वा जीवात्मानः ममान्तर्यामिणः साधर्म्यं स्वरूपैक्यमागताः सर्गेऽपि सृष्टिकालेऽपि नोपजायन्ते रूपा-न्तरतां न भजन्ते प्रलये जगदुपसंहरणसमये न च व्यथन्ति न स्वरूप-विच्युता भवन्ति । जगदीश्वरयोः प्रेरयिता परमात्मा । तत्प्रेरणया प्रकृतिश्चराचरं सूयते । चराचरोत्पत्तौ सत्त्वरजस्तमोगुणाः सर्व्वत्र प्रविष्टाः सर्व्वेषां विचित्रतामुत्पादयन्ति । तेषां गुणानां क्रियाभूमिः जगच्छरीरञ्च । जीवाः पुनस्तटस्थतया स्थिताः । एकतः सकार्य्य-प्रकृतिरन्यतः परमात्मा । एतयोराद्यायामभिनिविष्टा देहधर्म्मेणाबद्धा गुणभोक्तृत्वमुपगच्छन्ति, अन्यस्मिंस्तु स्वरूपैक्यं भजन्ति तेनेति ज्ञानं लब्ध्वा यदा गुणसङ्गं परित्यज्य परमात्मन्यभिनिविष्टचित्तास्तदा रूपा-न्तरतां स्वरूपविच्युतिञ्चातिक्रम्य कृतार्था भवन्तीति फलितार्थः । इदं पद्यमाश्रित्य गीतातात्पर्य्यनिर्णये श्रीमदानन्दतीर्थेन "न च जीवेश्वरैक्यं मुक्तावपि" इति यदुक्तं तत्पूर्व्वमुद्दिष्टम् । श्रीमद्बलदेवश्चाह—"मोक्षे जीवबहुत्वमुक्तम्" इति । श्रीमच्छङ्कर आह—"साधर्म्यं मत्स्वरूपता-मागताः प्राप्ता इत्यर्थो न तु समानधर्म्मतां, साधर्म्यं क्षेत्रक्षेत्रज्ञयोर्भेदान-भ्युपगमात् गीताशास्त्रे ; फलवादश्चायं स्तुत्यर्थमुच्यते—सर्गेऽपि सृष्टि-कालेऽपि नोपजायन्ते नोत्पद्यन्ते प्रलये ब्रह्मणोऽपि विनाशकाले न व्यथन्ति च व्यथां नापद्यन्ते न च्यवन्तीत्यर्थः" इति । अत्र श्रीमद्धरिः —"ज्ञानस्तुतये तत्फलस्य विवक्षितत्वाच्च मात्र सारूप्यमिष्टम् । सारूप्यं

मोक्षं हित्वा ज्ञानफलमप्रस्तुतं प्रसज्येत।" इति। श्रीमन्मधुसूदनः
—"इदं यथोक्तं ज्ञानं ज्ञानसाधनमुपाश्रित्यानुष्ठाय मम परमेश्वरस्य
साधर्म्यं मद्रूपतामत्यन्ताभेदेनागताः प्राप्ताः" इति। श्रीमन्नीलकण्ठः
—"इदं ज्ञानं विषयविषयिरूपविकल्पविनिर्मुक्तमुपाश्रित्य ममेश्वरस्य
साधर्म्यं सर्व्वात्मत्वं सर्व्वनियन्तृत्वं सर्व्वभावाधिष्ठातृत्वमित्यादि धर्म्मसाम्यं
साधर्म्यमागताः, तथाच श्रुतयः—'य एवं वेदाहं ब्रह्मास्मीति स इदं
सर्व्वं भवति' 'सर्व्वस्य वशी सर्व्वस्येशानः सर्व्वस्याधिपतिः स न साधुना
कर्म्मणा भूयान् नो वासाधुना कनीयान्' इति।"

अत्रेदं विवेच्यम्। श्रीमद्रामानुजः शारीरकभाष्ये प्राह—"नापि
साधनानुष्ठानेन निर्मुक्ताविद्यस्य परेण स्वरूपैक्यसम्भवः, अविद्याश्रयत्व-
योग्यस्य तदनर्हत्वासम्भवात्। यथोक्तम् 'परमात्मात्मनोर्योगः परमार्थ
इतीष्यते। मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः॥' मुक्तस्य तु
तद्धर्म्मतापत्तिरिति भगवद्गीतायामुक्तम्—'इदं ज्ञानमुपाश्रित्य मम
साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥' इति।
अत्रापि 'आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुने। विकार्य्यमात्मनः
शक्त्या लोहमाकर्षको यथा॥' इति। 'आत्मभाव' मात्मनः स्वभा-
वम्। न ह्याकर्षकस्वरूपापत्तिराकृष्यमाणस्य" इति। एवमपि
चिदाकारेणैक्यं तेनापि तत्रैव स्वीकृतं तद्यथा—"प्राकृतनामरूपाभ्यां
विनिर्मुक्तस्य निरस्ततत्कृतभेदस्य ज्ञानैकाकारतया प्रकारतोऽपि
प्रकारैक्येण तत्तद्व्यवहारो मुख्य एव यथा सेयं गौरिति।" इति।
वयन्तु स्वरूपैक्यं चित्स्वरूपस्य ब्रह्मणः चिदणुरूपस्य च जीवस्य चित्-
स्वरूपे चिदणोश्चिदणौ चित्स्वरूपस्य च प्रवेशान्मन्यामहे, न तु द्वयो-
रेकतरस्याभावात्। "य एवं वेद अहं ब्रह्मास्मीति स इदं सर्व्वं
भवति" (बृ, आ, १।४।१०) इत्यस्या अग्रे "तद्यो यो देवानां प्रत्यबु-
ध्यत स एव तदभवत् तथा ऋषीणां तथा मनुष्याणाम्। तद्धैतत् पश्यन्नृ-
षिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्य्यश्चेति" इत्युक्तेः चित्स्वरूपावेशेन
सर्व्वैरैक्यं भवति न तु जीवब्रह्मणोरेकतरस्याभावेन। "प्राप्तस्य प्राप-

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
सम्भवः सर्व्वभूतानां ततो भवति भारत ॥३॥

भुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः । ते निचिक्युर्ब्रह्म पुराणमग्रम् ॥ मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम् । विरजः पर आकाशादज आत्मा महान् ध्रुवः ॥" (वृ, आ, ६।४।१८—२०) इत्यत्र जीवपरात्मनोर्मतद्दृष्टेर्निन्दादर्शनात्, अनन्तरोक्ता "सर्व्वस्य वशी सर्व्वस्येशानः सर्व्वस्याधिपतिः स न साधुना कर्म्मणा भूयान्नो एवासाधुना कर्म्मणा कनीयान्" (वृ, आ, ६।४।२२) इत्यस्याः स्वरूपैकत्वसाधकता न पुनर्विरुध्यते स्वरूपाविर्भावे परमात्मनो ज्ञानशक्त्याविशेन तेनैव तस्य परिचयः तेनैव तस्य ज्ञानादेरौज्ज्वल्यम् । "स हि सर्व्ववित् सर्व्वकर्त्ता" (३।५६) "ईदृशेश्वरसिद्धिः सिद्धा" (३।५७) इति कपिलोऽपि पुरुषे श्रुतिसिद्धं सर्व्वज्ञत्वादिकमारोपयति । प्रकृतिपुरुषयोः परमात्मपरतन्त्रत्वात् तं विना स्वरूपशून्यत्वाच्च तत्स्वरूपेण तयोः स्वरूपवत्त्वमिति न जातु वेदान्तमर्य्यादौषदुष्टा । तौ पुनः सत्यस्वरूपस्य चिद्विलासत्वात् नासत्यौ भवितुमर्हतः । "सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" (छा, उ, ६।४।८) इत्यादयः श्रुतय एव तत्र प्रमाणम् । आचार्य्योऽप्याह—"असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्" (१६।८) ; "सत्यं भूतमयं जगत्" (अ, गी, ३५श, ३५श्लो) इति । २ ।

प्रकृतिपुरुषयोः सर्व्वभूतोत्पत्तौ हेतुत्वं परमात्माधीनमित्याह ममेति । महत् अनन्तस्य शक्तिरूपत्वात् देशतः कालतोऽपरिच्छिन्नं बृहत्त्वात् बृंहणत्वात् बृंहिहेतुत्वात् ब्रह्म अपरा प्रकृतिः मम सर्व्वान्तर्यामिणो योनिः सर्व्वभूताभिव्यक्तिस्थानम् । तस्मिन् महति ब्रह्मणि योनौ गर्भं परप्रकृतिभूतं जीवं—हिरण्यगर्भस्य जन्मनो बीजं सर्व्वभूतजन्मकारणं बीजमिति श्रीमच्छङ्करः, चेतनपुञ्जमिति श्रीमद्रामा-

गुणनिमित्तनाशौ, चिदाभासमिति श्रीमच्छ्रीधरः, परमाणुचैतन्यराशि-
मिति श्रीमद्बलदेवः, ईश्वररूपं सङ्कल्पमिति श्रीमन्मधुसूदनः, स्वप्रति-
विम्बरूपमिति श्रीमन्नीलकण्ठः—दधामि निक्षिपामि चैतन्ये बीजं
योजयामि विषयविषयिसम्बन्धमुत्पादयामि, ततः क्षेत्रबीजसंयोगात्
सर्व्वभूतानां, हे भारत, सम्भव उत्पत्तिर्भवति। अत्र श्रीमद्बलदेवस्य
परमाणुचैतन्यराशिः, श्रीमन्मधुसूदनस्य ईश्वररूपसङ्कल्पः, श्रीमन्नील-
कण्ठस्य स्वप्रतिविम्बः, "ययेदं धार्य्यते जगत्" (७।५) इत्युक्तः सूक्ष्म-
भावमभिव्यनक्ति। अणुचैतन्यानां नित्यत्वे तैः सह प्रकृतेः सम्बन्धात्
परात्मप्रेरणया भूतानामुत्पत्तिरिति प्रथमः पक्षः, अणुचैतन्यानां प्रकृति-
सम्बन्धादेकविधैव सृष्टिः स्यात् यदि न भगवत्सङ्कल्पप्रेरणया सा भिन्न-
तामियात्। अणुचैतन्यानां भगवत्सङ्कल्पमयत्वात् देवमनुष्यपशुपक्ष्या-
दिकं सर्व्वं भिन्नभिन्नसङ्कल्पतो भिन्नाकारं लभते। एवमप्यणुचैत-
न्यानां न जातु महत्त्वं स्यात् यदि न परमात्मस्वरूपावेशात् तत्प्रति-
विम्बत्वं स्यात्।

अथ पुनर्विवेच्यम्;—"यन्तु कर्म्मणि यस्मिन् स न्ययुङ्क्त प्रथमं
प्रभुः। स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः॥ हिंस्राहिंस्रे मृदु-
क्रूरे धर्म्माधर्म्मावृतानृते। यद्यस्य सोऽदधात् सर्गे तत्तस्य स्वयमावि-
शत्॥" (मनु, १अ, २८।२९श्लो) इत्यत्र हिंस्रत्वं क्रूरत्वमधर्म्मोऽनृतञ्च
भगवत एवेति न तैर्जीवानामधोगतिर्भवितुमुचितेति विप्रतिपत्तौ,
व्याघ्रादिषु हिंस्रत्वं क्रूरत्वं न दोषाय जीविकामात्रोपायत्वात्तथाः,
तैर्व्यापादितानां प्राणात्ययः स्वदेहदानेन परपोषणं व्यनक्तीति सोऽपि
न दोषाय, मानवे तु पापाय सर्व्वान्तर्यामिणा प्रतिषिद्धत्वात्। अधर्म्म-
स्यानृतस्य चोत्पत्तिः आलोकान्धकारादिव धर्म्मस्याभावोऽधर्म्मः, ऋत-
स्याभावोऽनृतमिति तयोरेकतरे भगवता प्रवर्त्तितेऽन्यस्य जीवनिष्ठप्रकाश-
भावादन्धकारवत्प्रवृत्तिः। न च जीवानां सर्व्वशक्तिमत्त्वं, सुतरां प्रकाश-
भावेऽवश्यम्भाविनि तयोः सम्भावना सर्व्वस्वस्तीति धर्म्माधर्म्मयोः ऋता-
नृतयोः सहभावित्वमुपदिष्टम्। २।

सर्व्वयोनिषु कौन्तेय मूर्त्तयः सम्भवन्ति याः ।
तासां ब्रह्म महद्‌योनिरहं बीजप्रदः पिता ॥४॥
सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥५॥

न केवलं चेतनचेतनसंयोजनायैव परमात्मप्रेरणा किन्तर्हि सृष्टिपरम्परायामपि साभ्युपगन्तव्येत्याह सर्व्वयोनिष्विति । हे कौन्तेय, सर्व्वयोनिषु देवमनुष्यपशुपक्ष्यादिषु या मूर्त्तयः विविधसंस्थानलक्षणास्तनवः सम्भवन्ति जायन्ते, तासां महत् ब्रह्म प्रकृतिर्योनिरुत्पत्तिस्थानं, मातृस्थानीया सा ; अहं सर्व्वान्तर्यामी बीजप्रदः चेतनवर्गस्य संयोजकः पिता । अनेन जीवमात्रस्य सन्तानस्थानीयस्य पिता परात्मेति जीवपरयोर्नित्यसम्बन्ध उक्तः । ४ ।

एवं देहसंयुक्तस्य जीवस्य कुतो बन्धनमित्याह सत्त्वमिति । सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः प्रकृतिसमुत्पन्नाः तस्याः क्रियाविशेषाः देहिनं जीवमव्ययं रूपान्तरताविहीनं सदैव चिद्रूपं देहे निबध्नन्ति देहाभिनिवेशवन्तं कुर्व्वन्ति सुखदुःखादिभिः संयोजयन्ति ।

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः" (१।६१) इति कपिलसूत्रस्य "अकार्य्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिः" इत्यर्थं निष्पन्ने गुणानामेव वस्तुत्वं प्रकृतिस्तु तेषां 'न्यूनाधिकभावेनासंहतावस्था' ; तत्कथं 'गुणाः प्रकृतिसम्भवाः' इत्युक्तिः । प्रकृतिर्हि शक्तिः क्रियात्मिका व्यक्तिप्रवृत्त्यप्रवृत्तिरूपा उभयथापि निर्वक्तुमुचिता, तद्‌यथा— क्रियाया अप्रवृत्तिः प्रथमावस्था, प्रवृत्तिर्द्वितीयावस्था, ततोऽस्या व्यक्तिः प्रकाशस्तृतीयावस्था, अतएवैकस्याः क्रियात्मिकायाः प्रकृतेरवस्थात्रयमेव गुणास्तद्भूता इति प्रकृतिसम्भवत्वं तेषाम् ; पक्षान्तरे व्यक्तिप्रवृत्त्यप्रवृत्तीर्विना न जातु शक्तिस्तिष्ठति, अकार्य्यावस्थायां तासां तत्साम्यं तदेव शक्त्यपरपर्य्याया प्रकृतिः । ननु शक्तिर्हि प्रवृत्तिरूपा, कथं तस्या अप्रवृत्त्यवस्था सम्भवति ? अवरोधेऽपि शक्तेः प्रयोजनं दृष्टा अवरोधरूपाप्रवृत्तिः सम्भ-

तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥६॥

अत्रैव तत्त्वाम् । वस्तुमात्रं हि अभिव्यक्तेः पूर्व्वं शक्तावयवावस्थायां तिष्ठति, अभिव्यक्त्युन्मुखे प्रवृत्तिरूपतिष्ठते, तदनन्तरं यथासमयं भवत्यस्य व्यक्तिः । एवं सर्व्वत्राप्यावस्थात्रयस्य साम्राज्यं दृष्ट्वा प्रकृतौ गुणत्रयस्य सन्निवेशः । "गुणशब्दः.........पुरुषपशुबन्धकत्रिगुणात्मकमहदादिरज्जुनिर्म्मातृत्वाच्च प्रयुज्यते" इत्युक्तिर्नासमञ्जसा, पुरुषस्याप्यप्रवृत्तितः प्रवृत्तिः, प्रवृत्त्यनन्तरं स्वस्य प्रवृत्तिविषयस्य व्यक्तिरिति तदधीनता नित्यमेव । अत एषा व्यक्तिप्रवृत्त्यप्रवृत्तिरूपा रज्जुस्तं वस्तुमात्रञ्च निबध्नातीति सिद्धान्तो रुचिर एव । अप्रवृत्तितः प्रवृत्तिः प्रवृत्तितो व्यक्तिरिति क्रममनभिनन्द्य कथं व्यक्तिः प्रवृत्तिरप्रवृत्तिरिति क्रमः शास्त्रे परिगृहीतः ? व्यक्तेरेवानुसन्धानसम्भावना नाव्यक्तेरिति व्यक्तेर्व्युत्क्रमेण प्रथमग्रहणम् । प्रवृत्तिस्तु पर्य्यवेक्षणयोग्यापि यावन्नाभिव्यक्तिः, किमिदं भविष्यतीति न बुद्धौ प्रतिभासते, अतस्तस्या मध्यमस्थानमप्रवृत्तेस्तु चरमम् । एवञ्च तमो रजः सत्त्वमिति क्रममुपेक्ष्य सत्त्वं रजस्तम इति गुणानामुल्लेखः । सृष्टेः प्रागवस्था शक्तिरप्रवृत्तिप्रधाना, सुतराम् "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥" (मनु, १अ, ४श्लो) इत्युक्तिस्साकूतरा । शक्तेरनन्तत्वात् तस्यां व्यक्तिप्रवृत्त्यप्रवृत्त्यवस्था नित्यमेव युगपत् स्थातुं शक्नुते । "ये चैव सात्त्विका भावा राजसास्तामसाश्च ये । मत्त एवेति तान् विद्धि" (७।१२) इत्युक्तात्र 'गुणाः प्रकृतिसम्भवाः' इत्युक्तिः प्रकृतिप्रवर्त्तकत्वेन गुणानामपि प्रवर्त्तकत्वं दर्शयतीति न पूर्व्वापरविरोधः । ५ ।

सत्त्वस्य लक्षणं बन्धकत्वप्रकारमाह तत्रेति । तत्र तेषां गुणानां मध्ये सत्त्वं निर्म्मलत्वात् स्वच्छत्वात् प्रकाशकम्, अनामयमुपद्रवशून्यम् । तमस्यप्रवृत्त्यवस्थायां न किञ्चित् परिलक्ष्यते, सर्व्वं तत्रानुद्भूतम्, रजसि प्रवृत्त्यवस्थायां न सर्व्वावयवस्य प्रकाशः, अतएवेषत्परिलक्षितेऽपि न

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्म्मसङ्गेन देहिनम् ॥७॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्व्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥८॥

तदप्रकाशः, सत्त्वं तु व्यक्तावस्थायां सर्व्वावयवसम्यक्परिस्फुटतामापन्नात्मानं दर्शयतीति स्वच्छत्वं तस्य। तमसि न बुद्धेः प्रसरोऽतस्तदुपद्रवमयं; रजस्यपि तथा अनतिपरिस्फुटत्वात्; सत्त्वे तु बुद्धेः प्रसरोऽप्रतिहतः, अतो न काप्युपद्रवस्येन्द्रियव्याघातादिजनितस्य सम्भावना। हे अनघ, सत्त्वं पुनः सुखसङ्गेन सुखासक्त्या, ज्ञानसङ्गेन ज्ञानासक्त्या बध्नाति बन्धनकारणं भवति। सर्व्वावयवदर्शनेन तस्मिन् यत्सौन्दर्य्यमुपलभ्यते तेनाकृष्टचेताः पुरुषस्तस्मिन् सुखमाप्नोति। एवं बुद्धिप्रसरोपयोगिनि पदार्थे ज्ञानचरितार्थता भवतीति ज्ञानासक्तिर्जायते। ६।

रजसो लक्षणं तस्य बन्धकत्वञ्चाह रज इति। रजो रागात्मकं रागः कामो गर्द्धः स एव आत्मा स्वरूपं यस्य तत् रागहेतुभूतं विद्धि जानीहि। तृष्णासङ्गसमुद्भवं तृष्णा अप्राप्ताभिलाषः, सङ्गः प्राप्ते प्रीतिलक्षणः संश्लेषः, तयोः तृष्णासङ्गयोः समुद्भवो यस्मात् तत् रजः, हे कौन्तेय, कर्म्मसङ्गेन कर्म्मासक्त्या देहिनं बध्नाति। प्रवृत्तिप्रधानत्वात् कर्म्मासक्तिश्च। ७।

तमसो लक्षणं तस्य बन्धकत्वञ्चाह तम इति। तमस्तु अज्ञानजम् अज्ञानजातं —यत्र ज्ञानं नास्ति तत्र न जातु प्रवृत्तिर्भवति अतोऽप्रवृत्तिप्रधानमेव तमः— विद्धि जानीहि। सर्व्वदेहिनां मोहनं मोहकरमविवेककरं भ्रान्तिजनकम्, अतएव प्रमादालस्यनिद्राभिः प्रमादोऽनवधानम्, आलस्यमनुद्यमः, निद्रा सर्व्वेन्द्रियप्रवर्त्तनोपरमः तैः तत् तमः, हे भारत, देहिनं निबध्नाति। ८।

सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥९॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥१०॥

गुणानां सङ्क्षेपतः कार्य्यमाह सत्त्वमिति । हे भारत, सत्त्वं सुखे, रजः कर्म्मणि सञ्जयति संश्लेषयति, तमस्तु ज्ञानमावृत्य प्रमादे उत आलस्यादौ सञ्जयति । सत् मूलोपादानं ब्रह्म वा तद्भावः सत्त्वम् । रजो रञ्जकात्मकं तत्तद्विषयानुरागमूलम्, तमः ग्लान्यात्मकमवसादकम् ; सुतरां सत्त्वप्राधान्ये मूलोपादानस्य ब्रह्मणः सुखरूपत्वात् सुखेऽभिनिवेशः स्वभावतो भवति ; रजःप्राधान्ये विषयानुरागस्तत्प्राप्तौ जनं प्रयोजयति, सुतरां कर्म्मण्यभिनिवेशो जायते ; तमःप्राधान्ये ग्लानिरूपत्वहेतु, सुतरां प्रमादालस्याद्युद्रेकः । सत्त्वं शुद्धसत्त्वमिति शास्त्रीयप्रभेदः, एकेन जगति प्रकाशमानमपरेण तदतीतं स्वयं ब्रह्म इन्द्रियविषयं भवतीति शास्त्रम् । ९ ।

सर्व्वदैव गुणानां सङ्करस्तत्कथं 'सत्त्वं सुखे सञ्जयति' इत्याद्युक्तिस्तत्कारणमाह रज इति । हे भारत, रजः तमश्च अभिभूय स्वप्रवृत्त्या तिरस्कृत्य सत्त्वं भवति वर्द्धते, सत्त्वं तमश्चैव अभिभूय रजो भवति वर्द्धते, तथा सत्त्वं रजः अभिभूय तमो भवति वर्द्धते । यद्यपि सत्त्वरजस्तमोगुणानां सर्व्वदैव सङ्करः, तथापि तेषां वृद्धिक्षयौ कर्म्मभिर्भवतः ; अन्यथा मतिप्रयोजकानां शास्त्राणामानर्थक्यं स्यात्, जन्मकालेऽनुभूतानां गुणानामारम्भकाणां क्षयोदयासम्भवात् अधर्म्माद्धर्म्मे समुत्थानं धर्म्मादधर्म्मे निपतनं न भवेत्, अवनत्युन्नतिपरम्परा च व्याहन्येत । "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्ज्जुन । निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥" (२।४५) इत्युपदेश आचार्य्यस्यैवमेव सिध्यति । १० ।

सर्व्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥११॥
लोभः प्रवृत्तिरारम्भः कर्म्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥१२॥
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥१३॥

केन वा ज्ञायते सत्त्वं विवृद्धमिति तदाह सर्व्वद्वारेष्विति । अस्मिन् देहे सर्व्वद्वारेषु श्रोत्रादिषु ज्ञानद्वारेष्विन्द्रियेषु प्रकाशो व्यक्तावस्था यथायथवस्तुग्रहणसामर्थ्यमिति यावत् उपजायते उद्भूयते, तेन च यदा ज्ञानं शब्दादिविषयाणां याथात्म्येन बोधविषयत्वं जायते तदा सत्त्वं विवृद्धं विद्यात् जानीयात्, उत सुखादिलिङ्गेन । एतदुक्तं भवति, रजःप्रधानस्य वासनोद्रेकात्, तमःप्रधानस्य च मोहाभिभूतत्वात् यथायथं वस्तुतत्त्वग्रहणेऽसामर्थ्यम् । वासनाविकाररहितस्य मोहानभिभूतस्य ज्ञानेन्द्रियाणि मनसा यथावद्वस्तुग्रहणे, तैः प्रेरितानि कर्म्मेन्द्रियाणि च यथावद्विषयसम्बन्धरक्षणे समर्थानि भवन्ति । अत एतल्लक्षणेन सत्त्वं प्रवृद्धमिति ज्ञायते । ११ ।

केन वा ज्ञायते रजो विवृद्धमिति तदाह लोभ इति । लोभः परद्रव्यादिष्वभिलाषः, प्रवृत्तिर्नित्यं कुर्व्वद्रूपा, कर्म्मणामारम्भ उद्योगः, अशम इन्द्रियानुपरतिः, स्पृहा विषयतृष्णा, हे भरतर्षभ, रजसि विवृद्धे एतानि जायन्ते । १२ ।

केन वा ज्ञायते तमो विवृद्धमिति तदाह अप्रकाश इति । अप्रकाशो ज्ञानानुदयः, अप्रवृत्तिरनुद्यमः, प्रमादोऽनवधानं, मोहो विपरीतज्ञानं भ्रान्तिरेव च तमसि विवृद्धे, हे कुरुनन्दन, जायन्ते । १३ ।

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥१४॥
रजसि प्रलयं गत्वा कर्म्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढ़योनिषु जायते ॥१५॥
कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥१६॥

सत्त्वप्रवृद्धौ मृतस्य गतिमाह यदेति । यदा सत्त्वे प्रवृद्धे तु देहभृत् प्रलयं मरणं याति प्राप्नोति तदा उत्तमविदाम् उत्तमानि तत्त्वानि विदन्तीत्युत्तमतत्त्वविदस्तेषां तत्त्वज्ञानाममलान् मलरहितान् लोकान् प्रतिपद्यते प्राप्नोति । सत्त्वे प्रवृद्धे यथावद्विषयग्रहणं भवति । यद्वस्तु यद्भावापन्नं तद्वस्तु तेन भावेन ग्रहणं भगवदभिप्रेतम् । भगवदभिप्रायानुसरणेन वस्तुग्रहणे तेन च सम्बन्धो विशुद्धो भवति, तत्त्वज्ञानञ्च स्फूर्त्तिं लभते । तत एव तत्त्वज्ञानां लोकेषु तादृशां जनानां गतिर्भवति । ननु सत्त्वे प्रवृद्धेऽपि रजस्तमसोर्नात्यन्ताभावः सिध्यति, तत्कथं न तयोरत्र क्रियासंनिवेशः ? सत्त्वाभिभूतयोरजस्तमसोः सत्त्वानुकूलत्वं, तद्यथा सत्कर्म्मणीश्वराभिप्रेते रजसोऽनुकूलता, असद्विषयस्मृतिप्रमोषे तमस इति न तयोः पृथङ्निर्द्देशः । रजसाभिभूतयोः सत्त्वतमसोस्तमसाभिभूतयोश्च सत्त्वरजसोरेवं तत्तदानुगत्यं बोध्यं प्रकाशाप्रकाशप्रवृत्तियोगात् । १४ ।

रजसस्तमसश्च प्रवृद्धौ मृतस्य गतिमाह रजसीति । रजसि प्रलयं मरणं गत्वा प्राप्य कर्म्मसङ्गिषु कर्म्मासक्तेषु जायते, तथा तमसि प्रलीनो मृतः मूढ़योनिषु पश्वज्ञमोहाच्छन्नेषु जायते । मरणानन्तरं स्वस्वप्रतिपत्त्यनुसारतो भवति पारलौकिकी गतिरिति फलितार्थः । १५ ।

गुणकृतकर्म्मणां फलमाह कर्म्मण इति । सुकृतस्य कर्म्मणः सात्त्विकं सत्त्वगुणसम्भूतं निर्म्मलं फलं ज्ञानवैराग्यादिकम्, रजसः राजसस्य कर्म्मणः फलं दुःखं नियततृष्णापरवशत्वात्, तमसः तामसस्य कर्म्मणः फलमज्ञानं मोहजनकत्वात् । १६ ।

सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१७॥
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥१८॥

कथमेवं पृथक् फलं सञ्जायते तत्कारणमाह सत्त्वादिति । सत्त्वात् सत्त्वगुणात् ज्ञानं जायते, तेन च परिणामविरसत्वं विषयाणां जानतो वैराग्यादिफललाभः, रजसो रजोगुणात् लोभः, तेन नित्यापरिहृतत्वात् दुःखमेव फलम, तमसस्तमोगुणात् प्रमादमोहौ भवतः, अज्ञानमेव च भवति, तैः पुनर्मूढताबुद्धिः फलम । १७ ।

गुणोद्रेकादूर्द्ध्वमध्याधोगतीराह ऊर्द्ध्वमिति । सत्त्वस्था ऊर्द्ध्वमूर्द्ध्वलोकं गच्छन्ति, राजसाः मध्ये मध्यलोके तिष्ठन्ति, जघन्यगुणवृत्तिस्थाः सत्त्वरजोऽपेक्षया निकृष्टवृत्तिस्थाः तामसाः अधः अधोलोकं गच्छन्ति । ऊर्द्ध्वं गच्छन्ति, अधो गच्छन्ति, मध्ये तिष्ठन्तीति वचनात् भूर्लोकमेवावलम्ब्योर्द्ध्वाधोनिर्व्वचनमिति व्याख्यातारः । कपिलसूत्रव्याख्यानेऽपि तथा दृश्यते । तद्यथा—"ऊर्द्ध्वं सत्त्वविशाला" (३।४८)—"ऊर्द्ध्वं भूर्लोकादुपरि सृष्टिः सत्त्वाधिका भवति ।" "तमोविशाला मूलतः" (३।४९)—"मूलतो भूर्लोकादधः" ; "मध्ये रजोविशाला" (३।५०)— "मध्ये भूर्लोके" इति । ऊर्द्ध्वाधोमध्यगता एते सर्व्वे लोका उत्तरोत्तरजन्मयोगाज्जरामरणादिजदुःखाधीनत्वात् समाना एव । यथोक्तं कपिलेन—"आवृत्तिस्तत्राप्युत्तरोत्तरयोनियोगाद्धेयः" (३।५२), "समानं जरामरणादिजं दुःखम्" (३।५३) इति । "क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः । न चैतदिष्टं देवानां मर्त्त्यैरुपनिवर्त्तनम् ॥" (भ, गी, १८अ, ५८श्लो) इत्यादिभिरार्षवचनैस्तत्तल्लोकानां समत्वमेव व्यज्यते । सर्व्वेषैव क्रियावतां सत्त्वादूर्द्ध्वाधोगती तत्र तत्रावस्थाभाविन्यौ । सुतरां सिध्यति तत्तन्निवासिनः स्वं स्वं लोकं मध्यस्थं कृत्वा लोकानन्यानूर्द्ध्वाधःस्थितान् परिगणयन्तीति । अतएव श्रीमत्-

नान्यं गुणेभ्यः कर्त्तारं यदा द्रष्टानुपश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥१९॥
गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥२०॥

कपिलेनाचार्य्येण च अद्धं मथेऽथ इति सामान्यशब्देन लोका निर्द्दिष्टाः। १८।

अतीताध्याये "कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु" (१३।२१) इति सङ्गुपत उक्ताऽस्मिन्नध्याये गुणानां स्वरूपं बन्धकत्वं गुणजन्यां त्रयिणां गतिश्चोक्तवान्। सम्प्रति गुणेभ्यो विमुक्तिं विमुक्तस्य च लक्षणं वक्तुमुपक्रमते नान्यमिति। द्रष्टा जीवः यदा गुणेभ्यः सत्त्वरजस्तमोभ्यः अन्यं कर्त्तारं नानुपश्यति, गुणा एव तत्तत्स्वरूपानुसारिणि कर्म्मणि देहिनं नियोजयन्ति देही तु स्वयमकर्त्ता इति साक्षादनुभवति, गुणेभ्यः सत्त्वरजस्तमोभ्यः परं गुणव्यापारसाक्षिभूतमात्मानं परमात्मानं वा पश्यति, स मद्भावं मम भावं स्वरूपं ज्ञानादिमभ्यबलमधिगच्छति प्राप्नोति। पूर्व्वमेवोक्तं गुणकर्तृत्वमात्मनोऽकर्तृत्वं तेन च ज्ञानेन ब्रह्मस्वरूपमभ्यबलम्; अस्मिन् पुनरुल्लेखो गुणविषयकप्रस्तावे विशेषेण गुणातीतत्वलक्षणनिर्व्वचनाय। १९।

अनेन ज्ञानेन किं भवतीत्याह गुणानिति। देहसमुद्भवान् देहस्य समुद्भवो येभ्यस्तान् देहसमुद्भवान् देहोत्पत्तिबीजभूतान् एतान् त्रीन् गुणान् सत्त्वरजस्तमोरूपान् अतीत्य अतिक्रम्य देही जीवः जन्ममृत्यु-जरादुःखैर्विमुक्तः अमृतं मोक्षं परमानन्दम् अश्नुते प्राप्नोति। 'देह-समुद्भवान्' इत्यस्य देहजानित्यर्थे निष्पन्ने मातापितृदेहतस्तत्पुत्रकन्या-शरीरेषु गुणानां संक्रमणं बुध्यते। आह च श्रीमत्कपिलः—"माता-पितृजं स्थूलं प्रायश इतरन्न तथा" (३।७) इति। अत्र स्थूलशरीरमेव मातापितृतः समुत्पद्यते, न तु सूक्ष्मशरीरमिति दृश्यते, तत्तु "सप्तदशैकं लिङ्गम्" (३।९) इति एकादशेन्द्रियाणि पञ्चतन्मात्राणि बुद्धिश्चेति सप्त-

दश भवतीति सांख्यसिद्धान्तः। आचार्य्यस्तु "मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति" (१५।७) इत्युक्त्वा नतु तत् मातापितृतः किन्तर्हि प्रकृतेरेव मनःपञ्चज्ञानेन्द्रियात्मकं जीवो गृह्णातीत्युक्तवान्।

अत्रेदं विवेच्यम् ;—स्थूलशरीरं मातापितृपादाननिर्म्मितमतस्तत्र मातापितृदेहे ये गुणा वर्त्तन्ते त एव सन्ततिदेहं संक्रामन्ति, न पुनर्मनोबुद्धिस्तत्साधनानीन्द्रियाणि, एतानि तु साक्षात्प्रकृतेरीश्वरशक्तेः। यद्यप्यात्मनोऽविकारित्वं स्वतःसिद्धं तथापि स्थूलशरीरगता गुणास्तं निबध्नन्ति। ननु चक्षुरादीनि ज्ञानेन्द्रियाणि गुणकृतान्येव यतस्तानि च शरीरगतान्येव। एव हि स्थूलदर्शिनां सिद्धान्तः। "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" (बृ. आ, उ, ४।३।२३) इत्याद्याभिः स्थूलचक्षुरादयो देहगता अपि द्रष्टुर्जीवस्यान्तरङ्गा दृष्टिशक्त्यादयः। "मनःषष्ठानि" इति पञ्चज्ञानेन्द्रियेभ्यो मनो विभज्य कथनस्यायमभिप्रायः, एकमेव मनः पञ्चधा वस्तुग्रहणेन पञ्चज्ञानेन्द्रियाकारेण व्यक्तं भवति, न ततो ज्ञानेन्द्रियाणां स्वतन्त्रता। तथैवोक्तं श्रीमच्छङ्करेण "यदेतद्धृदयं मनश्चैतत्" (ऐ, उ, ३।२) इत्यस्या व्याख्यानावसरे ;—"किं पुनस्तदेकमनेकधा भिन्नं करणमित्युच्यते। यदुक्तं पुरस्तात् प्रजानां चेतो हृदयं हृदयस्यं चेतो मनो मनसा सृष्टा आपश्च वरुणश्च ; हृदयात्मनो मनश्चन्द्रमाः। तदेवैतद्धृदयं मनश्च एकमेतदनेकधा। एतेनान्तःकरणेनैकेन चक्षुर्भूतेन रूपं पश्यति, श्रोत्रभूतेन शृणोति, घ्राणभूतेन जिघ्रति, वाग्भूतेन वदति, जिह्वाभूतेन रसयति, स्वेनैव विकल्पनारूपेण मनसा विकल्पयति, हृदयरूपेणाध्यवस्यति। तस्मात् सर्व्वकरणविषयव्यापारकमेकमिदं करणं सर्व्वोपलब्ध्यर्थमुपलब्धुः। तथा च कौषीतकीनां—'प्रज्ञया वाचं समारुह्य वाचा सर्व्वाणि नामान्याप्नोति, प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्व्वाणि रूपाण्याप्नोति' इत्यादि। वाजसनेयके च—'मनसा ह्येव पश्यति, मनसा शृणोति, हृदयेन हि रूपाणि जानाति' इत्यादि। तस्माद्धृदयमनोवाच्यस्य सर्व्वोपलब्धिकरणत्वं प्रसिद्धम्। तदात्मकश्च प्राणः—'यो वै प्राणः सा प्रज्ञा, या वै प्रज्ञा स

अर्जुन उवाच—

कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथञ्चैतांस्त्रीन् गुणानतिवर्त्तते ॥२१॥

श्रीभगवानुवाच—

प्रकाशञ्च प्रवृत्तिञ्च मोहमेव च पाण्डव ।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥२२॥

प्राणः' इति ब्राह्मणम् । इति ।" शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥" (१५।८) इत्यत्र यदप्याचार्य्येण मनःषष्ठैरिन्द्रियैर्गच्छति देहादित्युक्तं, तथापि पञ्चेन्द्रियप्रकाशस्थानं मन एव प्रधानम् । अतएवाह श्रुतिः—"मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके" (छा, उ, ८।५।६।१२) इति । २० ।

"गुणानेतानतीत्य त्रीन्" इत्युक्तवानाचार्य्यः, अतएव गुणातीतस्य लक्षणमाचारं साधनोपायञ्च पृच्छत्यर्जुनः कैरिति । हे प्रभो, कैर्लिङ्गैर्लक्षणैस्त्रीनेतान् गुणान् अतीतोऽतिक्रान्तो भवति, अयं गुणातीतः किमाचारः कोऽस्याचार इति किमाचारः, कथं केन च प्रकारेण एतान् त्रीन् गुणानतिवर्त्तते अतीत्य वर्त्तते ? । २१ ।

"कैर्लिङ्गैरेतांस्त्रीन् गुणानतीतो भवति" इति प्रश्नस्योत्तरमाह प्रकाशञ्चेति । हे पाण्डव, प्रकाशं सत्त्वकार्य्यञ्च, प्रवृत्तिं रजःकार्य्यञ्च, मोहनं तमःकार्य्यञ्च सम्प्रवृत्तानि दुःखबुद्ध्या न द्वेष्टि, निवृत्तानि न सुखबुद्ध्या काङ्क्षति 'गुणातीतः स उच्यते' इति चतुर्थेनान्वयः । द्वितीयाध्याये "स्थितप्रज्ञस्य का भाषा" (२।५४) इत्यादिना पृष्टः तत्र : श्लोकैरुत्तरमाह, अत्र तु पुनः सारसंग्रहणेन । अत्राह श्रीमच्छङ्करः—"मम तामसः प्रत्ययो जातस्तेनाहं मूढः ; तथा राजसी प्रवृत्तिर्ममोत्पन्ना दुःखात्मिका तेनाहं रजसा प्रवर्त्तितः प्रचलितः स्वरूपात् कष्टं मम वर्त्तते योऽयं मत्स्वरूपात् भ्रंशः ; तथा सात्त्विको

गुण: प्रकाशात्मा मां विवेकित्वमापादयन् सुखेन च सञ्जयन् मां बध्ना-तीति तानि द्वेष्ट्यसम्यग्दर्शित्वेन, तदेवं गुणातीतो न द्वेष्टि सम्प्रवृत्तानि, यथा च सात्त्विकादिपुरुष: सात्त्विकादिकार्य्याण्यात्मानं प्रति प्रकाश्य निवृत्तानि काङ्क्षति, न तथा गुणातीतो निवृत्तानि काङ्क्षति" इति। ननु सत्त्वेन सुखमनुभूयते, तस्मात् सत्त्वकार्य्ये दुःखबुद्ध्या द्वेष: सम्भवति ? श्रीमच्छङ्करस्तु "विवेकित्वमापादयन् सुखेन च सञ्जयन् मां बध्नाति" इत्युत्तरमदात् । न खलु विवेकित्वेन दुःखं न सम्भवतीति वक्तव्यम् ; विवेकाद्धृद्यात्मनो निगूढपापराशीन् पश्यन् साधकस्तीव्रं दुःखमनुभव-तीति निखिलसाधकसाक्षादनुभूति: । यदपि पापानि दृष्ट्वा खिन्नस्त-थापि न तदवस्थां स द्वेष्टि, यत: पापनिवृत्ते: सैवोपाय: । वैराग्याद्य-भ्यासेन साधक: सुखमनुभवति, तत्सुखञ्च तदैव बन्धनकारणं भवति यदा तदभ्यास एवोपेयो भवति, न तु तत्प्राप्य: परमात्मा । गुणातीत: पुरुषस्तु वैराग्याद्यभ्यासस्यैव विघ्नकरत्वं पश्यन् न तं द्वेष्टि, प्रत्युतोपा-यत्वेन तं चिरानुवर्त्तनविषयं करोति । रजसा कार्य्योद्यम उपतिष्ठते, तं तु वयं निष्कामा: सन्न्यासिन इत्यभिमानपरवशा न बहु मन्यन्ते, यदपि कर्म्मणोऽपरिहार्य्यत्वात् तेऽपि शरीरचेष्टादीनि कुर्व्वन्ति । गुणा-तीतपुरुषस्तु न तथा । आत्मन: कार्य्योद्यमं भगवदाराधनतदाज्ञा-पालनत्वेन परिणामयन् स सर्व्वथा कर्म्मद्वेषं विजहाति । पुत्रादि-बन्धुविनाशे स्वभावतो यच्छोकमोहावुपतिष्ठेते, तौ पुन: वयं [illegible]-दुःखादिकमतीता इत्यभिमानवन्तो द्विषन्ति, न तथा गुणातीतपुरुष:, यथा हि दृश्येते श्रीरामचन्द्रस्य सीतावियोगे शोकमोहौ, यथा च आचार्य्यस्य यदुकुलध्वंसे । एवं यदा सत्त्वकार्य्यं वैराग्याद्यभ्यास:, रज:कार्य्यं कार्य्योद्यम:, तम:कार्य्यं मोह: स्वयं निवर्त्तते तत्तदवस्था-श्रयोपस्थिते:, न स पुनस्तामाकाङ्क्षति । वस्तुतस्तु न जातु शरीरवतां गुणकार्य्याणि निवर्त्तन्ते, बलप्रयोगात् निवर्त्तयितुमनसां स्यादेव निय-यमकृतार्थता । ये पुनस्तेषां निवृत्तौ प्रवृत्तौ वा तिष्ठन्त्यविकृतचित्तास्त एव स्थितप्रज्ञा गुणातीतपुरुषा इत्याचार्य्यस्याभिप्राय: । २२ ।

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्त्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥२३॥
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥२४॥
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्व्वारम्भपरित्यागी गुणातीतः स उच्यते ॥२५॥
माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥२६॥

किमाचार इत्यस्योत्तरमाह त्रिभिरुदासीनवदिति, समदुःखसुख इति, मानापमानयोरिति। उदासीनवत् अपक्षपातित्वेन निर्लिप्तभावेन आसीनो यो गुणैः सत्त्वादिकार्य्यैर्न विचाल्यते न विचलितो भवति, गुणा वर्त्तन्ते स्वकार्य्याणि कुर्व्वन्ति इत्येवं निश्चित्य योऽवतिष्ठते, न इङ्गते न गुणकार्य्यानुरूपेण चेष्टते, यः समदुःखसुखः समे सुखदुःखे यस्य, स्वस्थः नियतमात्मस्वरूपे स्थितः, समलोष्टाश्मकाञ्चनः समानि लोष्टाश्मकाञ्चनानि यस्य, तुल्यप्रियाप्रियः तुल्ये प्रियाप्रिये यस्य, धीरः विकारहेतावविकारो, तुल्यनिन्दात्मस्तुतिः तुल्ये निन्दात्मस्तुती यस्य, यो मानापमानयोस्तुल्यः, मित्रारिपक्षयोस्तुल्यः, सर्व्वारम्भपरित्यागी "भवदाज्ञयैव संसारयात्रामनुवर्त्तयिष्ये" इति न्यायात् ईश्वराज्ञापालनमृते स्वाहङ्कारप्ररोचनया स्वाभाविककर्म्माण्यपि कर्त्तुमनीहः, स गुणातीत उच्यते। २३—२५।

'कथमेतांस्त्रीन् गुणानतिवर्त्तते' इत्यस्योत्तरमाह माञ्चेति। यः साधकोऽव्यभिचारेण ऐकान्तिकभावेन—ज्ञानकर्म्माद्यमिश्रेणेति श्रीमद्विश्वनाथः, वस्तुतस्तु "ये तु सर्व्वाणि कर्म्माणि मयि सन्न्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते॥" (१२।६) इत्युक्तेनानन्येन

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्म्मस्य सुखस्यैकान्तिकस्य च ॥२७॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा-
र्ज्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्द्दशोऽध्यायः।

भक्तियोगेन—भक्तियोगः भजनं भक्तिः सैव योगस्तेन विवेकज्ञानात्मकेन भक्तियोगेनेति श्रीमच्छङ्करः। भजनं परमप्रेमा स एव युज्यतेऽनेनेति योगः तेन इति श्रीमद्गिरिः; मयि भगवति तैलधारावदविच्छिन्नवृत्तिप्रवाहिमनःप्रणिधानरूपेण योगेन इति श्रीमन्नीलकण्ठः— "स्नेहपूर्व्वमनुध्यानं भक्तिरित्युच्यते बुधैः" इति श्रीमद्रामानुजोक्तवचनानुरूपेण, "ये तु सर्व्वाणि कर्म्माणि मयि सन्न्यस्य मत्पराः" इत्याचार्य्यणोद्घोषितेन भक्तियोगेन मां सर्व्वान्तर्यामिणं सेवते—पराक्चित्ततां विना सदानुसन्दधाति इति श्रीमद्गिरिः, ध्यायतीति श्रीमन्नीलकण्ठः—भजते, स एतान् गुणान् समतीत्य अतिक्रम्य ब्रह्मभूयाय ब्रह्मभावाय ब्रह्मस्वरूपेणैक्याय—ब्रह्मवत् प्रकृतिवत् भगवत्प्रियत्वं ब्रह्मभूयमिति श्रीमन्माध्वः—कल्पते योग्यो भवति। ब्रह्मभूयायेत्यत्र श्रीमद्बलदेवः— "यस्तु ब्रह्मभूयायेत्यनेन मद्रूपतां स यातीति पार्थसारथिनोपदिष्टमिति व्याचष्टे तन्निरवधानमेव। तेनैव 'इदं ज्ञान'मित्यादिना मोक्षेऽपि स्वरूपभेदस्याभिहितत्वात्, 'निरञ्जनं परमसाम्यमुपैति' इत्यादि श्रुति ष्वपि तत्र तस्य दृष्टत्वात्; अणुत्वविभुत्वादिनित्यधर्म्माक्रान्तत्वेन नित्यत्वाच्च तद्भेदस्य। तस्माद्गुणाष्टकविशिष्टत्वमेव; 'ब्रह्मैव सन् ब्रह्माप्येति' इति श्रुतौ ब्रह्मतद्दृशः सन् ब्रह्माप्येति प्राप्नोतीत्यर्थः,—'एवौपम्येऽवधारणे' इति विश्वप्रकाशात्, 'वद्वा यथा तथैवैवं साम्ये' इत्यमरकोषाच्च,—अन्यथा ब्रह्मभावान्तरो ब्रह्माप्ययो न सङ्गच्छेत" इति। २६।

कोऽहं यस्मिन्ननन्यभक्तियोगेन गुणातीतत्वं साध्यते तदाह ब्रह्मण

इति । ब्रह्मणः प्रकृतेः—मायाया इति श्रीमच्छ्रीधरः, परमात्मन इति श्रीमच्छङ्करः, तत्पदवाच्यस्य सोपाधिकस्येति श्रीमन्मधुसूदनः, वेदस्येति श्रीमन्नीलकण्ठः—प्रतिष्ठा प्रतिष्ठीयतेऽस्मिन्निति प्रतिष्ठा आश्रयः—प्रतिष्ठत्यस्मिन्निति श्रीमच्छङ्करः, प्रतिमेति श्रीमच्छ्रीधरः, तात्पर्य्येण पर्य्यवसानस्थानमिति श्रीमन्नीलकण्ठः—अहं सर्व्वान्तर्यामी—प्रत्यगात्मेति श्रीमच्छङ्करः—अव्ययस्य नित्यस्य अमृतस्य मोक्षस्य, शाश्वतस्य नित्यस्य धर्म्मस्य च, ऐकान्तिकस्य सुखस्य च प्रतिष्ठा । अत्र श्रीमच्छङ्करेण अहंशब्देन प्रत्यगात्मेत्यभिधाय अहं प्रत्यगात्मा ब्रह्मणः प्रतिष्ठा इत्यर्थो निष्पन्नः । ब्रह्म प्रत्यगात्मनि प्रतितिष्ठतीति ब्रह्मणः प्रतिष्ठा प्रत्यगात्मेति तन्मतम् । श्रीमच्छ्रीधरस्तु प्रतिष्ठाशब्देन प्रतिमेति गृहीत्वा 'घनीभूतं ब्रह्मैवाहम्' इति व्याचष्टे । श्रीमन्नीलकण्ठस्तु श्लोकमिममेवं व्याख्यातवान्,—"ब्रह्मणो वेदस्य प्रतिष्ठा तात्पर्य्येण पर्य्यवसानस्थानमहमेव । अमृतस्य कर्म्मब्रह्मोभयदर्शनद्वाराऽमृतसाधनस्य अव्ययस्य अनादित्वादनन्तत्वाच्चापौरुषेयत्वेनाप्रामाण्यशङ्काकलङ्कशून्यस्य स्वतः प्रमाणभूतस्येत्यर्थः । एतेनोपक्रमोपसंहारादिपर्य्यालोचनया वेदाविरुद्धतर्कोपकरणया शब्दस्य तात्पर्य्यं मद्दर्शनकामेन निर्णेतव्यमिति विचारणाख्या द्वितीया भूमिरुक्ता । हेतुफलोपदर्शनमुखेन शुभेच्छाख्यां प्रथमां भूमिमाह शाश्वतस्येति । काम्यधर्म्मवत् फलदानेन नाशाभावात् भगवत्यर्पितो नित्यो धर्म्मः शाश्वतः विविदिषादिपारम्पर्य्येण मोक्षाख्यशाश्वतफलहेतुत्वात् शाश्वतस्य च प्रतिष्ठा परमं प्राप्यं फलमहमेव । तथा ऐकान्तिकं विषयसङ्गतान्यसुखव्यभिचारिस्वरूपभूतं मोक्षसुखं तस्यापि प्रतिष्ठा पराकाष्ठा अहमेव । एवं निष्कामधर्म्मेण विशुद्धचित्तस्यैकान्तिकसुखेच्छा भवति सेयं शुभेच्छाख्या प्रथमा भूमिः ।" इति । पद्यमिदं ब्रह्मणोऽप्यधिकत्वस्थापनाय स्वेष्टस्य सादरेण वैष्णवाचार्य्यैः सर्व्वत्र परिगृहीतम् । श्रीमच्छङ्करपथानुसारी श्रीमन्मधुसूदनोऽपि पक्षान्तरे तेषामेव सरणिमाश्रित्याह "एतादृशस्य ब्रह्मणो

यस्मादेव वास्तवं स्वरूपं तस्मान्मद्भक्तः संसारान्मुच्यत इति भावः। तथाचोक्तं ब्रह्मणा भगवन्तं श्रीकृष्णं प्रति—'एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयं ज्योतिरनन्त आद्यः। नित्योऽक्षयोऽजस्रसुखो निरञ्जनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः' इति। अत्र सर्व्वोपाधिशून्य आत्मा ब्रह्म त्वमित्यर्थः। शुकेनापि स्तुतिमन्तरेणैवोक्तम् —'सर्व्वेषामेव वस्तूनां भावार्थो भवति स्थितः। तस्यापि भगवान् कृष्णः किमतद्वस्तु रूप्यताम्॥' इति। सर्व्वेषामेव कार्य्यवस्तूनां भावार्थः सत्तारूपः परमार्थो भवति कार्य्यकारणे जायमाने सोपाधिके ब्रह्मणि—स्थितः। कारणसत्तातिरिक्ताया कार्य्यसत्ताया अनभ्युपगमात् तस्यापि भगवतः कारणस्य सोपाधिकस्य ब्रह्मणो भावार्थः सत्तारूपोऽर्थः भगवान् कृष्णः सोपाधिकस्य निरुपाधिके कल्पितत्वात्, कल्पितस्य चाधिष्ठानानतिरेकात् भगवतः कृष्णस्य च सर्व्वकल्पनाधिष्ठानत्वेन परमार्थसत्यनिरुपाधिब्रह्मरूपत्वात्, अतः किमतद्वस्तु तस्मात् श्रीकृष्णादन्यद्वस्तु पारमार्थिकं किं निरूप्यतां, तदेवैकं वस्तु पारमार्थिकं नान्यत् किमपीत्यर्थः, तदेतदिहाप्युक्तं ब्रह्मणो हि प्रतिष्ठाहमिति" इति। अध्यायारम्भे "मम योनिर्महद्ब्रह्म" इत्युक्तत्वादुपसंहारे स एव ब्रह्मशब्द इति सरलं पन्थानमनुसृत्य 'ब्रह्मणः प्रकृतेः' इत्यर्थोऽस्माभिर्निष्पन्नः। अहन्तु सर्व्वत्रैव सर्व्वान्तर्यामित्वेन शास्त्रेषु गृह्यत इति नास्ति प्रयोजनमर्थान्तरसाधने।

अर्थसंग्रहः श्रीमद्गिरिणा—"अनेनाध्यायेन क्षेत्रक्षेत्रज्ञसंयोगस्य संसारकारणत्वं पञ्चप्रश्ननिरूपणद्वारेण च सम्यग्ज्ञानस्य सकलसंसारनिवर्त्तकत्वमित्येतदुपपादयता मुमुक्षोः यत्नसाध्यं गुणैरचाल्यत्वादि मुक्तस्यायत्नसिद्धं लक्षणमिति निर्द्धारितम्" इति; श्रीमद्बलदेवेन—'संसारो गुणयोगः स्यात् विमोक्षस्तु गुणात्ययः। तत्सिद्धिर्हरिभक्त्यै वेत्येतदुक्तं चतुर्दशात्॥" इति; श्रीमद्विश्वनाथेन—"अनर्थ एव त्रैगुण्यं निस्त्रैगुण्यं कृतार्थता। तच्च भक्त्यैव भवतीत्यध्यायार्थो निरूपितः॥"

इति ; यद्वैतपथाश्रयिणा श्रीमता भरतरिणा—"यः शैवमः पुरा प्रोक्तो गुणातीतः स एव हि । पुरुषोत्तम इत्युक्त एवमैक्यं सुरक्षितम् ॥" इति । २७ ।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये चतुर्दशोऽध्यायः ।

पञ्चदशोऽध्यायः।

श्रीभगवानुवाच—

ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥

अतीताध्याये गुणानां बन्धकारणत्वं तन्मोक्षोपायश्चानन्यभक्तियोगमुक्त्वा स्वस्वरूपमाहात्म्यान्तर्यामिणः सङ्क्षेपेणाचार्य्यः। अधुना तदेव विस्पष्टयितुमध्यायोऽयमारभ्यते। विना वैराग्यमात्मज्ञानञ्च चित्तस्य संसारवैमुख्येनेश्वरमुखीनता न सम्भवति अतएव तत्पूर्व्वकमेव प्रस्तुतस्यावतारणोर्द्ध्वमूलमित्यादिना। अत्र श्रीमच्छङ्करः—"यस्मान्मदधीनं कर्म्मिणां कर्म्मफलं, ज्ञानिनाञ्च ज्ञानयोग्यधर्म्मप्राप्यं सुखञ्च ज्ञानफलम्, अतो भक्तियोगेन मां ये सेवन्ते मत्प्रसादात् ज्ञानप्राप्तिक्रमेण गुणातीता मोक्षं गच्छन्ति किमु वक्तव्यमात्मनस्तत्त्वं सम्यक् विजानन्त इति। अतो भगवानर्ज्जुनेनापृष्टमप्यात्मनस्तत्त्वं विवक्षुरुवाच ऊर्द्ध्वमूलमित्यादि। तत्र तावद्वृक्षरूपकल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति विरक्तस्य हि संसारात् भगवत्तत्त्वज्ञानेऽधिकारो नान्यस्य" इति; श्रीमद्रामानुजः—"क्षेत्राध्याये क्षेत्रक्षेत्रज्ञभूतयोः प्रकृतिपुरुषयोः स्वरूपं विशोध्य विशुद्धस्यापरिच्छिन्नज्ञानैकाकारस्य पुरुषस्यैव प्राकृतगुणसङ्गप्रवाहनिमित्तो देवाद्याकारपरिणतप्रकृतिसम्बन्धोऽनादिरित्युक्तम्। अनन्तरे चाध्याये पुरुषस्य कार्य्यकारणोभयावस्थप्रकृतिसम्बन्धो गुणसङ्गमूलो भगवतैव कृत इत्युक्त्वा गुणसङ्गप्रकारं सविस्तरं प्रतिपाद्य गुणसङ्गनिवृत्तिपूर्व्वकात्मयाथात्म्यावाप्तिश्च भगवद्भक्तिमूलेत्युक्तम्। इदानीं भजनीयस्य भगवतः क्षराक्षरात्मकबद्धमुक्तविभूतियुक्तात् विभूतिभूतात् क्षराक्षरपुरुषद्वयात् निखिलहेयप्रत्यनीककल्याणैकतानतयात्यन्तोत्कर्षरूपेण विसजातीयस्य पुरुषोत्तमत्वञ्च वक्तुमारभते। तत्र तावदसंशय-

रूपकस्त्वच्छिन्नसंस्थामश्वत्थविभूतिञ्च वक्तुं छेद्यरूपं वृक्षाकारेण वितत-
मचित्परिणामविशेषमश्वत्थवृक्षाकारं कल्पयन् श्रीभगवानुवाच" इति ;
श्रीमन्माध्व:—"संसारस्वरूपतदत्ययोपायविज्ञानान्यस्मिन्नध्याये दर्श-
यति" इति ; श्रीमच्छ्रीधर: —"वैराग्येण विना ज्ञानं न च भक्तिरत:
स्फुटम् । वैराग्योपस्कृतं ज्ञानमीश: पञ्चदशेऽदिशत् ॥ पूर्व्वाध्याये
'माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते' इत्यादिना परमेश्वरमेकान्त-
भक्त्या भजतस्तत्प्रसादलब्धज्ञानेन ब्रह्मभावो भवतीत्युक्तम् । न चैकान्त-
भक्तिर्ज्ञानं वा अविरक्तस्य सम्भवतीति वैराग्यपूर्व्वकं ज्ञानमुपदेष्टुकाम:
प्रथमन्तावत् सार्द्धश्लोकाभ्यां संसारस्वरूपं वृक्षं रूपकालङ्कारेण वर्णयन्
श्रीभगवानुवाच" इति ; श्रीमद्बलदेव:—"पूर्व्वत्र विज्ञानानन्दस्योत्प-
त्तिकगुणाष्टकस्यापि जीवस्य कर्म्मरूपानादिवासनानुगुणेन भगवत्सङ्क-
ल्पेन प्रकृतिगुणसङ्ग:, स च बहुविधस्तदत्ययश्च भगवद्भक्तिशिरस्केन विवे-
कज्ञानेन भवेत् ; तस्मिंश्च सति सम्प्राप्तनिजस्वरूपो जीवो भगवत्स-
माश्रित्य प्रमोदी सर्व्वदा तस्मिंस्तिष्ठतीत्युक्तम् । अथ तद्विवेकज्ञान-
स्थैर्य्यकरं वैराग्यं जीवस्य भजनीयभगवदंशत्वं भगवत: स्वेतरसर्व्वोत्त-
मत्वं चोक्तैश्वर्य्योपयोगाय पञ्चदशेऽस्मिन् वर्ण्यते । तत्र तावद्गुणविर-
चितस्य संसारस्य वैराग्यवैच्छेद्यत्वात् संसारं वृक्षत्वेन वैराग्यञ्च शस्त्रत्वेन
रूपयन् वर्णयति भगवान्" इति ; श्रीमन्मधुसूदन:—"पूर्व्वाध्याये
भगवता बन्धहेतून् गुणान् व्याख्याय तेषामत्ययेन ब्रह्मभावो मोक्षो
मद्भजनेन लभ्य इत्युक्तम्—'माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥' इति । तत्र मनुष्यस्य
तव भक्तियोगेन कथं ब्रह्मभाव इत्याशङ्कायां स्वस्य ब्रह्मरूपताज्ञापनाय
सूत्रभूतोऽयं श्लोको भगवतोक्तो—'ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्य-
यस्य च । शाश्वतस्य च धर्म्मस्य सुखस्यैकान्तिकस्य च ॥' इति ।
अस्य सूत्रस्य वृत्तिस्थानीयोऽयं पञ्चदशोऽध्याय आरभ्यते । भगवत:
श्रीकृष्णस्य हि तत्त्वं ज्ञात्वा तत्प्रेमभजनेन गुणातीत: सन् ब्रह्मभावं
कथमाप्नुयाल्लोक इति तत्र 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यादिना भगव-

इत्थमसौ कथं मम तुल्यो मनुष्योऽयं कथमेवं वदतीति विस्मयाविष्टं भयाद्वज्ञया च किञ्चिदपि प्रष्टुमशक्नुवन्तमर्ज्जुनमालक्ष्य कृपया स्वस्वरूपं विवक्षुः श्रीभगवानुवाच" इति ; श्रीमन्नीलकण्ठः —"पूर्व्वाध्यायान्ते सुखस्यैकान्तिकस्य प्रतिष्ठा परा काष्ठाहमित्युक्तं, तत्र किंलक्षणं तत्सुखं, केन वा प्राप्तं, केन वा साधनेनासावरणभङ्गः, केन वाधिकारिणा तत्प्राप्यमित्यादि वर्णयितुं पञ्चदशोऽध्याय आरभ्यते" इति ; श्रीमद्विश्वनाथः—"पूर्व्वाध्याये 'माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥' इत्युक्तम् । तत्र तव मनुष्यस्य भक्तियोगेन कथं ब्रह्मभाव इति चेत् सत्यम् । अहं मनुष्य एव किन्तु ब्रह्मणोऽपि तस्य प्रतिष्ठा परमाश्रय इत्यस्य स्वरूपस्य व्यक्त्याख्यानीयोऽयं पञ्चदशाध्याय आरभ्यते" इति । प्रथमन्तावत् संसारस्य स्वरूपमाह रूपकेणोर्द्ध्वमूलमिति । ऊर्द्ध्वं सर्व्वातीतं ब्रह्म तदेव मूलं कारणमस्येति ऊर्द्ध्वमूलम्—कालतः सूक्ष्मत्वात् कारणत्वात् नित्यत्वात् महत्त्वाच्चोर्द्ध्वमुच्यते ब्रह्म अव्यक्तमायाशक्तिमत् तन्मूलमस्येति श्रीमच्छङ्करः, सर्व्वलोकोपरिनिविष्टचतुर्मुखादित्वेन तस्योर्द्ध्वमूलत्वमिति श्रीमद्रामानुजः, ऊर्द्ध्वो विष्णुः, ऊर्द्ध्वम् उत्तम इति श्रीमन्माध्वः, ऊर्द्ध्वमुत्तमः क्षराक्षराभ्यामुत्कृष्टः पुरुषोत्तमो मूलं यस्येति श्रीमच्छ्रीधरः, ऊर्द्ध्वं सर्व्वोपरि सत्यलोके प्रधानबीजोत्थप्रथमप्ररोहरूपमहत्तत्त्वात्मकचतुर्मुखरूपं मूलं यस्येति श्रीमद्बलदेवविश्वनाथौ, ऊर्द्ध्वमुत्कृष्टं मूलं कारणं स्वप्रकाशपरमानन्दरूपत्वेन च ब्रह्म, अथवा ऊर्द्ध्वं सर्व्वदा सावबाधेऽप्यबाधितं सर्व्वसंसारभ्रमाधिष्ठानं ब्रह्म तदेव मायया मूलमस्येति श्रीमन्मधुसूदनः, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इति श्रुतिप्रसिद्धं मानुषानन्दमारभ्योत्तरोत्तरशतगुणवृद्ध्यानन्दसोपानपङ्क्तिरूपपरिच्छिन्नं परमानन्दाद्वयं वस्तु ऊर्द्ध्वं तदेव मूलं मूलकारणमस्येति श्रीमन्नीलकण्ठः—अधःशाखम् अधः अर्व्वाञ्चो महाभूताद्याः शाखा इव यस्य तं —महदहङ्कारतन्मात्रादयः शाखा इवास्याधो भवन्तीति सोऽयमधःशाखस्तमिति श्रीमच्छङ्करः, पृथिवीनिवासिसकलनर-

अधश्चोर्द्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः ।

पशुमृगपक्षिकृमिकीटपतङ्गस्थावरान्ततयाधःशाखत्वमिति श्रीमद्रामानुजः, अध इति ततोऽर्व्वाचीनाः कार्य्योपाधयो हिरण्यगर्भादयो गृह्यन्ते तं तु शाखा इव शाखा यस्य तम् इति श्रीमच्छ्रीधरमधुसूदनौ, अधः सत्यलोकादर्व्वाचीनेषु स्वर्भुवर्भूर्लोकेषु देवगन्धर्व्वकिन्नरासुरयक्षराक्षसमनुष्यपशुकीटपतङ्गस्थावरान्ता नानादिक्प्रसृतत्वात् शाखा यस्य तमिति श्रीमद्बलदेवविश्वनाथौ, ऊर्द्ध्वादधःसोपानस्थानीयाः शाखा इव शाखा अव्यक्तमहदहङ्कारपञ्चतन्मात्रषोडशविकारहिरण्यगर्भविराट्प्रजापतिसुरगन्धर्व्वासुरनरतिर्य्यक्स्थावररूपा यस्य सोऽधःशाखस्तमिति श्रीमन्नीलकण्ठः -अश्वत्थं वटाद्यपेक्षया न श्वःस्थिरं तिष्ठतीत्यश्वत्थः वृक्षविशेषस्तं, संसारपक्षे न श्वोऽपि स्थातुं योग्यम्, अथ च अव्ययं सनातनं प्रवाहक्रमेण स्थायिनं प्राहुर्वेदविद इति शेषः । यस्य संसारवृक्षस्य पर्णानि पत्राणीव पर्णानि छन्दांसि ऋग्यजुःसामलक्षणानि धर्म्माधर्म्मप्रतिपादनेन संसाररक्षकाणि, यस्तं संसारवृक्षं जानाति स वेदवित् वेदार्थज्ञाता । संसारस्य मूलं ब्रह्म वेदस्य च, अतएव तयोरेकत्र सन्निवेशः । अतएवाह श्रुतिः "ऊर्द्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्व्वे तदु नात्येति कश्चन ॥ एतद्वै तत् ।" (काठ, ६।१) इति । "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्व्वेदोऽथर्व्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यान्यस्यैवैतानि सर्व्वाणि निश्वसितानि ।" (वृ, आ, उ, ४।४।१०) इति । तथाच विष्णुपुराणम् —"स भिद्यते वेदमयः स वेदं करोति भेदैर्बहुभिः सशाखम् । शाखाप्रणेता स समस्तशाखा ज्ञानस्वरूपो भगवाननन्तः ॥" (३अं, ३अ, २०श्लो) इति । १ ।

तस्यैव संसारवृक्षस्यापरावयवकल्पनोच्यते अधश्चेति । गुणप्रवृद्धा

अधश्च मूलान्यनुसन्ततानि
कर्म्मानुबन्धीनि मनुष्यलोके ॥२॥
न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च सम्प्रतिष्ठा।
अश्वत्थमेनं सुविरूढमूल-
मसङ्गशस्त्रेण दृढेन छित्त्वा ॥३॥
ततः पदं तत् परिमार्गितव्यं
यस्मिन् गता न निवर्त्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥

गुणैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीभूताः, विषयप्रवालाः विषयाः शब्दादय एव प्रवालाः पल्लवा इव यासां ताः, तस्य संसारवृक्षस्य शाखाः मनुष्यपश्वादिरूपाः, नीचगत्या अधश्च उत्कृष्टगत्या ऊर्द्धञ्च प्रसृताः। मनुष्यलोके मर्त्त्यलोके कर्म्मानुबन्धीनि कर्म्मैव अनुबन्धः पश्चाद्भावो येषां तानि—वासनाभ्यः कर्म्माणि कर्म्मभ्यः वासना इत्यनवरतरूपाणि अधश्च चात् ऊर्द्ध्वञ्च अनुसन्ततानि विस्तृतानि मूलानि जटोपजटावृन्दानि। २।

अस्य वृक्षस्यानुपलभ्यमानस्वरूपमुक्त्वा तच्छेदनेन संसारगतिनिरासमाह द्वाभ्यां न रूपमिति, तत इति। अस्य संसारवृक्षस्य रूपम् इह अत्र यथा वर्णितं न तथा उपलभ्यते उपलब्धिगोचरं भवति, निखिलजगज्जीवानामेकत्रोपलब्धेरसम्भवत्वात्; अस्य संसारस्य न अन्तः न चादिः, अनाद्यनन्तब्रह्ममूलत्वात्; न च सम्प्रतिष्ठा न च स्थितिः, कथं तिष्ठतीति नोपलभ्यते मूले दृष्टेरभावात्। अतः सुविरूढमूलं बद्धमूलमेनमश्वत्थं संसारवृक्षम् असङ्गशस्त्रेण अनासक्तिशस्त्रेण वैराग्येण छित्त्वा पृथक्कृत्य, ततः तदनन्तरं यतः पुराणी चिरन्तनी प्रवृत्तिर्जग-

निर्म्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत् ॥५॥

न तद्भासयते सूर्य्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम ॥६॥

प्रवृत्तिः प्रसृता विस्तृता, तमेव च आद्यं पुरुषं प्रपद्ये शरणं व्रजामि इत्येवं तत्पदं स्थानं परिमार्गितव्यम् अन्वेष्टव्यम्, यस्मिन् गता भूयः पुनरपि न निवर्त्तन्ति, संसारगतिं न प्राप्नुवन्ति, "एषोऽस्य परमो लोकः" इति न्यायेन तस्मिन् परब्रह्मण्येव निवसन्ति । ३।४ ।

के पुनस्तत्स्थानं प्राप्नुवन्ति तदाह निर्म्मानेति । निर्म्मानमोहा मानो दर्पः मोहो मिथ्याभिनिवेशः तद्रहिताः, जितसङ्गदोषाः सङ्गः विषयेष्वासक्तिः स एव दोषो जितो यैस्ते, अध्यात्मनित्याः अध्यात्मम् आत्म-परमात्मविषयकमालोचनं तस्मिन् नित्यास्तत्पराः, निवृत्तकामाः विशेषतो निवृत्ताः कामा येषां ते, सुखदुःखसंज्ञैर्द्वन्द्वैर्विमुक्तास्तत्सहिष्णवः, अमूढाः ज्ञानवन्तः, तत् अव्ययं चिरन्तनं शाश्वतं पदं स्थानं गच्छन्ति प्राप्नुवन्ति । ५ ।

तत्पदं विशिनष्टि न तदिति । न तत्पदं सूर्य्यो भासयते, न शशाङ्कः चन्द्रः, न पावकोऽग्निः, यत्पदं गत्वा न निवर्त्तन्ते संसारगतिं न प्राप्नुवन्ति तत् मम परमं धाम लोकः—वैष्णवपदमिति श्रीमच्छङ्करः, परमं ज्योतिः मम मद्विभूतिभूतो ममांश इति श्रीमद्रामानुजः ; स्वरूपं परममिति श्रीमच्छ्रीधरबलदेवौ, स्वरूपात्मकं पदमिति श्रीमन्मधुसूदनः, तत् मम परमं धाम हस्तिरूपस्थानादवमात् अन्यज्योतिषिम्मातं, ममेति सम्बन्धो राहोः शिर इतिवदुपचारात् मदभिन्नं ज्योतिः स्वयम्प्रकाशमिति श्रीमन्नीलकण्ठः, सर्व्वोत्कृष्टमजडमतो-

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥

न्द्रियं तेजः सर्व्वप्रकाशकमिति श्रीमद्विश्वनाथः। वस्तुतस्तु 'एषोऽस्य परमो लोकः' इति न्यायात् "न तत्र सूर्य्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ॥" (कठ, ५।१५) इति सर्व्वावभासकं परमं ब्रह्मैव मम धामेत्यनेन व्यज्यते। यदुद्धृतं हरिवंशवचनं श्रीमता विश्वनाथेन "तत्परं परमं ब्रह्म सर्व्वं विभजते जगत्। ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ॥" इति; तत्तु "ब्रह्मणो हि प्रतिष्ठाऽहम्" इति न्यायात् महतो महत् ब्रह्म चिच्छक्तिमेवाभिप्रेत्योक्तमिति ज्ञेयम्। ६।

कोऽयं जीवः यस्य संसारबन्धमोचनं भविष्यति कुतो वास्य संसारेण सम्बन्धो जायते तदाह ममेति। जीवलोके सनातनो नियतैकरूपः ममान्तर्यामिण एव अंशः अंश इव अंशः—"ह्यांशो" इति वचनात् परिमितचित्खण्डः जीवभूतः। अतएवाह श्रुतिः—"यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥" (मु, उ, २।१।१) इति। तथाच वृहदारण्यके—"स यथोर्णनाभिस्तन्तुनोच्चरेत् यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्व्वे प्राणाः सर्व्वे लोकाः सर्व्वे देवाः सर्व्वाणि भूतानि व्युच्चरन्ति" (वृ, आ, उ, ४।१।२०) इति। 'सर्व्वे प्राणाः' इत्यत्र 'सर्व्व एत आत्मानः' इति श्रीमन्नीलकण्ठधृतः पाठः। नैषोऽसमञ्जसः "अस्मिन्नात्मनि सर्व्वाणि भूतानि सर्व्व एत आत्मानः समर्पिताः" (वृ, आ, ५।१५) इति तत्रैवोक्तत्वात्। अयं जीवभूतः परिमितचित्खण्डः प्रकृतिस्थानि प्रकृतिविलीनानि मनःषष्ठानि मन एव षष्ठं येषां तानि इन्द्रियाणि पञ्च ज्ञानेन्द्रियाणि कर्षति आकर्षति प्रकृतेर्गृह्णाति। दर्शनश्रवणरसनघ्राणस्पर्शनशक्तयो ज्ञानात्मिकाः प्रकृतिसंसर्गादेव प्रस्फुरन्ति, कर्णशष्कुल्यादौ च स्वस्वक्रिया

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥८॥

श्रोत्रं चक्षुः स्पर्शनञ्च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥

अभिव्यञ्जन्ति, तत एव कर्म्मेन्द्रियाणां वाक्पाण्यादीनां क्रियाप्रवृत्ति-रिति न तेषामत्र स्वतन्त्रोल्लेखः । ७ ।

तान्याकृष्य किं करोतीत्याह शरीरमिति । यत् यदा ईश्वरः शरीरस्य स्वामी शरीरी शरीरमाप्नोति गृह्णाति यत् यदा च अपि उत्क्रामति शरीराद्बहिर्निर्गच्छति, आशयात् कुसुमादेर्वायुर्गन्धानिव एतानि मनःषष्ठानीन्द्रियाणि गृहीत्वा संयाति । मन इत्यनुक्त्वा मनः-षष्ठानीति यदुच्यते तेन मनस्येव साक्षाद्ज्ञानेन्द्रियाणामन्तर्भावो लक्ष्यते —"न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते," "मनसा ह्येव पश्यति मनसा शृणोति" इत्यादिन्यायात् । ८ ।

मनःषष्ठानि ज्ञानेन्द्रियाण्यधिष्ठाय विषयान् भुङ्क्ते जीव इत्याह श्रोत्रञ्चेति । अयं जीवः श्रोत्रं, चक्षुः, स्पर्शनं त्वगिन्द्रियञ्च, रसनं रसनां, घ्राणमेव च मनश्च अधिष्ठाय विषयान् शब्दादीनुपसेवते उप-भुङ्क्ते । ९ ।

तं जीवं विद्वांस एव पश्यन्ति न तु मूढा इत्याह उत्क्रामन्तमिति । उत्क्रामन्तं देहाद्बहिर्निर्गच्छन्तं, स्थितं वापि देहे, भुञ्जानं विषयान् वा, गुणान्वितं चैतन्यगुणयुक्तम्—सुखदुःखमोहाद्यैर्गुणैरन्वितमनुगत-मिति श्रीमच्छङ्करः, सत्त्वादिगुणमयप्रकृतिपरिणामविशेषमनुष्यत्वादि-संस्थानपिण्डसंसृष्टमिति श्रीमद्रामानुजः, इन्द्रियादियुक्तमिति श्रीम-च्छ्रीधरः,—जीवं विमूढा नानुपश्यन्ति अपरोक्षज्ञानविषयं न कुर्व्वन्ति,

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१२॥

गामाविश्य च भूतानि धारयाम्यहमोजसा।
पुष्णामि चौषधीः सर्व्वाः सोमो भूत्वा रसात्मकः ॥१३

ज्ञानचक्षुषो विद्वांसो विवेकिनः पश्यन्ति प्रत्यक्षीकुर्व्वन्ति। अविवेकिनो हि शरीरादात्मानं विवेक्तुं न शक्नुवन्ति, ये पुनः साधनैः लब्धविवेक-दृष्टयः, ते तं शरीरादिविविक्तमुपलभन्ते। १०।

विना प्रयत्नं न तं पश्यन्तीत्याह यतन्त इति। यतन्तो यत-मानाः यत्नं कुर्व्वन्तो योगिनो योगं युञ्जाना आत्मनि मनसि आस्थि-तमेनं जीवं पश्यन्ति, यतन्तोऽपि यत्नं कुर्व्वन्तोऽपि अकृतात्मानः असंस्कृतात्मानः दुश्चरितादविरताः अचेतसोऽविवेकिनो नैनं जीवं पश्यन्ति। अत्र श्रुतिः—"नाविरतो दुश्चरितान्नाशान्तो नासमा-हितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥" (कठ, २।२४) इति। ११।

"न तद्भासयते सूर्य्यः" इत्यादिना परमात्मनो जगदतीतत्वमुक्तमि-धुना तद्गतत्वं प्रदर्शयितुमाह यदिति चतुर्भिः। आदित्यगतं यत् तेजः अखिलं जगत् भासयते प्रकाशयति, यच्च तेजश्चन्द्रमसि चन्द्रे, यच्च तेजोऽग्नौ, तत् मामकं मदीयं तेजो विद्धि जानीहि। सूर्य्यालोकेन प्रकाशमानान् विविधान् मर्त्यलोकानभिप्रेत्याह 'अखिलं जगत् भास-यत आदित्य' इति। येषु न सूर्य्यालोकस्य प्रचारस्ते पुनर्लोकाश्चिन्मया अपुनरावर्त्तिनः साक्षाद्भगवत्स्वरूपाविर्भावाभिविष्टचेतोभिरापूर्णा इति तत्त्वम्। १२।

गामिति। अहं गां पृथिवीमाविश्य च ओजसा बलेन भूतानि

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्व्विधम् ॥१४॥

सर्व्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनञ्च।
वेदैश्च सर्व्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ॥१५॥

धारयामि, रसात्मकः रसमयः सोमो भूत्वा सर्व्वा ओषधीः पुष्णामि संवर्द्धयामि च। १३।

अहमिति। अहं वैश्वानरो जठराग्निर्भूत्वा प्राणिनां देहमाश्रितः प्राणापानसमायुक्तः प्राणापानाभ्यां तदग्न्युद्दीपकाभ्यां सहितं भक्ष्यं भोज्यं लेह्यं चोष्यमिति चतुर्व्विधमन्नं पचामि। "यद्दन्तैरवखण्डाावखण्ड्य भक्ष्यतेऽपूपादि तद्भक्ष्यं, यत्तु केवलं जिह्वया विलोड्य निगीर्य्यते पायसादि तद्भोज्यम्, यज्जिह्वायां निक्षिप्य रसास्वादेन क्रमशो निगीर्य्यते द्रवीभूतं गुड़ादि तल्लेह्यम, यत्तु दंष्ट्राभिनिष्पीड्य रसांशं निगीर्य्यावशिष्टं त्यज्यते इक्षुदण्डादि तच्चोष्यम्" इति श्रीमच्छ्रीधरः। भक्ष्यं चर्व्व्यमिति चोच्यते। १४।

सर्व्वान्तर्यामितया सर्व्वस्मिन् स्थितः परात्मेत्याह सर्व्वस्येति। सर्व्वस्य प्राणिजातस्य च हृदि अहं सन्निविष्टः, मत्तः पूर्व्वानुभूतार्थविषया स्मृतिः, ज्ञानं विषयेन्द्रियसम्बन्धघटितम्, अपोहनं तयोः प्रमोषश्च, सर्व्वैर्वेदैश्च अहमेव वेद्यः वेदितव्यः, वेदान्तकृत् तत्सम्प्रदायप्रवर्त्तको ज्ञानदोत्तमः वेदविदेव च वेदार्थविदहमेव। स्मृतेर्ज्ञानस्य च प्रमोषो भवति कथमन्तर्यामित इति जिज्ञासायां नवीनविषयाणां स्मृतिः नवीनज्ञानस्य च सञ्चारः पूर्व्वविषयाणां स्मृतेर्ज्ञानस्य च स्थानमधिकृत्यैवोदेतीति अपोहनमपसारणमपि तत्कार्य्यमेव। "अस्य महतो भूतस्य निश्वसितम्" इत्याद्यया वेदवेदान्तसूत्रव्याख्यानादीनि सर्व्वाणि परमात्मसम्भूतानीति ज्ञेयम्। १५।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।

क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥

एवं सङ्क्षेपेण विभूतिं सर्व्वान्तर्यामित्वञ्चोक्त्वा पुरुषत्रयनिर्णयेन सर्व्ववेदान्ततात्पर्य्यं विवृणोति द्वाविमाविति। लोके संसारे क्षरश्च अक्षर एव इमौ द्वौ पुरुषौ, कौ वा क्षरः, को वाऽक्षरस्तदाह सर्व्वाणि भूतानि क्षरः; कूटस्थो नित्योऽविकारी अक्षर उच्यते। दृश्यते हि वेदान्तेषु,—अधिभूतम, अध्यात्मम्, अधिदैवतमिति त्रिविधो भेदः। तथाहि बृहदारण्यके (४।३) मूर्त्तञ्चामूर्त्तञ्च ब्रह्मणो रूपद्वयमुक्त्वा मूर्त्तस्य क्षित्यप्तेजोरूपस्यादित्यम् अमूर्त्तस्य च वाय्वन्तरिक्षरूपस्य तन्मण्डलगत-पुरुषं देवत्वेनाह। एते मूर्त्तामूर्त्तरूपे पुनरधिभूतान्तर्गते। अध्यात्मं पु-मूर्त्तं चक्षुः, अमूर्त्तं प्राणः, अधिदैवतं तत्र पुरुष एव। अतएवा-हाचार्य्यः—"स्वभावोऽध्यात्ममुच्यते" (८।३), "अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्" (८।४) इति। व्याख्यातञ्च प्राक्—'स्वभावः स्वो भावः स्वरूपमध्यात्मम्, प्रकृतिसंसर्गवशाद्देहे भोक्तृत्वेन प्रकाशमानमात्म-स्वरूपम्', 'क्षरतीति क्षरो विनाशी भावो जनिमद्वस्त्वित्यर्थः। अधि-भूतं प्राणिजातमधिकृत्य भवतीत्यधिभूतम्।' 'पुरुषः समष्टिविराट् अधिदैवतमग्न्यादित्यादिदेवानधिकृत्य चक्षुरादिकरणान्यनुगृह्णातीत्य-धिदैवतम्।' अत्र पद्ये पुनरेतस्यैव तत्त्वस्य नवीनतरनियोगः प्रदर्श्यते; —क्षरः पुरुषः जनिमद्वस्तुसंसर्गी, अतएव शरीराभिनिवेशवान् बद्धो जीवः, अक्षरः शरीरानपेक्षो स्वस्वरूपे वर्त्तमानो मुक्तो जीवः। आह च श्रीमद्रामानुजः—"तत्र क्षरशब्दनिर्द्दिष्टः पुरुषो जीवशब्दाभिलप-नीयो ब्रह्मादिस्तम्बपर्य्यन्तक्षरणस्वभावाचित्संसृष्टसर्व्वभूतानि। अत्रा-चित्संसर्गैकोपाधिना पुरुष इत्येकत्वनिर्द्देशः। अक्षरशब्दनिर्द्दिष्टः कूटस्थोऽचित्संसर्गवियुक्तः स्वेन रूपेणावस्थितो मुक्तात्मा। स त्वचित्सं-सर्गाभावात् अचित्परिणामविशेषब्रह्मादिदेहसाधारणो न भवतीति कूटस्थ इत्युच्यते। अत्राप्येकत्वनिर्द्देशोऽचिद्वियोगरूपैकोपाधिनाभि-

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः ॥१७॥

स्थितः" इति । श्रीमच्छङ्करस्त्वन्यथा व्याचष्टे—"क्षरश्च क्षरतीति क्षरो विनाश्येको राशिः, अपरः पुरुषोऽक्षरस्तद्विपरीतो भगवतो मायाशक्तिः क्षराख्यस्य पुरुषस्योत्पत्तिबीजमनेकसंसारिजन्तुकामकर्मादिसंस्काराश्रयोऽक्षरः पुरुष उच्यते । कौ तौ पुरुषावित्याह स्वयमेव भगवान्, क्षरः सर्वाणि भूतानि समस्तं विकारजातमित्यर्थः ; कूटस्थः कूटो राशिरिव स्थितः, अथवा ······ अनेकमायावञ्चनादिप्रकारेण स्थितः कूटस्थः संसारबीजानन्त्यान्न क्षरतीत्यक्षर उच्यते" इति । श्रीमन्मधुसूदनः श्रीमच्छङ्करमेवानुसृतवान् । श्रीमन्नीलकण्ठस्त्वाह—"क्षरो विनाशी स च सर्वाणि भूतानि प्राणवन्ति कर्मक्षये सुषुप्तिप्रलयकैवल्यादौ उपाधिनाशेन सह विनाशशीलो जीवो ब्रह्मप्रतिबिम्बभूतो जलार्कोपमः—'विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' इति श्रुतेः । कूटस्थो निर्विकारो मायोपाधिरक्षरः, तदुपाधेरकर्मजत्वेन नाशासम्भवात् उपाधिदोषेणावशीकृतत्वाच्चासौ न क्षरति स्वरूपान्न च्यवत इत्यक्षरः" इति । श्रीमच्छ्रीधर आह—"क्षरः पुरुषो नाम सर्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि, अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः । कूटो राशिः शिलाराशिः पर्वत इव देहेषु नश्यत्स्वपि निर्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स त्वक्षरः पुरुष उच्यते विवेकिभिः" इति । श्रीमद्बलदेवः श्रीमद्रामानुजमेवानुसृतवान् । श्रीमद्विश्वनाथस्त्वाह—"क्षरः स्वस्वरूपात् क्षरति विच्युतो भवतीति क्षरो जीवः, स्वस्वरूपान्न क्षरतीत्यक्षरो ब्रह्मैव" इति । १६ ।

एवं पुरुषद्वयमुक्त्वा नियन्तारं तृतीयं पुरुषमाह उत्तम इति । अन्यः क्षराक्षराभ्यां पुरुषाभ्यां विलक्षणः उत्तमः पुरुषः शास्त्रेष्वपरोक्षभावेनाहमिति शब्दवाच्यः परमात्मा—आत्मत्वेन क्षरात् परमत्वेनाक्षरात् विलक्षणः—इति उदाहृतः कथितः श्रुतिभिः, तद्यथा— [illegible]-

मेतत् परमन्तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाऽक्षरञ्च । अत्रान्तरं ब्रह्मविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ॥ संयुक्तमेतत् क्षरमक्षरञ्च व्यक्ताव्यक्तं भरते विश्वमीशः । अनीशश्चात्मा बुध्यते भोक्तृभावात् ज्ञात्वा देवं मुच्यते सर्व्वपाशैः ॥ ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता । अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत् ॥" (श्वे, उ, १।७—९) इति । य ईश्वर ईशनशील: अथापि अव्ययो निर्व्विकार: वैषम्यादिदोषशून्य: स लोकत्रयमाविश्य बिभर्त्ति पालयति । न खलूपनिषत्सु परमात्मेति विशेषाभिख्या ब्रह्मणो दृश्यते । एकस्यां प्रश्नोपनिषदि सुषुप्तौ पुरुषस्य परे आत्मनि स्थितिरभिहितास्ति । तद्यथा—"स यथा सोम्य वयांसि वासो वृक्षं सम्प्रतिष्ठन्ते, एवं ह वै तत्सर्व्वं पर आत्मनि सम्प्रतिष्ठते ।" (प्र, उ, (४'७) ; "एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष: । स परेऽक्षरे आत्मनि सम्प्रतिष्ठते ।" (प्र, उ, ४।९) इति । एष पुनरुपनिषदन्तरे प्राज्ञ इत्यभिख्ययाभिहित:— "सुषुप्तस्थान एकीभूत: प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुख: प्राज्ञस्तृतीयपाद: । एष सर्व्वेश्वर एष सर्व्वज्ञ एषोऽन्तर्याम्येष योनि: सर्व्वस्य प्रभवाप्ययौ हि भूतानाम्" (मा, उ, ५।६) इति । अस्मिन् शास्त्रे आत्मा परमात्मेति भेदाभिधानं सांख्यादिष्वस्यान्तर्भावनं वारयति । "एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तम: पुरुष:" (छा, उ, ८।१२।३) इत्यत्र कोऽयमुत्तमपुरुष: ? जीवो वा परमात्मा वा ? "जीवमेव शरीरात् समुत्थितमुत्तमं पुरुषं दर्शयति" इति श्रीमच्छङ्कर:, "प्राप्यस्य परस्य ज्योतिष: पुरुषोत्तमत्वम् । निवृत्ततिरोधानस्य परं ज्योतिरुपसम्पन्नस्य प्रत्यगात्मनो ब्रह्मलोके यथेष्टभोगावाप्ति:" इति श्रीमद्रामानुज: । वस्तुतस्त्वाविर्भूतस्वरूपत्वं ह्यत्र प्रदर्श्यते । अस्या: श्रुतेर्भाष्ये श्रीमच्छङ्कर आह, "स्वेन रूपेणावस्थित: क्षराक्षरौ व्याकृताव्याकृतावपेक्ष्योत्तमपुरुषकृतनिर्व्वचनो ह्ययं गीतासु" इति । १७ ।

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥

परमात्मैव 'उत्तमः पुरुषः' इति नामनिर्व्वचनेन दर्शयति यस्मादिति । यस्मादहमन्तर्यामी क्षरमतीतो देहाभिनिविष्टानां परमात्मवैमुख्यात् तेषामनुभूतिमतिक्रम्य स्थितः, अन्यथा तस्य सर्व्वातीतत्वेऽपि सर्व्वनियन्तृत्वात् सर्व्वगतत्वात् तथा भावः स्यादसमञ्जसम् ; अक्षरात् स्वस्वरूपे विद्यमानात् मुक्तपुरुषादपि उत्तमः । मुक्तस्य यदुत्तमत्वं श्रुतौ प्रसिद्धं तत् परमात्मस्वरूपाविर्भावात्, अतः अक्षरादुत्तमत्वं तस्य । अतः अतएव लोके जनसंसदि वेदे च पुरुषोत्तम इति प्रथितः प्रसिद्धः । वेद इत्यत्र न खल्वृचां ग्रहणं, यतो न तत्र परमात्मनः पुरुषोत्तमस्य वा प्रख्यापनमस्ति । उपनिषत्सु 'स उत्तमः पुरुषः' (छा, उ, ८।१२।३) इत्येकेन वचनेन 'परस्य ज्योतिषः पुरुषोत्तमत्वम्' उक्तम् । पुराणं हि पञ्चमवेदत्वेन श्रुत्या गृहीतम्—"इतिहासपुराणः पञ्चमो वेदानां वेदः" (छा, उ, ७।१।४) इति । तस्मिन् पुनः सर्व्वत्र पुरुषोत्तमत्वेन परात्मा प्रख्यातः । श्रीमद्विश्वनाथः 'कूटस्थोऽक्षरः' इत्यत्र ज्ञानिभिरुपास्यं ब्रह्म, 'परमात्मा' इत्यत्र योगिभिरुपास्यः परमात्मेत्यभिधाय पद्येऽस्मिन् भक्तैरुपास्यं भगवन्तं पुरुषोत्तमं श्रीकृष्णाभिधमाहेत्याह । तेनोक्तमिदं विशेषेण विचार्य्यम् ;—"अत्र यद्यप्येकमेवं सच्चिदानन्दस्वरूपं वस्तु ब्रह्मपरमात्मभगवच्छब्दैरुच्यते, न तु वस्तुतः स्वरूपतः कोऽपि भेदोऽस्ति स्वरूपद्वयाभावादिति प्रथमस्कन्धोक्तेः ; तदपि तत्तदुपासकानां साधनतः फलतश्च भेददर्शनात् भेद इव व्यवह्रियते । तथाहि ब्रह्मपरमात्मभगवदुपासकानां क्रमेण तत्तत्प्राप्तिसाधनं ज्ञानं योगो भक्तिश्च फलञ्च ज्ञानयोगयोर्वस्तुतो मोक्ष एव भक्तेस्तु प्रेमवत् पार्षदत्वञ्च । तत्र भक्त्या विना ज्ञानयोगाभ्यां.........न मोक्ष इति ब्रह्मोपासकैः परमात्मोपासकैः स्वसाध्यफलसिद्ध्यर्थं भगवतो भक्तिरवश्यं कर्त्तव्यैव । भगवदुपासकैस्तु स्वसाध्यफलसिद्ध्यर्थं न ब्रह्मोपासना न

यो मामेवमसम्मूढ़ो जानाति पुरुषोत्तमम् ।
स सर्व्वविद्भजति मां सर्व्वभावेन भारत ॥१९॥

परमात्मोपासना क्रियते·········भगवदुपासनया स्वर्गापवर्गप्रेमादीनि सर्व्वफलान्येव लब्धुं शक्यन्ते ; ब्रह्मपरमात्मोपासनया तु न प्रेमादीनीति अतएव ब्रह्मपरमात्मभ्यां भगवदुत्कर्षः स्वत्वभेदेऽप्युच्यते, यथा तेजस्त्वेना भेदेऽपि ज्योतिर्दीपाग्निपुञ्जेषु मध्ये शीताद्यार्त्तिक्षयादैतोरग्निपुञ्ज एव श्रेष्ठ उच्यते । तत्रापि भगवतः श्रीकृष्णस्य तु परम एवोत्कर्षः, यथा अग्निपुञ्जादपि सूर्य्यस्य ।" इति । अत्र 'न तु वस्तुनः स्वरूपतः कोऽपि भेदोऽस्ति' इत्युक्त्वा भगवतः श्रीकृष्णस्योत्कर्षोक्तिर्ब्रह्मनः परमात्मनो न जातु सिद्ध्यति । साधनतः फलतश्च भेददर्शनात् भेद इति यत्, न न परब्रह्मणि साधकेष्वेव । साधकानां भेदः परब्रह्मण्यारोपो न यु[illegible] युक्तिमार्गमवगाहते । 'उपासकानां साधनतः फलतश्च भेददर्शना[illegible] भेद इव व्यवह्रियते' इत्येवशास्त्रः युक्तिपथमुत्सृज्य कविकल्पनाश्रय[illegible] दर्शयतीति क्षन्तव्यमेतत् । यत्तूक्तं भगवदुपासकैर्न क्रियते ब्रह्मोपास[illegible] परमात्मोपासनेति तत्तु निर्म्मूलम । यतो ब्रह्मणि परमात्मनि भगव[illegible] वस्तुतः स्वरूपतो नास्ति कोऽपि भेदः, व्यापित्वेन बृहत्त्वेन भगवत[illegible] ऽस्यैव ग्रहणाच्च । तत्त्वमुक्तं द्वादशे चतुर्थश्लोके । तत्राप्याचार्य्यः पर-मात्मनोऽप्युत्कर्षं प्रदर्शयितुं श्लोकमिममवतारयेत्, 'अक्षरादपि' इत्य-स्यानन्तरं परमात्मन इति स्पष्टं न्यस्येत् ; न पुनः 'उत्तमः पुरुषः' इत्यतः पुरुषोत्तम इति निर्व्वच्यात् । १८ ।

परमात्मानं पुरुषोत्तमत्वेन जानन् तमेव ज्ञानेन कर्म्मणा भक्त्या च भजति साधक इत्याह य इति । असम्मूढ़ः सम्मोहवर्ज्जित इति श्रीमच्छङ्करः, देहादिष्वात्मीयबुद्ध्या विरहित इति श्रीमद्गिरिः, निश्चि-तमतिरिति श्रीमच्छ्रीधरः, पुरुषोत्तमत्वे संशयरहित इति श्रीम-द्बलदेवः, वादिनां वादैरप्रासम्मोह इति श्रीमद्विश्वनाथः—राग-द्वेषादिप्रयुक्तमोहविमुक्तः सन् यो जनः मां सर्व्वान्तर्यामिणम् एवं

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥२०॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ।

निरुक्तप्रकारेण पुरुषोत्तमं जानाति, स सर्व्ववित् सर्व्वतत्त्वज्ञः सर्व्वभावेन सर्व्वविधभजनप्रकारेण, हे भारत, मां भजति । सांख्ये प्रकृतिपुरुषौ न तु पुरुषोत्तमः, योगे ज्ञानद ईश्वरो न तु त्रिभुवनभर्त्ता, निर्गुणवादे न त्वीश्वर ईशनशीलः, सगुणवादे न त्वव्ययो निर्व्विकारः ; यस्तु पुनरेतच्छास्त्रनिरुक्तं पुरुषोत्तमं जानाति, स वादानामेतेषां सकलतत्त्वज्ञो भवति । अतः सर्व्वविदिति विशेषणं निखिलमार्गदिष्टज्ञानवत्तां तस्य दर्शयति । भिन्नानां वादिनां भगवदाराधनाविधिरपि भिन्नः, पुरुषोत्तमज्ञस्तु न तथा, स तु तं 'सर्व्वभावेन' सर्व्वविधभजनप्रकारेण भजति, ज्ञानं कर्म्म भक्तिरिति त्रिविधभजनोपायमेवावलम्ब्य समाराधयते । १९ ।

शास्त्रत्रयेण सर्व्वशास्त्राणां निगूढतमतत्त्वमुक्त्वा तदनुसरणस्य फलमाह इतीति । हे अनघ, मया सर्व्वान्तर्यामिणा इदं गुह्यतमं भिन्नभिन्नपथाश्रयिणामेकदेशिनां सन्निधौ प्रच्छन्नं शास्त्रमुक्तम् । हे भारत, एतच्छास्त्रं बुद्ध्वा बोधविषयं कृत्वा अपरोक्षज्ञानविषयतामापयित्वा बुद्धिमान् विवेकज्ञानयुक्तः कृतकृत्यः परिसमाप्तनिखिलकर्त्तव्यः भगवत्प्रास्या सफलमनोरथश्च स्यात् । बुद्धिमान् परोक्षज्ञानी स्यात् कृतकृत्योऽपरोक्षज्ञानीति श्रीमद्बलदेवः । साधूक्तं श्रीमता प्रह्लादेन— "धर्म्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्त्ता । मन्ये तदेतदखिलं निगमस्य तत्त्वं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥" (भा, ७स्क, ६अ, २६श्लो) इति । अस्मिन्नध्यायेऽन्यत्रापरिस्फुटं प्रकृतिपुरुषपरमपुरुषतत्त्वं विवृतवानाचार्य्योऽतएवास्य निखिलाध्यायसारत्वं ज्ञेयम् । श्रीमच्छङ्कर आह— "यद्यपि गीताख्यं

समस्तं शास्त्रमुच्यते तथाप्ययमेवाध्याय इह शास्त्रमित्युच्यते स्तुत्यर्थं प्रकरणात् सर्वो हि गीताशास्त्रार्थोऽस्मिन्नध्याये समासेनोक्तः" इति । अध्यायस्यास्य तात्पर्यं गीतार्थसारसंग्रहे—"पञ्चदशस्य तात्पर्यार्थः—ब्रह्मांशस्यैवात्मनो देहादिसाक्षित्वात् देहाद्यतिरिक्तत्वं चिद्रूपत्वं सर्वज्ञत्वं सर्वात्मकत्वं कार्यकारणविनिर्मुक्तत्वेनाप्रपञ्चत्वम् । तस्याखण्डैकरसब्रह्मात्मतत्त्वज्ञानादखिलपुरुषार्थपरिसमाप्तिरिति ।" इति । २० ।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये पञ्चदशोऽध्यायः ।

षोड़शोऽध्यायः।

श्रीभगवानुवाच—

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्ज्जवम् ॥१॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्द्दवं ह्रीरचापलम् ॥२॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥३॥

नवमाध्याये "मोघाशा मोघकर्म्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीञ्चैव प्रकृतिं मोहिनीं श्रिताः॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥" (९। १२-१३) इत्युक्ताचार्य्येण सङ्क्षेपतो भगवदवज्ञाकारणमासुरी तच्छरणापत्तिकारणं दैवी प्रकृतिः। पूर्व्वाध्यायान्ते 'यो मां पुरुषोत्तमं जानाति स मां भजति' इत्युक्ते कोऽसौ तं जानाति, को वा न इत्यधिकारिप्रदर्शनाय देवासुरसम्पद्विभागोऽध्यायेऽस्मिन्नारभ्यते। अतः श्रीमद्रामानुज आह—"अतीतेनाध्यायत्रयेण प्रकृतिपुरुषयोर्विभक्तयोः संसृष्टयोश्च याथात्म्यं, तत्संसर्गवियोगयोश्च गुणसङ्गतद्विपर्य्ययहेतुत्वं, सर्व्वप्रकारेणावस्थितयोः प्रकृतिपुरुषयोर्भगवद्विभूतित्वं, विभूतिमतो भगवतो विभूतिभूतादचिद्वस्तुनश्चिद्वस्तुनश्च बद्धमुक्तोभयरूपादव्ययत्वव्यापनभरणस्वाम्यैरर्थान्तरतया पुरुषोत्तमत्वेन याथात्म्यञ्च वर्णितम्। अनन्तरमुक्तस्यार्थस्य स्थेम्ने शास्त्रवश्यतां वक्तुं शास्त्रवश्यतद्विपरीतयोर्दैवासुरवर्गयोर्विभागं श्रीभगवानुवाच" इति। "पुमर्थसाधनविरोधीन्यनेनाध्यायेन दर्शयति" इति श्रीमध्वः। श्रीमन्मधुसूदन आह—"तत्र (नवमाध्याये) वेदबोधितकर्म्मात्मज्ञानोपायानुष्ठानप्रवृत्तिहेतुः सात्त्विकी

शुभवासना दैवी प्रकृतिरित्युच्यते। एवं वैदिकनिषेधातिक्रमेण स्वभाव सिद्धरागद्वेषानुसारिसर्व्वानर्थहेतुभूता राजसी तामसी चाशुभवासना आसुरी राक्षसी च प्रकृतिरुच्यते। तत्र च विषयभोगप्राधान्येन राग प्राबल्यादासुरीत्वं हिंसाप्राधान्येन द्वेषप्राबल्यात् राक्षसीत्वमिति विवेकः सम्प्रति तु शास्त्रानुसारेण तद्विहितप्रवृत्तिहेतुभूता सात्त्विकी शुभवासना दैवी सम्पत् शास्त्रातिक्रमेण तन्निषिद्धविषयप्रवृत्तिहेतुभूता राजसी तामसी चाशुभवासना राक्षस्यासुर्य्योरेकीकरणेनासुरी सम्पदिति द्वैराश्येन शुभाशुभवासनाभेदः। 'द्वया ह प्राजापत्या देवाश्चासुराश्च'त्यादि श्रुतिप्रसिद्धं शुभानामादानाय, अशुभानां हानाय च प्रतिपादयितुं षोड़शोऽध्याय आरभ्यते" इति।

दैवीं सम्पदमुक्त्वा विस्तरेणासुरी सम्पदुच्यते तत्परिहारार्थं साधकस्य। प्रथमन्त्रिभिर्दैवी सम्पदुच्यते अभयमिति, अहिंसेति, तेज इति। अभयं भयशून्यत्वम्—भगवत्येकहृदयत्वाज्ज्ञाविदुःखादिचिन्ताजनितसर्व्वविधोद्वेगरहितत्वम्—अभीरुतेति श्रीमच्छङ्करः, इष्टानिष्टवियोगसंयोगरूपस्य दुःखस्य हेतुदर्शनजदुःखं भयं तन्निवृत्तिरभयमिति श्रीमद्रामानुजः, निरुद्यमः कथमेकाकी जीविष्यामीति भयशून्यत्वमिति श्रीमद्बलदेवः, शास्त्रोपदिष्टेऽर्थे सन्देहं विनानुष्ठाननिष्ठत्वम, एकाकी सर्व्वपरिग्रहशून्यः कथं जीविष्यामीति भयराहित्यञ्चेति श्रीमन्मधुसूदनः, स्वोच्छेदबुद्ध्यभाव इति श्रीमन्नीलकण्ठः ; सत्त्वसंशुद्धिश्चित्तस्य भगवदिच्छाविरोधिभावैरस्पृष्टत्वम् सत्त्वस्यान्तःकरणस्य संव्यवहारेषु परवञ्चनमायानृतादिपरिवर्ज्जनं शुद्धभावेन व्यवहार इति श्रीमच्छङ्करः, सत्त्वमन्तःकरणं सत्त्वस्यान्तःकरणस्य रजस्तमोभ्यामस्पृष्टत्वमिति श्रीमद्रामानुजः, चित्तस्य संशुद्धिः सुप्रसन्नतेति श्रीमच्छ्रीधरः, स्वाश्रमधर्म्मानुष्ठानेन मनोनैर्म्मल्यमिति श्रीमद्बलदेवः, भगवत्तत्त्वस्फूर्त्तियोग्यतेति श्रीमन्मधुसूदनः, चित्तप्रसाद इति श्रीमद्विश्वनाथः ; ज्ञानयोगव्यवस्थितिः ज्ञाने ज्ञानयोगे योगे कर्म्मयोगे च व्यवस्थितिर्निष्ठा—ज्ञानं शास्त्रत आचार्य्यतश्चात्मादिपदार्थानामवगमोऽवगतानामिन्द्रियाद्युपसंहारेणैकाग्रतया

स्वात्मसंवेद्यतापादनं योगः तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानं तन्नि-ष्ठता, एषा प्रधाना दैवी सात्त्विकी सम्पदिति श्रीमच्छङ्करः, प्रकृति-वियुक्तात्मस्वरूपविवेकनिष्ठा इति श्रीमद्रामानुजः, आत्मज्ञानोपाये परिनिष्ठेति श्रीमच्छ्रीधरः, श्रवणादौ ज्ञानोपाये परिनिष्ठेति श्रीमद्बल-देवः, ज्ञानं शास्त्रादात्मतत्त्वस्यावगमः चित्तैकाग्रतया तस्य स्वानुभवा-रूढत्वं योगः तयोर्व्यवस्थितिः सर्वदा तन्निष्ठतेति श्रीमन्मधुसूदनः, ज्ञानं श्रवणादिजन्यं योगो ध्यानेऽर्थे चित्तप्रणिधानं तयोर्व्यवस्थिति-र्निष्ठेति श्रीमन्नीलकण्ठः, ज्ञानोपाये अमानित्वादौ परिनिष्ठेति श्रीम-द्विश्वनाथः ; दानम्—यथाशक्तिसंविभागोऽन्नादीनामिति श्रीमच्छङ्करः, न्यायार्जितधनस्य पात्रे प्रतिपादनमिति श्रीमद्रामानुजः, स्वभोज्यान्ना-देर्यथोचितसंविभाग इति श्रीमच्छ्रीधरः, स्वभोग्यस्य न्यायार्जितस्या-न्नादेः सत्पात्रे यथायोग्यं समर्पणमिति श्रीमद्बलदेवः, स्वस्वत्वास्पदाना-मन्नादीनां यथाशक्ति शास्त्रोक्तः संविभाग इति श्रीमन्मधुसूदनः ; दमो बाह्येन्द्रियाणां संयमः—मनसो विषयोन्मुख्यनिवृत्तिसंशीलनमिति श्रीम-द्रामानुजः, चकारोऽनुक्तानां निवृत्तिलक्षणधर्माणां समुच्चयार्थ इति श्रीम-न्मधुसूदनः ; यज्ञः देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञ इति चतु-र्विधः—"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलि-र्भौतो नृयज्ञोऽतिथिपूजनम् ॥" (मनु, ३अ, ७०श्लो) इति, फलाभि-सन्धिरहितभगवदाराधनारूपमहायज्ञाद्यनुष्ठानमिति श्रीमद्रामानुजः ; स्वाध्यायः ब्रह्मयज्ञः ऋग्वेदाद्यध्ययनम्—यज्ञशब्देन पञ्चविधमहायज्ञो-क्तिसम्भवेऽपि साधारण्येन ब्रह्मचारिधर्मकथनार्थं पृथगुक्तिरिति श्रीम-न्मधुसूदनः, "स्वाध्यायाद्योगमातिष्ठेत् योगात् स्वाध्यायमामनेत्" इति परमात्मसाक्षात्कारोपयोगित्वात् स्वाध्यायस्य स्वतन्त्रकथनमिति तत्त्वम्, सविभूतेर्भगवतस्तदाराधनप्रकारस्य च प्रतिपादकः कृत्स्नो वेद इत्यनु-सन्धाय वेदाभ्यासनिष्ठेति श्रीमद्रामानुजः ; तपः अनन्तराध्यायोक्तं शारीरं वाचिकं मानसमिति त्रिविधम् (१७।१४-१६) ; आर्जवमव-क्रत्वम्—मनोवाक्कायकर्मप्रवृत्तीनामेकनिष्ठतेति श्रीमद्रामानुजः, सार-

त्वमिति श्रीमद्बलदेवः ; अहिंसा परपीड़ावर्ज्जनम्—प्राणिजीविकानु-च्छेदकतेति श्रीमद्बलदेवः ; सत्यं यथाभूतार्थभाषणम्—अप्रियानृत-वर्ज्जनं यथाभूतार्थवचनमिति श्रीमच्छङ्करः, यथादृष्टार्थगोचरभूतहित-वाक्यमिति श्रीमद्रामानुजः, अनर्थाननुबन्धियथादृष्टार्थविषयं वाक्य-मिति श्रीमद्बलदेवः ; अक्रोधः परैराक्रुष्टस्याभिहतस्य वा प्राप्तस्य क्रोधस्योपशमनमिति श्रीमच्छङ्करः, परपीड़ाफलकचित्तविकाररहित-त्वमिति श्रीमद्रामानुजः, दुर्ज्जनकृते स्वतिरस्कारेऽभ्युदितस्य कोपस्य निरोध इति श्रीमद्बलदेवः ; त्यागः—सन्न्यास इति श्रीमच्छङ्करः, आत्म-हितप्रत्यनीकपरिग्रहविमोचनमिति श्रीमद्रामानुजः, औदार्य्यमिति श्रीमच्छ्रीधरः, दुष्कोरपि नवापकारा इति श्रीमद्बलदेवः, पुत्रकलत्रादिषु ममतात्याग इति श्रीमद्विश्वनाथः ; शान्तिः—अन्तःकरणोपशम इति श्रीमच्छङ्करः, इन्द्रियाणां विषयप्रावण्यनिरोधसंशीलनमिति श्रीमद्रामा-नुजः, चित्तोपरतिरिति श्रीमच्छ्रीधरः, मनसः संयम इति श्रीमद्बल-देवः ; अपैशुनं—परोक्षे परदोषप्रकाशनं पैशुनं तद्रहिततत्वम् ; दया भूतेषु दुःखस्थेषु ; अलोलुप्त्वम् अलोलुपत्वं लोभराहित्यम्—इन्द्रि-याणां विषयसन्निधावविक्रियेति श्रीमच्छङ्करस्तदनुयायिनश्च, विषयेषु निस्पृहत्वमिति श्रीमद्रामानुजः, अलोलत्वमिति वा पाठः सः, लोलुप-शब्दस्य पलोप इति बहवः, श्रीमच्छ्रीधरमते अलोपः, तेन अलोलुप्त्व-मिति पाठः ; मार्द्दवं कोमलत्वम्, अक्रौर्य्यम्—अकाठिन्यं साधुजन-विश्लेषानर्हतेति श्रीमद्रामानुजः ; ह्रीर्लज्जा—अकार्य्यकरणे लज्जेति श्रीमद्रामानुजः ; अचापलं व्यर्थक्रियाराहित्यम्—असति प्रयोजने वाक्पाणिपादादीनामव्यापारयितृत्वमिति श्रीमच्छङ्करः, स्पृहणीयविष-यसन्निधावचपलत्वमिति श्रीमद्रामानुजः ; तेजः प्रागल्भ्यं—दुर्ज्जनैरन-भिभवनीयत्वमिति श्रीमद्रामानुजः, स्त्रीबालकादिभिर्मूढैरनभिभाव्यत्व-मिति श्रीमन्मधुसूदनः ; क्षमा सत्यपि सामर्थ्ये परकृतापमानादिमर्ष-णम्—आक्रुष्टस्य ताड़ितस्य वान्तर्विक्रियानुत्पत्तिरिति श्रीमच्छङ्करः, परनिमित्तपीड़ानुभवेऽपि तं प्रति चित्तविकाररहिततेति श्रीमद्रामा-

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥४॥

नुजः, परिभवादिषूत्पद्यमानेषु क्रोधप्रतिबन्ध इति श्रीमच्छ्रीधरः, उत्पन्नाया विक्रियायाः प्रशमनमक्रोध इति क्षमाया अक्रोधस्य च विशेष इति श्रीमच्छङ्करः ; धृतिर्धैर्यम्—देहेन्द्रियेष्ववसादं प्राप्तेषु तस्य प्रतिषेधकोऽन्तःकरणविशेषो येनोत्तम्भितानि करणानि देहश्च नावसीदन्तीति श्रीमच्छङ्करस्तदनुयायिनश्च, महत्यामप्यापदि कृत्यकर्त्तव्यतावधारणमिति श्रीमद्रामानुजः, दुःखादिभिरवसादे चित्तस्य स्थिरीकरणमिति श्रीमच्छ्रीधरः ; शौचं बाह्याभ्यन्तरशुद्धिः, वैश्यसाधारणधर्म्म इति निर्णीय व्यापारे वाणिज्ये मायाकृतादिराहित्यमिति श्रीमद्बलदेवमधुसूदनौ ; अद्रोहः परजिघांसाभावः,—परेष्वनुपरोधः परेषु स्वाच्छन्द्यवृत्तिनिरोधरहितत्वमिति श्रीमद्रामानुजः ; नातिमानिता आत्मनः पूज्यातिशयभावनाभावः,—अस्थाने गर्व्वोऽतिमानित्वं तद्रहिततेति श्रीमद्रामानुजः । हे भारत, अभयादीनि नातिमानितान्तानि दैवीं सम्पदमभि लक्ष्यीकृत्य जातस्य भवन्ति । देवसम्बन्धिनी दैवी, देवा भगवदाज्ञानुवृत्तिशीलास्तेषां सम्पद् सा च भगवदाज्ञानुवृत्तिरेवेति श्रीमद्रामानुजः । आर्ज्जवादयोऽचापलान्ता द्वादश ब्राह्मणानामसाधारणधर्म्माः, तेजः क्षमा धृतिरिति त्रयं क्षत्रियाणामसाधारणम्, शौचमद्रोहश्चेति द्वयं वैश्यस्यासाधारणम्,नातिमानितत्येकः शूद्रस्यासाधारणधर्म्म इति केचित् । सत्त्वप्रधाना ब्राह्मणाः, सत्त्वोपसर्ज्जनरजःप्रधानाः क्षत्रियाः, तमउपसर्ज्जनरजःप्रधाना वैश्याः, रजउपसर्ज्जनतमःप्रधाना शूद्रा इति यदुक्तं व्याख्यातृभिस्तत्तु सामान्यतः । दैवी सम्पद् सर्व्वेषु वर्णेषु सत्त्वगुणस्य प्रवेशं दर्शयति, यद्येवं न स्यात् तत्तद्वर्णानामुच्चभूमावारोहणं न जातु सम्भवेत् । उत्तरोत्तरात् पूर्व्वपूर्व्वस्याभ्युदय इति तत्त्वम् । नातिमानितायाः आरभ्याऽभये पर्य्यवसानं देवगुणानाम् । १ —३ ।

प्रथमन्तावदासुरीं सम्पदं सङ्क्षेपेणोक्त्वा पश्चाद्विस्तरेण वक्ष्यते सा

दम्भ इति । दम्भः आत्मनो धार्म्मिकत्वख्यापनम्—धर्म्मध्वजित्वमिति श्रीमच्छङ्करः, धार्म्मिकत्वख्यापनाय धर्म्मानुष्ठानमिति श्रीमद्रामानुजः, स्वस्याधार्म्मिकत्वेऽपि धार्म्मिकत्वप्रख्यापनमिति श्रीमद्विश्वनाथः ; दर्पः धनादिनिमित्तगर्व्वः—धनजनादिनिमित्त उत्सेक इति श्रीमच्छङ्करः, कृत्याकृत्यविवेककरो विषयानुभवनिमित्तो हर्ष इति श्रीमद्रामानुजः, धनविद्यादिनिमित्तं चित्तौत्सुक्यमिति श्रीमच्छ्रीधरः, विद्याभिजनजन्यो गर्व्व इति श्रीमद्बलदेवः, धनस्वजनादिनिमित्तो महदवधीरणाहेतुर्गर्व्वविशेष इति श्रीमन्मधुसूदनः ; अभिमान आत्मगौरवम्—स्वविद्याभिजनाननुगुणोऽभिमान इति श्रीमद्रामानुजः, आत्मन्युत्कृष्टत्वाध्यारोपोऽभिमान इति श्रीमद्धरिः, स्वस्मिन्नभ्यर्हितत्वबुद्धिरिति श्रीमद्बलदेवः, आत्मन्यत्यन्तपूज्यत्वातिशयाध्यारोप इति श्रीमन्मधुसूदनः, आत्मनि पूज्यताबुद्धिरिति श्रीमन्नीलकण्ठः, अन्यकृतसम्मानाकाङ्क्षित्वमिति श्रीमद्विश्वनाथः । आसुर्य्यां सम्पद्यभिमानस्यैव विनाशहेतुत्वं तथाथा शतपथब्राह्मणे—"देवाश्च वा असुराश्च । उभये प्राजापत्याः पस्पृधिरे । ततोऽसुरा अभिमानेनैव कस्मिन्नु वयं जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुः, तेऽभिमानेनैव पराबभूवुः, तस्मान्नाभिमन्येत, पराभवस्य हैतन्मुखं यदभिमानः ॥" (११।१।८।१) इति । परस्पराणां सम्मानेनैव देवी सम्पदिति तत्रैव दृश्यते—"अथो देवा अन्योऽन्यस्मिन्नेव जुह्वतश्चेरुः, तेभ्यः प्रजापतिरात्मानं प्रददौ" (११।१।७।२) इति । क्रोधः कोपः—परपीडाफलचित्तविकार इति श्रीमद्रामानुजः, स्वपरापकारप्रवृत्तिहेतुर्नेत्रादिविकारलिङ्गोऽन्तःकरणवृत्तिविशेष इति श्रीमद्धरिः, स्वपरापकारप्रवृत्तिहेतुरभिज्वलनात्मकोऽन्तःकरणवृत्तिविशेष इति श्रीमन्मधुसूदनः ; पारुष्यं रूक्षभाषणम्—परुषवचनं यथा काणं चक्षुष्मान्, विरूपं रूपवान्, हीनाभिजनमुत्तमाभिजन इत्यादीति श्रीमच्छङ्करः, साधूनामुद्वेगकरस्वभाव इति श्रीमद्रामानुजः, निष्ठुरः प्रत्यक्षरूक्षवाक् तस्य भावः पारुष्यमिति श्रीमद्धरिः, निष्ठुरत्वमिति श्रीमच्छ्रीधरः, प्रत्यक्षं रूक्षभाषित्वमिति श्रीमद्बलदेवः, प्रत्यक्षरूक्षवदनशीलत्व-

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥५॥
द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥६॥

मिति श्रीमन्मधुसूदनः, चकारोऽनुक्तानां चापलादिदोषाणां समुच्चयार्थ इति सः ; अज्ञानं कर्त्तव्याकर्त्तव्यबुद्धिहीनत्वम्—अविवेकज्ञानं मिथ्याज्ञानं कर्त्तव्याकर्त्तव्यादिमिथ्याप्रत्ययविषयमिति श्रीमच्छङ्करः, परावरतत्त्वकृत्याकृत्याविवेक इति श्रीमद्रामानुजः, अविवेक इति श्रीमच्छ्रीधरः, कार्य्याकार्य्यविवेकधीशून्यत्वमिति श्रीमद्बलदेवः, कर्त्तव्याकर्त्तव्यविषयविवेकाभावः, चशब्दोऽनुक्तानामभावभूतानामधृत्यादिदोषाणां समुच्चयार्थ इति श्रीमन्मधुसूदनः । आसुरीं सम्पदमभिलक्ष्य जातस्यैतानि भवन्ति । आसुरा भगवदाज्ञाननुवृत्तिशीला इति श्रीमद्रामानुजः । ४ ।

अनयोः सम्पदोः कार्य्यमुच्यते दैवीति । दैवी सम्पत् विमोक्षाय संसारबन्धहानाय, आसुरी सम्पत् निबन्धाय संसारबन्धनदृढ़ीकरणाय मता ज्ञेया । हे पाण्डव, मा शुचः मा शोकं कार्षीः, त्वं दैवीं सम्पदमभिलक्ष्य जातोऽसि । अतस्ते बन्धनमोचनं स्यादिति निश्चयः । ५ ।

जनमात्रेषु तारतम्येन सम्पद्द्वयस्य प्रवेशो दृश्यते । अतस्तत्सम्पर्कीयविशेषज्ञानेनैकस्या ग्रहणायापरस्या हानौ यत्नः कर्त्तव्य इत्यभिप्रेत्य परिहार्य्यामासुरीं सम्पदं विस्तरेण वक्तुमुपक्रमते द्वाविति । अस्मिन् लोके दैव आसुर एव च द्वौ भूतसर्गौ भूतसृष्टी, हे पार्थ, विस्तरशः 'स्थितप्रज्ञलक्षणे द्वितीये, भक्तलक्षणे च द्वादशे, ज्ञानलक्षणे त्रयोदशे, गुणातीतलक्षणे चतुर्दशे, इह च अभयमित्यादिना' दैवः सर्गः प्रोक्तः, आसुरं सर्गं सृष्टिं मे मत्तः शृणु । अत्र श्रीमद्रामानुजः—"दैवसर्गो विस्तरशः प्रोक्तः, देवानां मदाज्ञानुवृत्तिशीलानामुत्पत्तिर्यदाचारकरणार्था, स आचारः कर्म्मयोगज्ञानयोगभक्तियोगरूपो विस्तरशः प्रोक्तः,

आसुराणां सर्गश्च यदाचारकस्तत्कार्यलक्षणाचारं मे शृणु मत्सकाशात् शृणु"
इति ।

श्रीमन्मधुसूदन आह—"द्वौ द्विप्रकारावेव भूतसर्गौ भवतः । कौ
तौ ? दैव आसुरश्च, न तु राक्षसो मानुषो वाधिकः सर्गोऽस्तीत्यर्थः ।
यो यदा मनुष्यः शास्त्रसंस्कारप्राधान्येन स्वभावसिद्धौ रागद्वेषावभिभूय
धर्म्मपरायणो भवति स तदा सुर इति, द्वैविध्योपपत्तेः ; न हि धर्म्मा-
धर्म्माभ्यां तृतीयकोटिरस्ति । तथा च श्रूयते 'द्वयो ह प्राजापत्या
देवाश्चासुराश्च, ततः कनीयसा एव देवा ज्यायसा असुराः' इति । दम-
दानदयाविधिपरे तु वाक्ये 'त्रयः प्राजापत्याः' इत्यादौ दमदानदया-
रहिता मनुष्या असुरा एव सन्तः केनचित् साधर्म्येण देवा मनुष्या
असुरा इत्युपचर्य्यन्त इति नाधिक्यावकाशः । एकेनैव 'द' इत्यक्षरेण
प्रजापतिना दमरहितान् मनुष्यान् प्रति दमोपदेशः कृतः, दानरहितान्
प्रति दानोपदेशः । ननु विजातीया एव देवासुरा मनुष्याधिकारत्वात्,
शास्त्रस्य चान्ते उपसंहरिष्यति 'तदेतदेवैषा दैवी वागनुवदति स्तन-
यित्नुर्ददद इति दाम्य दत्त दयध्वमिति तदेतत् त्रयं शिक्षेत् दमं दानं
दयाम्' इति । तस्माद्राक्षसी मानुषी च प्रकृतिरासुर्य्यामेवान्तर्भवतीति
युक्तमुक्तं द्वौ भूतसर्गाविति ।" इति ।

कथं द्वौ भूतसर्गावित्युक्तम् । न जातु भगवत आसुरः राक्षसो वा
सर्गो भवितुमर्हति ; तस्यात्मनो देवस्वरूपत्वात् । सत्त्वरजस्तमोगु-
णानां तच्छक्तौ सन्निवेशात् तथा भवतीति ब्रूमः । सत्त्वरजस्तमोगुणा
हि व्यक्तिप्रवृत्त्यप्रवृत्तिरूपा इति पूर्व्वं व्याख्यातवन्तः । यत्र ज्ञानस्या-
प्रवृत्तिस्तत्र तमोमयराक्षससर्गः ; यत्र च ज्ञानस्य प्रवृत्तिरभिव्यक्त्युन्मु-
खत्वं तत्र रजःप्रधानासुरसर्गः ; यत्र तु ज्ञानस्य प्रकाशस्तत्र सत्त्वप्रधा-
नदैवसर्ग इति न कश्चिद्दोषः । ज्ञानस्याप्रवृत्तौ प्रच्छन्नावस्थायां तस्य
स्थितिः । ततस्तत्र परदुःखाद्यनभिज्ञतावशात् हिंसादौ प्रवृत्तिः ।
ज्ञानस्याभिव्यक्त्युन्मुखत्वे पुनः धनजनादिषु प्रसक्तेर्दम्भादेः प्राधान्यम् ।
ज्ञानाभिव्यक्तौ तु यथावद्वस्तुदर्शनात् अभयादेरभ्युदयः । ६ ।

प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥७॥

आसुरधर्म्मान् परिज्ञापयन् देवधर्म्मानाचरयितुमा अध्यायपरिसमाप्तेरासुरीं सम्पदं दर्शयन्नाचार्य्यः प्रवृत्तिमिति। आसुरा असुरधर्म्माणः असुरस्वभावा जनाः प्रवृत्तिं विहितां क्रियासु निवृत्तिं निषिद्धां क्रियासु न विदुर्न जानन्ति। अतः न तेषु शौचं शुचित्वम्, अपि च न आचारः, न च सत्यं विद्यते। भगवदाज्ञानुसारिणी क्रिया विधिसिद्धा, तद्विपरीता निषिद्धा। ये पुनर्भगवदाज्ञां नानुवर्त्तन्ते तेषु शुचित्वादिकं जातु न सम्भवति पापाचारपरायणत्वात्। सत्यमत्र व्याख्यातृभिर्भूतहितभाषणं प्राणिहितानुबन्धि यथादृष्टार्थविषयवाक्यमिति व्याख्यातम्, तत्तु आचारान्तर्भूतम्। अत्र सत्यं "सत्यमेकाक्षरं श्रुतम्" (शा, प, १९९अ, ६६श्लो) इति शास्त्रमूलम्। किमिदं शास्त्रमूलम्? यत्तु कालदेशप्रभावमतीत्य शास्त्रत्वेन नित्यमेव तिष्ठति तत्। शास्त्रेषु ऋग्वेदादयः सर्व्वे अपरा विद्या, तेषु च यैरक्षरं ब्रह्माधिगम्यते ते परा विद्या (मु, उ, १।१।५), त एव च शास्त्रस्य मूलं सत्यम्। सत्यं नित्यम्, आचारः पुनरनित्यः, तद्यथा वैदिककाले मृतेन कृष्णवर्णां गामनुतरीत्वेनाधाक्षीत्। मृतस्यास्थिसञ्चयनं विना न तस्य स्वर्गमनं भवति। अस्थिसञ्चयने सन्देहः किमिदं गोः किं मनुजस्येति दृष्ट्वा 'न वास्थिसन्देहात्' इति सूत्रेण कात्यायनोऽनुतरीं निवारयति स्म। ततःप्रभृति स आचारो विनिवृत्तः। अतिथये गोहननमपि शासनान्तरेण निरस्तम्। दृश्यते च निर्णयसिन्धौ—" 'अस्वर्ग्यं लोकविद्विष्टं धर्म्ममप्याचरेन्न तु' इति निषेधात्। यथा—'महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्' इति विधानेऽपि लोकविद्विष्टत्वादननुष्ठानम्। यथा वा 'मैत्रावरुणीं गां वशामनुबन्ध्यामालभेत' इति गवालम्भनविधानेऽपि लोकविद्विष्टत्वादननुष्ठानम्।" इति। अत्र लोकविद्वेषस्य मूलं भगवत्प्रेरणैव। ७।

असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥८॥

असत्यमिति । ते आसुरा जनाः जगत् असत्यं मिथ्या, अप्रतिष्ठमाश्रयशून्यम्, अनीश्वरमीश्वरशून्यम्, अपरस्परसम्भूतम् अन्योऽन्यतः स्त्रीपुरुषयोरन्योन्यसंयोगादुत्पन्नम् । किमन्यत् ? कामहैतुकं काम एव हेतुरस्य जगतः । अत्र श्रीमच्छङ्करः—"इदं जगत् सर्व्वमसत्यमप्रतिष्ठञ्च, नास्य धर्म्माधर्म्मौ प्रतिष्ठा अतोऽप्रतिष्ठञ्चेति ते असुरा जना जगदाहुरनीश्वरं, न च धर्म्माधर्म्मसव्यापेक्षकोऽस्य शासितेश्वरो विद्यत इति, अतोऽनीश्वरं जगदाहुः, किञ्च अपरस्परसम्भूतं कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योन्यसंयोगात् जगत्सर्व्वं सम्भूतम् । किमन्यत् कामहैतुकं, कामहैतुकमेव कामहैतुकमन्यज्जगतः कारणं न विद्यते, अदृष्टं धर्म्माधर्म्मादि कारणान्तरं न विद्यते जगतः, काम एव प्राणिनां कारणमिति लोकायतिकदृष्टिरियम्" इति । श्रीमद्रामानुजः—"असत्यं जगदेतत् सत्यशब्दनिर्द्दिष्टब्रह्मकार्य्यतया ब्रह्मात्मकमिति नाहुः, अप्रतिष्ठं तथा ब्रह्मणि न प्रतिष्ठितमिति वदन्ति, ब्रह्मणानन्तेन धृता हि पृथिवी सर्व्वलोकान् बिभर्त्ति ········, अनीश्वरं सत्यसङ्कल्पेन परब्रह्मणा सर्व्वेश्वरेण मयैव नियमितं न वदन्ति······ । वदन्ति चैवम्—अपरस्परसम्भूतं किमन्यत्, योषित्पुरुषयोः परस्परसम्बन्धेन जातमिदं मनुष्यपश्वाद्युपलभ्यते, अनेवम्भूतं किमन्यदुपलभ्यते, किञ्चिदपि नोपलभ्यत इत्यर्थः । अतः सर्व्वमिदं जगत् कामहैतुकम्" इति । नास्ति सत्यं वेदपुराणादिप्रमाणं यस्मिंस्तादृशं जगदिति श्रीमच्छ्रीधरमधुसूदनौ । श्रीमद्बलदेवस्त्वाह—"इदं जगत् असत्यं शुक्तिरजतादिवद्भ्रान्तिविजृम्भितम् । अप्रतिष्ठं खपुष्पवन्निराश्रयम् । नास्त्येवेश्वरो जन्मादिहेतुर्यस्य तत् । सोऽपि तद्भ्रान्तिरचित एव । पारमार्थिके तस्मिन् स्थिते तन्निर्म्मितं जगत् तद्दृष्टनष्टप्रायं न स्यात् । तस्मादसत्यं जगत् त एव मन्यन्ते । एकैव निर्व्विशेषा सर्व्वप्रमाणवेद्या चित् । भ्रमादेको जीवः,

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्म्माणः क्षयाय जगतोऽहिताः ॥९॥
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद् गृहीत्वासद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः ॥१०॥

सतोऽन्यज्जड़जीवेश्वरात्मा तदज्ञानात् प्रतिभासते । आत्मस्वरूपसाक्षा-त्कारात् अविसंवादि हस्त्यश्वरथादिकमाजगरात् । सति च स्वरूप-साक्षात्कारे तदज्ञानकल्पितं तत् जीवत्वेन सह निवर्त्तेत स्वाप्निकरथा-श्वादीव सुषुप्ताविति । अथ स्वभाववादिनां बौद्धानामाह अपरस्परसम्भूत-मिति । स्त्रीपुरुषसम्भोगजन्यं जगत् भवति घटोत्पादने कुलालस्येव बालोत्पादने पित्रादेर्ज्ञानाभावात् सत्यप्यसत्सम्भोगे सन्तानानुत्पत्तेश्च स्वेदजादीनामकस्मादुत्पत्तेश्च तस्मात् स्वभावादेवेदं भवति इति । अथ लोकायतिकानामाह कामहैतुकमिति । किमन्यदाच्यं स्त्रीपुरुषयोः काम एव प्रवाहात्मना हेतुरस्येति········। अथवा जैनानामाह कामः स्वेच्छैव हेतुरस्येति । युक्तिबलेन यो यत् कल्पयितुं शक्नुयात् स तदेव तस्य हेतुं वदति” इति । ८ ।

एतामिति । एतां प्रागुक्तां दृष्टिमवष्टभ्याश्रित्य नष्टात्मानः नष्ट-स्वभावाः अल्पबुद्धयः क्षुद्रमतयः, अतएव उग्रकर्म्माणः क्रूरकर्म्माणः अहिता वैरिणो भूत्वा जगतः क्षयाय प्रभवन्ति प्रभावं विस्ता-रयन्ति । ९ ।

दम्भमानमदान्विताः दम्भेन धार्म्मिकत्वख्यापनेन मानेनापूज्यत्वेऽपि पूज्यत्वख्यापनेन मदेनानुत्कृष्टत्वेऽप्युत्कृष्टत्वारोपणेन युक्तास्ते दुष्पूरम-शक्यपूरणं काममभिलाषमाश्रित्य मोहादविवेकतः असद्ग्राहान् अस-न्निश्चयान् गृहीत्वावलम्ब्य अशुचिव्रताः अविशुद्धनियमपरायणाः सन्तः प्रवर्त्तन्ते क्रियारता भवन्ति । असद्ग्राहान् गृहीत्वा अनेन मन्त्रे-णैतां देवतामाराध्य महानिधीन् साधयाम इत्यादीन् दुराग्रहान् मोह-

चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥

मात्रेण स्वीकृत्येति श्रीमच्छ्रीधरमधुसूदनौ, दुष्टनक्रवदात्मविनाशका-नित्यतिरेकः श्रीमद्बलदेवस्य, वशाकर्षणनिध्वज्जनकायसिद्ध्यादिसाध-नेषु असत्सु असमीचीनेषु याश्चा अत्यन्ताभिनिवेशास्तान् गृहीत्वेति श्रीमन्नीलकण्ठः ; अशुचिव्रता अशास्त्रविहितव्रतयुक्ता इति श्रीम-द्रामानुजः, मद्यमांसादिविषयाणि व्रतानि येषामिति श्रीमच्छ्रीधर-बलदेवनीलकण्ठाः, शौचाचारवर्ज्जितानि व्रतानि येषामिति श्रीम-द्विश्वनाथः । १० ।

अपरिमेयां परिमातुमशक्यां प्रलयान्तां मरणान्तां चिन्तामुद्वेगकरीं भावनाम्—आत्मीययोगक्षेमोपायालोचनात्मिकामिति श्रीमद्गिरिः—उपाश्रिताः । सर्व्वनियन्तरि विश्वासाभावादात्मबुद्धेरुपरि निर्भरवन्तः, अतो नियतोद्विग्नचित्ताः । पश्यन्ति ते नेह तेषामभिलाषानुरूपा घटना घटन्ते, प्रायो विपरीता एव, अथापि तासां नियन्तारमपश्यन्तः स्वबुद्धेर्नियन्तृत्वमनुमाय पदे पदे विपज्जालहता भवन्ति, सुतरां न तेषां कदापि चिन्ताविच्छेदः, भगवति विश्वासवन्तो न तथा ; ते पुनः "अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥" (९।२२) इत्यङ्गीकारेणाश्वस्तहृदया सर्व्वथा निश्चिन्ताः ; आपतिते दुःखराशावपि हृष्टचित्ताः, "यस्याहमनुगृह्णामि हरिष्यामि च तद्धनम्" इति न्यायेन तस्मिन्नधिकतरभगवत्कृपानिदर्शन-दर्शनात् । कामोपभोगपरमाः कामाः शब्दादयो विषयास्तेषामुप-भोग एव परमो येषाम् ; एतावदिति निश्चिताः, कामोपभोग एव पुरुषार्थ इति निश्चयवन्तः । उद्धृतञ्च वार्हस्पत्यसूत्रं व्याख्यातृभिः —"चैतन्यविशिष्टकायः पुरुषः" इति "काम एवैकः पुरुषार्थः" इति च । न ते पारलौकिकचिन्तावन्तः, इहलोक एव तेषां सर्व्व-स्वम् । ११ ।

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥१२॥
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१३॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥१४॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥

आशेति । आशापाशशतैर्बद्धा आशा एव पाशास्तेषां शतैर्बद्धा नियन्त्रिताः कामक्रोधपरायणाः कामक्रोधावेव परमाश्रयो येषां ते, कामभोगार्थं स्वाभिलाषचरितार्थतायै अन्यायेन धर्मनियमोल्लङ्घनेन परवञ्चनादिना अर्थसञ्चयान् ईहन्ते लिप्सन्ते । १२ ।

आशापाशान् विवृणोति इदमिति । अद्य इदं मया लब्धम्, इदं मनोरथं प्राप्स्ये प्राप्स्यामि, इदं धनं मेऽस्ति, इदं पुनर्मे धनं भविष्यति । १३ ।

क्रोधजानर्थानाह च कामजानाशापाशान् विवृणोति असाविति । असौ शत्रुर्मया हतः, अपरानपि च शत्रून् हनिष्ये । ईश्वरः समर्थोऽहम्, भोगी सर्वभोगोपकरणसमन्वितोऽहम्, सिद्धः स्वपुरुषकारेण धनपुत्रादिसम्पन्नोऽहम्, अहं बलवान् तेजस्वी, अतएवाहं सुखी । १४ ।

अत्यारूढ़कामजानाशापाशान् विवृणोति आढ्य इति । अहम् आढ्यो धनवान्, अभिजनवान् कुलीनः, मया सदृशः कोऽन्योऽस्ति, यक्ष्ये यागेनान्यानभिभविष्यामि, दास्यामि दानेन प्रतिष्ठां लप्स्ये, मोदिष्ये एवमन्यान् यागदानादिभिरभिभवन् हर्षमुपागच्छामि, इति

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥
आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥१७॥
अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥१८॥

एवमज्ञानविमोहिताः अज्ञानेनाविवेकेन विमोहिता विविधभ्रमपरम्परां प्रापिताः । १५ ।

एवं विमोहितानां किं भवति तदाह अनेकेति । अनेकचित्तविभ्रान्ताः अनेकैरेकविषयानभिनिविष्टैश्चित्तैर्विभ्रान्ताः मोहजालसमावृताः मोह एव जालं तेन समावृताः आवृतज्ञानाः कामभोगेषु विषयभोगेषु प्रसक्ता अभिनिविष्टाः, अशुचौ पापरूपेऽमेध्ये नरके पतन्ति । १६ ।

एषां यागाद्यनुष्ठानमपि दम्भाभिमानप्रयुक्तमित्याह आत्मेति । आत्मसम्भाविता आत्मनैव न तु सद्भिः सम्भाविताः श्रेष्ठं नीताः, अतएव स्तब्धा अनम्राः, धनमानमदान्विताः धनेन मानेन च मदान्विता गर्व्विताः, दम्भेन धार्म्मिकत्वख्यापनेन अविधिपूर्व्वकं विधिमतिक्रम्य नामयज्ञैः नाममात्रैर्यज्ञैस्ते यजन्ते । १७ ।

अहङ्कारमिति । अहङ्कारमभिमानं—विद्यमानैरविद्यमानैश्च गुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मानमहमिति मन्यते सोऽहङ्कारोऽविद्याख्यः कष्टतमः सर्व्वदोषाणां मूलं सर्व्वानर्थप्रवृत्तीनाञ्च मूलमिति श्रीमच्छङ्करः, अनन्यापेक्षोऽहमेव सर्व्वं करोमीत्येवंरूपमिति श्रीमद्रामानुजः, अहमेव सर्व्वश्रेष्ठ इति बुद्धिरिति श्रीमन्नीलकण्ठः ; बलं पराभिभवसामर्थ्यम्—सर्व्वस्य करणे मद्बलमेव पर्य्याप्तमिति च बलमिति श्रीमद्रामानुजः ; दर्पम्—दर्पो नाम यस्योद्भवे धर्म्ममतिक्रामतीति सोऽयमन्तःकरणाश्रयो

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१९॥

दोषविशेष इति श्रीमच्छङ्करः, मत्सदृशो न हि कश्चिदस्तीति दर्पमिति श्रीमद्रामानुजः ; कामम्—एवम्भूतस्य मम काममात्रेण सर्व्वं सम्पत्स्यत इति काममिति श्रीमद्रामानुजः ; क्रोधञ्च—मम येऽनिष्टकारिणस्तान् सर्व्वान् हनिष्यामीति च क्रोधमिति श्रीमद्रामानुजः । एतानन्यांश्च दोषान् संश्रिताः आत्मपरदेहेषु स्वदेहेषु परदेहेषु चावस्थितं मां सर्व्वान्तर्यामिणं प्रद्विषन्तः अभ्यसूयकाः सन्मार्गस्थानां गुणेष्वसह-मानाः । १८ ।

तेषामसद्गतिमाह तानिति । तान् द्विषतः भूतद्वेषिणः क्रूरान् हिंसापरान् नराधमान् अशुभान् पापान् अजस्रम् आसुरीषु एव योनिषु क्षिपामि । तादृशां न जातु गतिर्भवतीत्यायाति 'अजस्रमासुरीषु योनिषु क्षिपामि' इति वचनेन । एवं मन्यमानः 'तेषाञ्च कदाचिदपि आसुरस्वभावप्रच्युतिर्न भवति' इत्याह श्रीमच्छ्रीधरः, "एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः । आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥" इत्यनन्तरोक्त्या आसुरान् धर्म्मान् परित्यज्य दैवगुणाना-चरन् सद्गतिं प्राप्नोतीति सिध्यति । अनुगीतायां तामसानामस-द्गतिवर्णनान्तरं तेषां स्वगुणविपरीताचरणेन स्वर्गगमनमतएवोक्तवा-नाचार्य्यः । न च वक्तव्यो नावकाशो दैवगुणाभ्यासस्य, तथा सति गुणव्यतिकरो न सिध्यति ; 'तेजः क्षमा धृतिः शौचमद्रोहो नाति-मानिता' इत्यत्र तमःप्रधानेषु 'नातिमानिता' इति दैवगुणस्य प्रवेशो न जातु सम्भवेत् । "किरातहूणान्ध्रपुलिन्दपुक्कसा आभीरकङ्का यवनाः खसादयः । येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥" (भा, २स्क, ४अ, १८श्लो) इत्यादिकमाचार्य्यहृदयानु-सार्य्येव । १९ ।

आसुरीं योनिमापन्ना मूढ़ा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥२०॥
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥२१॥
एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥२२॥

आसुरीमिति। आसुरीं योनिमापन्ना जन्मनि जन्मनि मूढ़ा विवेकज्ञानरहिता मामप्राप्यैव ततस्तस्मात् अधमां गतिं यान्ति। 'मामप्राप्यैव' इत्युक्तत्वात् यदा भगवत्प्रेरितसाधुसङ्गवशात् 'किरातहूणान्ध्र' इत्यादिन्यायात् शुद्धाशयाः, तदा ते तं प्राप्य सद्गतिं यान्तीति सूचितम्। २०।

कामक्रोधलोभमूलका एव सर्व्वे आसुरधर्म्माः, अतो मूलकथनेन तेषामेकत्र संग्रहस्त्रिविधमिति। आत्मनो नाशनं विनाशकमसद्गतिप्रापकं नरकस्य इदं त्रिविधं द्वारम्। किमिदं त्रिविधं द्वारम्? कामः क्रोधस्तथा लोभः। तस्मादेतत् त्रयं त्यजेत् परिहरेत्। अत्र श्रीमच्छङ्कर आह—"सर्व्वस्या आसुर्य्याः सम्पदः सङ्क्षेपोऽयमुच्यते, यस्मिंस्त्रिविधे सर्व्वे आसुरीसम्पद्भेदोऽनन्तोऽप्यन्तर्भवति, यत्परिहारेण परिहृतश्च भवति, यन्मूलं सर्व्वस्यानर्थस्य" इति; श्रीमद्बलदेवः—नन्वासुरीं प्रकृतिं नरकहेतुं श्रुत्वा ये मनुष्यास्तां परिहर्तुमिच्छन्ति तैः किमनुष्ठेयमिति चेत्तत्राह त्रिविधम्" इति; श्रीमन्मधुसूदनः—"नन्वासुरी सम्पदनन्तभेदवती कथं पुरुषायुषेणापि परिहर्त्तुं शक्येतेत्याशङ्क्य तां सङ्क्षिप्याह त्रिविधमिति" इति। २१।

आसुर्य्याः सम्पदो भेदोऽसंख्येयो न तां कोऽपि पुरुषायुषेणापि परिहर्त्तुं शक्येत यदि न स्यादन्तर्भावस्तस्यास्त्रिविधे। तत्त्रिविधपरिहारादेव दैवी सम्पल्लभ्यते, उत्तमां गतिश्चाप्नोतीत्याह। एतैः

यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥२३॥
तस्माच्छास्त्रं प्रमाणन्ते कार्य्याकार्य्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म्म कर्त्तुमिहार्हसि ॥२४॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोड़शोऽध्यायः ।

कामक्रोधलोभरूपैस्त्रिभिस्तमोद्वारैर्नरकद्वारैर्विमुक्तः आत्मनः श्रेयः तपोदानादिकमाचरति, ततस्तस्मादाचरणात् परां गतिं याति प्राप्नोति । २२ ।

शास्त्रत्वेन परिणतं भगवच्छासनमननुसृत्य न जातु सद्गतिर्भवतीत्याह । यः शास्त्रविधिमुत्सृज्य परिहाय कामचारतः स्वेच्छाचारेण वर्त्तते न स सिद्धिं, न सुखं न परां गतिमाप्नोति । २३ ।

अतएव शास्त्रानुसरणं कर्त्तव्यमित्याह तस्मादिति । तस्मात् कार्य्याकार्य्यव्यवस्थितौ कर्त्तव्याकर्त्तव्यव्यवस्थायां ते तव शास्त्रं प्रमाणम् । शास्त्रविधानोक्तं कर्म्म ज्ञात्वा इह कर्म्म कर्त्तुमर्हसि ।

अध्यायार्थसंग्रहः श्रीमद्यामुनमुन्यनुसारिणा श्रीमद्रामानुजेन— "देवासुरविभागोक्तिपूर्व्विका शास्त्रवश्यता । तत्त्वानुष्ठानविज्ञानस्थेम्ने षोड़श उच्यते ॥" इति ; श्रीमच्छ्रीधरेण—"अनेनाध्यायेन प्राक्तनीयकर्म्मवासनानुसारेणाभिव्यज्यमानसात्त्विकादिप्रकृतित्रयविभागेन दैव्यासुरीति सम्पद्द्वयमादानहानाभ्यामुपदिश्य कामक्रोधलोभानपहाय पुरुषार्थिना शास्त्रश्रवणेन तदुक्तकारिणा भवितव्यमिति निर्द्धारितम्" इति ; श्रीमच्छ्रीधरेण—"देवदैते यसम्पत्तिसंविभागेन षोड़शे । तत्त्वज्ञानेऽधिकारस्तु सात्त्विकस्येति दर्शितम् ॥" इति ; श्रीमद्बलदेवेन—"वेदार्थनैष्ठिका यान्ति स्वर्गं मोक्षञ्च शाश्वतम् । वेदबाह्यास्तु नरकानिति षोड़शनिर्णयः ॥" इति ; श्रीमन्मधुसूदनेन—"भक्तिरध्याये सर्व्वस्वा

आसुर्य्याः सम्पदो मूलभूतान् सर्व्वाश्रेयःप्रापकान् सर्व्वश्रेयःप्रतिबन्धकान् महादोषान् कामक्रोधलोभानपहाय श्रेयोऽर्थिना श्रद्दधानतया शास्त्र-प्रेरणेन तदुपदिष्टार्थानुष्ठानपरेण भवितव्यमिति सम्पद्द्वयविभागप्रदर्शन-मुखेन निर्द्धारितम्" इति; श्रीमद्विश्वनाथेन—"आस्तिका एव विन्दन्ति सद्गतिं सन्त एव ते। नास्तिका नरकं यान्तीत्यध्यायार्थो निरूपितः॥" इति। २४।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये षोड़शोऽध्यायः।

सप्तदशोऽध्यायः ।

अर्जुन उवाच—

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१॥

"यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः" इत्यतीताध्याये शास्त्रविधिपरित्यागादपि स्वेच्छाचरणमेवाभिप्रायगतौ च हेतुरुपलभ्यते । अतो ये तु न स्वेच्छाचारात् किन्तर्हि रागाधिक्यवशात् शास्त्रविधिं परित्यज्य रागवर्त्मनि तिष्ठन्त एव कर्म्मानुतिष्ठन्ति, तेषां तादृशी निष्ठा सत्त्वप्रधाना दैवी, रजःप्रधानासुरी, तमःप्रधाना राक्षसी वेति ज्ञातुं प्रश्नः समुत्थापितः श्रीमतार्ज्जुनेन । न खलु वक्तव्यमीदृशो रागमार्गो न कुत्रापि वर्त्तत इति—"यदा यमनुगृह्णाति भगवानात्मभावितः । स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥" (भा, ४स्क, २९अ, ४६श्लो) इत्यादौ शास्त्रविधेः रागस्यैव प्राधान्यं मन्यन्ते रागवर्त्मानुवर्त्तिनः । न केवलं भक्तिमार्ग एव शास्त्राद्रागस्याधिक्यं परिकल्पितं, ज्ञानमार्गेऽपि शास्त्राज्ज्ञानस्य, तथाहि—" 'वेदा अवेदाः' इति वचनात् इष्यत एवास्माभिः श्रुतेरप्यभावो प्रबोधे" (वे, सू, ४अ, १पा, ३सू, भा,) इति । कथम् ? "अविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च" (वे, सू, १अ, १पा, १सू, भा,) इति । यदि मन्यसे शास्त्रमाश्रित्यैव शास्त्रविधेः परिहारोऽत्र, अतः परिहारोऽपि शास्त्रविधेरन्तःपात्येव । न त्वयैवं मन्तव्यम्, यतः शास्त्राद्व्याख्यानस्यैवात्र प्राधान्यम् । 'वेदा अवेदाः' इति वचनस्य सुषुप्तौ सर्व्वेषां विलोपप्रदर्शकस्य व्याख्यानात् प्रबोधे प्रयोगः । स्वयं भगवता प्रदर्शितः शास्त्रानपेक्षया यः कश्चिद्रागवर्त्मनि वर्त्तते तस्मिन् सम्भाव्यते स्वाभाविकश्रद्धाप्रेरितहृदयस्यैव कार्य्यम् । अतएव वक्ष्यत्याचार्य्यः—"सत्त्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत । श्रद्धामयोऽयं पुरुषो यो

यच्छ्रद्धः स एव सः ॥" इति। श्रीमच्छङ्करस्त्वाह—"ये केचित् अवि-शेषिताः शास्त्रविधिं शास्त्रविधानं श्रुतिस्मृतिशास्त्रचोदनामुत्सृज्य परि-त्यज्य यजन्ते देवादीन् पूजयन्ति श्रद्धयान्विताः श्रद्धयास्तिक्यबुद्ध्यान्विताः संयुक्ताः सन्तः, श्रुतिलक्षणं स्मृतिलक्षणं वा किञ्चित् शास्त्रविधिमपश्यन्तो वृद्धव्यवहारदर्शनादेव श्रद्दधानतया देवादीन् पूजयन्ति, ते इह 'शास्त्र-विधिमुत्सृज्य यजन्ते श्रद्धयान्विताः' इत्येवं गृह्यन्ते। ये पुनः कञ्चित् शास्त्रविधिमुपलभमाना एव तमुत्सृज्य अयथाविधि देवादीन् पूजयन्ति, ते इह 'ये शास्त्रविधिमुत्सृज्य यजन्ते' इति न परिगृह्यन्ते। कस्मात्? श्रद्धयान्वितत्वविशेषणात्; देवादिपूजाविधिपरं किञ्चित् शास्त्रं पश्यन्त एव तदुत्सृज्य अश्रद्दधानतया तद्विहितायां देवादिपूजायां श्रद्धयान्विताः प्रवर्त्तन्ते इति न शक्यं परिकल्पयितुं यस्मात्, तस्मात् पूर्व्वोक्ता एव 'ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः' इत्यत्र गृह्यन्ते" इति; श्रीम-द्रामानुजः—"देवासुरविभागोक्तिमुखेन प्राप्यतत्त्वज्ञानं तत्प्राप्त्युपाय-ज्ञानं च वेदैकमूलमित्युक्तम्। इदानीमशास्त्रविहितस्यासुरत्वेनाफलत्वं शास्त्रविहितस्य गुणतस्त्रैविध्यं तस्य लक्षणञ्चोच्यते। तत्राशास्त्रविहितस्य निष्फलत्वमजानञ्छास्त्रविहिते श्रद्धासंयुक्ते यागादौ सत्त्वादिनिमित्तफल-भेदबुभुत्सयार्ज्जुनः पृच्छति" इति; श्रीमन्माध्वः—"गुणभेदान् प्रपञ्चय-त्यनेनाध्यायेन। शास्त्रविधिम् उत्सृज्य अज्ञात्वैव—'वेदः कृत्स्नोऽधि-गन्तव्यः सरहस्यो द्विजन्मना' इति विधिकृत्सृष्टौ हि ते:" इति; श्रीमच्छ्रीधरः—"पूर्व्वाध्यायान्ते 'यः शास्त्रविधिमुत्सृज्य वर्त्तते काम-चारतः। न स सिद्धिमवाप्नोति' इत्यनेन शास्त्रोक्तविधिमुत्सृज्य काम-चारेण वर्त्तमानस्य ज्ञानेऽधिकारी नास्तीत्युक्तम्। तत्र शास्त्रविधि-मुत्सृज्य कामचारं विना श्रद्धया वर्त्तमानानां किमधिकारोऽस्ति नास्ति वेति बुभुत्सया अर्ज्जुन उवाच य इति। अत्र च शास्त्रविधि-मुत्सृज्य यजन्त इत्यनेन शास्त्रार्थं बुद्ध्वा तमुल्लङ्घ्य वर्त्तमाना न गृह्यन्ते, तेषां श्रद्धया यजनानुपपत्तेः। आस्तिक्यबुद्धिर्हि श्रद्धा, न चासौ शास्त्र-विरुद्धेऽर्थे शास्त्रज्ञानवतां सम्भवति, तानेवाधिकृत्य 'त्रिविधा भवति

श्रद्धा' इति, 'यजन्ते सात्त्विका देवान्' इत्याद्युत्तरानुपपत्तेश्च। अतो नात्र शास्त्रोल्लङ्घिनो गृह्यन्ते, अपि तु क्लेशबुद्ध्या वा आलस्याद्वा शास्त्रार्थ-ज्ञाने प्रयत्नमकृत्वा केवलमाचारपरम्परावशेन श्रद्धया क्वचिद्देवताराध-नादौ प्रवर्त्तमाना गृह्यन्ते" इति; श्रीमद्बलदेवः—"वेदमधीत्य तद्वि-धिना तदर्थाननुतिष्ठन्तः शास्त्रीयश्रद्धायुक्ता देवाः; वेदमवज्ञाय यथे-च्छाचारिणो वेदबाह्यास्त्वसुरा इति पूर्वस्मिन्नध्याये त्वयोक्तम्। अथेयं मे जिज्ञासा ये शास्त्रेति। ये जनाः पाठतोऽर्थतश्च दुर्गमं वेदं विदित्वा आलस्यादिना तद्विधिमुत्सृज्य लोकाचारजातया श्रद्धयान्विताः सन्तो देवादीन् यजन्ते, तेषां शास्त्रविध्युपेक्षाश्रद्धाभ्यां पूर्व्वनिर्णीतदेवासुरविल-क्षणानां का निष्ठा" इति; श्रीमन्मधुसूदनः—"त्रिविधाः कर्म्मानु-ष्ठातारो भवन्ति, केचिच्छास्त्रविधिं ज्ञात्वापि अश्रद्धया तमुत्सृज्य काम-चारमात्रेण यत्किञ्चिदनुतिष्ठन्ति, ते सर्व्वपुरुषार्थायोग्यत्वात् असुराः, केचित्तु शास्त्रविधिं ज्ञात्वा श्रद्दधानतया तदनुसारेणैव निषिद्धं वर्ज्जयन्तो विहितमनुतिष्ठन्ति, ते सर्व्वपुरुषार्थयोग्यत्वाद्देवा इति पूर्व्वाध्यायान्ते सिद्धम्। ये तु शास्त्रीयविधिमालस्यादिवशादुपेक्ष्य श्रद्दधानतयैव वृद्ध-व्यवहारमात्रेण निषिद्धं वर्ज्जयन्तो विहितमनुतिष्ठन्ति, ते शास्त्रीयविध्यु-पेक्षालक्षणेनासुरसाधर्म्म्येण, श्रद्धापूर्व्वकानुष्ठानलक्षणेन च देवसाधर्म्म्येणा-न्विताः किमसुरेष्वन्तर्भवन्तु किंवा देवेष्वित्युभयधर्म्मदर्शनादेककोटि-निश्चायकादर्शनाच्च सन्दिहानः अर्ज्जुन उवाच" इति; श्रीमन्नीलकण्ठ आह—"ये पुरुषाः शास्त्रविधिं—शास्त्रपदेनात्र श्रुतिसदाचारकुलाचारा गृह्यन्ते सर्व्वेषां तेषां धर्म्मे प्रमाणत्वात्—तत्र योऽधिगतो विधिर्विधेय-स्तदुत्सृज्य सर्व्वात्मना परित्यज्य यजन्ते तातकूपादीन्—मत्पित्रा कृतो-ऽयं कूपः गङ्गाशतादप्यधिकोऽत्रैव स्नानपानावगाहनपरिचर्य्याप्रदक्षिण-प्रक्रमणरूपादेतत्सेवनात् अहमिष्टं फलम् अवश्यं प्राप्स्यामीति तत्र दृढ़तरया श्रद्धयान्विताः सन्तस्तेषां निष्ठा कीदृशी........। यदपि तु भाष्ये वृद्धव्यवहारदर्शनादेव श्रद्दधानतया देवादीन् यजन्त इत्युक्तं तत्राप्यविगीत एव वृद्धव्यवहारो ग्राह्यः, अविगीतेऽस्मिंस्तामसत्वादि-

श्रीभगवानुवाच—

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥२॥

श्रद्धाया अयोगात्" इति ; श्रीमद्विश्वनाथः—"नन्वासुरसर्गमुक्ता तदुपसंहारे 'यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः । न स सिद्धिमवाप्नोति न सुखं न परां गतिम्' इति त्वयोक्तं ....किन्तु कामभोगरहिता एव श्रद्धयान्विताः सन्तो यजन्ते तपोयज्ञज्ञानयज्ञजपयज्ञादिकं कुर्व्वन्ति, तेषां का निष्ठा" इति । ये जनाः शास्त्रविधिं शास्त्रोक्तं विधानमुत्सृज्य रागवशादनादृत्य श्रद्धयान्विताः श्रद्दधानाः यजन्ते देवादीन् पूजयन्ति—शास्त्रविधिमपश्यन्तो वृद्धव्यवहारदर्शनादेव श्रद्दधानतया देवादीन् पूजयन्तीति श्रीमच्छङ्करः, शास्त्रविधिमुत्सृज्य दुःखबुद्ध्या आलस्याद्वा अनादृत्य केवलमाचारप्रामाण्येन श्रद्धयान्विताः सन्तो यजन्त इति श्रीमच्छ्रीधरः, आलस्यादिना तद्विधिमुत्सृज्य लोकाचारजातया श्रद्धया अन्विता इति श्रीमद्बलदेवः, श्रुतिस्मृतिचोदनामुत्सृज्य आलस्यादिवशादनादृत्य नासुरवदश्रद्दधानाः किन्तु वृद्धव्यवहारानुसारेण श्रद्धयान्विता देवपूजादिकं कुर्व्वन्तीति श्रीमन्मधुसूदनः, श्रुतिसदाचारकुलाचाराधिगतं विधिं सर्व्वात्मना परित्यज्य यजन्ते पूजयन्ति तातकूपादीनिति श्रीमन्नीलकण्ठः ; हे कृष्ण, तेषान्तु का निष्ठा स्थितिः, सत्त्वम् आहो आहोस्वित् रजः अथवा तमः, तेषां निष्ठा सात्त्विकी राजसी अथवा तामसी । १ ।

'यजन्ते श्रद्धयान्विताः' इति प्रश्नगतं श्रद्धाशब्दमाश्रित्योत्तरमुवाचाचार्य्यस्त्रिविधेति । सा त्वदुक्ता स्वभावजा सहजा जन्मान्तरकृतो धर्म्मादिसंस्कारो मरणकालेऽभिव्यक्तः स्वभाव उच्यते, ततो जाता स्वभावजा इति श्रीमच्छङ्करस्तदनुयायिनश्च ; स्वभावः स्वासाधारणो भावः प्राचीनवासनानिमित्तस्तत्तद्रुचिविशेषः, यत्र रुचिस्तत्र श्रद्धा जायत इति श्रीमद्रामानुजः—सात्त्विकी, राजसी चैव तामसी चेति त्रिविधा श्रद्धा भवति, तां शृणु । २ ।

सत्त्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥३॥

सत्त्वेति । हे भारत, सर्व्वस्य पुरुषस्य श्रद्धा सत्त्वानुरूपा अन्तःकरणानुरूपा भवति, अयं पुरुषः श्रद्धामयः, यो जनो यच्छ्रद्धः यादृशी श्रद्धा यस्य स स एव—तादृशश्रद्धायुक्त एव । यो हि सत्त्वगुणप्रधानः स सात्त्विकश्रद्धायुक्तः, यो रजोगुणप्रधानः स राजसिकश्रद्धायुक्तः, यः पुनस्तमोगुणप्रधानः स तामसिकश्रद्धायुक्तः । श्रीमच्छ्रीधरो भागवतप्रमाणेन श्रद्धायाः सत्त्वकार्य्यत्वेऽपि सत्त्वगुणस्य रजस्तमःस्पृष्टत्वात् श्रद्धायास्त्रैविध्यं निरूपितवान् । स पुनर्विशेषमाह—"लोकाचारमात्रेण प्रवर्त्तमानेष्वेवं सात्त्विकराजसतामसश्रद्धाव्यवस्था ; शास्त्रजनितविवेकज्ञानयुक्तानां स्वभावविजयेन सात्त्विकी एकैव श्रद्धेति प्रकरणार्थः" इति । श्रीमद्बलदेवस्त्रिगुणात्मकमन्तःकरणं स्वीकृत्य स्पष्टमाह—"यस्मिन् पूज्ये देवादौ यक्षादौ प्रेतादौ च श्रद्धावान् भवति स पूजकोऽपि स एव, तत्तच्छब्देन व्यपदेश्यः—पूज्यगुणवान् पूजक इत्यर्थः" इति । एवमेव श्रीमद्विश्वनाथः तद्यथा—"यस्मिन् यजनीये देवे असुरे राक्षसे वा श्रद्धावान् यो भवति स स एव भवति तच्छब्देनैव व्यपदिश्यते" इति । श्रीमन्मधुसूदनः स्वव्याख्यानकौशलेनैवमाह—"सत्त्वं प्रकाशशीलत्वात् । सत्त्वप्रधानत्रिगुणापञ्चीकृतपञ्चमहाभूतारब्धमन्तःकरणम् । तच्च क्वचिदुद्रिक्तसत्त्वमेव यथा देवानाम्, क्वचिद्रजसाभिभूतसत्त्वं यथा यक्षादीनाम्, क्वचित्तमसाभिभूतसत्त्वं यथा प्रेतभूतादीनाम्, मनुष्याणान्तु प्रायेण व्यामिश्रमेव । तच्च शास्त्रीयविवेकज्ञानेनोद्भूतसत्त्वं रजस्तमसी अभिभूय क्रियते । शास्त्रीयविवेकविज्ञानशून्यस्य तु सर्व्वस्य प्राणिजातस्य सत्त्वानुरूपा श्रद्धा, सत्त्ववैचित्र्याद्विचित्रा भवति । सत्त्वप्रधानेऽन्तःकरणे सात्त्विकी, रजःप्रधाने तस्मिन् राजसी, तमःप्रधाने तस्मिन् तामसी" इति । यद्यप्यत्र देवानामुद्रिक्तसत्त्वं युक्तम्, तथापि न सर्व्वथा रजसा तमसास्पृष्टत्वं तेषां पराहन्तिधर्म्मवत्त्वात् । ३ ।

यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥४॥
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥५॥
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
माञ्चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥६॥

कार्य्यभेदतः सत्त्वादिनिष्ठाः प्रपञ्चयति यजन्त इति । सात्त्विका जना देवान् वसुरुद्रादीन्, राजसा जना यक्षरक्षांसि कुवेरनिर्ऋतिप्रभृतीन्, तामसा जनाः प्रेतान् भूतगणांश्च उल्कामुखकटपूतनासंज्ञान् सप्तमातृकादीन् यजन्ते । "दुःखासंभिन्नोत्कृष्टसुखहेतुभूतदेवयागविषया श्रद्धा सात्त्विकी, दुःखसंभिन्नाल्पसुखजननी राजसी श्रद्धा, दुःखप्रायात्यल्पसुखजननी तामसी" इति श्रीमद्रामानुजः । "एते च बलवद्वैदिकसत्प्रसङ्गात् स्वभावान् विजित्य कदाचिद्वेदेऽप्यधिकृतो भवति" इति श्रीमद्बलदेवः । ४ ।

रजस्तमःप्रधानाः पुनस्तपोनिरताः किं कुर्व्वन्ति तदाह द्वाभ्याम् अशास्त्रेति, कर्शयन्त इति । दम्भाहङ्कारसंयुक्ताः दम्भो धार्म्मिकत्वख्यापनम्, अहङ्कारः अहमेव श्रेष्ठ इति दुरभिमानः, ताभ्यां संयुक्ताः, कामरागबलान्विताः कामोऽभिलाषो राग आसक्तिस्तज्जनितं बलं साहसिकता तेन अन्विताः सन्तोऽचेतसोऽविवेकिनः शरीरस्थं भूतग्रामं देहेन्द्रियाकारेण परिणतं पृथिव्यादिभूतसमूहं वृथोपवासादिना कर्शयन्तः कृशीकुर्व्वन्तः अन्तःशरीरस्थं हृद्यधिष्ठितं मामन्तर्यामिणञ्च मत्कृतशास्त्रमर्य्यादोल्लङ्घनेन कृशीकुर्व्वन्तः मन्दप्रभावं कुर्व्वन्तः ये जना अशास्त्रविहितं—"वशीकृत्येन्द्रियग्रामं संयम्य च मनस्तथा । सर्व्वान् संसाधयेदर्थानक्षिण्वन् योगतस्तनुम् ॥" (मनु, २अ, १००श्लो) इत्यादिशास्त्रेण न विहितं घोरं भीषणमुत्कटं तपस्तप्तशिलारोहणादि तप्यन्ते । तानासुरनिश्चयान् रजस्तमःप्रकृतिसम्भूतासुराध्यवसायवतो—मनुष्यत्वेन

आहारस्त्वपि सर्व्वस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥
आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥८
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥

प्रतीयमानानप्यसुरकर्म्मकारित्वादसुरानिति श्रीमन्मधुसूदनः—विद्धि जानीहि। अशास्त्रविहितमित्यत्र अशास्त्रेण बुद्धागमेनेति यदुक्तं तन्मन्दम्। यतो बुद्धागमोऽपि यज्ञतपःप्रभृतीनि स्वर्गसाधनानि निन्दति, तद्यथा—"विविधैश्च कारणैस्ते कायं परिशोषयन्ति सम्मूढाः। मिथ्यादृष्टिपरीताः क्षिप्रं प्रपतन्त्यपायेषु॥" (ल, वि, १७।२।१) इति। ५।६।

गुणभेदादाहारादिभेदोऽपि भवतीति तदेव वक्तुमुपक्रमते आहार इति। सर्व्वस्य जनस्य न केवलं श्रद्धैव आहारोऽपि त्रिविधः प्रियो भवति। यज्ञः तपः दानं त्रिविधम्, तेषामिमं भेदं शृणु। ७।

तत्रादौ सात्त्विकाहार उच्यते आयुरिति। आयुश्चिरजीवनं, सत्त्वं स्थैर्य्यम्—उत्साह इति श्रीमच्छ्रीधरः, चित्तस्थैर्य्यं बलवति दुःखेऽपि निर्व्विकारत्वापादकमिति श्रीमन्मधुसूदनः—बलं शरीरसामर्थ्यम्, आरोग्यं रोगराहित्यं, सुखं तृप्तिः, प्रीतिरभिरुचिः, एषां विवर्द्धनाः विशेषेण वृद्धिकराः, रस्या रसयुक्ताः, स्निग्धाः सहजेनागन्तुकेन वा स्नेहेन युक्ताः, स्थिराः रसांशेन शरीरे चिरकालावस्थायिनः, हृद्याः दृष्टिमात्रादेव हृदयप्रियाः, सात्त्विकप्रियाः सात्त्विकानां प्रिया आहाराः। ८।

राजसाहार उच्यते कट्विति। अतिशब्दः कट्वादिषु सप्तस्वपि योजनीय इति व्याख्यातारः। अतिकटुः निम्बादिः, अत्यम्लः तिन्तिडादिः,

यातयामं गतरसं पूति पर्य्युषितञ्च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥१०॥

अतिलवणः सैन्धवादिः, अत्युष्णः अत्युत्तप्तः, अतितीक्ष्णः मरीचादिः, अतिरूक्षः कङ्गुकोद्रवादिः, अतिविदाही सन्तापकः सर्षपादिः। अतिकट्वादयो दुःखशोकामयप्रदाः दुःखं तात्कालिकहृदयसन्तापादि, शोकः पश्चाद्भावि दौर्मनस्यम्, आमयो रोगः धातुवैषम्यं प्रददतीति तथाविधा आहाराः राजसस्य इष्टाः प्रियाः। ९।

तामसाहार उच्यते यातयाममिति। यातयामं यातो यामः प्रहरो यस्य पक्वस्यान्नादेः तत् यातया संप्रहरात् प्राक्कृतं, शैत्यं प्राप्तम्—अर्द्धपक्वमिति श्रीमच्छङ्करः, चिरकालावस्थितमिति श्रीमद्रामानुजः; गतरसं नीरसं—रसवियुक्तमिति श्रीमच्छङ्करः, त्यक्तस्वाभाविकरसमिति श्रीमद्रामानुजः, निष्पीडितसारमिति श्रीमच्छ्रीधरः, वैरस्यवदिति श्रीमद्बलदेवः, उद्धृतसारं मथितदुग्धादीति श्रीमन्मधुसूदनः; पूति दुर्गन्धम्, पर्य्युषितं पक्वं सत् रात्र्यन्तरितञ्च, उच्छिष्टमन्यभुक्तावशिष्टम्, अमेध्यमभक्ष्यमयज्ञशिष्टम्, एवंविधं यत् भोजनं भोज्यं तत् तामसप्रियं तामसानां प्रियम्। 'चात् वैद्यकशास्त्रोक्तमपथ्यं समुच्चीयते, एतादृशभोजनस्य दुःखशोकामयप्रदत्वमतिप्रसिद्धमिति कण्ठतो नोक्तम्' इति श्रीमन्मधुसूदनः। स तु 'अत्र क्रमेण रस्यादिवर्गः सात्त्विकः, कट्वादिवर्गो राजसः, यातयामादिवर्गस्तामस इत्युक्तमाहारवर्गत्रयम्' इति प्रस्तुत्याह "तत्र सात्त्विकवर्गविरोधित्वमितरवर्गद्वये द्रष्टव्यम्। तथाहि, अतिकटुत्वादिकं रस्यत्वविरोधि तादृशस्यानास्वाद्यत्वात्; रूक्षत्वं स्निग्धत्वविरोधि, तीक्ष्णविदाहित्वे धातुपोषणविरोधित्वात् स्थिरत्वविरोधिनी, अत्युष्णत्वादिकं हृद्यत्वविरोधि, आमयप्रदत्वमायुःसत्त्वबलारोग्यविरोधि, दुःखशोकप्रदत्वं सुखप्रीतिविरोधि। एवं सात्त्विकवर्गविरोधित्वम्। तामसवर्गेऽपि गतरसत्वयातयामत्वपर्य्युषितत्वानि यथासम्भवं रसत्वस्निग्धत्वस्थिरत्वविरोधीनि पूतित्वोच्छिष्टत्वामेध्यत्वानि हृद्यत्वविरोधीनि

अफलाकाङ्क्षिभिर्यज्ञो विधिदिष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥११॥
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१२॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३॥

आयुःसत्त्वादिविरोधित्वन्तु स्पष्टमेव । राजसवर्गे दृष्टविरोधभावं, तामसवर्गे तु दृष्टादृष्टविरोध इत्यभिप्रायः" इति । १० ।

अथेदानीं त्रिविधो यज्ञ उच्यते । तत्र सात्त्विकं यज्ञमाह अफलेति । अफलाकाङ्क्षिभिः फलाभिलाषरहितैर्जनैः यष्टव्यमेवेति यज्ञानुष्ठानं कर्त्तव्यमेवेति मनः समाधाय निश्चित्य विधिदिष्टः विधानविहितो यो यज्ञ इज्यते अनुष्ठीयते स सात्त्विकः सत्त्वप्रधानः । ११ ।

राजसयज्ञमाह अभिसन्धायेति । फलमभिसन्धाय दृष्टादृष्टफलमुद्दिश्य दम्भार्थमपि च धार्म्मिकत्वख्यापनाय च यत्तु इज्यतेऽनुष्ठीयते तं यज्ञं राजसं विद्धि जानीहि । "चैवेति विकल्पसमुच्चयाभ्यां त्रैविध्यसूचनार्थौ—पारलौकिकं फलमभिसन्धायैवादम्भार्थत्वेऽपि पारलौकिकफलानभिसन्धानेऽपि दम्भार्थमेवेति विकल्पेन—द्वौ पक्षौ, पारलौकिकफलार्थमपीहलौकिकदम्भार्थमपीति समुच्चयेनैकः पक्षः" इति श्रीमधुसूदनः । १२ ।

तामसयज्ञमाह विधीति । विधिहीनं यथाशास्त्रचोदितविपरीतम्, असृष्टान्नं ब्राह्मणादिभ्योऽनिष्पादितमन्नं यस्मिंस्तं, मन्त्रहीनं मन्त्रैर्हीनं—मन्त्रतः स्वरतो वर्णतश्च वियुक्तमिति श्रीमच्छङ्करः—"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । यथेन्द्रशत्रुः स्वरतोऽपराधात् स वाग्वज्रो यजमानं हिनस्ति ॥" इति मन्त्रतो हीनत्वं श्रीमच्छङ्करेणाभिप्रेतम् ; अदक्षिणं यथोक्तदक्षिणारहितं

देवद्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते ॥१४॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥

श्रद्धाविरहितं श्रद्धाशून्यञ्च यज्ञं तामसं परिचक्षते कथयन्ति पण्डिताः। १३।

अथेदानीं त्रिविधस्तपो वक्ष्यमाणो कायवाङ्मनोभेदात् तपस्त्रिविधं प्रदर्शयति देवेति। देवा इन्द्रादयः ब्रह्मविद्याधिगमाय संस्काररूपद्विजन्मानः, गुरवः पित्रादयः, प्राज्ञाः पण्डितास्तत्त्वविदः, तेषां पूजनं प्रणामशुश्रूषादि, शौचं बाह्याभ्यन्तरशुद्धिः, आर्ज्जवमवक्रत्वम्, ब्रह्मचर्य्यं विध्यनुगतयोषित्सम्भाषणम्, योषित्सु भोग्यतायुक्तेक्षणादिरहितत्वम् इति श्रीमद्रामानुजः, मैथुनासमाचरणमिति श्रीमच्छ्रीधरः, विहितमैथुनमिति श्रीमद्बलदेवः ; अहिंसा प्राणिनामपीडनञ्च शारीरं शरीरनिर्व्वर्त्त्यं तप उच्यते। १४।

वाङ्मयं तप उच्यते अनुद्वेगकरमिति। अनुद्वेगकरं न कस्यचित् दुःखकरं, सत्यं यथावद्भाषणं—यथादृष्टार्थवचनमिति श्रीमच्छ्रीधरः, प्रामाणिकमिति श्रीमद्बलदेवः, प्रियहितञ्च प्रियं प्रीतिकरं हितं कल्याणकरञ्च—श्रवणकाले परिणामे च सुखदमिति श्रीमन्नीलकण्ठः, यत् वाक्यम्—'चकारो विशेषणानां समुच्चयार्थः अनुद्वेगकरत्वादिविशेषणचतुष्टयेन विशिष्टं न त्वेकेनापि विशेषणेन न्यूनम्—यथा शान्तो भव वत्स, स्वाध्यायं योगञ्चानुतिष्ठ तथा ते श्रेयो भविष्यतीत्यादि' इति श्रीमन्मधुसूदनः श्रीमच्छङ्करमनुसृत्य—तत् वाक्यं स्वाध्यायाभ्यसनञ्च वेदाभ्यासश्च वाङ्मयं तप उच्यते। १५।

मानसं तप उच्यते मन इति। मनःप्रसादः मनसोऽव्याकुलत्वम्—

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७॥

मनसः प्रशान्तिः स्वच्छतापादनमिति श्रीमच्छङ्करः, मनसः क्रोधादि-रहितत्वमिति श्रीमद्रामानुजः, अनाकुलता नैर्मल्यमिति श्रीमद्धरिः, स्वच्छतेति श्रीमच्छ्रीधरः, वैमल्यं विषयस्मृत्यवैयग्र्यमिति श्रीमद्बलदेवः, चिन्ताव्याकुलताराहित्यमिति श्रीमन्मधुसूदनः, रागद्वेषादिराहित्यमिति श्रीमन्नीलकण्ठः ; सौम्यत्वम् अन्तःशीतलतया शान्तमूर्त्तित्वम्—सौमनस्यं......मुखादिप्रसादकार्य्यन्तःकरणस्य वृत्तिरिति श्रीमच्छङ्करः, मनसः परेषामभ्युदयप्रावण्यमिति श्रीमद्रामानुजः, सर्व्वेभ्यो हितैषित्वमहिताचिन्तनञ्चेति श्रीमद्धरिः, अक्रौर्य्यमिति श्रीमन्माध्वः, सर्व्वसुखेच्छुत्वमिति श्रीमद्बलदेवः, सर्व्वेषां कल्याणैषित्वं प्रतिषिद्धाचिन्तनञ्चेति श्रीमन्मधुसूदनः, परहितैषित्वमिति श्रीमन्नीलकण्ठः ; मौनं वाङ्मय-मनम्—वाक्संयमोऽपि मनःसंयमपूर्व्वकोऽपि भवति इति कार्य्येण कारणमुच्यते मनःसंयम इति श्रीमच्छङ्करः, मनसो वाक्प्रवृत्तिनियमन-मिति श्रीमद्रामानुजः, मननशीलत्वमिति श्रीमन्माध्वः, मननमिति श्रीमच्छ्रीधरः, आत्ममननमिति श्रीमद्बलदेवः, एकाग्रतयात्मचिन्तनमिति श्रीमन्मधुसूदनः, वाक्संयम इति श्रीमन्नीलकण्ठः ; आत्मविनिग्रहः—मनोनिरोधः सर्व्वत इति श्रीमच्छङ्करः, मनसो विषयेभ्यः प्रत्याहार इति श्रीमच्छ्रीधरबलदेवौ, मनसो विशेषेण सर्व्ववृत्तिनिग्रहः निरोध-समाधिरसम्प्रज्ञात इति श्रीमन्मधुसूदनः, मनोनिरोध इति श्रीमन्नील-कण्ठः ; भावसंशुद्धिः परैर्व्यवहारकालेऽमायावित्वमिति श्रीमच्छङ्करः, आत्मव्यतिरिक्तविषयचिन्ताविरहितत्वमिति श्रीमद्रामानुजः, व्यवहारे मायाराहित्यमिति श्रीमच्छ्रीधरः, व्यवहारे निष्कपटतेति श्रीमद्बलदेवः, कामक्रोधलोभादिमलनिवृत्तिरिति श्रीमन्मधुसूदनः, इत्येतत् एवम्प्रकारं मानसं तप उच्यते । १६ ।

पूर्व्वोक्तं त्रिविधं तपः सात्त्विकादिभेदात् त्रैविध्येन भिद्यते । तत्र

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१८॥
मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥१९॥

प्रथमं सात्त्विकमाह श्रद्धयेति । तत् त्रिविधं तपः अफलाकाङ्क्षिभिः फलाभिलाषशून्यैः युक्तैः समाहितैर्नरैः परया प्रकृष्टया श्रद्धया तप्तमनुष्ठितं सात्त्विकं परिचक्षते कथयन्ति शिष्टाः । १७ ।

राजसं तप आह सत्कारेति । सत्कारः साधुवादः साधुरयं तापस इति प्रशंसावादः, मानः सम्भ्रमः प्रत्युत्थानाभिवादनादिः, पूजा पादप्रक्षालनार्थदानाद्या, एतदर्थं दम्भेन धार्म्मिकत्वख्यापनेन च यत् तप इह क्रियतेऽनुष्ठीयते तत् चलमचिरस्थायि अध्रुवमनिश्चितं तपः राजसमुच्यते । न हि सत्कारादिप्रार्थिनानुष्ठितं तपः चिरस्थायि भवितुमर्हति, पृथग्जनादिसाधुवादादीनां चलत्वात्, विज्ञजनैरस्य हेयत्वात्, नवनवपरिवर्त्तनेनास्य जनहृदयाकर्षणे प्रयासवत्त्वात् तपसश्चलत्वमध्रुवत्वमवश्यम्भावि । १८ ।

तामसं तप आह मूढ़ेति । मूढ़ग्राहेणाविवेककृतानिश्चयदुराग्रहेणात्मनः पीड़या अतिमात्रशरीरकर्शनादिना यत् तपः क्रियते, परस्य उत्सादनार्थमनिष्टसाधनार्थं वा यत् तपोऽभिचाररूपं क्रियते तत्तपस्तामसमनुदाहृतं कथितम् । अथर्व्वणि शत्रूत्सादनाभिप्रायका बहवोऽभिचारमन्त्रा विद्यन्ते तन्निदर्शनरूपोऽयमुद्ध्रियते ऋक्संहितोक्तोऽभिचारमन्त्रः—"ऋषभं मा समानानां सपत्नानां विषासहिम् । हन्तारं शत्रूणां कृधि विराजं गोपतिम् गवाम् ॥ अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः । अधः सपत्ना मे पदोरिमे सर्व्वे अभिष्ठिताः ॥ अत्रैव वोऽपि नह्याम्युभे आर्त्नी इव ज्यया । वाचस्पते निषेधेमान्यथा मदधरं वदान् ॥ अभिभूरहमागमं विश्वकर्म्मेण धाम्ना । आ वश्चित्तमा वो व्रतमा वोऽहं समितिं ददे ॥ योगक्षेमं व आदायाहं भूयासमुत्तम

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥२०॥
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥२१॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥२२॥

था वो मूर्द्धानमक्रमीम्। अधस्पदान्म उद्वदत मण्डूका इवोदकान्म-ण्डूका उदकादिव ॥" (१०म, १६६सू, १—५ऋक्) इति । १९ ।

इदानीं दानभेदं वक्तुं प्रथमन्तावत् सात्त्विकं दानमाह। दातव्यमिति दानं कर्त्तव्यमिति बुद्ध्या अनुपकारिणे प्रत्युपकारं कर्त्तुमसमर्थाय, समर्थाय तु तन्निरपेक्षत्वेन, अनुपकारकर्त्रे च—तथाहि महाभारते "अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत्। जयेत् कदर्य्यं दानेन जयेत् सत्येन चानृतम्॥" (उ, प, ३८अ, ३४श्लो), कदर्य्यमर्थादिलोभवशात् परोपकारविमुखम्; "शत्रुं मित्रञ्च ये नित्यं तुल्येन मनसा गिरा। भजन्ति मैत्र्या सङ्गम्य ते नराः स्वर्गगामिनः॥" (अनु, प, १४४अ, ३४श्लो) इति शत्रोरपि दानादिना सेवनं कर्त्तव्यमित्यनुशास्ति; देशे धर्म्मक्षेत्रे, काले दुर्भिक्षादौ, पात्रे "दरिद्रं भर कौन्तेय" इति न्यायात् दरिद्रायातुराय, हजन्ते रक्षकाय विद्यातपोभिरात्मनः परेषां दातुश्च पालनक्षमाय यद्दानं दीयते तद्दानं सात्त्विकं स्मृतं ज्ञेयम्। २०।

राजसं दानमाह यत्त्विति। प्रत्युपकारलाभार्थं कालेऽस्मादुपकारो भविष्यतीत्यभिसन्धाय फलं स्वर्गादिकमुद्दिश्य वा पुनः परिक्लिष्टं क्लेशसंयुक्तं यथा स्यात्तथा क्लिष्टचित्तेनेति यावत् यद्दानं दीयते तद्दानं राजसं स्मृतं ज्ञेयम्। २१।

तामसं दानमाह अदेशेति। अदेशे अधर्म्मक्षेत्रे अकालेऽनुपयुक्त-

ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥२३॥

काले, अपात्रेभ्यः—'मा प्रयच्छेश्वरे धनम्' इति न्यायाद्धनवदादिभ्यः, असत्कृतं सत्कारशून्यम् अवज्ञातं तिरस्कृतं यथा स्यात्तथा यद्दानं दीयते तत् तामसमुदाहृतं कथितम्। २२।

न खलु भगवद्भाववर्जितं यज्ञतपोदानादिकं मोक्षाय भवति। कथं वा भगवद्भावयुक्तत्वेन तानि निर्वर्त्यानि तदाह ओमिति। ओं तत् सदिति त्रिविधः सर्वगतं सर्वातीतं सर्वान्तर्भावकमिति त्रिप्रकारो ब्रह्मणो निर्देशो नामधेयं स्मृतः। तत्र ओम् सर्वगतं ब्रह्म यथा—"ओमिति ब्रह्म। ओमितीदꣳ सर्वम्। ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओꣳ शोमिति शस्त्राणि शꣳसन्ति ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमिति ब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ;—ब्रह्मोपाप्नवानीति; ब्रह्मैवोपाप्नोति।" (तै, उ, १।८) ; "ओमित्येतदक्षरमिदं सर्वम्" (मा, उ, १) ; "एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कारः" (प्र, उ, ५।२) इत्याद्याः। तत् सर्वातीतं ब्रह्म यथा—"तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्। कथं नु तद्विजानीयां किमु भाति विभाति वा॥" (कठ, ५।१४) ; "तत्त्वमसि" (छा, उ, ६।७।८) ; "तदिति वा एतस्य महतो भूतस्य नाम भवति" (ऐ, उ, नी, क, ५) इत्याद्याः। सत् सर्वान्तर्भावकं ब्रह्म यथा—"सदेव सोम्येदमग्र आसीत्" (छा, उ, ६।२।१) इति। पुरा तेन ब्रह्मनिर्देशेन ब्रह्माभिधानेनैकत्वेन ब्राह्मणा विहिताः, तद्यथा—"तस्मादेवंवित् शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति, सर्वमात्मानं पश्यति, नैनं पाप्मा तरति, सर्वं पाप्मानं तरति, नैनं पाप्मा तपति, सर्वं पाप्मानं तपति, विपापो विरजो विचिकित्सो ब्राह्मणो भवति" (बृ,आ, उ, ४।४।२३) इति ; तेन

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥२४
तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥२५॥

वेदा विहिताः, यथा "अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्व्वाणि निश्वसितानि" (बृ, आ, उ, ४।४।१०) ; "अग्नेरृग्वेदो वायोर्यजुर्व्वेद आदित्यात् सामवेदः" इति श्रुत्यनुसारतो मनुः "अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥" (मनु १अ, २३श्लो) ; "तेने ब्रह्म हृदा य आदिकवये" (भा, १स्क, १अ, १श्लो) इत्यादि ; तेन यज्ञाश्च विहिताः यथा, "कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः । साध्यानाञ्च गणं सूक्ष्मं यज्ञञ्चैव सनातनम् ॥" (मनु १अ, २२श्लो) इति । कर्म्मणां प्रमादप्रयुक्तस्य वैगुण्यस्य परिहाराय साद्गुण्यविधानाय च यथोक्तनान्नामन्यतमोच्चारणमिति व्याख्यातारः । भगवद्भाववर्ज्जितत्वमेव वैगुण्यं तद्भावसम्पन्नत्वमेव साद्गुण्यमिति न कश्चिद्विरोधः । २३ ।

तत्त्रयाणां प्रयोगं वक्तुं प्रथमन्तावदोङ्कारस्य नियोगमाह तस्मादिति । तस्मात् ओमिति उदाहृत्य उच्चार्य्य विधानोक्ताः शास्त्रोक्ताः यज्ञदानतपःक्रियाः ब्रह्मवादिनां ब्रह्मज्ञानां न त्वपरेषां सततं प्रवर्त्तन्ते । "परञ्चापरञ्च ब्रह्म यदोङ्कारः" इति सर्व्वगतं ब्रह्मैवोङ्कारप्रतिपाद्यम् । यज्ञीयोपकरणेषु दानसामग्रीषु तपःक्रियासु च ब्रह्मानुभूय यज्ञाद्यनुष्ठानमोमुच्चारणे हेतुः । अतएवाहाचार्य्यो 'ब्रह्मवादिना'मिति, उपनिषत्सु सर्व्वगतत्वस्य प्राधान्यात् । २४ ।

ब्रह्मवाचकस्य तच्छब्दस्य नियोगमाह तदिति । तदिति ब्रह्माभिधानमुदाहृत्य उच्चार्य्य विविधाः यज्ञतपःक्रियाः दानक्रियाश्च फलमनभि-

सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।
प्रशस्ते कर्म्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह ॥२८॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ।

सन्धाय मोक्षकाङ्क्षिभिः क्रियन्ते निर्वर्त्त्यन्ते । तदिति सर्व्वातीतं ब्रह्म, तद्भावापन्नो हि फलाकाङ्क्षातीतो भवति, अतएवाहाचार्य्यः 'फलमनभिसन्धाय' इति । २५ ।

सर्व्वगतं सर्व्वातीतं सर्व्वात्मभावकोऽस्मभावयितुं सच्छब्दस्य विस्तृतनियोगमाह द्वाभ्यां सद्भाव इति, यज्ञ इति । सद्भावे अस्तित्वे—अस्तित्वमात्रग्रहणात् निखिलजगज्जीवात्मभावनं सिध्यति, साधुभावे सद्वृत्ततायां—साधुभावेनाविर्भूतस्वरूपात्मभावनं सिध्यति, तथा प्रशस्ते माङ्गलिके कर्म्मणि—एतेन संसृतौ भगवल्लीलात्मभावनं सिध्यति, सच्छब्दः प्रयुज्यते सङ्गच्छते । यज्ञे तपसि दाने च स्थितिः तत्परतयावस्थानं निष्ठा सदिति च उच्यते । तदर्थीयं तच्छब्दवाच्यार्थस्तदर्थः तदर्थसम्पर्कीयम् ईश्वरप्रयोजनं कर्म्म च एव सत् इत्येव अभिधीयते कथ्यते । यज्ञोपकरणादिषु तद्गतत्वेन, तेषु च फलाकाङ्क्षावर्ज्जनेन तदतीतत्वेन पृथक्साधनं समाप्य एकस्मिन्नस्तित्वे तद्द्वयं सर्व्वैरात्मभावकत्वेनात्मभावयन् कृतार्थतामेति साधक इति साधनपरम्परा श्लोकैरेतैः प्रदर्श्यते । सर्व्वेष्वनुष्ठानेषु ओं तत् सदित्येवंरूपेण समुदायावयवेन गृह्यते, तद्दृष्ट्वैव श्रीमन्मधुसूदन आह—"यस्यैकैकोऽवयव एतादृशः, किं वक्तव्यं तत्समुदायस्य तु ओं तत् सदिति निर्द्देशस्य माहात्म्यम्" इति । २६।२७ ।

"ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः" इति प्रश्नस्यायमंशं

सर्वाध्यायोपसंहरति अश्रद्धयेति । अश्रद्धया हुतं हवनं कृतं, दानं दत्तं, तपः तप्तम्, यच्च कृतमन्यत्, तत्सर्वमसत् इति उच्यते सद्भिः, हे पार्थ, न च तत् प्रेत्य नो इह युज्यते । अत्र "यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः" (१६।२३), "ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः" इत्यनयोर्भेदो बोध्यः । शास्त्रविधिमुपेक्ष्य यः स्वेच्छाचारेण वर्त्तते स 'न सिद्धिं न सुखं न परां गतिं प्राप्नोति'। ये तु आलस्यादिवशात् शास्त्रचर्चामकृत्वा केवलं वृद्धपरम्परागतं व्यवहारजातम्, शिष्टेभ्यः श्रुतं पश्यन्तं वा अवलम्ब्य यज्ञतपोदानादिषु प्रवर्त्तन्ते, ते तत् सदित्युच्चारणेन रजस्तमसाभिभूय श्रद्धानुसन्धानं तैरनुवर्त्तन्ति, "अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते" इति न्यायात् ते मोक्षाय योग्या भवन्ति । आह च श्रीमद्गिरिः—"अनेन शास्त्राभिज्ञानामपि श्रद्धावतां श्रद्धया सात्त्विकादित्रैविध्यभाजां राजसतामसाहारादित्यागेन सात्त्विकाहारादिसेवया सत्त्वैकशरणानां प्रागमपि यज्ञादिवैगुण्यं ब्रह्मनामनिर्देशेन परिहरतां परिशुद्धबुद्धीनां श्रवणादिसामग्रीसम्पन्नतत्त्वसाक्षात्कारवतां मोक्षोपपत्तिः" इति । अध्यायार्थसंग्रहः श्रीमच्छ्रीधरेण —"रजस्तमोमयीं त्यक्त्वा श्रद्धां सत्त्वमयीं श्रितः । तत्त्वज्ञानेऽधिकारी स्यादिति सप्तदशे स्थितम् ॥" इति ; श्रीमद्बलदेवेन—"श्रद्धां स्वभावजां हित्वा शास्त्रजां तां समाश्रितः । निःश्रेयसाधिकारी स्यादिति सप्तदशे स्थितिः ॥" इति ; श्रीमन्मधुसूदनेन—"तदेवमस्मिन्नध्याये आलस्यादिनानादृतशास्त्राणां श्रद्धापूर्वकं वृद्धव्यवहारमात्रेण प्रवर्त्तमानानां शास्त्राणामनादरेणासुरसाधर्म्येण किमसुरा अमी देवा वेत्यर्जुनसंशयविषयाणां राजसतामसश्रद्धापूर्वकं राजसतामसयज्ञादिकारिणोऽसुराः शास्त्रीयज्ञानसाधनानधिकारिणः सात्त्विकश्रद्धापूर्वकं सात्त्विकयज्ञादिकारिणस्तु देवाः शास्त्रीयज्ञानसाधनाधिकारिण इति श्रद्धात्रैविध्यप्रदर्शनेन भगवता निर्णयः कृतः" इति । २८ ।

इति श्रीमद्भगवद्गीतासमन्वयभाष्ये सप्तदशोऽध्यायः ।

अष्टादशोऽध्यायः ।

अर्ज्जुन उवाच—

सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक् केशिनिसूदन ॥१॥

अतीतेष्वध्यायेषूक्तानर्थानस्मिन्नध्याये सङ्क्षेपेणाकलय्योपसंहारं विदधात्याचार्य्यः । अत्र श्रीमच्छङ्करः—"सर्व्वस्यैव गीताशास्त्रस्यार्थोऽस्मिन्नध्याये उपसंहृत्य सर्व्वश्च वेदार्थो वक्तव्य इत्येवमर्थोऽयमध्याय आरभ्यते । सर्व्वेषु ह्यतीतेष्वध्यायेषूक्तोऽर्थोऽस्मिन्नध्यायेऽवगम्यते" इति । श्रीमच्छ्रीधरः—"पूर्व्वैरध्यायैर्व्विस्तरेण यतस्ततो विक्षिप्ततयोक्तमर्थं सुखप्रतिपत्त्यर्थं सङ्क्षेपेणोपसंहृत्याभिधातुमध्यायान्तरमवतारयति" इति । श्रीमद्रामानुजः—"अतीतेनाध्यायद्वयेनाभ्युदयश्रेयःसाधनभूतं वैदिकमेव यज्ञतपोदानादिकं कर्म्म नान्यत्, वैदिकस्य कर्म्मणः सामान्यलक्षणं प्रणवान्वयः । तत्र मोक्षाभ्युदयसाधनयोर्भेदस्तत्सच्छब्दनिर्द्देश्यानिर्द्देश्यत्वेन मोक्षसाधनञ्च कर्म्मफलाभिसन्धिरहितं यज्ञादिकं तदारम्भश्च सत्त्वोद्रेकाद्भवति सत्त्ववृद्धिश्च सात्त्विकाहारसेवयेत्युक्तम् । अनन्तरं मोक्षसाधनतया निर्द्दिष्टयोस्त्यागसन्न्यासयोरैक्यं, त्यागस्य च स्वरूपं भगवति सर्व्वेश्वरे च सर्व्वकर्म्मणः कर्त्तृत्वानुसन्धानं सत्त्वरजस्तमसां कार्य्यवर्णनेन सत्त्वगुणावश्योपादेयत्वं स्ववर्णोचितानां कर्म्मणां परमपुरुषाराधनभूतानां परमपुरुषप्राप्तिनिर्व्वर्त्तनप्रकारः कृत्स्नस्य गीताशास्त्रस्य सारार्थो भक्तियोग इत्येते प्रतिपाद्यन्ते" इति । श्रीमन्माध्वः—"पूर्व्वोक्तं साधनं सर्व्वं सङ्क्षिप्योपसंहरत्यनेनाध्यायेन" इति ; श्रीमच्छ्रीधरः—"न्यासत्यागविभागेन सर्व्वगीतार्थसंग्रहम् । स्पष्टमष्टादशे प्राह परमार्थविनिर्णये ॥" इति ; श्रीमद्बलदेव आह—"गीतार्थानिह संगृह्णन् हरिरष्टादशेऽखिलान् । भक्तोस्तत्र प्रपत्तेश्च सोऽब्रवीदतिगोप्यताम् ॥" इति ;

श्रीमन्नीलकण्ठः—"अस्यामष्टादशाध्याय्यां प्रथमे उपोद्घातितानां द्वितीये सूचितानां श्रेयोऽर्थ्युत्पादितानामर्थानां कार्त्स्न्येनोपसंहारार्थोऽयमन्तिमोऽध्याय आरभ्यते" इति ; श्रीमद्विश्वनाथः—"सन्न्यासत्यागकर्मादेस्त्रैविध्यं मुक्तिनिर्णयः। गुह्यसारतमा भक्तिरित्यष्टादश उच्यते॥" इति।

'तदित्यनभिसन्धाय फलम्' इत्यनेन फलत्यागः "कर्म्म चैव तदर्थीयम्" इत्यनेन कर्म्मसन्न्यास उक्त आचार्य्येण, अतस्तदुभयोस्तत्त्वं बुभुत्सुरर्ज्जुनस्तं पृष्टवान् सन्न्यासस्येति। हे महाबाहो, सन्न्यासस्य तत्त्वं वेदितुं ज्ञातुमिच्छामि, हे हृषीकेश, हे केशिनिसूदन, त्यागस्य च तत्त्वं पृथक् स्वातन्त्र्येण ज्ञातुमिच्छामि। दृश्यते हि तृतीयाध्याये—"न कर्म्मणामनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते। न च सन्न्यसनादेव सिद्धिं समधिगच्छति॥ न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत्। कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः॥ कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान् विमूढ़ात्मा मिथ्याचारः स उच्यते॥ यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्ज्जुन। कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते॥ नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः। शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः॥" (३।४—८) इत्येतैः ; षष्ठे च "अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः। स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः॥ यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव। न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन॥" (६।१।२) इत्येताभ्यां ; द्वादशे पुनः—"ये तु सर्व्वाणि कर्म्माणि मयि सन्न्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते॥ तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्॥" (१२।६।७) इत्यनेन च, सर्व्वान्तर्यामिणि सन्न्यस्य कर्म्मानुष्ठानमेव सन्न्यासो न तु सर्व्वथा कर्म्मत्यागरूपः स आचार्य्यस्याभिमतः सर्व्वथा कर्म्मपरिहारस्यासम्भवात्। यद्येवं कथं सन्न्यासस्य त्यागस्य च विशेषज्ञानलाभाय प्रश्नोऽर्ज्जुनस्य 'अनभिसन्धाय फलं', 'कर्म्म चैव तदर्थीयम्' इत्येताभ्यामाचार्य्याभिप्रेते सन्न्यासे त्यागे चोच्यमानेऽपि। उच्यते "सर्व्वकर्म्माणि मनसा सन्न्यस्यास्ते सुखं वशी।

श्रीभगवानुवाच—

काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदुः ।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥२॥

नवद्वारे पुरे देही नैव कुर्व्वन्न कारयन् ॥" (५।१३) इत्युक्तेः सर्व्वविध-कर्म्मत्यागो हि सन्न्यास इति ब्रुवतो रभसात् सिद्धान्तितम् । अविच्छ-लक्षणयावगतावरणायान्तःसाक्षिप्रेरणासम्भूतः प्रश्नोऽयमर्ज्जुनस्येति तत्त्वम् । "न 'सर्व्वकर्म्माणि मनसा सन्न्यस्य,' 'नैव कुर्व्वन्न कारयन्नास्ते' इत्यस्य पक्षस्यापवादः केनचिद्दर्शयितुं शक्यः" इत्युक्तिस्तु "मनसा विवेकबुद्ध्या कर्म्मादावकर्म्मसन्दर्शनेन सन्त्यज्य" इत्युक्त्या स्वयं खण्डयित्वा तथा भाषणं न रुचिरम् । अतएव चिन्त्यं यदुक्तं श्रीमन्मधुसूदनेनात्र— "पूर्व्वाध्याये श्रद्धात्रैविध्येनाहारयज्ञतपोदानत्रैविध्येन च कर्म्मणां त्रैविध्यमुक्तम्, सात्त्विकानामादानाय राजसतामसानाञ्च हानाय । इदानीन्तु सन्न्यासत्रैविध्यकथनेन सन्न्यासिनामपि त्रैविध्यं वक्तव्यम् । तत्र तत्त्वबोधानन्तरं यः फलभूतः सर्व्वकर्म्मसन्न्यासः स चतुर्द्दशाध्याये गुणातीतत्वेन व्याख्यातत्वान्न सात्त्विकराजसतामसभेदमर्हति । योऽपि तत्त्वबोधात् प्राक् तदर्थं सर्व्वकर्म्मसन्न्यासस्तत्त्वबुभुत्सया वेदान्तवाक्य-विचाराय भवति सोऽपि 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्ज्जुन' इत्यादिना निर्गुणत्वेन व्याख्यातः । यस्त्वनुत्पन्नतत्त्वबुभुत्सानाञ्च कर्म्म-सन्न्यासः 'स सन्न्यासी च योगी च' इत्यादिना गौणो व्याख्यातः" इति । १ ।

अत्रोत्तरमाहाचार्य्यः काम्यानामिति । काम्यानां पुत्रादिकामना-प्रयुक्तानां कर्म्मणां न्यासं परित्यागं कवयः पण्डिताः सन्न्यासं विदुः । न हि सन्न्यासिनोऽन्यकामिनो भवितुमर्हन्ति, तथा सति तेषां संसारि-त्वमेव न तु सन्न्यासः । भगवति सन्न्यस्य यत्कर्म्मानुष्ठानं विधीयते तन्न काम्यं कामनान्तरव्यवहितत्वाभावात् । "यत्करोषि यदश्नासि यज्जु-होषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥"

(९।२७) इत्येवं कर्म्मार्पणेन सन्न्यासः सिद्धो भवति, यथोक्तमनन्तरमाचार्य्येण—"शुभाशुभफलैरेवं मोक्ष्यसे कर्म्मबन्धनैः। सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि॥" (९।२८) इति। विचक्षणाश्शास्त्रविदः सर्व्वकर्म्मफलत्यागं सर्व्वेषां नित्यनैमित्तिककर्म्मणां फलत्यागमेव त्यागमाहुः। यत्तु श्रीमद्रामानुजः—"नित्यानां नैमित्तिकानां काम्यानाञ्च कर्म्मणां फलत्याग एव मोक्षशास्त्रेषु त्यागशब्दार्थः" इत्युक्तवान् तन्न रुचिरं, फलत्यागेन काम्यत्वमेव न तिष्ठति। स पुनराह—"शास्त्रीयत्यागः काम्यकर्म्मस्वरूपविषयः सर्व्वकर्म्मफलविषय इति विवादं प्रदर्श्यैकत्र सन्न्यासशब्दमितरत्र त्यागशब्दं प्रयुक्तवान्। अतस्त्यागसन्न्यासशब्दयोरेकार्थत्वात् पृथक्त्वमिति न ज्ञायते। तथा—'निश्चयं शृणु मे तत्र त्यागे भरतसत्तम' इति त्यागशब्देनैव निर्णयवचनात्, 'नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥ अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्॥' इति च परस्परपर्य्यायतादर्शनाच्च तयोरेकत्वं प्रतीयत इति निश्चीयते" इति। यद्यपि पर्य्यायत्वेनैव प्रयोगोऽत्र दृश्यते तथाप्यस्ति कश्चित् विशेष उभयोः। भगवन्तं परोक्षमुद्दिश्य फलचिन्तायां सत्यामपि फलत्यागस्त्यागः; साक्षादन्तर्यामिणि फलचिन्ताराहित्यात् कर्म्मसमर्पणं सन्न्यास इति भेदः। भेदमिमं पश्यन् सन्न्यासस्य त्यागस्य च पृथक् तत्त्वं ज्ञातुमिष्टवानर्ज्जुनः। आचार्य्यस्तु प्रथमं त्यागमन्ते तु—"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ सर्व्वकर्म्माण्यपि सदा कुर्व्वाणो मद्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥ चेतसा सर्व्वकर्म्माणि मयि संन्यस्य मत्परः। बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥" (१८।५५—५७श्लो) इति सन्न्यासमुक्तवान्। त्यागसन्न्यासयोरेकपर्य्यायत्वं फलाकाङ्क्षारहितत्वात्। कर्म्मसन्न्यासो गौण इत्युक्तिर्न जातु गीतासम्मता; सर्व्वान्तर्यामिणि कर्म्म संन्यस्य तदनुष्ठानस्य विहितत्वात्। २।

त्याज्यं दोषवदित्येके कर्म्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे ॥३॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्त्तितः ॥४॥

त्यागविषये मतभेदमाह त्याज्यमिति। एके मनीषिणः पण्डिताः दोषवत् रागादिदोषयुक्तं कर्म्म त्याज्यमिति प्राहुः कथयन्ति। अपरे पुनः यज्ञदानतपःकर्म्म न त्याज्यमिति कथयन्ति। अत्र श्रीमन्नीलकण्ठेनोक्तम्—"एके मुख्या मनीषिणो मनोनिग्रहसमर्थाः परमात्मनि उत्पन्नविविदिषाणां पुरुषाणां दोषवत् रागादयो यथा त्याज्यास्तद्वत् कर्म्म त्याज्यमिति प्राहुः, अपरे तु विविदिषार्थिना यज्ञादिकं न त्याज्यमिति वा प्राहुः" इति। स्वमतप्रख्यापने 'एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च। कर्त्तव्यानि' इत्युक्तत्वान्न कर्म्मत्यागो विहितः। "यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते॥" (३।१७) इत्यत्र यत्कर्म्मानपेक्षित्वमुक्तं तद्वेदिकानुष्ठानमुद्दिश्य, अन्यथा "नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥" (१८।७) इति नोच्येताचार्य्येण। ३।

अथ स्वमतं वक्तुमाह निश्चयमिति। हे भरतसत्तम, तत्र त्यागे मे निश्चयं मतं शृणु। हे पुरुषव्याघ्र, त्यागो हि फलत्यागः, आसक्तित्यागः, कर्त्तृत्वत्याग इति त्रिविधः सङ्कीर्त्तितः पूर्व्वमेवोक्तः। एवं हि व्याख्यातं श्रीमद्रामानुजेन—"त्यागः क्रियमाणेषु कर्म्मस्वेव वैदिकेषु फलविषयतया कर्त्तृत्वविषयतया ममताविषयतया पूर्व्वमेव मया त्रिविधः सम्प्रकीर्त्तितः, 'मयि सर्व्वाणि कर्म्माणि' इति कर्म्मजन्यं स्वर्गादिकं फलं मम न स्यादिति फलत्यागः फलविषयस्त्यागः, मदीयफलसाधनतया मदीयमिदं कर्म्मेति कर्म्मणि ममतायाः परित्यागः ममताविषयस्त्यागः, सर्व्वेश्वरे कर्त्तृत्वानुसन्धानेनात्मनः कर्त्तृताया-

यज्ञदानतपःकर्म्म न त्याज्यं कार्य्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥५॥
एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥६॥

त्त्यागः कर्त्तृत्वविषयस्त्यागः" इति । अन्ये व्याख्यातारः वक्ष्यमाणेन तामसादिभेदेन त्रिविधः इत्युक्तवन्तः । ४ ।

स्वमतं विवृणोति द्वाभ्यां यज्ञेति । यज्ञदानतपःकर्म्म न त्याज्यं, तत्कार्य्यमेव कर्त्तव्यमेव । कथम् ? यज्ञो दानं तपश्च एव मनीषिणां मननशीलानां विवेकिनां पावनानि पापमलहरणानि । मनीषिणामिति विशेषणेन यज्ञादिकं विवेकबुद्ध्यनुसरणेन कृतं चित्तनैर्म्मल्याय भवति, नान्यथेति गम्यते । "ओं तत् सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः" (१७।२३) इत्यादिना यज्ञदानतपःक्रियासु ब्रह्मानुसन्धानं विहितं, तेन च निर्मोक्षः । विवेकबुद्धिं विना न जातु तत् सम्भवति । ५ ।

यज्ञादौ कर्त्तृत्वाभिनिवेशजनितासक्तित्यागः फलत्यागश्चोच्यते कर्त्तृत्वत्यागस्तु स्पष्टं पश्चादुच्यते एतानीति । एतानि यज्ञप्रभृतीनि कर्म्माणि सङ्गं कर्त्तृत्वाभिनिवेशजनितामासक्तिं —कर्म्मणि ममतामिति श्रीमद्रामानुजः, अहमेतेषां कर्त्ता मयावश्यमेतानि कर्त्तव्यानीत्यभिमानमिति श्रीमन्नीलकण्ठः,—फलानि च त्यक्त्वा कर्त्तव्यानि कार्य्याणि, हे पार्थ, इति मे निश्चितमुत्तमं मतम् । अत्र श्रीमच्छङ्करः—"'निश्चयं शृणु मे तत्र' इति प्रतिज्ञाय पावनत्वञ्च सहेतुकमुक्त्वा एतान्यपि कर्म्माणि कर्त्तव्यानीत्येतत् 'निश्चितं मतमुत्तमम्' इति प्रतिज्ञातार्थोपसंहार एव, नापूर्व्वार्थं वचनमेतान्यपीति प्रकृतसन्निकृष्टार्थतोपपत्तेः, ससङ्गस्य फलार्थिनो बन्धहेतून्येतान्यपि कर्म्माणि मुमुक्षोः कर्त्तव्यानीति अपिशब्दस्यार्थः, न त्वन्यानि कर्म्माण्यपेक्ष्यैतान्यपीत्युच्यन्ते । अन्ये वर्णयन्ति नित्यानां कर्म्मणां फलाभावात् सङ्गं त्यक्त्वा फलानि चेति नोपपद्यते ।

एतान्यपीति यानि काम्यानि कर्म्माणि निरस्याऽभिहितानि इमानि चापि कर्त्तव्यानि किमुत यज्ञदानतपांसि नित्यानीति, तदसत्, नित्यानामपि कर्म्मणां फलवत्त्वस्योपपादितत्वात् 'यज्ञो दानं तपश्चैव पावनानि' इत्यादिवचनेन । नित्यान्यपि कर्म्माणि बन्धहेतुत्वाशङ्कया जिहासोर्मुमुक्षोः कुतः काम्येषु प्रसङ्गः 'दूरेण ह्यवरं कर्म्म' इति च निन्दितत्वात् 'यज्ञार्थात् कर्म्मणोऽन्यत्र' इति च काम्यकर्म्मणां बन्धहेतुत्वस्य निश्चितत्वात्, 'त्रैगुण्यविषया वेदाः', 'त्रैविद्या मां सोमपाः···क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति च दूरव्यवहितत्वाच्च न काम्येष्वेतान्यपीति व्यपदेशः" इति । श्रीमन्नीलकण्ठ आह—फलानि च त्यक्त्वा, चकारादेषामकरणे मम प्रत्यवायो भविष्यतीत्येतमप्यभिसन्धिं त्यक्त्वा ब्रह्मनिष्ठेनैवासङ्गस्वभावेन पुरुषेण कर्त्तव्यानीति एवम्प्रकारं मे मम मतमुत्तमं पूर्व्वमतादुत्कृष्टं, तत्र हि कर्त्तृत्वाभिमानरूपेण सङ्गेन प्रत्यवायोत्पादभयाच्च कर्म्मानुष्ठानं विहितम्, अत्र तु तदभावादसङ्गत्वांशेन कर्म्मणां त्यागः स्वरूपेणात्याग इति भेदः" इति ।

अत्रेदं विवेच्यम्—"यज्ञार्थात् कर्म्मणोऽन्यत्र (३।९)" इति च काम्यकर्म्मणां बन्धहेतुत्वस्य निश्चितत्वात् यज्ञार्थादित्यत्र यज्ञः परमेश्वराराधनार्थक एव । भवतु तत्तथैव । अनन्तरमेव "सहयज्ञाः प्रजाः सृष्ट्वा" (३।१०) इत्यादिभिः वैदिकयज्ञा अवश्यकर्त्तव्यत्वेनोपदिष्टाः, फलञ्च "यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्बिषैः" (३।१३) इति पापापगमजनितचित्तनैर्म्मल्यम् । "यस्त्वात्मरतिरेव स्यात्" (३।१७) इत्यनेन वैदिककर्म्मानपेक्षितत्वमुक्त्वा तदनन्तरमेव 'कृतेन न अर्थः, अकृतेन न अर्थः' इति युक्तिमवलम्ब्य "तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर" (३।१९) इति वैदिककर्म्मानुष्ठानमात्मज्ञानामपि विहितम् । अतोऽत्र यज्ञः परमेश्वराराधनार्थक इति सिद्धान्तस्य हानिः । न खलु तत्त्वज्ञैर्वैदिकयज्ञेषु देवतान्तरमाराध्यते, किन्तर्हि ब्रह्मैव । अतएवाह चतुर्थे "ब्रह्मार्पणं ब्रह्म हविः" (४।२४) इत्यादि, अयमेव गीतोक्तो ब्रह्मयज्ञः । (१) देवयज्ञः, (२) ब्रह्मयज्ञः, (३) संयमयज्ञः, (४) इन्द्रिययज्ञः, (५)

नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥७॥

आत्मसंयमयज्ञः, (६) द्रव्ययज्ञः, (७) तपोयज्ञः, (८) योगयज्ञः, (९) स्वाध्याययज्ञः, (१०) ज्ञानयज्ञः, (११) प्राणायामयज्ञः, (१२) आहार-संयमयज्ञः, इत्येतेषु द्वादशविधेषु तत्र (४।२५—२९) प्रोक्तेषु यज्ञेषु सर्व्व-प्रथमोक्तो दैवयज्ञ इन्द्रादिदेवताराधनपर एव दृश्यते। "योगिनः पर्य्युपासते" (४।२५) इति तत्रोक्तत्वात् योगिनामपीन्द्रादिदेवाराधन-परत्वं स्फुटम्। 'युक्तस्यात्मनि देवता' इति न्यायात् इन्द्रादीनामन्त-र्यामी परमात्मैव तेषामाराध्यः, न त्विन्द्रादय इति तत्र द्रष्टव्यम्। यथा जुह्वादिषु ब्रह्मदृष्टिस्तथेन्द्रादिषु तदन्तर्यामिदृष्टिरिति तत्त्वज्ञानां शैली। "श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप" (४।३३) इति ज्ञानयज्ञस्य प्राधान्येऽपि "अग्निर्वैश्वानरो मध्ये" (म, गी, २०अ, १९—२१श्लो, ९०पृ,) इत्यादिना नित्यानुष्ठेयोपासनादिषु देहेन्द्रियव्यापारेषु च यज्ञत्वं न तत्र निवर्त्तते। अतएवाहाचार्य्यो ज्ञानयज्ञमधिकृत्यैव—"तस्माद-ज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः। छित्त्वैनं संशयं योगमातिष्ठो-त्तिष्ठ भारत॥" (४।४२) इति। अत्राप्यत उक्तमाचार्य्येण "यज्ञदान-तपःकर्म्म न त्याज्यं कार्य्यमेव तत्।" इति। ६।

सत्त्वरजस्तमःकृतत्यागत्रैविध्यं वक्तुमुपक्रम्य तामसं त्यागमाह नियतस्येति। नियतस्य "यतः प्रवृत्तिर्भूतानाम्" इति नियन्त्रा प्रवृ-त्तस्य तु—नातो व्यभिचारसम्भावना "धर्म्माविरुद्धो भूतेषु कामोऽस्मि" (७।११) इत्यनेन प्रेरणेयं नियन्तुर्न वासनाया इति निर्णीतत्वात्। कोऽयं धर्म्मः? योऽसावनुमन्त्रनुमोदितः—कर्म्मणः सन्न्यासः परित्यागो नोपपद्यते नित्योपासनादीनां ब्रह्मसंस्पर्शादिहेतुत्वात् देहेन्द्रियव्यापारा-णाञ्च "न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः" इति न्यायादपरि-हार्य्यत्वात्। मोहादज्ञानात् तस्य नित्यकर्म्मणः परित्यागो मोहस्य तमोगुणसम्भूतत्वात् तामसः परिकीर्त्तितः। नित्यस्य कर्म्मणोऽत्या-

दुःखमित्येव यत्कर्म्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥८॥

त्यत्वकथनेन काम्यानां कर्म्मणां त्याग उपपद्यत इत्यायाति । देहेन्द्रियव्यापारत्यागासम्भवेऽपि तेषु यज्ञदृष्टित्यागः नित्योपासनादिपरित्यागश्च मोक्षार्थानां सम्भवतः, अतएवाह मोहात्तस्य परित्याग इति । अत्र श्रीमद्रामानुज आह—"त्यागो नोपपद्यते, 'शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः' इति शरीरयात्राया एवासिद्धेः । शरीरयात्रा हि यज्ञशिष्टाशनेनिर्वर्त्यमाना सम्यक् ज्ञानाय प्रभवति । अन्यथा 'ते त्वघं भुञ्जते पापाः' इत्ययज्ञशिष्टाघरूपाशनाप्यायितमनसो विपरीतज्ञानाय भवन्ति । 'अन्नमयं हि सोम्य मनः' इत्यन्नेन हि मन आप्याय्यते । 'आहारशुद्धौ सत्त्वशुद्धिः' इत्यादिना ब्रह्मरूपसाक्षात्काररूपस्मृतिमाहारशुद्ध्यायत्तमिति श्रूयते । तस्मान्महायज्ञादिनित्यनैमित्तिकं कर्म्म आप्रयाणात् ब्रह्मज्ञानमेवोपादेयमिति तस्य त्यागो नोपपद्यते" इति ; श्रीमद्बलदेव आह—"आत्मोद्देशात् विशीर्णादिवदन्तर्गतज्ञानस्य तस्य मोचकत्वात् देहयात्रासाधकत्वाच्च तत्त्यागो न युक्तः" इति ; श्रीमन्मधुसूदन आह—"काम्यस्य कर्म्मणोऽन्तःकरणशुद्धिहेतुत्वाभावेन बन्धहेतुत्वेन च दोषवत्त्वात् बन्धनिवृत्तिहेतुबोधार्थिना क्रियमाणस्त्याग उपपद्यत एव, नियतस्य तु नित्यस्य कर्म्मणः शुद्धिहेतुत्वेनादोषस्य संन्यासस्त्यागो मुमुक्षुणाऽन्तःकरणशुद्ध्यर्थिना नोपपद्यते, शास्त्रयुक्तिभ्यां तस्यान्तःकरणशुद्ध्यर्थमवश्यानुष्ठेयत्वात्, तथाचोक्तम्—'आरुरुक्षोर्मुनेर्योगं कर्म्मकारणमुच्यते' इति" इति । ७ ।

राजसं त्यागमाह दुःखमिति । दुःखस्य राजसत्वात् तत्कर्म्मत्यागो राजसः, दुःखमित्येव बुद्ध्या कायक्लेशभयात् शारीरदुःखाशङ्कावशात् यत् कर्म्म त्यजेत् । स शारीरक्लेशशङ्कया कर्म्मत्यागी पुरुषः राजसत्यागं कृत्वा त्यागफलं न लभेत् न लभेत न प्राप्नुयात् । भगवदाज्ञाविरोधिकर्म्मणां परित्याग एव त्यागफलाय भवति, न तु कायक्लेशपरिहारो-

कार्य्यमित्येव यत्कर्म्म नियतं क्रियतेऽर्ज्जुन।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः ॥८॥

इ मतः। अत्र श्रीमद्रामानुजः—"यद्यपि परम्परया मोक्षसाधनभूतं कर्म्म तथापि दुःखात्मकद्रव्योपार्ज्जनसाध्यत्वात् बह्वायासरूपतया कायक्लेशकरत्वाच्च मनसोऽवसादकरमिति तद्भीतया योगनिष्पत्तये ज्ञानाभ्यास एव यतनीय इति यो महायज्ञाद्याश्रमकर्म्म परित्यजेत्, स राजसं रजोमूलं त्यागं कृत्वा तदयथावस्थितशास्त्रार्थरूपमिति ज्ञानोत्पत्तिरूपं त्यागफलं न लभेत। 'अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी' इति वक्ष्यते। न हि कर्म्मादृष्टद्वारेण मनःप्रसादहेतुः अपि तु भगवत्प्रसादद्वारेण" इति। ८।

सात्त्विकं त्यागमाह कार्य्यमिति। हे अर्ज्जुन, कार्य्यं भगवदाज्ञापालनरूपत्वात् कर्त्तव्यमिति बुद्ध्या यत् नियतं नित्यं कर्म्म सङ्गं कर्त्तृत्वाभिनिवेशजनितासक्तिमवश्यम्भाविभगवद्दर्शनादेरन्यत् आनुषङ्गिकं फलञ्च त्यक्त्वा क्रियते, स त्यागः सात्त्विको मतो ज्ञेयः। अत्र श्रीमन्नीलकण्ठ आह—"एवं द्वाभ्यां तामसराजसौ मुख्यावेव त्यागौ उक्तौ, तामसराजसयोरमुख्यत्यागयोरसम्भवस्य भगवतैव—'मोहात्तस्य परित्याग' इति 'कायक्लेशभयात्त्यजेत्' इति च सूचनात्। न ह्येवं सम्भवति, मूढश्च करोति चेति विप्रतिषेधात्, यदि करोति नैव मूढः, यदि मूढस्तर्हि नैव करोति। एवं यदि कायक्लेशाद्बिभेति नैव करोति, यदि करोति नैव कायक्लेशाद्बिभेति चेति विप्रतिषिद्धम्। अतस्तामसराजसयोरमुख्यत्यागयोरसम्भवात् तौ नैवोक्तौ, सात्त्विकस्त्वमुख्यत्यागः सम्भवति, यथा स्फटिके जपाकुसुमाश्रिते लौहित्यं विवेकिनां प्रतीतित एवास्ति न वस्तुत एव, एवमात्मनि ईश्वराधीने विवेकिनां कर्त्तृत्वं प्रतीतित एवास्ति न वस्तुत इति वक्तुं शक्यम्। एवञ्च कर्त्तृत्वाभिनिवेशशून्यः पुमान् प्रतीतितः करोत्येव न वस्तुत इति सम्भवत्यमुख्योऽपि सात्त्विकस्त्यागः.........स एवम्भूतस्त्यागः सात्त्विको मतः

न द्वेष्ट्यकुशलं कर्म्म कुशले नानुसज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥१०॥

वेदे दृष्टः । तथाच श्रुतिः—'ईशा वास्यमिदं सर्व्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥' इति । ईशा ईशेन परमेश्वरेण सर्व्वकार्य्यकरणकर्त्तृत्वप्रवर्त्तकेन इदं जगत् स्थावर-जङ्गमं जगत्यां ब्रह्माण्डे स्थितं वास्यमाच्छादितं व्याप्तं ; येन हेतुना सर्व्वं तदधीनम् । तेन कारणेन त्यक्तेन त्यागेन कर्त्तृत्वभोक्तृत्वाभि-मानवर्ज्जनेन भुञ्जीथाः विषयान् भुङ्क्ष्व, मा गृधः गर्द्धं मा कार्षीः, कस्यस्विद्धनम् न कस्यापि तत्र स्वामित्वमस्तीति वृथैव तत्र गर्द्ध इत्यर्थः । एवं कर्म्माण्यपि यज्ञादीनि कर्त्तृत्वाभिमानं त्यक्त्वा कुर्व्वतस्तव कर्म्मलोपो न भविष्यति । एतद्व्यतिरेकेण तवोपायान्तरञ्च नास्तीत्यर्थिममन्त्रेण प्रदर्श्यते—'कुर्व्वन्नेवेह कर्म्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म्म लिप्यते नरे ॥' इति । इदमेव मुख्यं स्वमतं भगवता प्रदर्शितम् 'एतान्यपि तु कर्म्माणि' इति श्लोके । ननु नित्यानां फलमेव नास्ति, किं वक्तव्यमिति चेत्, इत एव भगवद्वचनात् तेषामपि फलमस्तीति जानीहि निष्फलस्य वेदेनानुष्ठाप-नासम्भवात्, तथाचापस्तम्बः—'तद्यथाम्रे फलार्थे निर्म्मिते छाया गन्ध इत्यनूत्पद्येते, एवं धर्म्मं चर्य्यमाणमर्था अनूत्पद्यन्ते' इति आनुषङ्गिकं फलं नित्यानां दर्शयति, प्रकरणे प्रत्यवायस्मृत्यादि तेषां प्रत्यवायपरि-हारः फलमिति प्रदर्श्यते । 'धर्म्मेण पापमपनुदति' इत्यादिना च नित्येष्वपि कर्म्मसु फलं दृश्यते । तदेव त्यक्तव्यमिति न कोऽपि दोषः" इति । ९ ।

कुशलान्यकुशलानि च कर्म्माणि विद्यन्ते । यदि दुःखभिया परि-त्यजन्त्यकुशलकर्म्माणि तदा राजसत्यागवशात् न पुनस्ते त्यागिनः ; यदि वा कुशलेषु कर्म्मसु सुखाभिलाषात् प्रवर्त्तन्ते, तदा भगवत्प्रयोजन-त्वाभावात् न भवति त्यागित्वम् । भगवद्भावाविष्टचित्तानान्तु तदाज्ञा-

पालनमृते नान्यत् किञ्चनास्तीत्याह न द्वेष्टीति । सत्त्वसमाविष्टः सत्त्वेन सत्त्वगुणेन संयुक्तः, अथवा सतस्तस्य भावः सत्त्वं भगवद्भावे समाविष्टः निबद्धचित्तस्त्यागी अकुशलं दुःखकरम्—कर्म्म अशोभनं काम्यं कर्म्मेति श्रीमच्छङ्करः—न द्वेष्टि न प्रतिकूलतया मन्यते, कुशले सुखजनके—नित्य इति श्रीमच्छङ्करः—कर्म्मणि न अनुसज्जते नासक्तो भवति, भगवत्प्रेरणानुसरणेन कुशलमकुशलं वा समभावेन भजतीत्यर्थः । तत्र हेतुः, मेधावी तत्त्वज्ञानसम्पन्नः—आत्मज्ञानलक्षणया प्रज्ञया संयुक्त इति श्रीमच्छङ्करः, यथावस्थिततत्त्वज्ञान इति श्रीमद्रामानुजः, स्थिरबुद्धिरिति श्रीमच्छ्रीधरः, स्थितप्रज्ञ इति श्रीमन्मधुसूदनः, ऊहापोहकुशलतया नित्यानित्यवस्तुविवेकेनासौ प्रज्ञावानिति श्रीमन्नीलकण्ठः ; छिन्नसंशयः एवं मम्पन्नता स्यान्न वेति संशयविरहितः । अत्र श्रीमन्नीलकण्ठः—"छिन्नसंशयः किं कर्म्माण्येव मुक्तिसाधनानि उत सन्न्यास एवेति विचिकित्सारहितः । एवञ्च 'त्यागी'त्यनेन 'यज्ञदानतपःकर्म्म न त्याज्यम्' इत्युक्तादत्यागाद्व्यावृत्तिः 'मेधावी'त्यनेन 'मोहात्तस्य परित्यागः' इत्युक्तात्तामसत्यागाद्व्यावृत्तिः, पूर्व्वार्द्धेन रागद्वेषाभावप्रतिपादनेन 'कायक्लेशभयात्त्यजेत्' इत्युक्ताद्राजसत्यागाद्व्यावृत्तिः, 'छिन्नसंशयः' इत्यनेन 'कार्य्यमित्येव यत्कर्म्म' इत्युक्तादमुख्यसात्त्विकत्यागाद्व्यावृत्तिः । न ह्यसौ कर्म्मणां तुच्छत्वं सन्न्यासस्य महाभाग्यवत्त्वञ्च वेद, वेद चेत् क्षणमपि कर्म्मसु न तिष्ठेत् । न हि दाहोपशमार्थी निकटस्थं जाह्नवीमहाह्रदं जानन् शीतोष्णप्रतप्तपाथसि पल्वले क्षणमपि वसेत् । संशयच्छेदेऽपि हेतुः सत्त्वसमाविष्ट इति, यतः सत्त्वेनैव कर्त्रा सम्यगाविष्टोऽयं न तु सत्त्वमाश्रित इति महान् विशेषः । एवञ्च पूर्व्वश्लोकोक्तस्य सात्त्विकत्यागरूपस्य कर्म्मयोगस्य फलभूतोऽयं मुख्यः सन्न्यासो विविदिषूणामनुष्ठेयः—'यदहरेव विरजेत् तदहरेव प्रव्रजेत्,' 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती'ति श्रुतिप्रसिद्धः" इति । अत्र प्रथमन्तावत् "त्यागीत्यनेन 'यज्ञदानतपःकर्म्म न त्याज्यम्' इत्युक्तादत्यागाद्व्यावृत्तिः" इति न सिध्यति, "न हि देहभृता शक्यं

न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते ॥११॥

त्यक्तुं कर्म्माण्यशेषतः। यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते ॥" इत्युक्तेः। अनेनैव च पद्येन "'छिन्नसंशयः' इत्यनेन 'कार्य्यमित्येव यत्कर्म्म' इत्युक्तादमुख्यसात्त्विकत्यागादप्यावृत्तिः" इत्यप्यसिद्धम्। भाष्यकृता सर्व्वकर्म्मत्यागसोपानत्वेन व्याख्यातेऽस्मिन् पद्ये स्वरूपतः सर्व्वकर्म्मत्यागरूपस्य सन्न्यासस्याभिनिवेशयत्नोऽस्थान एव श्रीमतो नीलकण्ठस्य। १०।

"न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते। न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥ न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत्। कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ॥" (३।४-५) इति सर्व्वकर्म्मत्यागस्यासम्भावना पूर्व्वमेवोक्ताचार्य्येण। "यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्ज्जुन। कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥ नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः। शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः ॥" (३।७-८) इति सङ्गफलयोस्त्यागेन कर्म्मानुष्ठानं गीतोक्तं नैष्कर्म्यम्। सुतरां पूर्व्वोक्तार्थमुपसंहरति न हीति। न हि देहभृता अशेषतः निःशेषेण कर्म्माणि त्यक्तुं शक्यम्, यस्तु पुरुषः कर्म्म कुर्व्वन्नपि कर्म्मफलत्यागी स त्यागीति अभिधीयते निरुच्यते। "परमार्थदर्शित्वेनैव अदेहभृता देहात्मभावरहितेनाशेषकर्म्मसंन्यासः शक्यते कर्त्तुम्" इत्युक्तौ किमस्ति तत्त्वं निगूढं तद्विचार्य्यम्। तत्र देहे सत्यदेहत्वं सम्भवति न वा? सम्भवति देहात्मभावरहितत्वात्। किमयं देहात्मभावः? देहे आत्मबुद्धिः। तद्रहितत्वे सिध्यति देहादात्मनः स्वातन्त्र्यं देहानपेक्षित्वञ्च। न सम्भवति, शरीरिणः शरीरेऽवस्थानात्, शारीरसुखदुःखादीनामात्मनि संश्लेषात्। तत्त्वज्ञानाभ्युदये पश्यत्यात्मानं ब्रह्मणि स्थितं न तु देहे, शारीरक्रिया न तु स्वात्मचैतन्यावेशात् किन्त्वन्तर्य्यामिप्रेरणया, अतः पृथग्जनैर्दृश्यमानोऽप्यात्मा शरी-

अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥१२॥

रस्थ इति न शरीरस्थः, क्रियानिरतोऽपि न क्रियानिरत इत्यज्ञानपूर्वे सर्व्वकर्म्मसंन्यासः सिध्यति । "त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः ॥" (४।२०) इत्यादिभिर्भगवन्तं विना देहाद्यध्यासविरहितो योगी बहिः क्रियानिरतोऽप्यक्रिय इति स्वयमाचार्य्येण सर्व्वत्र वर्णितम् । या च स्वरूपतः सर्व्वकर्म्मत्यागेन जड़वत् स्थितिर्मन्यते कैश्चित् सा न सम्भवति ; सम्भवति सर्व्वथा कर्त्तृत्वाभिमानत्यागेन क्रियमाणेऽपि कर्म्मण्यकर्म्मत्वम् । ११ ।

एवं कर्म्मफलत्यागेन त्यागित्वस्य फलमाह अनिष्टमिति । अनिष्टमनभिलषितं नरकादि, इष्टमभिलषितं स्वर्गादि, मिश्रमिष्टानिष्टशबलं सुखदुःखादि, एवं त्रिविधं कर्म्मणः फलं प्रेत्य शरीरपातादूर्द्ध्वं कर्म्मानुष्ठानसमकालमिति श्रीमद्रामानुजः, अत्यागिनां भवति, न तु सन्न्यासिनां त्यागिनां क्वचिदपि भवति । अनिष्टं पशुत्वम्, इष्टं देवत्वम्, मिश्रं मनुष्यत्वञ्चेति व्याख्यायां देवत्वं न ब्रह्मभावः, किन्तर्हि सत्त्वप्रधानानां दिव्यधामवासिनां भाव एव । तेष्वपि जीवत्वादपूर्णता विद्यते, सुतरां विपरिवर्त्तनाधीनास्ते । ब्रह्मण्यधिवासिनां त्यागिनां पुनर्गुणजन्यविपरिवर्त्तनं न सम्भवति, किन्तर्हि 'सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' इति न्यायादुत्तरोत्तरवर्द्धमानेन स्वरूपाविर्भावेन नित्यसम्पन्नता तेषाम् । अत्र श्रीमच्छ्रीधर आह—"सन्न्यासिशब्देनात्र फलत्यागसाम्यात् प्रकृताः कर्म्मफलत्यागिनो गृह्यन्ते, 'अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः । स सन्न्यासी च योगी च' इत्येवमादौ कर्म्मफलत्यागिषु सन्न्यासिशब्दप्रयोगदर्शनात् । तेषां सात्त्विकानां पापासम्भवादीश्वरार्पणेन च पुण्यफलस्य त्यक्तत्वात् त्रिविधमपि कर्म्मफलं न भवति ।" इति । एतत् पुनर्न श्रीमच्छङ्कराभिमतम्, सुतरां श्रीमन्मधुसूदनस्तमनुसृत्याह—"ईश्वरार्पणेन त्यक्तकर्म्मफलस्यापि सत्त्वशुद्ध्यर्थं

नित्यानि कर्म्माण्यनुतिष्ठतोऽनन्तरमेव मृतस्य प्रागर्ज्जितैः कर्म्मभिस्त्रिविधं शरीरग्रहणं केन वार्य्यते, 'यो वा एतदक्षरं गार्ग्यविदित्वा प्रैति स कृपणः' इति श्रुतेः। अतः सत्त्वशुद्धिफलज्ञानोत्पत्त्यर्थं तदधिकारिशरीरमपि तस्यावश्यकमेव। अतएव विविदिषासन्न्यासिनः श्रवणादिकं कुर्व्वतोऽन्तराले मृतस्य योगभ्रष्टशब्दवाच्यस्य 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते' इत्यादिना ज्ञानाधिकारिशरीरप्राप्तिरवश्यम्भावीति निर्णीतं षष्ठे। यत्र सर्व्वकर्म्मत्यागिनोऽप्यवश्यं शरीरग्रहणमावश्यकं, तत्र किं वक्तव्यमन्यस्य कर्म्मिणः" इति। प्रश्नस्यास्य निष्कर्षस्तेनायं कृतः—"अकर्त्तृभोक्तृपरमानन्दाद्वितीयसत्यस्वप्रकाशब्रह्मात्मसाक्षात्कारेण निर्व्विकल्पेन वेदान्तवाक्यजन्येन विचारनिश्चितप्रामाण्येन सर्व्वप्रकाराप्रामाण्यशङ्काशून्येन ब्रह्मात्मज्ञानेनाज्ञाननिवृत्तौ तत्कार्य्यकर्त्तृत्वाद्यभिमानरहितः परमार्थसन्न्यासी सर्व्वकर्म्मोच्छेदात् शुद्धः केवलः स नाविद्याकर्म्मादिनिमित्तं पुनः शरीरग्रहणमनुभवति सर्व्वभ्रमाणां कारणच्छेदेनोच्छेदात्। यस्त्वविद्यावान् कर्त्तृत्वाद्यभिमानी देहभृत् स त्रिविधः रागादिदोषप्राबल्यात् काम्यनिषिद्धादियथेष्टकर्म्मानुष्ठायी मोक्षशास्त्रानधिकार्य्येकः, अपरन्तु यः प्राक्तनसुकृतवशात् किञ्चित्प्रक्षीणरागादिदोषः सर्व्वाणि कर्म्माणि त्यक्तुमशक्नुवन्निषिद्धानि काम्यानि च परित्यज्य नित्यानि नैमित्तिकानि च कर्म्माणि फलाभिसन्धित्यागेन सत्त्वशुद्ध्यर्थमनुतिष्ठन् गौणसन्न्यासी मोक्षशास्त्राधिकारी द्वितीयः सः। ततो नित्यनैमित्तिककर्म्मानुष्ठानेनान्तःकरणशुद्ध्या समुपजातविविदिषः श्रवणादिना वेदनं मोक्षसाधनं सम्पिपादयिषुः सर्व्वाणि कर्म्माणि विधितः परित्यज्य ब्रह्मनिष्ठं गुरुमुपसर्पति विविदिषासन्न्यासिसमाख्यस्तृतीयः। तत्राद्यस्य संसारित्वं सर्व्वप्रसिद्धम्, द्वितीयस्य त्वनिष्टमित्यादिना व्याख्यातम्, तृतीयस्य तु 'अयतिः श्रद्धयोपेतः' इति प्रश्नमुत्थाप्य निर्णीतं षष्ठे अज्ञस्य संसारित्वं ध्रुवं कारणसामग्र्याः सत्त्वात्, तत्तु कस्यचित् ज्ञानानुगुणमिति विशेषः। विज्ञस्य तु संसारकारणाभावात् स्वत एव कैवल्यमिति द्वौ पदार्थौ सूचितावस्मिन् श्लोके" इति। सर्व्व-

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्व्वकर्म्मणाम् ॥१३॥

कर्म्मत्यागमुद्दिश्य यत्तत्त्वमुक्तं पूर्व्वस्मिन् पद्ये तेनेदं मतद्वैधं तिरोधत्ते । युक्तमुक्तं श्रीमता मधुसूदनेन, येषामपरोक्षात्मतत्त्वप्रमितिर्न, आत्मवत्ता भवति, ये पुनः परमात्मानमविदित्वाप्यात् प्रयतन्तीति । कर्म्मफल-त्यागिनः पुनरत्र शास्त्रे यथा सर्व्वान्तर्यामी कर्म्मफलस्वार्थशून्यः निरन्तरं कर्म्म करोति यथापि न तस्मिन् लिप्यते (४।१४), तथा तत्सख्य-भावात् प्रवृत्तिविरहेऽपि साक्षात्सम्बन्धेन तत्प्रेरणया प्रवृत्तिमन्तः (१५।१५ ; १८।४६।६१) विवेकबुद्ध्या तस्मिन्नपरोक्षे कर्म्माणि—निस्पृहत्वात् [illegible] । स यदिच्छति तद्भवतु किं कर्म्मणश्चित्तशुद्धिकरत्वे-नेति—संन्यस्य तत्फलं परित्यज्य (३।३०) कर्म्म कुर्व्वन्ति । "प्राणान् वित्तमिमं परं हित्वा मां शरणं याताः" (भा, ८स्क, ४अ, ६५श्लो) इति भागवतवचनेन सर्व्वनिरपेक्षा एव ते । एवं सति तादृशां त्यागिनां भगवदाज्ञामात्रपरिपालनपरायणानां नास्ति परमात्मना साक्षात्सम्बन्ध इति न वक्तुं शक्यते । एते वास्तवः कर्म्मपरिहारार्थापि कर्म्मफलस्पृहाकर्त्तृ[illegible]नाः सर्व्वकर्म्मपरित्यागिन एव । अपरोक्षं ज्ञानं विना गीताशास्त्रोक्तकर्म्मफलत्यागो न सिध्यति । 'मयि संन्यस्य' (३।३०) इत्यपरोक्षभावेन फलत्यागाभिहितत्वात्, 'मामेवैष्यसि' (८।७) इति प्रतिज्ञानाच्च । न खलु वक्तव्यमर्ज्जुनायैवापरोक्षज्ञानं कर्म्म-फलत्यागे समुपदिष्टवानिति, "ये तु सर्व्वाणि कर्म्माणि मयि संन्यस्य मत्पराः" (१२।६) इत्यत्र सर्व्वेभ्यो गीतापथानुसारिकर्म्मफलत्यागिभ्य-स्तदुपदिदेश । १२ ।

आत्माभिमाननिवृत्तये कर्म्मसिद्धेः कारणानि ज्ञातव्यानीति तान्याह पञ्चेति । हे महाबाहो, सर्व्वकर्म्मणां सिद्धये सांख्ये कृतान्ते आत्म-तत्त्वसिद्धान्ते प्रोक्तानि इमानि पञ्च कारणानि मे मम सकाशात् निबोध जानीहि । १३ ।

अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम्।
विविधाश्च पृथक् चेष्टा दैवञ्चैवात्र पञ्चमम् ॥१४॥
शरीरवाङ्मनोभिर्यत् कर्म्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१५॥

तानि कारणान्याह अधिष्ठानमिति। अधिष्ठानम् इच्छाद्वेषसुख-दुःखचेतनादीनामभिव्यक्तेराश्रयो देहः, तथा कर्त्ता जीवः,—उपाधि-लक्षणो भोक्तेति श्रीमच्छङ्करः, जीवात्मेति श्रीमद्रामानुजः, विष्णुरिति श्रीमन्माध्वः, चिदचिद्ग्रन्थिरहङ्कार इति श्रीमच्छ्रीधरः, अहं करोमी-त्यभिमानवान् ज्ञानशक्तिप्रधानापञ्चीकृतपञ्चमहाभूतकार्य्योऽहङ्कारोऽ-न्तःकरणं बुद्धिर्विज्ञानमिति श्रीमन्मधुसूदनः, बुद्धिविशिष्टश्चिदाभासः प्रमाता नाम अहंप्रत्ययविषयोऽहङ्कार इति श्रीमन्नीलकण्ठः; पृथग्विध-मनेकप्रकारं करणं शब्दाद्युपलब्धिसाधनं चक्षुःश्रोत्रादि, पृथक् चेष्टाः प्राणापानादीनां व्यापाराः, दैवं सर्व्वान्तर्यामी—आदित्यादि चक्षुराद्य-नुग्राहकमिति श्रीमच्छङ्करः, अत्र कर्म्महेतुकलापे पञ्चमे परमात्मान्त-र्यामी कर्म्मनिष्पत्तौ प्रधानहेतुः……उक्तं हि "सर्व्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च" इति श्रीमद्रामानुजः, सर्व्वा-राध्यं परं ब्रह्मेति श्रीमद्बलदेवः। एवं निष्कर्षः कृतः श्रीमद्रामानु-जेन—"एतदुक्तं भवति, परमात्मना दत्तैस्तदाधारैश्चक्षुरादिकरणकले-वरादिभिः तदाहितशक्तिभिः स्वयं सजीवात्मा तदाधारः तदाहित-शक्तिः सन् कर्म्मनिष्पत्तये स्वेच्छया करणाद्यधिष्ठानाकारं प्रयत्नञ्चार-भते, तदन्तरवस्थितः परमात्मा स्वानुमतिदानेन तं प्रवर्त्तयति" इति। १४।

धर्म्मस्याधर्म्मस्य वा पञ्चैते हेतव इत्याह शरीरेति। शरीरवाङ्मनो-भिर्नरो यत् न्याय्यं धर्म्यं विपरीतं वा अधर्म्यं कर्म्म प्रारभते निर्व्वर्त्त-यति तस्य एते पञ्च हेतवः कारणानि। जीवस्य कर्त्तृत्वं न हि देहा-दिनिरपेक्षम्। स यदा विषयोपभोगनिरतस्तदा देहाद्यपेक्षावशात्

तत्रैवं सति कर्त्तारमात्मानं केवलन्तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्म्मतिः ॥१६॥

तत्तदधीनता तस्मिन्नवस्थाविनी । एवं सति न जातु तस्मिन् कर्तृत्वं निरङ्कुशम् । यद्येवं कुतो वा तस्य स्वातन्त्र्यम् ? देहादिपरतन्त्रस्य मात्रोऽपि न जातु सम्भवति । भगवदधीनतया तस्य देहादिनिरपेक्षत्वं स्वातन्त्र्यञ्च । कथं भगवदधीनतया स्वातन्त्र्यं सिध्यति ? स्वरूपैक्यात् । यथा पानभोजनाद्यधीनतया देहपुष्टिस्ततः पोषणोपकरणप्रवेशात्, तथा भगवदधीनतया ततो ज्ञानशक्त्यादिप्रवेशादात्मनस्तत्तत्स्वरूपपरिपुष्टिः । स्वरूपपुष्ट्या देहादिनिरपेक्षत्वेन तस्य ब्रह्मणि स्थितिः ; देहादिनां क्रियास्तु प्रकृत्यधिष्ठात्रा तेन परेण प्रयोजिताः, न पुनरात्मना अतस्तस्याकर्तृत्वम् । देहाद्यधीनतया क्रियमाणेन कर्म्मणा धर्म्माधर्म्मभाग्भवति सः । १५ ।

देहादिपञ्चभिर्हेतुभिर्निर्व्वर्त्त्यं कर्म्मात्मैव केवलः करोतीति मिथ्याज्ञानं निन्दति तत्रैवेति । तत्र कर्म्मणि एवं सति पञ्चभिर्हेतुभिर्निर्व्वर्त्ये सति यः अकृतबुद्धित्वात् उपदेशादिभिरकृतबुद्धित्वात् केवलमेकमात्ममात्मानं कर्त्तारं पश्यति, दुर्मतिर्मन्दबुद्धिः स न पश्यति तत्त्वं न जानाति । यैर्व्याख्यातृभिरात्मनोऽकर्तृत्वं साधयितुं श्लोकोऽयं व्याख्यातोऽस्मदादपक्षाश्रयेण तेषां व्याख्या केवलमिति पदेन सर्व्वथा निराक्रियते । "न ह्यविक्रियस्यात्मनः केनचित् संहननमस्ति इति न सम्भूय कर्तृत्वमुपपद्यते, अतः केवलत्वमात्मनः स्वाभाविकमिति केवलशब्दोऽनुवादमात्रम्, अविक्रियत्वञ्चात्मनः श्रुतिस्मृतिन्यायप्रसिद्धम्" इत्युक्तिर्नान्वयमुखेनोपस्थापितमर्थं बाधितुमर्हति । अतएव श्रीमद्रामानुजीया व्याख्यैवाक्षरानुसारिणी तद्यथा—"एवं वस्तुतः परमात्मानुमतिपूर्व्वके जीवात्मनः कर्तृत्वे सति तत्र तत्र कर्म्मणि केवलमात्मानमेव तु कर्त्तारं यः पश्यति, स दुर्म्मतिर्विपरीतमतिरकृतबुद्धित्वात् अनिष्पन्नयथावस्थितवस्तुत्वान्न स पश्यति न यथावस्थितं कर्त्तारं पश्यति" इति । १६ ।

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान् न हन्ति न निबध्यते ॥१७

भगवत्कर्त्तृत्वे यस्य कर्त्तृत्वाभिमानो विलुप्तः तं स्तौति यस्येति । यस्य न भवत्यहङ्कृतो भावः अहं कर्त्तेति भावना, यस्य बुद्धिः कर्म्मसु न लिप्यते न सज्जते, स इमान् लोकान् सर्व्वान् प्राणिनो हत्वापि न हन्ति, न तेन वधकर्म्मणा निबध्यते न बद्धो भवति । वधकर्म्मात्र दृष्टान्तत्वेन गृहीतमाचार्य्येण क्षात्रधर्म्मस्य धर्म्मत्वप्रतिपादनार्थम् । वधकर्म्मणः पापकरं नान्यत्कर्म्मास्ति अतस्तत्र कर्त्तृत्वाभिमानत्यागाद्भवति यदा पापालेपः, किमु वक्तव्यमन्यत्र यज्ञादिकर्म्मजन्ये क्षुद्रे पापे निष्पापत्वमित्यभिप्रायः । अत्र श्रीमच्छङ्करः—"ननु हत्वापि न हन्तीति विप्रतिषिद्धमुच्यते यद्यपि स्तुतिः, नैष दोषः, लौकिकपारमार्थिकदृष्ट्यपेक्षया तदुपपत्तेः । देहाद्यात्मबुद्ध्या हन्ताहमिति लौकिकीं दृष्टिमाश्रित्य हत्वापीत्याह, यथादर्शितां पारमार्थिकीं दृष्टिमाश्रित्य न हन्ति न निबध्यत इति तदुभयमुपपद्यत एव ।" इति । केयं पारमार्थिकी दृष्टिः ? "नाहं कर्त्ता किन्तु कर्त्तृतद्व्यापारयोः साक्षी क्रियाज्ञानशक्तिमदुपाधिद्वयविनिर्मुक्तः शुद्धः सन् कार्य्यकारणासम्बन्धोऽद्वितीयोऽविक्रिय इत्येवम्" इति श्रीमद्गिरिः । श्रीमद्रामानुज आह—"परमपुरुषकर्त्तृत्वानुसन्धानेन यस्य भावः कर्त्तृत्वविषयगोचरो मनोवृत्तिविशेषो नाहङ्कृतः नाहमभिमानकृतः, अहं करोमीति यस्य न विद्यत इत्यर्थः । बुद्धिर्यस्य न लिप्यते अस्मिन् कर्म्मणि मम कर्त्तृत्वाभावादेतत्फलं न मया सम्बध्यते ; न च मदीयमिदं कर्म्मेति यस्य बुद्धिर्जायत इत्यर्थः, स इमाँल्लोकान् युद्धे हत्वापि न हन्ति न केवलं भीष्मादीनित्यर्थः । ततस्तेन युद्धाख्येन कर्म्मणा न निबध्यते तत्फलं नानुभवतीत्यर्थः" इति । "सर्व्वानपि प्राणिनो लोकदृष्ट्या हत्वापि विविक्ततया स्वदृष्ट्या न हन्ति न च तत्फलैर्निबध्यते बन्धनं प्राप्नोति………तदुक्तं —'ब्रह्मण्याधाय कर्म्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्म्मचोदना ।
करणं कर्म्म कर्त्तेति त्रिविधः कर्म्मसङ्ग्रहः ॥१८॥

पापेन पद्मपत्रमिवाम्भसा ॥' " इति श्रीमच्छ्रीधरः । "नाहं कर्त्तेत्येवं परमार्थदृष्टेः बुद्धिरन्तःकरणं यस्य न लिप्यते नानुसारी भवति । इदमहमकार्षमेतत्फलं भोक्ष्ये इत्यनुसन्धानं कर्त्तृत्ववासनानिमित्तं लेपोऽनुशयः । स च पुण्ये कर्म्मणि हर्षरूपः पापे पश्चात्तापरूपः । ईदृशेन द्विविधेनापि लेपेन बुद्धिर्न युज्यते कर्त्तृत्वाभिमानबाधात्······ अत साहङ्कारभाव इतरस्य फलं न हन्तीति, बुद्धिर्न लिप्यत इतरस्य फलं न निबध्यत इति । अनेन च कर्त्तालेपप्रदर्शनेऽतिशयमात्रमुक्तं न तु सर्व्वप्राणिहननं सम्भवति" इति श्रीमन्मधुसूदनः । " 'हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते' इति तु स्तुतिमात्रं कर्त्तृत्वस्यैव बाधेन हन्तृत्वारोपात् दग्धपटवत् कर्त्तृत्वानुवृत्तावपि हननक्रियायाः प्रवर्त्तकस्य रागद्वेषादेरभावाच्च एतेनात्मनस्तात्त्विकमकर्त्तृत्वं भावयता ज्ञातं कर्म्मातात्त्विककर्त्तृत्वाभिमाननिमित्तं स्वफलं प्रसोतुं नार्हतीति दर्शितं, न हि रज्जुमर्पि रज्जुबुद्धिं कृत्वा प्रहरतः सर्पक्षोभजं दंशनादिफलं भवति, सर्पे तु तथा कुर्व्वतस्तद्भवत्येव तद्वदिदमपि ज्ञेयम्" इति श्रीमन्नीलकण्ठः । "त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः ॥" (४।२०), "ब्रह्मण्याधाय कर्म्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥" (५।१०) इत्यादिवचनैर्यदुक्तं तस्यैवोपसंहृतिरूपोऽयं श्लोकः । १७ ।

भगवत्प्रेरणया कर्म्म कुर्व्वाणा गुणातीतत्वं भजन्ते, अतः कर्म्म न तेषां बन्धनाय भवति । एतदेव 'यस्य नाहङ्कृतो भावः' इत्यनेनोक्तम् । गुणैरावृत एव जीवो जीवनमारभते, तत एव च सर्व्वकर्म्मप्रवृत्तिः । न हि गुणजातस्वभावमज्ञात्वा तदतीतत्वं सम्भवति, सुतरां गुणप्रणोदितकर्म्ममूलं वक्तुमुपक्रमते ज्ञानमिति । ज्ञानं ज्ञायतेऽनेनेति सर्व्वविषय-

बोधसामर्थ्यम् कर्त्तव्यकर्म्मविधिविषयज्ञानमिति श्रीमद्रामानुजः, इष्ट-साधनमेतदिति बोध इति श्रीमच्छ्रीधरः, विषयप्रकाशक्रियेति श्रीम-न्मधुसूदनः, ज्ञायते प्रकाश्यते वस्तुतत्त्वमनेनेति प्रत्यक्षादिप्रमाणजन्यो घटादिप्रकाशः स च वर्त्तमानोऽतीतो वेति श्रीमन्नीलकण्ठः, प्रकाशन-क्रियेति मते क्रियारूपेऽस्मिन् प्रवर्त्तकज्ञानान्तरस्यापेक्षेति तत्र तस्याप्य-न्यस्यापेक्षेत्यनवस्था दुर्निवारेति सः ; ज्ञेयं ज्ञातव्यम्—कर्त्तव्यकर्म्म-विधिरिति श्रीमद्रामानुजः, इष्टसाधनं कर्म्मेति श्रीमच्छ्रीधरः, तस्य [ज्ञानस्य] कर्म्मेति श्रीमन्मधुसूदनः, बोधविषयो घटादिरिति श्रीम-न्नीलकण्ठः ; परिज्ञाता जीवः—उपाधिलक्षणोऽविद्याकल्पितो भोक्तेति श्रीमच्छङ्करः, कर्म्मणस्तस्य बोद्धेति श्रीमद्रामानुजः, एतज्ज्ञानाश्रय इति श्रीमच्छ्रीधरः, तस्य [ज्ञानस्य] आश्रय इति श्रीमन्मधुसूदनः, विषयी साभासधीरूपो यो भोक्तेत्युच्यत इति श्रीमन्नीलकण्ठः, एवं त्रिविधा कर्म्मचोदना कर्म्मप्रवर्त्तिका । त्रयाणां सन्निपाते सर्व्वकर्म्मा-रम्भः, तथा च प्रदर्शितं श्रीमता नीलकण्ठेन—“त्रयं समुच्चितं सत् कर्म्मणि प्रवर्त्तकम्………सत्यपि ज्ञेये ज्ञातरि चाज्ञाने प्रवृत्त्यनुपपत्तेः, ज्ञाने ज्ञातरि च सति देशकालव्यवहिते ज्ञेये प्रवृत्त्यनुपपत्तेः, सतरपि संस्कारात्मके ज्ञाने ज्ञेये च सन्निहिते तथापि सुषुप्तौ प्रमात्रभावात् प्रवृ-त्त्यदर्शनात्” इति । करणं क्रियासाधनमन्तर्वाह्येन्द्रियम्—साधन भूतद्रव्यादिकमिति श्रीमद्रामानुजः, कर्म्म क्रियाया व्याप्यमानं कर्त्तुरी-प्सिततमम्, यागादि इति श्रीमद्रामानुजः, कर्त्ता व्यापारयिता । एतत्त्रयं समुदितं सत् कर्म्मसंग्रहः कर्म्मणः संग्रहो भोगः—करणादि त्रिविधं कारकं क्रियाश्रय इति श्रीमच्छ्रीधरः । त्रयाणां समुदितत्वे भोक्तृत्वं सम्भवतीति प्रदर्शितं श्रीमता नीलकण्ठेन, तद्यथा—“सत्यपि भोक्तरि करणे च क्रियां विना भोगासम्भवात् क्रियायाश्चाश्रयं विना स्वरूपा-लाभात्, आश्रयस्य करणं विना भोक्तृत्वाङ्कर्त्तृत्वानुपपत्तेश्चैतत्त्रयं मिलितं सत् भोक्तेत्युच्यते………तथाच श्रुतिः—‘आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः’ ” इति । ज्ञानं करणं, ज्ञेयं कर्म्म, परिज्ञाता

ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥१९॥
सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥२०॥

कर्त्तेति मिथः सम्बन्धो द्रष्टव्यः । अन्तर्बाह्येन्द्रिययोगादेव ज्ञेयं ज्ञायते, अतोऽन्तर्बाह्येन्द्रियं करणं साधकतमम्, ज्ञेयं हि ज्ञातव्यमात्रं, ज्ञातव्यविषय एव हि कर्म क्रियया व्याप्यमानं कर्त्तुरीप्सिततमम्, क्रियायाः कर्त्तैव परिज्ञाता भोक्ता च । आह च श्रीमद्बलदेवः— "यज्ज्ञानं तत्करणं ज्ञायतेऽनेनेति निरुक्तेः करणकारकमित्यर्थः, यज्ज्ञेयं कर्त्तव्यं ज्योतिष्टोमादि तत् कर्मकारकम्, यस्तु तस्य परितोऽनुष्ठानेन ज्ञाता स कर्त्तेति कर्त्तृकारकम् । एवं कर्मसंग्रहो ज्योतिष्टोमादिकर्म्मविधिस्त्रिविधः, करणादिकारकसाध्यः । चोदनासंग्रहशब्दयोरैक्यार्थः" इति । १८ ।

ज्ञानादीनां गुणात्मकत्वं वक्तुं प्रस्तौति ज्ञानमिति । गुणसंख्याने कापिलेयशास्त्रे ज्ञानं कर्म्म च कर्त्ता च गुणभेदतः सत्त्वादिभेदेन त्रिधा एव प्रोच्यते, तान्यपि यथावत् यथायथं शृणु । १९ ।

यद्यपि ज्ञानशब्देनान्तर्बाह्येन्द्रियमेव कैश्चिद्व्याख्यातृभिर्गृहीतं, तथापि निखिलविषयबोधसामर्थ्यमेवास्य मुख्योऽर्थः । अतएव तदर्थकं ज्ञानं गृहीत्वा गुणभेदमुक्तवानाचार्य्यः सर्व्वभूतेष्विति । येन ज्ञानेन प्रतिदेहं विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तम्, अविच्छिन्नमनुस्यूतं —व्योमवन्निरन्तरमिति श्रीमच्छङ्करः—सर्व्वभूतेषु एकम् अव्ययं नित्यमविनश्वरमपरिणामिनं भावं वस्तु अखण्डचित्स्वरूपम्—आत्मवस्त्विति श्रीमच्छङ्करः, विष्णुमिति श्रीमन्माध्वः, परमात्मतत्त्वमिति श्रीमच्छ्रीधरः, परमार्थसत्तारूपं स्वप्रकाशानन्दमात्मानमिति श्रीमन्मधुसूदनः, चिन्मात्ररूपमिति श्रीमन्नीलकण्ठः, ईक्षते साक्षात्करोति तज्ज्ञानं सात्त्विकं विद्धि जानीहि । सत्त्वगुणस्य प्रकाशरूपत्वात् तस्मिन्नखण्ड-

मेकं चित्तत्वं बुद्धौ प्रतिभाति । खण्डानामखण्डस्वसाधनं सत्त्वगुणकार्य्यम् । दार्शनिकेष्वस्यैव साम्राज्यं भवितुमर्हति । यत्रैकदेशदर्शनं तत्र रजोगुणेनाधिकं ज्ञानमिति ज्ञेयम् । "यत्तु कृत्स्नवदेकस्मिन् कार्य्ये" इति तामसज्ञाने आग्रहनिर्द्देशात् सत्त्वे रजसि च कारणं दृष्टोतम् । सत्त्वे त्वखण्डकारणस्य रजसि पुनः खण्डकारणस्य ग्रहणं भवतीति भेदो बोध्यः । अत्र श्रीमद्रामानुजः—"ब्राह्मणक्षत्रियब्रह्मचारिगृहस्थादिरूपेण विभक्तेषु भूतेषु कर्म्माधिकारिषु येन ज्ञानेनैकाकारमात्माख्यं भावं, तथाप्यविभक्तं ब्राह्मणत्वाद्यनेकाकारेष्वपि भूतेषु सितदीर्घादिविभागवत्सु ज्ञानैकाकारमात्मनि विभागरहितम् अव्ययं व्ययस्वभावेष्वपि ब्राह्मणादिशरीरेष्वव्ययम् अविकृतं फलादिसङ्गानर्हं कर्म्माधिकारवेलायामीक्षते तद् ज्ञानं सात्त्विकं विद्धि ।" इति । "सर्व्वेषु भूतेष्वव्याकृतहिरण्यगर्भविराट्संज्ञेषु बीजसूक्ष्मस्थूलरूपेषु समष्टिव्यष्ट्यात्मकेषु—सर्व्वेष्वित्यनेनैव निर्व्वाहे भूतेष्वित्यनेन भवनधर्म्मकत्वमुच्यते तेनोत्पत्तिविनाशशीलेषु—दृश्यवर्गेषु विभक्तेषु परस्परं व्यावृत्तेषु नानारूपेषु अव्ययमुत्पत्तिविनाशादिसर्व्वविक्रियाशून्यमदृश्यमविभक्तमव्यावृत्तं सर्व्वत्रानुस्यूतमधिष्ठानतया बाधावाधतया च एकमद्वितीयं भावं परमार्थसत्तारूपं स्वप्रकाशानन्दमात्मानं येनान्तःकरणपरिणामभेदेन वेदान्तवाक्यपरिनिष्पन्नेन ईक्षते साक्षात्करोति, तन्मित्याप्रपञ्चबाधकमद्वैतात्मदर्शनं सात्त्विकं सर्व्वसंसारोच्छित्तिकारणं ज्ञानं विद्धि" इति श्रीमन्मधुसूदनः । "यथा कटककुण्डलादिषु व्यावर्त्तमानेषु तत्त्वविदेकं काञ्चनमेवेदमिति पश्यति, एवं येन ज्ञानेन सर्व्वभूतेषु विभक्तेषु नानानामरूपभेदभिन्नेषु अव्ययमपरिणामिनमेकं भावं चिन्मात्ररूपमीक्षते·········पश्यति तज्ज्ञानं सात्त्विकं विद्धि, ऐकात्म्यज्ञानमेव सात्त्विकम्" इति श्रीमन्नीलकण्ठः । वस्तुतस्तु प्रपञ्चसत्यत्वेऽप्यखण्डचिद्वस्तुप्रत्यक्षीकरणे न स भवत्यन्तरायः, तस्मिंश्चिद्वस्तुन्यस्य भासमानत्वात् । जगत्सत्यत्ववादिन्या गीताया अयमेवाखण्डवस्तुदर्शनस्य पन्थाः । २० ।

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥२१॥

राजसं ज्ञानमाह पृथक्त्वेनेति। यत् ज्ञानं सर्व्वेषु भूतेषु पृथग्विधान् पृथक्प्रकारान् सुखित्वदुःखित्वादिरूपेण भिन्नान् नानाभावान् आत्मनो भिन्नान् पृथक्त्वेन वेत्ति जानाति, न तु ज्ञानाकारेणैकमिति भावः, तत् ज्ञानं राजसं विद्धि जानीहि। रजो हि प्रवृत्तिस्वभावकम्। प्रवृत्तौ खण्डशो ग्रहणं भवति न त्वखण्डशः। कथम्? प्रवृत्तिमन्ति भूतानि स्वस्वप्रवृत्त्यनुसारतः स्वातन्त्र्यमनुभवन्ति, न त्वेकत्वम्। यावदेकत्वसाधिका निवृत्तिरुद्भूयते प्रोद्भूतसत्त्वत्वेन, खण्डशो ग्रहणं न निवर्त्तते। श्लोकानिमान् कर्म्माधिकारपक्षे व्याख्यातवता श्रीमद्रामानुजेन पद्यमिदमेवं व्याख्यातम्—"सर्व्वेषु भूतेषु ब्राह्मणाद्याकारपृथक्त्वेनात्माख्यानपि भावान् नानाभूतान् सितदीर्घादिपृथक्त्वेन च पृथग्विधान् फलादिसंयोगयोग्यान् कर्म्माधिकारवेलायां यज्ज्ञानं वेत्ति तज्ज्ञानं राजसं विद्धि" इति। श्रीमद्बलदेवेन—"सर्व्वेषु भूतेषु देवमनुष्यादिदेहेषु जीवात्मनः पृथक्त्वेन यज्ज्ञानं देहविनाश एवात्मविनाश इति यज्ज्ञानमित्यर्थः। येन च नानाविधान् भावान् अभिप्रायान् वेत्ति। देह एवात्मेति, देहादन्यो देहपरिमाण आत्मेति, क्षणिकविज्ञानमात्मेति, नित्यविज्ञानमात्रविभुरात्मेति, देहादन्यो न च विशेषगुणाश्रयोऽजड़ो विभुरात्मेति, एवं लोकायतिकजनबौद्धमायितार्किकादिवादान् येन जानाति, तद्राजसं ज्ञानम्" इति। श्रीमन्मधुसूदनेन—"तज्ज्ञानं विद्धि राजसमिति पुनर्ज्ञानपदमात्मभेदज्ञानमनात्मभेदज्ञानञ्च परामृशति। तेनात्मनां परस्परं भेदः, तेषामीश्वराद्भेदः, तेभ्य ईश्वरादन्योन्यतश्चाचेतनवर्गस्य तेन इत्यनौपाधिकभेदपञ्चकज्ञानं कुतार्किकानां राजसमेवेत्यभिप्रायः" इति। श्रीमन्नीलकण्ठेन—"सर्व्वेषु भूतेषु पाञ्चभौतिकत्वेनाविशिष्टेषु नानाभावान् सुरनरतिर्य्यक्स्थावरत्वभेदेन नानात्वानि, बहुवचनमत्यन्तभेदप्रदर्शनार्थम्, पृथग्वि-

यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पञ्च तत् तामसमुदाहृतम् ॥२२॥

प्राम् एकजातीयेष्वपि नरादिषु प्रत्येकं विभिन्नप्रकाराम् यज्ज्ञानं वेत्ति विषयीकरोति" इति । श्रीमद्विश्वनाथेन—"सर्व्वेषु भूतेषु जीवात्मनः पृथक्त्वेन यज्ज्ञानमिति— देहनाश एवात्मनाश इति असुराणां मतम्, अतएव पृथक् पृथक् देहेषु पृथक् पृथगेवात्मा इति, तथाप्यात्मकारणात् पृथग्विधान् नानाभावान् नानाभिप्रायान्—आत्मा सुखदुःखाश्रय इति सुखदुःखाद्यनाश्रय इति ; जड़ इति, चेतन इति ; व्यापक इति, अणुस्वरूप इति ; अनेक इति, एक इति ; इत्यादि कल्पान् येन वेद तद्राजसम् ।" इति । जीवः प्रकृतिरीश्वर इति भेदेन ग्रहणं राजसं सात्त्विकन्तु एकात्मतयेति विप्रतिपत्तिमतां जीवप्रकृत्योरीश्वरप्रकृतित्वे नाकिम् शास्त्रे ग्रहणात् शक्तिशक्तिमतोरभेद इति निरासः । २१ ।

तामसं ज्ञानमाह यत्त्विति । यत् ज्ञानन्तु एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्स्नवत् समग्रवत् सक्तम् एतावानेवात्मेश्वर इत्यभिनिवेशयुक्तम् अहैतुकम् अयुक्तिकं क्रियमाणम्, अतत्त्वार्थवत् यथाभूतोऽर्थस्तत्त्वार्थस्तच्छून्यम्, अल्पं तुच्छं, तत् ज्ञानं तामसमुदाहृतं कथितम् । तमोगुणोऽप्रकाशस्वभावः, अतो यत्रैव चित्तं सज्जते तदेव सर्व्वं भवति, ततोऽन्यत्र चित्तं नायेति, तस्मात्रमेव सर्व्वमिति भ्रान्तिरोपतिष्ठते । अत्र श्रीमद्रामानुज आह—"यत्तु ज्ञानमेकस्मिन् कार्य्ये एकस्मिन् कर्त्तव्ये कर्म्मणि प्रेतभूतगणाद्याराधनरूपेऽत्यल्पफले कृत्स्नफलवत् सक्तम् अहैतुकं वस्तुतस्तु कृत्स्नफलवत्तया तथाविधासङ्गहेतुरहितम्, अतत्त्वार्थवत् पूर्व्ववदेवात्मनि पृथक्त्वादियुक्ततया मिथ्याभूतार्थविषयम्, अत्यल्पफलञ्च प्रेताद्याराधनरूपन्तदल्पञ्च तज्ज्ञानं तामसमुदाहृतम्" इति । श्रीमद्बलदेवस्तु—"यत्तु ज्ञानमहैतुकं स्वाभाविकं न तु शास्त्रहेतोर्ज्जातम् । अतएवैकस्मिन् लौकिके स्नानभोजनस्त्रीविप्रसङ्गादौ कार्य्ये न तु वैदिके यागदानादौ सक्तं कृत्स्नवत् पूर्णं नातोऽधिकम-

नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते ॥२३॥
यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥२४॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥२५॥

श्लोकार्थः। अतएवातत्त्वार्थवत्, यत्र तत्त्वरूपोऽर्थो नास्ति। अल्पं पश्वादिसाधारणत्वात् तुच्छं, तल्लौकिकं स्नानभोजनादिज्ञानं तामसम्" इति। २२।

त्रिविधं कर्म ; तत्र सात्त्विकमाह नियतमिति। अफलप्रेप्सुना फलतृष्णाशून्येन नियतं नित्यं सङ्गरहितमासक्तिवर्ज्जितम् अभिनिवेश-शून्यम्, अरागद्वेषतः रागः प्रीतिः द्वेषः घृणा ताभ्यां न कृतं नानुष्ठितं यत् कर्म तत् सात्त्विकमुच्यते कथ्यते। मुमुक्षूणामनुसर्त्तव्यं सात्त्विकं ज्ञानं सात्त्विकं कर्म चेति सिद्धान्तः सम्यगेव। यतस्तदवलम्बनेन निर्म्मले चेतसि भगवत्प्रेरणानुभवः, तेन च प्रचोदितत्वं कर्म्मणि सिध्यति, यतः पुनः गुणातीतत्वलाभः। २३।

राजसं कर्म्माह यत्त्विति। कामेप्सुना फलं प्राप्तुकामेन साह-ङ्कारेण मत्सदृशः को वा वेदविहितकर्म्मानुष्ठातास्तीत्यत्याकूताभिमानेन वा पुनः बहुलायासं महायत्नसाध्यम् अतिश्रमकरं यत् तु कर्म क्रियते, तत् कर्म राजसमुदाहृतं कथितम्। अत्र फलाकाङ्क्षा लोकख्यातिश्च महायाससाध्यव्यापारे नियोजयतो राजसं पुरुषं, न तु भगवदाराधने तत्प्रेरणा चेति ; अतः सात्त्विककर्म्मतोऽस्य महत् पार्थक्यम्। यदा हि राजसः पुरुष उद्यमप्रधानस्तमुद्यमं भगवदाराधनायां नियो-जयते, तदा भवति क्रमेण सत्त्वोद्रेकः, सत्त्वोद्रेकानन्तरं गुणातीतत्व-मिति क्रमो बोध्यः। २४।

तामसं कर्म्माह अनुबन्धमिति। अनुबन्धं पश्चाद्भाविशुभाशुभम्

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्व्विकारः कर्त्ता सात्त्विक उच्यते ॥२६॥
रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।

—अनु कर्म्मानुष्ठानानन्तरं बन्धं राजदूतयमदूतकृतमिति श्रीमद्बल-देवः ; क्षयं धनादेरपचयं, हिंसां प्राणिपीड़ां, पौरुषमात्मसामर्थ्यञ्चान-पेक्ष्य अपर्य्यालोच्य मोहात् अविवेकात् यत् कर्म्म आरभ्यते, तत् तामस-मुच्यते कथ्यते। अज्ञानतावशतोऽशुभकर्म्मणां महदनिष्टमबुद्ध्वा हिंसादौ प्रवर्त्तते तामसः पुरुषः। यदा ह्यस्य कर्म्मोद्यमेन तमो रजसाभिभूतं भवति, तदा प्रथमं फलकामनायै ततः कीर्त्तये कर्म्मप्रवृत्तिर्भवति। फलकामना हि विषयानुबन्धिनी, कीर्त्तिस्तु न केवलं परकृतस्तुतिवा-देन स्तुतिसुखमुत्पादयति, मरणादूर्द्ध्वमपि मेह स्थास्यतीति प्रोत्साहयति, अतस्तया दृश्याददृश्ये प्रवेशः। अदृश्यानुरञ्जितः क्रमेण मूलानुसन्धाने प्रवृत्तिरुपतिष्ठते, मूलानुसन्धाने भवत्युद्रेकः सत्त्वगुणस्य। तमसो नियमनेन रजःप्रवृत्तिः रजसो नियमनेन सत्त्वप्रवृत्तिरित्याहाचार्य्योऽनु-गीतायाम्—"तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः। रजसश्चापि सत्त्वं स्यात् सत्त्वस्य मिथुनं तमः॥ नियम्यते तमो यत्र रजस्तत्र प्रव-र्त्तते। नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्त्तते॥ (३६अ, ६।७श्लो इति।२५।

त्रिविधः कर्त्ता ; तत्र प्रथमं सात्त्विकं कर्त्तारमाह मुक्तेति। मुक्तसङ्ग आसक्तिविरहितस्त्यक्ताभिनिवेशः, अनहंवादी अहमहमित्यव-दनशीलः कर्त्तृत्वाभिमानरहित इति श्रीमद्रामानुजः, गर्व्वोक्तिरहित इति श्रीमच्छ्रीधरः, स्वगुणश्लाघाविहीन इति श्रीमन्मधुसूदनः ; धृत्यु-त्साहसमन्वितः धृतिर्धैर्य्यम् उत्साह उद्यमस्ताभ्यां समन्वितः संयुक्तः, क्रियमाणस्य कर्म्मणः सिद्ध्यसिद्ध्योः सिद्धावसिद्धौ च निर्व्विकारः समः हर्षविषादशून्यः, एवम्भूतः सात्त्विक उच्यते कथ्यते।२६।

राजसं कर्त्तारमाह रागीति। रागी पुत्रकलत्रादिष्वनुरक्तः,

हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥२७॥

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥२८॥

कर्म्मफलप्रेप्सुः कर्म्मफलाभिलाषी, लुब्धः लोभी, हिंसात्मकः परपीड़क-स्वभावः, अशुचिः बाह्यान्तःशुचिरहितः, हर्षशोकान्वितः इष्टप्राप्तौ हर्षः, अनिष्टप्राप्ताविष्टवियोगे च शोकस्ताभ्यां समन्वितः संयुक्तः, एवम्भूतः कर्त्ता राजसः परिकीर्त्तितः कथितः । २७ ।

तामसं कर्त्तारमाह अयुक्त इति । अयुक्तोऽसमाहितः—अनौचित्यकृदिति श्रीमद्बलदेवः, सर्व्वदा विषयापहृतचित्तत्वेन कर्त्तव्येष्वनवहित इति श्रीमन्मधुसूदनः, अनवहित इति श्रीमन्नीलकण्ठः ; प्राकृतोऽसंस्कृतबुद्धिः—अनधिगतविद्य इति श्रीमद्रामानुजः, प्रकृतौ स्वस्वभाव एव वर्त्तमानः यदेव स्वमनसि आयाति तदेवानुतिष्ठति न च गुरोरपि वचः प्रमाणयति इति श्रीमद्विश्वनाथः ; स्तब्धोऽविनीतः—दण्डवत् न नमति कस्मैचिदिति श्रीमच्छङ्करः, आरम्भशिथिल इति श्रीमद्रामानुजः, अनम्र इति श्रीमच्छ्रीधरः ; शठः अन्यथा सन्नन्यथा प्रतिपादनपरः—मायावी शक्तिगूहनकारीति श्रीमच्छङ्करः, अभिचारादिकर्म्मरुचिरिति श्रीमद्रामानुजः, परवञ्चनार्थमन्यथा जानन्नप्यन्यथावादीति श्रीमन्मधुसूदनः ; नैष्कृतिकः, स्वार्थपरायणः—परवृत्तिच्छेदनपर इति श्रीमच्छङ्करः, वञ्चनपर इति श्रीमद्रामानुजः, परापमानीति श्रीमच्छ्रीधरः, स्वस्मिन्नपकारिण्युपकारित्वभ्रममुत्पाद्य परवृत्तिच्छेदनेन स्वार्थपर इति श्रीमन्मधुसूदनः ; अलसः कार्य्यविमुखः—अप्रवृत्तिशीलः कर्त्तव्येष्विति श्रीमच्छङ्करः, आरब्धेष्वपि कर्म्मस्वप्रवृत्त इति श्रीमद्रामानुजः, प्रारब्धे कर्म्मणि शिथिल इति श्रीमद्बलदेवः ; विषादी नियतविषण्णमुखः—सर्व्वदाऽवसन्नस्वभाव इति श्रीमच्छङ्करः, अतिमात्रविषादशील इति श्रीमद्रामानुजः, शोकशील इति श्रीमच्छ्रीधरः, शोकाकुल इति श्रीमद्बलदेवः, सततमसन्तुष्ट-

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥२९॥
प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये ।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥३०॥
यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥३१॥

स्वभावत्वेनानुशोचनशील इति श्रीमन्मधुसूदनः; दीर्घसूत्री चिरकारी—कर्त्तव्यानां दीर्घप्रसारणः सर्व्वदा मन्दस्वभावः यदद्य श्वो वा कर्त्तव्यं तन्मासेनापि न करोतीति श्रीमच्छङ्करः, अभिचारादि कर्म्म कुर्व्वन्नितरेषु दीर्घकालवर्त्त्यनर्थपर्य्यालोचनाशील इति श्रीमद्रामानुजः, परकृतं दोषं दीर्घकालकृतमप्यनुचितं यः सूचयतीति श्रीमन्माध्वः, दिवसैककर्त्तव्यं वर्षेणापि यो न करोतीति श्रीमद्बलदेवः; एवम्भूतः कर्त्ता तामस उच्यते कथ्यते । २८ ।

बुद्धेर्धृतेश्च त्रिविधं भेदं वक्तुमुपक्रमते बुद्धेरिति । बुद्धेर्धृतेश्च गुणतः सत्त्वरजस्तमोगुणतः अशेषेण पृथक्त्वेन प्रोच्यमानं त्रिविधं भेदं, हे धनञ्जय, शृणु । २९ ।

सात्त्विकीं बुद्धिमाह प्रवृत्तिमिति । या बुद्धिः प्रवृत्तिं धर्म्मानुष्ठाने निवृत्तिमधर्म्माचरणे—कर्म्ममार्गः सन्न्यासमार्ग इति श्रीमच्छङ्करः, अभ्युदयसाधनभूतधर्म्मो मोक्षसाधनभूतो धर्म्म इति श्रीमद्रामानुजः, कार्य्याकार्य्ये कर्म्मकरणाकरणे, भयाभये कार्य्याकार्य्यनिमित्ते, बन्धं संसारासक्तिजनितं मोक्षञ्च भगवदाज्ञापालननिमित्तं या बुद्धिः वेत्ति जानाति, हे पार्थ, सा सात्त्विकी । ३० ।

राजसबुद्धिमाह ययेति । धर्म्मम् अधर्म्मञ्च कार्य्यं करणीयञ्च अकार्य्यमकरणीयमेव च यया बुद्ध्या अयथावत् किञ्चिदिदमेवं न वेति सन्देहास्पदत्वेन यया बुद्ध्या जानाति, हे पार्थ, सा बुद्धिः राजसी । ३१ ।

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥३२॥
धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥३३॥
यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥३४॥
यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा तामसी मता ॥३५॥
सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तञ्च निगच्छति ॥३६॥

तामसीं बुद्धिमाह अधर्ममिति । तमसा अज्ञानमोहस्वभावेन तमो-गुणेनावृता आच्छादिता या बुद्धिः अधर्मं धर्ममिति मन्यते सर्वार्थान् विपरीतान् साधुमसाधुमसाधुं साधुं, तत्त्वमतत्त्वमतत्त्वं तत्त्वमेवं मन्यते, हे पार्थ, सा बुद्धिस्तामसी । ३२ ।

त्रिविधां धृतिं वक्तुं प्रथमां सात्त्विकीं धृतिमाह धृत्येति । योगेन योगाभ्यासेन अव्यभिचारिण्या विषयान्तरेणाव्यवहितया मनःप्राणेन्द्रिय-क्रियाः मनसः प्राणानामिन्द्रियाणाञ्च क्रियाश्चेष्टा धारयते नियच्छति, हे पार्थ, सा सात्त्विकी धृतिः । ३३ ।

राजसीं धृतिमाह ययेति । प्रसङ्गेन कर्तृत्वाभिनिवेशेन फला-काङ्क्षी सन् यया तु धृत्या, हे अर्जुन, धर्मार्थकामानवश्यकर्त्तव्यत्वेन धारयते हार्देनावलम्बते, हे पार्थ, सा राजसी धृतिः । ३४ ।

तामसीं धृतिमाह ययेति । दुर्मेधा अविवेकी यया धृत्या स्वप्नं निद्रां भयं शोकमिष्टवियोगजनितसन्तापं विषादं विषण्णवदनतां मदं विषयसेवाजनितमत्ततां न विमुञ्चति जहाति सा; तामसी धृति-र्मता ज्ञेया । ३५ ।

त्रिविधं सुखं वक्तुमुपक्रमते सुखमिति । इदानीं हे भरतर्षभ, मे

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥३७॥
विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुखं राजसं स्मृतम् ॥३८॥

मम सकाशात् त्रिविधं सुखन्तु शृणु । यत्र सुखे अभ्यासात् परिचयवशात् रमते प्रीतिं प्राप्नोति दुःखान्तं दुःखावसानञ्च निगच्छति प्राप्नोति । ३६ ।

सात्त्विकं सुखमाह यदिति । यत् सुखम् अग्रे उपक्रमे ज्ञानवैराग्यादिसाधनायासवशात् विषमिव परिणामे साधनस्य परिपक्वावस्थायां विविक्तात्मस्वरूपाविर्भावे अमृतोपमं नित्यसुखकरम् ; आत्मबुद्धिप्रसादजम् आत्मनः स्वस्य बुद्धेः प्रसादः स्वच्छत्वं ततो जातं तत् सुखं सात्त्विकं प्रोक्तं तत्त्वविद्भिः । केचिद्व्याख्यातारः पूर्व्वश्लोकस्य परार्द्धमस्य श्लोकस्यारम्भे योजयन्ति, यथा श्रीमन्मधुसूदनेन—"यत्र समाधिसुखेऽभ्यासात् परिचयात् रमते परितृप्तो भवति, न तु विषयसुख इव सद्य एव । यस्मिन् रममाणश्च दुःखस्य सर्व्वस्याप्यन्तमवसानं नितरां गच्छति, न तु विषयसुख इवान्ते महद्दुःखं, तदेव विवृणोति—यदग्रे ज्ञानवैराग्यध्यानसमाध्यारम्भेऽत्यन्तायासनिर्व्वाह्यत्वात् विषमिव द्वेषविषयावहं भवति, परिणामे ज्ञानवैराग्यादिपरिपाके त्वमृतोपमं प्रीत्यतिशयास्पदं भवति । आत्मविषया बुद्धिः आत्मबुद्धिस्तस्याः प्रसादो निद्रालस्यादिराहित्येन स्वच्छतयावस्थानं ततो जातमात्मबुद्धिप्रसादजं न तु राजसमिव विषयेन्द्रियसंयोगजं न वा तामसमिव निद्रालस्यादिजम्; ईदृशं यदनात्मबुद्धिनिवृत्त्या आत्मबुद्धिप्रसादजं समाधिसुखं तत् सात्त्विकं प्रोक्तं योगिभिः" इति । ३७ ।

राजसं सुखमाह विषयेति । विषयेन्द्रियसंयोगात् विषयाणामिन्द्रियाणाञ्च संयोगात् यत् तत् प्रसिद्धं सुखम् अग्रे अनुभवकाले अमृतोपममग्रृतसदृशं निरतिशयस्वादुमत्, परिणामेऽन्ते विषमिव—बलवी-

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥३९॥
न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥४०॥

र्य्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वादधर्म्मतज्जनितनरकादिहेतुत्वाच्चेति श्रीमच्छङ्करः— विषतुल्यं तत्सुखं राजसं स्मृतं ज्ञेयम् । ३८ ।

तामसं सुखमाह यदिति । अग्रे अनुभवकाले अनुबन्धे परिणामे च आत्मनः मोहनं मोहकरं ज्ञानप्रमोषकं वस्तुयाथार्थ्यावरकमिति श्रीमद्बलदेवः, निद्रालस्यप्रमादोत्थं निद्रा च आलस्यञ्च प्रमादश्च तेभ्य उत्तिष्ठति उत्पद्यते यत् सुखं तत्तामसमुदाहृतं कथितम् । "निद्रा-दयोऽप्यनुभववेलायामपि मोहहेतवः । निद्रायां मोहहेतुत्वं स्पष्टम्, आलस्यमिन्द्रियव्यापारमान्द्यम्, इन्द्रियव्यापारमान्द्ये च ज्ञानमान्द्यं भवत्येव, प्रमादः कृतानवधानरूप इति तत्र त्वात्मज्ञानमान्द्यं भवति" इति श्रीमद्रामानुजः । ३९ ।

अनुक्तं संगृह्णन् प्रकरणमुपसंहरति न तदस्तीति । पृथिव्यां मनुष्यादिषु दिवि देवेषु वा पुनः न तत् सत्त्वं प्राणिजातम्—इदमुपलक्षणं जड़स्यापि सर्व्वस्य त्रिगुणविकारत्वात् इति श्रीमन्नीलकण्ठः—अप्राणिजातञ्च अस्ति ; यत् एभिः प्रकृतिजैर्गुणैः सत्त्वरजस्तमोभिः मुक्तं स्यात् । तमोरजःसत्त्वगुणतत्त्वानां संग्रहो दृश्यते पुनरेवमनुगीतायाम्—"सम्मोहोऽज्ञानमत्यागः कर्म्मणामविनिर्णयः । स्वप्नः स्तम्भो भयं लोभः शोकः सुकृतदूषणम् ॥ अस्मृतिश्चाविपाकश्च नास्तिक्यं भिन्नवृत्तिता । निर्व्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता ॥ अकृते कृतमानित्वमज्ञाने ज्ञानमानिता । अमैत्री विकृताभावो ह्यश्रद्धा मूढ़भावना ॥ अनार्ज्जवमसञ्ज्ञत्वं कर्म्म पापमचेतना । गुरुत्वं सन्नभावत्वमवशित्वमवाग्गतिः ॥ सर्व्व एते गुणा वृत्तास्तामसाः सम्प्रकीर्त्तिताः । ये चान्ये विहिता भावा लोकेऽस्मिन् भावसंश्रिताः ॥ तत्र तत्र नियम्यन्ते सर्व्वे ते तामसा

गुणाः। परिवादकथा नित्यं नित्यं ब्राह्मणनिन्दकाः॥ अत्यागश्चाभिमानश्च मोहो मन्युस्तथाऽक्षमा। मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते॥ वृथारम्भा हि ये केचित् वृथादानानि यानि च। वृथाभक्षणमित्येतत् तामसं वृत्तमिष्यते॥ अतिवादोऽतितिक्षा च मात्सर्य्यमभिमानिता। अश्रद्दधानता चैव तामसं वृत्तमिष्यते॥" (३६अ, १२—२०श्लो) इति। "सन्तापो रूपमायासः सुखदुःखे हिमातपौ। ऐश्वर्य्यं विग्रहः सन्धिर्हेतुवादो रतिः क्षमा॥ बलं शौर्य्यं मदो रोषो व्यायामकलहावपि। ईर्ष्येप्सा पैशुनं युद्धं ममत्वं परिपालनम्॥ वधबन्धपरिक्लेशाः क्रयो विक्रय एव च। निकृन्त छिन्धि भिन्धीति परमर्म्मावकर्त्तनम्॥ उग्रं दारुणमाक्रोशः परच्छिद्रानुशासनम्। लोकचिन्तानुचिन्ता च मत्सरः परिपालनम्॥ मृषावादो मृषादानं विकल्पः परिभाषणम्। निन्दा स्तुतिः प्रशंसा च प्रतापः परिधर्षणम्॥ परिचर्य्यानुशुश्रूषा सेवा तृष्णा व्यपाश्रयः। व्यूहो नयः प्रमादश्च परिवादः परिग्रहः। संस्कारा ये च लोकेषु प्रवर्त्तन्ते पृथक् पृथक्। नृषु नारीषु भूतेषु द्रव्येषु शरणेषु च॥ सन्तापोऽप्रत्ययश्चैव व्रतानि नियमाश्च ये। आशीर्युक्तानि कर्म्माणि पौर्त्तानि विविधानि च॥ स्वाहाकारो नमस्कारः स्वधाकारो वषट्क्रिया। याजनाध्यापने चोभे यजनाध्ययने अपि॥ दानं प्रतिग्रहश्चैव प्रायश्चित्तानि मङ्गलम्। इदं मे स्यादिदं मे स्यात् स्नेहो गुणसमुद्भवः॥ अभिद्रोहस्तथा माया निकृतिर्मान एव च। स्तैन्यं हिंसा जुगुप्सा च परितापः प्रजागरः॥ दम्भो दर्पोऽथ रागश्च भक्तिः प्रीतिः प्रमोदनम्। द्यूतञ्च जनवादश्च सम्बन्धाः स्त्रीकृताश्च ये॥ नृत्यवादित्रगीतानां प्रसङ्गा ये च केचन। सर्व्वे एते गुणा विप्रा राजसाः सम्प्रकीर्त्तिताः॥" (३७अ, २—१४श्लो) इति। "आनन्दः प्रीतिरुद्रेकः प्राकाश्यं सुखमेव च। अकार्पण्यमसंरम्भः सन्तोषः श्रद्दधानता॥ क्षमा धृतिरहिंसा च समता सत्यमार्ज्जवम्। अक्रोधश्चानसूया च शौचं दाक्ष्यं पराक्रमः॥ सुधाज्ञानं सुधावृत्तं सुधासेवा सुधाश्रमः। एवं यो युक्तधर्म्मः स्यात् सोऽमुत्रात्यन्तमश्नुते॥ निर्म्ममो निरहङ्कारो

निराशीः सर्वतः समः। अकामहत इत्येव सतां धर्मः सनातनः॥ विश्रम्भो ह्रीस्तितिक्षा च त्यागः शौचमतन्द्रिता। आनृशंस्यमसम्मोहो दया भूतेष्वपैशुनम्॥ हर्षस्तुष्टिर्विस्मयश्च विनयः साधुवृत्तिता। शान्ति-कर्म्मणि शुद्धिश्च शुभा बुद्धिर्विमोचनम्॥ उपेक्षा ब्रह्मचर्य्यञ्च परित्यागश्च सर्व्वशः। निर्म्ममत्वमनाशीस्त्वमपरिक्षतधर्म्मता॥ मुधादानं मुधायज्ञो मुधाधीतं मुधाव्रतम्। मुधाप्रतिग्रहश्चैव मुधाधर्म्मो मुधा-तपः॥ एवं वृत्तास्तु ये केचित् लोकेऽस्मिन् सत्त्वसंश्रयाः। ब्राह्मणा ब्रह्मयोनिस्थास्ते धीराः साधुदर्शिनः॥” (३८ अ, २—१० श्लो) इति।

नन व्यक्तिप्रवृत्त्यप्रवृत्तिरूपा गुणा इति चतुर्दशे पञ्चमे श्लोके निर्दिष्टम्। व्यक्तितः सत्त्वगुणतत्त्वानां, प्रवृत्तितो रजोगुणतत्त्वानाम्, अप्रवृत्तितस्तमोगुणतत्त्वानां कथं वा सम्भवः। यानि सत्त्वादिगुणवृत्तानि न्यवभादाचार्य्यः, न तेषु व्यक्तेः प्रवृत्तेरप्रवृत्तेर्वा क्रिया दृश्यन्ते। अतो मध्यानोद्भावनया व्याख्यानमन्वेषयम्। न स्वत्वमन्वेषयम्। व्यक्तिः प्रोद्भिन्नत्वं, प्रवृत्तिः प्रोद्भेदोन्मुखत्वम्, अप्रवृत्तिरप्रोद्भिन्नत्वमित्यवधारणात् सर्व्वत्र तासां क्रियाः किञ्चिदभिनिवेशेनैव प्रतिभान्ति। प्रथमस्तावत् तामसज्ञाने सूक्ष्मवस्तुदर्शनसामर्थ्यस्याप्रोद्भिन्नत्वात् स्थूलकार्य्यमेव तस्मिन् भासते न तु सूक्ष्मकारणम्, अतएवाहाचार्य्यः—“कार्य्ये सक्तमहैतुकम्” (१८।२२) इति। कर्म्मण्यपि तन्निहितसूक्ष्मव्यापारानुभवसामर्थ्यस्याप्रोद्भिन्नत्वात् शुभाशुभादिज्ञानस्याभावो दृश्यते। कर्त्तर्य्यालस्याद्यप्रोद्भिन्नसामर्थ्यादिति स्पष्टम्। बुद्धेरप्रोद्भिन्नसामर्थ्यादेव विपरीतभावेन सर्व्वेषामर्थानां ग्रहणं भवति। धृतावप्रोद्भिन्नधृतित्वादप्रोद्भिन्नज्ञानत्वाच्च विषादाद्यपरिहारो घटते। सुखे त्वप्रोद्भिन्नवस्तुस्वरूपज्ञानात् भ्रान्त्यादिसम्भूतमात्मविमोहकं सुखमनुभूयते। आहारादेरप्येवं बोध्यम्। स्वादग्रहणादिशक्तेरप्रोद्भिन्नत्वात् पूतिपर्य्युषितादयं प्रियं भवति तामसस्येति पर्य्यालोच्यम्। प्रोद्भिन्नत्वमप्रोद्भिन्नत्वमित्युभयोरन्तराले यत्प्रोद्भेदोन्मुखत्वं प्रवृत्तेरपरपर्य्यायं तस्मिन् सम्यग्दर्शनसंका-

ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप।
कर्म्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥४१॥

त्यासम्यग्दर्शनञ्च न सम्भवति ; अत ईषद्दर्शनतोऽधिकतरदर्शने समुद्यम उपतिष्ठते। स चोद्यमः सङ्कल्पाकाङ्क्षानियतानुबन्धः। सङ्कल्पवशा-द्यस्मिन् यस्मिन् यदा भवत्यभिनिवेशः, तस्मिंस्तस्मिन् निबद्धचित्तत्व-वशात् "पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्। वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥" (१८।२१) इत्यादिगुणवृ-त्तानि। उद्यमानुकूल एवास्मिन्नाहार उत्तेजनप्रधानः। सत्त्वे प्रोद्-भिन्नत्वं यथायथवस्तुदर्शनानुकूलमतोऽन्तर्बाह्येन्द्रियाणां सम्यग्विकाशो-चितानि सत्त्ववृत्तानि निबद्धान्याचार्य्येण। न हि कोऽपि गुणानति-क्रम्य वर्त्तते, अतो गुणानां वृत्तानि ज्ञात्वा सत्त्ववृत्तानुसरणेन रज-स्तमसी अभिभूय निर्म्मलचित्तः सदन्तर्यामिणा साक्षात्सम्बन्धेनाबद्ध-स्तत्प्रेरणानुसरणेन गुणातीतो भवेज्जीव इति तत्त्वम्। "ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः" (७।२) इत्यत्र यद्विज्ञानस्योल्लेखो दृश्यते तन्मूलिकैव साधनरीतिरस्य शास्त्रस्येति सुधीभिर्विभाव्यम्। ४०।

स्वस्वस्वभावविहितकर्म्मानुसरणेन भवति भगवदाराधना, तया भगवद्भक्तिः भक्त्या चापरोक्षज्ञानम्, अपरोक्षज्ञानेन भगवता स्वैक्य-मिति प्रदर्शनपरस्यान्तिमग्रन्थस्योपक्रमरूपं गुणानुसारिवर्णविभजन-माह ब्राह्मणेति। हे परन्तप, ब्राह्मणक्षत्रियविशां ब्राह्मणाः क्षत्रि-याश्च विशश्च तेषां ब्राह्मणक्षत्रियवैश्यानां वेदाध्ययनसंस्कारार्हाणां शूद्रा-णाञ्च—समासात् पृथक्करणं संस्कारानर्हत्वादिति व्याख्यातारः—स्वभाव-प्रभवैः स्वभावोत्पन्नैः प्रकृतिसिद्धैर्गुणैः सत्त्वरजस्तमोभिः कर्म्माणि प्रवि-भक्तानि भिन्नतां प्राप्तानि। ननु दृश्यते मोक्षधर्म्मे—"सर्व्वे वर्णा ब्राह्मणा ब्रह्मजाश्च सर्व्वे नित्यं व्याहरन्ते च ब्रह्म। तत्त्वं शास्त्रं ब्रह्मबुद्ध्या ब्रवीमि सर्व्वं विश्वं ब्रह्म चैतत् समस्तम्॥" (शा, प, ३१८अ, ८८श्लो) इत्यत्रान्यत्र च सर्व्वेषां वर्णानां ब्राह्मणत्वं स्वीकृतम्,

ननु कथमत्र शूद्राणां समासात् पृथक्करणेनात्यन्तभेदप्रदर्शनम् ? उच्यते —जनानां स्वाभाविकगुणकर्मभेदप्रदर्शनार्थं प्रकरणे समासाकरणाकरणमकिञ्चित्करम् । "परिचर्य्यात्मकं कर्म्म शूद्रस्य" इति भेदप्रदर्शनमत्राभिप्रेतम् ; अन्यथा शूद्राणामैकान्तभेदप्रदर्शनाय चेत् समासाकरणं स्यात् तदा "कर्म्मभिः शुचिभिर्देवि शुद्धात्मा विजितेन्द्रियः । शूद्रोऽपि द्विजवत्सेव्य इति ब्रह्मानुशासनम् ॥ स्वभावः कर्म्म च शुभं यत्र शूद्रेऽपि तिष्ठति । विशिष्टः स द्विजातेर्वै विज्ञेय इति मे मतिः ॥" (अनु, प, १४३अ, ४८।४९श्लो) इत्यादिवचनं व्याकुप्येत् । न पुनर्वक्तव्यं परिचर्य्या शूद्रस्यैवानन्यसाधारणीति, तथा सति आचार्य्यादिपरिचर्य्या ब्राह्मणादीनामवश्यकर्त्तव्यत्वेन न निर्णीता स्यात् । "जन्मना जायते शूद्रः", "सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव" इति न्यायात् गुरुजनान्तिकेषु च सर्व्वैः शूद्रवन्नीचैः स्थातव्यमिति शास्त्राभिप्रायः । शूद्रत्वस्यैव महान् महिमा यत् निरभिमानत्वात् "प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरान्" इत्युत्तमाधनं सहजसाध्यं तस्मिन् । "सर्व्वे वर्णा ब्राह्मणाः" इति यदुक्तं तच्छूद्रस्य स्वभावादेव ज्ञानवत्तामपेक्ष्यैव । अतस्तत्वाम्नाम्—"ज्ञानान्मोक्षो जायते राजसिंह नास्त्यज्ञानादेवमाहुर्नरेन्द्र । तस्माज्ज्ञानं तत्त्वतोऽन्वेषितव्यं येनात्मानं मोचयेज्जन्ममृत्योः ॥ प्राप्य ज्ञानं ब्राह्मणात् क्षत्रियाद्वा वैश्याच्छूद्रादपि नीचादभीक्ष्णम् । श्रद्धातव्यं श्रद्दधानेन नित्यं न श्रद्धिनं जन्ममृत्यू विशेताम् ॥" (शा, प, ३१८अ, ८७।८८श्लो) इति । न जातु शूद्रो ज्ञानेऽनधिकारी, तथा सति परिचर्य्यारूपस्वकर्म्मणा भगवन्तमभ्यर्च्य न मोक्षज्ञानाधिकारी, "स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः" इति प्रतिज्ञाहानिश्च स्यात् । जन्मतो येषां यादृग्गुणता तस्यामेव तेषां नित्यकालस्थितिरिति मूर्खाणां भ्रान्तसिद्धान्तः, सर्व्वेषां वर्णानां ब्रह्मोत्पन्नत्वात् ब्राह्मणत्वमेव मुख्यम्, रजस्तमःप्रभावात् यत्र तदवकाशं सञ्छन्नति भगवद्भावयुक्तस्वकर्म्माचरणाभिभूतरजस्तमस्त्वेन सत्त्वगुणोद्रेकात् ततो निगूढावस्थातः समुद्भासते ; शूद्रोऽपि तदा ज्ञानोपदेष्टा भवति । श्लोको-

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।

पञ्चमपि चाह श्रीमद्रामानुजः—" 'त्यागेनैकेनामृतत्वमानशुः' इत्यादिषु मोक्षसाधनतया निर्दिष्टस्त्यागः सन्न्यासशब्दार्थः, न तदन्यः। स च क्रियमाणेष्वेव कर्मसु कर्मत्वसङ्गत्यागमूलः फलकर्मणोस्त्यागः। कर्तृत्वत्यागस्तु परमपुरुषकर्तृत्वानुसन्धानेनेत्युक्तम्। एतत् सर्वं सत्त्वगुणवृद्धिकार्यमिति सत्त्वोपादेयताज्ञापनाय सत्त्वरजस्तमसां कार्यभेदः प्रपञ्चितः। इदानीमेवम्भूतस्य मोक्षसाधनतया क्रियमाणस्य कर्मणः परमपुरुषाराधनोपदेशतां, तथानुष्ठितस्य च कर्मणस्तत्प्राप्तिलक्षणफलं प्रतिपादयितुं ब्राह्मणाद्यधिकारिणां स्वभावानुबन्धि सत्त्वादिगुणभेदभिन्नं वृत्त्या सह कर्तव्यकर्मस्वरूपमाह ब्राह्मणेति" इति श्रीमद्रामानुजः ; "ननु यद्येवं सर्व्वमपि क्रियाकारकफलादिकं—प्राणिजातञ्च त्रिगुणात्मकमेव तर्हि कथमस्य मोक्ष इत्यपेक्षायां स्वस्वाधिकारेण विहितैः कर्मभिः परमेश्वराराधनात् तत्प्रसादलब्धज्ञानेनेत्येवं सर्व्वगीतार्थसारं संक्षेप्य दर्शयितुं प्रकरणान्तरमारभते ब्राह्मणेत्यादि यावदध्यायपरिसमाप्ति' इति श्रीमच्छ्रीधरः। श्रीमच्छङ्करमतस्त्वाह श्रीमन्मधुसूदनः —"तदेवं सत्त्वरजस्तमोगुणात्मकः क्रियाकारकफललक्षणः सर्व्वः संसारो मिथ्याज्ञानकल्पितोऽनर्थस्तुदशाध्यायोक्त उपसंहृतः। पञ्चदशे च वृक्षरूपककल्पनया तमुक्त्वा 'अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा। ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्त्तन्ति भूयः॥' इत्यसङ्गशस्त्रेण वैराग्येण तस्य छेदनं कृत्वा परमात्मान्वेष्टव्य इत्युक्तम्। तत्र सर्व्वस्य त्रिगुणात्मकत्वे त्रिगुणात्मकस्य संसारवृक्षस्य कथं छेदोऽसङ्गशस्त्रस्यैवानुपपत्तेरित्याशङ्कायां स्वस्वाधिकारविहितैर्वर्णाश्रमधर्म्मैः परितोष्यमाणात् परमेश्वरात् असङ्गशस्त्रलाभ इति वदितुमेतावानेव सर्व्ववेदार्थपरमपुरुषार्थमिच्छद्भिरनुष्ठेय इति च गीताशास्त्रार्थ उपसंहर्त्तव्य इत्येवमर्थमुत्तरप्रकरणमारभ्यते" इति। ४१।

सत्त्वप्रधानानां ब्राह्मणानां स्वाभाविकानि कर्म्माण्याह शम इति।

ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म्म स्वभावजम् ॥४२॥
शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षत्रकर्म्म स्वभावजम् ॥४३॥

शमः अन्तरिन्द्रियोपरमः, दमः बाह्येन्द्रियोपरमः,—शमो बाह्येन्द्रिय-नियमनं, दमोऽन्तःकरणनियमनमिति श्रीमद्रामानुजः ; तपः प्रागुक्तं शारीरादि—भोगनियमनरूपः शास्त्रसिद्धः कायक्लेश इति श्रीमद्रामा-नुजः ; शौचम् अन्तर्बाह्यशुद्धिः—शास्त्रीयकर्म्मयोग्यतेति श्रीमद्रामा-नुजः ; क्षान्तिः क्षमा—परैरनवरतम्ताड्यमानस्याप्यविकृतचित्तता इति श्रीमद्रामानुजः, सहिष्णुतेति श्रीमद्बलदेवः, आक्रुष्टस्य ताड़ितस्य वा मनसि विकाराराहित्यमिति श्रीमन्मधुसूदनः ; आर्जवम् ऋजुता—परेषु मनोऽनुरूपं बाह्यचेष्टाप्रकाशनम् इति श्रीमद्रामानुजः, अवक्रतेति श्रीमच्छ्रीधरः, अकौटिल्यमिति श्रीमन्मधुसूदनः ; ज्ञानं शास्त्रीयम्—परावरतत्त्वयाथात्म्यज्ञानं साङ्गवेदतात्पर्य्यविषयम् इति श्रीमद्रामानुजः ; विज्ञानं साक्षादनुभूतिः—परतत्त्वगतासाधारणविशेषविषयमिति श्रीम-द्रामानुजः, ब्रह्मात्मैक्यानुभव इति श्रीमन्मधुसूदनः ; आस्तिक्यं विश्वा-सवत्त्वम्—अस्तिभावः श्रद्धानतेति श्रीमच्छङ्करः, वैदिकार्थस्य कृत्स्नस्य सत्यतानिश्चयः प्रकृष्टः केनापि हेतुना चालयितुमशक्य इति श्रीमद्रामा-नुजः, अस्ति परलोक इति निश्चय इति श्रीमच्छ्रीधरः, शास्त्राधिगतेऽर्थे सत्यत्वविनिश्चय इति श्रीमद्बलदेवः, सात्त्विकी श्रद्धेति श्रीमन्मधुसूदनः, शास्त्रार्थे दृढ़विश्वास इति श्रीमद्विश्वनाथः। "स्वाभाविकं ब्राह्मणत्वा-दिकं आमोयात्, ब्राह्मणादियोनिजन्यत्वादिकन्तु औपाधिकं ब्राह्मण-त्वादि न तु स्वरूपमित्यर्थः। एवं शमादिना स्वाभाविकब्राह्मणत्वादि-कमनुमाय तेन स्वाभाविकब्राह्मणत्वादिना स्वाभाविकशमादिकमनुमेयम्" इति श्रीमद्गीताविवरणकारः। एतच्छमादि ब्रह्मकर्म्म ब्राह्मणस्य कर्म्म स्वभावजं स्वभावाज्जातम्। ४२।

इत्थोपदक्षिणतःप्रधानानां क्षत्रियाणां स्वाभाविकानि कर्म्माण्याह

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्य्यात्मकं कर्म्म शूद्रस्यापि स्वभावजम् ॥४४॥

शौर्य्यमिति । शौर्य्यं शूरस्य भावः—युद्धे निर्भयप्रवेशसामर्थ्यमिति श्रीमद्रामानुजः, पराक्रम इति श्रीमच्छ्रीधरः, बलवत्तमपि प्रहर्त्तुं प्रवृत्तिरिति श्रीमन्मधुसूदनः ; तेजः प्रागल्भ्यम्—परैरनभिभवनीयतेति श्रीमद्रामानुजः, परैरधृष्यत्वमिति श्रीमद्बलदेवः ; धृतिर्धैर्य्यम्—आरब्धे कर्म्मणि विघ्नोपनिपातेऽपि तत्समापनसामर्थ्यमिति श्रीमद्रामानुजः, महत्यपि सङ्कटे देहेन्द्रियानवसाद इति श्रीमद्बलदेवः ; दाक्ष्यं दक्षता नैपुण्यम्—सहसा प्रत्युत्पन्नेषु कार्य्येषु अव्यामोहेन प्रवृत्तिरिति श्रीमच्छङ्करः, सर्व्वक्रियानिर्वृत्तिसामर्थ्यमिति श्रीमद्रामानुजः, कौशलमिति श्रीमच्छ्रीधरः, क्रियासिद्धिकौशलमिति श्रीमद्बलदेवः, युद्धकौशलमुक्तमिति श्रीमन्नीलकण्ठः ; युद्धे चाप्यपलायनं समरेऽपराङ्मुखता—आत्ममरणनिश्चयेऽपि अनिवर्त्तनमिति श्रीमद्रामानुजः, अवैमुख्यमिति श्रीमद्बलदेवः ; दानं—देयेषु मुक्तहस्ततेति श्रीमच्छङ्करः, आत्मीयद्रव्यस्य परस्वत्वापादानपर्य्यन्तस्त्याग इति श्रीमद्रामानुजः, औदार्य्यमिति श्रीमच्छ्रीधरः, असङ्कोचेन स्ववित्तत्याग इति श्रीमद्बलदेवः ; ईश्वरभावः प्रभुत्वम्—प्रभुशक्तिप्रकटीकरणमीशितव्यान् प्रतीति श्रीमच्छङ्करः, स्वव्यतिरिक्तसकलजननियमनसामर्थ्यमिति श्रीमद्रामानुजः, नियमनशक्तिरिति श्रीमच्छ्रीधरः ; एतत् शौर्य्यादि क्षात्रकर्म्म क्षत्रियस्य कर्म्म स्वभावजं स्वाभाविकम् । ४३ ।

तमउपसर्ज्जनरजःप्रधानानां वैश्यानां रजउपसर्ज्जनतमःप्रधानानाञ्च शूद्राणां कर्म्माण्याह कृषीति । कृषिगोरक्ष्यवाणिज्यं कृषिः कर्षणं शस्योत्पादनार्थं हलादिना भूमेर्लेखनम्, गोरक्ष्यं पाशुपाल्यं वाणिज्यं क्रयविक्रयादि, एतत् वैश्यस्य कर्म्म स्वभावजं स्वभावाज्जातम् । शूद्रस्यापि परिचर्य्यात्मकं शुश्रूषात्मकं कर्म्म स्वभावजं स्वाभाविकम् । ४४ ।

स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्म्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥४५॥
यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम् ।
स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥४६॥

स्वस्वकर्म्माभिरतानां भगवत्परोक्षज्ञानलाभो यथा भवति तं वक्तुमाह स्वे स्वे इति। स्वे स्वे कर्म्मणि—"यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम्। तदन्यत्रापि दृश्येत तत्तेनैव विनिर्द्दिशेत् ॥" इति न्यायात् न तु जन्मजन्ये किन्तर्हि सत्त्वादिगुणाभिव्यक्तिनिमित्ते—अभिरतस्तत्परः नरः पुरुषः "विप्राद्द्विषड्गुणयुतात् श्वपचो वरिष्ठः" इति न्यायात् चण्डालोऽपि सत्त्वगुणोचितकर्म्मनिष्ठः—संसिद्धिं परमनैष्कर्म्म्यपरज्ञानपरभक्तिलक्षणां—'निष्ठा ज्ञानस्य या परा,' 'मद्भक्तिं लभते पराम्' इत्युक्तत्वात्—लभते प्राप्नोति। स्वकर्म्मनिरतः स्वभावनियतकर्म्मपरः सन् यथा सिद्धिं विन्दति तत् शृणु । ४५ ।

यथा सिद्धिं स्वकर्म्मपरो विन्दति तदाह यत इति। यतः सर्व्वान्तर्यामिण ईश्वरात् भूतानां प्राणिनां प्रवृत्तिश्चेष्टा भवति, येन सर्व्वान्तर्यामिणेश्वरेण सर्व्वमिदं ततं व्याप्तम्, स्वकर्म्मणा स्वभावनियतकर्म्मणा तमभ्यर्च्य आराध्य मानवः सिद्धिं परमनैष्कर्म्म्यपरज्ञानपरभक्तिलक्षणां विन्दति प्राप्नोति। भगवत्प्रेरणया प्राणिनो भवन्ति चेष्टावन्त इति कथनेन कर्म्मणां स्वभावविहितानां भगवत्प्रेरणामूलकत्वमभिहितम्, अतः स्वभावं परित्यज्य परस्वभावानुसरणचेष्टा न केवलं विफलत्वमिति, संसृज्यन्ते भगवत्प्रेरणाविमुखा अपराधेनापि। ये पुनः स्वभावमनपेक्ष्य वंशपरम्परागतव्यवहाराणां निजस्वभावविरोधिशास्त्राचार्य्योपदेशानां वानुसरणपरायणा भवन्ति तेऽपि निष्फलप्रयासाः सीदन्ति। 'येन सर्व्वमिदं ततम्' इति वचनेन स्वपरदेहान्तःकरणेषु कर्म्मोपकरणेषु च भगवदाविर्भावमनुभूय तदाराधनमुपदिष्टम् । ४६ ।

श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
स्वभावनियतं कर्म्म कुर्व्वन्नाप्नोति किल्बिषम् ॥४७॥
सहजं कर्म्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्व्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥४८॥

स्वभावनियतकर्म्मत एव न तु परस्वभावनियतकर्म्मतः श्रेयोलाभ इत्याह श्रेयानिति। स्वधर्म्मः स्वभावनियतो धर्म्मः विगुणः असम्यगनुष्ठितः स्वनुष्ठितात् सम्यगनुष्ठितात् परधर्म्मात् परस्वभावनियतात् धर्म्मात् श्रेयान्। कथम्? स्वभावनियतं स्वभावप्रवर्त्तितं स्वभावानुबन्धि कर्म्म कुर्व्वन् पापं नाप्नोति पापभाङ्न भवति। स्वभावनियतं कर्म्म कुर्व्वन् पापं नाप्नोतीत्युक्त्या परस्वभावनियतात्कर्म्मात् पापं भवतीत्यायाति। एतयोक्त्या न हि जात्वितरगुणप्रधानानां जनानां सत्त्वगुणोचितकर्म्मानुसर्त्तव्यं स्यादिति भाति। एवं सति नैष्कर्म्यस्य परज्ञानपरभक्त्योश्चोदयस्तेषु न कदापि सम्भवेत्, स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दतीत्युक्तिर्मिथ्यैव भवति। स्वभावनियतकर्म्मणा यावन्नोच्चभूमावारोहणं भवति, न तावत्तेषु परधर्म्मसमुचितावस्थोदेति। परधर्म्मसमुचितावस्थोदयात् प्राक् न तदाचरणं स्वाभाविकं भवति। यद्याचरेयुस्ते तत्तदा कापट्यमेव स्यात्, धार्म्मिकत्वख्यापनञ्च। बहिः स्वनुष्ठितत्वं भासमानमपि न तथा, सहजत्वालाभात्। यस्याचरणं स्वाभाविकं तस्यासम्यगनुष्ठानं यद्यपि तात्कालिकसामर्थ्याभावं सूचयति; तथापि क्रमिकानुष्ठानेन तदसामर्थ्यं तिरोधत्ते इति श्रेयस्त्वं तस्य। ४७।

स्वाभाविकं कर्म्मात्याज्यमित्याह सहजमिति। हे कौन्तेय, सदोषमपि सहजं सह जन्मनैवोत्पन्नं कर्म्म न त्यजेत्। हि यस्मात् सर्व्वारम्भाः सर्व्वाणि कर्म्माणि धूमेनाग्निरिव दोषेण आवृताः। धूमेनाग्निरित्युपमयाऽग्नौ प्रज्वलिते यथा धूमापगमः स्वस्वरूपाविष्कारः, तथा सदोषाण्यपि कर्म्माणि सङ्गफलत्यागेनानुष्ठितानि दोषं परिहायापरोक्षज्ञानेन परमनैष्कर्म्यसिद्धिमापादयन्तीति ध्वनितम्। अत्र श्रीम-

असक्तबुद्धिः सर्व्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति॥४९॥

शङ्करः—"न च शक्यतेऽशेषतस्त्यक्तुमज्ञेन कर्म्मवता तस्मान्न त्यजेत् ………। यदि वस्तुभूता गुणाः, यदि वा अविद्याकल्पिताः, तद्धर्म्मः कर्म्म तदात्मन्यारोपितमेवेति अविद्वान् न हि कश्चित् क्षणमपि अशेषतस्त्यक्तुं शक्नोतीत्युक्तम्; विद्वांस्तु पुनर्विद्यया विद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म्म परित्यक्तुम् अविद्याध्यारोपितस्य शेषानुपपत्तेः, न हि तैमिरिकदृष्ट्याध्यारोपितस्य द्विचन्द्रादेस्तिमिरापगमे शेषोऽवतिष्ठते, एवञ्च सतीदं वचनमुपपन्नं 'सर्व्वकर्म्माणि मनसा' इत्यादि; 'स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः', 'स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति च" इति। तैमिरिकदृष्ट्या द्विचन्द्रदर्शनवत् अज्ञानदृष्ट्या जगत् सत्यमिव प्रतिभातीति वक्तुं न शक्यते। अज्ञानजन्यमिदं जगदिति ज्ञानोदयेऽपि तस्यानिवृत्तत्वात्, तादृशज्ञानवतोऽपि च देहादिचेष्टासत्त्वात्। अतः सहजं कर्म्म न त्यजेत् इति सिद्धोपदेशः। एवं सति कः पुनर्विदुषामविदुषां भेदः? अनयोः सुमहान् भेदः, यतः सहजं कर्म्म कुर्व्वाणोऽपि विद्वान् तत्र भगवत्प्रेरणां पश्यन् कुर्व्वाणः, अविद्वांस्तु भगवत्प्रेरणामपश्यन् स्वकर्तृत्वं तत्रावलोकयन् बद्धः। ४८।

स्वकर्म्मणा भगवदर्च्चननिरतो हि यदा साक्षात्सम्बन्धेनान्तर्यामिणमवलोकयन् शिथिलसंसारबन्धस्तस्मिन् सर्व्वकर्म्मार्पणं करोति तदा भवति नैष्कर्म्यसिद्धिरित्याह असक्तबुद्धिरिति। सर्व्वत्र गृहवित्तादिषु असक्तबुद्धिः असक्ता सङ्गरहिता बुद्धिर्यस्य, जितात्मा वशीकृतान्तःकरणः, विगतस्पृहः विगता स्पृहा तृष्णा भोगादिषु यस्मात् स सन्न्यासेन सङ्गफलत्यागलक्षणेन—सम्यक् दर्शनेनेति श्रीमच्छङ्करः, कर्म्मासक्तिफलयोस्त्यागलक्षणेनेति श्रीमच्छ्रीधरः, कर्म्मणां स्वरूपतस्त्यागेनेति श्रीमद्बलदेवः, शिखायज्ञोपवीतादिसहितसर्व्वकर्म्मत्यागेनेति श्रीमन्मधुसूदनः,

'कार्य्यमित्येव यत् कर्म्म नियतं क्रियतेऽर्ज्जुन । सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः' इति पूर्व्वोक्तेनामुख्यसात्त्विकत्यागेनेति श्रीमन्नीलकण्ठः, कर्म्मणां स्वरूपेणापि त्यागेनेति श्रीमद्विश्वनाथः—परमां—कर्म्मजाया अपरमसिद्धेः फलभूतामिति श्रीमन्मधुसूदनः—नैष्कर्म्मसिद्धिं भगवद्भाववर्ज्जितकर्म्मत्यागलक्षणां सिद्धिम्—निर्गतानि कर्म्माणि यस्मात् निष्क्रियब्रह्मात्मसम्बोधात् स निष्कर्म्मा तस्य भावो नैष्कर्म्म्यं, नैष्कर्म्म्यञ्च तत्सिद्धिश्च सा नैष्कर्म्म्यसिद्धिः नैष्कर्म्म्यस्य वा सिद्धिः निष्क्रियात्मस्वरूपावस्थानलक्षणस्य सिद्धिर्निष्पत्तिः, तां नैष्कर्म्म्यसिद्धिं परमां प्रकृष्टां कर्म्मजसिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपामिति श्रीमच्छङ्करः, परमां ध्याननिष्ठां ज्ञानयोगस्यापि फलभूतामिति श्रीमद्रामानुजः, नैष्कर्म्म्यफलां योगसिद्धिमिति श्रीमन्माध्वः, सर्व्वकर्म्मनिवृत्तिलक्षणां सत्त्वशुद्धिमिति श्रीमच्छ्रीधरः, निष्कर्म्म ब्रह्म तद्विषयं विचारपरिनिष्पन्नज्ञानं नैष्कर्म्म्यं तद्रूपां सिद्धिमिति श्रीमन्मधुसूदनः, कार्त्स्न्येन स्वरूपतः कर्म्मत्यागलक्षणां पारिव्राज्यसिद्धिमिति श्रीमन्नीलकण्ठः— अधिगच्छति प्राप्नोति ।

किमिदं नैष्कर्म्म्यम् ? कर्म्मणामनारम्भः । यदि कर्म्मणामनारम्भ एव नैष्कर्म्म्यमित्यभिप्रेतमाचार्य्येण, तत्कथं तेनोक्तम्—"न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते । न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥ न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत् । कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ॥ कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् । इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥ यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्ज्जुन । कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥ नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः । शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥" (३।४—८) इति । उच्यते ;—कर्म्मत्यागो हि आत्मनि भगवति वा निविष्टचित्तस्य कर्म्म कृत्वापि कर्म्माकरणम्—"त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः ॥" (४।२०) इति । न खलु स्वरूपतः कर्म्मत्यागः

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥५०॥

लभ्यते । ननु "सर्व्वान् धर्म्मान् परित्यज्य मामेकं शरणं व्रज" इत्यत्र सर्व्वान् वैदिकान् स्वभावनियतांश्च धर्म्मान् परित्यज्येति वचनात् स्वरूपतो निखिलकर्म्मत्याग एवाभिमत आचार्य्यस्य । यदि स्वरूपतो निखिलकर्म्मत्याग एव स्यात् तदव्यवहितपूर्व्वं गीतेनाचार्य्येण "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥" इति । शरणापत्तेरन्यां फलनिष्पत्तिं, शुद्धचित्ता-दीश्वरादन्यां देवतां, तत्प्रतिबिम्बादन्यां कामनां वेदविहितेषु स्वभाव-नियतकर्म्मसु च घटमानां परित्यज्य भगवदेकान्तशरणापन्नत्वेन तन्म-नास्तद्भक्तस्तद्याजी तद्वन्दनपरायणो भवेदित्यस्य विपरीतानां भगवद्-भाववर्ज्जितनिखिलकर्म्मणां त्यागोऽभिप्रेतः, अन्यथा भगवति चित्त-स्थापनं तस्य भजनयाजनवन्दनादि च यत् तत्कर्म्मैवेति केनापि नास्वी-कर्त्तुं शक्यम् । ४९ ।

केनोपायेन नैष्कर्म्य्यसिद्धिमाप्तस्यापरोक्षज्ञानं लभेत तं प्रवक्तुमुप-क्रमते सिद्धिमिति । सिद्धिं नैष्कर्म्य्यसिद्धिं प्राप्तो यथा येन प्रकारेण ब्रह्म प्राप्नोति साक्षात्सम्बन्धेनाधिगच्छति, तथा तं प्रकारं समासेन सङ्क्षेपेणैव मे मम सकाशात्, हे कौन्तेय, निबोध निश्चयेनावधारय, या साक्षात्सम्बन्धेन ब्रह्मप्राप्तिरूपा ज्ञानस्य ज्ञानयोगस्य परा निष्ठा परि-समाप्तिः । कथं ज्ञाननिष्ठा सुसम्पाद्या प्रदर्शितन्तदेवं श्रीमता शङ्क-रेण—"कीदृशी सा [परा निष्ठा] ? यादृशमात्मज्ञानम् । कीदृक् तत् ? यादृश आत्मा । कीदृशोऽसौ ? यादृशो भगवता उक्तः उप-निषद्वाक्यैश्च न्यायतश्च । ननु विषयाकारं ज्ञानं न विषयो, नाप्या-कारवानात्मेष्यते क्वचित् । ननु 'आदित्यवर्णो' 'भारूपः' 'स्वयंज्योतिः' इत्याकारवत्त्वमात्मनः श्रूयते, न, तमोरूपत्वप्रतिषेधार्थत्वात् तेषां वाक्यानाम् । द्रव्यगुणाद्याकारप्रतिषेधे आत्मनस्तमोरूपत्वे प्राप्ते तत्प्रति-

विधार्थ्यादित्यवर्णमित्यादीनि वाक्यानि। अरूपमिति च विशेषतो रूपप्रतिषेधादविषयत्वाच्च—'न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्,' 'अशब्दमस्पर्शम्' इत्याद्येः। तस्मादात्माकारं ज्ञानमित्यनुपपन्नम्। कथं तर्ह्यात्मनो ज्ञानम्? सर्व्वं हि यद्विषयं ज्ञानं तत्तदाकारं भवति, निराकारश्चात्मेत्युक्तम्। ज्ञानात्मनोरुभयोर्निराकारत्वे कथं तद्भावना-निष्ठेति? नात्यन्तनिर्म्मलत्वस्वच्छत्वसूक्ष्मत्वोपपत्तेरात्मनो बुद्धेश्चात्मसमनैर्म्मल्याद्युपपत्तेरात्मचैतन्याकाराभासत्वोपपत्तिः, बुद्ध्याभासं मनः, तदाभासानीन्द्रियाणि, इन्द्रियाभासश्च देहः; अतो लौकिकैर्देहमात्र एवात्मदृष्टिः क्रियते। देहचैतन्यवादिनश्च लोकायतिकाश्चैतन्यविशिष्टः कायः पुरुष इत्याहुः, तथान्ये इन्द्रियचैतन्यवादिनः, अन्ये मनश्चैतन्यवादिनः, अन्ये बुद्धिचैतन्यवादिनः, ततोऽप्यन्तरमव्यक्तमव्याकृताख्यमविद्यावस्थमात्मत्वेन प्रतिपन्नाः केचित् प्रकृतिचैतन्यवादिनः। सर्व्वत्र हि बुद्ध्यादिदेहान्ते आत्मचैतन्याभासतात्मभ्रान्तिः कारणमित्यतश्चात्मविषयं ज्ञानं न विधातव्यम्, किन्तर्हि नामरूपाद्यनात्माध्यारोपेण निवृत्तिरेव कार्य्या, नात्मचैतन्यविज्ञानं सर्व्वैरभ्युपगम्यते, अविद्याध्यारोपितसर्व्वपदार्थाकारैरेव विशिष्टतया गृह्यमाणत्वात्। अतएव विज्ञानवादिनो बौद्धाः विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः प्रमाणान्तरनिरपेक्षताञ्च स्वसंविदितत्वाभ्युपगमेन। तस्मादविद्याध्यारोपणनिराकरणमात्रं ब्रह्मणि कार्त्स्न्यम् न तु ब्रह्मविज्ञाने यत्नः, अत्यन्तप्रसिद्धत्वात्; अविद्याकल्पितनामरूपविशेषाकारप्रहृतबुद्धित्वादत्यन्तप्रसिद्धं सुविज्ञेयमासन्नतरम्, आत्मतत्त्वमप्यप्रसिद्धं दुर्व्विज्ञेयमतिदूरमन्यदिव च प्रतिभात्यविवेकिनां; बाह्याकारनिवृत्तबुद्धीनान्तु लब्धगुर्व्वात्मप्रसादानां नातः परं सुखं सुप्रसिद्धं सुविज्ञेयमासन्नमस्ति, तथाचोक्तं प्रत्यक्षावगमं धर्म्यमित्यादि। केचित्तु पण्डितम्मन्या निराकारत्वादात्मवस्तु नोपैति बुद्धिः, अतो दुःसाध्या सम्यग्ज्ञाननिष्ठेत्याहुः। सत्यमेवं गुरुसम्प्रदायरहितानामश्रुतवेदान्तानामत्यन्तबहिर्व्विषयासक्तबुद्धीनां सम्यक्प्रमाणेष्वकृतश्रमाणाम्; त-

विपरीतानान्तु लौकिकशास्त्रपाण्डकदेशवस्तुनि बहुविक्षिप्तानां दुःसम्पाद्या आत्मचैतन्यव्यतिरेकेण वस्त्वन्तरस्यानुपलब्धेः, यथा चैतदेवमेव मात्यपि-तावोचाम ; उक्तञ्च भगवता 'यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः' इति। तस्माद्बाह्याकारभेदबुद्धिनिवृत्तिरेवात्मस्वरूपावलम्बने कारणम्— न ह्यात्मा नाम कस्यचित् कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वा ; अप्रसिद्धे हि तस्मिन्नात्मनि स्वार्थाः सर्व्वाः प्रवृत्तयः व्यर्थाः प्रसज्येरन्। न च देहाद्यचेतनार्थत्वं शक्यं कल्पयितुं, न च सुखार्थं सुखं दुःखार्थं वा दुःखमात्मावगत्यवसानार्थत्वाच्च सर्व्वव्यवहारस्य। तस्माद्यथा स्वदेहस्य परिच्छेदाय न प्रमाणान्तरापेक्षा, ततोऽप्यात्मनोऽन्तरतमत्वात्तदवगतिं प्रति न प्रमाणान्तरापेक्षा इत्यात्मज्ञाननिष्ठा विवेकिनां सुप्रसिद्धेति सिद्धम्। येषामपि निराकारं ज्ञानमप्रत्यक्षं तेषामपि ज्ञानवशेनैव ज्ञेयावगतिरिति ज्ञानमत्यन्तप्रसिद्धं सुखादिवदेवेत्यभ्युपगन्तव्यम्। जिज्ञासानुपपत्तेश्चाप्रसिद्धञ्चेत् ज्ञानं ज्ञेयवज्जिज्ञास्येत यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाता व्याप्तुमिच्छति, तथा ज्ञानमपि ज्ञानान्तरेण ज्ञाता व्याप्तुमिच्छेत्, न चैतदस्ति। अतोऽत्यन्तप्रसिद्धं ज्ञानं ज्ञाताप्यत एव प्रसिद्ध इति। तस्मात् ज्ञाने यत्नो न कर्त्तव्यः, किन्त्वनात्मबुद्धिनिवृत्तावेव। तस्मात् ज्ञाननिष्ठा सुसम्पाद्या" इति। युक्त-मुक्तं 'ज्ञाने यत्नो न कर्त्तव्यः, किन्त्वनात्मबुद्धिनिवृत्तावेव' इति। अत्र जिज्ञासोपतिष्ठते, कोऽसावुपायोऽनात्मबुद्धिनिवृत्तौ ? येनावृतं तिष्ठति ज्ञानं तदपनयनमिति चेत्, काम एव सः। विषयानुध्यानात् सङ्गः, सङ्गात् कामो जायते(२।६२)ऽतो विषयाभिनिवेशलक्षणसङ्गत्याग एव कामत्यागः। तेन ज्ञानमनावृतं सत् भ्रमबुद्धिं निराकरोति।

आत्मनिरतत्वेन भगवद्भावप्रणोदनेन वा सङ्गफलत्यागपूर्व्वककर्म्मानुष्ठानं कर्म्मत्याग इत्यभिधीयते। अयमेव नैष्कर्म्यसंज्ञां लभते। अत-एवाह श्रीमच्छ्रीधरः—"सङ्गफलयोस्त्यागेन कर्म्मानुष्ठानमपि नैष्कर्म्य-मेव कर्त्तृत्वेऽभिनिवेशाभावात्, तदुक्तं 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्' इत्यादि श्लोकचतुष्टयेन" इति। "नैष्कर्म्यमप्यच्युत-

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्म्ममः शान्तो ब्रह्मभूयाय कल्पते ॥५३॥

भाववर्ज्जितं न शोभते" इति न्यायात् साक्षाद्भगवद्भावप्रणोदित-नैष्कर्म्म्यमेव परमनैष्कर्म्म्यमित्युच्यते। नतु 'मन्मना भव मद्भक्तो' 'सर्व्वान् धर्म्मान् परित्यज्य मामेकं शरणं व्रज' इत्युक्त्या प्रदर्श्यते, न तु "सर्व्वकर्म्माणि मनसा संन्यस्यास्ते सुखं वशी" इत्यनेन ; केवलात्मनिष्ठायामपि तत्सम्भवात् । ५० ।

येनोपायेनापरोक्षब्रह्मज्ञानमाप्नोति तदाह त्रिभिः—बुद्ध्येति, विविक्तेति, अहङ्कारमिति । विशुद्धया पूर्व्वोक्तया (१८।३०) सात्त्विक्या बुद्ध्या युक्तः सम्पन्नः, धृत्या पूर्व्वोक्तया (१८।३३) सात्त्विक्या आत्मानं नियम्य च वशीकृत्य शब्दादीन् विषयान् भगवच्चिन्तनविरुद्धान् त्यक्त्वा आहाराय—शरीरस्थितिमात्रान् केवलान् भुक्त्वा ततोऽधिकान् त्यक्त्वेति श्रीमच्छङ्करः, रागद्वेषौ विषयनिष्ठौ च—शरीरस्थितार्थत्वेन प्राप्तेष्विति श्रीमच्छङ्करः—व्युदस्य परित्यज्य विविक्तसेवी ध्यानप्रतिकूलजनकोलाहला-दिविवर्ज्जितप्रदेशे विद्यमानः, लघ्वाशी मिताशनशीलः—विविक्तसेवा-लघ्वशनयोर्निद्रादिदोषनिवर्त्तकत्वेन चित्तप्रसादहेतुत्वाद्ग्रहणमिति श्रीमच्छङ्करः, यतवाक्कायमानसः वाक् च कायश्च मानसञ्च यतानि ध्याना-भिमुखीकृतानि यस्य सः—उपरतकरण इति श्रीमच्छङ्करः, नित्यं ध्यानयोगपरः "आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्" (६।२५) इत्यादिनोक्तो ध्यानयोगस्तत्परायणः—ध्यानमात्मस्वरूपचिन्तनं योग आत्मस्वरूपविषये एकाग्रीकरणं तौ ध्यानयोगौ परत्वेन कर्त्तव्यौ

भवेदिति श्रीमच्छङ्करः, ध्यानेन यो योगो ब्रह्मसंस्पर्शलक्षणस्तत्पर इति श्रीम-च्छ्रीधरः, हरिचिन्तननिरत इति श्रीमद्बलदेवः, चित्तस्यात्माकारप्रत्य-यावृत्तिधारणम् आत्माकारप्रत्ययेन निर्वृत्तिकतापादनं योगस्तत्परः ………न तु मन्त्रजपतीर्थयात्रादिपर इति श्रीमन्मधुसूदनः, वैराग्यं विषयवैतृष्ण्यम्—ऐहिकामुष्मिकविषयदोषामर्शेन तत्र विरागतामिति श्रीमद्रामानुजः—समुपाश्रितः ; अहङ्कारमभिमानं—महाकुलप्रसूतो-ऽहं महतां शिष्योऽहमस्मि, नास्ति द्वितीयो मत्सम इत्यभिमानमिति श्रीमन्मधुसूदनः, बलं दुराग्रहं—सामर्थ्यं कामरागादियुक्तमिति श्रीम-च्छङ्करः, दर्पं योगयुक्तोऽहमिति मदेन धर्मातिक्रमप्रवृत्तिं—दर्पो नाम हर्षानन्तरभावी धर्मातिक्रमहेतुः 'हृष्टो दृप्यति दृप्तो धर्ममतिक्रामति' इति स्मरणात् इति श्रीमच्छङ्करः ; कामं भोग्येष्वभिलाषं, क्रोधं द्वेषं, परिग्रहं परोपनीतं शरीरधारणोपयोगिबाह्योपकरणस्वीकारं विमुच्य परित्यज्य निर्ममः ममताशून्यः सन् शान्तः उपरतः ब्रह्मभूयाय ब्रह्मस्वरूपैक्याय —ब्रह्मणि भावो ब्रह्मभूयं ब्रह्मणि स्थितिः सर्वदा तन्मनस्कतेति श्रीम-न्माध्वः, ब्रह्मसाक्षात्कारायेति श्रीमन्मधुसूदनः, कल्पते योग्यो भवति । अत्र श्रीमन्नीलकण्ठः—" 'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥' इति प्रज्ञानेन शास्त्राचा-र्योपदेशजेन ज्ञानेन दुश्चरितादिसेवनाद्विरक्तः शान्तो जितचित्तः समा-हितो निरुद्धचित्तवृत्तिरपि अशान्तमानसो योगैश्वर्यासक्तचित्तः एन-मात्मानं न प्राप्नुयादिति श्रुत्यर्थः ; तदिदमाह अहङ्कारमिति । यदा तु योगी यतमानसोऽस्मितामात्रप्रत्ययो भवति तदा सैवास्मितामात्र-स्थितिर्विषयाभिमुखा अहङ्कार इत्युच्यते विषयविमुखा त्वस्मितेति । ततस्तमहङ्कारं निगृह्णीयात् ; तदनिग्रहे योगी बलं सत्यसङ्कल्पादि-सामर्थ्यमात्मनः पश्यन् दर्पं करोति न मत्तुल्योऽन्योऽस्तीति मन्यते, ततश्च 'दृप्तो धर्ममतिक्रामति' इत्यापस्तम्बवचनात् दिव्यान् कामानिच्छति, तत्र केनचिन्निमित्तेन कामप्रतिबन्धे सति क्रोधवान् भवति, ततः परो-त्सादनाय भूयांसं शिष्यादिपरिग्रहं सम्पादयति, ततो नश्यतीति ।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम्॥५४॥

तस्मात् सर्व्वानर्थमूलभूतमहङ्कारमेव विमुच्य तत इतरान् सर्व्वान् विमुञ्चति। अहङ्कारविमोकेऽपि निर्म्ममत्वं तत्प्रदर्शितेषु विषयेषु ममताशून्यत्वे सत्यहङ्कारशिथिलीभूतो विषयवैमुख्यं प्राप्य स्वकारणेऽस्मितायां विलीयते ततः शान्तोऽस्मितायां अपि प्रलयाद्विरिन्धनाग्निवदुपरतो योगी ब्रह्मभूयाय कल्पते" इति। ५१—५३।

ब्रह्मसाक्षात्कारानन्तरं परा भक्तिरुदेतीत्याह ब्रह्मभूत इति। ब्रह्मभूतः ब्रह्मण्यवस्थितः ब्रह्मसाक्षात्कारकृतकृत्यः, प्रसन्नात्मा प्रसन्नचेताः, लब्धात्मप्रसादस्वभाव इति श्रीमच्छङ्करः, न शोचति अपचयमुद्दिश्य न सन्तप्यते, न काङ्क्षति अप्राप्तमुपचयं नाभिलषति। अत्र श्रीमन्नीलकण्ठः—"यो हि सुप्तो लये वा निपतितो योगी व्युत्थाने जड़देहस्तमोग्रस्तचित्त इव तन्द्रालुवृत्तिष्ठति, ब्रह्मभूतस्तु प्रसन्नात्मा प्रसन्नचेता लघुशरीरः प्रकृतेनैव समाधिसुखेन तृप्तस्तदेकप्रवणेन न शोचति नष्टं नाप्यप्राप्तं काङ्क्षति" इति। एवम्भूतोऽपरोक्षज्ञानसम्पन्नो योगी सर्व्वेषु भूतेषु समो वैषम्यभाववर्ज्जितः, पराम्—अव्यवधानेन साक्षात्कारफलामिति श्रीमन्मधुसूदनः—मद्भक्तिं मयि सर्व्वान्तर्यामिणि भक्तिं परानुरक्तिं लभते प्राप्नोति। "समः सर्व्वेषु भूतेषु" इत्यनेन "येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि" (४।३५) इति परामृश्यते। ज्ञानेनाशेषाणि भूतान्यात्मनि तदनन्तरं तानि सर्व्वान्तर्यामिणि पश्यन् सर्व्वेषु भूतेषु समत्वं लभते साधकः, समत्वेन परा भक्तिः। यत् पुनः श्रीमद्रामानुजेन व्याख्यातं—"मद्व्यतिरिक्तेषु सर्व्वभूतेष्वनादरणीयतायां समो निखिलं वस्तुजातं तृणवन्मन्यमानो मद्भक्तिं लभते पराम्" इति, तत्तु महतो महीयसः साक्षात्कारे सर्व्वस्य तुच्छत्वापत्त्या युक्तम्, अन्यथा साधनावस्थायां—"खं वायुमग्निं सलिलं महीञ्च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्। सरित्समुद्रांश्च हरेः शरीरं यत् किञ्च भूतं प्रणमेदनन्यः॥"

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥५५॥

(भा, ११स्क, २अ, ४१श्लो) इत्यादिभिर्विहितस्य सर्व्वत्र भगवद्दर्शनेन भूतावमाननाशून्यत्वस्यापेक्षितत्वात् न तथा वक्तुं शक्यते। "मद्भक्तः सरितां पतिं चुलुकवत् खद्योतवद्भास्करं मेरुं पश्यति लोष्टवत् किमपरं भूमिः पतिं भृत्यवत्। चिन्तारत्नचयं शिलाशकलवत् कल्पद्रुमं काष्ठवत् संसारं तृणराशिवत् किमपरं देहं निजं भारवत्॥" इति भक्तजनानुभूतिर्विभावनस्ते निमग्नताया उदेति, इतरवस्तुजातस्य तत्सन्निधावतितुच्छत्वात्।

षट्चत्वारिंशे स्वकर्म्मणा भगवदर्च्चनया या सिद्धिरुक्ता सैव सन्न्यासेन "ब्रह्मण्याधाय कर्म्माणि" (५।१०) इत्येवमादिना साक्षाद्भगवत्प्रेरणासम्भूतेन परमा नैष्कर्म्यसिद्धिः, ध्यानयोगेन ब्रह्मसंस्पर्शलक्षणेन परा ज्ञाननिष्ठा, भगवत्साक्षात्कारेण परा भक्तिरिति भिन्ना विशेषाख्यां लभते। परोक्षदशायां नैष्कर्म्यं ज्ञानं भक्तिरेवापरोक्षदशायां परमनैष्कर्म्यं परज्ञानं परभक्तिः। एतत्त्रयं समन्वितभावेनैव तिष्ठतीति 'मन्मना भव' इत्याद्युपसंहारवाक्यात् सुव्यक्तम्। ५४।

परया भक्त्या किं भवतीत्याह भक्त्येति। उक्तया भक्त्या तत्त्वतः स्वरूपतो गुणतश्च यावान् अनन्तत्वेन सर्व्वमन्तर्भूय सर्व्वातीतः—सर्व्वव्यापीति श्रीमच्छ्रीधरः, यश्च निखिलानन्तकल्याणगुणाकरः पिता माता धाता सुहृत्—सच्चिदानन्दघन इति श्रीमच्छ्रीधरः—अस्मि, तं मां परभक्तोऽभिजानाति अनुभवति। ततः स्वरूपगुणानुभवोत्कलहृदयत्वादनन्तरं मां तत्त्वतोऽनन्तसौन्दर्य्यरसपूर्णत्वेन ज्ञात्वा ज्ञानं लब्ध्वा तदनन्तरं तादृशज्ञानानन्तरं मां सर्व्वान्तर्यामिणं विशते मयात्मसात्कृतो राजते। अहमेवान्तर्यामितया सर्व्वं करोमि स त्वविरोधिभावेन मयि तिष्ठतीत्यर्थः। पद्यमिदं विभिन्नैर्व्याख्यातृभिर्विभिन्नभावेन व्याख्यातं, तद्यथा श्रीमच्छङ्करेण—"ततो ज्ञानलक्षणया भक्त्या माम-

भिजानाति यावानहमुपाधिकृतविस्तरभेदः, यश्चाहं विध्वस्तसर्व्वोपाधिभेदोऽभिमत उत्तमपुरुष आकाशकल्पस्तं मामद्वैतं चैतन्यमात्रैकरसमजमजरममरमभयमनिधनं तत्त्वतोऽभिजानाति, ततो मामेवं तत्त्वतो ज्ञात्वा विशते तदनन्तरं मामेव। नात्र ज्ञानानन्तरप्रवेशक्रिये भिन्ने विवक्षिते ज्ञात्वा विशते तदनन्तरमिति, किन्तर्हि फलान्तराभावात् ज्ञानमात्रमेव—'क्षेत्रज्ञञ्चापि मां विद्धि' इत्युक्तत्वात्।.........सेयं ज्ञाननिष्ठा आर्त्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता, तया परया भक्त्या भगवन्तं तत्त्वतोऽभिजानाति, यदनन्तरमेवेश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्त्तते, अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न विरुध्यते" इति। श्रीमद्रामानुजेन—"स्वरूपतः स्वभावतश्च योऽहं, गुणतो विभूतितोऽपि यावांश्चाहं, तं मामेवंरूपया भक्त्या तत्त्वतो विजानाति। मां तत्त्वतो ज्ञात्वा तदनन्तरं तत्त्वज्ञानान्तरं ततो भक्तितो मां विशते प्रविशति, तत्त्वतः स्वरूपस्वभावगुणविभूतिदर्शनोत्तरकालभाविन्यानवधिकातिशयभक्त्या मां प्राप्नोतीत्यर्थः। अत्र तत इति प्राप्तिहेतुतया निर्द्दिष्टा भक्तिरेव 'भक्त्या त्वनन्यया शक्यः' इति तस्या एव तत्त्वतः प्रवेशहेतुताभिधानात्" इति। श्रीमद्बलदेवेन—"ततो मत्परभक्तितो हेतोरुक्तलक्षणं मां तत्त्वतो याथात्म्येन ज्ञात्वानुभूय तदनन्तरं तत एव हेतोर्मां विशते मया सह युज्यते, पुरं प्रविशतीत्यत्र पुरसंयोग एव प्रतीयते न तु पुरात्मकत्वम्। अत्र तत्त्वतोऽभिज्ञाने प्रवेशे च भक्तिरेव हेतुरुक्तो बोध्यः।.........तदनन्तरमिति मत्स्वरूपगुणविभूतितात्त्विकानुभवादुत्तरस्मिन् काले इत्यर्थः। यद्वा परया भक्त्या मां तत्त्वतो ज्ञात्वा ततस्तां भक्तिमादायैव मां विशते—स्यदन्तोऽपि कर्म्मणि पञ्चमी" इति। श्रीमन्मधुसूदनेन—"भक्त्या निदिध्यासनात्मिकया ज्ञाननिष्ठया मामद्वितीयमात्मानमभिजानाति साक्षात् करोति। यावान् विभुर्नित्यश्च, यश्च परिपूर्णसच्चिदानन्दघनः सदा विध्वस्तसर्व्वोपाधिरत्यन्तैकरस एकस्तावन्तं तञ्चाभिजानाति। ततो मामेवं तत्त्वतो ज्ञात्वा अहमस्म्यखण्डानन्दाद्वितीयं ब्रह्मेति साक्षात्कृत्य विशते अज्ञा-

सर्व्वकर्म्माण्यपि सदा कुर्व्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥५६॥

ततत्कार्य्यनिवृत्तौ सर्व्वोपाधिशून्यतया मद्रूप एव भवति। तदनन्तरं लब्धप्रारब्धकर्म्मभोगेन देहपातानन्तरं न तु ज्ञानानन्तरमेव" इति। श्रीमन्नीलकण्ठेन—"मामुक्तविषयया भक्त्या ज्ञानी अभितः साकल्येन जानाति। साकल्यमेवाह यावानिति। किमहमणुपरिमाणो वा, देहसम्मितो वा, तार्किकाणामिवाकाशवत् सकलमूर्त्तद्रव्यसंयोगित्वलक्षणविभुत्वाश्रयो वा, मप्रपञ्चाद्वैतवादिनामिव स्वगतभेदवान् वा, अखण्डैकरसो वेति परिमाणतः तत्त्वतो मां तत्पदार्थं जानाति। तथा यश्चास्मीति। देहेन्द्रियप्राणमनसामन्यतमः कियत्कालस्थायी वा, क्षणिकविज्ञानरूपो वा, शून्यं वा, कर्त्ता भोक्ता वा, जड़ो वा, जड़ाजड़रूपो वा, चिद्रूपो भोक्ता वा, कर्त्तृत्वभोक्तृत्ववर्ज्जित आनन्दघनो वेति तत्त्वतः सर्व्वसंशयराहित्येन मामजरममरमभयमशोकं जानाति……। मां विभुं सच्चिदानन्दघनं तत्त्वतो ज्ञात्वा सर्व्वोपाधिविनिर्म्मुक्तं याथात्म्येन ज्ञात्वा साक्षात्कृत्य ततो व्यासौ ब्रह्मभावं गतो भवतीत्यर्थः ………यद्वा तत इति कारणब्रह्मभावापत्तिः सर्व्वात्मरूपा……। अनन्तरं कारणभावापत्तेरनुपदमेव तत्………शुद्धं ब्रह्म विशते दर्पणापाये प्रतिबिम्बो बिम्बमिव प्रविशति कार्य्योपाधीनां जीवानां कारणोपाधीश्वरप्राप्तिद्वारैव निष्कलब्रह्मप्राप्तिरित्यावेदितं प्रागेव। यद्वा मां ज्ञात्वा तद्विशत इत्येतावतैव ज्ञानप्रवेशयोः पौर्व्वापर्य्यं सिद्धं तदनन्तरमिति तच्छब्देन बुद्धिस्थं देहं परामृश्य तत्पातानन्तरमिति व्याख्येयम्। यतो जातेऽपि तत्त्वज्ञाने यावद्देहपातं प्रारब्धकर्म्मणां प्रतिबन्धाद्विदेहकैवल्यं न प्राप्यते, अन्यथा ज्ञानसमकालमेव देहपातापत्तिः स्यात्" इति। ५५।

स्वकर्म्मणा भगवदर्च्चनया या परमा नैष्कर्म्यसिद्धिरुपतिष्ठते, सैवान्तर्भूतज्ञानत्वात् योगाय प्रयोजयन्ति, तेन च भवति ब्रह्मसाक्षात्कारः।

चेतसा सर्व्वकर्म्माणि मयि सन्न्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥५७॥

ब्रह्मसाक्षात्कारानन्तरं तदाविष्टचित्तत्वात् परानुरक्तिरूपा परा भक्ति-रुदेतीत्युक्तम् । सम्प्रति त्रयाणामन्वितत्वप्रदर्शनार्थं प्रथमं परमां नैष्कर्म्यसिद्धिमितरद्वयान्वितामुपदर्शयति सर्व्वकर्म्माण्यपीति । मद्व्यपाश्रयः अहमेव व्यपाश्रयः साक्षात्सम्बन्धेनाश्रयः शरणं यस्य स सदा नित्यानि नैमित्तिकानि सर्व्वकर्म्माणि अपि कुर्व्वाणो मत्प्रसादात् शाश्वतं नित्यकालस्थायि अव्ययम् अक्षय्यं पदं स्थानम् अवाप्नोति प्राप्नोति । यदत्र श्रीमन्मधुसूदनेनोक्तं "सन्न्यासस्तु ब्राह्मणेन कर्त्तव्यो न क्षत्रियवैश्याभ्याम्" इति तत्तु विचारितं प्राक् (८१पृ,) । अत्र श्रीमन्नीलकण्ठ आह— "ननु 'तद्यथेषीकातूलमग्नौ प्रोतं दूयेतैवं हास्य सर्व्वे पाप्मानः प्रदूयन्ते' इति पूर्व्वकर्म्मणां ज्ञानेन प्रायश्चित्तेनेव सत्यपि नाशश्रवणे ज्ञानोत्तर-कालीनानां कर्म्मणां नाशाभावात् ज्ञानोत्तरमपि देहधारणे स्वाभा-विकानां कर्म्मणां वर्ज्जनस्यासम्भवात्, अवश्यं ज्ञानिनोऽपि बन्धः स्यादि-त्याशङ्क्याह, सर्व्वकर्म्माणीति । मद्व्यपाश्रयोऽहमेव प्रज्ञानघनः प्रत्य-गात्मा व्यपाश्रय आश्रयो यस्य स मद्व्यपाश्रयो ज्ञानी सर्व्वकर्म्माणि विहितानि निषिद्धानि वा सदाऽसकृत् कुर्व्वाणोऽपि मत्प्रसादात् मदनु-ग्रहात् शाश्वतं नित्यम् अव्ययं परमसर्व्वोत्कृष्टं पदं पदनीयं मोक्ष-मवाप्नोति, न तु ज्ञानोत्तरमपि क्रियमाणैः कर्म्मभिर्बध्यते 'तस्य पुत्रा-दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति च, न ह वा एवंविदि किञ्चन रज आध्वंसते तं विदित्वा न लिप्यते कर्म्मणा पापकेन' इत्यादि शास्त्रेण तत्त्वज्ञानिनः कर्म्मालेपश्रवणात्" इति । ५६ ।

'मद्व्यपाश्रयः' इति विशेषणेन किमायातीति तदेव स्फोटयन्नाचार्य्य-श्चेतसेति । चेतसा विवेकबुद्ध्या साक्षात्सम्बन्धेन तत्त्वज्ञानतः मयि सर्व्वाणि कर्म्माणि सन्न्यस्य सङ्गफलत्यागेन समर्प्य मत्परः अहमेव परः प्रियतमो यस्य स त्वं मत्परः, बुद्धियोगं पूर्व्वोक्तम् (२।४८) समत्वबुद्धि-

मच्चित्तः सर्व्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ॥५८॥
यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥
स्वभावजेन कौन्तेय निबद्धः स्वेन कर्म्मणा ।
कर्त्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥६०

लक्षणम् उपाश्रित्य एकात्मभावेनावलम्ब्य सततं मयि सर्व्वान्तर्यामिणि चित्तं यस्य स मच्चित्तो भव। अत्र कर्म्मसमर्पणेन नैष्कर्म्यं, भगवत्परत्वेन भक्तिः भगवच्चित्तत्वेन ज्ञानम्; भगवत्साक्षात्सम्बन्धवशात् तेषां परत्वम्। ५७।

भगवच्चित्ततया तदाज्ञापालनमेव संसारतरणे हेतुः विपरीते विनाश इत्याह मच्चित्त इति। मच्चित्तः मयि सर्व्वान्तर्यामिणि निबद्धचित्तः सन् मत्प्रसादात् मदनुग्रहात् सर्व्वदुर्गाणि सर्व्वविधानि सङ्कटानि तरिष्यसि। अथ चेत् त्वमहङ्कारात् स्वज्ञानाभिमानात् न श्रोष्यसि मन्निर्देशे कर्णपातं न करिष्यसि विनङ्क्ष्यसि विनाशं गमिष्यसि। सर्व्वान्तर्यामिभगवन्निर्देशश्रवणमेव संसारसागरोत्तारे हेतुः, तदश्रवणं विनाशायेति फलितार्थः। ५८।

सर्व्वाणि साधनान्यस्मिन् शास्त्रे प्रकृतिमाश्रित्यैव व्यवस्थितानि। प्रकृतिरनुल्लङ्घनीया। सैषा सर्व्वान्तर्यामिण एवाधीना। अतस्तेनैक्यमेव तां स्ववशे स्थापयति। एतदेव दर्शयितुमर्ज्जुनमेव दृष्टान्तत्वेन गृह्णाति यदिति। अहङ्कारं स्वज्ञानाभिमानम् आश्रित्य न योत्स्ये इति यन्मन्यसे एष ते तव व्यवसायः निश्चयः मिथ्यैव। त्वां प्रकृतिः नियोक्ष्यति तन्नियते कर्म्मणीति शेषः। ५९।

तत्र कारणं विवृणोति स्वभावजेनेति। हे कौन्तेय; स्वभावजेन क्षत्रियस्वभावोत्पन्नेन स्वेन कर्म्मणा निबद्धः मोहात् अविवेकात् यत्

ईश्वरः सर्व्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति ।
भ्रामयन् सर्व्वभूतानि यन्त्रारूढ़ानि मायया ॥६१॥
तमेव शरणं गच्छ सर्व्वभावेन भारत ।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥६२
इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥६३॥

युद्धकर्म्म कर्त्तुं नेच्छसि, अवशोऽपि सन् तत्कर्म्म करिष्यसि। धिक् ते गाण्डीवमिति यदि कोऽपि त्वामाक्षिपेत्, अधुनैव रोषभरेण तेन संग्रामप्रवृत्तो भविष्यसि, अतः किं वृथा तव 'न योत्स्ये' इति निश्चयेनेत्याचार्य्याभिप्रायः । ६० ।

एवं प्रकृतिसम्पर्कीणं ज्ञानमुद्दिश्य परमज्ञानमूलं सर्व्वान्तर्यामिणः प्रेरकत्वमुपदिशति ईश्वर इति। यन्त्रारूढ़ानीव यथा यन्त्रारूढ़ानि दारुकृतपुरुषादीनि तथा सर्व्वभूतानि मायया प्रज्ञया निजज्ञानशक्त्या भ्रामयन् कर्म्मसु प्रवर्त्तयन्, हे अर्ज्जुन, सर्व्वभूतानां हृद्देशे ईश्वरोऽन्तर्यामितया तिष्ठति। एवं प्रवर्त्तनं जीवानां कल्याणार्थं विपथात् प्रत्यावर्त्तनार्थमिति न दोषाय । ६१ ।

सर्व्वान्तर्यामिणः शरणापत्त्या कृतकृतार्थतामाह तमेवेति। हे भारत, तमेव सर्व्वान्तर्यामिणमीश्वरं सर्व्वभावेन सर्व्वात्मना शरणं गच्छ आश्रय। तत्प्रसादात् तदनुग्रहात् परां शान्तिं शाश्वतं नित्यकालस्थायि स्थानञ्च प्राप्स्यसि । ६२ ।

प्रेरकेण सर्व्वान्तर्यामिणा एकत्वमापन्नः कर्म्मानुतिष्ठेदिति गुह्यं परमं ज्ञानमुपदिष्टमेवेत्याह इतीति। इति मया ते तुभ्यं गुह्याद्गुह्यतरं ज्ञानमाख्यातं कथितम्। एतत् अशेषेण कार्त्स्न्येन विमृश्य पर्य्यालोच्य यथा इच्छसि तथा कुरु । ६३ ।'

सर्व्वगुह्यतमं भूयः शृणु मे परमं वचः।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥६४॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥६५॥

एवं सर्व्वान्तर्यामिणः प्रेरकस्य परोक्षज्ञानमुपदिश्य परनैष्कर्म्यं परज्ञानं परभक्तिञ्च समन्वय्य तदपरोक्षज्ञानं वक्तुमाह सर्व्वेति। भूयः पुनः सर्व्वगुह्यतमं मे परमं प्रकृष्टं वचः शृणु। मे मम दृढमनन्य-भावेनाव्यभिचारेण इष्टः प्रियोऽसीति यतः, ततस्ते हितं कल्याणं वक्ष्यामि। ६४।

नवमाध्याये गुह्यतमं ज्ञानं वक्तुं प्रतिज्ञाय तत्रैव परनैष्कर्म्यं पर-ज्ञानं परभक्तिञ्च सूचितवानाचार्य्यः। अध्यायान्ते येन पद्येन योग-त्रयं समन्वितं तदेवात्र सर्व्वगीतार्थसारभूतत्वात् पुनरुच्यते तेन मन्मना इति। मन्मना मच्चित्तो भव, मद्भक्तो मद्भजनशीलो भव, मद्याजी मद्यजनशीलो भव, मां नमस्कुरु प्रह्वीभवनेनाराधय, मां सर्व्वान्तर्या-मिणमेव एष्यसि प्राप्स्यसि सत्यं निश्चितं ते तुभ्यं प्रतिजाने प्रतिज्ञां करोमि। अत्र साक्षात्सम्बन्धेनान्तर्यामिणि चित्तस्थापनं, तद्भजनं तद्यजनं तद्वन्दनम् एकत्र योगत्रयस्य सम्मेलनं साधयतीति प्रदर्शितं प्राक्। नवमे—"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्म्मबन्धनैः। सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि॥" (९।२७-२८) इति ध्वनितं परनैष्कर्म्यम्। "ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामु-पासते। एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्॥" (९।१५) इत्या-रभ्य पञ्चभिः श्लोकैः साक्षाद्भगवज्ज्ञानोपदेशेन सूचितं परज्ञानम्, "ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।" (९।२९) इति सूचिता परभक्तिः। अत्र श्रीमन्नीलकण्ठः—"अहं सत्यज्ञानानन्दैक-घनः परिपूर्णस्तदाकारं मनो यस्य स मन्मना भव, एतेन ब्रह्मात्मभेदो-

सर्व्वान् धर्म्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥६६॥

ऽपि साक्षात्करणीय इति उत्तरषट्कार्थं उक्तः। कथमेवंविधा ज्ञान-निष्ठा लभ्यतेऽत आह मद्भक्तो भव, एतेन भगवदुपासनात्मको मध्यम-षट्कार्थं उक्तः। कथमल्पपुण्यस्य भक्तिरुदेष्यतीत्यत आह मद्याजी भगवदर्थकर्म्मकरणशीलो भव, एतेन कर्म्मप्रधान आद्यषट्कार्थो विवृतः। ननु यस्य भगवद्याजित्वं न सम्भवति दारिद्र्यात् श्रद्धाद्यभावाद्वा तस्य भगवद्भक्तिर्दीर्घव्याकुलाकारा चेतोवृत्तिर्दुर्लभतरेत्याशङ्क्याह, मां नम-स्कुरु प्राकृतभक्तैरेव प्रतिमादौ भगवन्तं सर्व्वोपचारसमर्पणेन नमस्कारा-दिना सम्यगाराधय......। एवमुक्तस्य सोपानत्रयारूढस्य फलमाह मामिति, मामेव तत्पदार्थं सर्व्वजगत्कारणं सर्व्वेश्वरं सर्व्वशक्तिमखण्डै-करसं त्वमेष्यसि प्राप्स्यसि बिम्ब इव प्रतिबिम्बं घटाकाश इव महा-काशम्" इति। पद्येऽस्मिन् साक्षात्सम्बन्धेन सर्व्वान्तर्यामिणः पश्यत-स्तन्मनस्त्वादिकमुपदिष्टमतः परोक्षत्वेनात्र तदर्थनमनुमोदितमाचार्य्यै-रिति श्रीमन्नीलकण्ठस्य मतिर्न चारुतरा। ६५।

शास्त्रेऽस्मिन् सोपानपरम्परया साधकानामुच्चभूमावारोहणं निब-द्धम्। तत्र प्रथमं देहात्मनोर्विवेकेन ग्रन्थारम्भः, न ह्यात्मज्ञानं विना साधकत्वमेव सम्भवति। कोऽहमित्यजानतो विषयेन्द्रियसर्व्वस्वता नामापरिहार्य्या। यदा स दुःखार्त्तो न विषयेषु रमते तदात्मानुसन्धाने प्रवृत्तिर्भवति। आत्मा देहातिरिक्तो, देहविनाशे न तस्य विनाशः; स तु स्वयमविकारी, विकारस्तु देहधर्म्म इति विचारः साधनस्य प्रथम-सोपानम्। देहस्य प्रकृतिजत्वात्, प्रकृत्या नित्यसम्बन्धत्वात्, आत्म-नस्त प्रकृतेरतीतत्वात् प्रकृतिसम्भूतविषयेन्द्रियक्रियातः स्वस्य स्वातन्त्र्यं पश्यतो दर्शनादिव्यापारेषु तस्य निर्लिप्तभावेन स्थितिः साधनस्य द्वितीय-सोपानम्। क्रियमाणानि कर्म्माणि प्रकृतिजैरिन्द्रियैर्न तु स्वयमात्म-नेति सङ्कल्पत्यागेन कर्म्मस्वकर्तृदर्शनं निर्लिप्तभावेन स्थितेर्द्वितीया-

स्मिन् सोपान एव विहितम्। प्रकृतेरात्मनः स्वातन्त्र्यं जानतोऽपि विषयेन्द्रियव्यापारात् सर्व्वथा निर्लेपभावनं न जातु सुकरम्, केवलेन पुरुषकारेण तत्साधनोद्यतानां भूयोभूयः पतनदर्शनात्। अतएव तृतीयसोपाने प्रकृतेरात्मनश्च नियन्तारं सर्व्वान्तर्यामिणं परमपुरुषं ज्ञातुं प्रयतते साधकः। यदा हि तमात्मनः प्रियत्वेन स जानाति तदा तस्मिन् सर्व्वकर्म्माणि समर्प्य तदाराधनानुरतो भवति साधकश्चतुर्थसोपानारूढः। अस्य चरमसोपानस्य परिपाकावस्थायां तदेकशरणत्वमुपतिष्ठते अपरोक्षदृष्टेः स्थिरत्वञ्च। किमिदं किं वा तत्फलं तदाहाचार्य्यः सर्व्वानिति। सर्व्वान् प्रकृतिनियतान् धर्म्मान् वर्णाश्रमाचारान् परित्यज्य सङ्गफलत्यागलक्षणस्यानुष्ठेयत्वेन परिज्ञाय आत्मानं सर्व्वथा भगवच्छरणवत् कृत्वेत्यर्थः—फलसङ्गकर्त्तृत्वादित्यागेन परित्यज्य इति श्रीमद्रामानुजः, धर्म्मत्यागः फलत्यागः कथमन्यथा युद्धविधिरिति श्रीमन्माध्वः, विधिकैङ्कर्य्यं त्यक्त्वेति श्रीमच्छ्रीधरः, स्वरूपतस्त्यक्त्वेति श्रीमद्बलदेवः, विद्यमानानविद्यमानान् वा शरणत्वेनानादृत्य इति श्रीमन्मधुसूदनः, सर्व्वेषां वर्णानामाश्रमाणां देहेन्द्रियबुद्धीनाञ्च धर्म्मानग्निहोत्रादीन् सुखदुःखादींश्च त्यक्त्वेति श्रीमन्नीलकण्ठः,—एकं मां सर्व्वान्तर्यामिणं शरणं—शृणाति छिनत्ति अविद्यादीन् क्लेशादीन् शरणमाश्रयः परायणमिति श्रीमन्नीलकण्ठः—व्रज आपद्यस्व। इयं वैष्णवशास्त्रोक्ता शरणागतिः। तामाह श्रीमद्विश्वनाथोऽपि—"यो हि यच्छरणो भवति स हि मूल्यक्रीतपशुरिव तदधीनः स तं यत् कारयति तदेव करोति, यत्र स्थापयति तत्रैव तिष्ठति, यद्भोजयति तदेव भुङ्क्ते इति शरणापत्तिलक्षणस्य धर्म्मस्य तत्त्वम्। यदुक्तं वायुपुराणे—'आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्ज्जनम्। रक्षिष्यतीति विश्वासो गोप्तृत्वे वरणं तथा। निःक्षेपणमकार्पण्यं षड्विधा शरणागतिः॥' इति भक्तिशास्त्रविहिता स्वाभीष्टदेवाय रोचमाना प्रवृत्तिरानुकूल्यम्, तद्विपरीतं प्रातिकूल्यम्। गोप्तृत्व इति, स एव मम रक्षको नान्य इति वरणम्। रक्षिष्यतीति, स्वरक्षणप्रतिकूलवस्तूपस्थितेष्वपि स मां रक्षिष्यत्येवेति द्रौपदीगजेन्द्रा-

*ण्णामिव विश्वासः। निक्षेपणम्—स्वीयस्थूलसूक्ष्मदेहसहितस्यैव स्वस्य
श्रीकृष्णार्थं एव विनियोगः। अकार्पण्यम्—नान्यत्र क्वापि स्वदैन्यज्ञाप-
नम्। इति षण्णां वस्तूनां विधाष्ट अनुष्ठानं यस्यां सा शरणागतिरिति"
इति। नन्वेवं सर्व्वधर्म्मपरित्यागेन सर्व्वान्तर्यामिपरमपुरुषाधीनत्वे
सति प्रत्यक्षदृष्टशास्त्राचार्य्योपदेशादीनुपेक्ष्य इन्द्रियग्राह्यपरमपुरुषप्रेर-
णानुसरणे भ्रान्तिवशात् पापे पतनं स्यात्, तत् कथं सर्व्वान् धर्म्मान्
परित्यज्य त्वामन्तर्यामिणं शरणं गच्छामीत्यभिप्रायं बुद्धाचार्य्यो
ऽन्तर्यामिप्रतिज्ञावाक्येन—अहं सर्व्वान्तर्यामी त्वां सर्व्वपापेभ्यो मोच-
यिष्यामि पापे निपतनं वारयिष्यामि मा शुचः मा शोकं कार्षीः।
अतएव हि पूर्व्वमुक्तम्—"मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ तेषां सततयुक्तानां
भजतां प्रीतिपूर्व्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञान-
दीपेन भास्वता॥" (१०।९—११) इति। तदेकशरणत्वे स्वात्मक-
र्तृत्वविलोपोऽन्तर्यामिणा सम्यगैक्यमभिव्यनक्तीति जीवतत्त्वस्येश्वरतत्त्वाद-
स्वातन्त्र्यं स्फुटीभवत्यस्मिन्।

अस्यां शरणापत्तौ योगत्रयस्य विरोधसम्भावना तिरोधत्ते। यथा
हि परमपुरुषे स्वरूपाणामैकत्वं तथा पुरुषे तत्स्वरूपानुबन्धिकर्म्मज्ञान-
भक्तित्रयस्यापि। चित्स्वरूपस्य भगवत एकमेव चित्स्वरूपं साधक-
मतदृष्टिभेदात् भिन्नत्वेन प्रतिभातीति प्रतिपादितं प्राक् (२५६पृ,)।
उक्तञ्च पूर्व्वम् (७९पृ), "यथैवेश्वरे 'स्वाभाविकी ज्ञानबलक्रिया च'
(श्वे, उ, ६।८) अस्ति, तथैव जीवेऽपि। ततस्तदुपयोगी ज्ञानयोगः
कर्म्मयोगो नियतानुबन्धस्तस्मिन् स्यादेव। भक्तिरपि तस्मिन् परमरस-
त्वात्" इति। जीवोऽपि चित्स्वरूपः। क्रियाशक्तिर्न चितो भिन्ना,
चित एव कार्य्योन्मुखत्वं सा। 'रसो वै सः' (तै, उ, २।७) इति भग-
वतो रसस्वरूपं प्रेमैवेति तत्त्वविदः। पित्रादिषु ज्ञानं सन्तानादीना-
मभावान् विदित्वा तदपनयनोपायान् विदधातीति तदेव प्रेमा वा

चेष्टो वेत्ताख्यां लभते। ज्ञानेन तु भगवत्स्वरूपमाधुरीं विदित्वा तस्मिन्नेकान्तभावेन यदा चित्तं तिष्ठति तदैव तस्य तदवस्था भक्तिरनुरागः प्रेमेति निगद्यते। यदि चित्स्वरूपस्यैव कार्य्योन्मुखत्वं क्रिया, तस्यैवैकान्तभावेन भगवति स्थितिर्भक्तिरिति तत्त्वम्; तदा कर्मज्ञानभक्तीनां परस्परविरोधित्वमसम्यग्ज्ञानप्रसूतो भ्रम इति केनाप्यस्वीकर्त्तुं न शक्यते। यदि कर्म भक्तिश्च ज्ञानस्यैव विलासस्तदा ज्ञानमेव ये प्रधानत्वेन व्याख्यानयन्ते कर्म भक्तिश्च तस्मिन् विलापयन्ति, त एव तत्त्वदर्शिनः। न वयं तावत्तत्त्वदर्शिनो महात्मनस्तानवज्ञातुमर्हामः, परन्तु मन्यामहे कर्मज्ञानभक्तीनामविरोधित्वेनैकत्वेनावस्थानं तेन च कर्मज्ञानभक्तिसमुचितभावानां निरन्तरमभिव्यक्तिश्च ते स्वीकुर्व्वुः। परमयोगारूढाभिव्यक्तेऽस्मिन् पक्षे या शरणापत्तिरभिहिता तस्यां कर्मज्ञानभक्तीनां निरन्तराभिव्यक्तेरवकाशोऽस्तीति स्फुटतरं प्रतिभाति। न खलु वक्तव्यम्, अस्मिन् शाक्ये भगवति जीवस्य नित्यकालावस्थितिर्नानुमीयत इति। ज्ञानवादिनस्त्वेतां नानुमोदन्ते। "सर्गेऽपि नोपजायन्ते, प्रलये न व्यथन्ति च" (१४।२) इत्यनेन तेषां विरोधोऽपरिहार्यः।

अत्र श्रीमता शङ्करेण यदुक्तम्—"आत्मज्ञानस्य तु केवलस्य निःश्रेयसहेतुत्वं भेदप्रत्ययनिवर्त्तकत्वेन कैवल्यफलावसानत्वात्; क्रियाकारकफलभेदबुद्धिरविद्ययात्मनि नित्यप्रवृत्ता 'मम कर्म', 'अहं कर्त्ता', 'अमुष्मै फलायेदं कर्म करिष्यामि' इतीयमविद्या अनादिकालप्रवृत्ता, अस्या अविद्याया निवर्त्तकम् 'अयमहमस्मि केवलोऽकर्त्ताऽक्रियोऽफलो न मत्तोऽन्योऽस्ति कश्चित्' इत्येवंरूपमात्मविषयं ज्ञानमुत्पद्यमानं कर्मप्रवृत्तिहेतुभूताया भेदबुद्धेर्निवर्त्तकत्वात्, तुशब्दः पक्षद्वयव्यावृत्त्यर्थः, न केवलेभ्यः कर्मभ्यः, न च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिरिति पक्षद्वयं निवर्त्तयति। अकार्य्यत्वाच्च निःश्रेयसस्य कर्मसाधनत्वानुपपत्तिः। न हि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते। केवलज्ञानमपि अनर्थकं तर्हि? न, अविद्यानिवर्त्तकत्वे सति, दृष्टकैवल्य-

फलावसानत्वात् अविद्या तमोनिवर्त्तकस्य ज्ञानस्य दृष्टं कैवल्यफलाव-सानत्वं रज्ज्वादिविषये सर्पाद्यज्ञानतमसो निवर्त्तकप्रदीपप्रकाशफल-वत् विनिवृत्तसर्पादिविकल्परज्जुकैवल्यावसानं हि प्रकाशफलं ज्ञानम्' इति—तत् पुनर्न समञ्जसमस्य शास्त्रस्य सिद्धान्तेन। 'न मत्तोऽन्यो-ऽस्ति' इति न जीवपक्षे दृश्यतेऽत्र। "प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि" (१३।१८) इत्यत्र 'नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुं प्रकृतिद्वयवत्त्वमिव हि ईश्वरस्येश्वरत्वम्' इति तेन यत् स्वयं सिद्धान्तितं तदस्य निर्णयस्य विरोधि। यदि वदसि—"दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" (७।१४) इत्येतत् प्रपञ्चमिथ्यात्वं प्रतिपादयतीति तन्न, किन्तर्हि, आवरकत्वमस्याः, "त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥" (७।१३) इति। प्रकृतिद्वयस्येश्वरादस्वतन्त्रत्वात् सम्यक् तदधीनत्वेन भेदनिवृत्तिः सिद्ध्य-तीति प्रपञ्चमिथ्यात्वप्रतिपादने जीवस्यासत्तया कैवल्यसाधने च प्रयासो वृथैव।

आत्मज्ञानस्य प्राथमिकत्वम्; न तद्विना साधनारम्भः। बन्धु-विनाशाशङ्कया शोकाभिभूतस्यार्ज्जुनस्य संसारप्रवृत्तेः शैथिल्यात् "अर्थ-कामेष्वसक्तानां धर्मज्ञानं विधीयते" इति न्यायात् योगोपदेशग्रहणोप-योगिता। स्वजनानां देहविनाशोपस्थितौ शोकार्त्तीय देहविनाशेऽपि न भवत्यात्मनो विनाश इति प्रदर्शनस्यावकाशोऽभवत्। अतएव द्विती-याध्याये सर्वप्रथममात्मज्ञानोपदेशः। "देही नित्यमवध्योऽयं देहे सर्वस्य भारत। तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥" (२।३०) इत्युक्त्वात्मानं निर्लेपं तद्बोध्य च कर्मयोगमवतारयितुं प्रस्तौति, "स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि। धर्म्याद्धि युद्धा-च्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥" (२।३१) इति। तत्रापि निर्लेप-मुपदिशति—"सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ। ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥" (२।३८) इति। सङ्गफलत्यागेन

कर्म्माचरणतो निर्लिप्तत्वं सिध्यति । तदुक्तिमाह—"कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्म्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि ॥ योगस्थः कुरु कर्म्माणि सङ्गं त्यक्त्वा धनञ्जय । सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥" (२।४७-४८) इति । स्वस्याकर्त्तृत्वबोधं विना न जातु निर्लिप्तभावः सिध्यति, अतस्तमेवसुपदिष्टवानाचार्य्यः "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ॥ तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयोः । गुणागुणेषु वर्त्तन्ते इति मत्वा न सज्जते ॥" (३।२७-२८) इति । इन्द्रियाणि तेषां विषयान् गृह्णन्ति नाहं किञ्चित् करोमीति बुद्ध्या निर्लेप उपतिष्ठति—"योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः । सर्व्वभूतात्मभूतात्मा कुर्व्वन्नपि न लिप्यते ॥ नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् । पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥ प्रलपन् विसृजन् गृह्णन्नुन्मिषन् निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्त इति धारयन् ॥" (५।७—८) इति । इन्द्रियाणीन्द्रियाणां विषयेषु प्रवर्त्तन्ते, आत्मा तु तत्राकर्त्तेति जानन्नपि न निग्रहे समर्थः इत्याह—"सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥" (३।३३) इति । न हि जातु स्वयमत्वा जीवो निग्रहे समर्थः, अतएव "न मां कर्म्माणि लिम्पन्ति न मे कर्म्मफले स्पृहा । इति मां योऽभिजानाति कर्म्मभिर्न स बध्यते ॥" (४।१४) इति स्वयं सर्व्वान्तर्यामिणः परमपुरुषस्य निर्लिप्ततायाः ज्ञानस्य प्रयोजनमात्मानं तदनुवर्त्तिनं कर्त्तुम् । न हि परमपुरुषस्य विशेषज्ञानं विना तत्प्रमाणाधीनत्वं सम्भवति । अतएव तद्विशेषज्ञानस्योपदेशः । प्रथमतस्तज्ज्ञानलाभहेतोर्ध्यानयोगानुष्ठानम्, ततो "युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः । सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥" (६।२८) इति । एवं संस्पर्शलाभादनन्तरं तद्विशेषज्ञानलाभ स्योदेति । अतएव षष्ठे ब्रह्मसंस्पर्शोपदेशानन्तरं सप्तमेऽष्टमे नवमे तदेव वर्णयत्याचार्य्यः । एवं विशेषज्ञानलाभादनन्तरं नवमे ज्ञानात्मिन्

कर्म्मसमर्पणमुपदिशति। साक्षात् तस्मिन् कर्म्मसमर्पणेन यत् साक्षाज्ज्ञानमुपतिष्ठते तदेव द्रढ़यितुं दशमे तस्य विशेषविशेषस्थाने विशेषविशेषाविर्भावस्योल्लेखः, एकादशे तस्य सर्व्वगतत्वेनार्ज्जुनसन्निधौ विशेषप्रकाशः। द्वादशे तस्योपास्तिर्निबध्यते। एवमापरिसमाप्त्युत्तरोत्तरविशेषज्ञानस्योपदेशः। चरमे साक्षाज्ज्ञानस्यास्य परिपाके पद्येनानेन भेदापगमसाधकशरणापत्त्युपदेश इत्यलं पल्लवितेन।

भक्तेः पराकाष्ठा इदं तदेकशरणत्वमेकान्तभावत्वेनाभ्यधायि श्रीमता शाण्डिल्येन—"सैकान्तभावो गीतार्थप्रत्यभिज्ञानात्। ८३।" इति सूत्रे। चतुर्द्दशाध्यायस्यान्ते "सुखस्यैकान्तिकस्य च" (१४।२७) इति यदाचार्य्येणोक्तं तत्रैकान्तभावोत्पन्नस्य एकान्तिकस्य वा—स एषां भक्तानां मुख्य इत्यर्थे कन् (पा, सू, ५।२।७८)—सुखस्योल्लेख इति द्रष्टव्यम्। सुखस्य एकान्तिकस्य चेति भिन्नपदं वा। गीताया प्रारम्भात् चरमपर्य्यन्तं योऽर्थः प्रवाहक्रमेण धावति तमेव प्रत्यभिज्ञात्वेन परिगृह्योक्तं श्रीमता शाण्डिल्येन 'गीतार्थप्रत्यभिज्ञानात्' इति। "सर्व्वान् धर्म्मान् परित्यज्य" इत्यत्र तस्यार्थस्य परिस्फुटाभिव्यक्तिः। श्रीमता स्वप्नेश्वरेण पुनः जनमेजयप्रश्नस्योत्तरेण प्रत्यभिज्ञानं प्रदर्शितम्। तद्यथा—"सा परा भक्तिरेवैकान्तभावो मान्यः। कुतः? गीतार्थेन प्रत्यभिज्ञाश्रवणात्। यथा नारायणीय एव (शा, प, ३४८अ, ५।६।८); —'महोपनिषदो वेदान् ये विप्राः सम्यगास्थिताः। पठन्ति विधिमास्थाय ये चापि यतिधर्म्मिणः॥ तेभ्यो विशिष्टां जानामि गतिमेकान्तिनां नृणाम्। केनैष धर्म्मः कथितो देवेन ऋषिणाथवा॥' इति प्रश्ने प्रत्युत्तरम्, "'समुपोढ़ेष्वनीकेषु कुरुपाण्डवसैन्ययोः। अर्ज्जुने विमनस्के वै गीता भगवता स्वयम्॥' इति। तस्मादेकान्तिता परभक्तिरिति" इति। एकान्तित्वस्य प्रवर्त्तकः स्वयमाचार्य्यः, अतएवाह सः—"तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः। अहमेव गतिस्तेषां निराशीः कर्म्मकारिणाम्॥" (शा, प, ३४१अ, ३३श्लो) इति। ६६।

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥६७॥
य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥

एवं परमगोपनमुपन्यस्य शास्त्रान्ते तत्सम्प्रदायनियममाह इद-मिति। इदं गीतार्थतत्त्वं ते तव हिताय उक्तम्; न कदाचन अतप-स्काय तपोहीनाय, तपोयुक्तेऽपि न अभक्ताय, तपोभक्तियुक्तेऽपि न च अशुश्रूषवे श्रोतुमनिच्छवे वाच्यम्, यो मां सर्व्वान्तर्यामिणम् अभ्यसूयति मयेदमुक्तमिति न श्रद्दधाति तस्मै न वाच्यम्। कथमेवमुक्तम्? एवम्भू-ताय न स्वयंप्रकाशो भवति, तथाहि—"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥" (श्वे, उ, ६।२३) इति। "श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः। ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति। नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥" (४।३९-४०) "ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः। श्रद्धावन्तो-ऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभिः॥ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्। सर्व्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः॥" (३।३१-३२) इति। ६७।

गीतोपदेशफलमाह य इति। य इमं परमं गुह्यम् आवयोः संवादं मद्भक्तेषु मयि सर्व्वान्तर्यामिणि भक्तेषु भक्तियुक्तेषु अभिधास्यति वक्ष्यति, स मयि परां पूर्व्वोक्तां शरणागतिरूपां भक्तिं कृत्वा असंशयः निःसंशयः सन् मामेव एष्यति प्राप्स्यति। उपदेशकाले भगवदनु-ग्रहात् गूढार्थप्रकाशो भवति। तेन च भवति सर्व्वसंशयच्छेदः, संशयच्छेदे पुनर्भवति परा भक्तिरुदेति, यया भवति तेनाविच्छेद्य-सम्बन्धः। ६८।

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥६९॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥७०॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः।
सोऽपि मुक्तः शुभान् लोकान् प्राप्नुयात्पुण्यकर्म्मणाम्॥७१

कच्चिदेतत् श्रुतं पार्थ त्वयैकाग्रेण चेतसा।
कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनञ्जय ॥७२॥

यः पुनरिमं संवादमन्येभ्य उपदेक्ष्यति, स मे सर्व्वान्तर्यामिणो भुवि प्रियकार्य्यं साधयिष्यतीत्याह न चेति। तस्माद्गीताशास्त्रोपदेष्टुर्न च मनुष्येषु कश्चिन्मे मम प्रियकृत्तमः, तस्मादन्यः भुवि लोके मे मम प्रियतरो न च भविता। ६९।

अथ शास्त्रस्याध्येतुः फलमाह अध्येष्यते इति। य इममावयोः धर्म्यं धर्म्मादनपेतं संवादम् अध्येष्यते च तेनाध्ययनरूपेण ज्ञानयज्ञेन अहं सर्व्वान्तर्यामी इष्टोऽभ्यर्च्चितः स्याम् इति मे मम मतिर्निश्चयः। ७०।

श्रोतुः फलमाह श्रद्धावानिति। यो नरः श्रद्धावान् श्रद्धायुक्तः अनसूयः असूया दोषदर्शनं तद्विरहितश्च सन् इमं संवादं शृणुयात्, सोऽपि पापान्मुक्तः पुण्यकर्म्मणां शुभान् लोकान् प्राप्नुयात्। तथाचाचार्य्यैव प्राक्—"अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते। तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥" (१३। २५) इति। ७१।

अधुना श्रीमतोऽर्ज्जुनमधिकस्योपदेशस्यावश्यकतास्ति न वेति बुभुत्सया पृच्छति कच्चिदिति। हे पार्थ, त्वया एकाग्रेण चेतसा कच्चित्

अर्ज्जुन उवाच—

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥७३॥

सञ्जय उवाच—

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं लोमहर्षणम् ॥७४॥

व्यासप्रसादाच्छ्रुतवानिमं गुह्यमहं परम् ।
योगं योगेश्वरात् कृष्णात् साक्षात्कथयतः स्वयम् ॥७५॥

राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्ज्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥७६॥

किम् एतच्छ्रुतम् ? हे धनञ्जय, कच्चित् किं ते तव अज्ञानसम्मोहः प्रनष्टः अपगतः ? ७२ ।

आत्मनः कृतार्थतां स निवेदयति नष्ट इति । आत्मतत्त्वविषयको मोहो नष्टः अपगतः, स्मृतिः आत्मस्वरूपसम्बन्धिनी लब्धा, गतसन्देहो विगतसंशयः सन् स्थितोऽस्मि तव शासने, तव वचनं निदेशं करिष्ये पालयिष्यामि । ७३ ।

कथासम्बन्धप्रदर्शनार्थं सञ्जय उवाच इत्यहमिति । इति एवम् अहं महात्मनः वासुदेवस्य पार्थस्य च इमं लोमहर्षणं रोमाञ्चकरम् अद्भुतमलौकिकं संवादमश्रौषम् । ७४ ।

व्यासेति । व्यासप्रसादात् व्याससंक्रामितयोगप्रभावात् इमं परं गुह्यं त्रयाणां योगानामेकतारूपं योगं साक्षात् न तु परम्परातः योगेश्वरात् योगाचार्य्यात् कृष्णात् स्वयं कथयतः श्रुतवान् । ७५ ।

राजन्निति । हे राजन्, केशवार्ज्जुनयोरिममद्भुतमलौकिकं पुण्यं पवित्रं संवादं कथोपकथनं मुहुर्मुहुः संस्मृत्य संस्मृत्य वारं वारं स्मरणैः हृष्यामि हर्षं व्रजामि च । ७६ ।

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥७७

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥७८॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षयोगो नामाष्टादशोऽध्यायः ।

तच्चेति । तच्च हरेः अद्भुतं लोकातीतं रूपं विश्वरूपं संस्मृत्य संस्मृत्य मे मम महान् विस्मयो जातः, पुनः पुनः हृष्यामि हृष्टलोमा भवामि च । ७७ ।

अधुना समरेऽस्मिन् कं पक्षं विजयश्रीरनुपक्षीयति तदाह यत्रेति । यत्र पक्षे योगेश्वरः कृष्णः, यत्र पक्षे पार्थः धनुर्धरः गाण्डीवधन्वा, तत्र पक्षे श्रीः राजलक्ष्मीः, विजयः, भूतिरुत्तरोत्तरवृद्धिः, नीतिर्नयः ध्रुवा निश्चिता इत्येवं मम मतिर्निश्चयः ।

गीतार्थसंग्रहः श्रीमच्छङ्करेण — “उपायोपेयभावेन निष्ठाद्वयस्य प्रतिष्ठापितत्वात् कर्मनिष्ठा परम्परया ज्ञाननिष्ठाहेतुः, ज्ञाननिष्ठा तु साक्षादेव मोक्षहेतुः” इति । तदनुवर्त्तिना श्रीमन्नरहरिणा — “धर्मो य उक्तः पूर्वेषु चाध्यायेषु तु सोऽत्र वै । वक्तव्यः सर्ववेदार्थः परिज्ञानाय निर्मलः ॥.........‘नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते ।’ इत्यादि यत् कृष्णवाक्यं तत्त्वज्ञानिपरं न तत् ॥” इति । श्रीमच्छ्रीधरेण — “भगवद्भक्तियुक्तस्य तत्प्रसादात्मबोधतः । सुखं बन्धविमुक्तिः स्यादिति गीतार्थसंग्रहः ॥ तथाहि — ‘पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।’ ‘भक्त्या त्वनन्यया शक्यमहमेवंविधोऽर्जुन ।’ इत्यादौ भगवन्मोक्षं प्रति साधकत्वश्रवणात् तदेकान्तभक्तिरेव मत्प्रसादोत्थज्ञानावान्तरव्यापारयुक्ता मोक्षहेतुरिति स्फुटं प्रतीयते ; ज्ञानस्य च भक्त्यवान्तरव्यापारत्वमेव, ‘तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।

ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥' 'मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते' इत्यादिवचनात् । न च ज्ञानमेव भक्तिरिति युक्तम्— 'समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ।' 'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः' इत्यादौ । न चैवं सति 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति श्रुतिविरोधः शङ्कनीयः, भक्त्यवान्तरव्यापारत्वात् ज्ञानस्य, न हि काष्ठैः पचतीत्युक्ते ज्वलनानामसाधनत्वमुक्तं भवति । किञ्च 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे 'यमेवैष वृणुते तेन लभ्यः' इत्यादि श्रुतिस्मृतिपुराणवचनान्येवं सति समञ्जसानि भवन्ति, तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति सिद्धम्" इति । श्रीमद्वल्लभसम्प्रदायानुसारिणा श्रीमद्विट्ठलेश्वरेण—"प्रशस्तधर्म्यं भगवान्विचारात् निरूप्य तु । निवृत्तिनिष्ठां सुदृढां निःसन्दिग्धां हरिर्जगौ ॥ सांख्ययोगौ [illegible] [illegible]ममैव च । अन्योन्याधिकनिर्धारो ज्ञानविज्ञानयोरपि ॥ स्वरूपविनिर्धारो भक्त्यन्तरनिर्णयः । तद्धेतुर्गुणवैषम्यं सर्वशास्त्रविनिर्णयः ॥ इति गीतार्थनिर्धारो यथाभागं विभज्यते । सांख्ययोगौ निरूप्यादौ मोहमुत्पाद्य फाल्गुनम् । भक्तिपीयूषपानालङ्कृतवानिति संप्रदः ॥" इति । श्रीमज्जगदीशेन तत्कृते गीताप्रदीपे—"ज्ञानस्य हि मोक्षहेतुता कर्मणान्तु ज्ञानद्वारा सत्त्वशुद्धिद्वारा ब्रह्मार्पणद्वारा मोक्षसाधकतेति ज्ञानप्रशंसा न तु कर्मणोऽन्यथासिद्धत्वं भगवदभिप्रायगोचरम् । अतएव 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इत्यादिगीताशास्त्रे उभयोपवर्णनमेव भगवता विहितम् । उक्तञ्चेदं 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यादिस्मृतेः । तथाच ज्ञानकर्मसमुच्चयप्रतिपादनमेव वेदव्यासस्य गीताशास्त्रोपदेशः" इति । श्रीमन्माध्वानुसारिणा गीतासारार्थसंग्रहाख्य-गीताविवरण-कृता—'स्वतन्त्रास्वतन्त्रतत्त्वज्ञान-निष्कामधर्माकर्मापादनद्वारा मोक्षो भवेत्" इति । वेदान्तसूत्रभाष्ये श्रीमद्वल्लभ आह—"भगवान्……ब्रह्मविद्यां निरूप्य तद-

प्राप्तुनया 'सर्व्वगुह्यतमम्' इत्यादिना भक्तिप्रपत्ती एवोक्तवान्। अतोऽकृत्वेन पूर्व्वं सर्व्वनिर्णया उक्ता इत्यवधेयम्। तथैवार्ज्जुनविधानात् 'करिष्ये वचनं तव इति।" (वे, सू, १अ, २पा, ६सू, भा,) इति। ७८।

इति श्रीमद्भगवद्गीतासमन्वयभाष्येऽष्टादशोऽध्यायः।

उपसंहारः।

न खलु प्रकीर्णानां सिद्धान्तानामेकत्र संग्रहं विना यथायथं तत्त्वधारणं सम्भवति, अतस्तेषां सुखबोधायोपसंहार आरभ्यते। भिन्नभिन्नसम्प्रदायानां भिन्नभिन्नसिद्धान्तास्तत्तदवलम्बितवेदान्तवाक्यमूलका एवेति सर्व्वैस्तैर्वेदान्तसूत्राणां स्वस्वसिद्धान्तानुसारि भाष्यं निरमायि। तेषां सिद्धान्तानामेकदेशित्वं विरोधञ्च पश्यतां न जातु संशयो दार्शनिकसिद्धान्तेषु प्रेक्षावतां कर्त्तव्यः। वाक्यान्येतानि श्रीमद्विज्ञानभिक्षोः सांख्यदर्शनभाष्यस्य मननीयानि तैः—"'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुतिषु परमपुरुषार्थसाधनस्यात्मसाक्षात्कारस्य हेतुतया श्रवणादित्रयं विहितम्। तत्र श्रवणादावुपायाकाङ्क्षायां स्मर्य्यते।—'श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः। मत्वा च सततं ध्येय एते दर्शनहेतवः॥' इति। ध्येयो योगशास्त्रप्रकारेणेति शेषः। तत्र श्रुतिभ्यः श्रुतेषु पुरुषार्थतद्धेतुज्ञानविषयात्मस्वरूपादिषु श्रुत्यविरोधिनीरुपपत्तीः षडध्यायीरूपेण विवेकशास्त्रेण कपिलमूर्त्तिर्भगवानुपदिदेश। ननु न्यायवैशेषिकाभ्यामप्येतेष्वर्थेषु न्यायः प्रदर्शित इति ताभ्यामस्य गतार्थत्वं सगुणनिर्गुणत्वादिविरुद्धरूपैरात्मसाधकतया तद्युक्तिभिरस्य युक्तीनां विरोधेनोभयोरपि दुर्घटं च प्रामाण्यमिति। नैवम्। व्यावहारिकपारमार्थिकरूपविषयभेदेन गतार्थत्वविरोधयोरभावात्। न्यायवैशेषिकाभ्यां हि सुखिदुःख्याद्यनुवादतो देहादिमात्रविवेकेनात्मा प्रथमभूमिकायामनुमापितः; एकदा परसूक्ष्मे प्रवेशासम्भवात्। तदीयञ्च ज्ञानं देहाद्यात्मतानिरसनेन व्यावहारिकं तत्त्वज्ञानं भवत्येव। यथा पुरुषे स्थाणुभ्रमनिरासकतया करचरणादिमत्त्वज्ञानं व्यवहारतस्तत्त्वज्ञानं तद्वत्। अतएव—'प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्म्मसु। तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्॥' इति गीतायां कर्त्तृत्वाभिमानिनस्तार्किकस्याक-

स्वविरुद्धमिव तत्त्ववित्सांख्यापेक्षयोक्तम्; न तु सर्वेश्वरत्वमिति। तथा तदीयमपि ज्ञानमपरवैराग्यद्वारा परम्परया मोक्षसाधनं भवत्येवेति। तत्प्रमाणापेक्षयापि च सांख्यज्ञानमेव पारमार्थिकं परवैराग्यद्वारा साक्षान्मोक्षसाधनञ्च भवति; तद्गीतावाक्येनात्मकर्तृत्वविरहस्यैव तत्त्वविद्यसिद्धेः। 'तीर्णो हि तदा भवति हृदयस्य शोकान्' 'कामादिकं मनः एव मन्यमानः' 'समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव' 'स यदत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवति' इत्यादि तात्त्विकश्रुतिशतैः। 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥' 'निर्गुणमय एवायमात्मा ज्ञानमयोऽमलः। दुःखाज्ञानमया धर्माः प्रकृतेस्ते तु नात्मनः॥' इत्यादि तात्त्विकस्मृतिशतैश्च। न्यायवैशेषिकोक्तज्ञानस्य परमार्थभूमौ बाधितत्वाच्च। न चैतावता न्यायाद्यप्रामाण्यम्। विवक्षितार्थे देहाव्यतिरिक्तांशे बाधाभावात् 'यत्परः शब्दः स शब्दार्थः' इति न्यायात्। आत्मनि सुखादिमत्त्वस्य लोकसिद्धतया तत्र प्रमाणान्तरानपेक्षणेन तदंशस्यानुवादत्वाच्च शास्त्रतात्पर्यविषयत्वमिति। स्यादेतत्। न्यायवैशेषिकाभ्यामस्त्वविरोधो भवतु। ब्रह्ममीमांसायोगाभ्यान्तु विरोधोऽस्त्येव, ताभ्यां नित्येश्वरसाधनात्; अत्र चेश्वरस्य प्रतिषिध्यमानत्वात्। न चात्रापि व्यावहारिकपारमार्थिकभेदेन सेश्वरनिरीश्वरवादयोरविरोधोऽस्तु सेश्वरवादस्योपासनापरत्वसम्भवादिति वाच्यम्, विनिगमकाभावात्। ईश्वरो हि दुर्ज्ञेय इति निरीश्वरत्वमपि लोकव्यवहारसिद्धमैश्वर्यवैराग्यायानुवदितुं शक्यत आत्मनः सगुणत्वमिव, न तु क्वापि श्रुत्यादावीश्वरः स्फुटं प्रतिषिध्यते येन सेश्वरवादस्यैव व्यावहारिकत्वमवधार्य्येतेति। अत्रोच्यते—अत्रापि व्यावहारिकपारमार्थिकभावो भवति—'असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्।' इत्यादिशास्त्रैर्निरीश्वरवादस्य निन्दितत्वात्। अस्मिन्नेव शास्त्रे व्यावहारिकस्यैवेश्वरप्रतिषेधस्यैश्वर्यवैराग्यार्थमनुवादत्वौचित्यात्। यदि हि लोकायतिकमतानुसारेण नित्यैश्वर्यं न प्रतिषिध्येत, तदा परिपूर्णनित्यनिर्दोषैश्वर्यदर्शनेन तत्र चित्ता-

वेगतो विवेकाभ्यासप्रतिबन्धः स्यादिति सांख्याचार्याणामाशयः। नेश्वरवादस्य न क्वापि निराकरणमस्ति, ईशोपासनादिपरतया तत् शास्त्रं सङ्कोचेन। यत्तु—'नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्। अत्र वः संशयो मा भूज्ज्ञानं सांख्यं परं मतम्॥' इत्यादि वाक्यम्; तद्विवेकांश एव सांख्यज्ञानस्य दर्शनान्तरेभ्य उत्कर्षं प्रतिपादयति न त्वीश्वरप्रतिषेधांशेऽपि। तथा पराशराद्यखिलशिष्टसंवादादपि ईश्वरवादस्यैव पारमार्थिकत्वमवधार्यते। अपि च—'अक्षपादप्रणीते च काणादे सांख्ययोगयोः। त्याज्यः श्रुतिविरुद्धोऽंशः श्रुत्येकशरणैर्नृभिः॥ जैमिनीये च वैयासे विरुद्धांशो न कश्चन। श्रुत्या वेदार्थविज्ञाने श्रुतिपारं गतौ हि तौ॥' इति पराशरोपपुराणादिभ्योऽपि ब्रह्ममीमांसाया ईश्वरांशे बलवत्त्वम्। तथा—'न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः। हेत्वागमसदाचारैर्यद्युक्तं तदुपास्यताम्॥' इति मोक्षधर्मवाक्यादपि पराशराद्यखिलशिष्टव्यवहारेण ब्रह्ममीमांसान्यायवैशेषिकाद्युक्त ईश्वरसाधकन्याय एव ग्राह्यो बलवत्त्वात्। तथा—'यं न पश्यन्ति योगीन्द्राः सांख्या अपि महेश्वरम्। अनादिनिधनं ब्रह्म तमेव शरणं व्रज॥' इत्यादि कौर्म्मादिवाक्यैः सांख्यानामीश्वराज्ञानस्यैव नारायणादिना प्रोक्तत्वाच्च। किञ्च ब्रह्ममीमांसाया ईश्वर एव मुख्यो विषय उपक्रमादिभिरवधृतः। तत्रांशे तस्य बाधे शास्त्रस्यैवाप्रामाण्यं स्यात् 'यत् परः शब्दः स शब्दार्थः' इति न्यायात्। सांख्यशास्त्रस्य तु पुरुषार्थतत्साधनप्रकृतिपुरुषविवेकावेव मुख्यो विषय इति ईश्वरप्रतिषेधांशबाधेऽपि नाप्रामाण्यं 'यत्परः शब्दः स शब्दार्थः' इति न्यायात्। अतः सावकाशतया सांख्यमेवेश्वरप्रतिषेधांशे दुर्बलमिति।" इति।

इदं खलु प्रेक्षावतां विचार्यम्;—मुख्यस्य यस्य विषयस्य निरासाय यस्याचार्यस्य प्रयत्नस्तमेव स दृष्टिगोचरे न्यस्यान्यानपसारयति असमाकुलचित्तत्वाय। एवं तैस्तै विषया अपसारितास्तेषु वा पुनर्विचार्यभूमिरवतिष्ठते, तामिवावलम्ब्य परस्याचार्यस्तदपसारितं विषयं

मुख्यं कृत्वा तद्दौर्बल्यं प्रदर्शयन् ख्यातिं लभते । यथा हि जगदसत्त्व-
प्रदर्शनाय प्रयत्नः श्रीमच्छङ्करस्य जगज्जीवजीवावरकत्वेनैक्ययोरपार-
मार्थिकत्वघोषणेन तावदसारयति । श्रीमद्रामानुजस्यादर्शे श्रीमच्छङ्करस्य
दौर्बल्यं पश्यन् विस्तृतेन खण्डनेन जगतो जीवस्य चात्मनः पारमा-
र्थिकत्वं व्यञ्जितवान् । समतभेदस्यापि जगज्जीवयोर्ब्रह्मणैक्याभावे
श्रीमद्रामानुजस्य यद्दौर्बल्यमासीत्, तदपसारितं श्रीमता माध्वेन द्वैत-
तत्त्ववादोत्थापनेन । एवं परवर्त्तिभिरप्याचार्यैरर्वाचीनैः श्रीम-
न्माध्वात्यन्तभेदवादोऽपि सम्यग्भेदाभेदवादेन संस्कृतः । श्रीमन्माध्वसम्म-
तात्यन्तभेदवादः प्रदर्शितः श्रीमत्पद्मनाभेन पदार्थसंग्रहे—"पञ्च भेदाश्च
जीवेशयोर्भेदः, जीवानाञ्च परस्परं भेदः, जडेशयोर्भेदः, जडानाञ्च पर-
स्परं भेदः, जडजीवयोर्भेदः । एते पञ्च भेदा अनादिनित्याः श्रुतावप्यनु-
स्यूताः" (५१४) इति । श्रीमतो निम्बार्कस्य शक्तिविक्षेपोपसंहारवादः
श्रीमतो वल्लभस्य च शुद्धाद्वैतवादो भेदाभेदयोर्मूलमाविष्कुरुत इति निर-
वद्यम् । एवं क्रमिकविचारणायैकस्य दुर्बलांशोऽपरेणापहृतः । सर्वेषां
दुर्बलांशपरिहारान्निर्दोषांशग्रहणेन सामञ्जस्यापादनमेव कर्त्तव्यं सम्य-
ग्दृष्टिमद्भिः ।

जगतोऽपारमार्थिकत्वं श्रीमता शङ्करेण यदपि विचारचातुर्य्येण
साधितं तथापि न तद्विचारपराजितहृदयतोऽस्य पारमार्थिकत्वमपैतीति
पश्यता केनाप्युपासकं सुहृदा कदाचित् कश्चिच्छङ्करमार्गानुगामी परि-
व्राजकः, यतो न यत् कदापि विपुलयत्नतोऽप्यन्यथा भवति तत् कथम-
सत्यमुक्तं तत्रभवता शङ्करेणेति पृष्टस्तमवबोधयदेवंविधयाख्यायिकया
कारणमस्य । एकदेशो नरपालः स्वसचिवेन अनङ्गादिपरिशून्यप्रग-
ल्भप्रान्तरप्रविष्टस्तमपृच्छत्, किं वा प्रान्तरमिति । प्रान्तरमनवगताय
तज्ज्ञानरहिताय प्रान्तरमिदमित्युपदेशो विफल इति जानन् तं जना-
धिपमुवाच सः,—द्विपञ्चदिनान्ते किं वा प्रान्तरमिति त्वां बोधयाम्या-
युष्मन् । अनन्तरं स तत्प्रान्तरं हस्तिराजिभिराच्छाद्य तत्र तं नीतवां-
स्तुरङ्गपृष्ठारूढम् । तथाविधं तत्प्रान्तरं दृष्ट्वा साश्चर्यं स तमाह—पश्यो

कान्तेयं मन्यते वनभूमिरिति । स च बुद्धिमान् सचिवः सर्व्वान् दुष्टान् संक्लेशयंस्तं पुनस्तत्रानयत् । तं जनपदं वनभूमिं मन्यमाना-मामवलोक्य सहर्षनिर्व्विण्णः स तं कथापि—कथं वनभूमिरियं हर्षैः परिहीना प्रत्यक्षतोऽनुभूयतेति । किन्तु पार्श्वे तत्त्ववाद्येव स तं प्रत्युक्तवान्, इदं तत् प्रान्तरं यद्विबोधयितुमायुष्मताऽनुबद्धोऽस्मि । आवरणं अविद्यामूलमज्ञानमुक्तौ यावत्कार्यमिति न भवति ब्रह्मवत्ता प्रत्यक्षगोचरेति श्रीमतः शङ्करस्य ब्रह्मविद्यात्मप्रतिपादने प्रयास इति । अन्यत्रापि तथैव तस्याभिप्राय इति तत्रान्यत्रोपवर्णितं प्रत्यभिज्ञाय प्राक् (२।१६) ।

श्रीमच्छङ्करस्य निर्व्विशेषवादं महता प्रयत्नेन श्रीमद्रामानुजो निराकरोत् । न खलु किमपि वस्तुविशेषं बुद्धिगोचरं भवति । सत्तापि न वस्तुशून्या, जगत्कारणब्रह्मस्वरूपमेव सा बुद्धौ भासयते । अतएव हि श्रुतयश्च स्मृतयश्च सर्व्वज्ञं सर्व्वशक्तीत्यादि विशेषणविशिष्टमेव तच्छ्रो-मता शङ्करेणापि भूयो भूयः स्वभाष्ये कीर्त्यते । स्वरूपं हि वस्तुगतं वस्त्वभिन्नं तेनैव तद्बोधगम्यमिति सविशेषनिर्व्विशेषवादयोर्भवत्येकत्र समावेशः । यदेव विषयविषयिसम्बन्धितया सविशेषं निखिलसम्बन्ध-विरहिततया तदेव निर्व्विशेषमिति कोऽत्र विरोधः, यतः सम्बन्ध्यसम्ब-न्धितया वस्तुपरिग्रह एव ज्ञानोपायः । नायं विना दृष्टान्तेन बुद्धौ भाव्यतेऽतो वस्तुपरिग्रहक्रमाख्यानमपेक्ष्यमेव तत्त्वार्थिभिः । एकस्यान्य-स्माद्व्यावृत्तिं विना न वयं वस्तुग्रहणे समर्थाः । एकस्यान्यस्माद्व्या-वृत्तिर्विषयविषयिसम्बन्धं दर्शयति । न पुनरहमनहम् अनहमहञ्च विना बुद्धौ सुव्यक्ततरं भासते । अहं विषयी अनहं विषयः, अनयोः सम्बन्ध एकस्यान्यस्माद्व्यावृत्त्या बुद्धौ स्फुरति । अनहंव्यावृत्त्या अहम्, अहंव्यावृत्त्या अनहमित्येवमहमनहंज्ञानस्फुरणे हेतुः । ननु अहमर्थः किरणमालीव स्वप्रकाशः, न स्वात्मप्रकाशेऽन्यत् किञ्चिदपेक्षते, तत्कथ-मुच्यतेऽनहंरूपविषयसम्बन्धं विना न तस्य बुद्धौ स्फुरणमिति ; उक्तञ्च —"अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत् । अहंबुद्ध्या पराग-

र्थात् प्रत्यगर्थो हि भिद्यते॥" स्वस्मै प्रकाशमानत्वं प्रत्यक्त्वम्, परस्मै प्रकाशमानत्वं पराक्त्वम्। अतः पराग्भूतमनहमेव प्रत्यग्भूतादहमर्थात् भिद्यमानं बुद्धौ भासते। सत्यम्, किन्त्वहमनहमन्योन्यसम्बन्धेन नित्यानुभूयमानेनानुभूतिः संविद्धोद्भूयते तया चाहमर्थस्य स्फूर्त्तिर्भिन्नम्। अन्यथा सद्योजातशिशौ तस्यामप्यहंबुद्धौ न कथं तदा तस्याः सम्यक्-स्फूर्त्तिः ? दृश्यते हि क्रमेण चानहंलक्षणानुभाव्यविषयसम्बन्धादनुभूते-रुत्तरोत्तरस्फुरणमाहमर्थस्यापि तथा। आह च श्रीमद्रामानुजः शारी-रकमीमांसाभाष्योपक्रमणिकायाम्—"अस्य कर्त्तुः स्थिरत्वं कर्त्तृधर्मस्य संवेदनाख्यस्य सुखदुःखादेरिव उत्पत्तिस्थितिनिरोधाश्च प्रत्यक्षमीक्ष्यन्ते। कर्त्तुःस्थैर्य्यं तावत् स एवायमर्थः पूर्व्वमेवानुभूत इति प्रत्यभिज्ञाप्रत्यक्ष-सिद्धम्। अहं जानामि, अहमज्ञासिषम्, ज्ञातुरेव ममेदानीं ज्ञानं नष्टमिति च संविदुत्पत्त्यादयः प्रत्यक्षसिद्धा इति कुतस्तदैक्यम्। एवं क्षणभङ्गिन्याः संविद आत्मत्वाभ्युपगमे पूर्व्वेद्युर्दृष्टं परेद्युरिदमहमदर्श-मिति प्रत्यभिज्ञा च न घटते। अन्येनानुभूतस्य न ह्यन्येन प्रत्यभि-ज्ञानसम्भवः। नित्यानुभूतेरात्मत्वाभ्युपगमे तथा नित्यत्वेऽपि प्रतिस-न्धानासम्भवस्तदवस्थः। प्रतिसन्धानं हि पूर्व्वापरकालस्थायिनमनुभ-वितारमुपस्थापयति नानुभूतिमात्रम्" इति। अयमनुभविताहमर्थः प्रत्यगात्मा न ज्ञप्तिमात्रं ज्ञातैव। श्रीमता शङ्करेणापि 'अस्मत्प्रत्यय-विषयः प्रत्यगात्मा' इति भाष्यारम्भे त्वभाणि चरमे 'सर्व्वदुःखविमुक्तैक-चैतन्यात्मकोऽहमित्येष आत्मानुभवः' (वे, सू, ४अ, १पा, २सू, भा) इति। न केवलमहमनहं व्यावृत्त्य तज्ज्ञानं स्फुरति, परस्य ज्ञान-मपि तथैवेति दर्शितं श्रीमद्रामानुजेन—"लक्षणतः प्रतिपत्तव्यं ब्रह्म सकलेतरपदार्थविरोधिरूपम्। तद्विरोधिरूपं सर्व्वमनेन पदत्रयेण व्युदस्यते। तत्र सत्यपदं विकारास्पदत्वेनासत्याद्वस्तुनो व्यावृत्तपरम्, ज्ञानपदं चान्याधीनप्रकाशाज्जड़रूपाद्वस्तुनो व्यावृत्तपरम्, अनन्तपदञ्च देशतः कालतो वस्तुतश्च परिच्छिन्नाद्व्यावृत्तपरम्। न हि व्यावृत्ति-र्भावरूपोऽभावरूपो वा धर्म्मः, अपि तु सकलेतरविरोधि ब्रह्मैव, यथा

शोकादेः कार्य्यादिव्यावृत्तिस्वतन्त्रपदार्थस्वरूपमेव न धर्म्मान्तरम्।
एवमेकस्यैव वस्तुनः सकलेतरविरोध्याकारतामवगमयदेकरसमेकार्थ-मपर्यायञ्च पदत्रयम्" इति। एवं व्याख्यया सविशेषत्वेन परःसुधान-सिद्धावपि, न खलु तन्निर्व्विशेषत्वं जहाति, सकलसम्बन्धनिरपेक्षत्वात् स्वयं तस्य। न पुनर्जगज्जीवाभ्यां परवस्तुनो निरपेक्षत्वमनिर्मायोक्त-दृक्सम्भूतत्वात् तच्छक्तिविलासत्वात् तदनन्यत्वाच्च। चिन्मात्रमात्मा शक्तिमात्रं प्रकृतिरन्यसम्बन्धविवर्जिततया शक्यते चिन्तयितुं स्वतन्त्रत्व-परिग्रहायेत्यत्रापि निर्व्विशेषवादस्य नात्यन्तनिरवकाशः। कथमुच्यते नात्यन्तनिरवकाश इति? परतत्त्वादनन्यत्वात् स्वातन्त्र्यपरिग्रहस्य कल्पितत्वात्। कथमुक्तं श्रीमच्छङ्करेण—"नेश्वरादन्यः संसारी तथापि देहादिसङ्घातोपाधिसम्बन्ध इष्यत एव घटकरकगिरिगुहाद्युपाधिसम्बन्ध इव व्योम्नः, तत्कृतश्च शब्दप्रत्ययव्यवहारो लोकस्य दृष्टो घटच्छिद्रं करकच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि, तत्कृता चाकाशे घटा-काशादिभेदमिथ्याबुद्धिर्दृष्टा, तथेहापि देहादिसङ्घातोपाधिसम्बन्धा-विवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते चात्मन एव सतो देहा-दिसङ्घातेऽनात्मन्यात्मत्वाभिनिवेशो मिथ्याबुद्धिमात्रेण पूर्व्वपूर्व्वेण। सति चैवं संसारित्वे देहाद्यपेक्षमीक्षितृत्वमुपपन्नं संसारिणः" (वे, सू, १अ, १पा, ५सू, भा) इति;—प्रदर्शितं तत् पुरस्तात्। इह 'मिथ्याबुद्धि-मात्रेण पूर्व्वपूर्व्वेण' इति वचनात् जीवस्यानादित्वं नित्यत्वमेवोक्तं; यथा च "प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि" (१३।१९) इत्यत्र। 'ज्ञोऽतएव' (वे, सू, २।३।१८) इति सूत्रे पुनस्तेन "नित्यचैतन्योऽयमात्मा" इति स्वयमेव प्रतिपादितम्। यद्यपि ब्रह्मणो जीवभाव एवावाभि-च्छिन्नस्तथापि तद्भावेन नित्यावस्थितिरप्यस्य तत्र समर्थिता। जीवशक्तिः प्रकृतिशक्तिश्चापाऽस्वतन्त्रा तच्छक्तिरेव, यतस्तयोस्तद्भावत्वं न जातु विहतम्। काऽसौ मिथ्याबुद्धिरविद्याऽज्ञानं वा? "[illegible]बुद्धिः साक्षादात्मगोचरैव, शरीरगोचरा त्वहंबुद्धिरविद्यैव, यथोक्तं भगवता पराशरेण—'श्रूयतां चाप्यविद्यायाः स्वरूपं [illegible]। [illegible]

बुद्धिर्वा' इति'' इति। सिद्धान्तोऽयं श्रीमद्रामानुजस्य न पुनः श्रीमच्छङ्करकृतान्तेकान्तविरोधी। आह च स शारीरकमीमांसासूत्रोपक्रमणिकायां—"प्राक् च तथाभूतात्मविज्ञानात् प्रवर्त्तमानं शास्त्रमविद्याविषयत्वं नातिवर्त्तते। तथाहि—'ब्राह्मणो यजेत' इत्यादीनि शास्त्राणि आत्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्त्तन्ते। अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा—पुत्रभार्य्यादिषु विकलेषु सकलेषु वाऽहमेव विकलः सकलो वेति बाह्यधर्म्मानात्मन्यध्यस्यति; तथा देहधर्म्मान्—कृशोऽहं कृष्णोऽहं, तिष्ठामि गच्छामि लङ्घयामि चेति; तथेन्द्रियधर्म्मान् मूकः क्लीवो बधिरः काणोऽहमिति; तथान्तःकरणधर्म्मान् कामसङ्कल्पविचिकित्साध्यवसायादीन्। एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तञ्च प्रत्यगात्मानं सर्व्वसाक्षिणं तद्विपर्य्ययेणान्तःकरणादिष्वध्यस्यति। एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्त्तृत्वभोक्तृत्वप्रवर्त्तकः सर्व्वलोकप्रत्यक्षः।'' इति।

अतस्मिंस्तद्बुद्धिरिति मिथ्याप्रत्ययरूपोऽध्यासोऽनादिरनन्तो नैसर्गिक इत्युक्तिर्बन्धकारणस्याज्ञानस्य नित्यत्वं दर्शयति। न खलु मन्तव्यं माध्वमतसंस्कारकाणामर्व्वाचीनानामाचार्य्याणां विरोधि मतमिदमिति। तेऽप्याहुर्भागवतामृते—"सच्चिदानन्दरूपाणां जीवानां कृष्णमायया। अचिन्त्या विद्यया तत्त्वविस्मृत्या संसृतिभ्रमः॥" टीका च—"अविद्यया यत् संसारित्वं तदपि भ्रमात्मकमेवेत्यर्थः। विचारेण तेषामपि संसार्य्यित्वासम्भवात्। कथम्? "मुक्तौ स्वतत्त्वज्ञानेन मायापगमतो हि सः। निवर्त्तेत घनानन्दब्रह्मांशानुभवो भवेत्॥" टीका च—"तस्यांश आत्मस्वरूपं तदनुभवो भवेदिति मुक्तौ सुखांशमात्रावाप्तिरिति सिद्धम्। यद्यपि भक्ता अपि ईदृशस्वरूपास्तथापि तेषां भगवद्भजनेन तच्चरणानुभवाद्भक्तिसुखावाप्तिरिति मुक्तेभ्यो विशेषो ज्ञेयः" इति। कुतः सिद्धान्ते जीवस्य भगवदंशत्वं तत्रैवोक्तम्—"अनादिसिद्धया शक्त्या चिच्छिलासस्वरूपया। महायोगाख्यया तस्य सदा ते भेदितास्ततः॥ अतएव-

ल्वादभिन्नास्तु भिन्ना अपि सतां मताः। मुक्तौ तत्रामपि प्रायो भेद-
स्तिष्ठत्यतो हि सः॥" टीका च—"तस्य श्रीभगवतः शक्त्या ते जीवा-
ख्यतत्त्वानि ततः परब्रह्मरूपाद्भगवत एव सदा भेदिताः अंशत्वेन पृथ-
ग्भूताः सन्ति। कीदृश्या? अनादिसिद्धया अनादित्वेन सिद्धयेत्यर्थः।
अतो जीवतत्त्वानामप्यनादिसिद्धत्वम्। पुनः कीदृश्या? चित् चैतन्यं
तस्य विलासो वैभवं शोभातिशयं वा स एव स्वरूपं तत्त्वं यस्याः इति।
तेषामपि चैतन्यविभूतिरूपत्वेनामायिकत्वम्। पुनः कीदृश्या? अघ-
टनघटनचातुर्य्यविशेषेण महायोग इत्याख्या यस्यास्तया। तथा च
श्रीभगवद्गीतासु 'नाहं प्रकाशः सर्व्वस्य योगमायासमावृतः' इत्यादि।
अनेनांशांशित्वासम्भवेऽपि तथा सम्पादनसामर्थ्यमप्युक्तमिति दिक्। अत-
स्तस्मात् तच्छक्तिविशेषकृतभेदात् अस्मात् परब्रह्मणोऽभिन्नाः सच्चिदा-
नन्दत्वादिब्रह्मसाधर्म्यवत्त्वात्, अंशत्वादिना भिन्ना अपि। अत्रापि
पूर्व्वोक्तं रवेरंशा इत्यादि दृष्टान्त एवं द्रष्टव्यम्। यथा रव्यादेः सका-
शात् अंशादयः प्रकाशकत्वादितत्तद्गुणयोगादभिन्ना अंशत्वेन नानात्वा-
द्यवस्था भिन्नाश्च तथेति। अतः स नितरसिद्धो भेदस्तिष्ठत्येव। एवं
सत्येव 'मुक्ता अपि लीलया विग्रहं कृत्वा भगवन्तं भजन्ति' इति
श्रीशङ्कराचार्य्यभगवत्पादानां वचनम्।" इति। अयमेव भेदाभेद-
वादः श्रीमता जीवेन सर्व्वसंवादिन्यां "स्वमते त्वचिन्त्यभेदाभेदावेव
अचिन्त्यशक्तिमयत्वात्" इत्युक्तः। तत्त्वमस्यैवमुक्तं भागवतामृते—
"सदा वैजात्यमात्मानां जीवानां तत्त्वतस्तथा। अंशत्वेनाप्यभिन्नत्वा-
द्विजातीयभिदा मता॥ अस्मिन् हि भेदाभेदाख्ये सिद्धान्तेऽस्मिन्
सुसम्मते। युक्त्यावतारिते सर्व्वमनवद्यं ध्रुवं भवेत्॥ सदा प्रमाण-
भूतानामस्माकं महतां तथा। वाक्यानि व्यवहाराश्च प्रमाणं खलु
सर्व्वथा॥" टीका च—"अद्वयमितरपि साधयन्ति सदेति। सदा
वैजात्यं परिच्छिन्नत्वादिभेदेन विजातीयत्वम्—आत्मानां जीवानां जीव-
तत्त्वानां तत्त्वतः परमार्थतः अभिन्नत्वाद्भेदाभावात् चिद्विलासशक्तिकृत-
त्वेन तेषामपि तादृशत्वात्…………अंशत्वेनाप्यभिन्नत्वात् विजातीय-

रूपा भिदा मृता नष्टा। अस्मिन्नुत्तमप्रकारके सिद्धान्तन्यायविशेषे अस्माकं श्रीभगवद्भक्तिपराणां सुसम्मते सुतरां विचारणावतारिते व्याख्याद्वाराभिव्यञ्जिते सर्वसूत्रमनुत्तममपि भक्तिमार्गविषयकं व्याख्यातं निर्गतमवद्यं दोषो यथा तादृशं भवति ध्रुवं निखिलं मन्त्रसन्देहजात-निरसनसामर्थ्यात्। एवमेव ब्रह्मण एव उत्पद्यन्ते तस्मिन्नेव लीयन्ते इतरतो जीवानां तत्त्वतो ब्रह्मणा सहाभेदं ये केचिदाचक्षते तेषामपि मते मुक्तौ ब्रह्मणोऽशेषस्वरूपानुभवाभावात् सुखसम्पन्नमेव भिदास्ति। तथाहि यथा समुद्रस्य प्रदेशादेकस्मादेव जायमानास्तरङ्गा एकस्मिन्नेव देशे लीयमाना जलमयत्वादिना समुद्रादभिन्ना गाम्भीर्यरत्नाकरत्वादि-गुणाभावाद्भिन्नाश्च केवलं तस्मिन् लयात् पृथक्त्वेनादृश्यमाना ऐक्यं गताः समुद्रस्वरूपं प्राप्ता इत्युच्यते, तथा स्वकारणे ब्रह्मांशे तेजआदिस्थानीये सूक्ष्मतया लीयमाना जीवा ब्रह्मैक्यं गता इत्युच्यते, न त्वपरिच्छिन्नसुखघन ब्रह्मताप्राप्तिस्तेषां स्वभावेनैव परिच्छिन्नत्वात्, ततो मुक्तावपि पृथग्दर्श-नाद्भिन्नत्वं कस्मिंश्चिद्विभागे परिच्छिन्नत्वेन लीनतयावस्थानादभिन्न-त्वञ्च। अतएव कस्यचिन्मुक्तस्य श्रीभगवत्कृपाविशेषेण भक्त्यर्थाय सच्चिदानन्दशरीरधारणार्थं पुनः पुनः पृथक्त्वसत्तावाप्तिः सम्भवती[illegible]त्यत्रैव निरूपितम्। एवं सत्येव 'सत्यपि भेदापगमे नाथ तवाहं न मामकी-नस्त्वम्। सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः' इति श्रीम-च्छङ्कराचार्यभगवत्पादानां भेदाभेदन्यायोपबृंहितं वचनं सम्यगुपप-द्यते। अविद्याकृतजीवत्वभेदे विनष्टे सति तदीयत्वेन पुनर्भेदस्य सिद्धेः, अन्यथा परमैक्यापत्त्या 'नाथ तवाहम्' इत्याद्युक्तिर्नैव सङ्गता स्यादिति दिक्।" इति। भेदाभेदवादमुद्दिश्य श्रीमद्रामानुज आह—"भेदा-भेदवादे तु ब्रह्मण्येवोपाधिसंसर्गात् तत्प्रयुक्ता जीवगता दोषा ब्रह्मण्येव प्रादुःष्युरिति। निरस्तनिखिलदोषकल्याणगुणात्मकब्रह्मात्मभावोपदेशा हि विरोधादेव परित्यक्ताः स्युः। स्वाभाविकभेदाभेदवादेऽपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमात् गुणदोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशो विरुद्ध एव" इति। श्रीचैतन्यानुवर्त्तिना-

माध्वाचार्याणां भेदाभेदवादे—"नित्यसिद्धास्ततो जीवा भिन्ना एव यथा रवेः । अंशवो विस्फुलिङ्गाश्च वह्नेर्भङ्गाश्च वारिधेः ॥" इति रवेरंशवोऽग्नेर्विस्फुलिङ्गाः समुद्रस्य तरङ्गा इति दृष्टान्तेन 'अभिन्नाः सच्चिदानन्दत्वादिब्रह्मसाधर्म्यवत्त्वात्' इत्युक्तत्वात् स्वरूपगतोऽभेदः परिच्छिन्नत्वादिना भेदोऽवगम्यते, अन्यथा तेषां श्रुतिविरोध एव स्यात्—"न तावद्वास्तवोपाधिपरिच्छेदपक्षे तत्परिच्छिन्नो ब्रह्मखण्डोऽणुरूपो जीवः, अच्छेद्यत्वादखण्डत्वाभ्युपगमाच्च ब्रह्मणः, आदिमत्त्वापाताच्च जीवस्य; अत एकस्यैव वस्तुनो द्वैधीकरणं छेदनम् । अथाच्छिन्नएवाणुरूपोपाधिकयुक्तो ब्रह्मप्रदेश इति चेत्, उपाधौ गच्छत्युपाधिना सुसंयुक्तब्रह्मप्रदेशाकर्षणायोगादनुक्षणमुपाधिसंयुक्तब्रह्मप्रदेशभेदात् क्षणे क्षणे बन्धमोक्षौ स्याताम् । अणोपाधिसंयुक्तं ब्रह्मस्वरूपमेव जीवः, तर्ह्यनुपहितब्रह्मप्रदेशासिद्धः स्यात्, जीवस्यैकत्वञ्च, 'य आत्मनि तिष्ठन्' इत्यादि श्रुतिविरोधः, 'शब्दविशेषात्' इत्यादि न्यायविरोधश्च सर्व्वत्र । अथ ब्रह्माधिष्ठानमुपाधिरेव जीवः, तदैवं मोक्षे जीवनाशः स्यात् तस्मान्नासौ पक्षः ।" (स, स, प, स,) इति । रवेरंशवोऽग्नेर्विस्फुलिङ्गाः समुद्रस्य तरङ्गा इति दृष्टान्तः प्रयत्नं विना भगवच्चिच्छक्तेर्जीवानामभिव्यक्तिमेव दर्शयति जगद्वत्, यतः—"यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम् ॥" (मु, उ, १।१।७) इत्येषा श्रुतिः "यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षरात् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥" (मु, उ, २।१।१) इत्यस्या न विरोधिनी । पावकस्थानीयात् चित्स्वरूपात् विस्फुलिङ्गस्थानीयानां क्षुद्रचितामभिव्यक्तिरिति तत्त्वम् । "जीवस्वरूपं यद्वस्तु परं ब्रह्म तदेव चेत्" इत्युक्त्वा "तथापि जीवतत्त्वानि तस्यांशा एव सम्मताः । घनतेजःसमूहस्य तेजोजालं यथा रवेः ॥" इति यत्रांशत्वं जीवस्य निर्णीतं तत्क्षुद्रत्वमेव व्यनक्ति, अन्यथा तेषां स्वसिद्धान्तहानिरुपतिष्ठते । "जीव ईश्वरस्यांशो भवितुमर्हति, यथाग्नेर्वि-

स्फुलिङ्गः । अंश इवांशः । न हि निरवयवस्य मुख्योऽंशः सम्भवति" (वे, सू, २अ, ३पा, ४३सू, श, भा) इति । "तत्सम्बन्धित्वमेव तदंशत्वम्" इति श्रीमज्जयतीर्थः (वे, सू, २अ, ३पा, ४३सू, मा, भा, टी) इति । "स्मरन्ति च" (२अ, ३पा, ४६सू,) इति सूत्रे श्रीमद्रामानुजः —"एवं प्रभाप्रभावद्रूपेण शक्तिशक्तिमद्रूपेण शरीरात्मभावेन चांशांशिभावं जगद्ब्रह्मणोः पराशरादयः स्मरन्ति" इति ।

श्रीमद्वल्लभस्तु प्रकृतिर्जीवश्च भगवदंश इति मन्यते, "नामरूपयोः कार्य्यरूपत्वात् प्रकृतेरपि लभते तदंशत्वात्..................नानात्वं त्वैच्छिकमेव" (वे, सू, १।१।४ सू, भा,) "न तु ब्रह्मणो निरवयवत्वात् कथं जीवस्यांशत्वमिति वाच्यम् । न हि ब्रह्म निरंशं सांशमिति क्वचिल्लोके सिद्धम्, वेदैकसमधिगम्यत्वात् । सा च श्रुतिर्यथोपपद्यते तथा तदनुसरणेन वेदार्थज्ञानार्थं युक्तिर्वक्तव्या ।" (वे, सू, २।३।४३ सू, भा,) इति । भगवदंशत्वेऽपि कथं जीवस्य दुःखित्वमित्यस्य हेतुं प्रदर्शयितुं स आह "अस्य जीवस्य ऐश्वर्य्यादि तिरोहितम्, तत्र हेतुः, पराभिध्यानात्—परस्य भगवतोऽभितो ध्यानं स्वस्यैतस्य च सर्व्वतो भोगेच्छा तस्मात् । ईश्वरेच्छया जीवस्य भगवद्धर्म्मतिरोभावः । ऐश्वर्य्यतिरोभावाद्दीनत्वं पराधीनत्वम् ; वीर्य्यतिरोभावात् सर्व्वदुःखसहनम् ; यशस्तिरोभावात् सर्व्वहीनत्वम् ; श्रीतिरोभावात् जन्मादिसर्व्वापद्विषयत्वम् ; ज्ञानतिरोभावात् देहादिष्वहंबुद्धिः सर्व्वविपरीतज्ञानञ्चापस्मारसहितस्यैव ; वैराग्यतिरोभावात् विषयासक्तिः । बन्धस्तुर्णां कार्य्यौ विपर्य्ययो द्वयोः । तिरोभावादेवं नान्यथा । युक्तोऽयमर्थः । एकस्यैकांशप्राकट्येऽपि तथाभावात् । आनन्दांशस्तु पूर्व्वमेव तिरोहितो येन जीवभावः । अतएव काममयः, अकामरूपत्वादानन्दस्य । निद्रा च सुतरां तिरोभावकर्त्री भगवच्छक्तिः, अतोऽस्मिन् प्रस्तावे जीवस्य धर्म्मतिरोभाव उक्तः । अन्यथा भगवत ऐश्वर्य्यादिलीला निर्व्विषया स्यात् ।" (वे, सू, ३।२।५ सू, भा) इति । प्रकृतेर्जीवस्य च भगवदंशत्वात् तद्रूपत्वात् (वे, सू, १।१।

११ सू, भा,) सूत्रे पुनर्जीवस्य 'तत्तु समन्वयात्' 'सर्व्वस्य ब्रह्मत्वं' (वे, सू, १।१।१० सू, भा) प्रतिपादितं तेन, अतोऽस्य मतं शुद्धाद्वैतवादत्वेन प्रसिद्धिमगमत्। उक्तञ्च तेन "आदिमध्यावसानेषु ब्रह्मण एवोपपादनात् सर्व्वेषां वेदान्तानां ब्रह्मसमन्वयः" (वे, सू, १।१।१० सू, भा) इति। इदं शुद्धब्रह्म नित्यलीलाविशिष्टम्; तथा—"भक्तेभ्यः स्वरूपानन्ददानाय 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेन या लीलाः करोति……ता भक्ताः पश्यन्तीति द्वितीयसूत्रेणोक्तम्। अतएव लीलाया अनेकरूपत्वात् ब्रह्मणश्च श्रुतौ सैन्धवदृष्टान्तेनैकरसत्वनिरूपणाच्छुद्धब्रह्मधर्म्मत्वं न सम्भवतीति शङ्कानिरासाय कैवल्यमित्युक्तम्। 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिश्रुतिषु या अन्यधर्म्मराहित्यलक्षणा केवलतोक्ता सा लीलात्मिकैव। लीलाविशिष्टमेव शुद्धं परं ब्रह्म न कदाचित् तद्रहितमित्यर्थः पर्य्यवस्यति। तेन स्वरूपात्मकत्वं लीलायाः पर्य्यवस्यति तेन च नित्यत्वम्।" (वे, सू, ४।४।१४सू, भा) इति। न हि रूपवत्तां विना लीला सम्भवति, रूपन्तु तस्य निर्गुणमेव। यथा "'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' इत्याद्यधिकरणैः 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इत्यादिश्रुतिभिश्च प्राकृता एव धर्म्मा निषिध्यन्ते ब्रह्मण्यप्राकृता एव बोध्यन्ते, अन्यथा तद्बोधनमेव न स्यात्, निषेधवाक्य एव तद्बोधनमपि न स्यात्— 'एतस्यैवाक्षरस्य प्रशासने' इत्यादिरूपम्। अतोऽचिन्त्यानन्तशक्तेर्भगवतः, का वा कार्य्याक्षमता यया प्राकृतान् गुणानङ्गीकुर्य्यादतो निर्गुणमेव सर्व्वं भगवद्रूपमिति मन्तव्यम्" (वे, सू, ४।४।१६ सू, भा) इति। लीलायाः स्वरूपात्मकत्वे रूपस्य च निर्गुणत्वे श्रुतिवर्णितं हिरण्यश्मश्रु-हिरण्यकेशादिकं स्वरूपमेव। अतएवाह सः—"हिरण्यशब्द आनन्दवाची, लोकेऽपि तस्यानन्दसाधकत्वात्। अतः केशादयोऽपि सर्व्वे आनन्दमया एव, तादृशमेव ब्रह्मस्वरूपमिति मन्तव्यम्।……'माया ह्येषा मया सृष्टा' इत्यादि भगवद्वाक्यं भगवन्मायया भगवन्तमन्यथा पश्यतीत्याह न तु भगवानेव मायिक इति। शरीरे सति जीवत्वमि-

वेति निश्चयः।" (वे, सू, १।१।२० सू, भा) इति। एवं शुद्धाद्वैतवादत्वेऽपि यावन्न ब्रह्मसायुज्यं तस्मिन् लयो वा, न तावद्द्वैतविलोपः। अतस्तेनोक्तम्—"यच्चोक्तं ब्रह्मविदो द्वैतदर्शनानुपपत्त्या कामभोगासम्भव इति तत्राप्युच्यते। 'यत्र त्वस्य सर्व्वमात्मैवाभूत्' इति श्रुतिरखण्डब्रह्माद्वैतभाने ब्रह्मविदः प्रौपञ्चिकभेदादर्शनं वदति, न तु प्रपञ्चातीतार्थदर्शनं बोधयति निषेधति वा। पुरुषोत्तमस्वरूपन्तु यावत् सर्व्वविशिष्टं प्रपञ्चातीतमेवेति तद्दर्शनादौ किमायातम्" (वे, सू, १।१।१२ सू, भा) इति। अपि च "एतेन लौकिकं पूर्व्वदेहं त्यक्त्वा साक्षाद्भगवद्भजनोपयोगिनं भगवद्विभूत्यात्मकं सङ्घातं प्राप्नोत्यादौ" (वे, सू, १।१।१२ सू, भा) इति। अयं भगवद्भजनोपयोगी देहो भगवत्प्रवेशेन सिद्ध्यति, नान्यथा, तद्यथा "न हि तदा नैसर्गिकज्ञानक्रियाभ्यां तथा भोक्तुं शक्तो भवति; किन्तु भगवांस्तस्मिन्नाविशति यदा तदायमपि तथैव भवति" (वे, सू, ४।४।१५ सू, भा) इति। एवमपि कथमस्य श्रीमता शङ्करेण महान् विरोध इत्यस्य हेत्वन्वेषणे न पुनर्बह्वायासस्य प्रयोजनम्। जीवांशे न तयोरस्ति विवादकारणं, यतो ब्रह्मण एव स्वरूपतिरोधानेन जीवत्वमित्यस्मिन्नस्त्युभयोः सम्मतिः। प्रकृतेर्भगवदंशत्वे न केवलं तस्याः सत्यत्वमायाति, जगतोऽपि तद्विलासत्वात् ब्रह्मणो विभूतित्वात् (वे, सू, १।१।१२ सू, भा) भगवद्रूपत्वात् (वे, सू, १।१।३१ सू, भा)। श्रीमता शङ्करेण मिथ्यात्वमस्या प्रतिपादितमिति बुद्ध्वा पाषण्डित्वमस्य प्रथयता श्रीमता वल्लभेन निर्व्वल्लभत्वमात्मनो विद्वद्गोष्ठीषु सम्पादितम्। "अपवादार्थत्वात् रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः। 'सर्व्वं समाप्नोषि ततोऽसि सर्व्वः' इति स्मृतेश्च चेत्, नैवम्, तथा सति पाषण्डित्वं स्यात्। एतादृशशास्त्रार्थाङ्गीकर्त्तुरासुरेषु भगवता गणितत्वात्।" (वे, सू, १।१।४ सू, भा) इति। "महादेवादयः स्वांशेनावतीर्य्य वैदिकेषु प्रविश्य विश्वासार्थं वेदभागान् यथार्थानपि व्याख्याय सदसद्विलक्षणामसदपरपर्य्यायामविद्यां सर्व्वकारणत्वेन स्वीकृत्य तद्विद्वत्यर्थं जातिभ्रंशरूपं सन्न्यासपाषण्डं प्रसार्य्य सर्व्वमेव लोकं व्यामोहि-

नवन्तः । व्यासोऽपि कलहं कृत्वा शङ्करं प्राप्य तूष्णीमास । पतो-ऽस्मिना मया सर्वतः सदुद्धारार्थं यथाश्रुतानि श्रुतिसूत्राणि योजयता सर्वो मोहो निराकृतो वेदितव्यः" (वे, सू, २।२।२६ सू, भा) इति ।

अस्त्वथवा नास्ति श्रीमता शङ्करेण वादिनां तादृग्विरोधकारणमिति विचार्य्यमन्यथा सर्व्वेषां वादिनामेकत्वं श्रीमद्योगाचार्य्यस्य च माहात्म्यं नावभासेत । दृश्यते मायावादीति निन्दा श्रीमच्छङ्करस्य यशोराशिं राहुग्रस्तं चन्द्रमसमिव मलिनीकरोतीति सैव प्रथममपनोदनीया । कासौ माया ? अव्याकृतनामरूपा दैवी शक्तिर्माया, तद्यथा—"परमेश्वर्य्याश्च शक्तेः समस्तजगद्विधायिन्या वाक्योपक्रमेऽवगमात्, वाक्यशेषेऽपि —'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्' इति । 'यो योनिं योनिमधितिष्ठत्येकः' इति च । तस्या एवावगमात् न स्वतन्त्रा काचित् प्रकृतिः प्रधानं नाम अजामन्त्रेणाम्नायत इति शक्यते वक्तुम् । प्रकरणात्तु सैव दैवी शक्तिरव्याकृतनामरूपा नामरूपयोः प्रागवस्था" (वे, सू, १अ, ४पा, ९सू, भा,) ; यथा च "सर्व्वज्ञेश्वरस्य आत्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्व्वचनीये संसारप्रपञ्चवीजभूते सर्व्वज्ञेश्वरस्य मायाशक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते, ताभ्यामन्यः सर्व्वज्ञ ईश्वरः 'आकाशो वै नामरूपयोर्निर्व्विहिता ते यदन्तरा तद्ब्रह्म' इति श्रुतेः" (वे, सू, २अ, १पा, १४सू, भा) इति । यत्तु तेनोक्तं—"अविद्यात्मिका हि सा वीजशक्तिरव्यक्तशब्दनिर्द्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिर्यस्यां स्वरूपप्रतिबोधरहिता शेरते संसारिणो जीवाः" (वे, सू, १अ, ४पा, ३सू, भा) इति तस्मिन् सर्व्वेषां वादिनां सम्मतिरस्ति । 'ईश्वरेच्छया जीवस्य भगवद्धर्मतिरोभावः' इत्युक्तिर्न पुनरस्या विरोधिनी । यदि वदसि असद्वाद एवास्य निन्दाकारणं, तदपि न, स्वयमेव तेनासत्कार्य्यवादस्यायुक्तता प्रदर्शिता— "दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादीयमानानि लोके दृश्यन्ते, न हि दध्यर्थिभिर्मृत्तिकोपादीयते, न घटार्थिभिः क्षीरम् । तदसत्कार्य्यवादो नोपपद्यते" (वे, सू,

२अ, १पा, १८ सू, भा) इति । प्रत्युत सत एव सर्वत्र वेदान्तेऽसद्व्यपदेशः प्रागुत्पत्तेः (वे, सू, २अ, १पा, १७सू, भा) इत्युक्तः सद्वादस्यैव स्वीकारः । अपि च कारणस्यैव कार्यस्य जगतस्त्रिषु कालेष्वव्यभिचारः (वे, सू, २अ, १पा, १६सू, भा) इति तस्य सिद्धान्तः । यद्येवं कथं जगन्मिथ्यावादोत्थापनेन मायावादस्यासद्वादस्य च प्राधान्यं तत्प्रणीते भाष्ये, इति जिज्ञासायां प्रपञ्चविलयेन योगानुकूल्यं भवतीति दृष्ट्वा मिथ्यात्वप्रतिपादनं विना न तत्सिद्धत्यतस्तत्र प्रयत्नस्तस्येत्यसकृदुक्तमस्माभिः । नैषोऽस्माकं कल्पनाप्रसूतो राद्धान्त इति तदुक्तिरेव श्रूयताम्—"ननु द्वैतप्रपञ्चप्रविलयो नियोगविषयो भविष्यति, अप्रविलापिते हि द्वैतप्रपञ्चे ब्रह्मतत्त्वावबोधो न भवतीत्यतो ब्रह्मतत्त्वावबोधप्रत्यनीकभूतो द्वैतप्रपञ्चः प्रविलाप्यः । यथा स्वर्गकामस्य यागोऽनुष्ठातव्य उपदिश्यते, एवमपवर्गकामस्य प्रपञ्चविलयः । यथा च तमसि व्यवस्थितं घटादितत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यते, एवं ब्रह्मतत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतः प्रपञ्चः प्रविलापयितव्यः । ब्रह्मस्वभावो हि प्रपञ्चो न प्रपञ्चस्वभावं ब्रह्म । तेन नामरूपप्रपञ्चप्रविलापनेन ब्रह्मतत्त्वावबोधो भवतीति । अत्र वयं पृच्छामः—कोऽयं प्रपञ्चविलयो नाम ? किमग्निप्रतापसम्पर्कात् घृतकाठिन्यप्रविलय इव प्रपञ्चविलयः कर्त्तव्यः, आहोस्विदेकस्मिन् चन्द्रे तिमिरकृतानेकचन्द्रप्रपञ्चवदविद्याकृतो ब्रह्मणि नामरूपप्रपञ्चो विद्यया प्रविलापयितव्य इति । तत्र यदि तावद्विद्यमानोऽयं प्रपञ्चो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य इत्युच्येत स पुरुषमात्रेणाशक्यः प्रविलापयितुमिति तत्प्रलयोपदेशोऽशक्यविषय एव स्यात् । एकेन चादिमुक्तेन पृथिव्यादिप्रविलयः कृतः इदानीं पृथिव्यादिशून्यं जगदभविष्यत् । अथाविद्याध्यस्तो ब्रह्मण्येकस्मिन्नयं प्रपञ्चो विद्यया प्रविलाप्यत इति ब्रूयात्, ततो ब्रह्मैवाविद्याध्यस्तप्रपञ्चप्रत्याख्यानेनावेदयितव्यम् 'एकमेवाद्वितीयं ब्रह्म', 'तत् सत्यं स आत्मा तत्त्वमसि' इति । तस्मिन्नावेदिते विद्या स्वयमेवोत्पद्यते तया चाविद्या बाध्यते, ततश्च-

विद्याध्वस्तः सकलोऽयं नामरूपप्रपञ्चः स्वप्नप्रपञ्चवत् प्रविलीयते" (वे, सू, ३अ, २पा, २१सू, भा) इति। "प्रलीयमानमपि चेदं जगत् शक्त्यवशेषमेव प्रविलीयते, शक्तिमूलमेव च प्रभवति" (वे, सू, १अ, ३पा, ३०सू, भा) इत्युक्तरीत्या योगानुकूल्याय सर्व्वशक्तिब्रह्मधारणायोग्यशक्त्यवशेषप्रपञ्चविलयो न जातु तत्त्यागानुमोद्यो भवेदिति निर्व्विवादस्तेन सर्व्वेषां वादिनाम्। न खलु वक्तव्यं ब्रह्म सर्व्वशक्तीति न तेन मन्यत इति, तथा सति महता प्रयासेन तस्य जगत्कर्त्तृत्वं न तेन निर्णीयेत; "एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपञ्चः" (वे, सू, २अ, १पा, ३०सू, भा) इति; "सर्व्वज्ञं सर्व्वशक्ति महामायञ्च तद्ब्रह्म" (वे, सू, २अ, १पा, ३७सू, भा) इति च न स्वीक्रियेत। सिद्धान्ते तु—"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥" (७।४) इत्याचार्य्योक्तिः सत्या, न च तद्वाक्यैः सा बाधयोग्या।

ब्रह्मणा जीवस्य स्वरूपसाम्यमिति स्वीकृते न तिष्ठति विवादकारणं वादिभिरन्यैस्तस्य। "सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवेश्वरविपरीतधर्म्मत्वम्। किं पुनर्जीवेश्वरसमानधर्म्मत्वं नास्त्येव? न नास्तीति। विद्यमानमपि तु तत् तिरोहितम् अविद्याद्यवधानात्। तत् पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतस्येव दृक्शक्तिरौषधवीर्य्यादीश्वरप्रसादात् संसिद्धस्य कस्यचिदाविर्भवति न स्वभावत एव सर्व्वेषां जन्तूनाम्" (वे, सू, ३अ, २पा, ५सू, भा,) इत्युक्तिस्तस्य ब्रह्मणा जीवस्य स्वरूपसाम्यमेव दर्शयति। "सत्यं नेश्वरादन्यः संसारी, तथापि देहादिसङ्घातोपाधिसम्बन्ध इष्यत एव घटकरकगिरिगुहाद्युपाधिसम्बन्ध इव व्योम्नः, तत्कृतश्च शब्दप्रत्ययव्यवहारो लोकस्य दृष्टो 'घटच्छिद्र', 'करकच्छिद्रम्' इत्यादिराकाशाव्यतिरेकेऽपि तत्कृता च आकाशे घटाकाशादिभेदमिथ्याबुद्धिर्दृष्टा, तथेहापि देहादिसङ्घातोपाधिसम्बन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते चात्मन एव सतो देहादि-

सञ्जातेऽनात्मन्यात्मत्वाभिनिवेशो मिथ्याबुद्धिमात्रेण पूर्व्वपूर्व्वेण" (वे, सू, १अ, १पा, ४सू, भा) इत्यादि यत् तेनोक्तं न तत्स्वरूपसाम्यत्वविरोधि। ऐकात्म्यसाधनायैवमुक्तं तेन न पुनः स्वरूपसाम्यं विना सम्भवत्येकात्मता। ऐकात्म्यसाधनन्तु स एवमाह—"यथेतरे गुणाः सर्व्वात्मत्वप्रभृतय आध्यानायाम्नायन्ते तद्वत्। तथा हि विग्रिंषन्ति समाम्नातार उभयोच्चारणेन 'त्वमहमस्मि, अहञ्च त्वमसि' इति। तस्मोभयरूपायां मतौ कर्त्तव्यायामर्थवद्भवति; अन्यथा हीदं विशेषणोभयाम्नानमनर्थकं स्यात्, एकेनैव कृतत्वात्। ननूभयाम्नानस्यार्थविशेषे परिकल्प्यमाने देवतायाः संसार्य्यात्मत्वापत्तेर्निकर्षः प्रसज्येतेत्युक्तम्। नैष दोषः। ऐकात्म्यस्यैवानेन प्रकारेणानुचिन्त्यमानत्वात्। नन्वेवं सति स एवैकत्वदृढ़ीकार आपद्येत। न वयमेकत्वदृढ़ीकारं वारयामः किन्तर्हि व्यतिहारेणेव द्विरूपा मतिः कर्त्तव्या वचनप्रामाण्यात् नैकरूपेत्येतावदुपपादयामः फलतस्त्वेकत्वमपि दृढ़ीभवति; यथा ध्यानार्थेऽपि सत्यकामत्वादिगुणोपदेशे तद्गुणक ईश्वरः प्रसिद्ध्यति तद्वत्।" (वे, सू, ३अ, ३पा, ३७सू, भा) इति। मुक्तौ जीवो भिन्नाकारं परिहाय ब्रह्मणो नित्यस्वरूपेऽवतिष्ठते—'मुक्तिर्ब्रह्मणो नित्यस्वरूपावस्थानलक्षणा' इति वाचस्पतिः। अतएव हि स आह—"मुक्त्यवस्था हि सर्व्ववेदान्तेष्वेकरूपैवावधार्य्यते। ब्रह्मैव हि मुक्त्यवस्था" (वे, सू, ३अ, ४पा, ५२सू, भा) इति। स्वरूपैक्यवशादेकत्वानुभवः सम्यगेव। दृश्यते चात्र श्रीमच्छङ्करस्य महान् निर्व्बन्धः स्वरूपैक्येऽणुमात्रमपि भेदमसहमानस्य 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति' इति न्यायेन। अनेन कारणेन "मम साधर्म्यमागताः" (१४।२) इत्यस्य व्याख्याने "मम परमेश्वरस्य साधर्म्यं मत्स्वरूपतामागताः प्राप्ता इत्यर्थो न तु समानधर्म्मतां साधर्म्यं क्षेत्रज्ञेश्वरयोर्भेदानभ्युपगमात् गीताशास्त्रे" इति निरधारि तेन। एवमैकात्म्यसाधनपक्षपातेन यत् सत्यं प्रच्छादितं तेन, अन्येषामाचार्य्याणां वचनतस्तत्सोज्ज्वलं प्रतिभातीति दर्शयामः। श्रीमद्रामानुज आह—"परस्माद्ब्रह्मणः स्वात्मानमविभागेनानुभवति मुक्तः। कुतः

—'दृष्टत्वात्'—'परं ब्रह्मोपसम्पद्य निवृत्ताविद्यातिरोधानस्य याथात-
थ्येन स्वात्मनो दृष्टत्वात् । स्वात्मनः स्वरूपं हि 'तत्त्वमसि', 'अयमात्मा
ब्रह्म,' 'ऐतदात्म्यमिदं सर्व्वं', 'सर्व्वं खल्विदं ब्रह्म' इत्यादिसामाना-
धिकरण्यनिर्द्देशैः । 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद,
यस्यात्मा शरीरं, य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः,'
'अन्तःप्रविष्टः शास्ता जनानां सर्व्वात्मा' इत्यादिभिश्च परमात्मात्मक'
तच्छरीरतया तत्प्रकारभूतमिति प्रतिपादितम् । 'अवस्थितेरिति काश-
कृत्स्नः' इत्यत्र, अतोऽविभागेनाहं ब्रह्मास्मीत्यनुभवति । साम्यसाध-
र्म्यव्यपदेशो ब्रह्मप्रकारभूतस्यैव प्रत्यगात्मनः स्वरूपं तत्समिति देवा-
दिप्राकृतरूपप्रहाणेन ब्रह्मसमानशुद्धिं प्रतिपादयति, सहश्रुतिस्त्वेवं-
भूतस्य प्रत्यगात्मनः प्रकारिणा ब्रह्मणा सह तद्गुणानुभवं प्रतिपादय-
तीति न कश्चिद्विरोधः । ब्रह्मप्रकारतया तदविभागोक्तेर्हि 'सङ्कल्पा-
देव तच्छ्रुतेः' इत्यादि न विरुध्यते 'अधिकन्तु भेदनिर्द्देशादधिकोपदेशात्'
इत्यादि च ।" (वे, सू, ४अ, ४पा, ४सू, भा) इति । श्रीमद्भाष्यस्तु
मुक्तानां स्वरूपसाम्यमनुक्त्वा भोगसाम्यमुक्तम्, तथा—"ये भोगाः
परमात्मना भुज्यन्ते, त एव मुक्तैर्भुज्यन्ते ;—'यानेवाहं शृणोमि यान्
पश्यामि यान् जिघ्रामि तानेवैते इदं शरीरं विसृज्यानुभवन्ति' इति
दृष्टत्वाच्चतुर्द्दशशिखायाम् ।" (वे, सू, ४अ, ४पा, ४सू, भा) इति ।
न हि स्वरूपसाम्यं विना भोगसाम्यं सम्भवतीति भोगसाम्येन स्वरूप-
साम्यमेवोक्तं भवति । यच्च तेनोद्धृते भविष्यत्पुराणवचने दृश्यते—"मुक्ताः
प्राप्य परं विष्णुं तद्भोगान् लेशतः क्वचित् । बहिष्टान् भुञ्जते नित्यं
नानन्दादीन् कथञ्चन ॥" यच्च टीकाकृतोक्तम् "अतो मुक्तानां भगव-
दनुज्ञभोगभोक्तृताद्युक्तं तस्य सर्व्वभोक्तृत्वम्" इति तदपि न स्वरूपसा-
म्यविरोधि, स्वरूपभूतस्य विन्दोरपि समानत्वमस्ति पूर्णस्वरूपेण । अत-
एवाह श्रुतिः—"पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य
पूर्णमादाय पूर्णमेवावशिष्यते ॥" (बृ, आ, ७।१।१) इति । श्रीमता
वल्लभेन स्पष्टमुक्तम्—"भोगे सर्व्वस्यापि भगवतापि तुल्यत्वात्" (वे, सू,

१अ, १पा, १०सू, भा) इति। तथाचोक्तं श्रीविज्ञानभिक्षुणा श्रीमता प्रदर्शितम्—"तस्मात् मयाच गाढ़ाविद्ध इति गाढ़ं विद्ध इति [illegible] इति 'अन्योऽहम्' इति, 'भिन्नोऽहम्' इति" (ब्र, सू, १अ, ३पा, ४३सू, भा); "न च द्वष्टान्तेन स्वरूपाभेदः सिद्धः, जीवे जीवान्तरस्येवेश्वराभाव-व्यवहारेऽपि अन्तर्यामित्व सत्त्वात्, इतरथा दृष्टान्तानुपपत्तिः" (ब्र, सू, ४अ, ४पा, ४सू, भा) इति। प्रतीयमानमपि जगद्यथा ब्रह्मव्यतिरिक्तमेव प्रतीयते तथा स्वरूपसाम्येऽपि जीवतत्त्वं जीवग्रहव्यतिरिक्तमेवान्तर्विहरति परब्रह्मणः। अतएवाहाचार्यः—"......इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूताम्" (७।५) इति। अभ्युपगतञ्च श्रीमता शङ्करेण—"नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम्, प्रकृति-द्वयवत्त्वमेव हि ईश्वरस्येश्वरत्वं याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थि-तिप्रलयहेतुः" इति।

एवं वादमात्रपर्य्यवसितप्रकृतिजीवतत्त्वविषयकमतविरोधपरिहारः सुघट एवेति प्रतिपाद्याधुना ब्रह्मतत्त्वविषयकं वादिनां मतद्वैधं विचा-र्य्यते। जगत्स्रष्टृत्वादिकं ब्रह्मणो न पारमार्थिकमिति मतं प्रच्छन्न-बौद्धवादत्वेन बहुभिरनादृतम्; दृश्यते तत् श्रीमच्छङ्करभाष्ये सुस्पष्ट-मेव। यथा—"अविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति, व्योमेव घटकरकाद्युपाध्यनुरोधि। स स्वात्मभूतानेव घटाकाशस्थानीयानवि-द्याप्रत्युपस्थापितनामरूपकृतकार्य्यकारणसङ्घातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहारविषये। तदेवमविद्यात्मकोपाधिपरि-च्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्व्वज्ञत्वं सर्व्वशक्तित्वञ्च न परमार्थतो विद्य-याऽपास्तसर्व्वोपाधिस्वरूपे आत्मनीशित्रीशितव्यसर्व्वज्ञत्वादिव्यवहार उप-पद्यते। तथा चोक्तम्—'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्य-द्विजानाति स भूमा' इति, 'यत्र त्वस्य सर्व्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादि च। एवं परमार्थावस्थायां सर्व्वव्यवहाराभावं वदन्ति वेदान्ताः, तथेश्वरगीतास्वपि—"न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः। न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्त्तते॥ नादत्ते कस्यचित्पापं

न चैव सुकृतं विभुः। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥" इति परमार्थावस्थायाम् ईशित्रीशितव्यादिव्यवहाराभावः प्रदर्श्यते, व्यवहारावस्थायां तूक्तः श्रुतावपीश्वरादिव्यवहारः। 'एष सर्व्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय' इति।" (वे, सू, २अ, १पा, १४सू, भा) इति। प्रबोधोदये न केवलं जीवस्य जीवत्वं विलुप्यते, ब्रह्मणः स्रष्टृत्वमपि—तद्यथा—"यदा 'तत्त्वमसि' इत्येवं जातीयकेनाभेदनिर्द्देशेनाभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वम्; समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात्।" (वे, सू, २अ, १पा, २२सू, भा) इति। उक्तिरेषा वाङ्मात्रेण पर्य्यवसन्ना, यतः स ब्रह्म ज्ञानस्वरूपत्वेनाप्यवोचत् प्रागुत्पत्तेस्तज्ज्ञानविषयं निखिलं जगदासीदिति च स्वीकृतवान्, तद्यथा—"यत्पुनरुक्तं ब्रह्मणोऽपि न मुख्यं सर्व्वज्ञत्वमुपपद्यते नित्यज्ञानक्रियत्वेन ज्ञानक्रियां प्रति स्वातन्त्र्यासम्भवादिति, अत्रोच्यते,—इदं तावद्भवान् प्रष्टव्यः, कथं नित्यज्ञानक्रियत्वेन सर्व्वज्ञत्वहानिरिति। यस्य हि सर्व्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सोऽसर्व्वज्ञ इति विप्रतिषिद्धम्। अनित्यत्वे हि ज्ञानस्य कदाचिज्जानाति कदाचिन्न जानातीत्यसर्व्वज्ञत्वमपि स्यात्। नासौ ज्ञाननित्यत्वे दोषोऽस्ति। ज्ञाननित्यत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यव्यपदेशो नोपपद्यत इति चेत्, न, प्रततौष्ण्यप्रकाशेऽपि सवितरि दहति प्रकाशयतीति स्वातन्त्र्यव्यपदेशदर्शनात्। ननु सवितुर्दाह्यप्रकाश्यसंयोगे सति दहति प्रकाशयतीति व्यपदेशः स्यात्, न तु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्म्मसंयोगोऽस्तीति विषमो दृष्टान्तः, न, असत्यपि कर्म्मणि सविता प्रकाशत इति कर्त्तृत्वव्यपदेशदर्शनात्। एवमसत्यपि ज्ञानकर्म्मणि ब्रह्मणस्तदैक्षतेति कर्त्तृत्वव्यपदेशोपपत्तेर्न वैषम्यम्। कर्म्मापेक्षायान्तु ब्रह्मणि ईक्षितृत्वश्रुतयः सुतरामुपपन्नाः। किं पुनस्तत् कर्म्म यत् प्रागुत्पत्तेरीश्वरज्ञानस्य विषयो भवतीति। तत्त्वान्यत्वाभ्यामनिर्व्वचनीये नामरूपे अव्याकृते व्याचिकीर्षिते इति ब्रूमः। यत्प्रसा-

दापि योगिनामप्यतीतानागतविषयं प्रत्यक्षज्ञानमिच्छन्ति योगशास्त्रविदः, किमु वक्तव्यं तस्य नित्यसिद्धेश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यं ज्ञानं भवतीति। यदप्युक्तं प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसम्बन्धमन्तरेण ईक्षितृत्वमनुपपन्नमिति, न तच्चोद्यमवतरति। सवितृप्रकाशवत् ब्रह्मणो ज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपि च, अविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात्, न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य।" (वे, सू, १अ, १पा, ५सू, भा) इति। यद्येवं कथमिदं पारमार्थिकम् इदं व्यावहारिकमिति भेदेन तत्त्वनिर्णये प्रयत्नः? निरवयवस्य ब्रह्मणः सावयवत्वदोषपरिहाराय, तद्यथा "ननु शब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुं निरवयवञ्च ब्रह्म परिणमते न च कृत्स्नमिति। यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत, कृत्स्नमेव वा परिणमेत। अथ केनचित् रूपेण परिणमेत केनचित् रूपेणावतिष्ठेतेति रूपभेदकल्पनात् सावयवमेव प्रसज्येत। क्रियाविषये हि 'अतिरात्रे षोड़शिनं गृह्णाति, नातिरात्रे षोड़शिनं गृह्णाति' इत्येवञ्जातीयकायां विरोधप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति पुरुषतन्त्रत्वादनुष्ठानस्य। इह तु विकल्पाश्रयणेनापि न विरोधपरिहारः सम्भवति अपुरुषतन्त्रत्वात् वस्तुनः। तस्माद्दुर्घटमेतदिति। नैष दोषः,—अविद्याकल्पितरूपभेदाभ्युपगमात्। न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु सम्पद्यते। न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति। अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते, पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते।" (वे, सू, २अ, १पा, २७सू, भा) इति। नैतावताभिप्रायसिद्धिः, यतो ब्रह्मणः कारणत्वमवश्यमभ्युपगन्तव्यम्, कार्य्यस्य च प्रत्यक्षस्य स्थितिर्न जात्वस्वीकर्त्तुं शक्या। विवर्त्तो वा परिणामो वा परिकल्पितो न पुनः स्फुटरहस्यं निःसंशयं विवृणोति। रहस्यस्य रहस्य-

त्वापनयनं मनुष्यबुद्ध्या न कदापि सम्भवति। स्वीकृतमेतत् तेन स्वयं स्फुटतरवाक्येन ;—"विकारणां परां देवतां शास्ति शास्त्रम् 'अचक्षुष्कमश्रोत्रमवागमनाः' इत्येवं जातीयकम्। कथं सा सर्व्वशक्तियुक्तापि सती कार्य्याय प्रभवेत्, देवादयो हि चेतनाः सर्व्वशक्तियुक्ता अपि सन्त आध्यात्मिककार्य्यकरणसम्पन्ना एव तस्मै तस्मै कार्य्याय प्रभवन्तो विज्ञायन्ते ; कथञ्च 'नेति' 'नेति' इति प्रतिषिद्ध सर्व्वविशेषाया देवतायाः सर्व्वशक्तियोगः सम्भवेदिति चेत्, यदत्र वक्तव्यं तत् पुरस्तादेवोक्तम्। श्रुत्यवगाह्यमेवेदमतिगम्भीरं परं ब्रह्म न तर्कावगाह्यम्। न च यथैकस्य सामर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्येन भवितव्यमिति नियमोऽस्तीति प्रतिषिद्धसर्व्वविशेषस्यापि ब्रह्मणः सर्व्वशक्तियोगः सम्भवति।" (वे, सू, २अ, १पा, ३१सू, भा) इति। अपिच ब्रह्मणः कारणत्वे स्वीकृते सर्व्वज्ञसर्व्वशक्तित्वादिकं तस्मिन्नवश्यमभ्युपगन्तव्यमित्यस्मिन् न तस्यासम्मतिः, तद्यथा—"यस्मादस्मिन् ब्रह्मणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्व्वे कारणधर्म्मा उपपद्यन्ते सर्व्वज्ञं सर्व्वशक्ति महामायञ्च तद्ब्रह्म तस्मादनतिशङ्कनीयमिदमौपनिषदं दर्शनमिति।" (वे, सू, २अ, १पा, ३७सू, भा) इति। न पुनः सर्व्वज्ञत्वादिस्वीकारात् कार्य्यसम्बन्धाद्वा तस्मिन् कथञ्चन दोषस्पर्शः, यतः "परमात्मनः स्वरूपव्यपाश्रयमौदासीन्यं मायाव्यपाश्रयञ्च प्रवर्त्तकत्वम्" (वे, सू, २अ, २पा, ७सू, भा) इति। कार्य्यसम्बन्धेऽपि प्रवर्त्तकत्वेऽपि न तस्य स्वरूपाविच्युतिः—"यथा जीवः संसारदुःखमनुभवति नैवं पर ईश्वरोऽनुभवतीति प्रतिजानीमहे। जीवो ह्यविद्यावेशवशाद्देहाद्यात्मभावमिव गत्वा तत्कृतेन दुःखेन दुःख्यहमित्यविद्याकृतं दुःखोपभोगमभिमन्यते, नैवं परमेश्वरस्य देहाद्यात्मभावो दुःखाभिमानो वास्ति।.........लौकिकस्यापि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं, किमुत विषयशून्यादात्मनोऽन्यद्वस्त्वन्तरमपश्यतो नित्यचैतन्यमात्रस्वरूपस्येति। तस्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसङ्गः। प्रकाशादिवदिति निदर्शनोपन्यासः। यथा प्रकाशः सौर्य्यश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसम्बन्धात् तेष्वृजु-

ज्ञादिभावं प्रतिपद्यमानेषु तत्तद्भावमिव प्रतिपद्यमानोऽपि न परमार्थत-स्तत्तद्भावं प्रतिपद्यते, यथा आकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोऽपि न परमार्थतो गच्छति, यथा चोदशरावादिकम्पनात् तद्गते सूर्य्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान् सूर्य्यः कम्पते, एवमविद्या-प्रत्युपस्थापिते बुद्ध्याद्युपाध्युपहिते जीवाख्येंऽशे दुःखायमानेऽपि न तद्वा-नीश्वरो दुःखायते" (वे, सू, २अ, ३पा, ४६सू, भा) इति। एवमपि ब्रह्मणोर्भेदः परापरत्वादिति तस्याभिप्रायः ;—"यत्राविद्याकृतनाम-रूपादिविशेषप्रतिषेधेनास्थूलादिशब्दैर्ब्रह्म व्यपदिश्यते तत् परम्। तदेव यत्र नामरूपादिविशेषेण केनचिद्विशिष्टमुपासनायोपदिश्यते 'मनोमयः प्राणशरीरो भारूपः' इत्यादिशब्दैस्तदपरम्।" (वे, सू, ४अ, ३पा, १४सू, भा) इति। अर्थं वास्य विरोधीऽर्थैर्भाष्यकृद्भिः, ते पुनरपरमेव परत्वेनाद्रद्रन् स्वरूपाभिव्यक्तेराधिक्यात्। यदि स्वरूपादन्यत् किञ्चित्ते ब्रह्मणि स्वीकुर्य्वन्ति, तदा विफलैव वितण्डा। न कुर्वंश्चिच्छ्रीमच्छङ्करः, 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै, उ, २।१), 'आनन्दो ब्रह्म' (तै, उ, ३।६) इति ब्रह्मस्वरूपमस्वीकृत्य किमपि स्वरूपशून्यमवस्तु ब्रह्मत्वेनाद्रक्षत्। तद्विरुद्धभाषिभिरपि न जातु स्वरूपातिरिक्तं किमपि कल्पितं वस्तु ब्रह्मेत्यनादिषुः। यथा हि श्रीमद्रामानुजः—" 'अशब्दमस्पर्शम्' इत्यादि श्रुतिषु भूतभौतिकवैलक्षण्यं ब्रह्मणः प्रतिपादयन्ति," "दिव्यकल्याण-गुणयोगेन सगुणत्वम, प्राकृतहेयगुणरहितत्वेन निर्गुणत्वम्" (वे, त, सा) इति। श्रीमन्माध्वः—"विष्णोस्तु श्रुत्यैव सर्व्वे विरोधाः परिहृताः— 'यदात्मको भगवान् तदात्मको व्यक्तिः। किमात्मको भगवान् ज्ञाना-त्मक ऐश्वर्य्यात्मकः शक्त्यात्मक इति।' " (वे, सू, २अ, २पा, ४१सू, भा) इति। टीका च—"यदात्मक इत्यादिकया तु तद्वचस्य ज्ञाना-द्यात्मकभगवत्स्वरूपाभिधात्या अल्पत्वादिदोषाः परिहृताः" इति। श्रीमद्वल्लभोऽपि—"आह च श्रुतिः स्वयं तथात्वं प्रज्ञानघनमात्रं······ स्वरूपातिरिक्तानामिन्द्रियाणामभावात्" (वे, सू, ३अ, २पा, १६सू, भा) इति। तथाच श्रीमद्बलदेवो गोविन्दभाष्ये—" 'सदेवेदमात्मा,'

'नेह नानास्ति किञ्चन,' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति,' 'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति । एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति ॥' इति काठश्रुतौ, 'निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः । आनन्दमात्रकरपाद-मुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा ॥' इत्यादि स्मृतौ च । गुणगुणिभेदनिषेधात् स्वरूपाद्गुणा न भिद्यन्ते । अतएव ज्ञानादीनां धर्माणां भगवत्स्वरूपात्मता अस्तीति ।" (वे, सू, ३अ, २पा, ११सू, भा) इति । दृश्यमानं जगत् ब्रह्मस्वरूपमाहुर्णीनोऽपि तन्मिथ्यात्वप्रतिपादने यद्यप्यस्य यत्नः, तथापि स्वरूपप्रकाशनतात्पर्येण (वे, सू, १अ, १पा, ११सू, भा) जगति ब्रह्मदर्शनस्य नासौ जातु विरोधी । तथा सति तदनुगौ श्रीमद्भारतीतीर्थविद्यारण्यमुनीश्वरौ मैवमुपदिशतां ब्रह्मसाधनम्—"आकाशेऽप्येवमानन्दः सत्ताभाने तु सम्मते । वाय्वादिदेहपर्यन्तेष्वस्त्वेवं विभाव्यताम् ॥ गतिस्पर्शौ वायुरूपं वह्नेर्दाहप्रकाशने । जलस्य द्रवता भूमेः काठिन्यं चेति निर्णयः ॥ असाधारण आकारो ओषध्यन्नवपुष्वपि । एवं विभाव्य मनसा तत्तद्रूपं यथोचितम् ॥ अनेकधा विभिन्नेषु नामरूपेषु चैकधा । तिष्ठन्ति सच्चिदानन्दा विसंवादो न कस्यचित् ॥ निस्तत्त्वे नामरूपे द्वे जन्मनाशयुते च ते । बुद्ध्या ब्रह्मणि वीक्षस्व समुद्रे बुद्बुदादिवत् ॥ सच्चिदानन्दरूपेऽस्मिन् पूर्णे ब्रह्मणि वीक्षिते । स्वयमेवावजानाति नामरूपे शनैः शनैः ॥" (प, द, १२प, २७—२८श्लो) । "चेतनाचेतनेष्वेषु सच्चिदानन्दलक्षणम् । समानं ब्रह्म भिद्येते नामरूपे पृथक् पृथक् ॥ ब्रह्मण्येते नामरूपे पटे चित्रमिव स्थिते । उपेक्ष्य नामरूपे द्वे सच्चिदानन्दधीर्भवेत् ॥" (प, द, १२प, ४५।४६श्लो) इति । वस्तुतस्तु यत्तेनोक्तं 'ब्रह्मस्वभावो हि प्रपञ्चः न प्रपञ्चस्वभावं ब्रह्म' (वे, सू, ३अ, २पा, २१सू, भा) इति तदेव सम्यक् । न खलु प्रपञ्चस्वभावेन ब्रह्म निरूपयितव्यं किन्तर्हि ब्रह्मस्वभावेन प्रपञ्चः । किमनेनोक्तं भवति ? सत्तादिकं यत् किञ्च स्वरूपानुबन्धि प्रपञ्चे प्रतिभाति, तद्ब्रह्मगत एव, न पुनः स्थूलत्वादिकं

प्रपञ्चगतं तस्मिन् लयाद्गि। भक्तिसुलभोत्तमपुरुषत्वेन पर्यंत स्वस्वरूपावलोकनमेव यथोचितं श्रीमद्भगवतैव, तदु सिद्धान्ताचार्य्यप्रोक्तेन पद्येन—"परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्" (८।२०-२२) इति। अतएवात्र अक्षर इति परमपुरुष इति भेदं प्रश्नता श्रीमता वल्लभेन निरणायि—"सर्वाण्युपास्यानि कथापि तत्स्वरूपाण्येवेति तदुपासकानां परप्राप्तिरेवेति सिद्धम्, तदेव विविच्यते। ज्ञानमार्गीयाणां भक्तिमार्गीयाणाञ्चाविशेषेणैव फलं भवतीति प्राप्ते प्रत्याह—'विशेषञ्च श्रुतिर्दर्शयति'। तैत्तिरीये उच्यते—'ब्रह्मविदाप्नोति परम्' इति गूढाभिसन्धिना सामान्यत एतावदुक्त्वा गूढं तदुक्तं ज्ञानतिगोप्यत्वमस्मिन्नर्थेऽनुभवैकवेद्यत्वञ्च ज्ञापयन्नाह—'तदेषाभ्युक्ता—सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद निहितं गुहायां परमे व्योमन्, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति। तत् पूर्व्वोक्तं मतिमात्रेणाभि सुवोधत्व एवा तद् उक्ता तदनुभवकर्तृभिरिति शेषः। ब्रह्मवित् अक्षरब्रह्मवित् आप्नोति प्राप्यादक्षरमेवाप्नोति। एतावानर्थो 'यो वेद' त्यन्तया श्रुत्योक्तः। अथ परमाप्नोतीत्यस्यार्थं उच्यते निहितमित्यादिना। अतएव मध्ये क्रियापदमुभयसम्बन्धित्वज्ञापकत्वमुक्तम्। तत्प्राप्तिश्च मर्य्यादापुष्टिभेदेन द्वेधा। तत्रादौ मर्य्यादायामुच्यते। इहायमाशयो ज्ञेयः—'नायमात्मा प्रवचनेन' इति श्रुत्या भगवद्वरणातिरिक्तसाधननिरासः क्रियते पुरुषोत्तमप्राप्तौ। एवं सत्यक्षरब्रह्मज्ञानस्य तत्साधनत्व उच्यमाने तद्विरोधः स्यात् तेनैवमितदर्थो निरूप्यते। ज्ञानमार्गीयाणामक्षरज्ञानेन अक्षरप्राप्तिस्तेषां तदेकपर्य्यवसायित्वात्; भक्तानामेव पुरुषोत्तमपर्य्यवसायित्वात्। तदुक्तं भगवद्गीतासु 'एवं सततयुक्ता ये' प्रश्ने—'मय्यावेश्य मनो ये मां,' 'ये त्वक्षरमनिर्देश्यम्'; श्रीभागवते च—'भक्त्याहमेकया ग्राह्यः', 'तस्मान्मद्भक्ति-

पुरुष' इत्युपक्रम्य 'न प्राणं न च वैराग्यं प्रायः ये वो मनीषिण' इत्यादिना । तथा च ब्रह्मविद्भवेद्भगवान् इच्छति तदा सन्निकटेति । तद-नुरभावे सति स्वयं तद्बुद्धि प्रकटीभविष्णुः स्वस्थानमूलं स्वापि वैकुण्ठं तद्गुहायां हृदयाकाशे प्रकटीकरोति तत्परमव्योमशब्देनोच्यते । पञ्चौ-किकप्रयोगेण तथालौकिकत्वं ज्ञाप्यते । यथा स्वस्थापितं वस्तुवस्तं स्वदर्शनयोग्यं भवति, तथाच भगवानपीति ज्ञापनाय निहितमित्यु-क्तम् । तथा च परमाप्नोतीति विवृतिरूपत्वादस्य गुहायां परव्योम्नि निहितं यो वेद स 'नास्य प्राणा उत्क्रामन्तीहैव समवलीयन्ते ब्रह्मैव ब्रह्माप्येति' इति श्रुत्युक्तरीत्या परमाप्नोतीत्यर्थः सम्पद्यते । अथ शुद्ध-पुष्टिमार्गाङ्गीकृतस्य व्यवस्थामाह—'सोऽश्नुते' इत्यादिना । अयमत्राभि-सन्धिः । यथा स्वयं प्रकटीभूय लोके लीलां करोति तथात्मगुणव-शात् स्वान्तःस्थितमपि भक्तं प्रकटीकृत्य तस्मै हातिशयेन तद्यः सन् स्वलीलारसानुभवं कारयतीति स भक्तो ब्रह्मणा परब्रह्मणा पुरुषोत्तमेन सह सर्वान् कामानश्नुते' इति ।........एवं सति ज्ञानमार्गीयाणा-मक्षरप्राप्तिरेव, भक्तानामेव पुरुषोत्तमप्राप्तिरिति सिद्धम् ।" (वे, सू, ४अ, ३पा, १७सू, भा) इति । अक्षरः पुनर्धामत्वेन तेन निरूपितः, तद्यथा — "सच्चिदानन्दत्वदेशकालापरिच्छेदस्वयम्प्रकाशत्वगुणातीतत्वा-दिधर्मवत्त्वेनैव ज्ञानिनामक्षरविज्ञानं, भक्तानामेव पुरुषोत्तमाधिष्ठान-त्वेन तथेति ज्ञेयम् ।" (वे, सू, १अ, १पा, १४सू, भा) इति । मत-विरोधोऽयं मूले दृष्टेरभावात् । सर्वातीतं सर्वान्तर्भावकं सर्वगतं ब्रह्मोपदिश्यते गीतायाम् । तत्प्रथममक्षरत्वेन सर्वातीतं, तदनन्तरं परमपुरुषत्वेन सर्वान्तर्भावकं सर्वगतं ब्रह्मोपास्यत्वेनोपस्थाप्यते । कथमेवं भिन्नपर्यायवत्त्वम् तत्कारणमुक्तमस्माभिः—"प्रथमन्तावत् सत्तामात्रधारणं विना परमात्मनो विशेषज्ञानं न सम्भवत्यत आचार्यः 'तस्मात्तु भावोऽन्योऽव्यक्तः' (८।२०) इति सत्तामात्रमुप-दिष्टवान्, तदनन्तरं 'यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्' (८।२२) इति परमपुरुषं ध्येयत्वेनाख्यापयत्" (२५०पृ,)

इति। अयं परमपुरुषः पित्रादिसम्बन्धैरुपास्य इति गीतासम्मतः पन्थाः।

तदेवं वादिनां विवादकारणं वाङ्मात्रेण पर्य्यवसन्नमिति सद्भिर्विभाव्यम्। प्रकृतिर्जीवो ब्रह्मेति तत्त्वत्रयस्यैकमपि परित्यक्तुं न केनापि शक्यम्। कारणब्रह्मणः शक्तिः प्रकृतिः तां विना न तस्य जातु कारणत्वं सिध्यति। कारणत्वमेव भ्रान्तिश्चेत्, भ्रान्तत्वमेव वस्तुत्वेन प्रतिपन्नं भवति, को वा तस्य वचने श्रद्दध्यात्। नैष दोषः श्रीमति शङ्करे कदाप्यारोप्यः, यतः स स्पष्टमाह—"शक्तिश्च कारणस्य कार्य्यनियमार्था कल्प्यमाना नान्या नाप्यसती कार्य्यं नियच्छेत्, असत्त्वाविशेषादन्यत्वाविशेषाच्च। तस्मात् कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्य्यम्।" (वे, सू, २अ, १पा, १८सू, भा) इति। "शक्तिः शक्तात् पृथङ्नास्ति तद्वदृष्टेर्न चाभिदा। प्रतिबन्धस्य दृष्टत्वाच्छक्त्यभावे तु कस्य सः॥" (प, द, १३प, ६श्लो) इत्यत्र प्रतिपत्तव्यं कारणस्य ब्रह्मणः कर्त्तृत्वप्रसारणात्तदप्रसारणाच्च न प्रतिबन्धो वा शक्त्यभावो वा; उभयतः शक्तेरेव प्रवृत्तौ क्रिया कारणेनानन्यायाः, अतएव न जातु सा स्वरूपातिरिक्ता ब्रह्मणोति। जीवः स्वयमात्मनोऽल्पज्ञत्वमल्पशक्तित्वं सर्व्वदैवानुभवति। विना विचित्ततां न स जात्वात्मनि सर्व्वशक्तिमत्त्वं सर्व्वज्ञत्वं विभावयितुमुत्सहेत। "सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवेश्वरविपरीतधर्म्मत्वम्" इत्यादि वदता श्रीमता शङ्करेण नोपेक्षितमिदं तत्त्वमिति मन्तव्यम्, मुक्तौ स्वरूपैक्ये न कस्याप्यसम्मतिः। अपिच जीवार्थमेव सृष्टिः, अन्यथा पूर्णस्य परब्रह्मणो नास्ति तत्र किमप्यात्मप्रयोजनम्। जीवचैतन्यं विना तदैश्वर्य्यं सम्भोक्तुं ज्ञानविषयं वा कर्त्तुं को वापरोऽस्ति। अतएव हि आचार्य्यः प्रकृतिं जीवञ्च ब्रह्मप्रकृतित्वेनाग्रहीत्। श्रीमच्छङ्करस्यान्याप्यवादिनाञ्चासाक्षात्सम्बन्धेन साक्षात्सम्बन्धेन वात्र सम्मतिरस्ति, प्रतिपादितं तत्पुरस्तात्।

भिन्नाभिन्नवादिभिः स्वस्वप्रतिपत्त्यनुसारतः ज्ञानं वा भक्तिर्वा कर्म्मज्ञानसमुच्चयो वा उपायत्वेन स्वीक्रियते। प्रदर्शितमस्माभिस्तेषां युगप-

देवाच समवस्थानं सम्यक् समन्वितावस्थानां भगवदपरोक्षज्ञानेन च पर-मनैष्कर्म्यं परज्ञानलं परभक्तित्वच। एतत्प्रतिपादनाय न वयं बहुल-प्रयासं स्वीकृतवन्तः, स्वत एवैवं संस्कारादूषितहृदये प्रतिभाति। गीतोक्तसाधनसोपानपरम्परा चास्माभिरेवमुपनिबद्धा ;—"शास्त्रेऽस्मिन् सोपानपरम्परया साधकानामुच्चभूमावारोहणं निबद्धम्। तत्र प्रथमं देहात्मनोर्विवेकेन प्रस्थारम्भः। न ह्यात्मज्ञानं विना साधकत्वमेव सम्भवति। कोऽहमित्यजानतो विषयेन्द्रियसर्वस्वता नामापरिहार्य्या। यदा स दुःखार्त्तो न विषयेषु रमते, तदात्मानुसन्धाने प्रवृत्तिरुदेति। आत्मा देहातिरिक्तो देहविनाशे न तस्य विनाशः ; स तु स्वयमविकारी, विकारस्तु देहधर्म्म इति विचारः साधनस्य प्रथमसोपानम्। देहस्य प्रकृतिजत्वात् प्रकृत्या नित्यसम्बन्धत्वात् आत्मनः प्रकृतेरतीतत्वात् प्रकृतिसम्भूतविषयेन्द्रियक्रियातः स्वस्य स्वातन्त्र्यं पश्यतो दर्शनादिव्यापा-रेषु तस्य निर्लिप्तभावेन स्थितिः साधनस्य द्वितीयसोपानम्। क्रियमा-णानि कर्म्माणि प्रकृतिजैरिन्द्रियैर्नतु स्वयमात्मनेति सङ्गफलत्यागेन कर्म्म-ण्यकर्म्मदर्शनं निर्लिप्तभावेन स्थितेर्दार्ढ्यायास्मिन् सोपान एव विहितम्। प्रकृतेरात्मनः स्वातन्त्र्यं जानतोऽपि विषयेन्द्रियव्यापारात् सर्व्वथा निर्लिप्त-साधनं न जातु सुकरम्, केवलेन पुरुषकारेण तत्साधनोद्यतानामनेकेषां भूयो भूयः पतनदर्शनात्। अतएव तृतीयसोपाने प्रकृतेरात्मनश्च नियन्तारं सर्व्वान्तर्यामिणं परमपुरुषं ज्ञातुं प्रयतते साधकः। यदा हि तमात्मनः प्रियत्वेन स जानाति, तदा तस्मिन् सर्व्वकर्म्माणि समर्प्य तदाराधनानुरक्तो भवति साधकश्चतुर्थसोपानारूढ़ः। अस्य सोपानस्य परिपाकावस्थायां तदेकशरणत्वमुपतिष्ठते अपरोक्षदृष्टेः स्थिरत्वच" इति। इदमेव हि चरमसोपानमत्र।

न खलु ब्रह्मोपासनं विना साधनसिद्धिश्चरमसोपानारोहणं वा सम्भवति। तच्चासम्भवमिति प्रतिपादयिता श्रीमता शङ्करेणात्र महान् विरोधः सम्भाव्यते। "न हि ब्रह्मैकत्वविज्ञानेनोन्मथितद्वैतविज्ञानस्य पुनः सम्भवोऽस्ति येनोपासनाविधिशेषत्वेन ब्रह्म प्रतिपद्येत" (वे, सू,

१अ, १पा, ४सू, भा) ; "द्विरूपं हि ब्रह्मावगम्यते, नामरूपविकार-भेदोपाधिविशिष्टं तद्विपरीतञ्च सर्व्वोपाधिवर्ज्जितम् ।……तत्राविद्या-वस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्व्वो व्यवहारः ।……एव-मेकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधिसम्बन्धञ्च उपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यते ।" (वे, सू, १अ, १पा, ११सू, भा) इत्युपाधिसम्बन्धादुपास्यत्वं निरस्तोपाधिसम्बन्धात् ज्ञेयत्वमिति निर्ण-यात् न जातूपाधिसम्बन्धविरहितं ब्रह्मोपासनविषयमित्यायाति । यदि न तस्य सिद्धान्तान्तरेणेदं विरोधि मतमन्यथाभावमापद्येत, सत्यानु-रतस्य तस्य तत्प्रत्युपेक्षास्माकं हृदयं निरतिशयं खेदयेत । "त्रिविध-मिह ब्रह्मण उपासनं विवक्षितम्—प्राणधर्म्मेण, प्रज्ञाधर्म्मेण, स्वधर्म्मेण च ।…तस्मादुभय एव एतदुपाधिद्वयधर्म्मेण स्वधर्म्मेण च एकमुपासनं त्रिविधं विवक्षितम्" (वे, सू, १अ, १पा, ३१सू, भा) इत्यत्र स्वधर्म्मेण ब्रह्मोपासनं वेदान्तसम्मतमिति स्वीकारात् स्वरूपापेक्षुपासनं तस्य मतविरोधीति न वयं वक्तुमुत्सहामहे । "'सत्यं ज्ञानमनन्तं ब्रह्म', 'आनन्दो ब्रह्म' इत्यादिषु स्वरूपानुसन्धानम्" (वे, सू, १अ, १पा, ३१सू, भा) इति श्रीमद्रामानुजः, "अन्तर्बहिः सर्व्वगतत्वेनैत्युपासात्रैविध्यात्" (वे, सू, १अ, १पा, ३१सू, भा) इति श्रीमन्माध्वः, "अतः क्रियाज्ञान-विषयरूपो भगवानेवेति प्रतिपाद्य न तावन्मात्रं ततोऽप्यधिक इत्येको-पासनैव विहिता" (वे, सू, १अ, १पा, ३१सू, भा) इति श्रीमद्वल्लभः । सिद्धान्त्येव स्वरूपानुसन्धानोपासनमिति वादिनां मतैकस्थलम्, आचा-र्य्यस्य तस्मिन्नेव सम्मतिरिति तदेव द्वादशाध्याये विस्तरेणादर्श्यस्माभिः । निर्विशेषसविशेषवादैक्यमेवमस्माभिस्तत्राभ्यधायि—"साधने प्रवृत्तस्य प्रथमं सत्तामात्रधारणं निर्विशेषवादस्य, सत्तायां चित्स्वरूपस्य चित्-स्वरूपस्य च शिवस्वरूपत्वेन शुद्धस्वरूपत्वेन सुखस्वरूपत्वेन दर्शनं सवि-शेषवादस्य च मूलम् । ब्रह्मापि सदेकरूपत्वमेव ; साधकमतदृष्टिभेदात् यद्यपि भिन्नत्वेन प्रतिभाति तदेकमेव स्वरूपं, तथापि परब्रह्मणि नास्ति निर्व्विशेषसविशेषवादयोरवकाशः । निर्व्विशेषसविशेषवादिभिर्यदा

सच्चिदानन्दघनं ब्रह्मेति चोक्तं, तदा निष्फल एव निर्व्विशेषसविशेष-
विचार: ।" इति । स्वरूपाणामेकत्वञ्चैवं निरणायि—"न तु पुन-
र्ज्ञानमिदमन्तविशिष्टं भवितुमर्हति, तथा सति ज्ञानस्याज्ञानविमिश्र-
त्वमेवायाति । सच्च ज्ञानञ्च न भिन्ने, सदित्युक्ते ज्ञानस्यैव सत्त्वं नान्यस्य,
यत: सतो जगदुत्पत्तौ नान्यत्वं सर्व्वत्र ज्ञानक्रियानुस्यूतत्वात् । अनन्त-
त्वन्तु सतो ज्ञानस्य च पूर्व्वमेव प्रतिपादितम् । एवं सत्यं ज्ञानमनन्तं
न भिन्नस्वरूपमेकमेवेति सिद्धेऽन्येषामपि स्वरूपाणां तदभिन्नत्वमिति
साधनं न दुष्करम् । ज्ञानमेव शिवम्, यतो जीवानां प्रयोजनानि
जानाति ब्रह्म पूर्णज्ञानत्वात्, तत एवोत्पद्यन्ते तदायोजनानि च पूर्व्व-
मेव । अनन्तत्वेन हि तस्य प्रपञ्चातीतत्वमतो न पृथग्युक्तेरावश्यकता ।
ज्ञाने नाज्ञानस्यास्तित्वमतोऽस्य शुद्धत्वं स्वाभाविकमेव । अविशुद्धत्वं
दु:खहेतुरतो विशुद्धत्वेऽस्य स्वाभाविके सुखस्वरूपत्वमिति एकस्यैव
चित्स्वरूपस्य भिन्नदृष्ट्या दर्शनेन भिन्नस्वरूपवत्त्वेन प्रतीतिर्न तु स्वरूपत
एव भिन्नत्वम् ।" इति ।

साधनसिद्धावीश्वरप्रसादात् किं वा चरमलभ्यमस्मिन् शास्त्रे निर्दि-
ष्टमिति पृच्छायां ब्रह्मभाव इत्युत्तरम् । कोऽयं ब्रह्मभाव: ? ब्रह्म-
साधर्म्यावगात् (१४।२) ब्रह्मणि निर्वृति: (२।७२,५।२४),ब्रह्मणि स्थिति:
(५।१९।२०), ब्रह्मणि प्रवेश: (११।५४,१८।५५), ब्रह्मणि निवास: (१२।
८), ब्रह्मसम्पन्नता (१३।३०) इति । ब्रह्मसाधर्म्यं ब्रह्मस्वरूपैक्यमिति
निर्व्विवादो राद्धान्त: । तस्मादेव शाश्वतस्थानप्राप्ति: (१८।६२) इति
मन्तव्यम् ; अपुनरावृत्तिर्ब्रह्मणि स्थितावन्याभिनिवेशाभावात् । तस्मिन्
स्थितेरप्राप्तौ विषयसम्बन्धानिवृत्ते: पार्थिवलोकेषु देहसम्बन्ध:, निखिल-
विश्वभ्रमणञ्च यावन्न सिद्धत्यपुनरावृत्ति: । पापाचारिणां नित्यकाल-
व्यापिन्यसद्गति: "तानहं द्विषत: क्रूरान्" (१६।१९-२०) इत्यादिश्रव-
णाच्च मन्तव्या, दुराचारं परिहाय चात्मन: श्रेय:समाचरणेन तत्रैव
(१६।२२) तेषां सद्गतिश्रवणात्, अनुगीतायाञ्च (२६च, २६-२८श्लो) गत्यु-
पायप्रदर्शनात् ।

यदपि पूर्व्वव्याख्यातृभिर्भगवदाज्ञापालनं तदिच्छानुवर्त्तनं चत्वव-दीश्वराय कारणं स्वस्वनिबन्धेषु भूयोभूयोऽवादि, तथापि गीतायां न क्वापि तत्तच्छब्दप्रयोगो दृश्यते। किमतो वक्तव्यं यथायार्थहृदये-ऽवर्त्तत, तत्तत्त्विवारोपितं व्याख्यातृभिरिति। न केनापि प्रतिवदितुं शक्यं यत्तेन प्रवर्त्तकत्वमीश्वरस्य (१८।६१) अष्टवाक्येनाभ्यधायीति। तमनुमन्तेति (१३।२२) निर्द्दिश्य स्वनिर्देशेच्छाज्ञापनं भगवतश्चोक्तवान् सः। ज्ञानादिकं तत्स्थात्तस्मात् प्रवर्त्तते (१५।१५), स्वयमीश्वरो ज्ञानालोकं विदधाति (१०।११), इत्यपि तेनाभिहितम्। दार्ढ्येन स्वमतानुसरणानुरोधो (३।३१-३२) भगवदाज्ञापालने प्ररोचनमेवाभि-व्यनक्ति। "मच्चित्तः सर्व्वदुर्गाणि मत्प्रसादात् तरिष्यसि। अथ चेत्त्व-महङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि॥" (१८।५८) इत्यनेन यदेव भगवा-नन्तर्यामी कर्त्तुमाज्ञापयति तस्यैवानुसरणं श्रेयःसाधकं विपरीते पुन-रात्मविनाश इति स्पष्टम्। अस्मिन् गीताशास्त्रे परापरप्रकृती अधि-ष्ठाय स्वाभिप्रायं ज्ञापयतीश्वर इति यद्दृश्यते, तेन साक्षात्सम्बन्धो न विहन्यते परस्याज्ञापयितुरिति सुधीभिर्विभाव्यम्।

कोऽयं गीताशास्त्रस्य वक्ता कोऽयं निबन्धा चेत्यस्योत्तरमदात् श्रीमच्छङ्करः—"स च भगवान् [कृष्णः] ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजोभिः सदा सम्पन्नस्त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्य अजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् स्वमा-यया देहवानिव जात इव लोकानुग्रहं कुर्व्वन् लक्ष्यते ; स्वप्रयोजना-भावेऽपि भूतानुजिघृक्षया वैदिकं हि धर्म्मद्वयमर्ज्जुनाय शोकमोहमहो-दधौ निमग्नायोपदिदेश गुणाधिकैर्हि गृहीतोऽनुष्ठीयमानश्च धर्म्मः प्रचयं गमिष्यतीति। तं धर्म्मं भगवता यथोपदिष्टं वेदव्यासः सर्व्वज्ञो भगवान् गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध।" इति। अनुगी-तायाः प्रामाण्यन्तु तद्वचनेनैव सर्व्वैरनुभूयताम् "तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्यात्यन्तोपरमलक्ष-णम्, तच्च सर्व्वकर्म्मसन्न्यासपूर्व्वकादात्मज्ञाननिष्ठारूपाद्धर्म्माद्भवति। तम-

यमेव गीतार्थवक्तारमुद्दिश्य भगवतैवोक्तं 'स हि धर्मः सुपर्य्याप्तो ब्रह्मणः पदवेदने' इत्यनुगीतासु। किञ्चान्यदपि तत्रैवोक्तं 'नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी। यः स्यादेकासने लीनस्तूष्णीं किञ्चिदचिन्तयन्॥' 'ज्ञानं सन्न्यासलक्षणम्' इति च" इति। तत्रच भाष्यविवेचने श्रीमद्भिरेवा—"वक्तृभेदादभिप्रायभेदाशङ्कां वारयति भगवतैवेति। उक्तमनुगीतास्विति सम्बन्धः" इति। नास्माकं हृदये गीताशास्त्रस्य वस्तुरूपनिबन्धस्य विषये चानुगीतायाश्च प्रामाण्ये संशयो वर्त्तते। अतोऽर्वाचीनजनानां संशयमनुसृत्य विचारकार्य्येऽवतरणाय नास्माकं रुचिरस्ति। भक्तिपथप्रवर्त्तनादिविषये या वितर्कोत्थापिताऽर्वाचीनैः, सातिपूर्व्वमेव संस्कारदोषसम्भूता चासत्यप्रतिष्ठेति प्रतिपन्नमस्माकं विचारेण। तदन्यत्र प्रदर्शयितव्यमिति नात्र तदुपन्यास इति शम्।

इति श्रीमद्भगवद्गीतासमन्वयभाष्योपसंहारः।

सांकेतिकाक्षरविवृतिः।

साङ्केतिकाक्षरम्	ग्रन्थनाम।
अ, गी,	अनुगीता।
अनु, प,	अनुशासनपर्व्व।
अ, प,	अश्वमेधपर्व्व।
आ, गृ, सू,	आश्वलायनगृह्यसूत्रम्।
आ, प,	आदिपर्व्व।
आ, वा, प,	आश्रमवासिकपर्व्व।
उ, प,	उद्योगपर्व्व।

साङ्केतिकाक्षरम्	ग्रन्थनाम।
च, सं,	चरक्संहिता।
ऐ, उ,	ऐतरेयोपनिषत्।
ऐ, उ, नी, क, धृ,	ऐतरेयोपनिषत् नीलकण्ठधृता।
काठ,	काठोपनिषत्।
क, प,	कर्णपर्व्व।
छा, उ,	छान्दोग्योपनिषत्।

[illegible] [illegible]।

[illegible]। [illegible]।

त, उ, [illegible]उपनिषत्।
तै, उ, तैत्तिरीयोपनिषत्।
तै, ब्रा, तैत्तिरीयब्राह्मणम्।
द, सं, दक्षसंहिता।
नि, निरुक्तम्।
पा, भा, पातञ्जलसूत्रभाष्यम्।
प, सू, पातञ्जलसूत्रम्।
प्र, उ प्रश्नोपनिषत्।
ब्र, वै, पु, ब्रह्मवैवर्त्तपुराणम्।
भा, (भाग,) भागवतम्।
म, आ, प, महाभारतादिकपर्व्व।
मा, उ, माण्डूक्योपनिषत्।
मा, पु, मार्कण्डेयपुराणम्।
मा,भ,टी, माध्वभाष्यटीका।
मु, उ, मुण्डकोपनिषत्।
मौ, प, मौषलपर्व्व।
यो, च, योगचन्द्रिका।
यो, वा, योगवाशिष्ठम्।
रा, प, रामायणारण्यकाण्डम्।
रा, उ, रामायणोत्तरकाण्डम्।
ल, वि, ललितविस्तरः।

व, प, वनपर्व्व।
वा,सं,उ,वाजसनेयसंहितोप-
निषत्।
वि, पु, विष्णुपुराणम्।
बृ, आ, बृहदारण्यकोपनिषत्।
वे,त,सा, वेदान्ततत्त्वसारः।
वे, सू, वेदान्तसूत्रम्।
वे,सू,भा, वेदान्तसूत्रभाष्यम्।
श,प,ब्रा(श,ब्रा,) शतपथब्राह्मणम्
श, भा, शङ्करभाष्यम्।
शा, प, शान्तिपर्व्व।
श्वे, उ, श्वेताश्वतरोपनिषत्।
स, प, सभापर्व्व।
स,स,प,स, सर्व्वसंवादिनी
परमात्मसन्दर्भः।
सा, सू, सांख्यसूत्रम्।
स्व, प, स्वर्गारोहणपर्व्व।
ह,भ,र,सि, हरिभक्तिरसामृत-
सिन्धुः।
ह, वं, हरिवंशः।

भ्रमसंशोधनम्।

२१पृष्ठम्।   ५—८ पंक्तयः।

अत्रापि च न इति भावत ऐक्यम् *।

* उक्तिरेषा निरवधानतया, संशोध्या पुनरनया—" 'एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः। आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्॥' इत्यनन्तरोक्तान् कामादीन् सर्व्वान् परिहाय ईश्वरा-माचरन् सद्गतिं प्राप्नोतीति विज्ञाप्ति।" इति।

सप्तश्लोकी गीता।

८।१२ ११।३६ १३।१४ ८।९

१५।१ १५।१५ ९।३४

श्लोकार्द्धेन प्रवक्ष्यामि साधनं नातिविस्तरम्।

अन्तराया विहन्यन्ते चोङ्कारस्मरणेन हि॥

अवसन्नायामतोऽत्र सत्त्वं परं धीमहीत्यनेनास्य योजना।

अनन्यचेताः सततं यो मां स्मरति नित्यशः।

तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥

अन्यच्च।—

स्मर्त्तव्यः सततं विष्णुर्विस्मर्त्तव्यो न जातुचित्।

सर्व्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः॥

शुद्धिपत्रम् ।

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
।/०	१६	तिर्द्धारयितु'	निर्द्धारयितु'
१।/०	१०	संप्रवृत्तानि	सम्प्रवृत्तानि
१।/०	१७	पृधक्कृत्य	पृथक्कृत्य
१॥०	२	धार्विति	धाविति
९	२४	व्यामिश्रेणेव	व्यामिश्रेणेव
१२	१९	न	नः
१४	१	सुवेशाम्	सुशेवाम्
१८	२१	लोकान्तर-	लोकान्तर-
१९	३	लाकाना-	लोकाना-
२१	६	पुण्यलाका	पुण्यलोका
„	२४	नच्छन्ति	गच्छन्ति
२२	१७	इत्युक्तदिविष्ठानाम्	इत्युक्तिदिविष्ठानाम्
२३	„	अयभत्र	अयमत्र
२८	१४	सम्प्रपश्यि	सम्प्रपश्यति ।
२९	„	कर्त्तत्व-	कर्त्तृत्व-
३२	१७	-दिच्छा पालन-	-दिच्छापालन-
४९	२२	सिद्धति	सिध्यति
५३	३	उभि	उभे
५६	१७	यावदध्यायपरिसमाप्तिं	यावदध्यायपरिसमाप्ति
६०	१	सत्त्व	सर्व्वं
६२	९	अपक्रान्तो	अप्रक्रान्तो
७६	२३	पुंनरूपसंहार-	पुनरुपसंहार-

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
७८	१२	भारत:	भारत
८१	४	भिक्षुकस्य-	[illegible]
८८	१०	[illegible]	[illegible]
९४	१२	सविता	सविता-
११२	२४	श्रीमच्छङ्कर	श्रीमच्छङ्कर
१२२	१६	उपधावत्	उपाधावत्
१२४	२१	मुत्पुर्व-	मुत्पूर्व-
१२७	२७	त्येनोपख्याप्य	त्वेनोपख्याप्य
१२९	२३	युक्त	[illegible]
१४२	१४	मिथ्याध्यान'	मिथ्याध्यानं
१६२	२०	प्रेरयितारश्च	प्रेरितारश्च
”	२१	त्तुष्टस्तेना-	त्तुष्टस्तस्तेना-
१६६	१	कर्त्तृत्व'	कर्त्तृत्वं
१६७	८	कर्म्मफलचेति	कर्म्मफलचेति
१८२	२६	-च्छिसन् सर्व्व-	-च्छिसन्तु सर्व्व-
१८३	१	५।१।१५	८।१।१५
१९५	२	प्रवक्ष्यामि	प्रवक्ष्यामि
२०८	२२	-वक्ष्यामीति	-वक्ष्यामीति
२१०	१२	प्रतीयमानपि	प्रतीयमानमपि
२१६	६	७६म्	[illegible]
२१७	२५	सर्व्वेषामेव	सर्व्वेषामेव
२२५	२४	मायया	[illegible]
२३१	११	[illegible]	[illegible]
२३४	२६	[illegible]	[illegible]
२४१	१५	[illegible]	[illegible]
”	२४	[illegible]	[illegible]

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
२४२	२	प्रारमेश्वरं	परमेश्वरं
,,	२५	-मृतस्य तद्द्राख्यया	-मृतस्य-तद्द्राख्यया
२४३	२०	कठ, ५ १५	कठ, ५।१५
२४८	२१	त त्वङ्गोरात्रयुक्तेषु	न त्वङ्गोरात्रयुक्तेषु
२५५	१४	रात्रि पितरः	रात्रिः पितरः
२६६	२०	-वयास्त न	-वयास्ते न
२६७	,,	लाकसंख्यया	लोकसंख्यया
२६८	२५	कोशाङ्क्षिपा	कोशाङ्क्षिपी
२७१	२१	एकत्वन	एकत्वेन
२७२	१२	द्रव्यत्वाविलापे	द्रव्यत्वाविलोपे
२७४	२३	नमसोऽस्त	नमसोऽस्ते
२८१	२५	अन्तकरणग्रह	अन्तःकरणग्रह
२८६	६	दृष्ठर्हि	दृष्टिर्हि
२८८	१५	आत्मति	आत्मेति
,,	२६	यर्व्वाणि	सर्व्वाणि
३००	,,	ालेक	काले
३०४	१३	कल्पः	जल्पः
३०९	२४	तस्याहमीश्वरा	तस्याहमीश्वरो
३१०	१२	सुकृतिनी	सुकृतिनो
,,	१५	स्वाश्रयः	स्वाश्रयः
३११	२०	वस्तुजात'	वस्तुजातं
३१२	८	निरुपाधिकं	निरुपाधिकं
३१९	१५	मोच्येत	मोच्येत
३३३	२०	मोचधृत्वा	मोचेधृत्वा
३४०	,,	श्रेष्ठम्	श्रेष्ठम्
३४७	,,	सदिपुरते	सदुच्यते

पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
३४८	१९	ब्रह्मान्वय-	ब्रह्मान्वेय-
३६४	१७	हर्षविषादृशून्यः	हर्षविषादशून्यः
३७२	१९	श्रीमद्दैपायनस्य	श्रीमद्द्वैपायनस्य
३७३	८	पापकत्यां	पापकृत्यां
३७८	१४	चित्तभूमेः	चित्तभूमेः
३७९	८	श्रीमद्विष्णुपुर्य्योक्तौ	श्रीमद्विष्णुपुर्य्युक्तौ
३८२	२०	चैतन्यपतितृप्रेरणा-	चैतन्यपतिप्रेरणा-
३८५	२१	त्यादिकस्वरूपम्	त्वादिकस्वरूपम्
३९३	१	त्ववमजानन्तः	त्वेवमजानन्तः
३९५	१८	चास्मदधिष्ठित-	चाम्मदधिष्ठित-
३९९	१०	स्वत्वाभिनिवेशं	चेत्वाभिनिवेशं
४०३	५	साधर्म्यं	साधर्म्यं
४०९	६	संश्लषयति	संश्लेषयति
४१३	८	शङ्कपत	सङ्कपत
४१५	७	शरीरं	"शरीरं
४२४	२५	मस्यति	मस्येति
४३६	९	मेदोऽस्ति	भेदोऽस्ति
,,	१२	मेददर्शनात्	भेददर्शनात्
४४६	१८	आसुरः	आसुरः
४५१	१८	मोगी	भोगी
,,	२३	लप्स्ये	लप्स्ये
४५३	१९	नास्त्ववकाशो	नास्त्यवकाशो
४६८	८	साधुरयं	साधुरयं
४७६	२५	सन्न्वस्य	सन्न्यस्य
४८५	[illegible]	[illegible]	सत्त्वेन
४९०	७	मोक्तेति	भोक्तेति



पृष्ठम्	पंक्तिः	अशुद्धिः	शुद्धिः
४९९	१	-रागद्वेषत:	-रागद्वेषत:
५००	११	मद्भक्तिरूपतिष्ठति	मद्भक्तिरुपतिष्ठते
५०१	७	रक्षित:	वाचित:
५०२	२४	ववयावत्	ययथावत्
५०३	१०	दु:खानन्तच	दु:खान्तच
५०४	९	परिपक्कावस्थायां	परिपक्कावस्थायां
५०५	२६	सर्व्वी	सर्व्वं
५१०	१०	इति श्रीमद्रामानुज: ;	इति ;
५१२	७	तत्तमैव	तत्तैनैव
५१५	८	द्विचन्दादे-	द्विचन्द्रादे-
५१८	५	मवति	भवति
५२१	९	च्छङ्कर:	च्छङ्कर:
५२३	१८	स्वरूपतो	स्वरूपतो
५२५	१९	-ब्रह्मपाप्ति-	-ब्रह्मप्राप्ति-
५३४	११	त्रिभिगुणमयै-	त्रिभिर्गुणमयै-
५४१	१५	तद्धेतुर्गूणवैषम्यं	तद्धेतुर्गुणवैषम्यं
५५१	१	स्यादभिन्नास्त	स्यादभिन्नास्ते
५६४	३	शरीरादिसम्बन्ध-	शरीरादिसम्बन्ध-

संशोधनेऽसहायस्य याऽविशुद्धिर्न दृग्गता ।

संशोध्या सा बुधै: क्षाम्या प्रमादगणनापरै: ॥
